THE

KASHI SANSKRIT SERIES

(*HARIDAS SANSKRIT GRANTHAMALA*)

NO. 103.

(Vyakarana Section No. 12.)

THE

MĀDHAVĪYA DHĀTŪVṚITTI

of

SAYAṆĀCHĀRYA

Edited with Introduction, Index, etc.,

By

VYAKARṆĀCHĀRYA

Panidt Ananta S'astri Phadake

Professor, Govt. Sanskrit College, Benares.

and

Pandit Sada S'iva S'arma S'astri

Professor, S. D. Jain Mahā Vidyalaya, Benares.

PUBLISHED & SOLD BY

JAI KRISHNADAS-HARIDÂS GUPTA,

The Chowkhamba Sanskrit Series Office,

BENARES.

PRINTED, BY
JAI KRISHNA DAS GUPTA
Vidya Vilas Press.
Benares City.

1934.

हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशीसंस्कृतसीरिज़्पुस्तकमालायाः

१०३

व्याकरणविभागे (१२) द्वादशं पुष्पम् ।

॥ श्रीः ॥

माधवीयधातुवृत्तिः

श्रीसायणाचार्यकृता ।

काशीस्थराजकीयप्रधानसंस्कृतपाठशालाऽध्यापक-व्याकरणाचार्य-मीमांसातीर्थ-फड्के-
इत्युपाह्व-पण्डितानन्तशास्त्रिणाऽल्पभागा संशोधिता; अवशिष्टा च काशीस्थ-
श्रीस्याद्वादसंस्कृतमहाविद्याऽऽलयाध्यापकसाहित्योपाध्याय-व्याकरण-
शास्त्रिपदवीक-जोशीत्युपाह्व-पण्डित-सदाशिवशास्त्रिणा
परिष्कृत्य संशोध्य; बृहद्भूमिकयाऽकारादिधातु-
सूचिकया च संयोज्य सुसम्पादिता ।

प्रकाशकः—

जयकृष्णदास-हरिदास-गुप्तः—
चौखम्बा-संस्कृत-सीरिज़ आफिस,
बनारस सिटी ।

१९९१.

* श्रीः *

भूमिका ।

इह खल्वनेककल्मषतयाऽचिन्त्याप्रमेयदुःखजालसमाकुलेऽखिल इलातल आधिभौतिकाध्यात्मिकाधिदैविकसकलदुःखापहारकस्य कर्मोपासनजीवब्रह्मैक्यज्ञानेनाभ्युदयनिःश्रेयससिद्धिहेतुकस्य धर्मस्य साधनभूताः परब्रह्मणो निश्वासभूता भगवन्तोवेदा विजयन्तेतरामिति न तिरोहितं विदुषाम् ।

अत्र मनुः—

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ इति ।

को नाम भगवान् वेदः, किञ्चास्य लक्षणमित्यत्रोच्यते—इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः । अलौकिकपदेन प्रत्यक्षानुमानयोर्व्यावृत्तिः ।

उक्तञ्च श्लोकवार्तिके—

श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रतीयते ।
ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः ॥ इति ।

उक्तञ्चान्यत्र—

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।
एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥ इति च ।

अस्य भगवतो वेदस्य प्रामाण्यं तु बोधकत्वात्स्वत एव सिद्धम् । पौरुषेयवाक्यं तु बोधकं सदपि पुरुषगतभ्रान्तिमूलत्वसम्भावनया तत्परिहाराय मूलप्रमाणमपेक्षते । न तथा वेदः । तस्य नित्यत्वेन वक्तृदोषशङ्काऽनुदयात् । तत्रभगवता जैमिनिनाऽपि प्रथमाध्याये प्रथमपाद एतदेव सूत्रितम्—"तत्प्रमाणं बादरायणस्यानपेक्षितत्वात्" इति ॥

एक एवायं वेद उपाधिवशात्त्रयश्चत्वारो वेति व्यवहारविषयताम्प्राप्तः । तत्राप्येकशतमध्वर्युशाखाः, सहस्रवर्त्मा-सामवेदः, एकविंशतिधा बाह्वृच्यम् , नवधाऽथर्वणो वेदः इत्याद्युपाधिभेदेनानेकविधः ।

अस्य भगवतो वेदस्याध्ययनमानुपूर्व्या अर्थतश्च द्विविधं दरीदृश्यते । केचन विप्रवरा अस्मिन्भारते वैदिकेतिनाम्ना लोके प्रथिताः स्वगुरुपरम्परया शास्त्रशुद्धविधिना गुरुमुखेभ्य उदात्तानुदात्तस्वरिताद्युक्तस्वरपूर्वकम् अनुस्वारानुनासिकयुक्तं यथाऽर्थं परिशुद्धोच्चारणमुररीकृत्य वैदिकमन्त्राणां शुद्धोच्चारणञ्च विज्ञाय विपुलायासेन समग्रां स्वकीयां संहितां स्वकण्ठस्थितां विधाय स्वशिष्यांश्च पाठयित्वा वेदानां प्रचुरप्रचाराय प्रयतन्ते। एते खलु सर्वाणि कार्याणि विहाय बहुपरिश्रमान् विधाय भिक्षावृत्तिं स्वीकृत्य

शुद्धोच्चारणेन वेदसंरक्षणं कुर्वन्तीति तेऽस्मदीयधन्यवादार्हाः । परन्त्विमे वैदिका मन्त्रोच्चारणपरायणा वेदानामनर्थज्ञा इति तावदसंतोषकरम् । केवलमर्थदृष्ट्याऽध्ययनमपि न श्रेयस्करमिति वयं मन्यामहे । किन्त्वानुपूर्व्या-युक्तं सार्थवेदाध्ययनं द्विजानां कर्तव्येषु मुख्यतमम्, तदभावे तु शूद्रत्वप्राप्तिः ।

"ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति ।

उक्तश्च मनुना—

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥ इति ।
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ॥
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥

इति पाणिनीयशिक्षावचनादतिगम्भीरस्य वेदस्यार्थमवबोधयितुं शिक्षा-दीनि षडङ्गानि प्रवृत्तानि । अत एवाथर्वणिकैस्तेषां षडङ्गानामपरविद्यारूपत्व-मुक्तं मुण्डकोपनिषदि । तथा हि—"द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति, परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः, शिक्षा, कल्पो, व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ—परा, यया तदक्षरमधिगम्यते" (मुण्ड० १।१।४) इति ।

साधनभूतधर्मज्ञानहेतुत्वात् षडङ्गानां कर्मकाण्डानामपरविद्यात्वम् । परमपुरुषार्थभूतब्रह्मज्ञानहेतुत्वादुपनिषदां परविद्यात्वम् ।

छन्दः—

छन्दसामुपयोगस्तावत्कर्मकाण्डेऽत्यावश्यकः । श्रूयते च—

"गायत्रीभिर्ब्राह्मणस्यादध्यात्, त्रिष्टुभो राजन्यस्य, जगतीभिर्वैश्य-स्य" ॥ इति । तत्र मगणयगणादिसाध्यो गायत्र्यादिविवेकश्छन्दोग्रन्थमन्त-रेण न सुज्ञेयः ।

अपरञ्च—"यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याज-यति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पात्यते प्रमीयते वा पापी-यान् भवति । तस्मादेतानिच्छन्दांसि मन्त्रे मन्त्रे विद्याम्" इति श्रूयते । तस्माद्वेदवेदनायच्छन्दोग्रन्थ उपयुक्त इति सिद्धम् ।

कल्पः—

कल्पो नामाश्वलायनापस्तम्बबोधायनादिसूत्रम् । कल्प्यते समर्थ्यते यागप्रयोगोऽत्रेति व्युत्पत्तेः ।

"इषे त्वा" इत्यादिमन्त्रास्तु क्रत्वनुष्ठानक्रमेणैवाम्नाता इत्यापस्तम्बादयस्तेनैव क्रमेण सूत्रनिर्माणे प्रवृत्ताः । कल्पसूत्रं मन्त्रविनियोगेन क्रत्वनुष्ठानमुपदिश्योपकरोति । अतः कल्पोऽप्यावश्यक इत्यायातम् ।

ज्यौतिषम्—

ज्यौतिषस्य प्रयोजनं तावत्—"यज्ञकालार्थसिद्धये" इति तस्मिन्नेव ग्रन्थे विहितम् । कालविशेषविधयश्च श्रूयन्ते—"सम्वत्सरमेतद्व्रतं चरेत्" "सम्वत्सरमुख्यं भूत्वा" इत्येवमादयः संवत्सरविधयः । "वसन्ते ब्राह्मणोऽग्नीमादधीत "ग्रीष्मे राजन्य आदधीत "शरदि वैश्य आदधीत" इत्याद्या ऋतुविधयः। एवं मासपक्षतिथिकालनक्षत्रविधयः श्रूयन्ते । अतः कालविशेषानवगन्तुं ज्यौतिषमुपयुक्तम् ।

निरुक्तम्—

निरुक्तन्नाम—अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम् । यथा—गौः, ग्मा, ज्मा, क्ष्मा, क्षा, क्षमेत्यारभ्य वसवः वाजिनः, देवपत्न्यो देवपत्न्य इत्यन्तो यः पदानां समाम्नायः समाम्नातस्तस्मिन् ग्रन्थे पदार्थावबोधाय परापेक्षा न विद्यते। एतावन्ति पृथिवीनामानि, एतावन्ति हिरण्यनामानीत्येवं तत्र तत्र विस्पष्टमभिहितत्वात् । यद्यपि व्याकरणबलेन केषां चिन्निर्वचनानां सिद्धिर्भवितुमर्हति, तथापि न सर्वेषां सिद्धिरस्ति । अतो ग्रन्थकारेणैवोक्तम्—"तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकञ्च" इति । तस्माद्वेदार्थावबोधायोपयुक्तं निरुक्तमिति ।

शिक्षा—

शिक्षा नाम—वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा । तथा च तैत्तिरीयोपनिषदारम्भे समामनन्ति—"शीक्षां व्याख्यास्यामः—वर्णः, स्वरः, मात्रा, बलं, साम, सन्तान इत्युक्तः शिक्षाऽध्यायः" (तै० आ० ७।२) इति ।

वर्णोऽकारादिः । स्वरः—उदात्तादिः । मात्रा—ह्रस्वादिः । बलम्—स्थानप्रयत्नौ । सामशब्देन साम्यमुक्तम्, अतिद्रुतातिविलम्बितगीत्यादिदोषराहित्येन माधुर्यादिगुणयुक्तत्वेनोच्चारणं साम्यम् । एतत्सर्वं पाणिनीयशिक्षायां स्पष्टम् । संतानः—संहिता, 'वायवायाहि' इत्यत्रावादेशः । 'इन्द्राग्नी आगतम्' इत्यत्र प्रकृतिभावः । एतच्च व्याकरणेऽभिहितत्वाच्छिक्षायां नोक्तम् ।

शिक्ष्यमाणवर्णातिवैकल्ये बाध इति पाणिनीयशिक्षायामेवाभिहितम् । तथाहि—

"मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्" ॥

"इन्द्रशत्रुर्वर्धस्व" इत्यस्मिन्मन्त्रे (तै० सं० २।४।१२।१) विवक्षितेऽर्थे तत्पुरुषसमासे "समासस्य" (पा० सू० ६।१।२२३) इति सूत्रेण तत्पुरुषत्वाद् अन्तोदात्तेन भवितव्यम् । आद्युदात्तस्तु प्रयुक्तः, तथा सति पूर्वपदप्रकृतिस्वरत्वेन बहुव्रीहित्वाद् इन्द्रो घातको यस्य इत्यर्थः सम्पन्नः । अतः स्वरवर्णाद्यपराधनिरासाय शिक्षाग्रन्थोऽप्यावश्यक इति ।

व्याकरणम्—

व्याकरणं नाम—अर्थविशेषमाश्रित्य स्वरप्रकृतिप्रत्ययादीन् विशेषेण संस्कारविशेषेण आ—समन्तात्—वैदिकां लौकिकांश्च शब्दान् करोतीति तथाभूतः पाणिन्यादिमहर्षिप्रणीतो ग्रन्थसमूहः ।

अस्य व्याकरणस्य प्रणेतारोऽष्ट नव वा आचार्या बभूवुः ।

केचित्—

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥ १५ ॥

इत्याहुः ।

अपरे तु—

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।
सारस्वतं चापिशलं शाकलं पाणिनीयकम् ॥

इत्याहुः ।

ऐन्द्रं व्याकरणं तावच्छ्रुत्या ज्ञायते । तथा हि–"वाग्वै पराच्यव्याकृताऽवदत्, ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुरु" तामिन्द्रो मध्यतोऽपक्रम्य व्याकरोत्, तस्मादियं व्याकृता वागुच्यते" इतिश्रुतिः इन्द्रस्य व्याकरणकर्तृत्वे प्रमाणम् ।

"चान्द्रास्तु-आत्मोदरकुक्षिष्विति पेठुः" इति वचनाच्चान्द्रव्याकरणमपि पूर्वमासीदिति सिध्यति ।

काशकृत्स्नं व्याकरणं भगवता भाष्यकारेण—"शताच्च ठन्यतावशते" (पा० सू०५।१।२१) इत्यत्र भाष्ये नाम्ना निर्दिष्टम् ।

अग्निपुराणेऽन्त्यभागे कौमारव्याकरणस्योल्लेखो दृश्यते ।

सारस्वत—शाकटायन—ऋकृतन्त्राख्यानि व्याकरणानि चेदानीं मुद्रितानि समुपलभ्यन्ते सर्वत्र । आपिशलशाकलयोश्च पाणिनिसूत्रेषु तत्र तत्र नाम्ना निर्दिष्टत्वात्तावपि पूर्वमास्तामिति निश्चप्रचम् ।

पाणिनीयव्याकरणं तु सर्वत्र प्रचलत्येव । एवम् "अवङ् स्फोटायनस्य" इत्युक्तेः स्फोटायनम्,"पौष्करसादेः" इति वार्तिकात् पौष्करसादिव्याकरणम् , "विन्दतिश्चान्द्रदौर्गादेः" इत्युक्तेर्दौर्गव्याकरणम् । "व्याघ्रभूत्यादयस्त्वेनम्" इति कारिकाबलाद् व्याघ्रभूतेर्व्याकरणश्चासीदिति ।

एवमप्याशुबोध—जैनेन्द्र—मुग्धबोध-कलापादीनि बहूनि व्याकरणानि सन्ति ।

सत्स्वपि सर्वेषु व्याकरणेषु सार्वलौकिकवैदिकशब्दानां नितरां व्युत्पादकं पाणिनीयव्याकरणमेव । अन्येषु व्याकरणेषु लौकिकालौकिकशब्दानां न व्युत्पादनं दृष्टिपथमायातम् ।

अत एवास्य वेदाङ्गत्वम् । इदमेवाभिप्रेत्य "इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं यथाऽऽचार्या ऊचुः, ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते, न भुक्त्वा न नक्तं प्रब्रूयात् ब्रह्मराशिः" इति ऋक्तन्त्रव्याकरणेऽस्य चतुर्दशसूत्रकदम्बकस्याम्नायत्वमुक्तं तन्मूलकत्वादस्यैव व्याकरणस्य वेदाङ्गत्वं युक्तम् । अत एवास्य ज्ञाने सर्ववेदपारायणजं पुण्यमिति स्पष्टं शब्देन्दुशेखरे नागेशेनोक्तम् । छान्दोग्योपनिषदि व्याकरणमुपक्रम्य "वेदानां वेदः" इत्युक्तम् ।

अत्र पराशरोपपुराणम्—

पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ॥

तस्यैतस्य व्याकरणस्य प्रयोजनविशेषो वररुचिना वार्तिके दर्शितः—"रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" इति ।

एतानि रक्षाऽऽदिप्रयोजनानि प्रयोजनान्तराणि च महाभाष्ये पस्पशाऽऽन्हिके भगवता पतञ्जलिना स्पष्टीकृतानि। रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यति वेदार्थं चाध्यवस्यति । ऊहः खल्वपि न सर्वैलिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः; ते च यज्ञाङ्गत्वेन यथायथं विपरिणमयितव्याः । तान् नावैयाकरणः शक्नोति विपरिणमयितुम् । तस्मादध्येयं व्याकरणम् । आगमः खल्वपि "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति । प्रधानञ्च षट्सु अङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति । लघ्वर्थं चाध्येयं व्याकरणम् । बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां पारायणं प्रोवाच, नान्तं जगाम । बृहस्पतिश्च वक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रम् अध्ययनकालः । अन्तं च न जगाम । अद्यत्वे पुनर्यदि परमायुर्भवति स वर्षशतं जीवति । तत्र कुतः प्रतिपदपाठेन सकलपदावगमः । कुतस्तरां प्रयोगेण । असन्देहार्थं चाध्येयं व्याकरणम् । याज्ञिकाः पठन्ति—'स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत' इति । तत्र न ज्ञायते किं स्थूलानि पृषन्ति यस्याः सा स्थूलपृषती, किंवा स्थूला चासौ पृषतीति। तान् नावैयाकरणः स्वरतोऽध्यवस्यति । यदि समासान्तोदात्तत्वम्, तदा कर्मधारयः । अथ पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिरिति ।

एवं च व्याकरणस्याध्ययनमत्यावश्यकमिति न संदेहलेशः ॥
उक्तञ्च सम्यगभियुक्तैः—

यद्यपि बहु नाधीषे तथाऽपि पठ पुत्र ! व्याकरणम् ।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत् ॥ इति ।

भगवान् भाष्यकारः—"एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति" इति चाह ।

सर्वेषु व्याकरणेषु निकषायमाणस्य परमप्रमाणीभूतस्य पाणिनीयव्याकरणस्योपर्यद्ययावद् बहवो ग्रन्थाः समभूवन् । ते संक्षेपतोऽन्तेऽस्माभिर्निर्दिष्टाः । तेषु ग्रन्थेषु पाणिनीयमतमनुसृत्य तत्रभवता सायणाचार्येण विरचिता धातुविषयकोऽतिप्रामाणिको लोके 'माधवीयधातुवृत्ति'रिति नाम्ना प्रथित इति समेषां विदुषां विदितचरम् ।

अस्मिन्ग्रन्थे भगवता सायणाचार्येण क्रमेण पाणिनीयधातुपाठमुररीकृत्य धातुतः तिङन्तस्य कृदन्तस्योणादेश्च पाणिनीयसूत्रवार्तिकभाष्येष्टिप्रमाणपुरस्सरं रूपाणि प्रसाध्य सूत्रवार्तिकभाष्येष्टिपरिभाषाणाञ्च सम्यगर्थं विधाय तत्र तत्रान्यग्रन्थकृतां ग्रन्थानाञ्च मतानि प्रदर्श्य स्वमतमादर्शवत् प्रदर्शितम् । तथा च माधवीयधातुवृत्तिनिर्माणोत्तरं माधवीयधातुवृत्तावनुक्तानां सौत्रकण्ड्वादिधातूनां निरूपणेऽपि भूयसा नामधातूनामेव व्युत्पादनान्मल्लग्रामन्यायेन नामधातुवृत्तिरिति नाम्नाऽपरं प्रकरणं निर्मितम् । अस्य ग्रन्थस्य सम्यगध्ययनेन विदुषां विद्यार्थिनाञ्च पाणिनीयव्याकरणस्य सम्यग्बोधो भवतीति किं निगदनेन ।

सायणाचार्यपरिचयः ।

अस्य भगवतः सायणस्य वेदशास्त्रसम्पन्नो नित्यनैमित्तिकविधिना नितान्तनिर्मलस्वान्तो जनको मायण इति नामा, जननी पतिव्रता श्रीमती नाम्नी चासीत् । गोत्रेणायं भारद्वाजः । सूत्रं चास्य बोधायनम् , कृष्णयजुर्वेदान्तर्गततैत्तिरीयशाखा चास्यासीत् । अस्य भ्रातरौ माधवाचार्यभोगनाथनामानौ वेदशास्त्रसम्पन्नौ बृहस्पतिशुक्राचार्यसदृशावभूतामित्यधोनिर्दिष्टपराशरमाधवीयारम्भश्लोकाभ्यां निश्चीयते ।

श्रीमती जननी यस्य सुकीर्तिर्मायणः पिता ।
सायणो भोगनाथश्च मनोबुद्धी सहोदरौ ॥
बौधायनं यस्य सूत्रं शाखा यस्य च याजुषी ।
भारद्वाजं यस्य गोत्रं सर्वज्ञः स हि माधवः ॥ इति ।

माधवाचार्यः ।

अस्य सायणाचार्यस्य ज्यायान् भ्राता माधवाचार्यः वैक्रमीये चतुर्दशशतके दक्षिणभारते विजयनगरसाम्राज्यप्रतिष्ठातुः श्रीमन्महाराजहरिहरस्या-

ध्यात्मिकगुरुर्नीतिशास्त्रकुशलो मन्त्रिवरोऽभवत् । माधवाचार्यमन्त्रप्रभावादेव महाराजहरिहरेण गोब्राह्मणहिताय स्वातन्त्र्यराजलक्ष्म्याः विलासाय वैदिक-धर्मप्रचाराय च प्रबलयवनानुत्पाट्य स्वराज्यं निष्कण्टकं कृतमिति भारते-तिहासे प्रसिद्धम् । अनेन पूर्वोत्तरमीमांसयोर्विस्ताराय धर्मशास्त्रस्य प्रचु-रप्रचाराय च 'पराशरस्मृतिव्याख्या' (पराशरमाधवः) 'व्यवहारमाधवः' 'कालमाधवः' 'जीवन्मुक्तिविवेकः' 'जैमिनीन्यायमालाविस्तरः' 'शङ्कर-दिग्विजयः' इत्यादयो ग्रन्थाः प्राणायिषत । गृहस्थाश्रमानन्तरं संन्यासदीक्षां स्वीकृत्य विद्यारण्य इतिनामालभत । तत्राश्रमेऽपि बहवः प्रणीताः पञ्चदशी-त्यादयो ग्रन्थाः विद्यारण्यकृतित्वेन प्रसिद्धाः ।

भोगनाथः ।

सायणाचार्यस्य कनीयान् भ्राता श्रीभोगनाथः सङ्गमनरपतेः नर्मसचिवः काव्यकलाकुशलो विन्त्रगुण्टशासनपत्रस्थप्रशस्ते रचयिता चासीदिति सायणाचार्यविरचितग्रन्थेभ्यः स्फुटीभवति ।

अस्य भोगनाथस्यालौकिकीं प्रतिभामसाधारणं नैपुण्यं कमनीयकवि-ताकलनचातुर्यञ्चावलोक्य संतुष्यति हृदयमस्माकम् । एभिस्तावत्—"रामो-ल्लासः" "त्रिपुरविजयम्" "उदाहरणमाला" "गणपतिस्तवः "शृङ्गारमञ्जरी" "गौरीनाथाष्टकम्" इत्यादयो ग्रन्थाः प्रणीताः । उपरिनिर्दिष्टग्रन्थाव-लोकनात्प्रतीयतेऽस्य प्रतिभा नैपुण्यञ्च ।

सायणस्य गुरवः ।

सायणाचार्येण तद्भ्रातृभ्यां च विरचितानां ग्रन्थानां परिशीलनतो ज्ञा-यते तेषां त्रयो गुरवोऽभूवन्निति । प्रथमो विद्यातीर्थः, द्वितीयो भारतीतीर्थः, तृतीयः श्रीकण्ठः ।

विद्यातीर्थस्तावन्महातपस्वी रुद्रप्रश्नभाष्यस्य कर्ता परमात्मात्मतीर्थानां—शिष्य आसीत् । विद्यावैभवप्रभावादेव च विद्यातीर्थं महेश्वरस्यावतार-त्वेन वर्णयति सायणाचार्यः सर्वेषां वेदभाष्याणामारम्भे—"यस्य निश्वसितं—वेदाः" इत्यादिना ।

सायणाचार्यः ।

सायणाचार्यस्तावच्चतुर्णां विजयनगराधीशानां साम्राज्येऽतिगौरव-युक्तं मन्त्रिपदमभजत । अस्य स्थितिसमयो वैक्रमीयश्चतुर्दशशतक इति शि-लालेखादितिहासाच्च ज्ञायते । अस्य मन्त्रिवरस्य सततशास्त्राभ्यासजनिता ज्ञानपरिपाकसहजा बुद्धिः क्व; लौकिकव्यवहारनिरीक्षणतत्परा राज्यभारक्षमा नीतिनिपुणता च क्व । प्रथमं तावदेते सायणाचार्याः विजयनगरसाम्राज्यस्य पूर्वविभागस्थेऽधुना तञ्जोर इतिनाम्ना प्रथिते प्रदेशे सम्यक् शासनं कुर्वतो-

महाराजहरिहरस्यानुजस्य कम्पराजस्यामात्यपदवीमभूषयत् । तस्मिन् राजनि दिवं गते सति तस्य सूनुः सङ्गमेति नामा बालतया राज्यभारं वोढुमसमर्थोऽतो भगवान् सायणाचार्य एव राज्यचक्रमचालयत् । अपाठयच्च सङ्गमनरेन्द्रं राज्यकार्यभारक्षमां सकलां राजनीत्याद्युपयोगिनीं विद्याम् । प्रान्तस्थान् बहून् देशान् विजित्य स्वबाहुबलमपि प्रकटयामास । चम्पनामानं स्वपराक्रमेण गरुडनामानञ्च नगरं सङ्गमनरेन्द्रसाहाय्येन जितवानिति शिलालेखादितिहासात् अलङ्कारसुधानिधिग्रन्थाच्च स्फुटो भवति ।

राज्यकार्यवहने समर्थं सङ्गमभूपमालक्ष्य तस्मिन् राज्यधुरामारोप्य सायणो ज्यायसा भ्रात्रा माधवाचार्येण साकं बुक्कनरेन्द्रस्य मन्त्रिपदमलञ्चकार । बुक्कनरेन्द्रे दिवं गते तस्य सूनोः हरिहरमहाराजस्यापि कानि चित् वर्षाणि मन्त्रिपदमभजत् सायणाचार्यः ।

अस्य सायणाचार्यस्य त्रयः पुत्राः कम्पणः, मायणः, शिङ्गणश्चेति आसन् । कम्पणः सङ्गीतकलासु कुशलः । मायणः गद्यपद्यात्मककाव्यकलाचतुरः शिङ्गणः क्रमजटाघनादिवेदविकृतिषु पण्डित इत्यलङ्कारसुधानिधितोऽवगम्यते ।

तथा ह्यलङ्कारसुधानिधिः—

तत् संव्यञ्जय कम्पण व्यसनिनः सङ्गीतशास्त्रे तव ।
प्रौढिं मायण गद्यपद्यरचनापाण्डित्यमुन्मुद्रय ॥
शिक्षां दर्शय शिङ्गण क्रमजटाचर्चासु वेदेष्विति ।
स्वान् पुत्रानुपलालयन् गृहगतः सम्मोदते सायणः ॥

मायणः

माधवाचार्यः | सायणः | भोगनाथः

सायणः

कम्पणः | मायणः | शिङ्गणः

एते सायणाचार्याः हरिहरमहाराजस्य ज्येष्ठभ्रातुर्माधवाचार्यस्य च निदेशं प्राप्याथर्ववेदशतपथब्राह्मणादीनाञ्च व्याख्यानानि व्याकुर्वन् ।

अस्य ग्रन्थाः—सुभाषितसुधानिधिः, प्रायश्चित्तसुधानिधिः, अलङ्कारसुधानिधिः, धातुवृत्तिः, पुरुषार्थसुधानिधिः, वेदभाष्याणि, आयुर्वेदसुधानिधिः, यज्ञतन्त्रसुधानिधिश्च ।

सुभाषितसुधानिधिः—अत्र नीतिवाक्यामृतानां सरसः सञ्चयः । प्रायश्चित्तसुधानिधिः—प्रायश्चित्तप्रतिपादकोऽयं ग्रन्थः । अस्यापरं नाम 'कर्मविपाक' इति ।

अलङ्कारसुधानिधिः—काव्यालङ्कारप्रतिपादनपरोऽयं ग्रन्थः ।

धातुवृत्तिः—पाणिनीयमतमवलम्ब्य विरचितोऽयं ग्रन्थः धातुविषयकोऽतिप्रामाणिकः ।

पुरुषार्थसुधानिधिः—पुरुषार्थोपयोगिनां पुराणस्थानां व्यासवाक्यानां सङ्ग्रहोऽत्र वर्तते ।

वेदभाष्याणि—तैत्तिरीयसंहितायाः, ऋक्संहितायाः, सामवेदस्य, काण्वसंहितायाः, अथर्ववेदस्य च भाष्याणि ।

ब्राह्मणानां भाष्याणि च—तैत्तिरीयब्राह्मणस्य, तैत्तिरीयारण्यकस्य, ऐतरेयब्राह्मणस्य ताण्ड्यब्राह्मणस्य षड्विंशस्य, सामविधानस्य, आर्षेयस्य, देवताऽध्यायस्य, उपनिषदाख्यस्य संहितोपनिषदितिख्यातस्य च भाष्याणि सर्वत्र प्रसिद्धानि ।

आयुर्वेदसुधानिधिः—आयुर्वेदसिद्धान्तदर्शनपरोऽयं ग्रन्थः ।

यज्ञतन्त्रसुधानिधिः—यागानुष्ठानविधिरस्य ग्रन्थस्य विषयोऽस्ति ।

श्रीमतः सायणाचार्यस्य जीवनवृन्तातो विमलोऽतिविततोऽस्ति न मदीया बुद्धिस्तेषां वर्णने समर्था, तथाऽपि मया भगवतो वृत्तान्तः संक्षेपेणात्र निदर्शितः ।

सायणाचार्यकृतेयं धातुवृत्तिरस्ति, न माधवाचार्यकृतेति ग्रन्थोपक्रमात्स्फुटीभवति । माधवाचार्यानुज्ञयेयं विरचितेति, प्रेमप्राचुर्यात् ज्येष्ठभ्रातुर्नाम्ना वाऽस्या माधवीयेतिनामधेयमिति कल्प्यतेऽस्माभिः । अयं माधवीयधातुवृत्तिरितिनामधेयो ग्रंथः पाणिनीयमतावलम्ब्यतिप्रामाणिकः धातुसम्बन्धिसकलकार्यविचारपरोऽतिप्राचीनो वेदभाष्यकर्तृसायणाचार्यनिर्मित इति सकलजनाल्हादकरः विद्वद्वराणां प्रमोदकरः विद्यार्थिजनहितकरश्चेति विज्ञाय श्रीहरिदासगुप्तात्मजजयकृष्णदासश्रेष्ठिना संशोधनार्थं प्रथमं व्याकरणाचार्यमीमांसातीर्थाद्युपाधिककाशिकराजकीयसंस्कृतमहाविद्यालयाध्यापकफडकेइत्युपनामकानन्तशास्त्रिभ्यः संशोधनायादायि। तैरपि प्रियवरपाठकगणसौलभ्याय रूपादीनां पृथक्तया झटितिप्रतीत्यै रूपाणां कृते ( ) इदं चिन्हम्, वार्तिकज्ञानाय [ ] इदं चिन्हम्, सूत्रव्याख्यानज्ञानाय * * इदं चिन्हम्, साधारणसूत्रज्ञानाय " " इदं चिन्हम्, परिभाषासाधारणवचनभाष्येष्टिज्ञानाय ' ' इदं चिन्हञ्च तत्र तत्र दत्वा पाठान्तराणि च तत्र तत्र विन्यस्य भू(धा०अं०१)धातुमारभ्य भ्वादिगणपठितकै (धा०अं० ६००) धातुपर्यन्ता (प्रथमपत्रमारभ्या १६८ पृष्ठङ्कपर्यन्ता) इयं धातुवृत्तिः संशोधिता । अग्रे च कार्यबाहुल्यात्स्वशरीरास्वास्थ्याच्च प्रकाशकानुमत्या तैः संशोधनार्थं सा मह्यं प्रदत्ता । मयाऽपि पूर्वसरणीमवलम्ब्य-

म० म० व्याकरणकेसरिपण्डितप्रकाण्डपरमगुरुभारद्वाजोपाह्वदामोदरशास्त्रिसंशोधित-मेडिकलहाल-इति नामकयन्त्रालयमुद्रितं पुस्तकं म्हैसुरदेशस्थमुद्रणालये मुद्रितमपरम् अन्यानि च द्वित्राणि पुस्तकानि मुहुर्मुहुरवलोक्य गुरुवरपण्डितमोकाटे इत्युपनामकगणपतिशास्त्रिमहोदयाच्छङ्कास्थलानि दूरीकृत्य यथाशेमुषि सा संशोधिता । पाठकगणसौलभ्याय चाकारादिक्रमेण धातुसूची, वेदवेदाङ्गप्रयोजनपरिचयपूर्वकसायणाचार्यपरिचयाय बृहद्भूमिका चात्र संनिवेशिता । माधवीयधातुवृत्तौ प्रसङ्गोपात्तग्रन्थकृतां ग्रन्थानाञ्च परिचयाय तेषां ग्रन्थानाञ्च नामदर्शकपत्रं पाणिनीयग्रन्थोपरि ग्रन्थकारैः कृतग्रन्थानाम्परिचयाय ग्रन्थकाराणां ग्रन्थानाञ्च परिचायकं पत्रमप्यन्ते निवेशितम् ।

अस्य मुद्रणसमये काशीस्थराजकीयपाठशालाध्यक्षैरनेकानवद्यविद्याविशारदैः कविराजकुलभूषणैर्गोपीनाथमहाशयैः पण्डितप्रवरसाहित्यार्यकमनीयकाव्यकलाकुशलखिस्ते इत्युपनामकनारायणशास्त्रिभिश्च सदयतया सरस्वतीभवनस्थपुस्तकं दत्वा यत्साहाय्यं दत्तमतस्तेऽस्माकं धन्यवादार्हाः ।

तथा च व्याकरणाचार्यमीमांसातीर्थपण्डितफडकेइत्युपाह्वानन्तशास्त्रिभिश्च प्रतिसमयं संशोधनविचारसाहाय्यं तत्तद्विषयकग्रन्थान्तरसूचनासाहाय्यं च प्रदत्तमिति तेषामुपकारभारं समुचितशब्दैः प्रकटयामि ।

अस्याः माधवीयधातुवृत्तेः संशोधने गच्छतस्खलनन्यायात् मदीयमतिमान्द्यान्मुद्रकदोषाद् दृष्टिदोषाच्चाशुद्धीनां सम्भवः कादाचित्को भवेत्, तां गुणैकपक्षपातिनो विद्वांसो हंसक्षीरन्यायेन परिशोधयन्तु ।

न चात्रातीव कर्तव्यं दोषदृष्टिपरं मनः ।
दोषो ह्यविद्यमानोऽपि तच्चित्तानां प्रकाशते ॥

इत्युक्तिमनुसंधाय मामनुगृह्णन्तु विद्वांस इति मुहुर्मुहुः साञ्जलिबन्धं सम्प्रार्थयते—

विदुषां वशंवदः—
जोशीत्युपाह्वसदाशिवशास्त्री—
साहित्योपाध्यायो व्याकरणशास्त्री च ।

॥ श्रीः ॥

अथ माधवीयधातुवृत्तिस्थप्रकरणानाम्

अनुक्रमणिका ।

इति माधवीयधातुवृत्तिस्थप्रकरणानामनुक्रमणिका ।

अथ माधवीयनामधातुवृत्तिस्थविषयाणाम्

अनुक्रमणिका ।

इति माधवीयनामधातुवृत्तिस्थविषयाणामनुक्रमणिका ।

॥ श्रीगणेशाय नमः ॥

माधवीयधातुवृत्तौ-

भ्वादिः ।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
जीयाद्धस्तिमुखो यस्य लीलयोर्ध्वाण्डखण्डने ।
कन्दाङ्कुरवदाभाति दन्ताग्रं तद्बहिर्गतम् ॥ २ ॥
चिदानन्दकलां वाणीं वन्दे चन्द्रकलाधराम् ।
नैर्मल्यतारतम्येन बिम्बितां चित्तभित्तिषु ॥ ३ ॥
अस्ति श्रीसङ्गमक्ष्मापः पृथ्वीतलपुरन्दरः ।
यत्कीर्तिमौक्तिकादर्शे त्रिलोक्यां प्रतिबिम्ब्यते ॥ ४ ॥
यशः क्षीराहुतीकृत्य यत्प्रतापहुताशने(१) ।
परे यान्ति पदं दिव्यं राजानो रणदीक्षिताः ॥ ५ ॥
तूर्णं कर्णान्तिकं प्राप्ते यत्प्रतापधनञ्जये ।
पुरो निधाय गाङ्गेयं स्वात्मा संरक्ष्यते परैः ॥ ६ ॥
कुर्वन् शत्रुयशांसि धूमपटलीं कूलङ्कषाज्यास्पदः
काष्ठासङ्गविवर्द्धितः प्रकटयन् भूतिं नवां भूयसीम् ।
आतन्वन्नितरप्रतापदहनं स्फूर्जत्स्फुलिङ्गाकृतिं
प्रायो यच्छति यत्प्रतापदहनः कस्मै न विस्मेरताम् ॥ ७ ॥
तस्य मन्त्रिशिखारत्नमस्ति मायणसायणः ।
यः ख्यातिं रत्नगर्भेति यथार्थयति पार्थिवीम् ॥ ८ ॥
नित्योन्मीलितदानवारिरधिकं निर्धूतपङ्कोदयो
दूरापास्तहरीशलङ्घनविधिर्भङ्गप्रसङ्गोज्झितः ।
क्ष्माभृत्क्षोभकृतिक्षमः क्षणियन् दोषाकरात्पोषणा-
मानन्दाय चकास्ति यस्त्रिजगतामाश्चर्यरत्नाकरः ॥ ९ ॥
यत्कीर्तौ जाह्नवीस्फूर्तौ कीर्त्या विद्विषतामपि ।
कलिन्दनन्दिनीकान्तिः स्पर्द्धयेव प्रपद्यते ॥ १० ॥
येन निर्मीयते नित्यं धनैरायो(२) धनैरपि ।

---

(१) धनञ्जये इति पाठान्तरम् ।

(२) सुधातुवृत्तिर्विहिता बुधानां श्रीवत्साचिन्हेन कृते हि नाके ।
सुधातुवृत्तिर्विहिता बुधानां श्रीकुण्डिनार्येणकलावपीह ॥

अयमधिकः श्लोक उपलभ्यते "जी" संज्ञकपुस्तक इति म्हैसुरस्थमुद्रितपुस्तकतो ज्ञायते ।

श्रेयसे यशसे दानं विदुषां विद्विषामपि ॥ ११ ॥
न ध्यानं न व्रतं नार्चा न समाधिर्न वा जपः ।
मन्त्रसिद्धा बलं यस्य मतिरेव महीयसी ॥ १२ ॥
तेन मायणपुत्त्रेण सायणेन मनीषिणा ।
आख्यया माधवीयेयं धातुवृत्तिर्विरच्यते ॥ १३ ॥
अस्याः पूर्वनिबन्धेभ्यो गुणवत्ता न कथ्यते ।
सर्व एव स्ववाक्येषु यदाहुर्गुणगौरवम् ॥ १४ ॥
सा च संत्यक्तमात्सर्यैर्गुणगृह्यैर्मनीषिभिः ।
सूत्रवार्त्तिकभाष्याणामीक्ष्यतां पारदृश्वभिः ॥ १५ ॥
कल्पयन्तु खला दोषं किं तैर्यद्यमुद्यमः ।
मुनित्रयगिरामर्थमतत्त्वविदुषः प्रति ॥ १६ ॥

भू सत्तायाम् ॥

वर्त्तत इति शेषः । सत्तेहात्मभरणम् (१-२) । यदाह हरिः-

आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते । इति

हेलाराजश्च—'अस्ति आत्मानं बिभर्त्ति सत्तां भावयतीति यावत्' इति । कैयटकारोपि—'आत्मभरणवचनो भवति' इति । नैरुक्ताश्च 'अस्तीत्युत्पन्नस्यात्मधारणमाचष्टे' इति ॥

उदात्तः ॥

नानुदात्त इत्यर्थः । तेन "एकाच उपदेशे ऽनुदात्तात्" इतीण्निषेधो न भवति । एवमुत्तरत्रापि ॥

परस्मैभाषा ॥

परस्मैपदीत्यर्थः । उपलक्षणमर्थनिर्देशः । हिमवतो गङ्गा प्रभवति, मल्लो मल्लाय प्रभवति, यामस्य प्रभवति, परान् पराभवति, इदमेवं संभवति, स्थाली तण्डुलान् संभवति, शमनुभवति, इत्यादौ प्रकाशनाङ्गनिःसरणप(३)र्याप्त्यैश्वर्याभिभवोत्प्रेक्षान्तर्भावनसंवेदनादीनामवगमात् । न च मन्तव्यं प्रभूप्रभृतयस्समुदाया एवैतेष्वर्थेषु वर्त्तन्त इति । एवं हीह भुवः क्रियावाचित्वाभावात्समुदायस्य च भूवादावपाठान्नेह धातुत्वमिति तन्निबन्धनप्रत्ययाभावात् प्रभवतीत्यादि रूपं न स्यात् । किं चोपसर्गसंबन्धमन्तरेण 'भूतिकामः पुत्त्रो भवति' 'बहुवैं भवतो भ्रातृव्यः' इत्यादावैश्वर्योत्पत्तिलिप्साद्योऽवगम्यन्ते । न चोत्पत्तिः सत्ता, उत्पन्नस्यात्मधारणलक्षणमित्युक्तत्वात् । तथा च नैरुक्ताः—'जायतेऽस्ति विपरिणमते वर्द्धते ऽपक्षीयते विनश्यति' इति क्रमेण षड् भावविकारानाहुः(४) । लोकेऽपि सत्ताजन्मनोर्भिन्नत्वादेव घटः किमुत्पद्यत इति पृष्टो न कश्चिदप्यस्तीति प्रतिवक्ति । तथाचार्येणापि "तत्र जातः" "तत्र भवः" इति भेदेन(५) निर्दिश्यते, तस्माद्धातुरेवानेकार्थाभिधायी, प्रादयस्तु प्रकरणादिवद्विशेषस्मृतिहेतवो द्योतकाः । द्योतकापेक्षा च शब्दशक्तिस्वाभाव्यात् क्वचिदेव, यथा हरिशब्दो भेकादावेव । एवमुत्तरत्राप्यर्थनिर्देशोऽतन्त्रम् । यथा बीजसंताने वपिः पठितः केशान्वपतीत्यादौ छेदनेपि वर्त्तते, तथा करोतिर्भूतप्रादुर्भावे पठितो ऽस्मानभितः कुरु, पादौ कुरु, यः प्रथमः शकलः परापतेत्स स्वरुः कार्यः, चोरंकारमाक्रोशतीत्यादौ स्थापन-

---

(१) आत्मावधारणमिति पुस्तकान्तरे । (२) धारणमिति पाठान्तरम् ।
(३) सामर्थ्येति पाठान्तरम् । (४) क्रमेणेत्यधिकमेकस्मिन्पुस्तके ।
(५) निर्देशः कृत इति पुस्तकान्तरे ।

निर्मलीकरणोपादानोच्चारणादौ वर्त्तते, चोरंकारमित्यत्र चोरशब्दमुच्चार्यतीति(१) ह्यर्थः न त्व-चोरश्चोरः क्रियते । अर्थनिर्देशस्योपलक्षणत्व एव 'कुर्द खुर्द गुर्द गुद क्रीडायामेवेत्येवकारोप-पत्तिः(२) । 'गाधृप्रतिष्ठालिप्सयोः' इत्यादौ त्वनेकार्थाभिधानं प्रपञ्चार्थम् । तदेवं सत्स्वपि बहुष्वर्थेषु माङ्गलिकत्वात् सुप्रसिद्धत्वात्सर्वपदार्थव्यापित्वाच्च सत्तानिर्देशः कृतः । उक्तं च भाष्ये(३) 'न सत्तां पदार्थो व्यभिचरति' इति । हरिणाप्युक्तम् ।

संबन्धिभेदात्सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते । इति ।

माङ्गलिकत्वमपि प्रसङ्गात् सत्ताख्यस्य परब्रह्मणः स्मरणेन । आदौ भुवो निर्देशो भूशब्द-स्य महाव्याहृतिस्मरणेन माङ्गलिकत्वात् सर्वजात्यर्थव्याप्यर्थाभिधायित्वात् "भूवादयो धातव" इति प्रसङ्गात् भूवादिशब्दस्य साधुत्वलाभहेतुत्वाच्च । कृभ्वस्तयो हि क्रियासामा-न्यवचनाः । सामान्यं च विशेषेषु प्रत्येकं परिसमाप्यते । आत्मभरणं च पाकादिष्वप्यस्तीति भ्वस्त्योः क्रियासामान्यवाचित्वम् । उक्तं च कैयटे 'तद्ध्यात्मभरणं विरुद्धार्थसमवायैः पाका-दिभिरविरुद्धैकार्थसमवायम्' इति । तेन यथा 'ब्राह्मणो गार्ग्य' इत्यत्र ब्राह्मण्यं सामान्यं गार्ग्यत्वं विशेषस्तद्वदिहाप्यात्मभरणं सामान्यं पाकादिकं तु विशेषः । करोतेरपि क्रियासा-मान्यमर्थः, ब्राह्मणो गार्ग्य इतिवत् किं करोति पचतीति क्रियासामानाधिकरण्यदर्शनात्, इत्थं च करोत्यर्थः प्रश्नः पचत्यादिभिर्व्याकृतो भवति । अत्यन्तभेदे तु करोत्यर्थो न व्याकृतो भवेत्, यथा किं करोति देवदत्तो ? घट इति । कथं तर्हि करोत्यर्थविशेषत्वे सर्वधात्वर्थानामासन-मपि करणमिति किं करोतीति प्रश्ने न करोत्यास्त इति करोत्यर्थविशेषेणोत्तरं संगच्छते । उच्यते । नात्र क्रियासामान्यं पृच्छ्यते किं तु लोकप्रसिद्धो गमनागमनादिर्विशेषस्तत्रैव लौकिकानां क्रियात्वाभिमानात्, तेन तन्निषेधपूर्वकमास्त(४) इत्यत्र युज्यते । यद्वा क्रिया-सामान्यस्यावश्यं भावात् विशेषविषय एव प्रश्न इति तन्निराकरणेन प्रतिवचनं बोद्धव्यम् । क्रिया च यद्वस्तु सिद्धमसिद्धं वा शब्देन साध्यत्वेनाभिधीयमानमाश्रितक्रमं तदिति वैयाकर-णानां मतम् । तदुक्तम् ।

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात्क्रियेति व्यपदिश्यते ॥ इति ।

नन्वेवं सति वितता बहवः क्षणा धातुवाच्या इत्युक्तं भवति, यथा पचतीत्यत्राधिश्रयणो-दकासेचनतण्डुलावपनैधोपकर्षणादिः, ततश्चैषां बहुत्वेनैकत्वाभावात् कथमेकक्रियात्वेनैक-धातुवाच्यत्वं, न चास्ति समुदायभावः, क्षणानां क्षणिकत्वेन युगपदसंनिधानात् । नैष दोषः । क्रमवतामेषां क्षणानामेकफलोद्देशेन प्रवृत्तानां सकलानां बुद्ध्या समापादितैक्यानां क्रिया-त्वव्यवहारात् । न च यदनन्तरं फलं निष्पद्यते तस्यैव फलसाधनत्वम्, एवं ह्यधिश्रयणादि-वैयर्थ्यं स्यादिति तैरपि समीहितफलानुगुणैर्यथास्वं विशेष आधीयत एवेत्यवश्यं फलसाधन-त्वमङ्गीकर्त्तव्यम्, एवं च काल्पनिकः समुदायो धातुवाच्य इत्युक्तं भवति । तत्रावयवक्षणाः समुदाये गुणभावमापन्ना इति न ते शब्दभेदं प्रयुञ्जते । तदुक्तम् ।

गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥ इति ।

क्रमजन्मनामेषां क्षणानामभेद एकत्वे बुद्ध्या संकलनात्मिकया प्रकल्पितः, स च समूहः

---

(१) समुच्चार्येति पुस्तकान्तरे । (२) अवधारणोपपत्तिरिति पाठान्तरम् ।
(३) भाष्यकृतेति पुस्तकान्तरे । (४) इत्युत्तरं युज्यते इति पुस्तकान्तरे ।

स्वभावतो गुणभूतैरवयवैर्युक्त इत्यर्थः। गुणभूतैरवयवैरिति वचनमवयवानां शब्दभेदं प्रति प्रयोजकत्वं नेति प्रतिपादनार्थम्। एवं समूहरूपायाः क्रियाया एकत्वादपूर्वापरीभावादक्रमत्वेऽप्यवयवक्रमाश्रयेण क्रमिकत्वव्यवहारः। उक्तं च ;

स चापूर्वापरीभूत एकत्वाद्यक्रमात्मकैः।
पूर्वापराणां धर्मेण तदर्थेनानुगम्यते॥ इति।

कथं तर्ह्येकैकस्मिन् क्षणे धातोः प्रयोगः पचतीत्यधिश्रयितर्यपि वक्तारो भवन्ति। उच्यते, अधिश्रयणारम्भ एव फलाभिसन्धेस्तत्रैव समुदायस्यारोपात्। अयं च समाश्रितपूर्वापरीभाव एवारोप्यत इत्येकोऽपि क्षणः क्रमिको भवति। अत एव क्षणान्तरेऽनुष्ठीयमाने ऽनुष्ठाप्यमाने चाध्यारोपितविरूपस्य क्षणस्यारोपादतीतत्वादपाक्षीदिति भूतकालता, तथा तस्य क्षणस्य भावित्वादितरेष्वभाविष्वपि पक्ष्यतीति भविष्यत्कालता, तथा चैकस्य क्षणस्य वर्त्तमानत्वादन्येष्ववर्त्तमानेष्वपि पचतीति वर्त्तमानकालता चेति कालत्रययोग उपपद्यते। यथोक्तम्—

समूहः स तथाभूतः प्रतिभेदं समूहिषु।
समाप्यते ततो भेदे कालभेदस्य संभवः॥ इति।

तथाभूतः क्रमिकः सन् प्रतिभेदं प्रत्येकं समूह आरोप्यते। ततो विषयविषयिणोरभेद एकत्वे कालभेदः संभवतीत्यर्थः। तदेवं शब्देन साध्यतया प्रतीयमानः समाश्रितक्रमोऽर्थः क्रियेति स्थिते पटो भवतीत्यात्मभरणलक्षणा सत्ता तथैवाभिधीयत इति क्रियात्वेन विचिकित्सा। तथा च

क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका।

इति क्रियाभेदहेतुना कालेनाभूदस्ति भविष्यतीति प्रयोगाः॥ नह्यक्रियस्य कालेन विभागोऽस्ति। उक्तं च—

कालानुपाति यद्रूपं तदस्तीति प्रतीयते। इति।

एवं च 'भूतं भव्यायोपदिश्यत' इति न्यायेन देवदत्तः पचतीत्यादिवत् घटो भवतीति क्रियाकारकभावेन समन्वय उपपद्यते। किं करोतीति प्रश्ने पचतीत्यादिवदस्तीति प्रतिवचनाभावो निर्ज्ञातसत्तस्यानिर्ज्ञातो व्यापारभेदः पृच्छ्यते, न तु निर्ज्ञाता सत्तैवेति, तद्विषयस्य प्रश्नस्यैवानुदयात् (१)। यदा तु सत्ताविषयः प्रश्नो विनाशशङ्कया किं करोति देवदत्त इति, तदास्ति तावदिति प्रतिवचनमपि भवत्येव। ननु क्रियायाः क्रमिकत्वमध्यारोपेणेत्युक्तं, गौणता तु प्राप्नोति। अत्र परिहरन्ति।

व्यवहारस्य सिद्धत्वान्नेयं गुणकल्पना।
उपचारो हि मुख्यस्यासंभवादपदिश्यते॥ इति।

यथा गोशब्दस्यासंभवात्सास्नादिमदर्थस्य वाहीकादिवृत्तित्वम्, एवं स्थिते सर्वपार्षदत्वाद्व्याकरणस्य तत्तच्चैथिकानुरोधेन हरिणा क्रियामतभेदाः प्रदर्शिताः तेपीह संक्षेपेण प्रदर्श्यन्ते। यथा यदनन्तरं फलं निष्पद्यते सा क्रिया। यथौदनं पचतीत्यत्र विक्लेदनं, तदनन्तरं फलनिष्पादात् तदेव कारकं, नहि साक्षादजनयत्कारकं नाम। अधिश्रयणादीनां विक्लेदनोपयोगित्वान्न वैयर्थ्यं, तेषु तु पच्यादिप्रयोगस्तदर्थत्वेन विक्लेदनरूपाध्यारोपात्। पौर्वापर्यं तु पूर्वापरक्षणापेक्षया। उक्तं च—

अनन्तरं फलं यस्याः कल्प्यते तां क्रियां विदुः।
प्रधानभूता तादर्थ्यादन्यासां तु तदाख्यता॥ इति।

अथ वा चैत्रः पचति, मैत्रः पचति, क्षीरं पचति, ओदनं पचति, इत्यादिषु कर्तृकर्मभेदेन भिन्नेषु पाकादिषु पच्यादिप्रत्ययानुवृत्तेर्घटादिषु घटत्वादिवदस्तिपचित्वादिकं

(१) अनाश्रितत्वादिति पुस्तकान्तरे।

न्नाम जातिः सा क्रिया । ननु युगपदवस्थितैरवयवैरारब्धेषु सत्सु घटादिषु समवायाद्घटत्वादीनामभिव्यक्तिर्युज्यत, इह तु क्रमजन्मभिरयुगपद्भाविभिः क्षणैरवयव्यन्तरमारब्धुं न शक्यते तत्समवायात् पचित्वाद्यभिव्यक्तिः स्यात् । नैष दोषः । क्रमजन्मभिरयुगपद्भाविभिन्नाव्धावयविभिरुत्क्षेपणादिक्षणैरुत्क्षेपणत्वादीनामिवाभिव्यक्त्युपपत्तेः । यथैव चोत्क्षेपणाद्यवयवकर्माणि इदमहमुत्क्षिपामीत्यादिबुद्धीनां विशिष्टप्रयत्नजन्यतया मिथः स्वतो भिन्नान्युत्क्षेपणत्वादीनामाधारत्वमपि प्रतिपद्यमानानि दुरवधारत्वाद्विशिष्टजातिविषयां बुद्धिं न प्रकल्पयन्ति, एवमिहाप्येकैकक्षणदर्शनेन पचित्वादीनामप्रत्ययः । अत्र च साध्यत्वक्रमिकत्वे व्यञ्जकक्षणद्वारेण । उक्तं च

जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम् ।
असाध्यव्यक्तिरूपेण सा साध्येवोपकल्प्यते(१) ॥

एकैकस्मिन्क्षणेपि पचित्वादेर्वस्तुतो विद्यमानत्वात्तत्रतत्र शब्दप्रयोग उपपद्यते । अथ वा कारकभेदभिन्नविघटनादिरूपाया यस्याः क्रियाव्यक्तेरनन्तरं फलं निष्पद्यते तत्र समवेता विघटनत्वादिका पच्यादिक्रिया । अस्याश्च साध्यत्वादिकमाश्रयद्वारकम् । यदाह

अन्ते या वा क्रिया भावो जातिः सैव क्रिया स्मृता ।
सा व्यक्तेरनुनिष्पादे जायमानेव गम्यते ॥ इति ।

अत्रापि मते व्यक्तिदर्शनवत्तादर्थ्यादन्यत्र पच्यादिप्रयोगः । अथ वाधिश्रयणादिव्यापारविशिष्टेषु कारकेष्वधिश्रयणादिव्यापारेष्वन्त्य एव व्यापारे समवेतोपहितभेदा सत्ता क्रिया । तदुक्तम्—

स्वव्यापारविशिष्टानां सत्ता वा कर्तृकर्मणाम् ।
क्रिया व्यापारभेदेषु सत्ता वा समवायिनी ॥
अन्ते वात्मनि या सत्ता सा क्रिया कैश्चिदिष्यते ।
भाव एव हि धात्वर्थ इत्यवच्छिन्न आगमः ॥ इति ।

भाव एव हि इत्यादिना 'षट् भावविकारा इति ह स्माह भगवान् वार्ष्यायणिः' इति भाष्यकारानुमतं निरुक्तकारवाक्यमस्य संवादकत्वेन दर्शयति । जातिसमुद्देशेप्युक्तम्—

प्राप्तक्रमविशेषा तु क्रिया सैवाभिधीयते ।
क्रमरूपस्य संहारे तत्सत्त्वमिति कथ्यते ॥

व्यापारविशेषाणां साध्यत्वात्क्रमिकत्वाच्च तदुपहितायाश्च ते भवतः । अथ वा शब्दोच्चारणसमनन्तरं योर्थः प्रतिभासते बुद्ध्याकारत्वेन स शब्दार्थः । यदुक्तं, 'बुद्धिप्रतिभासः शब्दार्थः' इति । यदि हि बहिः सत्तासमाविष्टार्थोर्थः स्यात् तदा पटोस्ति नास्तीत्यादौ पौनरुक्त्यविरोधौ स्यातां, तथा ऽसतो जन्मायोगाद् पटो जायत इत्यादिप्रयोगोऽनुपपन्नः स्यात् । किं च बहिरत्यन्तासत्सु शशविषाणादिषु तत्तच्छब्दप्रयोगो न स्यात्, बुद्ध्युपारूढे तु शब्दार्थत्वे दोषा नावतरन्ति । बुद्धिसत्तासमाविष्टस्य बहिस्सत्ताऽसत्ताजननप्रतिपादनायास्ति नास्ति जायत इति प्रयोगस्योपपन्नत्वात् । अर्थक्रियाकारित्वं तु दृश्यविकल्पयोरभेदाध्यवसायादुपपद्यते शशविषाणादिष्वप्यस्तिप्रयोगो नास्तिप्रयोगश्च बुद्धिसत्तयैवास्ति न तु बाह्यसत्तयेत्येवं प्रतिपादनाय, तस्माद्धातूनामपि बुद्धिसिद्धाः क्षणास्तद्गता जातिः सत्ता वार्थः सैव क्रिया । साध्यतादिकं वा भेदेनाध्यवसितं दृश्यक्षणद्वारेण । उक्तं हि—

बुद्धिं तज्जातिमन्ये तु बुद्धिसत्तामथापरे ।
प्रत्यस्तरूपां भावेषु क्रियेति प्रतिजानते ॥ इति ॥

बुद्धिशब्देन बुद्धिप्रतिभासस्याकारोऽत्र विवक्षितः । तदेवं भुवः क्रियावाचित्वात्पाठाच्च

(१) उपलक्ष्येते इति पाठान्तरम् ।

"भूवादयो धातव" इति धातुत्वे *वर्त्तमाने लट्* इति वर्तमानत्वोपाधिकार्थाद्धातोर्लट् *प्रत्यः* । *परश्च* इतिप्रत्ययसंज्ञकः परस्तात् । ननु बहवः क्षणा धातुवाच्यास्तत्र केचन भूता भविष्यन्त इति तेषामविद्यमानत्वात् कथं वर्त्तमानत्वं धात्वर्थविशेषणम् । उच्यते । नेह विद्यमानत्वं वर्त्तमानत्वं किं तर्हि प्रारब्धापरिसमाप्तत्वं, तच्च यावतः क्षणसमूहस्य फलावधिप्रवृत्तिः तावतः प्राक् फलजननादभेदेनाध्यवसितस्यास्त्येव । एवं च काल्पनिकसमूहाकारेण विद्यमानत्वं वर्त्तमानत्वमित्युक्तं भवति ।

कार्योत्पत्तौ समर्थं वा स्वेन धर्मेण तत्तथा ।
आत्मतत्त्वेन गृह्येत सा चास्मिन्वर्त्तमानता ॥ इति ॥

अस्यार्थः, वाशब्दो वक्ष्यमाणपक्षापेक्षः, एकैकक्षणानन्तरं फलनिष्पत्तेरदर्शनादितरक्षणवैयर्थ्यप्रसङ्गात्सर्वक्षणानन्तरदर्शनाच्चैकफलसाधनत्वेन क्षणानां कल्पितमेकं समुदायरूपं कार्योत्पत्तौ समर्थमित्युच्यते, तत्स्वेन धर्मेण क्रमवत्त्वेन तथा युक्तमात्मतत्त्वेनात्मीयेन विद्यमानत्वेन गृह्यते सेयमस्मिन्समुदाये वर्त्तमानतेति । वाशब्दसूचितः पक्ष उच्यते, विप्रसृतावयवः क्रियाकलापः प्रयोक्तुः संकलनबुद्ध्यारूढः प्रतिपत्तृबुद्धौ संक्रान्तस्तस्या एकत्वाद्वर्त्तमानत्वाच्च तदभेदेनैको वर्त्तमानश्च व्यपदिश्यत इति । उक्तं च

क्रियाप्रबन्धरूपं यत् बुद्ध्यात्मा विनिगृह्यते ।
संक्रान्तबिम्बमेकत्र तामाहुर्वर्तमानताम् ॥ इति ॥

अयमर्थः । प्रयोक्तुः संकलनबुद्धेरात्मा क्रियाप्रबन्धरूपं वस्तु एकत्र प्रतिपत्तुर्ज्ञाने संक्रान्तबिम्बं संक्रातस्वरूपं यद्विनिगृह्यते ऽवधार्यते तस्मात्तस्य ज्ञानस्य वर्त्तमानतामेव तदभेदात् क्रियाया वर्त्तमानतामाहुरिति । ननु यथोपलब्धिः स्मरणमुपलब्धिश्च क्रमेणेति प्रयोक्तुः कथं संकलनात्मिकैका बुद्धिर्यदुपारोहेणासौ प्रतिपत्तुः क्रियाकलापं शब्देन युगपदवगमयेत्, ततश्चैकबुद्ध्युपारोहाभावात्कथमेकत्ववर्त्तमानत्वे स्याताम्, नैष दोषः ।अनुभववासनायाः प्रत्यासन्नत्वात्क्रमेणानुभवतामपि संकलनायोगात् । अनुभवपूर्वत्वं हि स्मरणस्य नियतं न तु क्रमिकत्वमपि, अन्यथा समुच्चयशतादिप्रत्ययाभावप्रसङ्गात् । नन्वेवमस्त्वस्यैव बौद्धस्य (१)वर्त्तमानत्वं कथं बाह्यस्येति चेन्न । दृश्यविकल्पयोरभेदाध्यवसायात्। अन्ये तु काल एव क्रियाया उत्पन्नध्वस्तत्वेन साधनसंपत्त्या संभाव्यमानोदयत्वेन प्रारब्धापरिसमाप्तत्वेन चोपहितः सन् क्रमेण भूतादिभेदं प्रतिपद्यते, तत्कालयोगात्क्रियाया अपि तत्तद्व्यपदेश इति । उक्तं च

क्रियोपाधिश्च सन् भूतभविष्यद्वर्त्तमानता ।
एकादशभिराकारैर्विभक्ता प्रतिपद्यते ॥ इति ।

काल इति शेषः । एकादशत्वमप्युक्तम् ।

भूतः पञ्चविधस्तत्र भविष्यच्च चतुर्विधः ।
वर्त्तमानो द्विधा ख्यात इत्येकादशकल्पना । इति ॥

तत्र तावदद्यतनानद्यतनव्यामिश्रसामान्यरूपाश्चत्वारो मुख्यभूतभेदाः । सामान्यमपि विशेषेभ्यो व्यावृत्तभेदः । उक्तं च "अनेकमन्यपदार्थ" इत्यत्र सामान्यमपि यथा विशेषस्तद्वदिति । परोक्षस्त्वनद्यतनभूतभेदो न तु भूतभेद इति न पृथग्गण्यते । "आशंसायां भूतवच्च" इत्यतिदिष्टभूतकार्यो भविष्यत्तथैको गौणो भूत इति भूतः पञ्चविधः । भविष्यत्तु गौणाभावादद्यतनादिभेदेन चतुर्विधः । "वर्तमानसामीप्य" इत्यतिदिष्टवर्त्तमानकार्यौ भूतभविष्यन्तौ गौणौ, तदेवमेकादशभेदा कालस्य, यद्यप्यन्येऽप्यौपाधिका भेदाः सन्ति तथापि शास्त्रप्रक्रियायामियन्त एवोपयुज्यन्त इत्येवमुक्तंगतमदः । लटोऽकारटकारयोः "उपदेशेऽजनुनासिक-

(१) अस्त्वेवं बौद्धस्येति पाठः ।

इत्" "हलन्त्यम्" इतीत्संज्ञा । उपदेशो धातुसूत्रप्रातिपदिकप्रत्ययागमादेशलक्षणः । प्रतिज्ञानुनासिक्याः पाणिनीयाः । "तस्य लोप" *अदर्शनं लोपः* अदर्शनं चेह प्रसक्तस्य शब्दस्य लोपः, प्रयोजनं लडित्यनुवादष्टिद्व्यपदेशश्चैषामन्येषामप्यबनुन्धानाम् । ननु "शषसर्" "हल्" इत्यत्र "लकारस्येत्त्वे तेन "आदिरन्त्येन सहेता" इति प्रत्याहारः, सति च तस्मिन् "लण्" इत्यत्र लकारस्य हल्त्वात्तस्यैव "शषसर्" "हल्" इत्यत्रान्ते निर्देशादित्संज्ञा, तदाश्रयश्च हलिति प्रत्याहारः, इतीतरेतराश्रयत्वादयमेव तावत् प्रत्याहारो ऽनुपपन्नस्ततः सर्वेषामेव णकारादीनामित्त्वं न स्यादिति सर्वप्रत्याहारव्यवहारो ऽनुपपन्न इति कथमत्राचुत्वेन हल्त्वेन चाकारटकारयोरित्त्वे, एवं चादिरन्त्येनेति ग्राहकसूत्रमपि व्यर्थं स्यादिति चेत् । नैष दोषः । हलितिसूत्रे(१) हकारात्पर लृकारः, लपरत्वं तु तस्यैकादेशलक्षणकृतम् । तेन तस्याचुत्वादित्त्वं भविष्यति, स एव च "हलन्त्यम्" इत्यत्राप्येकादेशेन लपरेण निर्दिष्ट इति । एवमपीतरेतराश्रयमेव लृकारस्य । सत्यामित्संज्ञायां हलितिप्रत्याहारः, सत्यस्मिन्नैऔजिति चकारस्येत्त्वं, तस्मिंश्च सत्यजितिप्रत्याहारः, सत्यस्मिन्नैऔजिति चकारस्येत्त्वं, तस्मिंश्च सत्यजितिप्रत्याहारः, अस्मिंश्च प्रत्याहारे सति लृकारस्येत्संज्ञया भाव्यमिति । एवं तर्हि हल् च लृ चेति समाहारद्वन्द्वेन द्वितीयस्यापि लकारस्य निर्देशात् प्रत्याहारमन्तरेण तस्येत्संज्ञासिद्धिः, अश्रवणन्तु संयोगान्तलोपेन । अथ वा श्वेतो धावतीत्यादाविव द्वितीयमप्यत्र हल्ग्रहणं तन्त्रेणोपादीयते, तत्रैकेन हस्य लिति हकारसमीपस्य लकारस्य विनैव प्रत्याहारादित्संज्ञा भविष्यति । यद्वा हस्य लृ हलिति तत्पुरुषस्य प्रत्याहारस्य च हल्शब्दस्यैकशेषे ऽर्थद्वयं लभ्यत इति न संकटं किं चित् । तत्पुरुषः पुल्लिङ्गः प्रत्याहारस्तूभयलिङ्गोप्यन्तमित्यनेन साहचर्यादिह नपुंसकलिङ्गः । "नपुंसकमनपुंसकेन" इतितस्यैकशेष एकत्वं च ॥

कर्मणि च भावे चाकर्मकेभ्यः ॥ उत्सृष्टानुबन्धश्चायं लकारः, लकारः सकर्मकेभ्यो धातुभ्यः कर्मणि कर्त्तरि च भवन्ति, अकर्मकेभ्यस्तु भावे कर्त्तरि चेति यथायोगं कर्त्रादौ भवन्ति ॥

स्वतन्त्रः कर्त्ता ॥ क्रियाप्रसिद्धौ यत्कारकं प्रधानभूतं विवक्षितं तत् कर्तृसंज्ञं भवति । ननु च सामग्रीसाध्यायां क्रियायां स्वस्वव्यापारे सर्वेषां स्वातन्त्र्यात् कथमेकस्य तत् । उच्यते । करणादिप्रवृत्तेः प्रागेव परस्मादर्थितादेरेव निमित्तात्कर्त्तुः प्रवृत्तिः, करणादि तु तदधीनप्रवृत्ति । तथाहि । अर्थी हि कर्त्ता तत्प्रयुङ्क्ते न तदेनम् । किं च तस्य प्रतिनिधिर्दृश्यते, व्रीह्यपचारे नीवारैरिज्यते, कर्तुः स नास्ति तन्नेदे क्रियान्तरमेवेति प्रसिद्धिः । किं च कारकान्तरानुपादानेप्यसौ दृश्यते भवत्यादिषु, तस्माद्युक्तं स्वातन्त्र्यम् । तथा चोक्तम्—

प्रागन्यतः शक्तिलाभान्यग्भावापादनादपि ।
तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्त्तनात् ॥
अदृष्टत्वात्प्रतिनिधेः प्रविवेके च दर्शनात् ।
आरादप्युपकारित्वात्स्वातन्त्र्यं कर्तुरुच्यते ॥ इति

प्रागन्यतः शक्तिलाभादीनां शब्देन प्रतीतिमात्रस्य विवक्षणादचेतनेष्वपि तदनपायात् कर्तृतोपपत्तिः उक्तं च—

सर्वैरभ्युदितैः शब्दैर्नियमो न तु वस्तुनि ।
कर्तृधर्मविवक्षायां शब्दात् कर्त्ता प्रतीयते ॥ इति

वृत्तौ तु स्वातन्त्र्येणागुणभावो विवक्ष्यत इति तस्य च सार्वत्रिकत्वात्सर्वत्र कर्तृतोपपत्तिः ।

कर्त्ता च त्रिविधो ज्ञेयः कारकाणां प्रवर्त्तकः ।
केवलो, हेतुकर्त्ता च कर्मकर्त्ता तथापरः ॥ इति

कर्तुरीप्सिततमं कर्म ॥ कर्त्रा क्रियया यदाप्तुमिष्टतमं तत्कर्म ॥ *तथा युक्तं चानी-

(१) हलिति सूत्रं लृकारान्तमिति पाठान्तरम् ।

प्सितम्* । येनैव प्रकारेणेप्सिततमं क्रियया युज्यते तेनैव प्रकारेण तथा युज्यमानमनीप्सिततमपि कर्म ॥ *अकथितं च* । अपादानादिविशेषकथारहितं दुह्यादिकारकं गवादि च कर्म ॥ *दिवः कर्म च* दिवः साधकतमं करणं तत्कर्मेत्यादि चतुर्विधं कर्मेप्सिततमनीप्सिततमाकथितसंज्ञान्तरपूर्वभेदेन । तत्राद्यं त्रिधा, निर्वर्त्यं विकार्यं प्राप्यमिति । द्वितीयमपि द्वेधा, द्वेष्यमितरदिति । तदुक्तम् —

निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम् ।
तत्रेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम् ॥
औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम् ।
संज्ञान्तरैरनाख्यातं तद्यच्चाप्यन्यपूर्वकम् ॥ इति

तत्र निर्वर्त्यं यस्योपादानकारणं नास्ति सदपि वा तत्परिणामित्वेन नाश्रीयते, यथा संयोगं करोति, पटं करोति, मृदा घटं करोतीति । विकार्यमपि द्वेधा । प्रकृत्युच्छेदसंभूतमेकं, प्रकृत्यनुवृत्तौ गुणान्तरोत्पत्त्योपलक्षितमपरम्, यथा काष्ठानि भस्म करोति, हिरण्यं कुण्डलं करोतीति । व्रीहीन्प्रोक्षतीत्यादौ प्रोक्षणादिजन्यादृष्टरूपेण विक्रियमाणा व्रीह्यादयोपि विकार्यं कर्म । प्राप्यं पुनरेकमेव, यत्र क्रियाकृतो विशेषो न गम्यते यथा वेदमधीत इत्यादौ वेदादि । तथाचोक्तम्—

सती या ऽविद्यमाना वा प्रकृतिः परिणामिनी ।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ॥
तन्निर्वर्त्यं विकार्यं तु द्विधा कर्म व्यवस्थितम् ।
प्रकृत्युच्छेदसंभूतं किं चित् काष्ठादिभस्मवत् ॥
किं चित् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ।
क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ॥
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ॥ इति ।

भावस्तु केवलो धात्वर्थः ॥ *लस्य* ॥ *तिप्तस् झि सिप् थस्थ मिब्वस्मस्ताताञ्झथासाथां ध्वमिड्वहिमहिङ्* ॥ तिबादयोऽष्टादश *षष्ठीस्थानेयोग* इति लस्य स्थाने स्युः । स्थानं प्रसङ्गो, योगः संबन्धः । इह शास्त्रेऽनियतसंबन्धविशेषा षष्ठी स्थानेयोगेत्यर्थः । तत्र तिबादिष्वविशेषेण प्राप्तेषु *शेषात्कर्त्तरि परस्मैपदम्* इति आत्मनेपदविषयादन्यत्वेन शेषादन्यस्मात्परस्मैपदमेव तच्च कर्त्तर्य्येव । आत्मनेपदविषयश्च स येषां "अनुदात्तङित" इत्यादिनाऽऽत्मनेपदं विहितम् ॥ *लः परस्मैपदम्* ॥ *तङानावात्मनेपदम्* ॥ तङितितिबा।दसूत्रेणापाचास्तादयो नव प्रत्याहारेणोच्यन्ते । आनइति शानच्कानचौ, अत्र यद्यपि "लः परस्मैपदम्" इतिलादेशानां सामान्येन परस्मैपदसंज्ञोच्यते तथापि *आकडारादेकासंज्ञा* इत्यतः परेषां "कडाराः कर्मधारय" इत्यतः प्राचामेकस्यैकैव संज्ञेतिनियमात् तङानयोरात्मनेपदसंज्ञयाऽनवकाशया बाधिता सा तद्व्यतिरिक्तविषया ऽवतिष्ठते ॥ *युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः* ॥ युष्मदि समानाधिकरणे व्यवहिते वाव्यवहिते वा प्रयुज्यमाने वा लान्तार्थस्य युष्मदर्थविशेष्यत्वे एव मध्यमः ॥ *अस्मद्युत्तमः* ॥ पूर्ववद्व्याख्या ॥ *शेषे-प्रथमः* ॥ यत्र युष्मदस्मदी समानाधिकरणेन सशेषस्तत्रैव प्रथमः ॥ *तिङस्त्रीणित्रीणि प्रथममध्यमोत्तमाः* ॥ तिङः परस्मैपदान्यात्मनेपदानि च प्रत्येकं त्रीणित्रीणि पदानि भूत्वा यथासंख्यं प्रथमादिसंज्ञानि ॥ *यथासंख्यमनुदेशः समानाम्* ॥ संख्या क्रमः, अनुदेशः पश्चादुच्चार्यमाणो विधीयमानः, अनुदेशशब्दस्य संबन्धिशब्दत्वादाक्षिप्ता उद्देशिनः, तेषामनुदेशिनां च संख्यातः पाठतश्च समानानां यो यः क्रमस्तेन तेन क्रमेण संबन्ध इत्यर्थः । तत्राप्येवं व्यवस्था ॥ *बहुषु बहुवचनम्* ॥ *द्व्येकयोर्द्विवचनैकवचने* । बहुत्वादिषु यथासंख्यं बहुवचनादीनि ॥ *तान्येकवचनद्विवचनबहुवचनान्येकशः* ॥ तानि लब्धप्रथमादिव्यपदेशानि-

त्रीणित्रीणि प्रत्येकं यथासंख्यमेकवचनादिसंज्ञानि । एवं तिबादिषु ॥ *कर्त्तरि शप्* । कर्तृवाचिनि सार्वधातुके धातोः शप्स्यात् ॥ *तिङ्शित्सार्वधातुकम्* ॥ प्रत्यय इति शेषः । शकारस्य *लशक्वतद्धिते* ॥ लशकवर्गास्तद्धितवर्जप्रत्ययाद्या इत इतीत्वाल्लोपः ॥ *सार्वधातुकार्द्धधातुकयोः* ॥ अनयोरिगन्ताङ्गस्थाने गुणः ॥ *आर्द्धधातुकं शेषः* ॥ तिङ्शिद्भिन्नो धातुसंशब्देन विहितः प्रत्यय आर्द्धधातुकम् ॥ *अदेङ्गुणः* ॥ अदेङौ मात्रिकद्विमात्रिकौ तद्भाविनावतद्भाविनौ च तौ च गुणौ ॥ *अणुदित्सवर्णस्य चाप्रत्ययः* ॥ अण् चोदिच्च गृह्यमाणः सवर्णग्राहको भवति विधीयमानमणं वर्जयित्वा, उदिच्छब्देन क्वादयः पञ्चोच्यन्ते ॥ *तुल्यास्यप्रयत्नं सवर्णम्* ॥ आस्यं तात्वादि, तत्स्थः प्रयत्नो यस्य वर्णस्य येन तुल्यः स तं प्रति सवर्णः । अकुहविसर्जनीयानां कण्ठः । स्पृष्टं(१) करणं स्पर्शानामिति स्थानप्रयत्नसाम्यम् । कादयो मावसानाः स्पर्शाः ॥ *तपरस्तत्कालस्य* ॥ तः परो यस्मात्स च तात्परश्च तपरः, स उदात्तादिभिन्नं सवर्णमात्मना तुल्यकालं स्वं च ग्राहयतीति भिन्नकालाग्रहः । गुणविधौ च "इको गुणवृद्धी" इत्यनेन गुणवृद्ध्योः स्वसंज्ञया विधाने इक इत्युपस्थाप्यते । "अङ्गस्य" इति चाधिकृतम् ॥ *यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्* ॥ यस्मात्प्रत्ययविधिस्तदादि तच्च तस्मिन्नेव प्रत्ययेऽङ्गं, तत्रानयोः सामानाधिकरण्येनान्वयस्य न्याय्यत्वादिकोऽङ्गस्य विशेषणता । *येनविधिस्तदन्तस्य* ॥ यद्विशेषणमुपादाय किं चिद्विधीयते तदात्मान्तस्य स्वस्य च ग्राहकमिति तदन्तत्वलाभः ॥ *अलोन्त्यस्य* ॥ आदेशः षष्ठीनिर्दिष्टस्यान्त्यस्य भवति । अन्त्यस्यैवेति स्यानषष्ठी स्थानित्वं प्रतिपादयतीत्यन्त्यस्य स्थानित्वादिगन्ताङ्गान्त्यस्येत्युक्तार्थलाभः । स चेह गुणः *स्थानेऽन्तरतमः* ।। अनेकादेशप्रसङ्गे सदृशतमः स्यात्, स सदृशः गुणादिसदृशात् स्थानसदृश इति नियमादुकारस्योपूपध्मानीयानामोष्ठा इत्योष्ठयस्यौदोतोः कण्ठोष्ठमिति ओष्ठ्य ओकारः । तस्य "एचोऽयवायाव" इति यथासंख्येनावादेशे सिद्धं (भवति इति) । अस्य च "सुप्तिङन्तं पदं" इति पदत्वे *युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ* इति पदात्परयोरपादादौ वर्त्तमानयोः समानवाक्यस्थयोः श्रूयमाणषष्ठ्यादिद्विवचनान्तयोरनयोर्यथासंख्यं वान्नावादेशौ भवतः । *बहुवचनस्य वस्नसौ*॥ *तेमयावेकवचनस्य* ॥ इमावादेशौ न द्वितीयैकवचनान्तयोः, *त्वामौ द्वितीयायाः* इति त्वामोर्विधानात् । एषामपि पूर्ववद्व्याख्या, (भवति वाम्, भवति नौ, भवति वः, भवति नः, भवति ते, भवति मे, भवति त्वा, भवति मा) यथायोगं स्वं, देयं, प्राप्तमिति शेषः । एते चानेकाल्त्वात् "अनेकाल्शित्सर्वस्य" इति सर्वादेशाः । एषां च *स्थानिवदादेशोनल्विधौ"* इति स्थान्यलाश्रयकार्यं वर्जयित्वा स्थानिकार्यविधानात् पदत्वे तन्निबन्धनानि रुत्वादीनि यथायोगं ज्ञेयानि। (भवतः) अत्र तसः सकारस्य प्रयोजनाभावादित्वाभावः। न च लोप एव प्रयोजनम्, एवं हि नोपदिश्येत, "सिति च" इति पदत्वं यकाराजाद्यसर्वनामस्थानविषयमिति न प्रयोजनम् । यद्वा *विभक्तिश्च* इति सुपः तिङश्चैकवचनादिसंज्ञाः सन्तो विभक्तय इति । *न विभक्तौ तुस्माः* इतीत्त्वाभावेन ॥ *ससजुषो रुः* सान्तस्य पदस्य सजुषश्च रुरिति रुत्वे "खरवसानयोर्विसर्जनीय" इति विसर्जनीयः ॥ *विरामो ऽवसानम्* । विरतिर्विरामःवर्णस्याभावो ऽनुच्चारणं, तत्र वर्णेष्वप्युच्चरितप्रध्वंसिषु बुद्धिकृतं पौर्वापर्यमित्यभावरूपेऽवसानेऽपि तत्संभवात् परसप्तमीत्वोपपत्तिर्भवति । (भवन्ति) *झोन्तः* ॥ प्रत्ययादेरिति शेषः, अन्त्योकार उच्चारणार्थः, न तु तकारस्यानन्त्यत्वेनेत्त्वनिवृत्तये । तस्य प्रयोजनाभावादेव सिद्धेः । न च "तित्स्वरितम्" इति स्वरितत्वं प्रयोजनं, तितः प्रत्ययस्येति तत्र स्थितेः । न च स्थानिवत्त्वात्प्रत्ययः । तदेकदेशत्वादस्य । अत्रशबन्त्यकारयोः *अतो गुणे* । इत्यपदान्ताकाराद्गुणे परे तयोः पूर्वपरयोः पररूपमेकादेश इत्येकादेशं वर्णमात्राश्रयत्वे-

---

(१) प्रयत्नमिति पाठान्तरम् ।

नान्तरङ्गं प्रकृतिप्रत्ययापेक्षत्वाद्बहिरङ्गोपि गुणो 'वर्णादाङ्गं बलीय' इति बाधते, अस्ति च समानाश्रयत्वमनयोरुभयोर्विकरणापेक्षत्वात् पूर्वं त्वेकादेशो *अन्तादिवच्च* इत्येकादेश आश्रीयमाणं पूर्वं प्रत्यन्तवत्परं प्रत्यादिवदिति "सार्वधातुकमपित्" इत्यत्राश्रीयमाणस्य पितोऽस्य सार्वधातुकस्यैकादेशस्यादिवद्भावाच्छपो पित्सार्वधातुकग्रहणात् ङित्त्वात् "क्ङिति च" इति क्ङिन्निमित्तयोरिग्लक्षणयोर्गुणवृद्धयोर्निषेधात् गुणो न स्यात । भवतु वा पूर्वमेकादेशस्तदाप्यदोषः । *अचः परस्मिन् पूर्वविधौ* इति परनिमित्तोऽजादेशोऽचः पूर्वसंबन्धिनि कार्यमात्रे कर्त्तव्ये स्थानिना तुल्यः स्यादिति स्थानिबुद्ध्या व्यवधानेन निषेधस्याप्रसङ्गात् । किं च तत्रापिदित्यस्य प्रसज्यप्रतिषेधत्वेन सिद्धान्तितत्वात् 'पित्सार्वधातुकं ङिन्न' इत्याश्रीयमाणं पितं प्रत्येकादेशस्यान्तवत्त्वात् ङित्वस्याप्रसङ्गात, अस्तु गुणैकादेशयोः प्रवृत्तौ कामचारः । (भवसि । भवथः । भवथ । भवामि । भवावः भवामः) । *अतो दीर्घो यञि* इति यञादौ सार्वधातुके ऽकारान्ताङ्गान्त्यस्य दीर्घः, स च स्थानितुल्य इति तादृश आकारः 'यस्मिन्विधिस्तदादावल्ग्रहण' इति यञादीति लाभः । *ऊकालोज्झ्रस्वदीर्घप्लुत* इत्यचो मात्रिकद्विमात्रिकत्रिमात्राः क्रमेण ह्रस्वादिसंज्ञाः ॥

परोक्षे लिट् भूतानद्यतनपरोक्षतोपाधिकार्थवृत्तेर्धातोर्लिट् । धातुवाच्यायाः क्रियाया इन्द्रियेणासंन्निकर्षात्परोक्षत्वे सिद्धे परोक्षग्रहणं साधनपरोक्षतार्थम् । पूर्ववत्तिबादयः । ते च "लिट् च" इति लिडादेशत्वादार्द्धधातुकाः । अत्र च "लङः शाकटायनस्यैव" इत्यत एवकारानुवृत्त्या न सार्वधातुका इति विकरणाभावः । एषां च लिडादेशानां नवानां तिबादीनां *परस्मैपदानां णलतुसुस्थलथुसणल्वमाः* इति यथासंख्यं णलादयः स्युः । ते च स्थानिवत्त्वेनार्द्धधातुकाः प्रत्ययाश्च । णलो णकारस्य प्रत्ययादित्वाच्च इत्संज्ञायां लोपः, प्रयोजनं वृद्ध्यादि । नन्वत्र णकारो लुप्यत इत्यनेकाल्त्वाभावः "अनेकाल्शित्सर्वस्य" इति सर्वादेशत्वं न स्यात् । नैतत् । आदेशोत्तरकालं प्रत्ययत्वतदादित्वेन णकारस्येत्त्वे लोप इत्यादेशदशायामनेकाल्त्वात्, एवं भू अ इति स्थिते *अचो ञ्णिति* इति ञित्णित्प्रत्ययपरस्याजन्तस्याङ्गस्य वृद्धिः प्राप्नोति । वृद्धिरित्यादैचां तद्भावितानामतद्भावितानां "वृद्धिरादैच्" इतिसंज्ञा, तपरकरणादैचौ द्विमात्रिकौ गृह्येते तादपि परस्तपर इति । "भुवो वुग्लुङ्लिटोः" इत्यजादौ लुङि लिटि च विधीयमानो वुक् कृताकृतप्रसङ्गित्वेन नित्यो वृद्धिं बाधते । अत्र वृद्धौ कृतायामौकारान्तस्य प्राप्नोत्यन्यत्र तूकारान्तस्येति शब्दान्तरप्राप्त्या वुगनित्य इति चेन्न । एकदेशविकृतस्यानन्यत्वादत्र शब्दान्तरप्राप्तिरिति ॥ "अद्यान्तौ टकितौ" यथासंख्यं षष्ठीनिर्दिष्टस्येति वुगयं भुवोन्त्यः ॥ *लिटि धातोरनभ्यासस्य*॥ धातोरवयवस्य प्रथमस्यैकाचो द्विर्वचनमजादेस्तु द्वितीयस्येति भुव आदिर्द्विरुच्यते ॥ *पूर्वोभ्यासः* अत्र प्रकरणे, द्विरुक्तस्येति शेषः ॥ *हलादिः शेषः* अभ्यासस्याचो *ह्रस्वः* इति । अभ्यासस्याचो ह्रस्वः । *भवतेरः* इति लिटि परेऽभ्यासान्तस्याकारन्तादेशः । *अभ्यासे चर्च* इति अभ्यासझलां चरो जशश्च । तत्र वर्गाणां प्रथमद्वितीयाः शषसा विसर्जनीयजिह्वामूलीयेपध्मानीया अघोषा विवृतकण्ठाः श्वासानुप्रदानाः । तृतीयचतुर्थपञ्चमहकारा घोषवन्तः संवृतकण्ठा नादानुप्रदाना इत्योष्ठ्यस्य घोषवतः संवृतकण्ठस्य नादानुप्रदानस्य भकारस्य तादृशो बकारः (बभूव) ननु *अचि श्नुधातुभ्रुवां य्वोरियङुवङौ* । इत्यजादौ प्रत्यये श्नुभ्रुवोरन्त्यस्य धात्वन्तयोरिवर्णोवर्णयोरियङुवङोर्विधानात् । अत्रोवङि कर्त्तव्ये *असिद्धवदत्राभात्* । समानाश्रयमाभीयशास्त्रमाभीयेऽसिद्धमिति वुकोऽसिद्धत्वादुवङ् स्यात् अस्तु, पुनर्वुग् भविष्यति । ततश्च *उपधायां च* । धातोरुपधाभूतौ हल्परौ यौ रेफवकारौ ताभ्यां पूर्वस्येणो दीर्घः स्यादिति दीर्घत्वं । *लोपो व्योर्वलि* इति पूर्वयकारवकायोर्वलिपरे लोप इति पूर्वस्य वकारस्य लोपे सेत्स्यति । बभूवेति न सिद्धति ॥ *पूर्वात्रासिद्धम्* ॥ अस्माद्योगात् पूर्वत्रासिद्धाः परे च मिथः पूर्वत्र पूर्वत्रासिद्धा इति "उपधायां च" इत्यस्य वलि लोपे

प्रत्ययसिद्धत्वात्पूर्वलोपे हल्पर उपधावकारो नेति दीर्घाप्रसङ्गात् । अथ वा दीर्घवलोपयोरन्तरङ्गयोः कर्त्तव्ययोः 'असिद्धं बहिरङ्ग' इति बहिरङ्गस्य वुकोऽसिद्धत्वादत्रैव दीर्घत्वं स्यात् नापि वलोपः, एवं तर्हि [वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ] इति वुकः सिद्धत्वादुवङ्न भविष्यति । "श्नसोरल्लोप" इति तपरकरणाल्लिङ्गादाभीयस्यासिद्धत्वस्यानित्यत्वाद्वात्र वुकः सिद्धत्वं भवति । (बभूवतुः । बभूवुः । बभूविथ) *आर्द्धधातुकस्येड्वलादेः* टित्त्वात्तदादिः । बभूविथ इत्यत्र वृद्धिर्गुणो वुका बाध्यते । बभूवथुः स्थानित्वेन विभक्तित्वान्न सकारस्येत्त्वम् । (यूयं बभूव) । नन्वत्राकारो "अलोन्त्यस्य" इति थशब्दाकारस्यादेशः प्राप्नोति फलं च यथासंख्यं स्यात् । मैवम् । अत्र धातोरित्यनुवर्तते । तस्मात्परस्य विधीयमानोऽकार "आदेः परस्य" इति थकारस्य । ततो द्वयोरकारयोः पररूपम् । (अहं बभूव । बभूविव । बभूविम) उत्तमविषये चित्तव्या क्षेपात् परोक्षतासंभवः । अत्र *असंयोगाल्लिट् कित्* ॥ असंयोगान्ताद्धातोः परोऽपिल्लिट् किदिति वमयोः कित्त्वे *क्ङ्युकः किति* इति श्रिञ उगन्ताच्च धातोः परस्य कितो नेडिति प्राप्तस्य निषेधस्य *कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि* क्रादय एव लिट्यनिटः, ततोन्ये लिटि सेट इति नियमात्सेट्त्वम् । अत्र के चिदेवमाहुः । वुग्विधावोरित्यनुवृत्तेर्गुणयोः कृतयोरुवर्णान्तत्वाभावात्तल्लक्षणस्य वुकोऽप्राप्तेस्तस्याप्यनित्यत्वोत्परत्वात्प्राप्तयोगवृध्द्यो *इन्धिभवतिभ्यां च* । आभ्यां परो लिट् किदिति कित्त्वेन बाधस्ततो वुक् । अत्र ङिद्ग्रहणानुवृत्तेर्ङित्त्वमप्यतिदिश्यते इत्युभयातिदेशसामर्थ्यादनिग्लक्षणाया अपि वृद्धेर्निषेधः । तेन यङ्लुकि भवतीति निर्देशात्कित्त्वाभावात् वृद्धिगुणयोः कृतयोरनुवर्णान्तत्वाद्वुगभावात् (बोभाव, बोभविथ, बोभव) इति सिद्धमिति । सर्वमेतद्वार्त्तिकविरुद्धं, यदाह— ["इन्धेश्छन्दोविषयत्वात् भुवो वुको नित्यत्वात्ताभ्यां लिटः किद्वचनार्थक्यम्"] इति ॥

अनद्यतने लुट् ॥ अह्न उभयतोर्द्धरात्रमद्यतनः कालः । अविद्यमानाद्यतनभविष्यत्युपाधिकार्थाद्धातोर्लुट् स्यात्, लस्य तिबादिषु *स्यतासी लृलुटोः* ॥ लृ इति लृङ्लृटोरुत्सृष्टानुबन्धयोः सामान्येन ग्रहणम् , लृलुटोरादेशेषु परेषु धातोर्यथासंख्यं स्यतासी स्याताम् । अत्र केचित्तासेरिकारमुच्चारणार्थमाहुः । परमते त्वनुनासिकं सलोपप्रतिषेधार्थम् । इह तु प्रयोजनाभावान्न प्रपञ्च्यते । *लुटः प्रथमस्य डारौरसः* ॥ लुडादेशस्यात्मनेपदप्रथमस्य परमस्मैपदप्रथमस्य च यथासंख्यं डारौरसः स्युः । *टेः* इति भस्याङ्गस्य टेर्डिति विधीयमानो लोपोत्राभत्वेपि डित्वसामर्थ्याद्भवति । *अचोन्त्यादि टि* ॥ एकत्र सन्निविष्टानामचामन्त्याजादिष्टिः । इड्गुणावादेशाः । (भविता) । अत्रेटः *पुगन्तलघूपधस्य च* पुगन्तस्याङ्गस्य लघूपधस्य चेको गुण इति प्राप्तो "दीधीवेवीटाम्" इतिनिषिध्यते ॥ *ह्रस्वं लघु* ॥ *अलोन्त्यात् पूर्व उपधा* ॥ धात्वादौ वर्णसमुदायेऽन्त्यादलः पूर्व उपधा । (भवितारौ । भवितारः) । *रि च* इति । रेफादौ प्रत्यये तासस्त्योः सकारस्य लोपः । (भवितासि) । *तासस्त्योर्लोपः* ॥ सकारस्य सकारादौ प्रत्यय इति शेषः । अत्र "नाज्झलौ" इत्यज्झलोर्मिथः सावर्ण्यनिषेधे ऽपवादे प्रवृत्ते पश्चात्तद्विषयपरिहारेण सवर्णसंज्ञाप्रवृत्तौ तदुपजीव्यप्रवर्त्तमानस्य ग्रहणकशास्त्रस्य "नाज्झलौ" इत्यत्रानिष्पन्नत्वादज्ग्रहणेन पठितानामेवाचां ग्रहणादन्येषां हल्भिः सवर्णसंज्ञाया अनिषेधादाकारस्य सवर्णेन हकारेण ग्रहणादिण्त्वात् *आदेशप्रत्यययोः* इतीण्कोश्च परस्यादेशरूपस्य प्रत्ययावयवस्य च सकारस्य विधीयमानं षत्वं कस्मान्नेति चेत्, न, हकारो विवृतः, आकारो विवृततरः एवं हि पठन्ति । 'ए औ विवृततरौ ताभ्यामप्याकार' इति । "वयस्यासुमूर्ध्नवो" इत्यादिनिर्देशात् । यद्वा विवृतमूष्मणां स्वराणां च इत्यत्र ईषत्स्पृष्टमन्तस्थानामित्यतः ईषदित्यनुवर्त्तते, तच्च पृथग्विभक्तिनिर्दिष्टैः प्राथमैकैरूष्मभिरेव संबध्यते न स्वरैरिति नैव सावर्ण्यप्रसङ्गः । अत एव भाष्यवार्त्तिकयोः सूत्रं प्रत्याख्यातम् । (भवितास्थः । भवितास्थ । भवितास्मि । भवितास्वः । भवितास्मः) ॥

लृट् शेषे च ॥ क्रियार्थक्रियोपपदादन्यो भविष्यत्कालः शेषस्तत्र शेषे चात्क्रियार्थक्रियापपदे भविष्यति च धातोर्लृट् स्यात्। चतुर्विधो भविष्यदित्युक्तं तत्रानद्यतने लुड्विधानादन्यत्रायं विधिः। 'अनद्यतन' इति बहुव्रीहिनिर्दिशाद्व्यामिश्रेप्ययमेव। लस्य तिबादिषु "स्यतासी" इति स्यः। इडागमः। (भविष्यति। भविष्यसि)। भविष्यामि। क्रियायां क्रियार्थायामुपपदे। धनी भविष्यामीति राजानं सेवते। "आदेशप्रत्यययोः" इति सर्वत्र षत्वम् ॥

लोट् च ॥ विध्यादिष्वर्थेषु धातोर्लोट् स्यात्। ते च वक्ष्यन्ते। लस्य तिबादिषु *एरुः* इति। लोडादेशेकारस्योकारः। (भवतु, भवताम्)। अत्र *लोटो लङ्वत्* इति लङ्वत्कार्यातिदेशात् *तस्थस्थमिपां तान्तम* इति। लङस्तसादीनां विधीयमानास्तामादय आदेशा लोट्यपि भवन्तीति तसस्ताम्। (भवन्तु। भव)। *सेर्ह्यपिच* इति। लोटः सेर्हिरादेशः। अपिदिति वचनात् स्थानिवत्त्वेन पिन्न भवति। अस्य प्रयोजनं तत्र तत्र दर्शयिष्यते। *अतोहेः* इत्यकारान्तात् परत्वेन लुक्। *प्रत्ययस्य लुक्श्लुलुपः* इति। प्रत्ययादर्शनस्यैताः संज्ञाः, अनेकसंज्ञाविधानेन तद्भावितग्रहणविज्ञानात् तत्तच्छब्दभावितस्य प्रत्ययादर्शनस्य सा सा संज्ञेति संज्ञानामसङ्करो भवति। विधिप्रदेशेषु भाविसंज्ञाविज्ञानान्नेतरेतराश्रयत्वम्। यथास्य सूत्रस्य शाटकं वयेति। अत्र यदि शाटको न वातव्यः, अथ वातव्यः, अथ वातव्यो न शाटक इति विप्रतिषेधात् स वातव्यो यस्योतस्य शाटक इति व्यपदेशो भवति इत्यर्थः। (भवतम्। भवत) लङ्वद्भावात्तंतौ। तांतमोर्मकारस्य *न विभक्तौ तुस्माः* इतीत्त्वनिषेधः। (भवानि)। *मेर्निः*। इतिलोडादेशस्य मेर्निरादेशः, अयं चापवादत्वाल्लङ्वद्भावप्राप्तमादेशं बाधते, मर्नुरित्यवचनादेरुर्न भवति। (१) (भवाव। भवाम) लङ्वद्भावात् *नित्यंङितः* इति ङित्वाल्लङादेशोत्तमसकारस्य विधीयमानो लोपोत्रापि भवति। *आडुत्तमस्य पिच* इति लोडादेशोत्तमस्याडागमः टित्वादादिः। तस्य सवर्णदीर्घः। पिच्चत्युत्तमस्य पित्वातिदेशः, प्रयोजनं तत्रतत्र भविष्यति। अडागममन्तरेण "अतो दीर्घो यञि" इति दीर्घेणापि रूपे सिद्धे तत्प्रवृत्तिः पर्जन्यवल्लक्षणप्रवृत्त्या। ननु तामादयो ङिल्लादेशानामुच्यन्ते न त्वाहत्य लङादेशानामिति कथं ते लङ्वद्भावेन प्राप्यन्ते। उच्यते। विशेषातिदेशे सामान्यस्याप्यतिदेशात्। तथा हि वसिष्ठवदयमित्युक्ते वसिष्ठत्वप्रयुक्तं ब्राह्मणत्वप्रयुक्तमप्यतिदिश्यते। कथं तर्हि लुङ्लङ्लृङ्क्ष्वडुदात्त* इत्याहत्य विधीयमानोऽडागमो न भवति। अत्र वृत्तिकारः परिहारमाह। *विदो लटो वा* इति वाग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा भविष्यतीति। अत एव तामादयः सलोपश्चेति तेन परिगणितं, यद्वा लोट इत्युपमेये षष्ठीदर्शनादुपमानं विज्ञायते, लङ इव कार्य्यं तल्लोटो भविष्यतीति न तु लङि यत्कार्यं तल्लोटीति अडाटौ न भवतः। यद्वायं लोट् "अशिषि लिङ्लोटौ" इत्याशिषि विधयते, आशीरिष्टस्य प्राप्तिस्तदा *तुह्योस्तातङाशिष्यन्यतरस्याम्* इति तुह्योर्वा तातङादेशः। (भवतात्सः। भवतात्वं) ननु तातङयं "अनेकाल्शित्सर्वस्य" इत्यस्यापवादेन "ङिच्च" इत्यनेनान्त्यस्य कस्मान्न भवति। उच्यते। किमिदं ङित्त्वं ? ब्रूतादित्यादौ गुणवृद्धिप्रतिषेधार्थमुतान्त्यादेशार्थमिति संदिग्धप्रयोजनम्, न चान्त्यादेशार्थत्वे गुणवृद्धिप्रतिषेधार्थत्वसंभवोऽप्रत्ययत्वात्, अनेकाल्त्वं तु निश्चितं, "ङिच्च" इत्येतच्चानङादिष्वनन्यप्रयोजनेषु ङित्त्वेषु सावकाशमितीहासंदिग्धपर "अनेकाल्शित्सर्वस्य" इत्येतत्प्रवर्त्तते। भवत्त्वमित्यत्र तातङा परेण पूर्वबाधितस्य हेर्लुकः स्थानिवद्भावेन पुनः प्रवृत्तिः सकृद्गतपरिभाषया न भवति। यद्वा—*हुझल्भ्यो हेर्धिः* इत्यतो

---

(१) तथा *इतश्चे*ति ङिल्लादेशपरस्मैपदेकारस्य विधीयमानो लोपो लङ्वद्भावान्न भवति। मेर्न इत्यवचनादित्यधिकं २ पुस्तकान्तरे।

हेरित्यनुवर्त्य "अतो हेः" इत्यत्र हिग्रहणमन्तरेण लुकि विधातव्ये 'पुनर्हिग्रहणस्य हेरिति विशेषणेन मुख्यहिपरिग्रहार्थत्वात्, इदमपि तातङः सर्वादेशत्वे प्रमाणम् ॥

अनद्यतने लङ् ॥ अविद्यमानाद्यतनभूतोपाध्यर्थाद्धातोर्लङ् स्यात् । लस्य तिबादिषु "इतश्च" इतोकारलोपः । *लुङ्लङ्लृङ्क्ष्वडुदात्त* इत्यङ्गस्याड्विधिः टित्वादादिः, उदात्तश्च । (अभवत् । अभवद्) *झलांजशोन्ते* ॥ पदान्ते झलां जश इत्यत्रान्तरतम्यात्तकारस्य दकारे ऽवसाने झलां वा चरित्यान्तरतम्यात्तकारः । (अभवताम्) । *तस्थस्थमिपां तान्तन्तामः* इति तसस्ताम् । (अभवन्) अन्तादेशे इकारलोपे *संयोगान्तस्य लोपः* । संयोगान्तस्य पदान्तस्य लोप इति तलोपः । *हलोनन्तराः संयोगः* ॥ अजव्यहित एव श्लिष्टोच्चारितहल्समुदायः संयोगः । (अभवः) । इकारलोपे रुत्वविसर्जनीयौ । (अभवतम् । अभवत । अभवम् । अभवाव । अभवाम) । "तस्थस्थमिपां तान्तन्तामः" "नित्यं ङितः" इति तामादयः सलोपश्च ॥

विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् ॥ विधिः प्रेरणं भृत्यादेः कस्यां चित् क्रियायां नियोजनम् । निमन्त्रणं नित्यनैमित्तिकर्मविषया प्रवर्त्तना । आमन्त्रणं काम्यकर्मविषया सा, अधीष्टः सत्कारपूर्विका सर्वकर्मविषया । एषु चतुर्ष्वपि प्रवर्त्तना नाम वर्त्तते सैव लिङर्थः । भेदेन तूपादानं प्रपञ्चार्थं, प्रवर्त्तना च प्रवृत्तिहेतुर्धर्मः, ।

प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्त्तनाम् ।

इत्याचार्याः । संप्रश्नः संप्रधारणं, तद्वदिदं वा कर्त्तव्यमिति । प्रार्थनं याचनम् । एषु प्रत्ययार्थविशेषणेषु धातोर्लिङ् स्यात् ॥ *यासुट् परस्मैपदेषूदात्तो ङिच्च* ॥ लिङः परस्मैपदेषु तेषामेव यासुट् ङित्वादादिः, उदात्तश्च । सीयुटोपवादः । इदमेव ङिद्वचनं ज्ञापकं ङिल्लादेशानां स्थानिवत्त्वेन ङित्वाभावस्य, यदि हि स्यात् अचिनवममार्जमित्यादौ गुणवृद्धी न स्याताम् । इयं च ज्ञापकापेक्षा "सार्वधातुकमपित्" इत्यस्य पर्युदासत्वपक्षे, प्रसज्यप्रतिषेधत्वे तु पिन्नेति निषेधेन स्थानिवत्त्वेन "सार्वधातुकमपिद्" इत्यतिदेशेन प्राप्तस्य निवारणात्, चिनुयादित्यादिसिद्ध्यर्थन्तु वक्तव्यम् । भवयासुति इति स्थिते । "सुट् तिथोः" । लिङ्सम्बन्धिनोस्तकारथकारयोः सुट् स्यादिति सुट् टित्वादादिः । अयं तकारथकारभक्तः, यासुट् तु लिङ्भक्त इति विषयभेदादनयोर्न बाध्यबाधकभावः । *लिङः सलोपोनन्त्यस्य* । सार्वधातुकलिङः संबन्धिनोनन्त्यस्य सस्य लोप इति यासुट्सुट्सकारयोर्लोपः, सुट् पर्जन्यवल्लक्षणप्रवृत्त्या तु कृतो न त्वस्मिन् कृते वा ऽकृते विशेषो ऽस्ति लोपनात् । श्रवणं त्वाशीर्लिङ्गात्मनेपदे । *अतो येय* इत्यदन्तादङ्गात्परस्य या इत्यस्येयादेशः । *आद्गुणः* इत्यवर्णान्तादचि पूर्वपरयोरेको गुणो भवन् कण्ठ्यस्याकारस्य 'इचुयशानां तालु' इति तालव्यस्येकारस्य 'एदैतोः कण्ठतालु' इति कण्ठतालव्य एकारः । यकारस्य वलि लोपः (भवेत् । भवेतां, भवेयुः) । "झेर्जुस्" इति लिङादेशजुसादेशजकारो "जुसि च" इति विशेषणार्थः । *उस्यपदान्तात्* । अपदान्तादवर्णादुसि परे पूर्वपरयोः पररूपमित्येतद्बाधित्वा "अतो येयः" परत्वान्नित्यत्वाच्च प्रवर्त्तते । यद्यप्यन्तरङ्गत्वात् पररूपं न्याय्यं तथापि यास् इत्येतस्य इय् भवतीति विप्रतिषेधसूत्रे भाष्यकारैर्व्याख्यातत्वात् "लिङः सलोप" इत्यस्यापवाद इय् "अतो येय" इत्यत्र त्वाद्गुणे कर्तव्ये यलोपस्य सिद्धत्वमार्षं, या इय इति वा पठनीयमिति बोध्यम् । (भवेः । भवेतम् । भवेत । भवेयम् । भवेव । भवेम ।

"आशिषि लिङ्लोटौ" इति लिङ् । "लिङाशिषि" इत्यार्द्धधातुकत्वान्न लिङःसलोपः । "किदाशिषि" इति कित्वान्न गुणः । *स्कोः संयोगाद्योरन्ते च* । झलि परे यः संयोगः पदान्ते च यः संयोस्तदाद्योः स्कोर्लोप इति झल्परसंयोगादित्वेन यासुटः सस्य लोपः, पदान्ते तु संयोगे तदादित्वेन सुटोपि सकारो लुप्यते । (भूयात् । भूयास्ताम् । भूयासुः । भूयाः । भूयास्तम् । भूयास्त । भूयासं, भूयास्व । भूयास्म) । सलोपस्य पूर्वत्रासिद्धत्वेन तिस्योः

संयोगान्तलोपो न भवति पदान्तसंयोगादिलोपस्यानवकाशत्वात्। ननु *हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्* इति हलन्ताद् दीर्घाद् ङ्याबन्ताच्च परस्य सुतिस्यपृक्तस्य लोपविधाने स्कोरिति सलोपस्य पूर्ववदसिद्धत्वाद्धलन्तात्परो ऽपृक्तत्वेन लोपः कस्मान्न भवति। सुतिस्यपृक्तमिति प्रत्ययनिर्देशेन प्रकृतेराक्षेपात्ततः परस्यापृक्तस्य लोपविधानात्। न चेह सकारान्तस्य प्रकृतित्वं, यद्वा ऽसिद्धत्वे भूयादित्यत्र यासुट् तस्य लोपोप्यसिद्ध इति तस्य तकारभक्तत्वादपृक्तस्यैवाभावः "अपृक्त एकाल् प्रत्ययः"।

लुङ् ॥ भूतोपाधिकार्थाद्धातोर्लुङ् स्यात्। भूतः पञ्चविध इत्युक्तं, तत्रानद्यतने लङ्विधानात्ततोन्यः सर्वो भूतोत्र गृह्यते। अनद्यतन इति बहुव्रीहिनिर्देशान्न व्यामिश्रे लङः प्रसङ्गः। लस्य तिबादिषु "च्लि लुङि" इति च्लिः। तस्य "च्लेः सिच्" इति सिजादेशः। स्थानिन्यादेशे च चकारानुबन्धनस्य प्रयोजनं वक्ष्यते। तस्य "गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु" इति लुक्। स च नित्यत्वादिटः पूर्वं *दाधा घ्वदाप्* इति दाधारूपा धातवो घुसंज्ञाः। अडागमः। (अभूत्)। अत्र सिचो लुका लुप्तत्वात् प्रत्ययलक्षणाभावात् *सिचि वृद्धिः परस्मैपदेषु* इति परस्मैपदे परे सिचि विधीयमाना वृद्धिर्न भवति। तथा गुणोपि न भवति "भूसुवोस्तिङि" इति तिङि सार्वधातुके निषेधात्। अत एव वा निषेधाद्वृद्धेरप्यलाभो भविष्यति। स्याद् अपवादेन बाधितत्वादप्रसङ्गात् कथमसौ निषिध्येत। ननु *अस्तिसिचोपृक्ते* इत्यस्तिसिचूभ्यां परस्य सार्वधातुकापृक्तस्य विधीयमान ईट् प्रत्ययलक्षणेनात्र कस्मान्न भवति। अत्र केचिदेवमाहुः। अस्तीति द्विसकारकनिर्देशादेकेन सिचो विशेषणाच्छ्रूयमाणात्सिचः परस्येड्विधिरितीह न भवतीति। इदमविचारितरमणीयम्। अस्तीति पदान्तभूतस्यास्य सकारस्य पदान्तरेणान्वयायोगात् पृथक्पदत्वे तु न तस्य धातुत्वं नापि तत्सहितस्य समुदायस्येति धातुविषयश्तिब्निर्देश एव नोपपद्यते। अन्ये वर्णयन्ति "आहिभुवोरीट्प्रतिषेध" इत्यत्र न केवलमस्त्यादेशस्य भुवः स्थानिवत्त्वेन प्राप्त इण् निषिध्यते किं त्वनादेशस्यापीति, स्थानिवत्वदूषणपरे च तत्र वार्त्तिके कथमनादेशो भूर्गृह्यत इति त एव प्रष्टव्याः। न चानादेशस्याग्रहणे निषेधस्य वैयर्थ्यं प्रमाणम्। अर्थभेदेन रूपद्वयार्थत्वात्तस्य। वयं तु परिहरामः। सिचोऽल्पाच्कत्वात् बहुविषयत्वेनाभ्यर्हितत्वाच्च पूर्वनिपाते कर्त्तव्ये "अस्तिसिच" इति वचनात्तन्त्रादिना विद्यमानसिच इत्यस्याप्यर्थस्य लाभादिति। किं च अर्थद्वयपरिग्रहे श्तिबप्युपपद्यते ऽन्यथा सिजस्भ्यामित्येव ब्रूयात्, न चास्तीत्यस्यतिनिवृत्त्यर्थः, विकरणेन व्यवधानात् ताभ्यां परस्य सार्वधातुकापृक्तस्यासंभवात्। (अभूताम्। अभूवन्)। अजादौ "भुवो वुक्" इति वुक्। अत्र झेः प्रत्ययलक्षणेन सिचः परत्वेपि सिजभ्यस्तविदिभ्यः परस्य ङिल्लादेशस्य झेर्विधीयमानो जुस्भावो न भवति। "आत" इति नियमात्, सिज्लुगन्ताद्यदि भवत्यात एवेति, अभ्यस्तं "उभे अभ्यस्तं" "जक्षित्यादयः षट्" इति वक्ष्यते। (अभूः। अभूतम्। अभूत। अभूवम्। अभूव। अभूम)।

लिङ्निमित्ते लृङ् क्रियातिपत्तौ। लिङो निमित्तं हेतुहेतुमद्भावादि, कुतश्चिद्वैगुण्यात्क्रियाया अनभिनिर्वृत्तिः क्रियातिपत्तिः, अत्र धातोर्लृङ् स्यात्, लस्य तिबादिषु स्यतासी इति स्यः। इडागमः, "इतश्च" इत्यादि। (यदि सेवापरोऽभविष्यत् आढ्यः अभविष्यत्। अभविष्यताम्। अभविष्यन्। अभविष्यः। अभविष्यतम्। अभविष्यत। अभविष्यम्। अभविष्याव। अभविष्याम)॥क्रियातिपत्तिर्न सेवापरो नाप्याढ्य इति।

अथात्मनेपदं प्रदर्श्यते ॥ *कर्त्तरि कर्मव्यतिहारे*। कर्म क्रिया। अन्यस्यान्येन करणं परस्परकरणं च कर्मव्यतिहारः। अस्मिन् गम्यमाने आत्मनेपदं स्यात् इति लस्य तिबादिषु विकरणादिसाधारणं पूर्ववदेव, "टित आत्मनेपदानां टेरे" इति टिल्लादेशानामात्मनेपदानां टेरेत्वं स्यात। इदं चैत्वमाद्यन्तप्रयुक्तकार्यातिदेशात्केवलस्याप्यचष्टिसंज्ञाविधानाद्भवति।

(व्यतिभवते । व्यतिभवेते) । अत्र "आतो ङितः" इत्यदन्तादङ्गात्परस्य ङिदवयवस्याकारस्येयादेशे वलि लोपः । 'नानर्थके ऽलोन्त्यविधिः' इति टेरेत्वमत्रान्त्यस्य न भवति, *ईदूदेद्विवचनं प्रगृह्यम्* इति ईदाद्यन्तस्य द्विवचनस्य प्रगृह्यत्वात् "प्लुतप्रगृह्या अचि" इति प्रकृतिभावाद् व्यतिभवेते एतावित्यादावयादि न भवति । इह प्रकृतिभावः परभूतनिमित्तविकाराभावस्तेन स्वरो भवत्येव । (व्यतिभवन्ते) अत्र त्रीणि कार्याणि प्राप्नुवन्त्यन्तादेशोद्भावः शबिति । अत्र विशेषविहितत्वेनान्तादेशापवादाऽद्भावान्नित्यत्वाच्छप्, तत्र कृतेऽङ्गस्यादन्तत्वादद्भावस्य न प्राप्तिरिति सामान्यविहित एवान्तादेशः प्रवर्तते । (व्यतिभवसे) । *थासः से* इति टिह्लादेशस्य थासः सेभावः । (व्यतिभवेथे) भवेते इतिवत् । (व्यतिभवध्वे । व्यतिभवे । व्यतिभवावहे । व्यतिभवामहे) । एत्वात्परत्वात् "आद्गुणः" कृते वा तस्मिन् "अतो गुणे" इति पररूपम् । व्यतिशब्दः कर्मव्यतिहारद्योतनार्थः । तस्य *ते प्राग्धातोः* । ते गत्युपसर्गसंज्ञा धातोः प्राक् प्रयोक्तव्या इति नियमात् पूर्वप्रयोगः । *उपसर्गाः क्रियायोगे* । *गतिश्च* इति प्रादयो यत्क्रियायुक्तास्तं प्रत्युपसर्गसंज्ञाः सन्तो गतयः । (इतरेतरस्य व्यतिभवन्ति, अन्योन्यस्य व्यतिभवन्ति) इत्यत्र "इतरेतरान्योपपदाच्च" इति कर्मव्यतिहारलक्षणमात्मनेपदं निषिध्यते। "अन्योन्योपपदाच्च" इति चकारेण परस्परोपपदादपि न भवति (परस्परं व्यतिभवन्ति । व्यतिबभूवे । व्यतिबभूवाते । व्यतिबभूविरे । व्यतिबभूविषे । व्यतिबभूवाथे । व्यतिबभूविढ्वे । व्यतिबभूविध्वे । व्यतिबभूवे । व्यतिबभूविवहे । व्यतिबभूविमहे) । *लिटस्तझयोरेशिरेच्* । लिटस्तझयोरेशिरेचावादेशौ स्तः । एशः शकारो "अनेकाल्शित्" इति सर्वादेशार्थः, *विभाषेटः* इति इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धकारस्य मूर्धन्य इति तद्विकल्पः । टेरेत्वमजादौ वुक् । वलादौ क्रादिनियमादिट् । "भवतेरः" इत्यभ्यासस्यात्वम् । (व्यतिभविता । व्यतिभवितासे) । "थासः से" इति सेभावे "तासस्त्योः" इति सलोपः । (व्यतिभविताध्वे) । अत्र सकारस्य धकारादिप्रत्ययपरत्वात् "धि च" इति लोपे धकारस्य *अनचिच* इति अच उत्तरस्य यरो द्वित्वमचि नेति द्वित्वे "झलां जश् झशि" इति धकारान्तरतम्याद्दकारः । येषां "धि च" इति सिचो लोप इति पक्षस्तेषामप्यत्र सकारस्यान्तरतम्याज्जशि दकारे नात्र रूपभेदः । (व्यतिभविताहे) । इट एत्वे "ह एति" इति सकारस्य हकारः, (व्यतिभवितास्वहे । व्यतिभविष्यते) इत्यादि पूर्ववत् । (व्यतिभवताम् । व्यतिभवेताम् । व्यतिभवन्ताम् । व्यतिभवस्व । व्यतिभवेथाम् । व्यतिभवध्वम् । व्यतिभवै । व्यतिभवावहै । व्यतिभवामहै) टेरेत्वं "आतो ङितः" इत्यादि पूर्ववत् । "आमेतः" इति लोडादेशानामेकारस्यामादेशः । सेध्वेशब्दयोस्तु "सवाभ्यां वामौ" इति यथासंख्यं वामादेशावपवादौ । उत्तमेकारस्यैत्वे "एत ऐ" इत्यैकारः । अयमप्यामादेशापवादः । अत्राडागमे कृते तस्य तत्परस्य चैकारस्य *आटश्च* आटोचि परे पूर्वपरयोरेका वृद्धिरैकारः । तस्य शबकारस्य च "वृद्धिरेचि" । अवर्णादेचि परे पूर्वपरयोरेका वृद्धिरित्यैकारः । (व्यत्यभवत । व्यत्यभवेताम् । व्यत्यभवन्त । व्यत्यभवथाः । व्यत्यभवेथाम् । व्यत्यभवध्वम् । व्यत्यभवे । व्यत्यभवावहि । व्यत्यभवामहि । व्यतिभवेत । व्यतिभवेयाताम् । व्यतिभवेरन् । व्यतिभवेथाः । व्यतिभवेयाथाम् । व्यतिभवेध्वम् । व्यतिभवेय । व्यतिभवेवहि । व्यतिभवेमहि) । "लिङः सीयुट्" इति लिङादेशस्य सीयुट्टित्वादादिः । "सुट् तिथोः" । "लिङः सलोपः" । "आद्गुणः" । वलि लोपः । "झस्य रन्" इति लिङो झस्य रन्नित्यादेशः, "न विभक्तौ" इति नेन्नकारः । *इटोत्* इति लिङादेशस्येटोदादेशः । तकार उच्चारणार्थो नादेशावयवः । यद्यादेशावयवत्वेपि "इदमस्थमुः" इति थमुप्रत्ययस्य *प्राग्दिशो विभक्तिः* इत्यतः परे दिक्शब्देभ्य इत्यतः पूर्वे प्रत्यया विभक्तय इति विभक्तित्वे तत्स्थत्वेन मकारस्येत्संज्ञानिषेधे सिद्धे तत्परित्राणायोकारासञ्जनेन "न विभक्तौ" इत्यस्यानित्यत्वज्ञापनादित्वं लभ्यते । आशिषि । (व्यतिभविषीष्ट । व्यतिभविषीयास्ताम् । व्यतिभवीषिरन् ।

व्यतिभविषीष्ठाः । व्यतिभविषीयास्थाम् । व्यतिभविषीढ्वम् । व्यतिभविषीध्वम् । व्यतिभविषीय । व्यतिभविषीवहि । व्यतिभविषीमहि) । आर्द्धधातुकत्वादेषु लिङः सलोपाभावः । अत्र सीयुट् 'यदागमास्तद्ग्रहणेन गृह्यन्ते' इति प्रत्ययग्रहणेन गृह्यते, तथा तदवयवभक्त सुडपि तत्समुदायभक्त इति द्वयोरपि सकारयोः प्रत्ययावयवत्वात् "आदेशप्रत्यययोः" इति षत्वम् । यथा हि "शीङो रुट्" इति प्रत्ययावयवझकारादेशस्यातोपि रुट् समुदायभक्तत्वेन सार्वधातुकग्रहणेन गृह्यत इति शेरत इत्यत्र "शीङः सार्वधातुके" इति गुणः प्रवर्त्तते । *ष्टुना ष्टुः* । षकारटवर्गाभ्यां युक्तयोः सकारतवर्गयोर्यथासंख्यं ष्टुरिति तकारथकारयोः षकारठकारौ । निमित्तिनिमित्तयोर्यथासंख्यं *तोः षि* इति षकारे परे तवर्गस्य ष्टुत्वनिषेधान्न भवति "विभाषेटः" इति मूर्द्धन्यविकल्पः । (व्यत्यभविष्ट । व्यत्यभविषाताम् । व्यत्यभविषत । व्यत्यभविष्ठाः । व्यत्यभविषाथाम् । व्यत्यभविढ्वम् । व्यत्यभविषि । व्यत्यभविष्वहि । व्यत्यभविष्महि । सिचीड्गुणावादेशषत्वानि यथायोगं ष्टुत्वं च । "आत्मनेपदेष्वनत" इति झस्याद्भावः । तकारस्य प्रयोजनाभावान्नेत्त्वम् , ध्वमि षत्वस्य पूर्वत्रासिद्धत्वात् "धि च" इति सलोपे गुणः । इट्, इणः परत्वात् "विभाषेट" इति मूर्द्धन्यविकल्प उदाहार्यः । (व्यत्यभविष्यत) । इत्यादि लङ्वत् ।

अथ भावकर्मणोर्लकाराः प्रदर्श्यन्ते ॥ तत्र *भावकर्मणोः* इत्यनयोर्लस्यात्मनेपदमेव । *सार्वधातुके यक्* इति भावकर्मवाचिनि सार्वधातुके लटि लोटि लङि विध्यादिलिङि च यक् । अन्यत्र सार्वधातुके स्यादिभिरस्य बाधः, लिङाशीर्लिङोस्त्वार्द्धधातुकत्वान्न प्रसङ्गः । यकः कित्त्वान्न गुणः । (भूयते । भूयताम् । अभूयत भूयेत भवता) । अत्र प्रत्ययेन कर्त्तुरनभिधानाच्तृतीया । *कर्तृकरणयोस्तृतीया* इति तिङ्कृत्तद्धितसमासैरनभिहतयोरनयोस्तृतीयोच्यते । तत्र भावस्य युष्मदस्मदर्थाविशेष्यत्वात्प्रथमपुरुष एवात्र व्याख्याने, स्वतः क्रियाया निवृत्तभेदाया अभिधानादेकवचनमेव भवति, (भवद्भ्यां, भवद्भिः, त्वया युवाभ्यां युष्माभिः, मया आवाभ्यामस्माभिर्भूयते) इति । भवन्तीत्यादौ तु प्रत्ययेन कर्त्तुरभिधानात तत्कृतं बहुत्वम् । (भूयते मासः) 'कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणां देशश्चाकर्मणां' इति मासादयो ऽकर्मकाणां कर्माणि । तत्र कर्मणोऽभिधानात् कर्मणि द्वितीया न भवति, सा च तिङादिभिरनभिहिते विधीयते । (भूयते भवता मासम्) इत्यत्र भावे लविधानात् कर्मणो ऽनभिधानाद् द्वितीया । ननु सकर्मकत्वात्कथं भावे लकारः ? । उच्यते । कालादिभिर्न कश्चिदप्यकर्मक इति तद्व्यतिरिक्तेन कर्मणा ऽकर्मकाणां भावे लविज्ञानात, कथं तर्हि मासे लो, ऽकर्मकाणां भावकर्त्रोर्लविधेः । उच्यते, एवंविधानां भावकर्मकर्तृषु लविज्ञानात् । तथोक्तं "कालाध्वनोः" इत्यत्र मासादौ कर्मणि भावे च लकारं प्रस्तुत्य 'प्राकृतमेवैतत्कर्म यथा कटं करोति' इति, पुनश्च तत्र 'यदि प्राकृतमेवैतत्कर्म अकर्मकाणां भावे लो भवतीति भावे लो न प्राप्नोति' इति चोदयित्वा 'अकर्मकाणामित्युच्यते, न च के चित्कालभावादिभिरकर्मकास्तत एवं विज्ञास्यामः क्व चिद्येऽकर्मका इति । अथ वा येन कर्मणा सकर्मकाश्चाकर्मकाश्च भवन्ति तेनाकर्मकाणां न चैतेन कर्मणा कश्चिदप्यकर्मकः । अथ वा यत्कर्म भवति न च भवति तेनाकर्मकाणां न चैतत्कर्म क्व चिदपि न भवति' इति । (अनुभूयते सुखम्) इत्यादौ संवेदनाद्यर्थत्वाद् भुवः संज्ञ्यादिभिरपि सकर्मकत्वात्कर्मण्येव लः । (भूयेते भूयन्ते) इत्याद्युदाहार्यम् । तथा, (भूयताम् । अभूयत । भूयेत मासः) इत्यादि च । लिटि न विशेषः । अत्र के चिदाहुः । "भवतेर" इत्यत्वं श्तिपा निर्देशात् भावकर्मणोर्नेति । अयमस्यार्थस्य कथं प्रतिपादक इति स एव प्रष्टव्यः । तस्य तु प्रयोजनं यङ्लुकि मन्त्रविषये आमभावे लिट्परत्वे सत्यत्वनिवृत्तिः । (भविता । भाविता) *स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च* इत्यजन्तानां हनादीनां च धातूनामार्द्धधातुकेषु भावकर्मविषयेषु स्यादिषु वा चिणोव कार्यमिट् चेत्यभिधानात् चिण्वत्पक्षे वृद्धिः । इहेड्वि-

धानमनिडर्थं ण्यन्तार्थं च । स्यसिजादीनामार्द्धधातुकत्वस्याव्यभिचारेपि तेन विशेषणं सीयुडर्थम् । तेन सार्वधातुके विध्यादिलिङि सीयुटि चिण्वत्त्वस्याभावः । एवं स्यसिच्सीयुड्विषये द्वैरूप्यमुदाहार्यम् । (भविष्यते । भाविष्यते । अभविष्यत । अभाविष्यत । अभावि । अभाविषाताम् । भविषीष्ट । भाविषीष्ट) इत्यादि । लुङ्लिङोर्ध्वमि चिण्वत्पक्षे "विभाषेट" इति मूर्द्धन्यविकल्पनाचातूरूप्यं नेयम् । लुङि तशब्दे "चिण् भावकर्मणोः" इति चिण् विधानात् च्लेश्चिण् ततः "चिणो लुक्" इति तशब्दस्य लुक् ॥

अथ कर्मकर्त्तोच्यते ॥ *कर्मवत्कर्मणा तुल्यक्रियः* ॥ "कर्त्तरि शप्" इत्यतः कर्तृग्रहणमनुवृत्तं प्रथमान्तमिह विपरिणम्यते । इह कर्म न पारिभाषिकं तेनात्यन्तविलक्षणेन क्रियायाः सादृश्यायोगात् । नापि क्रियामात्रं (१)यथा कथं चन क्रियया क्रियायाः सादृश्याव्यभिचारात् । अतः कर्मेह तत्स्यात्क्रिया, अनया तुल्यक्रियः कर्ता कर्मणा तुल्यस्तत्कार्याणि लभत इत्यर्थः । तानि च यगात्मनेपदचिण्चिण्वद्भावाः । एकस्मिंश्च प्रयोगे कर्मणा तुल्यक्रियस्य कर्तुरसंभवात् कर्मत्वकर्तृत्वे प्रयोगभेदेन ज्ञेये । यद्येवं पटं भावयतीत्यत्र कर्मस्था क्रियोत्पत्तिरस्ति तया तुल्यक्रियत्वं पटो भवतीत्यत्र कर्तुरिति यगादि कस्मान्न भवति । अर्थस्वभावादेवास्य योगस्य धातुविषयत्वे सिद्धे धातोरित्यनुवृत्तिसामर्थ्याद्विभक्तिविपरिणामेन सप्तम्यन्तं विवक्षितैकत्वं विज्ञायत इत्येकस्मिन् धातौ कर्मणा तुल्यक्रियस्य कर्तुः कर्मवद्भावाद् इह तु धातुर्भिद्यते । एवं च कर्मव्यापारार्थो धातुर्यत्र सौकर्यातिशयप्रतिपादनाय कर्मव्यापारमात्रे वर्तते सोस्य विषयः संपन्नः । ततश्च शत्रुमभिभवतीत्यत्र न्यग्भवनोपसर्जने न्यग्भावने वृत्तो भवतिर्यदा न्यग्भवनमात्रे वर्त्तते तदाभिभूयते शत्रुः स्वयमेवेति यगात्मनेपदे भवतः । नन्वत्र कर्मस्था क्रिया न्यग्भवनं सैव कर्तृस्थापीति क्रियाभेदाभावात् कथं भेदनिबन्धनं सादृश्यमिति चेन्न । कर्मकर्त्रवस्थाभेदेन भिन्नकारकत्वेन भेदोपपत्तेः । नन्वत्रातिदेशेन यगादिवद् द्वितीया कस्मान्न भवति । न च "अनभिहिते" इति निषेधोऽस्य कार्यातिदेशत्वाद् अत्र च तदधिकाराभावात् । उच्यते । "व्यत्ययो बहुलं" "लिङ्याशिष्यङ्" इति संहितया सूत्रपाठाद् (२)द्विलकारको निर्देशः, तत्रैकं लग्रहणमनुवर्त्तते तच्चेह षष्ठ्यन्तं सत् तदन्तत्वं प्रयोजयति, (३)कार्यप्रतीतिश्चाध्याह्रियत इति लान्तकार्यविषयत्वादतिदेशस्य द्वितीयायास्तथाभावादप्रसङ्गः । एवं च कर्माश्रयाः कृत्यादयोपि न भवन्ति । नन्वभिभूयमानो देवदत्तो यज्ञदत्तमभिभवतीत्यत्रापि(४) कर्मवद्भावः प्राप्नोति, अत्र हि यज्ञदत्ते कर्मणि(५) दृष्टो न्यग्भाव इतरस्मिन् देवदत्ते च कर्तरि दृश्यते यदसौ न्यग् भवन् न्यग् भावयति । नैष दोषः । इह कर्मणा तुल्यक्रिय इति कर्मस्थया क्रियया तुल्यायाः (६)प्रसङ्गात्कर्तुश्च क्रियापेक्षत्वात् प्रत्यासत्त्या तदपेक्षयैव कर्तुः कर्मवद्भावविज्ञानात् । इह च न्यग्भवनं न कर्तृत्व उपयुज्यते किं तु न्यग्भावनमेव, अन्यग्भवतोपि न्यग्भावने कर्तृत्वसंभवात् । वत्करणा(७)त्स्वाश्रयाकर्मकत्वनिबन्धनो भावे लकारोपि भवति । अभिभूयते शत्रुणा स्वेनैवेति, तेन शत्रो(८)स्तृतीया भवति । सर्वत्र कर्मवदुदाहरणानि । लुङि तशब्दे तु "अचः कर्मकर्तरि" इति चिणादेशविकल्पनात् पक्षे सिच्, तस्य पूर्ववच्चिण्वदिट् तत्पक्षे वृद्धौ (अभ्यभावि) (अभ्यभाविष्ट) । (अभ्यभविष्ट) इति त्रैरूप्यम् । स्वाश्रयभावे लकारे "चिण् भावकर्मणोः" इति चिणेव । (अभ्यभावि शत्रुणा स्वेनैवेति) ।

---

(१) यथा कथाचन । (२) लिङिति । (३) कार्यप्रतीति श्चात्राध्या ।
(४) सकर्मकत्वात् । (५) दृष्टं न्यग्भवनं न्यग्भावयितरि देवदत्ते ।
(६) क्रियायाः । (७) स्वाश्रयणेन कर्मकर्तृत्व ।
(८) द्वितीया न भवति ।

अथ पुरुषविषये किं चिद् विचार्यते ॥ युष्मदस्मदन्येषु सहविवक्षितेषु त्यदादीनि सर्वैर्नित्यम् । अन्यैस्सहवचने त्यदादीनि शिष्यन्ते मिथस्तु पराणीति शिष्यमाणाभ्यां युष्मदस्मद्भ्यामशिष्यमाणार्थाभिधानेपि स्वार्थापेक्षौ मध्यमोत्तमावेव भवतः । न तु शिष्यमाणाशिष्यमाणरूपस्यार्थस्य युष्मदस्मदर्थान्यत्वेन शेषत्वात्प्रथमः, यत्र युष्मदस्मदी समानाधिकरणे न स्तः स शेष इत्युक्तत्वात् । (तेन देवदत्तश्च त्वं च युवां भवथः) (देवदत्तश्च स च त्वं च यूयं भवथ) । (देवदत्तश्चाहं च आवां भवावः) (देवदत्तश्च स चाहं च वयं भवामः) इति । युष्मदस्मदोः सहविवक्षाया(१)मस्मदा शिष्यमाणेन युष्मदस्मदर्थाभिधानेपि परत्वादस्मदर्थापेक्ष उत्तमो भवति । (त्वं चाहं च आवां भवाव) इति । भवतापि युष्मदस्मदोः सहवचने तस्य पूर्वपाठाश्रयेण तयोरेव शेषे (भवांश्च त्वं च युवां भवथः) । (भवांश्चाहं च आवां भवाव) इति । सहविवक्षा चानेकस्यार्थस्यैकगुणक्रियाभिनिवेशार्थं बुद्ध्या निरूप्यमाणस्य क्रियागुणद्वारेणान्योन्यापेक्षया समुदायभावमापन्नस्य सहभावेन वक्तुमिच्छा, उद्भूतावयवभेदत्वाच्च द्विवचनबहुवचने । असहविवक्षायां द्वैतम् । एक एव लकारो ऽनेककारकार्थाभिधायी प्रतिकारकमावर्त्तते वेति । तत्राद्ये पक्षे युष्मदस्मदन्यानामशेषत्वाद्यथायोगं मध्योत्तमौ भवतः । (स च त्वं च भवथः) तथा मध्यमोत्तमयोर्युगपत्प्रसङ्गे परत्वादुत्तमः, (त्वं चाहं च भवाव) इति । पक्षान्तरे तु (२)अभिधेये तत्तत्कारकापेक्षया प्रथमादयो यथायोगं भवन्तीति न विवादः । (भवान् भवति,) (त्वं भवसि,) (अहं भवामीति) अलिङ्गसंबोधनैकविषयश्च युष्मदर्थो भवदर्थस्त्वन्य इति तद्योगे प्रथमोक्तिः । यदा त्वस्मात्सम्बोधनविभक्तिः तदा युष्मदर्थयोगात् मध्यमो भवति (हे भवन् भवसि इति । अतित्वं भवति अत्यहं भवति इत्यादौ त्वामतिक्रान्तो मामतिक्रान्त इति "अत्यादयः क्रान्ताद्यर्थे" द्वितीयया इति तत्पुरुषे त्वमतिक्रान्तो येनाहमतिक्रान्तो येनेति "अनेकमन्यपदार्थे" इत्यनेकं सुबन्तमन्यस्य पदस्यार्थे वर्त्तमानं समर्थं समस्यत इति बहुव्रीहौ वा ऽतिक्रमितुः प्राधान्यात्तस्यैव लान्तार्थविशेषणत्वान्न मध्यमोत्तमौ । यदा त्वतिशब्दः पूजितवचनः तदा "स्वती पूजायाम्" इति तत्पुरुषे युस्मदस्मदोरर्थस्य प्रधान्यात्तेन विशेष्यत्वाद् (अतित्वं भवसि अत्यहं भवामि) इति भवतः । त्वद्भवति मद्भवतीत्यत्र च्व्यन्तयोरेतयोस्त्वमिवाहमिवार्थेस्वार्थारोपेण वर्त्तमानत्वादमुख्यार्थत्वात् 'गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय' इति न्यायेन मध्यमोत्तमौ न स्तः । तथाहि । "अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्त्तरि च्विः" इति कार्यात्मना ऽभूतस्य कारणस्य कार्यात्मना भावे विवक्षिते संपद्यमाने कार्यात्मना भवतिकर्त्तरि वृत्तात्प्रातिपदिकात्कृभ्वस्तियोगे च्विर्विधीयते। एतदुक्तं भवति । अभेदविवक्षया कारणवृत्तेः कार्यशब्दात् प्रत्यय इति । त्वत्कल्पो भवति मत्कल्पो भवतीत्यादावपि गौणार्थत्वाच्च न मध्यमोत्तमौ । तत्र *ईषदसमाप्तौ कल्पब्देश्यदेशीयरः* संपूर्णता पदार्थानां समाप्तिः, किं चिन्न्यूनतेषदसमाप्तिः, एतद्विशिष्टेर्थे वर्त्तमानात्प्रातिपदिका *त्तिङश्च* इति तिङन्ताच्च स्वार्थे कल्पबादय इति प्रकृत्यर्थसदृशार्थान्तरवृत्तिभ्यो विधानात् । यथा तु कालान्तरदृष्टगुणेषदसमाप्तिविशिष्टस्वार्थवृत्तेः प्रत्ययाः तदा न गौणार्थत्वमिति त्वत्कल्पो भवसि मत्कल्पो भवामीति भवतः । त्वमेवेदानीं किं चिन्न्यूनगुणो भवसीत्यर्थः । पूर्वत्र तु त्वत्सदृशोन्यो भवतीत्यर्थः ।।

अथ तिङन्तात्प्रत्ययाः प्रदर्श्यन्ते ॥ *अतिशायने तमबिष्ठनौ* ॥ अतिशायनं प्रकर्षोभिभवः । एतदुपाधिकार्थवृत्तेऽर्यात्प्रातिपदिकादेतौ स्याताम् । तथा "तिङश्च" इति तिङन्ताच्च । *बहूनामेकस्य निर्धारणे वृत्तौ द्विवचनभिज्योपपदे तरबीयसुनौ* द्वयोरर्थयोर्वचने विभज्ये विभक्तव्ये चोपपदे तरबीयसुनोर्विधानात् । तौ अजादी गुणवचनादेवेतीष्ठनीयसुनोर्गुणवचनादेव नियमात्तिङन्तात्तरसमपावेव, एतदन्तात् *किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे* किमादिभ्यो यो घस्त-

(१) परत्वात् ।   (२) लाभिधेये ।

दन्तादूद्वय्यप्रकर्षे गम्यमाने आमुरित्यामुः । उकारोमकारस्यानन्त्यत्वेनेत्वनिवृत्तये हल्लुप्यते तत्र "स्वरादिनिपातमव्ययम्" तथा *तद्धितश्चासर्वविभक्तिः* इत्यसर्वविभक्तियुक्तं तद्धितान्तं, तथा "कृन्मेजन्त" इति (१) मेजन्तं, तथा "क्त्वातोसुन्कसुन" इति (२) तदन्तं, "अव्ययीभावश्च" इत्यव्ययीभावश्च."तरप्तमपौ घः" । तत्राणि (३) परे, "यचि भम्", यकारादावजादौ च स्वादावसर्वनामस्थाने परतः पूर्वं भमिति घान्तस्य भसंज्ञा । इह स्वादयः स्वौजसमौडित्यारभ्य कप्पर्यन्ताः । घान्तस्य *यस्येति च* । इवर्णावर्णयोरीति भसंज्ञानिमित्ते तद्धिते च परे लोप इति लोपः, (भवतितरां भवतितमां,) तद्धिताश्च "तद्धिता" इत आरभ्य आपञ्चमाध्याय-समाप्तेर्वक्ष्यमाणाः प्रत्ययाः, आमन्तं कृत्तद्धितसमासाश्च कृदन्तं तद्धितान्तं समासश्च प्रातिपदिकमिति प्रातिपदिकं, कृतः समासाश्च वक्ष्यन्ते । प्रातिपदिकाच्च "ङ्याप्प्रातिपदिकात्" "स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसाम्ङ्योस्सुप्" इति विधीयमानेषु स्वादिषु एकत्वार्थमेकवचनं सुः। तस्य च *अव्ययादाप्सुपः* अव्ययाद्विहितस्यापः सुपश्च लुगिति लुक् । स्वरादिष्वामितिपाठादयव्यत्वम्, आबिति टाप्डाप्चापः *प्रशंसायां रूपम्* प्रशंसा स्तुतिः । एतदुपाधिकार्थान् ङ्याप्प्रातिपदिकात तिङन्ताच्च रूपप् स्यात् । स्वभावादेतदन्तान्नपुंसक (४) प्रथमैकवचनमेव । तस्य "स्वमोर्नपुंसकात्" इति नपुंसकलिङ्गात्परत्वेन लुकि प्राप्ते "अतोम्" इत्यमभावे *अमि पूर्वः* अकोमि परे पूर्वपरयोः पूर्वरूपमेकादेश इति पूर्वरूपत्वम्, तेन(भवतिरूप) इत्यादि भवति । एवं कल्पबाद्य'न्तादपि स्वभावान्नपुंसकात्स्वादिकार्यम् "अव्ययसर्वनाम्नामकच् प्राक् टेः" रित्यकच् । तत्र "तिङश्च" इत्यनुवृत्तेरस्यापि टेः प्रागज्ञातादिषु प्रागिवीयेष्वर्थेषु भवति । अकार उच्चारणार्थः, चकारः "चित" इति स्वरार्थः । तत्र हि 'चितः सप्रकृतेः' इत्युच्यते । (भवतकि) ।

अथ तिङो ऽन्ये लादेशा उच्यन्ते ॥ *लटः शतृशानचावप्रथमासमानाधिकरणे* ॥ लटः शतृशानचावादेशौ स्यातामप्रथमान्तेन चेत्सामानाधिकरण्यं भवति । तत्र शेषत्वादस्य लटः शता, तस्य शित्त्वात्सार्वधातुकत्वे पूर्ववच्छबादयः। शत्रन्तस्य "कृदतिङ्" इति तृतीयधात्वधिकारविहितस्य प्रत्ययस्य कृत्संज्ञाविधानात् कृदन्तत्वेन प्रातिपदिकत्वादविशेषेण स्वादिप्रसङ्गे कर्मत्वादविशेषेण स्वादिप्रसङ्गे कर्मत्वस्य विवक्षितत्वात् "कर्मणि द्वितीया" इति द्वितीया । द्वितीयादिशब्दैः सुपां त्रिकाः पूर्वाचार्यप्रसिध्द्योच्यन्ते । तत्रापि सुपस्त्रीणित्रीणि पदानि एकशो यथासंख्यमेकवचनादिसंज्ञानीति तिङ्वदेकत्वादौ क्रमेणैकवचनादि भवति । तत्रमौटोः ॥ सुडनपुंसकस्य सुडिति प्रत्याहारेणादितः पञ्च वचनानि गृह्यन्ते । तन्यनपुंसकस्य संबन्धीनि सर्वनामस्थानत्वे *उगिदचां सर्वनामस्थाने धातोः* इति नुम् । उगितामङ्गानां लुप्तनकारस्याञ्चतेः पूर्वमधातोरुगितः पश्चाद्धातोस्तस्मिन्नुम् । अञ्चतिग्रहणादुगितो धातोर्यदि भवति अञ्चतेरेवेति नियमार्थकाद् अधातुग्रहणमधातुर्भूतपूर्वार्थं, नुमो मित्त्वात् *मिदचोन्त्यात्परः* इत्येकत्र संनिविष्टानामचामन्त्यादचः परः ॥ *नश्चापदान्तस्य झलि* अपदान्तयोर्नकारमकारयोर्झल्यनुस्वार इति नस्यानुस्वारः ॥ "अनुस्वारस्य ययि परसवर्णः" ॥ स च "स्थानेन्तरतमः" इति नासिक्यानुस्वारस्य तादृशो नकारः। (भवन्तं पश्य) (५) भवतस्तानित्यत्वात् "स्वादिष्वसर्वनामस्थाने" इति पूर्वस्य प्राप्तायाः पदसंज्ञायाः "यचि भम्" इति भसंज्ञया परया ऽनवकाशया बाधात् "झलां जशोन्ते" इति जश्त्वं न भवति । कर्तृकरणविवक्षायां, "कर्तृकरणयोस्तृतीया" उक्तः कर्त्ता ॥ *साधकतमं करणम्* क्रियाप्रसिद्धौ यत्कारकं कारकान्तरापेक्षया प्रकृष्टं विवक्ष्यते यद्व्यापारान्तरं क्रियानिष्पत्तिर्विवक्ष्यते तत्करणम् । तदुक्तम्—

(१) मकारैजन्तम् । (२) त्वदन्तम् । (३) अपि परे ।
(४) प्रथमेति बहुषु पुस्तकेषु नास्ति । (५) भक्तो पश्यति ।

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम् ॥
वस्तुतस्तदनिर्देश्यं नहि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः ॥
क्रियते येन येनैव तत्तत्करणमिष्यते ।
तेनाश्वेन रथेनेति सिद्धं दीपिकयेति च ॥

इति । टाटकारष्टाङसीति विशेषणार्थः ।अन्यथा । "सुपां सुलुग्" इति विहितस्यापि ग्रहणमापद्येत (भवता तेन । भवद्भ्यां ताभ्यां, भवद्भिस्तैः) हलादौ पदत्वाज्जश्त्वम् । संप्रदानविवक्षायां "चतुर्थी संप्रदाने" कृदाद्यनभिहित इति शेषः॥ *कर्मणा यमभिप्रैति स संप्रदानम्* ददातिकर्म्मणा करणभूतेन कर्ता यमभिप्रेति तदनिराकर्तृत्वे प्रेरयित्रनुमन्तृ कारकं सम्प्रदानम् । उक्तञ्च ।

अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम् ।
प्रेरणानुमतिभ्यां च लभते संप्रदानता ॥

इति । दानं च पुनरग्रहणाय किं चिदुद्दिश्य स्वीयत्यागः (भवते तस्मै ददाति । भवद्भ्यां ताभ्यां ददाति । भवद्भ्यस्तेभ्यो ददाति) अपादानविक्षायाम् "अपादाने पञ्चमी" "ध्रुवमपाये ऽपादानम्" सावधिकं गमनमपायः । तदुक्तम् ।

संयोगभेदाद् भिन्नात्मा गतिरेव भ्रमिर्यथा ।
ध्रुवावधिरपायोपि समवेतस्तथा ध्रुवः ॥

इति । अस्मिन् साध्ये यद् ध्रुवमेतदनाविष्टं यत्कारकं तदपादानम् । तथाहि ।

अपाये यदुदासीनं चलं वा यदि वा ऽचलम् ।
ध्रुवमेवातदावेशात्तदपादानमुच्यते ॥

इति । त्रिविधं चैतत् । यथाह ।

निर्दिष्टविषयं किं चिदुपात्तविषयं तथा ।
अपेक्षितक्रियं चेति त्रिधा ऽपादानमुच्यते ॥

इति । तत्र प्रथमं धातुना ऽभिहितापायविषयं । द्वितीयं (१) धात्वन्तरार्थत्वेनाभिहितापायविषयम् । तृतीयं तु सामर्थ्यादिना प्रतीयमानापायविषयम् (भवतस्तस्मादागच्छति । भवतो मेघाद्विद्योतते विद्युत्) अत्र निःसरणाङ्गे विद्योतने विद्युतिर्वर्त्तते (भवतस्तस्मादाढ्यतरः) अत्र प्रकर्षप्रत्ययसाथ्यार्द्विभागकारणतया प्रकर्षलक्षणा क्रिया प्रतीयते, अत्रावधिविभक्तयोरेकीकारो विभागस्तद्धेतुरपकर्षणं च बौद्धम् । तथा चाह ।

बुद्ध्या समीहितैकत्वान् पञ्चालान् कुरुभिर्यदा ।
पुनर्विभजते वक्ता तदापायः प्रतीयते ॥

इति । तत्रतत्र ङसीत्यनुवादार्थौ ङकारेकारौ । विभागोपायः, अस्मिन् साध्ये यद् ध्रुवमेतद्धेतुभूतक्रियानाविष्टं तदपादानमिति सूत्रार्थः । शेषविवक्षायाम्॥ *षष्ठी शेष* अनभिहित- इति शेषः । कर्मादिभ्यो ऽन्यः प्रातिपदिकार्थव्यतिरेकहेतुः स्वस्वामिसंबन्धादिः शेषः द्विष्ठोप्यसौ संबन्धो गुणभूतेन शब्देन प्रतिपाद्यत इति तस्मादेव षष्ठी न तु प्रधानात् ।

द्विष्ठोप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते ।

इति । तथा वार्त्तिकमपि (उक्तं पूर्वेण) इति । अस्यार्थः प्रातिपदिकार्थसूत्रे यद

(१) धात्वर्थान्तरार्थत्वेन ।

(१) सामानाधिकरण्ये उपसंख्यातमधिकत्वादिति चोद्यस्य न वाक्यार्थत्वादिति सामानाधिकरण्यप्रतीतेर्वाक्यार्थत्वेन पदसंस्कारवेलायामभावात् प्रातिपदिकार्थनिबन्धना प्रथमा यथा भवत्येवमत्रापि प्रधानगतसंबन्धप्रतीतेर्वाक्यार्थत्वेन पदसंस्कारवेलायामभावान्न प्रसङ्गः षष्ठ्या इति, परिहारभाष्यं चार्थरूपमेवैतदेवंजातीयकमिति (भवतो ऽस्य स्वं, भवतोरनयोः, भवतामेषाम् ।) अधिकरणविवक्षायाम् ॥ "सतस्यधिकरणे च" चकाराद् दूरान्तिकार्थेभ्यश्च ॥ *आधारोधिकरणम्* ॥ कर्तृकर्मणोः क्रियाश्रयभूतयोर्धारणक्रियां प्रति य आधारस्तत्कारकमधिकरणम् । त्रिविधं चैतत् । यदाह,

कर्तृकर्मव्यवहितामसाक्षाद् धारयत् क्रियाम् ।
उपकुर्वन् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ।
औपश्लेषिकमेकं स्यात्तथा वैषयिकं परम् ।
अभिव्यापकमित्येतत्त्रिधाधिकरणं मतम् ॥
आस्ते कटे शकुन्तः खे तिले तैलं व्यवस्थितम् ॥
क्रमेणाधारभेदानामुदाहरणदर्शनम् ॥

इति (भवति कटे शेते । मेघच्छन्ने भवति खे बलाका । भवति तिलं तैले, भवतोरनयः, भवत्स्वेषु) प्रथासामानाधिकरण्ये प्रथमासामानाधिकरण्याभावे च "नन्वोर्विभाषा" इत्यतो विभाषनुवृत्तेर्विकल्पेन भवतः ॥ "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" ॥ भवन्नयम् । "हल्ङ्याब्भ्य" इति सुलोपः । तकारस्य संयोगान्तलोपः । तस्यासिद्धत्वात् "न लोपः प्रातिपदिकान्तस्य" इति विधीयमानो नलोपो न भवति । (भवन्तौ (२) । भवन्तः) जसो जकारो ऽसन्देहेन विभक्तिस्वरूपप्रतिपत्त्यर्थः । (भवत्तरः । भवत्तमः भवद्रूपः । भवत्कल्पः) इत्यादौ तरबादिविधिवत् । (भवत्कः) । "प्रागिवात्कः" । "इवे प्रतिकृतौ" इत्यतः प्रागितः परेष्वजातादिष्वर्थेषु द्योत्येषु कः प्रातिपदिकादिति (क) तद्धितत्वान्न ककारस्येत्त्वम् । शत्रभावे भवतीत्यादि पूर्वमुक्तमेव । अत्र तिङः स्थानिवत्त्वेन लत्वाच्छत्रादेशो न भवति, वाग्रहणस्य व्यवस्थितविभाषाविज्ञानात् । यदि हि स्यात्स्यानिवद्भावेन तिङन्तादस्माच्च तरप् किमेत्तिङव्य" इत्याम्स्यात् । ततश्च भवत्तरामिति तृतीयं रूपं स्यात् । असामानाधिकरण्ये खल्वपि भवत इदं (भावतम्) *तस्येदम्* षष्ठीसमर्थाद् ङ्याप्प्रातिपदिकात्संबन्धिन्यर्थं ऽणिति अण् । *तद्धिते ष्वचामादेः* इति वृद्धिः ञिति णिति तद्धिते परेऽङ्गस्याचामदेरचो वृद्धिरिति । इयं च *अत उपधायाः* इति ञिति णिति प्रत्ययमात्रे परे ऽङ्गस्योपधाया अतो विधीयमानां वृद्धिमपवादत्वाद्बाधते । न च भवत इत्यस्य देवदत्तादिविशेषापेक्षत्वादस्तीहापि सामानाधिकरण्यमिति वाच्यम् । तर्हि सापेक्षत्वादस्मात्प्रत्यय एव न स्यात् । *समर्थ पदविधिः* इतीह शास्त्रे पदविधिः समर्थपदाश्रय इत्युक्तत्वात् । इदमप्युदाहरणं, (भवतो भक्तिर्भवद्भक्तिरिति) । *षष्ठी* षष्ठ्यन्तं समर्थेन सुबन्तेन वा समस्यत इति समासः । *सुपो धातुप्रातिपदिकयोः* इति तद्धितान्तसमासप्रातिपदिकयोरन्तर्भूतस्य सुपो लुक् । अत्र के चिल्लडिति वर्त्तमाने "लटः शतृशानचौ" इति पुनर्लड्ग्रहणाद् "नन्वोर्विभाषा" इति भूते विहितस्यापि लटोप्येतावादेशौ भवत इति । एतद्भाष्यवार्तियोर्नोक्तं वृत्तिकारस्य च नेष्टम् । यदाह लडितिवर्त्तमाने पुनर्लड्ग्रहणात् क्वचित् प्रथमासामानाधिकरण्येपि भवतीति ॥ *संबोधने* च शतृशानचाविति शेषः । आभिमुख्यकरणं संबोधनम् , तच्च स्वभावात्क्वचित् कार्ये विनियोगार्थम् । यदाह ।

सिद्धस्याभिमुखीभावमात्रं संबोधनं विदुः ।
प्राप्ताभिमुख्यो ह्यर्थाऽत्मा क्रियायां विनियुज्यते ॥

---

(१) पदसामा ।　　(२) न्तौ । भवन्तस्ते ।

इति । हे सुखमनुभवन्नर्थस्य *लक्षणहेत्वोः क्रियायाः* लक्षणं चिन्हं, हेतुः कारणं. क्रियाया लक्षणहेत्वोर्वर्तमानाद्धातोर्लटः शतृशानचौ स्याताम्, (शयनमनुभवन् यवनो भुङ्क्ते) अत्र शयनानुभवनं यवनभोजनस्योपलक्षणं, शुश्रूषुर्भवन्विद्यामधिगच्छति, अत्रापि शुश्रुषा-भवनं विद्याधिगमस्य हेतुः । योगद्वयमिदं प्रथमासमानाधिकरणे नित्यार्थम् । प्रथमा च "संबोधने च" इति संबोधनाधिकप्रातिपदिकार्थे विहिता *माङ्याक्रोशे* आक्रोशः शपनम् । अस्मिन् गम्यमाने माङ्युपपदे शतृशानचौ भवतः (मा भवन्) "माङि लुङ्" इति प्राप्ते अस्मादेवादेशवचनाल्लडनुमीयते । सुखमनुभवन्नित्यादौ "कर्तृकर्मणोः कृति" इत्यनयोः कृद्योगे विधीयमाना षष्ठी न भवति, *न लोकाव्ययनिष्ठाखलर्थतृनाम्* इति लादियोगे प्रति-षेधात् । ल इति शतृशानचौ कानच् क्वसुकिकिनौ चोच्यन्ते । उ इत्युवर्णान्ताः, उः, इच्छुः, उकः प्रत्यय एव । अव्यय इति "कृन्मेजन्तः" । "क्त्वातोसुन्कसुन" इति उक्ता अव्ययकृतः । "क्तक्तवतू निष्ठा" । खलर्थः खल् युच् तृन्निति "पूङ्यजोः शानन्" इति शानन्नादय "तृन्" इति तृन्पर्यन्ताः प्रत्याहारेणोक्ताः । प्रत्याहारश्च "लटः शतृ" इति तृशब्दस्य तृनो नकारेण । सुखस्यानुभवन्निति प्रयोगः शेषलक्षणषष्ठ्या, अत्र षष्ठीसमासः *पूरणगुणसहितार्थसदव्ययत-व्यसमानाधिकरणेन* इति पूरणादिभिः षष्ठीसमासो न भवति तत्र पूरणा इति पूरणप्रत्य-यान्ताः । गुण इति गुणद्वारेण गुणिनि वर्त्तितुं शक्ता गुणगुणिनिष्ठाशुक्लादयः, ये तु गुणं स्व-निष्ठतयैवाभिदधति ते रसादयस्तत्स्थैश्च गुणैः षष्ठी समस्यत इति तैः समास उक्तः । सुहि-तार्थास्तृप्त्यर्थाः । सदिति *तौ सत्* इति सत्संज्ञौ शतृशानचौ । अव्यया उक्ताः । तव्यो न सानुबन्धकः । निरनुबन्धकग्रहणे न सानुबन्धकस्येति । समानाधिकरणमेकविभक्त्यन्तं विशे-षणं विशेष्यं च ।

अथ शत्रन्तात्स्त्रीप्रत्यया इह प्रदर्श्यन्ते । *उगितश्च* । यत्प्रातिपदिकमवयवद्वारेण सा-क्षाद्वोगित् "येन विधिस्तदन्तस्य" इति तदन्तात्, व्यपदेशिवद्भावेव केवलाच्च प्रातिपदि-कात स्त्रियां ङीप्स्यात् । ङकारः सामान्यग्रहणार्थः, पकारस्तदविघातार्थः । 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न' 'व्यपदेशिवद्भावो ऽप्रातिपदिकेन' इति परिभाषे प्रातिपदिकस्य स्वरूपग्रहणेन प्रत्ययविधिविषये इति नेह स्तः । ङीबन्तस्य *यू स्त्र्याख्यौ नदी* । अन्यान-पेक्षया स्त्रियां वृत्तमीदूदन्तं नदी, नदीत्वे *शप्श्यनोर्नित्यम्* शप्श्योर्निमित्तत्वेन सबन्धिनः शतुर्नित्यं नुम् शीनद्योः परयोः, नुम् मित्त्वादन्त्यादचः परः । इह नदीशब्दो नद्यवयवे वर्त्तते इति शतुर्नदीपरत्वम् । (भवन्ती । अतिभवन्ती) ङ्यन्तत्वात्स्वादिषु सोर्हल्ङ्यादि लोपः । (भवन्त्यौ । भवन्त्यः) अजादौ "इको यणचि" इति संहितायां यण् भवति । *प्रथमयोः पूर्वसवर्णः* इत्यकः प्रथमाद्वितीययोरजादौ विभक्तौ परतः पूर्वपरयोः पूर्वसवर्णदीर्घः । एक इत्येत-दत्र न भवति, "दीर्घाज्जसि च" इति निषेधाच् चकारादिज् गृह्यते । (हे भवन्ति) । *अ-म्बार्थनद्योर्ह्रस्वः* इति ह्रस्वः । अम्बार्था मात्रर्थाः । "एङ्ह्रस्वात्संबुद्धेः" इति संबुद्धेर्हलो लोपः ॥ *एकवचनं संबुद्धिः* ॥ संबोधने प्रथमाया इति शेषः । (भवन्तीम्) (१) अत्र "अमि पूर्वः" पूर्वसवर्णदीर्घश्च यणं बाधते । ङिद्वचनेषु *आण् नद्याः* इति टित्त्वादादौ-गमे "आटश्च" इति यथायोगमैकार औकारश्च वृद्धिः । (भवन्त्यौ, भवन्त्यः) । आमि "ह्रस्वनद्यापो नुट्" इति नुट् टित्त्वादादौ, (भवन्तीनाम्) सप्तम्येकवचनस्य "ङेराम्नद्याम्नी-भ्यः" इत्यामादेशे । (भवन्त्याम्) । नीशब्देन तदन्तो ग्रामण्यादिरुच्यते । (भवन्तितरा भवन्तीतरा) पूर्ववत्तरप् । *अत्र घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योनेकाचो ह्रस्वः* इति घादिषु परेषु ङ्यन्तस्यानेकाचो विधीयमानो नित्यो ह्रस्वः *उगितश्च* इत्युगितः परस्या नद्या उच्यमानेन ह्रस्वविकल्पेन बाध्यते, अत्र घादयः प्रत्ययाश्चेलडादीनि प्रातिपदिकानि ।

---

(१) भवन्ती ।

अत्र हरदत्तः । चेलडादीनां वृत्तिविषये कुत्सनवचनत्वात् तैः "कुत्सितानि कुत्सनैः इति समास इति । न्यासकारस्तु चेलड्ब्रुवगोत्राणामेवं समासमुक्त्वा मतहताभ्यां तु "विशेषणं विशेष्येण" इत्याह । एवं तमबादिष्वप्युदाहार्यम् ॥

अथ नपुंसकप्रक्रिया ॥ (भवत् ब्राह्मणकुलं तिष्ठति पश्येति वा) "स्वमोर्नपुंसकात्" इति इति लुक् । (भवन्ती कुले) "नपुंसकाच्च" त्यौङः शीभावः । औङिति प्रथमाद्वितीययोर्द्वि वचनस्य पूर्वाचार्यसंज्ञा । शकारः "शीनद्योः" इति निर्देशार्थः । "शप्श्यनोः" इति नित्यं नुमागमः । (भवन्ति कुलानि) । *जश्शसोः शिः* इति नपुंसकाङ्गात्परत्वे जश्शसोः शिरा-देशः । शकारः शीति तत्रानुवादार्थः । "शि सर्वनावस्थानम्" इति शेः सर्वनामस्थानत्वे । *नपुंसकस्य झलचः* इति झलन्तस्याजन्तस्य नपुंसकाङ्गस्य सर्वनामस्थाने नुमिति नुम् । भवतेत्यादि पुंल्लिङ्गवत् ।

अथ शानच् ॥ (व्यतिभावमानः) "आने मुक्" इत्यदन्तस्यानपरत्वेन मुक्कित्त्वादत्यः । (व्यतिभवमानौ) "प्रथमयोः पूर्वसवर्णदीर्घस्य "नादिचि" इति निषेधे "वृद्धिरेचि" इति वृद्धिः, (व्यतिभवमानात्) । *तस्माच्छसो नः पुंसि* इति तस्मात्प्रथमयोः पूर्वसवर्णदी-र्घात् परस्य शसः सकारस्य न इति नकारादेशः (व्यतिभवमानेन) ॥ *टाङसिङसामिना-त्स्याः* ॥ अदन्तादङ्गात्परेषां टादीनां यथासंख्यमिनादय इति इनादेशे गुणः (व्यतिभवमा-नाभ्याम्) *सुपि च* इत्यदन्ताङ्गस्य दीर्घ इति सुप्परत्वाद्दीर्घः । (व्यतिभवमानैः) *अतो भिस ऐस्* इत्यदन्ताङ्गात्परत्वेन भिस ऐसादेशः । (व्यतिभवमानाय) *ङेर्यः* इत्यदन्तादङ्गा-त्परत्वेन यादेशः । "कष्टाय" इति निर्देशात्सन्निपातपरिभाषाया अनित्यत्वात् "सुपि" दीर्घः (व्यतिभवमानेभ्यः) । अत्र झलादिबहुवचनसुप्परादन्ताङ्गत्वेन "बहुवचने झल्येत्" इति दीर्घ-श्च प्राप्नोति, तत्र *विप्रतिषेधे परं कार्यम्* द्वयोस्तुल्यबलविरोधे परस्य प्राप्यमाणत्वात्पर-मेत्वं प्रवर्त्तते । (व्यतिभवमानात् । व्यतिभवमानस्य) "टाङसि" इत्यादिना ङसिङसो-रात्स्यौ । (व्यतिभवमानयोः) *ओसि च* इत्यदन्तस्याङ्गस्यौस्परत्वेनैकारे ऽयादेशः । (व्यतिभवमानानाम्) "ह्रस्वनद्यापो नुट्" इति ह्रस्वान्तस्याङ्गस्य नाम्परत्वेन "नामि" इति दीर्घः । "सुपि च" इत्येव वा, (व्यतिभवमाने) । "आद्गुणः" । (व्यतिभवमानेषु) एत्वे षत्वं, व्यतिभवमानस्येदं (व्यतिभवमानम्) । अत्रासामानधिकरण्ये शानच् *त-स्येदं* इत्यण्यादिवृद्धिः । *न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्* इति पदान्ताभ्यां यकारवकाराभ्यां परस्याचामादेरचो वृद्धिर्न भवति किं तु ताभ्यां पूर्वमैज् (१)भवति तद्धिते ञ्णिति किति वा पर इत्येतस्य "न कर्मव्यतिहारे" इति निषेधः ।

अथ स्त्रियाम् ॥ (व्यतिभवमाना) ॥ *अजाद्यतष्टाप्* ॥ अजादिगणपठितादकारान्ताच्च प्रातिपदिकात् स्त्रियां टाबिति टाप् । पकारः समान्यग्रहणार्थः, टकारस्तदविघातार्थः अत्र शानचः स्थानिवत्त्वेन टित्वात् *टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप् (२) ख्युनाम्* इति यथा कथं चित् टितः प्रातिपदिकाड्ढाद्यन्ताच्चानुपसर्जनात् स्त्रियां विधीयमानो ङीप्, ट एव इद् यस्य स टिदित्यवधारणस्याश्रयणाल्लटश्च द्व्यनुबन्धकत्वान्न भवति, सामगी-त्यादौ टको ऽनेकानुबन्धकत्वेऽपि टित्त्वसामर्थ्यात् ङीप्, लटस्तु टित्त्वमेत्वाद्यर्थतया सावका-शम् । हल्ङ्यादिना सुलोपः । (व्यतिभवमाने) "औङ आपः" इत्यापः परत्वेनौङः शी-भावे गुणः । ईकारप्रत्ययपरत्वेन "यस्य" इति लोपो न भवति । ['औङः श्यां परे प्रतिषेधः] इति निषेधात् । (व्यतिभवमानाः) । सवर्णदीर्घः । (हे व्यतिभवमाने) । "संबुद्धौ च" इत्याप एत्वम् । एङः परत्वात्सोर्लोपः । (व्यतिभवमानया) । "आङि चापः" इत्येत्वे ऽयादेशः । आङिति तृतीयैकवचनस्य पूर्वाचार्यसंज्ञा । चकारात् "ओसि च" (व्यतिभवमा-

(१) यथासंख्यमैजागमो । (२) ख्युनामिति क्वचिन्नास्ति ।

नायै)। *याडापः* इति आपः परस्य ङिद्वचनस्य याडागमष्टित्त्वादादिः। "वृद्धिरेचि" इति वृद्धिः। (व्यतिभवमानायाः)। व्यतिभवमानयोः। "आङि चापः" इत्येत्वेऽयादेशः। व्यतिभवमानानाम्। "ह्रस्वनद्यापो नुट्"। व्यतिभवमानायाम्। ङेरामादेशः, (व्यतिभवमानासु।)

अथ नपुंसकम् ॥ (व्यतिभवमानम्) "अतोम्" इत्यम्भावः। (व्यतिभवमाने) "नपुंसकाच्च" इति शीभावे पूर्ववदौङः श्यामिति यस्येतिलोपनिषेधः। (व्यतिभवमानानि)। "जश्शसोः शिः"॥ "नपुंसकस्य झलचः" इति नुम्। *सर्वनामस्थाने चासंबुद्धौ* इति नान्तस्याङ्गस्योपधाया दीर्घः। हे व्यतिभवमानेत्यत्र "अतोम्" इत्यम् भावेऽमि पूर्वत्वे "एङ्ह्रस्वात्" इति संबुद्धेर्हलो मकारस्य लोपः। तृतीयादि पुंलिङ्गवत्। *लृटः सद्वा* इति लट इव लृटोपि शतृशानचोर्विधानाद् भविष्यन्नित्यादि लड्वत् सर्वमुदाहार्यम्। तत्र स्त्रियां नपुंसके द्विवचने च *आच्छीनद्योर्नुम्* इति नुम्विकल्पो विशेषः। अत्रानुवृत्तं शतृग्रहणं स्वावयवे वर्त्तते। तेनावर्णान्तादङ्गात् परो यः शत्रवयवस्तदन्तस्याङ्गस्य शीनद्योः परयोर्वा नुमिति सूत्रार्थः, अथ वाऽवर्णान्तादङ्गात् शीनद्योः परयोः शत्रन्तस्य वा नुमिति। तत्र येन नाव्यवधानमिति तकारेण व्यवधानमाश्रयिष्यते, अवर्णान्तादङ्गात्परो यः शता तदन्तस्याङ्गस्येति सूत्रार्थो नोक्तः। अङ्गान्तस्य शत्रवयवस्य चान्तरङ्गत्वान्नुमः पूर्वमेकादेशे व्यपवर्गाभावादवर्णान्ताङ्गात्परस्य शतुरसंभवात्। न चान्तादिवद्भावः 'उभयत आश्रये नान्तादिवत्' इति निषेधात्, भूतपूर्वगत्याश्रयणे तु लुग्विकरणादादावदर्थी प्रतीत्यादावपा स्यात्। (व्यतिभविष्यमाण) इत्यादौ *अट्कुप्वाङ्नुम्व्यवायेऽपि* इति णत्वम्। अडादिभिर्व्यवायेपि रषाभ्यां परस्य समानपदस्थस्य नो ण इति सूत्रार्थः। भविष्यन्नित्यत्तु "पदान्तस्य" इति निषेधान्न भवति ॥

अथ सनादयः प्रदर्श्यन्ते ॥ *धातोः कर्मणः समानकर्तृकादिच्छायां वा* ॥ यो धातुरीषिकर्म समानकर्तृकश्चार्थद्वारेण तस्मादिच्छायां वा सन् स्यात्, नकारो निर्देशाद्यर्थः ॥ *सनि ग्रहगुहोश्च* ॥ ग्रहिगुहिभ्यामुगन्तादेकाचश्च परस्य सनो नेडितीड्निषेधः। *इको झल्* इति उगन्ताद्धातोः परस्य झलादेः सनः कित्वान्न गुणः सन्यङो एतदन्तस्य प्रथमैकाचो द्वे भवतोऽजादेस्तु द्वितीयस्येति द्वित्वेऽभ्यासकार्यम्। *सनाद्यन्ता धातवः* इति सनादिणिङ्पर्यन्तानां प्रत्ययन्तानां धातुत्वात्पूर्ववल्लादिषु तिबादयः। बुभूषतीत्यादि। लिटिं कासप्रत्ययान्ताच्च धातोर्लिटि पर आम्प्रत्यय इत्याम्। अकारो मकारपरित्राणाय। सूत्रे त्वत एव निर्देशात्पररूपम्। "अतोलोपः"आर्द्धधातुक इति सनोऽकारस्य लोपः। "आम" इत्यामः परस्य लेर्लुक्। प्रत्ययलक्षणत्वेन कृदन्तात्वादुत्पन्नस्य सुपः स्वरादिष्वामिति पाठादव्ययत्वाल्लुक्। तत्र यद्यामा साहचर्यादमपि तद्धित एवेत्युच्यते तर्हि "आम"इत्येव लुग्भविष्यति। लिङ्ग्रहणं तु तत्र निवर्त्तिष्यते। अत्रामन्तस्याव्यक्तपदार्थकत्वात्पदत्वाय प्रथमातिक्रमे कारणाभावात्सुरेवोत्पद्यते। तस्य हल्ङ्यादिलोपः सिद्ध इति किं लुको विधानेनेति। यदा तु प्रयोगवशाद् द्वित्वाद्यभिव्यक्तौ द्विवचनाद्युत्पद्यते तदर्थं लुगेषितव्यः॥ *कृञ् चानुप्रयुज्यते लिटि* ॥ आमन्तस्य पश्चादेवाव्यवहिता एव कृभ्वस्तय एव लिट्पराः प्रयोक्तव्याः अत्र "अभूततद्भावे कृभ्वस्तिः" इति कृशब्दस्य कृञा द्वितीयेति ञकारेण प्रत्याहारनिर्देशात् कृञिति कृभ्वस्तय उच्यन्ते। (बुभूषां चकार) बुभूषां बभूव अत्र *मोनुस्वारः*। पदान्तस्य मोनुस्वारो हलीत्यनुस्वारे तस्य *वा पदान्तस्य* इति यञि परे विधीयमानः परसवर्णविकल्पो भवति। अनुस्वारः पक्ष उदाहार्यः। "आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य" इत्यत्र पूर्ववदित्यनुवृत्त्या पूर्ववत् कृञोऽनुप्रयोगस्येति द्वितीयोऽपि योगः संपद्यते। तत्राद्य आम्प्रत्ययप्रकृतेरिवाकर्त्रभिप्रायेप्यनुप्रयुज्यमानस्य कृञ आत्मनेपदं प्राकरणिकं विधत्ते। द्वितीये त्वर्थात् पूर्वस्येव कर्त्रभिप्राये परस्मैपदमित्यत्र आम्प्रकृतेः शेषत्वेन नित्यपरस्मैपदित्वात् कृञोऽपि परस्मैपदमेव। इदमेव कृञ् ग्रहणमनुयोगे कृञिति प्रत्याहारग्रहणमिति ज्ञापयति। अन्यथाऽनुप्रयोगस्येत्येव ब्रूयात्। (बुभुषामास) अत्र

"अस्तेर्भूः" इत्यार्द्धधातुके विषये विधीयमानो भूभावोऽनुप्रयोगे प्रत्याहारग्रहणसामर्थ्यादत्र भवति अन्यथा प्रतिपत्तिलाघवाय कृभ्वित्येव ब्रूयात् । (बुभूषिता) इत्यतो लोपो गुणं परत्वाद् वार्णादाङ्गमिति वा बाधते । (बुभूष्यति) बुभूषतु । अबुभूषत् । बुभूषेत् । आशिषि (बुभूष्यात्) "अतो येयः" न भवति, आर्द्धधातुकत्वात् । अत्र अकृत्सार्वधातुकयोदीर्घः *इति अकृद्यकारेऽसार्वधातुके च परेऽजन्तस्याङ्गस्य विधीयमानो दीर्घो [ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन] इत्यल्लोपेन बलीयस्त्वेन बाध्यते । (अबुभूषीत्) । "अस्तिसिचोऽपृक्ते" इति ईडागमे "इट ईटि" इति सिचो लोपः । [सिज्लोप एकादेशे सिद्धो वक्तव्यः] इति सिज्लोपस्य पूर्वत्रासिद्धत्वाभावात्सवर्णदीर्घः । (अबुभूषिषुः) । "सिजभ्यस्त" इति जुस् । अबुभूषिष्यत् ।

अथात्मनेपदम् ॥ (व्यतिबुभूषते । व्यतिबुभूषां चक्रे) । "आम्प्रत्ययवत्" इति नित्यस्तङ् कृञः । (व्यतिबुभूषां बभूव । आसेति वा । व्यतिबुभूषिष्यते । व्यतिबुभूषिषीष्ट व्यत्यबुभूषिष्यत) सर्वत्र *पूर्ववत्सनः* इति तङ् । सनः पूर्वो धातुर्येन निमित्तेनात्मनेपदी सन्नन्तमपि तेनैव तथेत्यर्थः ॥

अथ भावकर्मणोः ॥ (बुभूष्यते त्वया अनुबुभूष्यते सुखम्) । यकि-"अकृत्सार्वधातुकयोर्दीर्घः" इति दीर्घं बाधित्वा "अतो लोपः" पूर्वविप्रतिषेधेन भवति (बुभूषांचक्रे भवता । अनुबुभूषां चक्रे सुखम् । बुभूषामास इति वा) इहानुप्रयुज्यमानस्यामन्तार्थाभिव्यक्तिमात्रकरत्वात् करोतेर्भावे, इतराभ्यामकर्मकत्वाद् भाव उपपद्यते । प्रयुज्यते चैवं 'रोमन्थमन्थरचलद्गुरुसास्नमासां चक्रे निमीलदलसेक्षणमौक्षकेण' । 'प्रकाशेनाकाशे दिनकरकरान्विक्षिपद्विस्मितात्क्षैर्नरेन्द्रैरौपेन्द्रं वपुरथ विशद्धाम वीक्षां बभूव' इति । *ह एति* इत्यस्तेर्हत्वं तासिसाहचर्यात्सार्वधातुकोत्तमैकवचने एवेतीह "लिटस्तझयो" इति तशब्दस्यैशीटश्चैत्वे न भवतीति । केचित्तु तासेरुत्तमैकवचनमेकारः संभवतीत्येतावन्मात्रसाहचर्याश्रयेण लिडुत्तमैकवचनेपि हत्वमिच्छन्ति । तत्र साहचर्यसंकोचे कारणं न विद्मः । लङ्लटोराशीर्लिङि लुङि च कर्तृवदेव रूपम् । न च चिण्वदिटि वृद्धौ च *अतो युक् चिण्कृतोः* इत्याकारान्तस्य चिणि ञ्णिति कृति च परे युको विधानाद्रूपभेदप्रसङ्गः, 'ण्यल्लोपो' इत्यादिना वृद्धेरतो लोपेन बाधस्योक्तत्वात् । लुङेकवचने तु चिणो विधानात् तत्राबुभूषीति विशेषः । तथा लोटि लङि विध्यादिलिङि कर्तृवत् प्रक्रिया । यक् तु विशेषः कर्मकर्त्तरि [भूषाकर्मकिरादिसनां चोपसंख्यानमन्यत्रात्मनेपदात्] इति यक्चिणोर्निषेधात्सर्वत्र कर्तृवद्रूपम् । वत्करणात्स्वाश्रये भावे लकारे यक्चिणोर्विषये कर्मवद्रूपम्, कर्त्तरि तृतीया विशेषः । (अभिबुभूष्यते शत्रुणा स्वयमेवेत्यादि) । इच्छायाः कर्तृस्थत्वेन कर्मस्थत्वाभावेऽपीष्यमाणस्य प्राधान्यात्तस्य च कर्मस्थत्वादस्ति कर्मवद्भावः । अत एव "भूषाकर्म" इति यक्चिणौ निषिध्येते ॥

अथ यङ् ॥ *धातोरेकाचो हलादेः क्रियासमभिहारे यङ्* ॥ पौनः पुन्यं भृशार्थो वा क्रियायां समभिहारस्तत्र द्योत्ये एवंविधाद्धातोर्यङ् स्यात् । द्विर्वचनादि पूर्ववत् ॥ *गुणो यङ्लुकोः* ॥ यङ्लुकि चाभ्यासस्येको गुण इति गुणः । (बोभूयते) । "अनुदात्तङित" इत्यादिना ऽऽत्मनेपदम् । यङो ङकारस्य गुणप्रतिषेधार्थत्वेनावयवे चरितार्थत्वान्न समुदायार्थत्वमिति यङन्तस्य धातोरङित्त्वात्कथमात्मनेपदमिति नाशङ्क्यम्, तत्र धातुग्रहणाभावात् ङिन्मात्रात्परस्य तस्य तद्विधेः । अनुदात्तेतो ये धातवो ङितश्चेति प्रायिकाभिप्रायं वृत्तिकारवचनम् । अथ वा "ङितश्च" इत्यत्र शब्दादित्यध्याहार्यम् । अत एवानुदात्तेतो ङितश्च ये धातव इति नोक्तम् । चङादिष्वतिप्रसङ्गपरिहारस्तत्र तत्र वक्ष्यते (बोभूय्यते त्वया । अनुबोभूय्यते सुखमित्यादि) सनन्तवत्प्रक्रिया । कर्मवत्कर्मकर्ता । लुङि तशब्दे "अचःकर्मकर्तरि" इति चिणो विकल्पनात्पक्षे सिजपि भवति । तेन (अभ्यबोभूयि शत्रुः स्वयमेव, अभ्यबोभूष्ट इति च) वत्करणाद्भावे लकारे नित्यं चिणेव । अभ्यबोभूयि शत्रुणा स्वयमेवेति ॥

अथ यङ्लुक् ॥ *यङोऽचि* च ॥ यङोचि प्रत्यये नित्यं लुक् । चकारेण बहुलग्रहणानुकर्षणादयं विकल्पेनानैमित्तिकोऽपि । प्रत्ययलक्षणेन यङन्तत्वाद्धातुत्वे लडादि । द्विर्वचनम् । आत्मनेपदं तु ङिन्मात्रात्तद्विधेः प्रत्ययलक्षणत्वाभावान्न भवति। [चर्करीतं परस्मैपदि अदादिवच्च] इति वचनाद् *अदिप्रभृतिभ्यः शपः* । इत्यदादिभ्य उत्तरस्य शपो विधीयमानो लुग्यङ्गन्तेऽपि भवति । चर्करीतमिति यङ्लुगन्तस्य पूर्वाचार्यव्यपदेशः । अत्र परस्मैपदीयानुवादो न विधिरित्याहुः ॥ *यङोवा* इति यङ्लुगन्तात्परस्य हलादेः पितः सार्वधातुकस्य वा ईडागमः (बोभवीति । बोभोति) । "भूसुवोस्तिङि" इति गुणनिषेधोत्र न भवति "दाधर्त्ति" सूत्रे बोभूत्विति (१)गुणाभावार्थान्निपातनाज् ज्ञापकात् । इदमेव 'प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्'इत्यत्र ज्ञापकम् । (बोभूतः । बोभुवति) ॥ *अदभ्यस्तात्* ॥ अभ्यस्ताद्ङ्गात्परस्य प्रत्ययादेर्झकारस्यादित्यदादेशे उवङादेशः ॥ *उभे अभ्यस्तम्* ॥ अस्मिन्प्रकरणे ये द्वे विहिते ते उभे अपि समुदिते अभ्यस्तम् । तथा *जक्षित्यादयःषड्* इति । जक्ष एतदादयो जागृ दरिद्रा शास दीङ् वेवीङ् चकास् । (बोभवां चकार) पूर्ववत् कृञोनुप्रयोगस्येति कृञो नित्यं परस्मैपदम् । (बोभविता । बोभविष्यति । बोभवीतु । बोभोतु) (बोभूतात्) इत्यत्र च ङिदित्यादित्यनुवृत्तेस्तस्य च श्रूयमाणस्य पितश्चोद्देश्योपादेयत्वव्यत्ययेन पिन्न ङित् ङिन्न पिदित्यर्थद्वयस्य भाष्ये समाश्रयणात्ततः स्थानिवत्त्वप्राप्तं पित्त्वं ङित्त्वेनानवकाशेन निवार्यत इति ईडभावः (बोभूहि) "सेर्ह्यपिच्च" इति पित्त्वनिषेधादीड्गुणौ न भवतः । (बोभूवानि । बोभवाव) । आडुत्तमस्य पित्त्वात् उवङ् बाधित्वा परत्वाद्गुणो भवति । अहलादित्वादीडभावः । (अबोभवीतत् । अबोभोत । अबोभूताम् । अबोभवुः) "सिज्भ्यस्त" इति जुसि "जुसि च" इतीगन्तस्य गुणः । (बोभूयात्) यासुटो ङित्त्वेन पित्त्वस्य निवर्त्तनादीटोभावः । आशिषि त्वसार्वधातुकत्वेन लिङः सलोपभावो विशेषः । बोभूयुरित्यत्र जुस्भावे "उस्यपदान्तात्" इति पररूपत्वम् । यासुटो जुस्भक्तत्वेन "जुसि" इति गुणोत्र न भवति, येन नाप्राप्तिन्यायेन "सार्वधातुकमपित्" इत्यदिष्टङित्त्वाश्रस्य निषेधस्यैव तेन बाधात्, तत्र "क्सस्याचि" इत्यतोचीत्यधिकारादजादौ जुसि तद्विधानाद्वा । (अबोभोत् । अबोभूवीत् । अबोभूताम् । अबोभूवन्) । "गातिस्था" इति सिचो लुक् । "यङो वा" इतीटो विकल्पः । सिचः प्रत्ययलक्षणेन "अस्तिसिचो" इति नित्यस्तु न भवति, श्रूयमाणे सिचीत्युक्तत्वात् । ईट्पक्षे "भुवो वुग्" इत्यजादिलक्षणो वुङ्नित्यत्वाद्गुणं बाधते । अबोभूवन्नित्यत्र सिचः प्रत्ययलक्षणेन "सिजभ्यस्त" इति जुसभावः "आत" इति नियमान्न भवति । अभ्यस्ताश्रयस्तु विदिसाहचर्याल्लङ्विषय इति नेह प्रसज्यते । विदेर्ह्यव्यवहितो झिर्लङ्येव संभवति । न च सिचा साहचर्याल्लुङ्विषयोपि स्यादिति वाच्यम् । "विप्रतिषेधे परम्" इति परसाहचर्यस्य बलीयस्त्वात् । अबोभविष्यदित्यादि ॥

अथात्मनेपदम् ॥ (व्यतिबोभूते । व्यतिबोभुवाते) । अजादावुवङ् । (व्यतिबोभवां चक्रे । व्यतिबोभवां बभूव ।) "आम्प्रत्ययवत्" इति कृञो नित्यं तङ् । (व्यतिबोभवितासे । व्यतिबोभविष्यते । व्यतिबोभूताम् । व्यतिबोभुवाताम्) अजादावुवङ् । उत्तमे पित्वाद् गुणः । (व्यतिबोभवै । व्यत्यबोभूत । व्यत्यबोभुवाताम् । व्यत्यबोभुवि) । पूर्ववदुवङजादौ । (व्यतिबोभुवीत । व्यतिबोभुवीयाताम् । व्यतिबोभुवीय) । पूर्ववदजादावुवङ् । आशिषि (व्यतिबोभिविषीष्ट) । आर्द्धधातुकत्वादिड्गुणौ । ध्वमि "विभाषेटः" इति मूर्द्धन्यविकल्पो द्रष्टव्यः । व्यत्यबोभविष्ट । ध्वमि पूर्ववन्मूर्द्धन्यविकल्पः । (व्यत्यबोभविष्यत) भावकर्मणोः कर्मकर्त्तरि च (बोभूयते त्वयेत्यादि) सर्वं प्रकृतिवन्नेयम्, अभ्यास एको विशेषः ॥

(१) छन्दसि ।

अथ सत् । (बोभुवद् ब्राह्मणः) उगिल्लक्षणो नुम् "नाभ्यस्तात्" इति निषिध्यते (बोभुवती स्त्री । बोभुवती (१) कुले) स्त्रियां नपुंसकद्विवचनयोश्च नित्यत्वादन्तरङ्गत्वाच्च नुमः पूर्वं शपो लुक्यङ्गस्यानवर्णान्तत्वात् "आच्छीनद्योः" इति विकल्पितो नुम् भवति । नापि "शप्श्यनोः" इति नित्यस्तस्यावर्णात्परशतृविषयत्वात् । न च प्रत्ययलक्षणेनात्परत्वं, तस्याप्रत्ययलक्षणत्वात् । (बोभुवति कुलानि बोभुवन्ति कुलानि) इत्यत्र तु शौ "नाभ्यस्तात्" इति निषेधस्य "वा नपुंसकस्य" इति विकल्पनात् पक्षे नुम् भवति । (व्यतिबोभुवानः) लडादेशस्य तु स्येन व्यवधानादभ्यस्तात्परत्वाभावात् "नाभ्यस्तात्" इति निषेधो न भवति । नापि "नपुंसकस्य" इति, सर्वं प्रकृतिवत् ॥

अथ णिच् ॥ *हेतुमति च* ॥ स्वतन्त्रस्य कर्तुः प्रयोजको हेतुः तद्व्यापारः प्रेषणादिर्हेतुमान् स च कर्त्ता मा विरंसीदिति तत्र धातोर्णिच् स्यात् । णकारो वृद्ध्यर्थः । चकारो णिच्णिङोः सामान्यग्रहणाविघातार्थः । सनाद्यन्तत्वाद्धातुत्वे लडादयः । तेषां *णिचश्च* इति क्रियाफलस्य कर्तृगामित्वे तङ् । अन्यथा तु परस्मैपदम् (भावयते सस्यम् । भावयति सस्यम् ।) यदा तु फलस्य कर्तृगामित्वमुपपदेन प्रतीयते तदा "विभाषोपपदेन प्रतीयमाने" इति परस्मैपदमपि भवति, (स्वस्य सस्यं भावयतीति) । यदा चित्तवत्कर्तृकादकर्मकादस्माण्णिच् तदा क्रियाफलस्य कर्तृगामित्वेपि "अणावकर्मकाच्चित्तवत्कर्तृकात्" इति परस्मैपदम् । (पुत्रं भावयतीति) विभाषोपपदादप्ययमेवविप्रतिषेधेन (स्वं पुत्रं भावयतीति) *गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्त्ता स णौ* इत्यणौ कर्ता णौ कर्म । (भावयांचक्रे, चकार, बभूव, आस) "अयामन्ताल्वाय्येत्न्विष्णुषु" इति आमादिषु विधीयमानो णेरयादेशो *णेरनिटि* इत्यनिडादावार्द्धधातुके विधीयमानं णिलोपमपवादत्वाद्बाधते । यदायं ण्यन्तः चित्तवत्कर्तृकत्वेन नित्यं परस्मैपदी तदा तु प्रयुक्तः करोतिरपि पूर्ववत् कृञोनुप्रयोगस्येति भिन्नेन कल्पितेन योगेन परस्मैपद्येव । (भावयिता) इत्यादि प्रकृतिवत् । आशीर्लिङि "णेरनिटि" इति णिलोपः, स च "अकृत्सार्वधातुकयोः" इति दीर्घण्यल्लोपावित्यादिना बाधत इति भाव्यादित्यादि भवति । आत्मनेपदे त्विडादित्वाण्णिलोपो नेति गुणायादेशयोर्भावयिषीष्टेत्यादि । ध्वमि "विभाषेटः" इति मूर्द्धन्यविकल्पः । लुङि "णिश्रिद्रुस्रुभ्यः कर्तरि चङ्" इति सिजपवादश्चङ् । चकारङकारौ विशेषणार्थौ, णिलोपः । *णौ चङ्युपधाया ह्रस्वः* इति चङ् परे णावङ्गस्योपधाया ह्रस्वः । *चङि* इत्यनभ्यासस्य धातोः प्रथमस्यैकाचो ऽजादेस्तु द्वितीयस्येति द्विर्वचने कर्त्तव्ये णौ कृतं स्थानिवदिति रूपस्थानिवत्त्वे भूशब्दो भौशब्दो वा द्विरुच्यते । तत्र भौशब्दस्य द्विर्वचनपक्षेऽपि "ह्रस्वः" इति भौशब्दस्य ह्रस्वो भवत्येव । "एचइग्घ्रस्वादेशे" इति नियमादिरभावान्नान्तरतम्यादुकारः । तस्य च *ओः पुयण्ज्यपरे* इतीकारः । उवर्णान्तस्याभ्यासस्यावर्णपरे पवर्गे यणि जकारे च परत इकार इति सूत्रार्थः । तस्य *दीर्घो लघोः* इति दीर्घः । चङ्परे णौ यदङ्गं तदभ्यासस्य लघोर्लघुनि धात्वक्षरे परे दीर्घो भवति अनग्लोप इति सूत्रार्थः । इदमेवेत्ववचनं णौ कृतस्य स्थानिवत्त्वे । अन्यथोवर्णान्ताभ्यासो न कश्चिदपि स्यात् । नन्वत्र *सन्वल्लघुनि चङ्परे ऽनग्लोपे*" इति चङ्परे णौ यदङ्गं तदभ्यासस्य लघुनि परेऽनग्लोपे सन्वत्कार्यातिदेशादित्वं सिद्धम्, सन्वत्कार्यं चेत्वमेव । *सन्यतः* इति सनि परेऽभ्यासाकारस्येत्वविधानात्किं णौ कृतस्य स्थानिवत्त्वेन येन पुयण्जीति वक्तव्यं स्यात्सत्यम्, अत्र सन्वद्भावेनापि सिध्यति, जुहावयिषतीत्यादावप्येवं स्यात् । (अबीभवत्) । नन्वत्र यङ इव चङो ङित्त्वेन तङ् स्यादिति चेत्, न । विकरणात्पूर्वं नियमाप्रवृत्तेः । अत्र च ज्ञापकं "वृद्भ्यः स्यसनोः" इति स्यसनोस्तङो विकल्पनम् । पूर्वं तु विकरणे तेन व्यवधानान्नानुदात्तेनानन्त-

(१) ब्राह्मण ।

रस्तङस्ति। नापि शेषादित्यात्मनेपदपरस्मैपदनियमयोरत्राप्रसङ्गादेवात्मनेपदपरस्मैपदयोर्लस्य तिबादय इति सामान्येन लसिद्धेः किमनेन विकल्पवचनेन ॥

अथ कर्मणि ॥ ण्यन्तस्य सकर्मकत्वाद्भावासंभवः । तत्र लट्लोट्लङ्विध्यादिलिङ्क्षु यकि विकरणे णिलोपे (भाव्यते । भाव्यताम् । अभाव्यत । भाव्येत इत्यादि) । अतो ऽन्येषु लुङ्व्यतिरिक्तेषु कर्तृवद्रूपम् । लुङि तु कर्तरि चङो विधानात्सिजेव । तशब्दे तु चिणि (अभावि । अभावयिषातामित्यादि) । तत्र चिणि णिलोपः । अन्यत्र गुणायादेशौ, ध्वमि "विभाषेट" इति मूर्द्धन्यविकल्पः । स्यादिषु चिण्वदिट्पक्षे "असिद्धवदत्राभात्" इति चिण्वदिटो ऽसिद्धत्वाण्णिलोपे (भाविष्यते । अभाविष्यत। अभाविषाताम् । भाविषीष्ट । भाविता) इत्याद्यपि द्रष्टव्यम् । अत्रापि षीध्वंलुङोर्धकारस्य पूर्ववद्वा मूर्द्धन्यः । कर्मकर्त्तरि तु यक्चिणोः प्रतिषेधे [णिश्रन्थिग्रन्थिब्रुञात्मनेपदाकर्मकाणामुपसङ्ख्यानम्] इति यक्चिणोर्निषेधाद्यथायोगं सर्वत्रकर्तृवद्रूपं स्यादिषु तु कर्मवत् । वत्करणाद्भावे तु(१) कर्मवदुदाहार्यं, कर्त्तरि तृतीया विशेषः । णिश्रन्थीति यक्चिणोर्निषेधः कर्मकर्त्तरीति लस्त(२) एव ॥

अथ कृतः प्रदर्श्यन्ते ॥ भव्यं भवता । अनुभव्यो घटः । "अचोयत्" इति यत । अयं "कर्त्तरि कृत्" इति कर्त्तरि प्राप्तोऽपि *कृत्याः प्राङ् ण्वुलः* ॥ इति तव्यादीनां ण्वुलः प्राचां कृत्यसंज्ञाविधानात् "तयोरेव कृत्यक्तखलर्थाः" इति भावकर्मणोर्नियम्यते । "भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा" इतिनिपातनात् कर्तरि अपि भवति । अत्र वाग्रहणात् "तयोरेव" इति सामान्यस्य बाधां विज्ञापयति । उदाहरणेषु गुणे "वान्तो यि प्रत्यये" इत्यवादेशः । अत्र वान्त इति पूर्वसूत्रनिर्दिष्टाववावुच्येते, तौ च तत्र यथासंख्यादोदौतोरितीहापि तथैव । अनेन विशेषविहितेन यता सामान्यविहितानां तव्यत्तव्यानीयरां न बाधः । *वाऽसरूपो ऽस्त्रियाम्* इत्यस्त्र्यधिकारविहितस्यासरूपप्रत्ययस्य पक्षे बाधकत्ववचनात् । तव्यतव्यतोः स्वरे षष्ठीसमासनिषेधे च विशेषः । (भवितव्यं, भवनीयम्) अनीयरो रेफ "उपोत्तमंरिति" इत्युपोत्तमस्योदात्तार्थः । अवश्यभाव्यम् । "ओरावश्यके" इत्यवश्यंभावे द्योत्ये उवर्णान्तलक्षणो ण्यत् । वृद्धौ "वान्तो" इत्यावादेशः । पूर्ववदनेनापि तव्यादीनां न बाधः । यत्तु सरूपत्वाद्बाध्यते 'नानुबन्धकृतमसारूप्यम्' इत्युक्तम् । अवश्यमो मकारस्य 'लुम्पेदवश्यमः कृत्ये तुंकाममनसोरपि' इति समासे लोपः । समास्तु "मयूरव्यंसकादयश्च" इति तत्पुरुषः। मयूरव्यंसकादिराकृतिगणः । देवभूयं गतः । देवत्वं गत इत्यर्थः । "भुवो भाव" इत्यनुपसर्गे सुबन्त उपपदे भुवः क्यप् । कित्त्वान्न गुणः । अनुपपदादुपसृष्टाच्चाचो यदेव । *उपपदमतिङ्* इति तत्पुरुषो नित्यं समासः । उपपदं सुबन्तं समर्थेन नित्यं समस्यते समासोतिङन्तश्चेति सूत्रार्थः । इदमेवातिङ्ग्रहणमत्र सुपेत्यस्यासम्बन्धे ज्ञापकम् , तथा योगविभागेन "कुगतिप्रादयः" इत्यत्रापि सम्बध्यत इति तत्रापि सुपेत्यस्यासम्बन्धं ज्ञापयति । 'तेन गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति पूर्वाचार्यपरिभाषार्थः संगृहीतो भवति । अस्य प्रयोजनमुत्तरत्र दर्शयिष्यते । *तत्रोपपदं सप्तमीस्थम्* इति तृतीये धात्वधिकारे सप्तम्या निर्दिष्टस्योपपदसंज्ञा । धात्वधिकारादेव तृतीये धात्वधिकार इति सिद्धे तत्रग्रहणं योगविभागेनाधिकृतेन प्रत्ययपदेन सम्बध्यते । तेनायमर्थस्तत्रोपपदे सत्येव प्रत्यय इति । (अभिभावी) । अभिभूतवानित्यर्थः । (अभिभावीभूत इति) ग्रहादौ णिन्यन्तो निपातितः॥ (परिभवी । परिभावी) अत्रैव निपातनाण्णिनौ पक्षे वृद्ध्यभावः (अभावी) "अचामचित्तकर्तृकाणाम्" इति ग्रहादिपाठाण्णिनिः । अत्र प्रतिषिद्धानामित्यनुवृत्तेरयं प्रत्ययो नञ् पूर्वादेव ॥ *नञ्* ॥ नञ् समर्थेन सुबन्तेन समस्यत इति तत्पुरुषसमासः । "न लोपो नञः" इति उत्तरपदे नलोपः । "सर्वनामस्थाने चासम्बुद्धौ" इति नान्ताङ्गत्वादुपधादीर्घः सर्वत्र,

(१) लकारे ।

(२) इडस्त एव इति कचित्पाठः ।

"इनूहपूषार्यम्णां शौ"। "सौ च" इति उपधालक्षणदीर्घमात्रस्य शौ सावेवेति नियमादभिभाविनावित्यादौ न भवति। पदान्ते "न लोपः प्रातिपदिकान्तस्य" इति नलोपः। संबुद्धौ तु "न ङिसंबुद्ध्योः" इति निषेधान्न भवति। परिपूर्वत्वे *प्रातिपदिकान्तनुम्विभक्तिषु च* इति समासप्रातिपदिकान्तस्य नकारस्य नुम्विभक्तिस्थस्य पूर्वपदस्थान्निमित्तादुत्तरस्य वा णत्वविधानात् पक्षे परिभाविणाविति णकार उदाहार्यः। सम्बुद्धौ तु "पदान्तस्य" इति निषेधः। ननु च विकल्पमपवादत्वाद्बाधित्वा "कृत्यचः" इति उपसर्गस्थान्निमित्तात्परस्य कृत्स्थस्याचः परस्य नकारस्य नित्यं विधीयमानं णत्वं स्यात् तच्च 'सनूमानाऽनोयानीनिष्ठादेशा' इति प्रतिपदं परिगण्यते। न चापवादेषु पूर्वत्रासिद्धत्वप्रसङ्गः। नैष दोषः। "कृत्यचः" इत्यस्य "न भाभूपूकमिगमिप्यायीवेपाम्" इति निषेधात्। स्त्रियाम् "ऋन्नेभ्यो ङीप्" (अभिभाविनीत्यादि)। नपुंसके स्वमोर्लुकि नलोपः। संबुद्धौ तु "वा नपुंसकानाम्" इति नलोपः। (अभिभाविन्नित्यादि) शौतु "इनूहनूपूषार्यम्णां शौ" इति दीर्घे (अभिभावीनीति)। वासरूपविधिना सर्वत्रात्र "ण्वुल्तृचौ" अपि भवतः। (अभिभावकः अभिभवितेत्यादि) तत्र (१)"युवोरनाकौ" इत्यकादेशः। यु वु इत्युत्सृष्टानुबन्धयोः प्रतिज्ञातानुनासिक्यणोः प्रत्यययोर्ग्रहणम्। तृचि तु *ऋदुशनस्पुरुदंसोनेहसां च* इति असंबुद्धौ सावृकारान्तानामुशनसादीनां चाङ्गानां विधीयमानोऽनङित्त्वादन्त्यादेशः *अप्तृनृतृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्* इत्यबादीनामङ्गानामुपधायाः सम्बुद्धिवर्जिते सर्वनामस्थाने दीर्घविधानाद्दीर्घे नलोपः। अत्र चासम्बुद्धौ "नोपधायाः" इति नान्तलक्षणो वा दीर्घः। द्विवचनादौ सर्वनामस्थाने संबुद्ध्येकवचने च "ऋतो ङि सर्वनामस्थानयोः" इति गुणः। स च *उरण् रपरः* ॥ ऋवर्णस्य स्थाने ऽण् प्रसज्यमान एव रपर इति रपरः। तत्र सम्बुद्धौ "रात्सस्य" इति हल्ङ्यादिना वा सुलोपे (हे अभिभविन्) अन्यत्र सर्वनामस्थानेऽपि "अप्तृन्" इतिदीर्घे (आभिभवितारावित्यादि) अभिभवितॄनित्यत्र पूर्वसवर्णदीर्घे "तस्माच्छसोनः" इति नत्वे "पदान्तस्य" इति णत्वनिषेधः (अभिभवित्रा) (अभिभवितृभ्यामित्यादि) अजादौ यण्। ङसिङसोस्तु तयोरकारस्य ऋकारस्य च "ऋत उत्" इति उकार उभयोः स्थाने भवन्नप्यसावृकारस्थानिकोऽपीति पूर्ववद्रपरत्वे सलोपः। अभिभवितॄणामिति "क्षुभ्नादिषु च" इति णत्वनिषेधे नृनमनतृप्नोतिग्रहणाद् ऋवर्णगतोऽपि रेफो णत्वनिमित्तमिति "रषाभ्याम्" इति णत्वे "नामि" इति दीर्घः। अभिभवितरि। "ऋतोङि" ति गुणः। स्त्रियाम् "ऋन्नेभ्यो ङीप्" इति ङीप्। अभिभवित्रीत्यादि। नपुंसके पूर्ववत्स्वमोर्लुक्। अभिभवितृ। औङः शीभावे "इकोचि विभक्तौ" इति नुम्। अभिभवितृणी। शौ "नपुंसकस्य झलचः" इति नुमि "सर्वनामस्थाने चासंबुद्धौ" इति दीर्घे अभिभवितॄणि। अयं नुम् [वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन"] इति "ऋतो ङि" इति गुणं बाधते। तृतीयाजादौ *तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य*इति समानायामाकृतौ भाषितपुंस्कस्येगन्तस्य नपुंसकस्य पुंवद्भावविधानात् पुंसीव पक्षे नुमभावात् (अभिभवित्रा अभिभवितृणा, इत्याद्युभयमपि)। आमि [नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन] इति नुटि "नामि" इति दीर्घः। भवतीति (भावः। [भवतेश्च] इति वक्तव्यात्पक्षे णः। तस्याभावेऽज्विधिः सर्वधातुभ्य इत्यपि। (भवः। आशितो भवत्यनेनेति आशितंभवः। ओदनः। आशितस्य भवनमाशितंभवः) "आशिते भुवः करणभावयोः" इति खच्, उपपदसमासः। *अरुर्द्विषदजन्तस्य मुम्* इति खिदन्त उत्तरपदे ऽजन्तस्य पूर्वस्यान्त्यादचः परो मुमागमः (आढ्यम्भविष्णुः आढ्यंभावुकः) अनाढ्य आढ्यो भवतीत्यर्थे "आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु" इति च्व्यर्थेष्वच्व्यन्तेषूपपदेषु "कर्तरि भुवः खिष्णुच्खुकञौ" इति कर्तरि कारके खिष्णुच्खुकञौ। उभयत्र खित्वात् पूर्ववद्

(१) ण्वुलः।

सुम्। खुकञो ञित्वाद्वृद्धिः। सुभगादिष्वप्येवमुदाहार्यम्। भविष्णुः। *भुवश्च"* इति तच्छीलतद्धर्मतत्साधुकारिष्विष्णुच्। अस्य भाषाविषयत्वं चान्द्रा इच्छन्ति। भाष्यादौ छान्दसत्वमेव स्पष्टम्। तच्छीलादौ तच्छब्देन धात्वर्थ उच्यते। तत्र फलनिरपेक्षप्रवृत्तिः तच्छीलः धात्वर्थः कुलक्रमागतो धर्मो यस्य स तद्धर्मा। धात्वर्थं सकृदपि यः साधु करोति स तत्साधुकारी। (भूष्णुः)। "ग्लाजिस्थश्च ग्स्नुः" इत्यत्र चकारादस्मादपि ग्स्नुः। गित्वान्न गुणः। अत एव "श्र्युकः किति" इतीटो निषेधः. (भावुकः)। "लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्" इति तच्छीलादावुकञ्। ञित्वाद्वृद्धिः। (परिभवी)। "जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च" इति तच्छीलादाविनिः। इकारो नकारपरित्राणाय वासरूपविधिना परिपूर्वादप्युकञ् भवति। (परिभावुक इति। विभूर्नाम कश्चित्)। प्रतिभूर्धनिकाधमर्णयोर्मध्यस्थः। "भुवः संज्ञान्तरयोः" इत्यनयोर्गम्यमानयोः क्विप्। अन्तरशब्देन धनिकाधमर्णयोर्मध्यस्थ उच्यते। संज्ञान्तरे स्वभावादुपसर्गनियमः, कित्वान्न गुणः। इकारो "वे"इति सामान्यग्रहणार्थः। पकारस्तदविघातार्थः। वकारस्य "वेरपृक्तस्य" इति लोपः। (विभुवौ)इत्यादौ *ओः सुपि* इति धातोरवयवः संयोगो यस्मादुवर्णात्पूर्वो नास्ति- तदन्तस्यानेकाचोऽङ्गस्याजादौ सुपि यणिति प्राप्तस्य यणो "न भूसुधियोः" इति निषेधादुवङ्। वर्षासु भवतीति (वर्षाभूः वर्षाभ्वौ वर्षाभ्वः) पूर्ववत् क्विप्। *संज्ञायाम्* अस्यां सप्तम्यन्तं समस्यत इति तत्पुरुषः। "क्विप् च" इति सोपपदनिरूपपदसाधारणे सर्वधातुविषये क्विप्युपपदसमासो वा। "वर्षाभ्वश्च" इत्यजादौ यण्। चशब्दो दृन्कारपुनः पूर्वस्य च भुवो यणर्थः। दृन्भूशब्दो दृन्भू इति निपातितः। अत्र तु भूशब्दस्यानर्थकत्वात् "नभूसुधियोः" इत्यत्र ग्रहणाभावः सिद्ध इति कैयटे। ते न "ओः सुपि" इत्यस्याप्रवृत्तौ "इको यणचि" इत्येव यण् सिद्ध इत्यर्थः। दम्भू इति मान्तमेके पठन्ति। अनुस्मृतौ कारशब्दस्य स्थाने करशब्दः(१) पठ्यते। दृन्पुनः करवर्षासु भुव इति कारशब्दस्यैकदेशविकृतस्यानन्यत्वात् सिद्धमिति तद्विवृत्तौ। अत्र क्षीरस्वामिसुभूतिचन्द्रप्रभृतयो भेके वर्षाभूशब्दं ह्रस्वान्तं प्रतिपद्यन्ते। अत एव स्त्रियां 'शिली गण्डूपदी भेकी वर्षाभ्वी कमठी डूलिः' इति "भुवश्च" इति उकान्तलक्षणं ङीषं पठन्ति। "वर्षाभ्वश्च" इति अत्र वर्षासु भवतीति वर्षा वा भवति प्राप्नोतीति वर्षाभूरोषधिविशेष इत्यर्थविशेषमभिदधानस्य कैयटस्याप्ययमेवाशयो लक्ष्यते। तथा भागुरिरपि ह्रस्वान्तं मन्यते। यथाह च।

भार्या भेकस्य वर्षाभ्वी शृङ्गी स्यान्मद्गुरस्य तु।
शिली गण्डूपदस्यापि कच्छपस्य डुलिः स्मृता॥

इति। यादवप्रकाशस्तु भेके ऽप्यूकारान्तमाह। भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे(२) पणीति। तथा सुबोधनीकारोपि। भुवश्चेत्युदन्तान् ङीप्विधानात् वर्षाभ्वीति पाठो न युक्तः। युक्तस्तु पाठो वर्षाभूकमठी डुलिरिति। एवमेवोक्तं प्रक्रियारत्नेपि। वर्षासु प्रावृषि भवतीति वर्षाभूर्मण्डूकः पुंस्त्री, तेनास्त्र्याख्यत्वादत्र ह्रस्वादय इति नदीसंज्ञायामाख्याग्रहणं नियतस्त्रीलिङ्गपरिग्रहार्थमिति तन्मतम्। कैयटेऽप्येवमुक्तम्। आख्याग्रहणसामर्थ्यान्नियम आश्रीयते स्त्रियमेव यावाचक्षाते न तु लिङ्गान्तरयुक्तमपीत्यर्थ इति। उक्तं च तत्र इष्वशनिप्रभृतीनामुभयलिङ्गानां पट्वादीनां च गुणवचनत्वात्सर्वलिङ्गानां स्त्रीविषयत्वाभावात् स्त्रियां वृत्तौ नदीसंज्ञा न प्राप्नोति, एवं तर्हि "ङिति ह्रस्वश्च" इत्यत्रैवंविधो नियमो नाश्रीयते केवलस्य स्त्रीशब्दस्यानुवर्त्तनादित्यदोष इति। हरदत्तस्तु पदान्तरमनपेक्ष्य स्त्रीवचनानां ग्रहणार्थमाख्याग्रहणं न तु नियतस्त्रीवचनानामित्याह। यद्वा पदान्तरमनपेक्ष्य स्वयमेव यौ स्त्रियमाचक्षाते इत्याश्रीयते। इष्वशनिप्रभृतीनामुभयलिङ्गानां शब्दार्थ एव स्त्रीत्वमिति

(१) प्रयुज्यते। (२) "नषण्" इति क्वचित्।

संज्ञा भवति । एवं पटुशब्दप्रभृतीनां गुणवचनानामपि शब्दार्थ एव स्त्रीत्वम् । तथा च पटु-रानीयतामित्युक्ते स्त्रियमप्यानीय कृती भवतीति । पुनश्चैवमाह नियतस्त्रीवचनानां ग्रहणार्थ-माख्याग्रहणमिति वदतां मते आङ्पूर्वाद्ध्यायतेः क्विपि संप्रसारणे आध्यै ब्राह्मण्यै अत्रापि भाष्यकारोदाहृते न स्यात् तस्मात्पूर्व एव प्रकार आश्रयणीयः । कथं तर्हि प्रत्युदाहरणं ग्रामण्ये स्त्रियै खलप्वे स्त्रियै इति, उच्यते । क्रियाशब्दत्वेप्यनयोः पुंसि मुख्या वृत्तिः, पुंसामेव खल्वि-दमुचितं यत् ग्रामनयनं नाम । एवं खलपवनमपि । आध्यानं तु स्त्रीपुंससाधारणमिति विशेष इति । न्यासे उद्योतादावप्येवमुक्तम् । वृत्तिकारस्याप्ययमेव पक्षोभिमतः । यदाह । आख्या-ग्रहणं शब्दार्थे स्त्रीत्वे यथा स्यात्पदान्तरद्योत्ये मा भूदिति । प्रक्रियारत्ने त्वाधीशब्दो नित्य-स्त्रीवचन इति नदीसंज्ञासिद्धिरुक्ता । एवं च हरदत्तादिमते वर्षाभूशब्दस्य भेकाभिधानेपि नदीसंज्ञया भाव्यमिति तन्निबन्धनानि ह्रस्वादीनि भवन्ति । कैयटसुभूतिचन्द्रादीनां मते नदी-संज्ञायां न विवादः, ऊकारान्तस्यौषधिविशेषवाचित्वेन नियतस्त्रीविषयत्वात् । एवं च प्रक्रि-यारत्नेनोक्तो नदीसंज्ञाभावः 'त्यजेदेकं कुलस्यार्थे' इति न्यायेन त्याज्यः । षष्ठीबहुवचने तु परत्वान्नित्यत्वाच्च नुटि कृते तस्य विभक्तिस्थत्वात् *एकाजुत्तरपदे णः*, इति णत्वम् । एकाज् उत्तरपदं यस्य तस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य पूर्वपदस्थान्निमित्तस्य णत्व-मिति सूत्रार्थः (विभुः प्रभुः संभुः) *विप्रसंभ्यो ड्वसंज्ञायाम्* इति व्यादिभ्यः परस्माद्भुवो डुप्रत्ययः, डित्त्वाट्टिलोपः (शंभुः) [मितद्र्वादिभ्य उपसंख्यानम्] इति डुः । सुखरूपो भवतीत्यर्थः । यद्वान्तर्भावितण्यर्थो भवतिः । तेन सर्वेषां सूत्रं भावयतीत्यर्थः । यद्वा शमेर्ण्यन्तात् "अन्येभ्योऽपि दृश्यते" इति विचि (शंशमयिता रोगाणां भवतीति शंभुः) श्रूयते च 'भिषक्तमं त्वा भिषजां शृणोमि त्वादत्तेभी रुद्र शंतमेभिः । शतं हि मा त्र्यशोय भेषजेभिः । अध्यवोचदधि वक्ता प्रथमो दैव्यो भिषगिति' । शंभवत्यस्मादिति व्युत्पत्तिर-पादाने डुप्रत्ययाभावाच्चिन्त्या (विभ्वी प्रभ्वी संभ्वी) "भुवश्च" इति भवतेरु-दन्तस्यानुपसर्जनस्य स्त्रियां ङीप् । उपसर्जनत्वे त्वतिविभुर्ब्राह्मणीति ङीप् न भवति । भवि-ष्यतीति (भावी) "भुवश्च" इत्यौणादिक इनिर्णिद्वा । तेन वृद्धिः । अयं च "भविष्यति गम्यादयः" इति गम्यादिषु पाठाद् भविष्यत्कालविषयः । भावं, "श्रिणीभुवोनुपसर्गे" इति अकर्त्तरि च कारके भावे घञ् । उपसृष्टात्तु "ऋदोरप्" इत्यप् (प्रभव इति) ऋदिति दकारो मुखसुखार्थ इत्योरित्युकार ऊकारमपि गृह्णाति । प्रभाव इत्यत्र तु प्रकृष्टो भावः प्रभाव इति प्रत्ययार्थ एव प्रशब्देन विशेष्यते न प्रकृत्यर्थ इति क्रियायोगाभावादनुपसर्गत्वाद् घञ्-सिद्धिः । विभावानुभावशब्दौ विभावयतीति ण्यन्तादचि व्युत्पाद्यौ (परिभवः, परिभावः) "परौ भुवोवज्ञाने" इति पक्षे घञपौ । *उपसर्गस्य घञ्यमनुष्ये बहुलम्* इति घञन्त उत्तरपदे पूर्वोपसर्गस्य वा दीर्घोऽमनुष्ये विषये । भूतिः *स्त्रियां क्तिन्* इत्यकर्त्तरि च कारके भावे च सर्वधातुभ्यः क्तिन् । "मन्त्रे वृष" इत्यादिना भुवः क्तिन्, उदात्तवचनमस्य नित्त्वात् "ञ्नि-त्यादिर्नित्यम्" इत्याद्युदात्तत्वव्युदासार्थम्, न तु भाषायां प्रयोगनिवृत्त्यर्थम् । प्रयुज्यते च भाष्ये 'सर्वं इमे स्वभूत्यर्थं प्रवर्त्तन्ते' इति (भूः) [संपदादिभ्यः क्विब्वक्तव्यः] इति क्विप् । क्विपः सर्वस्य लोपः । भवत्यस्मिन्ननेनेति वा भावः । *पुंसि संज्ञायां घः प्रायेण* इति पुंल्लि-ङ्गयोः करणाधिकरणयोर्घः । प्रायग्रहणं क्व चिदसंज्ञायामपि यथा स्यादिति । (अनाढ्येना(१) नायासेनाढ्येन भूयते ईषदाढ्यंभवं भवता, स्वाढ्यंभवं भवता । अनाढ्येनाढ्येन भूयते दुराढ्यं-भवं भवता) *कर्तृकर्मणोश्च भूकृञोः* । च्व्यर्थविषयकर्तृकर्मणोरीषदादिषु चोपपदेषु भूकृञोः खलिति खल् । तत्र भुवोऽकर्मकत्वात्कर्त्तरि उपपदे भावे प्रत्ययः करोतेश्च कर्मणि । स्वभावात् कृच्छ्रग्रहणं दुरो विशेषणम् । अकृच्छ्रग्रहणं त्वितरयोः । खित्त्वान्मुम् । नन्वत्र

(१) दुःखेन ।

धात्वर्थमात्रं विशिषित ईषतो गत्योरपि सुदुरोश्च कथं व्यवहितप्रयोगः। न च मुमर्थात् खित्करणादिति वाच्यम्। "खित्यनव्ययस्य" इत्यत्र कृद्ग्रहणपरिभाषाया उपस्थानात्सगतिकेखिदन्त उत्तरपदे मुमर्थत्वस्य संभवात्। न चैवं वाच्यं "हृदयस्य हृल्लेख" इत्यत्राणग्रहणादेवाणन्तस्य ग्रहणे सिद्धे पुनर्लेखग्रहादुत्तरपदाधिकारेपीह प्रत्ययग्रहणपरिभाषाया अप्रवृत्तेर्ज्ञापनात्तदभावात्तद्विषया कृद्ग्रहणपरिभाषा कथं वर्त्तेत इति। यतो मुम्यव्ययात्परस्य खितोऽसंभवात्तदन्तस्य च संभवादनव्ययस्येति निषेधसामर्थ्यादुत्तरपदाधिकारेपीह प्रत्ययग्रहणपरिभाषया अवश्यमुपस्थातव्यं ततश्च तद्विषया कृद्ग्रहणपरिभाषाऽप्युपस्थास्यते। एवं तर्हि भाष्ये ईषदाढ्यंभवमित्यादेरुदाहृतत्वात् प्रयोगनियमः। अवत्सीयादौ प्रधानभूतच्छप्रत्ययार्थेनान्वीयमानस्य नञ् शब्दान्तेन समासवत् खिदन्तार्थेनान्वीयमानस्यापीषदादेः खिदन्तान्तेनापि(१) सः। कैयटे तु खित्करणादेव कर्तृकर्मणोः पूर्वप्रयोग उक्तः। तस्यायं भावः। अनव्ययस्येति निषेधसामर्थ्यादेव तदन्तत्वलाभः। नन्वस्मादेव प्रतिषेधादिहोत्तरपदाधिकारेपि ज्ञापितया प्रत्ययग्रहणपरिभाषया यतस्तद्विषया कृद्ग्रहणपरिभाषा प्रवर्त्तेतेति। (मुखतोभूत्वा, मुखतोभूय, मुखतोभावम्)। *स्वाङ्गे तस्प्रत्यये कृभ्वोः* इति तसूप्रत्ययान्ते स्वाङ्ग उपपदं क्त्वाणमुलौ, तत्र "तृतीयाप्रभृतीन्यन्यतरस्याम्" इति "उपदंशस्तृतीयायाम्" इत्येतदारभ्योपपदानाममैव तेन चान्येन च तुल्यविधानानाममन्तेन समासविकल्पनान्मुखतोभावमित्येकं पदं द्वे वा पदे। क्त्वान्तेनापि तृतीयाप्रभृतीनामुपपदानां "क्त्वा च" इति इति समासविकल्पनात्तत्पक्षे "समासेऽनञ् पूर्वे क्त्वो ल्यप्" इति ल्यबादेशः। अत्रानञिति नञ् सदृशमव्ययं परिगृह्यते। *कृन्मेजन्तः* "क्त्वातोसुन्कसुनः" इति णमुलुक्त्वान्तयोरव्ययत्वात्सुपो लुक्। स्थानिवत्त्वेन ल्यबन्तमव्ययम्। (विनाभूय, विनाभूत्वा, विनाभावं, नानाभूय, नानाभूत्वा, नानाभावम्। एकधाभूय एकधाभूत्वा, एकधाभावम्)। *नाधार्थप्रत्यये च्व्यर्थे* इति नाधार्थप्रत्ययान्ते च्व्यर्थविषये उपपदे कृभुवोः क्त्वाणमुलाविति तौ। नाशब्देन "विनञ्भ्यां नानाञौ नसह" इति विहितौ नानाञावुच्येते। धाशब्देन "संख्याया विधार्थे धा" "अधिकरणविचाले च" इति विहितो धाप्रत्यय उच्यते। तत्र विधा नाम प्रकारः, सामान्यस्य भेदको विशेषः। अधिकरणविचालोप्यधिकरणं द्रव्यं तस्य विचालः(२)' एकस्यानेककरणमनेकस्यैकीकरणं वा। तदेकधाभूयेत्यादावयमर्थः। अनेकं द्रव्यमेकं भूत्वेति एकस्यानेकीकरणे द्विधाभूयेत्यादौ द्रष्टव्यम्। ये तु धाप्रत्ययस्यादेशा *एकाद्धो ध्यमुञन्यतरस्याम्* *द्वित्र्योश्च धमुञ्* *एधाच्च* इतिविहिता ध्यमुञादयस्तेषामपि स्थानिवत्त्वेन धाग्रहणेन ग्रहणात्तदन्ते वोपपदे भुवः क्त्वाणमुलौ भवत इत्यैकधाभूयेत्याद्युदाहार्यम्। "नाधार्थ" इत्यत्रार्थग्रहणं तु ध्यमुञन्तात्स्वार्थे डदर्शनमिति यदा डप्रत्ययः स्यात् तदर्थं, सहि स्वार्थिकत्वात् धार्थः। यथा नाञर्थमपि। अन्यथा सानुबन्धकत्वादपि नानाशब्दो न गृह्येत। (तूष्णींभूय, तूष्णीं भूत्वा तूष्णींभावम्।) "तूष्णीमि भुवः" इति क्त्वाणमुलौ। (अन्वग्भूत्वा, अन्वग्भावम्)। "अन्वच्यानुलोम्ये" इति क्त्वाणमुलौ। आनुलोम्यमनुकूलता। नाधेत्यादियोगत्रयविषयेपि "तृतीयाप्रभृतीनि" इति समासविकल्पो द्रष्टव्यः। (भूतो घटः। भूतं घटेन)। अत्र "निष्ठा" इति भूते विहितस्य क्तस्य गत्यर्थादिपरत्वे *गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च* इति कर्त्तरि चकाराद्भावकर्मणोश्च विधानाद् भुवश्चाकर्मकत्वात्कर्तृभावावर्थौ, अयं च "नपुंसके भावे क्तः" "ल्युट् च" इति क्तल्युटौ न बाधते, यतस्तयोर्धात्वर्थस्य सिद्धता विषयः। अस्य तु धात्वर्थमात्रम् इति विषयभेदस्तेन घटस्य भूतं भवनमिति भवतः क्तयोगे कर्त्तरि षष्ठ्या "न लोकाव्यय" इति निषेधो न भवति (नपुंसके भावे क्त उपसंख्यानम्) इति तद्विधानात् शेषविधानाद्वा तत्सिद्धिः। इदमेषां भूतं

(१) समास इति क्वचित् पाठः। (२) संख्यान्तरापादनम्।

"क्तक्तवतू निष्ठा" "निष्ठा" इति ध्रौव्यादिभ्यो विहितस्य क्तस्य "क्तोऽधिकरणे च ध्रौव्य-गतिप्रत्यवसानार्थेभ्यः" इत्यत्राधिकरणमर्थः। चकारो यथाप्राप्तस्यानुज्ञानार्थः । तेन ध्रौव्यार्थिभ्यः कर्तृभावाधिकरणेषु गत्यर्थेभ्यः कर्मकर्त्त्रधिकरणेषु कर्मविवक्षायां भावे च प्रत्यवसानार्थेभ्यः कर्माधिकरणयोः पूर्ववदत्रापि भवति । ध्रौव्यार्था अकर्मकाः । प्रत्यवसानार्था अभ्यवहारार्थाः । *अधिकरणवाचिनश्च* इत्यधिकरणे क्तयोगे षष्ठी । "अधिकरणवाचिना च" इत्यस्याः समासनिषेधः । भवत्यनेनात्रेति वा भवनम् । "करणाधिकरणयोश्च" इति सामान्यविहितो ल्युट् । अस्य कालसामान्यविषयत्वाद् भूतविषयेणाधिकरणोक्तेन न बाधः । परिभवनमित्यत्र *कृत्यचः* इति उपसर्गस्थान्निमित्तादुत्तरस्य कृत्स्थस्याच उत्तरस्य नस्य विधीयमानं णत्वं "न भाभूपूकमिगमिप्यायीवेपाम्" इति निषिध्यते । अत्र [ण्यन्तानां च भादीनामुपसंख्यानम्] इति वचनात्परिभावनमित्यत्रापि णत्वं न भवति ।

अथोणादयः ॥ (दृन्भूः । तरुः.) सर्पजातिभेद इति पुरुषकारे । "अन्धूदृम्भूजम्भूकफेलूकर्कन्धूदिधिषूः" इति दृढशब्द उपपदे कूप्रत्ययान्तो निपातितः । उपपदस्य च दृंभावोऽस्मादेव निपातनात् । के चिदुपपदं नान्तं पठन्ति । अजादावस्य यणिति वर्षाभूप्रस्तावेऽवोचाम । क चिदुणादिवृत्तौ दृभी ग्रन्थ इत्यस्मात्कूप्रत्यये निपातनमित्युक्तम् । तत्राप्ययमूकारो न धातोरित्युवङोऽप्रसङ्गाद्यणेवेति न रूपभेदः । भवनं गृहम् । "बहुलमन्यत्रापि" इति युच् । भुवनम् । "भूसूधूभ्रस्जिभ्यश्छन्दसि" इति क्युन्, भाषायां बहुलवचनात्साधुरिति वा भुवनमित्यत्र हरदत्तः । (भूमिः) "भुवः कित्" इति मिन्प्रत्ययः । कृष्णभूमः । उदग्भूमः । पाण्डुभूमः "अच् प्रत्यन्ववपूर्वात्सामलोम्नः" इत्यत्राजिति योगविभागादच् समासान्तः । तथा च श्लोकवार्त्तिके । [कृष्णोदक्पाण्डुपूर्वाया भूमेरच्प्रत्ययः स्मृत] इति । (भूरिः) । "अदिशदिभूशुभिभ्यः क्रिन्" इति क्रिन् । (भूवः । अन्तरिक्षलोको महाव्याहृतिश्च ।) "भूरञ्जिभ्यां कित्" इत्यसुन्, कित्त्वान्न गुणः । (अद्भुतः) । "अदि भुवो डुतच्" इति डुतच् । ये प्रसिद्धयोगा उणादिप्रत्ययान्ताः प्रदर्शिताः, अतः परमप्येवं वक्ष्यन्ते ।......

सूत्रवार्तिकभाष्येषु छान्दसावेव केवलम् ।
कानचूक्वसू प्रतीयेते तेन नात्र प्रपञ्चितौ ॥
के चिदाहुः क्वसोः कित्त्वाज् ज्ञापकादनुमीयते ।
अस्ति प्रयोगो भाषायामित्येवं प्राज्ञमानिनः ॥
तथा हि छान्दसत्वे ऽस्य छन्दस्युभयथेत्यतः ।
सार्वधातुकसंज्ञत्वान्ङित्त्वे सिद्धेऽतिदेशतः ॥
अनुनासिकलोपः स्यात् संयोगान्तेषु धातुषु ।
अन्यत्रापि लिटः कित्त्वे संयोगाल्लिड्किदित्यतः ॥
सिद्धे ङुतः ककारो ऽसौ भाषायामर्थवानिति ।
तदसत्तेरुरित्यादौ यथा लिटि गुणः किति ॥
ऋच्छत्यृतामितीहापि तितीवति गुणो भवेत् ।
स मा भूदिति कित्त्वस्य भाष्ये फलमसमर्थनात् ॥ १ ॥

एध वृद्धौ ॥ (१)कत्थ्यन्ता उदात्ता अनुदात्तेतः । (एधते । एधसे । एधे । एधमानः । एधां चक्रे । एधां बभूव । एधामास) । "इजादेश्च गुरुमतोऽनृच्छः" इत्याम् प्रत्ययः । "दीर्घं च" इति (२)दीर्घं गुरुसंज्ञम् । करोतेः "आम्प्रत्ययवत्" इति नित्यं तङ् । (एधिता । एधितासे । एधिताहे । एधिष्यते । एधिष्यसे । एधिष्ये । एधिष्यमाणः ।) "लुटः सद्वा" । (एधताम् । एधस्व । एधै) । "सवाभ्यां वामौ" । "एत ऐ" । (ऐधत । ऐधथाः । ऐधे) ।

---

(१) स्थन्ता । स्थान्ता इति वा पाठः ।　　　　(२) दीर्घस्य गुरुसंज्ञा ।

आडजादीनाम् इति अजादेरङ्गस्य लुङ्लङ्लृङ्क्षु आडागम इत्याट्। टित्त्वादादौ "आटश्च" इति वृद्धिः। (ऐधेत) आशिषि (एधिषीष्ट। एधिषीष्ठाः। एधिषीय। ऐधिष्ट। ऐधिष्ठाः। ऐधिढ्वम्। ऐधिषि)। "धि च" इति सलोपः। इणन्तमङ्गमिति "इणः षीध्वंलुङ्लिटां धोऽङ्गात्" इति धकारस्य मूर्धन्यः। अत्र हरदत्तः एवं मूर्द्धन्यमुक्त्वोपायान्तरमाह। अन्ये त्विटो विभाषाया वक्ष्यमाणत्वाद् गोबलीवर्दन्यायेन तद्व्यतिरिक्तमिणन्तमिह गृह्यत इति ऐधिन्वमित्यादौ ढत्वं नेच्छन्ति। (ऐधिष्यत। ऐधिष्यथाः। ऐधिष्ये)। भावे लट्लोट्-लङ्विध्यादिलिङ्क्षु यगुदाहार्यः। (एध्यते भवता) इत्यादि। लुङि "चिणो लुक्" इति तशब्दस्य लुकि (ऐधि भवतेति)। शेषे तु कर्तृवद्रूपम्। सन्यजादित्वाद् द्वितीयस्यैकाचो द्विर्वचने ऽभ्यासकार्यम्। "पूर्ववत्सनः" इति तङ्। (एदिधिषते)इत्यादि सर्वत्र प्रकृतिवत्। (एदिधिष्यत)इत्यादि कर्तृवत्। न च स्यादिषु चिण्वदिट्पक्षे वृद्धौ युकि रूपान्तरमपि स्यादित्याशङ्क्यम्। ण्यल्लोपेत्यादिना ऽतो लोपेन वृद्धेर्बाधस्योक्तत्वात्। (एधयते सस्यम्।) "णिचश्च" इति कर्त्रभिप्राये तङ्। अस्मिन्नुपपदेन प्रतीयमाने "विभाषोपपदेन प्रतीयमाने" इति परस्मैपदमपि भवति। स्वं सस्यमेधयतीति। चित्तवत्कर्तृकेतु "अणावकर्मकाच्चित्तवत्कर्तृकात्" इति परस्मैपदमेव (पुत्रमेधयतीति)। विभाषोपपदादपि परत्वादिदमेव भवति, तेन स्वपुत्रमेधयतीत्येव। "गतिबुद्धि" इति सर्वत्र प्रयोज्यकर्मत्वम्। (एधयां चक्रे। चकार। बभूव। आस)। "अयामन्त" इति णेरयादेशः। अत्र यदा प्रकृतेः चित्तवत्कर्तृकत्वेन नित्यं परस्मैपदं तदा कृञोऽनुप्रयोगस्येति कल्पितेन योगेन तथैव। (एधयितासि। एधयितासे। एधयिष्यति। एधयिष्यते। एधयतु। एधयताम्। ऐधयत। ऐधयत। एध्येत्। एधयेत। आशिषि एध्यात्। एधयिषीष्ट) यासुट्यनिडाद्यार्धधातुकत्वाण्णिलोपः "अकृत्सार्वधातुकयोः" इति दीर्घस्य पूर्वविप्रतिषेधेन बाधकः। ध्वमीटि गुणायादेशयोरिणः पर इटि "विभाषेटः" इति मूर्द्धन्यविकल्पः। (ऐदिधत्। ऐदिधत)। "णि श्रि" इति चङि णिलोपस्य "द्विर्वचने ऽचि" इति द्विर्वचननिमित्ते ऽचि योजादेशः। स द्विर्वचने कर्त्तव्ये स्थानित्वं प्रतिपद्यत इति "चङि" इति द्विर्वचने स्थानिवत्त्वात् "अजादेर्द्वितीयस्य" इतिधिशब्दो द्विरुच्यते। इदं च "णौ चङि" इत्युपधाह्रस्वाद्बहिरङ्गादप्युत्तरकालं द्रष्टव्यम्। तत्र च लिङ्गमोणेर्ऋदित्करणं तद्धि मा भवानोणिणदित्यत्र "नाग्लोपि" इति चङि ह्रस्वस्य निषेधार्थं, पूर्वंतु द्विर्वचने ह्रस्वभाव्युपधा नेति किं निषेधेन। तेन मा भवानिदिधदिति भवति, "न माङ्योगे" इत्याटो निषेधः। कर्मणि लुङ्यकवचने चिण्। अन्यत्र सिचीट्गुणायादेशाः। (ऐधि। ऐधयिषातामित्यादि)। ध्वमि "धि च" इति सलोपे गुणायादेशयोरिणः परत्वादिटो "विभाषेटः" इति वा मुर्द्धन्यः। अन्येषु लेषु कर्तृवद्रूपम्। लिट्यनुप्रयोगे नित्यं तङ् उदाहार्यः। स्यादिषुपक्षे चिण्वदिटि तस्यासिद्धवदत्रेत्यसिद्धत्वाण्णिलोपे (एधिष्यत) इत्यादि प्रकृतिवत् रूपाण्यपि पक्षे द्रष्टव्यानि। न च ध्वमि णेरिणः पर इडिति तल्लोपात्पूर्वं "विभाषेटः" इति रूपभेदस्य प्रसङ्गः। नित्यत्वादन्तरङ्गत्वात्पूर्वत्रासिद्धत्वाच्च पूर्वमेव णेर्लोपात् कर्मकर्तरि यक्चिणोर्विषये तयोः "णिश्रन्थि" इति निषेधाच्छप्सिचोः कर्तृवद्रपम्। स्यादिषु कर्मवत्। वत्करणात्स्वाश्रये भावे लकारे सर्वत्र कर्मवत्। कर्त्तरि तृतीया विशेषः। (एधयते स्वेनैवेत्यादि। प्रैधते।) *एत्येधत्यूठ्सु* इति वृद्धिः। एजादाविणि धातावेधतौ ऊठि चावर्णात् पूर्वपरयोरेकादेशो वृद्धिरिति सूत्रार्थः। इयं च वृद्धिरेत्येधत्योरेङि पररूपस्यापवाद इत्यवर्णान्तोपसर्गलाभः। ऊठि त्वाद्गुणस्य। अत्र वृत्तौ एज्ग्रहणमेतैरेव विशेषणं नैधतेर्व्यभिचारादिति(१) अत्र प्रदीपकृत् प्रेदिधदित्यत्र व्यभिचारासम्भवान्नैतत्सारमित्याह। इदमेव त्वसारं, ण्यन्तस्य शब्दान्तरत्वादेधतिग्रहणेनाग्रहणात्। अत एव हि "न भाभूपूक-

(१) वदत इत्यधिकं क्वचित्।

मि" इत्यत्र [ण्यन्तानां च भादीनामुपसंख्यानम्]इत्युक्तम् । वक्ष्यन्ति च तत्र न्यासकारादयः शब्दान्तरत्वात् ण्यन्तानां न प्राप्नोति तस्मादुपसंख्यानमिति । स्वयं च तत्रैवं वक्ष्यतीति पूर्वापरविरोधं स एव प्रष्टव्यः । किं च ण्यधिकस्यापि ग्रहणे "उपसर्गात्सुनोति" इत्यत्राभि-सुषावयिषतीत्यत्र ण्यन्तेनाभियोगात्सुनोतिं प्रत्यनुपसर्गत्वात् षत्वं न स्यादिति चोदयित्वा प्रेषणादिरिहाभिषवे इति सुनोतिं प्रति उपसर्गत्वात् षत्वं सिद्धमिति भाष्यकारादीनां स-माधानमनुपपन्नं स्यात् । अत एव हि वृद्धिविधौ हरदत्तः । एज्ग्रहणमेतेरेव विशेषणं न पुनरेधतेरिति वृत्तिमुपादाय बाहुल्याभिप्रायेणैतदुक्तं मा प्रेदिधदित्यत्र व्यभिचारसम्भवा-दित्याहुरिति मतान्तरेणाह । (एधितः । एधितमनेन । इदमेषामेधितम्) । "क्तोधिकरणे च" इति क्तः । (एधः) । "असुन्" इत्यसुन् ॥ २ ॥

स्पर्द्ध सङ्घर्षे ॥ सङ्घर्षः पराभिभवेच्छा । पराभिभवस्य धात्वर्थेनोपसंग्रहात् अकर्म-त्वम् । उक्तम् च ।

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥

इति । (स्पर्द्धते । स्पर्द्धसे । स्पर्द्धमानः । पस्पर्द्धे । पस्पर्द्धिषे । पस्पर्द्धे ॥) *शर्-पूर्वाः खयः* ॥ अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते अन्ये हलो निवर्तन्त इति पकारशेषः । (स्पर्द्धिता । स्पर्द्धितासे । स्पर्द्धिताहे । स्पर्द्धिष्यते । स्पर्द्धिष्यसे । स्पर्द्धिष्ये । स्पर्द्धताम् । स्पर्द्धस्व । स्पर्द्धै । अस्पर्द्धत । अस्पर्द्धथाः । अस्पर्द्धे । स्पर्द्धेत । स्पर्द्धेथाः । स्पर्द्धेय । आशिषि । स्पर्द्धिषीष्ट । स्पर्द्धिषीष्ठाः । स्पर्द्धिषीय । अस्पर्द्धिष्ट । अस्पर्द्धिष्ठाः । अस्पर्द्धिषि । अस्पर्द्धिष्यत । अस्पर्द्धिष्यथाः । अस्पर्द्धिष्ये) । भावे लट्लोट्लङ्विध्यादिलिङ्क्षु यकि (स्पर्द्ध्यते । स्पर्द्ध्यताम् । अस्पर्द्ध्यत । स्पर्द्ध्येतेत्यादि) लुङि तशब्दे चिणि (अस्प-र्द्धीति) आशीरादिषु कर्तृवत् । (पिस्पर्द्धिषते । पिस्पर्द्धिषां चक्रे । पिस्पर्द्धिषितेत्यादि) । "सन्यतः" इतीत्वमभ्यासस्य पूर्ववत् "पूर्ववत्सनः" इति तङ् । आर्धधातुकेऽतो लोपः । विध्यादिलिङ्यतो लोपाभावाल्लिङः सलोपे गुणवलिलोपयोः । (पिस्पर्द्धिषेत) । भावे यक्चिणोर्विशेषः । (पिस्पर्द्धिष्यत इत्यादि पास्पर्द्ध्यते) *दीर्घोकित* इत्यभ्यासस्याकारस्य दीर्घे यङि तल्लुकि च । (पास्पर्द्धां चक्रे, पास्पर्द्धितेत्यादि) तत्रार्द्धधातुके *यस्य हलः* इति हल उत्तरस्य यस्य लोपः । स चादेः परस्येति यकारस्य । अकारस्य अतो लोपः । भावे तादिषु यक्यप्यतो लोपयलोपयोः कर्तृवत्सर्वत्र रूपम् (पास्पर्द्धत इत्यादि) लुङि तु चिणि (अपास्पर्द्धीति) भवति । सन्यङास्तास्यादिषु चिण्वदिटि न विशेषः, अतो लोपेन वृद्धेर्बा-धादित्युक्तम् । यङो लुक्यदादिवच्चेति शपो लुकि *झषस्तथोर्धोधः* । झष उत्तरयोस्तका-रथकारयोर्दधाति वर्जयित्वा धकार इति धत्वे "झलां जश् झशि" इतिजश्त्वम् । आन्तर-तम्याद्दकारः । पास्पर्द्धि, एवं वचनान्तरेषु । पास्पर्द्धः । पास्पर्द्धति । "अदभ्यस्तात" इत्यद्भावः । (पास्पर्त्सि) । *खरि च* । खरि परे झलां चर इति चर्त्वे । (पास्पर्द्धः) । सर्वत्र हलादेः पितः सार्वधातुकस्य "यङो वा" इति ईडुदाहार्यः । (पास्पर्द्धीतीत्यादि । पास्पर्द्धां चकार) । पूर्ववत् "कृञोनुप्रयोगस्य"इति नित्यं परस्मैपदम् । (पास्पर्द्धिता । पास्प-र्द्धिष्यति । पास्पर्द्धु । पास्पर्द्धात्) तातङि ङिच्च पिन्नेति स्थानिवत्त्वप्राप्तस्य पित्त्वस्य निषेधादीडभावः । (पास्पर्द्धाम् । पास्पर्द्धतु । पास्पर्द्धि) सेर्ह्यादेशे "हुझल्भ्यो हेर्धिः" इति धिभावः । हेरपित्ववचनादिडभावः । (अपास्पर्त्) । इतश्च लोपे हल्ङ्यादिलोपे च "झलां जशोन्ते" इति जश्त्वे "वावसाने" इति चर्त्वे तकारः । तदभावे अपास्पर्द् । "रात्स-स्य" इति नियमान्न संयोगान्तलोपः (अपास्पर्द्धाम् । अपास्पर्धुः) "सिजभ्यस्त" इति जुस् । (अपास्पर्त् । अपास्पर्द् । अपास्याः) सिपि हल्ङ्यादिलोपे पूर्ववज्जश्त्वे चर्त्वे वा च तदभावे "दश्च" इति सिपि परे वा रुः । "रोरि" इति पूर्वस्य रेफस्य लोपः । "ढ्रलोपे

पूर्वस्य दीर्घोणः” इति पूर्वस्याणो दीर्घः । ढ्रलोप इति ढकाररेफयोर्लोपनिमित्तो ढकाररेफावुच्येते । (अपास्पर्द् । अपास्पर्त् । पास्पद्धर्यात् । पास्पद्धर्याताम् । पास्पद्धर्युः) यासुटो ङित्वेनापित्त्वादीडभावः । आशिषि (पास्पद्धर्यात् पास्पद्धर्यास्ताम् ।) असार्वधातुकत्वादीडभावः । (अपास्पर्द्धीत् । अपास्पर्द्धिष्टाम् । अपास्पर्द्धिषुः । अपास्पर्द्धीः अपास्पर्द्धिषम्) “अस्तिसिच” इति पितो नित्यमीट् । “इट ईटि” इति सिचो लोपे [सिज्लोप एकादेशे सिद्धः] इति सवर्णदीर्घः । “वदव्रजहलन्तस्याचः” इति परस्मैपदपरे सिचि विहिता वृद्धिः “नेटि” इति निषिध्यते । (अपास्पर्द्धिष्यद् इत्यादि ।) भावे सर्वत्र यङन्तवद्रूपम् । (पास्पर्द्ध्यते) इत्यादि, णौ (स्पर्धयतीत्यादि) एधतिवदुदाहार्यम् । लुङ्यग्लोपित्वात्प्रथमस्यैकाचो द्विर्वचनम् । *संयोगे गुरु* इति संयोगपरस्य ह्रस्वस्य गुरुसंज्ञाविधानात् “सन्वल्लघुनि” इति इत्वम्, “दीर्घो लघोः” इति दीर्घश्च न भवति गुरुसंज्ञया आकडारीयतयानवकाशया लघुसंज्ञा बाध्यते, कर्मणि यक्चिणोर्विषये णिलोपे (स्पर्ध्यते) इत्यादि, प्रकृतौ भाववद्रूपाणि उदाहार्याणि । अन्यत्र (स्पर्धयां चक्रे) इत्यादि कर्तृवत् । लुङि चिण् । द्विवचनादौ सिच् । (अस्पर्द्धि अस्पर्द्धयिषातामित्याद्युदाहार्यम्) ध्वमि “विभाषेटः” इति मूर्द्धन्यविकल्पः । स्यादिषु चिण्वदिटि तस्यासिद्धवदत्रेत्यसिद्धत्वाण्णिलोपे (स्पर्द्धिष्यते) इत्यादि प्रकृतिवद्रूपम् । कर्मकर्तरि यक्चिणोर्निषेधात् शपि स्पर्धयत इत्यादि कर्तृवन्नेयम् । अत्रापि स्यादिषु चिण्वत्पक्षे कर्मवत् । वत्करणात् स्वाश्रये भावे लकारे सर्वं कर्मवत् । कर्तरि तृतीया विशेषः । (स्पर्धनः) । “अनुदात्तेतश्च हलादेः” इति तच्छीलादौ युच् । स्पर्द्धा । *गुरोश्च हलः* इति गुरुमतो हलन्तात् स्त्रियामकारप्रत्ययः । वासरूपेण क्तिचस्त्रियामिति निषेधान्न भवति । (इदमेषां स्पर्द्धितम् । स्पर्द्धितमनेन । स्पर्द्धितः) । “क्तोधिकरणे च” इति कर्तृभावाधिकरणेषु क्तः । स्पर्धालुप्रयोगश्चिन्त्यः ॥ ३ ॥

गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च ॥ स्थापना तत्स्थापनं वा प्रतिष्ठा । लब्धुमिच्छा लिप्सा । एकत्र स्थापनं संदर्भो वा ग्रन्थः । तत्राद्ये ऽकर्मकः, इतरयोः सकर्मकः, (गाधते । गाधसे । गाधे । गाधमानः । जगाधे । गाधिता । गाधितासे । गाधिताहे । गाधिष्यते । गाधिष्यमाणः । गाधताम् । गाधस्व । गाधै । अगाधत । अगाधथाः । अगाधे । गाधेत । गाधेथाः । गाधेय । आशिषि गाधिषीष्ट । अगाधिष्ट । अगाधिष्ठाः । अगाधिषि । अगाधिष्यतेत्यादि) भावकर्मकर्तृषु लट्लोट्लङ्विध्यादिलिङ्क्षु यक् । (गाध्यते । गाध्यसे । गाध्यताम् । अगाध्यत । गाध्येतेत्यादि) (अन्येषु लेषु कर्तृवत् , लुङ्येकवचने तु चिणि (अगाधीति ।) लिप्सायामप्यार्थेन न्यायेनेष्यमाणप्रधानत्वात्तस्य च कर्मस्थत्वात्सनन्तवत् कर्मकर्तृत्वोपपत्तिः (जिगाधिषते । जिगाधिषां चक्रे । जिगाधिषिता । जिगाधिषिष्यते । जिगाधिषाताम् । अजिगाधिषत । जिगाधिषेत) आशिषि (जिगाधिषिषीष्ट । अजिगाधिषिष्ट । अजिगाधिषिष्यतेत्यादि) सर्वत्राभ्यासकार्यम् । आर्धधातुकेऽतो लोपः, भावकर्मणोर्यक्चिण्विषये (जिगाधिष्यते) अजिगाधिषीत्यादि । कर्मकर्त्तरि यक्चिणोर्निषेधात् कर्तृवदेव (जागाध्यते) जागाधां चक्रे । जागाधिता । जागाधिष्यते । जागाध्यताम् । अजागाध्यत । जागाध्येत) आशिषि (जागाधिषीष्ट । अजागाधिष्ट । अजागाधिष्यत) सर्वत्राभ्यासस्य दीर्घोऽकितः” । आर्धधातुके “अतो लोपः” “यस्य हल” इति यलोपालोपौ । भावादिषु यक्यप्यल्लोपयलोपयोः सर्वत्र कर्तृवद्रूपम् । लुङ्येकवचने त्वजागाधीति चिण्विशेषः । सन्यङोश्चिण्वदिड्यतोलोपेन वृद्धिबाधाद् न विशेष इत्युक्तम् । यङ्लुकि “झषस्तथोर्धो ऽधः” । “झलां जश् झशि” (जागाद्धीत्येवं) सिपि *एकाचो बशो भष् झषन्तस्य स्ध्वोः* इति धातोरवयवस्य झषन्तस्यैकाचो बशः स्थाने भषादेशः सकारादौ प्रत्यये ध्वे च परे पदान्ते च विषये इत्यान्तरम्यात् गकारस्य घकारे

"खरि च" इति धकारस्य तकारे (जागात्सीति । जागाधां चकार) । "पूर्ववत्कृत" इति परस्मैपदम् । (जागाधिता । जागाधिष्यति । जागाद्धु । जागाद्धात् । जागाधानि । अजागात् । अजागाद्) हल्ङ्यादिलोपे पदान्ते चेति बशो भषादेशे जश्त्वे च चर्त्वम् । सिपि तु "दश्च"इति वा रुत्वे (अजागा इत्यपि । जागाध्यात् । जागाध्याताम् । आशिषि जागाध्यात् । जागाध्यास्ताम् । अजागाधीत् । अजागाधिष्टाम् । अजागाधिष्यदित्यादि) सर्वत्र यङ्लुगन्तात्परस्य हलादेः पितः सार्वधातुकस्य पक्षे ईडुदाहार्यः । लुङितु "अस्तिसिचो" इति नित्यः । भावादौ यङन्तवत् (गाधयति । गाधयां चकार । गाधयिता । गाधयिष्यति । गाधयतु । अगाधयत् । गाधयेत्) आशिष्यनिडाद्यार्धधातुकत्वाण्णिलोपे (गाध्यात् । अजगाधत्) अत्रास्य ऋदित्त्वात् "नाग्लोपिशास्वृदिताम्" इति णौ चङि ह्रस्वे निषिद्धेऽभ्यासस्यालघुपरत्वात्सन्वदित्वलघुदीर्घत्वे न भवतः (गाधयत) इत्याद्युदाहार्यम्, प्रतिष्ठायाम् "अणावकर्मकात्" इति चित्तवत्कर्तृकत्वे परस्मैपदमेव । भावकर्मणोर्यक्चिणोर्विषये णिलोपे गाधतिवद्रूपम् । स्यादिषु तु ण्यन्ते कर्तृवत् । चिण्वदिटि तु णिलोपे गाधितेत्यादि प्रकृतिवदेव । कर्मकर्तरि यक्चिणोर्निषेधान्नवसु लकारेषु कर्तृवत् । (गाधनः) । "अनुदात्तेत" इति युच् । (गाधा ।) "गुरोश्च हलः" इत्यकारः, प्रतिष्ठायां स्पर्द्धिवत्, भावकर्त्रधिकरणेषु क्त उदाहार्यः, इतरयोस्तु "तयोरेव" नियमात्कर्मणि ॥ ४ ॥

बाधृ लोडने ॥ लोडनं प्रतिघातः । गाधिवत् । बाहुः । "अर्जिदृशिकम्यमिपंसिबाधामृजिपशितुग्धुग्दीर्घहकाराश्च" इति कुप्रत्यये धातोर्हकारः (भद्रबाहूः) चतुष्पाद्विशेषः । "बाह्वन्तात्संज्ञायाम्" इति स्त्रियामूङ् प्रत्ययः । सुबाहुर्नाम कश्चित्, तस्यापत्यं (सौबाहविः) "बाह्वादिभ्यश्च" इति षष्ठ्यन्तादपत्य इञ् । *ओर्गुणः* । उवर्णान्तभस्याङ्गस्य तद्धिते गुण इति गुणेऽवादेशः, यद्यपि बाह्वादिषु केवलो बाहुशब्दः पठ्यते, [समासप्रत्ययविधौ तदन्तविधेः प्रतिषेधः] इति तदन्तविधिश्च प्रतिषिध्यते, तथापि केवलस्यापत्येनायोगात्तदन्तत्वलाभः, संज्ञात्वेन विनियुक्ताद् बाहोस्तु प्रत्ययो नेष्यते । यदाह ॥

अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः ।
शास्त्रार्थस्तेषु कर्त्तव्यः शब्देषु न तदुक्तिषु ॥

इति । "राजश्वशुराद्यद्" इत्यत्र भाष्यादौ चोक्तं 'संज्ञायां श्वशुराद्यन्न'इति । (उभाबाहु, उभयाबाहु प्रहरति ।) "द्विदण्डयादिभ्यश्च" इतीच् समासान्तः । तस्य च द्विदण्डयादिष्वेव पाठाल्लोपः, प्रत्ययलक्षणेन तदन्तत्वात् तिष्ठद्गुप्रभृतिष्विचः पाठात्तदन्तस्याव्ययीभावत्वविधानात् "अव्ययीभावश्च" इत्यव्ययत्वे सुपो लुक् । उभयबाह्वित्यत्र "उभादुदात्तो नित्यम्" इत्यत्रास्वरितत्वादेव वाग्रहणाननुवृत्तेर्नित्यमयचि सिद्धे नित्यग्रहणं योगभेदेन वृत्तौ नित्यमयजन्तस्य प्रयोगार्थमित्युभशब्दस्योभयादेशः, अयमर्थः सर्वादिसूत्रे कैयटादौ स्फोरितः । तथा च तत्र वार्त्तिकमपि [उभस्य सर्वनामत्वेऽकजर्थः पाठः । अन्याभावो द्विवचनटाब्विषयत्वाद् उभयोन्यत्रेति ।] उभाबाह्वित्यत्र तु द्विदण्ड्यादिपाठाद् उभयाभावः ॥ ५ ॥

नाधृ नाथृ याच्ञोपतापैश्वर्याशीःषु ॥ उपतापो रोग इति वृत्तौ । उपघात इति तरङ्गिण्याम् । आद्यो धान्तः, अपरस्थान्तः । अस्य थान्तस्य धान्तकाण्ड पाठोऽर्थसाम्यात् । उभावपि दन्त्यादी । सर्वं गाधतिवत् । द्वितीयस्य तु विशेषः । "आशिषि नाथः" इत्याशिष्येवात्मनेपदं, कर्मणि शेषत्वेन विवक्षिते षष्ठी च । (सर्पिषो नाथत इत्यादि) । "षष्ठी शेष" इत्येवात्र षष्ठीसिद्धौ वचनमिदं सर्पिषो नाथनमित्यादौ समासनिवृत्त्यर्थं षष्ठी श्रूयत एव न लुप्यत इति, स (१)लोपश्च समासे । उक्तं च ।

---

(१) 'षष्ठीलोपश्च समासे' इति क्वाचित्पाठः ।

साधनैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः ।
प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये ॥

इति । न तर्हीदानीमिदं सम्भवति सर्पिर्नाथनमिति । भवति यदा कृद्योगलक्षणा षष्ठी । तथा च वार्तिकं, [प्रतिपदविधाना च षष्ठी न समस्यते कृद्योगा च षष्ठी समस्यत इति] न चैवं सति समासनिषेधस्य वैयर्थ्यमिति वाच्यम् । यतः शेषषष्ठ्याः समासे "समासस्य" इत्यन्तोदात्तत्वेन भाव्यम्, अन्यस्यास्तु *गतिकरकोपपदात् कृत्* गत्यादिभ्यः परं कृदन्तमुत्तरपदं प्रकृतिस्वरमित्युत्तरपदप्रकृतिस्वरेण भाव्यं, स च लिति प्रत्यये पूर्वमुदात्तत्वम् । अनाशिषि परस्मैपदं द्रष्टव्यम् (नाथति । ननाथ । नाथिता । नाथिष्यति । नाथतु । अनाथत् । नाथेत् । नाथ्यात् । अनाथीत् । अनाथिष्यत् । निनाथिषतीत्यादि) यङ्लुक्यझषन्तत्वात् "झषस्तथोर्धोऽधः" इति धत्वाभावे "खरि च" इति चर्त्वे (नानात्ति । नानात्तः । नानात्थ इत्यादि) विशेषः । अत्र मैत्रेयाभरणकारावाद्यं णोपदेशं पठन्तौ "णो नः" इति धात्वादित्वाण्णकारस्य नकारं विधाय "उपसर्गादसमासेपि णोपदेशस्य" इति उपसर्गस्थान्निमितात्परस्य णोपदेशनकारस्य समासासमासयोर्णत्वविधानात्(प्रणाधत) इत्यादौ णत्वप्रयोजनमाहतुः । सर्वे नादयो णोपदेशा इत्यस्य पर्युदासे नृतिनन्दिनर्दिनक्किनटिनाधृनाथवर्जमित्यत्र च न पेठतुः । अत्र काश्यपः । नाधतेर्णोपदेशत्वमयुक्तं, गणकारवृत्तिकारादीनामनिष्टत्वादिति । नृतिनन्दीत्यादिवाक्ये नाधृनॄवर्जं नृत्यादीन् पठित्वैतान्सप्त वर्जयित्वेति वदन् श्रीकरोप्यत्रैवानुकूलः । तथापर्युदासवाक्ये नर्दतिवर्जं सर्वानेतान् पठतः शाकटायनन्यासकृतोप्ययमेव पक्षोभिमतः । उभयोस्थान्तपाठस्तु धान्तप्रकरणविरोधान्नाशक्यः । इमौ याञ्चायामकथितेप्सिततमाभ्यां द्विकर्मकौ ।

दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ।
ब्रुविशासिगुणेन च यत्सचते तदकीर्त्तितमाचरितं कविना ॥

इत्यत्र भिक्षेरर्थपरत्वात् । उक्तं च कैयटे । दुह्यादीनां चार्थोपलक्षणायोपादानात् पर्यायप्रयोगेपि कर्मसंज्ञा भवतीति । अर्थाश्रया चेयं संज्ञा न दुह्यादिवत्स्वरूपाश्रयेति भिक्षि प्रस्तुत्य वदतो हरदत्तस्यापि मते ऽत्र न विवादः । श्लोकार्थस्तु उपयुज्यत इत्युपयोगः, वयःप्रभृति प्रधानं कर्म, तस्य निमित्तं गवादि तच्च यच्च ब्रुविशास्योर्गुणेन प्रधानकर्मणा धर्मादिना क्रियां प्रति साधनत्वेन गुणत्वात् लब्धगुणव्यपदेशेन सचते सम्बन्धमुपैति माणवकादि, तदुभयं कारकं पूर्वविधौ विशेषेणाविवक्षितत्वादपादानादिसंज्ञाभावे कविना क्रान्तदर्शिना सूत्रकारेणाकथितं कर्मोक्तमिति । याचिरिहानुनयार्थः । याचनार्थस्य तु भिक्षिणैव सिद्धम् । अथान्येपि द्विकर्मकाः प्रसङ्गात् प्रदर्श्यन्ते । यदाह ।

नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च ।
द्विकर्मकेषु ग्रहणं कर्त्तव्यमिति निश्चयः ॥

गत्यर्थग्रहणं गत्यादिसूत्रोपात्तानामुपलक्षणम्,

जयतेः कर्षतेर्मन्थेर्मुषेर्दण्डयतेः पचेः ।
तारेर्ग्राहेस्तथा मोचेस्त्याजेर्दीपेश्च संग्रहः ॥
कारिकायां चशब्देन सुधाकरमुखैः कृतः ।
ग्राहेरिह ग्रहो नैव हरदत्तस्य संमतः ॥

यदसौ "गतिबुद्धि" इत्यत्राथ कथम् 'अयाचितारं नहि देवदेवमद्रिः सुतां ग्राहयितुं शशाक' इति स्वतन्त्राः कवयः । यद्वा सुतां प्रति न किंचिदुद्वाहविषयं ग्राहयितुं बोधयितुं शशाकेत्येवं व्याख्येयम् । अत्र बुद्ध्यर्थत्वात् द्विकर्मकत्वं सिद्धमिति समर्थयते इतीयं च निर्व्वाहणा दिक् । प्रतिग्रहणस्य ममेदमिति बुद्धिविशेषनिरूप्यत्वात् सुतां ग्राहयितुं ममेयमिति बोधयितुं न शशाक इत्येवं व्याख्यातुमुचितत्वात् । इदानीं न किंचिदुद्वाहविषयमित्याद्यध्याहर्त्तव्यं भवति ।

तथा श्रीकराचार्यस्याप्यभिमतमुपादानार्थस्य द्विकर्मकत्वम् ।

अजिग्रहत्तं जनको धनुस्तद्येनार्दिददैत्यपुरः पिनाकी ।
जिज्ञासमानो बलमस्य बाह्वोर्हसन्नताक्षीद्रघुनन्दनस्तत् ॥

इति भट्टिश्लोकं विवृण्वन्यदाह तद्धनुस्तं रामं जनकोऽजिग्रहत् बोधितवान् अनेन धनुषा त्रिपुरं दग्धमिति, ग्रहेश्च बुद्ध्यर्थत्वात् "गतिबुद्धि" इत्यादिना रामस्य कर्मसंज्ञा, धनुषस्तु "कर्तुरीप्सिततमम्" इति ग्रहिद्विकर्मकः । उपादानार्थत्वे तु ग्रहिर्गत्यादिष्वेकोऽपि न भवतीति कथं तमितीति । अत एव ।

तमादौ कुलविद्यानामर्थमर्थविदां वरः ।
पश्चात्पार्थिवकन्यानां पाणिमग्राहयत पिता ॥

इत्यर्थमबोधयदित्यर्थः । बुध्यर्थत्वाद् द्विकर्मकत्वमुक्त्वा पाणिमग्राहयदित्यत्र तेनेत्यध्याहारेण व्याख्यानात् प्रकृत्युपश्लेषेण बुद्ध्युपादानयोर्ग्रहणं, किं चास्य द्विकर्मकत्वे अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्यामित्यत्र 'ण्यन्ते कर्तुश्च कर्मण' इति प्रयोज्याया धेनोरभिधानेन भाव्यं, ततश्च जायया गन्धमाल्ये या धेनुः प्रतिग्राहितेति विग्रहीतव्यम्, अत्र च प्रथमार्थं वर्जयित्वा सर्वविभक्त्यर्थेषु बहुव्रीहिरित्युक्तत्वात्समासो न स्यात्, सत्यपि समासे समानाधिकरणोत्तरपदाभावात् "स्त्रियाः पुंवत्" इति पुंवद्भावो न स्यात् । पक्षान्तरे तु गन्धमाल्ययोरेव कर्मत्वात्तयोरेव क्तस्तेनाभिधानात् जायया प्रतिग्राहिते गन्धमाल्ये यया धेन्वेत्यूढरथादिवत् तृतीयार्थेन समासः सिध्यतीति गतमदः । इषिशकी च द्विकर्मकौ भाष्यउक्तौ । एवं चायाचितारं नहि देवदेवमित्यत्रापि देवः शक्यपेक्षया कर्म सुता प्रहिग्राहापेक्षयेति न संकटं किं चित् ॥

अथ द्विकर्मकसाधारणमिदं विचार्यते ॥ किमेते लादयः प्रधाने कर्मणि भवन्ति अथाप्रधाने । न चानयोर्युगपदभिधानसंभवो भिन्नकक्षत्वात् । अत्राह ।

प्रधानममर्ण्याख्येये लादीनाहुद्विकर्मणाम् ।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः ॥

इति । अभिधान इति शेषः । अत्र द्विकर्मणामित्यनेन 'नीवह्योर्हरतेश्च' इति च शब्दसमुचितः कृषिः नयत्यादयश्च त्रय उच्यन्ते । अन्येषां विशेषस्य वक्ष्यमाणत्वात् । तथा दुह्यादीनामित्यनेन कारिकोपात्ताश्चशब्दसमुच्चितेष्वहेतुमण्ण्यन्तादजण्यादयश्चोच्यन्ते, ण्यन्त इत्यनेन तु गत्यादिसूत्रोपाताश्चशब्दसमुच्चितास्तार्यादयश्च । अक्ष बुद्धिप्रत्यवसानार्थशब्दकर्मकेषु प्राकृते वा कमणि प्रयोज्ये वा लादयः । यदाह ।

कथितेभिहिते त्वविधिस्त्वमतिगुणकर्मणि लादिविधिः सपरे ।
ध्रुवचेष्टितयुक्तिषु चाप्यगुणे तदनल्पमतेर्वचनं स्मरति ॥

अस्यार्थः । तत्र प्रथमः पादः प्रधानकर्मणि लादिभिरभिहिते गुणकर्मणि षष्ठीत्येकीयमतदुषणपर इति इहानुपयोगात् न व्याख्यायते । सपरे गत्यादिसूत्रोपात्तसहिते दुह्यादौ गुणकर्मणि लादयः । गुणकर्मेति पुरुषप्रवृत्तेः पयः प्रभृत्यर्थत्वात् दुह्यादावप्रधानं गवाद्यच्युते । ण्यन्ते तु शब्दतः प्रयोजकव्यापारस्य प्राधान्यं प्रयोज्यव्यापारस्य त्वप्राधान्यमिति तदाप्यधर्माद्युच्यते । ध्रुवयुक्तयोऽकर्मकाः, चेष्टितयुक्तयो गत्यर्थाः एष्वगुणे प्रयोज्ये, तदेतदनल्पमतेर्मेधाविन आचार्यस्य वचनमिति । अत्र स्मरतीत्यनेनागमस्याविच्छेदं दर्शयति । एवं चात्रापि याचनस्य धनाद्यर्थत्वात्तस्यैव प्राधान्यादन्यद्राजादि कर्माप्रधानमिति तत्रैव लादयो भवन्तीति (नाथ्यते राजा धनं नाथ्यः नाथितः सुनाथ) इत्यादि भवति । नाथिता धनस्य राज्ञ इत्यत्र च कर्मणि षष्ठ्युभयत्र भवति । गुणकर्मण्युभयथा (गोणिकापुत्र) इति भाष्ये उक्तत्वात् द्वितीयापि द्रष्टव्या । (नाथिता धनस्य राजानमिति) भाष्ये नयतेरुदाहरणं प्रदर्शनमात्रं, स्पष्टं चैतत्र पदमञ्जर्यादिषु । (नाथितव्यो राजा धनं देवदत्तेनेत्यत्र कर्तृकर्मणा) प्राप्ता कृद्योगलक्षणा षष्ठी

कृत्यानां कर्त्तरि वा इत्यत्र कृत्यानामिति योगं विभज्य प्राप्तौ नेति चानुवर्त्त्य उभयप्राप्तौ नेति चानुवर्त्त्य उभयप्राप्तौ कृत्ये षष्ठ्यभावस्य भाष्ये प्रतिपादितत्वाच्च भवति। स्पष्टं चैतत्कैयटादौ। यत्तु 'कृत्यानां' इत्यत्रोभयप्राप्तौ कृत्ये षष्ठीप्रतिषेध इति वृत्तिमुपादाय प्रतिषेधो ऽयं कर्त्तरि षष्ठ्याः कर्मणि षष्ठी तु प्रधानस्य कर्मणः कृत्त्वेनाभिधानादन्यस्याप्राधान्याद्प्रसङ्ग इति न्यासे ऽर्थसत्त्वमुक्तं तद्द्वितीयावदप्रधाने षष्ठी निवार्य्यैति यत्किञ्चित्। कर्त्तरि च इति विधीयमानषष्ठीविकल्प उभयप्राप्तिव्यतिरिक्तकृत्यविषयः। (नाथितव्यं सर्पिर्देवदत्तेन देवदत्तस्येति वा) ६—७॥

दध धारणे॥ दान इति के चित् पठन्ति, दद दान इत्यत्र धारण इति। तद्युक्तम्।

> तद्वेषोसदृशोन्याभिस्स्त्रीभिर्मधुरताभृतः।
> दधते सुलभां शोभां तदीया विभ्रमा इव॥
> पिबति च पाति च यासकौ रहस्त्वाम्।
> व्रज विटपममुं ददस्व तस्यै।
> दाददो दुद्दुद्दादी दादादो दूददीददोः।
> दुदादं दददे दुद्दे ददाददददो ऽददः॥

इत्यादौ दधो धारणार्थत्वस्यान्यस्य दानार्थत्वस्य च व्यवस्थितत्वात् (दधते। दधेते। दधन्ते। दधसे। दधावहे। दधामहे। देधे। देधाते। देधिरे। देधिषे। देधे। देधिवहे) *अत एकहल्मध्येनादेशादेर्लिटि*। किति लिटि परत्रावस्थिते यस्यादिरादेशो नास्ति तस्यासहाययोर्हलोर्मध्यगतस्याकारस्यैकारो ऽभ्यासस्य लोप इत्येत्वाभ्यासलोपौ। अयं शिदिति सर्वादेशः। नन्वभ्यासादेर्दकारस्य जश्त्वेन प्रकृतिजशां प्रकृतिजश इति दत्वे कथमनादेशादित्वम्। न च पूर्वत्रासिद्धत्वम्। "तॄफलभजत्रपश्च" इति फलभजिग्रहणात्। असिद्धत्वे ह्यनादेशादित्वेनैवैत्वाभ्यासलोपयोः सिद्धत्वान्न तत्कुर्यात्। एवं तर्हि *न शसददवादिगुणानाम्* इति शसददयोरेत्वाभ्यासलोपनिषेधाद्रूपाभेदे आदेशादित्वं नाश्रयिष्यते। तथा च वार्तिकम्। [प्रथमतृतीयादीनामादेशादित्वादेशादित्वादेत्वाभाव इति चेच्छसिददिप्रतिषेधो ज्ञापको रूपाभेदे एत्वविज्ञानस्येति] (दधिता। दधितासे। दधिताहे। दधिष्यते। दधिष्यमाणः। दधताम्। दधस्व। दधै। अदधत। अदधेताम्। अदधन्त। अदधथाः। अदधे। अदधावहि। दधेत। दधेयाताम्। दधेथाः। दधेय। आशिषि। दधिषीष्ट। अदधिष्ट। अदधिषाताम्। अदधिष्ठाः। अदधिषि। अदधिष्यत) इत्यादि। कर्मकर्त्रोर्यक्चिण्विषये (दध्यताम्। अदध्यत। दध्येत। अदाधीत्यादि) अन्यत्र कर्तृवत् (दिदधिषते। दिदधिषां चक्रे। दिदधिषिता। दिदधिषिष्यते। दिदधिषताम्। अदिदधिषत। दिदधिषेत) आशिषि (दिदधिषिषीष्ट। अदिदधिषिष्ट। अदिदधिषिष्यत) इत्यादि। कर्मणि यक्चिण्विषये दिदधिष्यतइत्यादि) अन्यत्र कर्तृवत्। कर्मकर्त्तरि तु यक्चिणोर्निषेधात्सर्वत्र कर्तृवत्। अतो लोप आर्द्धधातुके (दादध्यते। दादधां चक्रे। दादधिता। दादधिष्यते। दादध्यताम्। अदादध्यत। दादध्येत। आशिषि। दादधिषीष्ट। अदादधिष्ट। अदादधिष्यत) "दीर्घोकितः" इत्यभ्यासदीर्घः। सर्वत्रार्धधातुके "यस्य हलः" "अतो लोपः" इति यलोपाल्लोपौ। कर्मकर्त्रोर्यङन्तेऽपि विशेषो नेति गाधतावेवोपपादितम्। (दादद्धि। दादद्धः। दाधत्सि। दादध्मि) "दधस्तथोश्च" इत्यत्र कृतद्विर्वचनस्य दधातेर्ग्रहणात् तकारथकारादौ चकारात् सकारादौ ध्वे पदान्ते बशो विधीयमानो भषभावोऽस्य न भवति "एकाचः" इति सादौ ध्वे पदान्ते च विधीयमानः सामान्य एव भवति (दादधां चकार। दादधिता। दादधिष्यति। दादद्धु। दादद्धात्। दादद्धि। दादधानि। अदाधत्। अदाधद्। अदादद्धाम्। अदादधुः। अदाधाः। अदाधत्। अदाधद्। अदादद्ध। अदादधम्) अत्र "हल्ङ्याब्भ्य" इति तिप्सिपोर्लोपे पदान्तत्वात् "एकाच" इति भषभावे जश्त्वे वा चर्त्वम्। सिपि तु "दश्च"

इति वा रुत्वं च । जशादौ "झलां जश् झशि" इति धकारस्य दकारः (दादध्यात् । दादध्याताम् । आशिषि दादध्यात्, दादध्यास्तामित्यादि । अदादधीत् । अदादाधीत्) *अतो हलादेर्लघोः* इति हलादेर्हलन्तस्य लघोरतः स्थाने वा वृद्धिरिडादौ परस्मैपदपरे सिचि एवं (अदादादधिष्टाम् । अदादाधिष्टामित्यादि । अदादधिष्यदित्यादि) सर्वत्र यङ्लुकः परस्य हलादेः पितः सार्वधातुकस्य पक्ष ईडुदाहार्यः । कर्मणि यङन्तवदिति बाधतावुपपादितम् । दाधायतीत्यादि बाधयतिवत् । णौ चङि तु "णौ चङ्यु" इति ह्रस्वत्वे सन्वदित्वदीर्घत्वे विशेषः । अदीदधदित्यादि (दधनः ।) 'अनुदात्तेतश्च" इति युच् ॥ ८ ॥

स्कुदि आप्रवणे ॥ आप्रवणमुत्प्लवनमुत्प्लुत्य गमनं वेति तरङ्गिणी । उद्धरणमिति भोजः । अत्र सकर्मकः । "इदितो नुम् धातोः" इत्यन्तेदित्त्वान्नुमागम उपदेशिवद्वचनादुपदेशावस्थायाम् (स्कुन्दते । स्कुन्दसे । स्कुन्दे । चुस्कुन्दिषे । चुस्कुन्दिवहे "शर्पूर्वाः" इति खयः शेषः । *कुहोश्चुः* । अभ्यासकवर्गहकारयोश्चवर्ग इत्यान्तर्यात् ककारस्य चकारः (स्कुन्दिता । स्कुन्दिष्यते । स्कुन्दताम् । अस्कुन्दत । स्कुन्देत । आशिषि । स्कुन्दिषीष्ट । अस्कुन्दिष्ट । अस्कुन्दिष्यत) भावादिषु यक्चिणौ । (स्कुन्द्यते । स्कुन्द्यताम् । अस्कुन्द्यत । स्कुन्द्येत । अस्कुन्दीत्यादि । चुस्कुन्दिषते । चुस्कुन्दिषाञ्चक्रे । चुस्कुन्दिषिता । चुस्कुन्दिषिष्यते । चुस्कुन्दिषताम् । अचुस्कुन्दिषत । चुस्कुन्दिषेत । आशिषि । चस्कुन्दिषिषीष्ट । अचुस्कुन्दिषिष्ट । अचुस्कुन्दिषिष्यत । चोस्कुन्द्यते । चोस्कुन्दाञ्चक्रे । चोस्कुन्दिता । चोस्कुन्दिष्यते । चोस्कुन्द्यताम् । अचोस्कुन्द्यत । चोस्कुन्द्येत । चोस्कुन्दिषीष्ट । अचोस्कुन्दिष्ट । अचोस्कुन्दिष्यत) भावादौ न विशेष इति गाधतौ प्रतिपादितम् । (चोस्कुन्दीति । चोस्कुन्ति । चोस्कुन्दाञ्चकारेत्यादि) लङि तिप्सिपोर्हल्ङ्यादिसंयोगान्तलोपयोः अचोस्कुन् ।) भावादौ यङन्तवदित्युक्तम् (स्कुन्दयति । स्कुन्दयतइत्यादि । स्कुन्दनः । युच् स्कुन्दा) उपदेशावस्थायां नुमो विधानाद् धातोर्गुरुत्वाद् "गुरोश्च हलः" इति स्त्रियामकारो लघूपधगुणाभावश्च ॥ ९ ॥

श्विदि श्वैत्ये ॥ अकर्मकः । श्वेतस्य गुणस्यापि धातुना साध्यतया क्रमिकतया वाभिधानात् क्रियात्वम् । यदाह ।

श्वेतते: श्वेत इत्येतत् श्वेतत्वेन प्रकाश्यते ।
आश्रितक्रमरूपत्वादभिधानं प्रवर्त्तते ॥

इति । पूर्ववन्नुमागमः (श्विन्दते) इत्यादि स्कुन्दिवत् ॥ १० ॥

वदि अभिवादनस्तुत्योः ॥ प्रणतिपूर्वमाशिषो वाचनमभिवादनं, तथा च प्रयोगः । अभिवदति नाभिवादयतेप्याचार्यं श्वशुरं राजानमिति । (वन्दते । ववन्दे । वन्दितेत्यादि) पूर्ववन्नुमि कृते ऽकारस्याभ्यासहायहल्मध्यगतत्वाभावान्नैत्वाभ्यासलोपौ । "न शसददवादिगुणानां" इतिनिषेधाद्वा । गुण इति तद्भावितोकार उच्यते (वन्दारुः) "शॄवन्द्योरारुः" इति तच्छीलादिकर्तृष्वारुप्रत्ययः (वन्दना) "घट्टि वन्दिविदिभ्यश्च" इति स्त्रियां युच् । वन्दा वृक्षरुहा । बाहुलकात् स्त्रियां संज्ञायामुकारः । वन्दा वृक्षादनी 'वृक्षरुहाजीवन्तिकेत्यपि' इत्यमरः । (वन्दीति ।) स्तोतर्यावश्यकणिन्यन्तः । 'हठहूतमहिलायां त्विन्' इति सर्वधातुविषयेन्नन्तात् (सर्वतोऽक्तिन्नर्थादित्येके इति ङीषि । अयं बशादिरपभ्रंशः । यदाह राजानकः संदिग्धस्योदाहरणे ।

आलिङ्गितस्तत्रभवान्संपराये जयश्रिया ।
आशीः परंपरां वन्द्यां कर्णे कृत्वा कृपां कुरु ॥

अत्र वन्द्यामिति किं हठहूतमहिलायामुत नमस्यामिति सन्देह इति (वन्द्रः) पूजकः । "स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनी पदिमदिमुदिखिदिच्छिदिभिदिमन्दिवन्दिचन्दिदहिदसिदम्भिवसिवाशिशीङ्हसिसिधिशुभिभ्यो रक्" इति

रक् प्रत्ययः ॥ ११ ॥

भदि कल्याणे सुखे च ॥ कल्याणं मङ्गलं सुखमात्मगुणः । (भन्दते । बभन्दे । भन्दितेत्यादि स्कुन्दिवत् । देवदत्ताय भद्रं भूयाद्देवदत्तस्येति वा) । "ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रमद्रभेरभेलशुक्रशुक्लवत्रेरामाला" इति रक्यनुनासिकलोपे भद्रशब्दो निपातितः । तद्युक्तात् *चतुर्थि चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः* इत्याशिषि गम्यमानायां चतुर्थीषष्ठ्यौ । अत्रायुष्यादयोऽर्थपराः । (भद्राकरोति मुण्डयतीत्यर्थः ।) [भद्राच्चेति वक्तव्यम्] इति परिवापणे मुण्डने कृञो योगे डाच् प्रत्ययः । अस्य "ऊर्यादिच्विडाचश्च" इति गतित्वात्पूर्वं प्रयोगः । अत एव निपातत्वेनाव्ययत्वात्सोर्लुक् ॥ १२ ॥

मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु ॥ कान्तिगतिष्वित्येके । मोदो हर्षः । मदो गर्वः । स्वप्न आलस्यम् । चन्द्रस्तु मदि जय इत्यपि पपाठ । स्तुतिगतिभ्यामन्यत्राकर्मकः (मन्दते । ममन्दे । मन्दितेत्यादि पूर्ववत् । मन्दुरा) "मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरच् (मन्दिरम्) "इषिमदिमुदि-खिदिच्छिदिभिदिमन्दिचन्दितिमिमुहिमिहिमुचिरुचिरुधिशुषिबन्धिभ्यः किरच्" इति किरच् । (मन्द्रम्) "स्फायितञ्चीति" आदिना रक् (मन्दारः) "अगिमदिमन्दिभ्य आरन्" इत्यारन् । मन्दरः । बाहुलकादरः । यद्वा मन्दं रातीति मन्दरः । अयं मदी हर्षे दिवादौ । मद हर्षग्लेपनयोर्घटादौ । मद तृप्तियोग इति चुरादौ ॥१३॥

स्पदि किञ्चिच्चलने ॥ चलनं कम्पनम् । अकर्मकः (स्पन्दते । पस्पन्दे । स्पन्दितेत्यादि पूर्ववत् । स्पन्दयति) "निगरणचलनार्थेभ्यश्च" इति ण्यन्तात्परस्मैपदमेव । निगरणमभ्यवहारः ॥ १४ ॥

क्लिदि परिदेवने ॥ परिदेवनं शोचनम् । सकर्मकः (क्लिन्दते देवदत्तम् । चिक्लिन्दे । क्लिन्दितेत्यादि पूर्ववत् । क्लेदा) 'क्लेदौषधिशशाङ्कयोः' इति यादवप्रकाशः । "श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्द्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मघवन्" इति कनिनि गुणनुमभावयोर्निपातितः । "सर्वनामस्थाने चासंबुद्धौ" इति नान्तत्त्वादुपधाया दीर्घः । संबुद्धौ हल्ङ्यादिलोपे प्रत्ययलक्षणेन सुबन्तत्वात्पदत्वाच्चलोपः "प्रातिपदिकात्" इति प्राप्तो नलोपो "न ङिसंबुद्ध्योः" इति निषिध्यते, भसंज्ञायामलोपे (क्लेद्) इत्यादि, सप्तम्येकवचने "विभाषा ङिश्योः" इत्यल्लोपस्य विकल्पनात् (क्लेद्नि क्लेदनि इत्यपि भवति । हलादौ पदत्वान्नलोपेक्लेदभ्यामित्यादि । नलोपस्य पूर्वत्रासिद्धत्वात् "सुपि च" "अतो भिस ऐस्" "बहुवचने झल्येत्" इत्येते विधयो न भवन्ति । स्कुन्द्यादय एतदन्ताः सप्त इदितः । अयं परस्मैपदादिष्वपि पठिष्यते । ऊदिदार्द्रीभावे दिवादौ ॥ १५ ॥

मुद हर्षे (मोदते । मोदते । मोदे । लघूपधत्वाद्गुणः । मुमुदे । मुमुदाते । मुमुदिषे । मुमुदिवहे "असंयोगाल्लिट्कित्" इति कित्त्वान्न गुणः (मोदिता । मोदिष्यते । मोदताम् । अमोदत । मोदेत । आशिषि । मोदिषीष्ट । अमोदिष्ट । अमोदिष्यत) इत्यादि । भावे (मुद्यते । अमुद्यत । मुद्येत । अमोदि । शेषं कर्तृवत् । मुमुदिषते, मुमोदिषते) "रलो व्युपधाद्धलादेः संश्च" रलन्ताद्धलादेरुकारेकारोपधात् परौ सेटौ क्त्वासनौ वा कितौ भवत इति कित्त्वपक्षे न गुणः । (मुमुदिषां चक्रे इत्युदाहार्यम् । मोमुद्यते । मोमुदां चक्रे । मोमुदितेत्यादि) अजार्धधातुके यलोपाल्लोपयोर्लघूपधगुणो न भवति । "न धातुलोप आर्धधातुके" इति धात्वेकदेशलोपनिमित्तार्धधातुकनिमित्तयोर्गुणवृद्ध्योर्निषेधाद् "अचः परस्मिन् पूर्वविधौ" इत्यल्लोपस्य स्थानिवत्त्वादूठा (मोमोत्ति । मोमुत्तः । मोमुदति । मोमोत्सि । मोमुदीषि । मोमोद्मि । मोमुदीमि । मोमुद्वः) यङ्लुकोऽनैमित्तिकत्वात् "नधातुलोप" इति निषेधो न भवति । ईडि तु "नाभ्यास्तस्याचि पिति सार्वधातुके" इति निषेधः । (मोमोदां चकार । मोमोदिता । मोमोदिष्यति । मोमोत्तु । मोमुत्तात् । मोमुदीतु । मोमुद्धि) । हेरपित्त्वान्न गुणः । (मोमुदानि । मोमुदाव) आद्यजादिपित्सार्वधातुकत्वात् "नाभ्यस्त" इति गुण-

निषेधः । लङीडभावपक्षे तिप्सिपोर्हल्ङ्यादिलोपे "वावसाने" इति पक्षे चर्त्वम् । सिपि तु "दश्च" इति वा रुत्वमपि । (अमोमोत् । अमोमोद् । आमोमुत्ताम् । अमोमोत् । अमोमोद् । अमोमोः । अमोमुदम्) । ईटि अमोमुदीत् । अमोमुदीः । मोमुद्यात्) । आशिषि । (मोमुद्यास्ताम्) यासुटो ङित्त्वकित्त्वाभ्यान्न गुणः । (अमोमोदीत्) सिज्लोपस्यासिद्धत्वाद्वा प्रत्ययलक्षणेन वा गुणः । (अमोमोदिष्टाम्) । हलन्तलक्षणा वृद्धिः "नेटि" इति निषिध्यते । (अमोमोदिष्यदित्यादि । मोदयति । मोदयां चकार इत्यादि पूर्ववत् । लुङि (अमूमुदत् । "दीर्घो लघोः" इति दीर्घः (मुदित्वा मोदित्वा) उक्तः कित्त्वविकल्पः । (मुदितमनेन । मोदितमनेन) । "निष्ठा" इति भूते यः क्तः स "तयोरेव कृत्य" इत्युक्तनियमादकर्मकादस्माद् भावे, (प्रमुदितमनेन । प्रमोदितमनेन प्रमुदितः प्रमोदितः) अत्रादिक्रियालक्षणस्य भूतत्वाश्रये "निष्ठा" इति क्तः । स च "आदिकर्मणि क्तः कर्त्तरि च" इति भावकर्त्रोर्द्वयोरपि भवति (प्रमुदितवान् । प्रमोदितवान्) "उदुपधाद्भावादिकर्मणोरन्यतरस्याम्" इति सेटो निष्ठायाः पक्षे कित्त्वनिषेधाद् गुणः । भावादिकर्मभ्यामन्यत्र (मुदिते देवदत्तः मुदितवानित्येव ।) ध्रौव्यार्थत्वात्कर्त्तरि क्तः । मुदितवानित्यत्र *अत्वसन्तस्य चाधतोः* इत्यात्वं तस्याधातोरसन्तस्य चोपधायाः सम्बुद्धिवर्जिते सौ विहिताद्दीर्घादनन्तरं क्तवतोरुदित्त्वेन नुमि हल्ङ्यादिसंयोगान्तलोपौ । पूर्वं नुमि न दीर्घस्य प्रसङ्गः उपधाभावात् । न च संयोगान्तलोपादनन्तरमुपधात्वे भूतपूर्वगत्याऽत्वन्ताश्रयस्य दीर्घस्य प्रसङ्गः । नापि नान्तत्वेन "सर्वनामस्थाने" इति दीर्घस्य । यतस्तयोः संयोगान्तलोपोऽसिद्ध (मोदनः) युच् । (मुत् ।)

[संपदादिभ्यः क्विप्] इति स्त्रियां क्विप् । (मुदिरः) 'इषिमदि' त्यादिना किरच् (मुद्गः) "मुदिग्रोर्गग्गाक्" इति गक् । कित्त्वान्न गुणः । मुद्गेन संसृष्टं मौद्गम् । *मुद्गादण्* इति तृतीयान्तादस्मात्संसृष्टेऽण् प्रत्ययः । मुद्रा । "स्फायितञ्चि" इत्यादिना रक् । संसर्गार्थोयं चुरादौ ॥ १६ ॥

दद दाने ॥ किं चिद्दुद्दिश्यापुनर्ग्रहणाय स्वीयत्यागो दानम् । (ददते । ददसे । ददे । ददे । ददाते । ददिषे । ददे) "न शसदद" इत्येत्वाभ्यासलोपनिषेधः (ददिता । ददिष्यते । ददताम् । अददत । ददेत । आशिषि । ददिषीष्ट । अददिष्ट । अददिष्यत । कर्मादौ दद्यते । दद्यताम् । अदद्यत । अद्येत । अदादि) शेषं कर्तृवत् । (दिददिषते । दादद्यते । दाददीति । दादत्ति । दादयते) शेषं मुदिवन्नेयम् ॥ १७ ॥

ष्वद स्वर्द आस्वादने ॥ संवरण इति क्षीरस्वामी । आस्वादनमनुभवः । अत्रायं सकर्मकः स्वदन्ति देवा उपा निहव्येति दर्शनात् । छान्दसं परस्मैपदम् । तथा स्वादन इति ण्यन्तेनार्थनिर्देशाच्च सकर्मकोऽयम् । यद्वक्ष्यति चुरादावास्वादने सकर्मक इति । अस्यार्थस्तत्र प्रपञ्चयिष्यते । यदायमनेकार्थो धावत इति रुचौ वर्त्तते तदाऽकर्मकः । आद्यः षोपदेशः।तदुक्तं भाष्ये । 'अज्दन्त्यपराः सादयः षोपदेशाः स्मिङ्स्विदिस्वदिस्वञ्जिस्वपयश्च'इति । प्रायेणायमाङ्पूर्वः। (आस्वदते रसम् । सस्वदिता)इत्यादि ददिवत् । रुच्यर्थत्वे खल्वपि । (दधि स्वदते देवदत्ताय।) *रुच्यर्थानां प्रीयमाणः* इति तर्प्यमाणस्यैषां प्रयोगे संप्रदानत्वाद्देवत्ताच्चतुर्थी । अन्यकर्तृकोऽभिलाषो रुचिरिति वृत्तिः । अत्र हरदत्तः । योभिलाषास्याश्रयः प्रीयमाणः ततोऽन्यकर्तृक इत्यर्थः । कथं पुनरन्याश्रयस्याभिलाषस्यान्यः कर्ता भवति, यावता यदाश्रयव्यापारं धातुः प्राधान्येनाचष्टे स कर्त्ता । नेदं कर्तृलक्षणं किं तर्हि स्वातन्त्र्यमेव, तच्च क्वचिद्‌द्वास्तवं क्व चिद्‌वैवक्षिकम् । तत्र माधुर्यातिशयेन ह्यविषयं देवदत्ताश्रयमभिलाषं जनयद् दधि तत्र कर्त्तेति गीयत इति । अत्र *सात्पदाद्योः* इति सातिप्रत्ययपदाद्योः सकारस्य षत्वनिषेधादिणः परत्वेपि न षत्वम् । कर्मादौ स्वद्यत इत्यादि, सिस्वदिषते । *स्तौतिण्योरेव षण्यभ्यात्* इति षत्वं, कृतषत्वे सति यदि भवति स्तौतिण्यन्तानामेवेति सूत्रार्थः (सास्वद्यते । सास्वदीति । सास्वत्ति । स्वादयति । स्वादयते । असिष्वदत) शेषं पूर्ववत । ण्यन्तात्सनि 'स्तौतिण्यो-

रेव' इति नियमात् षत्वे प्राप्ते तदपवादः "सः स्विदिस्वदिसहीनां च" इति सकारो विधीयत इति (सिस्वादयिषतीति भवति) ये त्वमुं दन्त्यादिं पठन्ति, तेषामिदं सत्ववचनं कथमर्थवदिति न एव प्रष्टव्याः (स्वदते । सस्वदे) इत्यादि स्वदिवत् । अर्जदन्त्येति षोपदेशलक्षणं केवलदन्त्यविषयमिति दन्त्योष्ठ्यपरोयं न षोपदेशः । अत एव दन्त्योष्ठ्यपराः ष्विद्यादयः स्वदीत्यादिना पुनः पठान्ते । (स्वादुः ।) "कृवापाजिस्वदिसाध्यशूभ्य उण्" इत्युण्प्रत्ययः । स्वाद आस्वादन इत्यत्रैवाग्रे ॥ १९ ॥

उर्द माने क्रीडायां च ॥ क्रीडायामकर्मकः । चकारादास्वादने । इह मानं सुखमिति संमतायाम् (ऊर्दते । ऊर्दाचक्रे । ऊर्दिता । ऊर्दिष्यते । ऊर्दताम् और्दत । ऊर्दत । आशिषि । ऊर्दिषीष्ट । और्दिष्ट । और्दिष्यत) । "उपधायां च" इति धातोरुपधाभूतरेफात् पूर्वस्वादिको दीर्घः सर्वत्र । यथायोगं भावकर्मकर्मकर्तृपूर्वत इत्यादि । (ऊर्दिदिषते ।) *न न्द्राः संयोगादयः* इति द्वितीयस्यैकाचो नदराणां संयोगादीनां द्विर्वचननिषेधाद्दकारादिर्द्विरुच्यते । (ऊर्दयति । और्दिदत्) ॥ २० ॥

कुर्द खुर्द गुर्द गुद क्रीडायामेव ॥ अत्र कैयटपुरुषकारमैत्रेयादिषु तृतीयो न पठ्यते । संमतामोघाविस्तारचान्द्रेषु तु त्रयोपि पठान्ते । गुदक्रीडा गुदविहार इति चरके । मैत्रेयकाश्यपौ गुद इत्यपि पृथक् धातुरिति । अत्रैवकारो धातूनामनेकार्थत्वे ज्ञापक इत्युक्तम् । स्फूर्जदीर्घोपदेशात् "उपधायां च" इति दीर्घ एषां न इति चन्द्रः । मैत्रेयसंमतामोघाविस्तारकारादयस्तु दीर्घत्वमिच्छन्ति । (कूर्दते । चुकूर्दे । कूर्दिता । कूर्दिष्यते । कूर्दताम् । अकूर्दत । कूर्दत । आशिषि । कूर्दिषीष्ट । अकूर्दिष्ट) । भावे । (कूर्द्यते) इत्यादि । (चुकूर्दिषते । चोकूर्द्यते । चोकूर्त्ति । चोकूर्दीति । चोकूर्त्तः । चोकूर्दां चकार । चोकूर्दितेत्यादि) । लङि तिप्सिपोर्हल्ङ्यादिलोपे "वाऽसाने" इति चर्त्वविकल्पः । (अचोकूर्दीत् । अचोकूर्त् । अचोकूर्द्) । सिपि तु "दश्च" इति वा रुत्वमपि । (अचोकूः) चान्द्रेपि मते "रो रि" लोपे "ढ्रलोपे" इति दीर्घस्य विद्यमानत्वादत्रन विशेषः । (कूर्दयति । अचुकूर्दत्) । एवमितरयोरप्युदाहार्यम् । गुदेः । (गोदते । जुगुदे । गोदितेत्यादि । जुगुदिषते । जुगोदिषते । गुदित्वा, गोदित्व) इत्यादि सुदिवज्ञेयम् । (गुदम्) । इगुपधलक्षणः कः । गोद इति पचाद्यजिति मैत्रेयः ॥ २४ ॥

षूद क्षरणे ॥ क्षरणं निःसारणम् । अत्रायमकर्मकः, हिंसायामपि वर्त्तते, (मधुसूदनः इति । अत्रायं सकर्मकः । ण्यन्तोयं संस्कारेपि वर्त्तते । 'अग्निर्हव्यं शमिता सूदयाति' इति । हव्यं हवनार्हपशोर्हृदयादि शमिता शमित्रोग्निः सूदयति संस्करोतीति । क्षरणस्वादुकरणनार्थत्वमहे रात्राणि मरुतो विलिष्टं सूदन्त्वित्यत्राह भट्टभास्करः । तथा हि अहोरात्राणि मरुतश्च तद्विलिष्टं विनाशितं विष्टपं वा सूदयन्तु क्षारयन्तु यद्विलिष्टं स्वादु कुर्वन्तु वा । यद्वा यद्विलिष्टं यागायोग्यं यद्विरूपं विशसितं तद्विनाशयन्त्विति । क्षरे तु तत्र विलिष्टं न्यूनं पूरयन्त्विति पूरणार्थत्वं दृश्यते । (सूदते । सुषूदे । सूदिता) इत्यादि । भावादौ (सूद्यते) इत्यादि । (सुसूदिषते) । "स्तौतिण्योरेव इति" नियमान्न षत्वम् । (सोसूद्यते । सोसूत्ति। सूदयति।सूदयते । असूषुदत्)। "णौ चङि" इति ह्रस्वत्वम् (सूदिता) "सूददीपदीक्षश्च" इत्यनुदात्तेल्लक्षणस्य युचो निषेधात् "तृन्" इति सामान्यस्ताच्छीलिकस्तृन् । (मधुसूदनः) । "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" इति ल्युः । क्षरति क्षारयति रसानिति च, सूदः पक्तः पाचकश्च । "इगुपधज्ञाप्रीकिरः कः" इति इगुपधत्वात् कर्त्तरि कः । अयं चुरादावपि ॥ २९ ॥

ह्राद अव्यक्ते शब्दे ॥ अव्यक्तशब्दो वाद्यादिघोषः । (ह्रादते । जह्रादे) । "कुहोश्चुः" इत्यभ्यासहकारस्यान्तरतम्यात् झकारश्चुत्वं, तस्य "अभ्यासे चर्च" इति जश्त्वं जकारः । (ह्रादितेत्यादि) । भावे (ह्राद्यत इत्यादि । अह्रादि । जिह्रादिषते । जाह्राद्यते । जाह्रादीति । जाह्रात्तीत्यादि, ह्रादयति । ह्रादयते । अजिह्रदत्) "अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम्" इति स्मरत्यादीनां चङ्परे णौ लघुनि धात्वक्षरे पर इत्वापवादात्त्वविधानाज् ज्ञापकादित्व-

विधौ येन नाव्यवधानं तेन व्यवहितेपि भवतीति त्वियमनाश्रयणादभ्यासस्येत्वम् । दीर्घस्तु न भवति संयोगपरत्वेनालघुत्वात् । ह्रदः । पचाद्यचि पृषोदरादित्वात् ह्रस्वः । महिह्रिदो नाम वाहीकग्रामविशेषः, तत्र भवादिर्महिह्रिदीयः "कन्थापलदनगरग्रामह्रदोत्तरपदात्" इति शेषेर्थे "छो वाहिकग्रामेभ्यश्च" इति प्राप्तयोः ठञ्ञिठयोरपवादः, *आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम्* इति प्रत्ययादीनां फादीनां यथासंख्यमायन्नादिविधानात् छस्येयादेशः । छ-विधौ निपातनाद्वा ह्रस्वः ॥ २६ ॥

ह्लादी सुखे च ॥ चकारादव्यक्तशब्दे च । ह्लादत इत्यादि ह्रादिवत् । विशेषस्त्वीदित्वात् "श्वीदितो निष्ठायाम्" इतीडभावो "ह्लादो निष्ठायाम्" इत्युपधाह्रस्वश्च । तथा *रदाभ्यां निष्ठातो नः पूर्वस्य च दः* इति निष्ठातकारस्य पूर्वकारस्य च नकारः, आह्लन्नः । आ-ह्लन्नवान् ॥ २७ ॥

स्वाद आस्वदने ॥ स्वादत इत्यादि स्वदिवत् । अषोपदेशत्वादसिस्वदद् इत्यादौ न षत्वम् । स्वदिना समानार्थोप्ययमाकारोपधसाम्यादिह पठितः । अज्दन्त्येति षोपदेशलक्षणे दन्त्यग्रहणेन केवलो दन्त्यो गृह्यते न तु दन्त्योष्ठ्योपीत्ययमषोपदेशः स्वर्दिवत् ॥ २८ ॥

पर्द कुत्सिते शब्दे ॥ रेफवद्दान्तः । संयोगान्तेषूर्दादिष्वयं न पठितः । शब्दविशेषार्थेन ह्रादादिनापि साम्यात् । स्वादिस्त्वाकारवत्संयोगादित्वेन ह्राद्यनुरोधेन मध्ये पठितः । इह कुत्सितः शब्दो गुदरवः । तदाह केशवस्वामी कौक्षे कर्दति पर्दते गुदरव इति । (पर्दते । पपर्दे । पर्दिता । पर्दिष्यते । पर्दताम् । अपर्दत । पर्देत । पर्दिषीष्ट । अपर्दिष्ट । भावे पर्द्यत-इत्यादि । पिपर्दिषते । पापर्द्यते । पापर्द्यते । पापर्दीति । पापर्त्तीत्यादि) । लङि तिप्सिपो-र्हल्ङ्यादिलोपे वा चर्त्वम् । सिपि तु पक्षे "दश्च" इति रुत्वं चोदाहार्यम् । (पृदाकुः ।) "प-र्देर्नित संप्रसारणमल्लोपश्च" इति काकुप्रत्ययो लोपः प्रसारणं च ॥ २९ ॥

यती प्रयत्ने ॥ (यतते । येते । येतिषे) । एत्वाभ्यासलोपौ । (यतिता । यतिष्यते । यतताम् । अयतत । यतेत । आशिषि यतीषीष्ट । अयतिष्ट । अयतिष्यत) । भावे । (यत्य-ते) इत्यादि । (यियतिषते । यायत्यते । यायतीति । यायत्तीत्यादि) । लङि तिप्सि-पोर्हल्ङ्यादिलोपे जश्त्वे वा चर्त्वम् । सिपि तु "दश्च"इति वा रुत्वमपि । (यातयति । अयीयतत् । यत्यम् । [तकिशसियतिजनीनामुपसंख्यानम्] इति भावे यत् । (आयत्तः । आयत्तवान् ,) ईदित्वात् "श्वीदितो निष्ठायाम्" इतीडभावः । यत्नः । "यजयाचयतविच्छ-प्रच्छरक्षो नङ्" इति भावादौ नङ् । (यतिः) "इन् सर्वधातुभ्यः" इतीन् । यत् निकारोप-स्कारयोरिति चुरादौ ॥ ३० ॥

युतृ जुतृ भासने ॥ (योतते । युयुते । योतितेत्यादि) । भावे (युत्यते) इत्यादि । (युयुतिषते । युयोतिषते । "रलो व्युपधात्" इति वा कित्त्वम् । (योयुयते । योयुतीति । योयोत्तीत्यादि) । ईट्पक्षे "नाभ्यस्यस्य" इति गुणनिषेधः । (योतयति । अयुयोतत्) । ऋदित्वात् "नाग्लोपि" इत्यपधाह्रस्वनिषेधः । (युतित्वा । योतित्वा) । सन्वत्कित्त्ववि-कल्पः । "उदुपधाद्भावादिकर्मणोरन्यतरस्याम्" इति निष्ठायां मुदिवत् कित्त्वविकल्प उदा-हार्यः । (युतितमनेन योतितमनेनेत्यादि । जोतत इत्यादि) युतिवत् ॥ ३२ ॥

विथृ वेथृ याचने ॥ द्वितीयान्तौ । आद्यो धान्त इति कौशिकः । क्षीरस्वामिना त्वयं पक्षो दूषितः । (वेथते । विविथे) । "असंयोगाल्लिट् कित्" इति कित्त्वान्न गुणः । वेथिता । वेथिष्यते । वेथताम् । अवेथत । वेथेत । आशिषि । वेथिषीष्ट । अवेथिष्ट । अवेथिष्यत । विविथिषते । विवेथिषते । वेवेथ्यते । वेविथीति) । "नाभ्यस्तस्य" इति गुणनिषेधः । (वेवेत्ति । वेथयति । अविवेथत्) । ऋदित्त्वात् "नाग्लोपि" इत्युपधाह्रस्वनिषेधः । द्विती-यस्य विशेषो (विवेथे, वेथ्यते । विवेथिषते । वेवेथ्यते । वेवेथीति । वेवेत्ते) इत्यादावगुण-विषय एकारश्रवणम् । अस्य ऋदित्करणमुपधाह्रस्वनिवृत्त्यर्थम् । इमौ द्विकर्मकौ । दुह्यादि-

त्वादप्रधाने कर्मणि लादयः। षष्ठी तु द्वितीयावदुभयत्र। गुणकर्मणि तु विकल्पेन, अप्रधाने कृत्येनाभिहिते कर्तृकर्मणोर्नैव षष्ठी। सर्वमेतन्नाथतावुपपादितं तत एवावगन्तव्यम्॥ ३४॥

श्रथि शैथिल्ये॥ शैथिल्यं विश्लिष्टता गाधतां च। इदित्त्वं नुमर्थम्। अत एव किति नलोपाभावः। (श्रन्थते। शश्रन्थे। श्रन्थिष्यते। श्रन्थिता। अश्रन्थत। श्रन्थेत्। आशिषि। श्रन्थिषीष्ट। अश्रन्थिष्ट। अश्रन्थिष्यत)। भावे। (श्रन्थ्यते) इत्यादि। (शिश्रन्थिषते। शाश्रन्थ्यते। शाश्रन्थीति। शाश्रन्थि)। "खरि च" इति चर्त्वं लङि तिप्सिपोर्हल्ङ्यादिलोपे संयोगान्तलोपे च (अशाश्रन् श्रन्थयति। श्रन्थयते। अशश्रन्थत्। श्रन्था)। "गुरोश्च हलः" इत्यकारः, "ण्यासश्रन्थो युच्" इत्यत्र लाक्षणिकत्वान्नास्य ग्रहः। (प्रश्रथः। हिमश्रथः)। "अवोदैधोद्मप्रश्रथहिमश्रथाः" इति घञि नलोपवृद्ध्यभावयोर्निपातनम्। गणान्तरपठितस्य वा निपातनम्। श्रन्थ विमोचनप्रतिहर्षयोरिति क्र्यादिः श्रन्थ ग्रन्थ सन्दर्भे इति च, इमावाधृषीयावपि, श्रथ प्रयत्न इति चुरादिः। दौर्बल्ये कथादिराधृषीयो मोक्षणे॥३५॥

ग्रथि कौटिल्ये॥ कौटिल्यं शाठ्यं वक्रता वा। (ग्रन्थते) इत्यादि श्रन्थिवत्। अभ्यासकार्यविशेषः। के चिदिमावनिदितौ सानुषङ्गौ पठन्तः, किति नलोपमिच्छन्ति। अत्र तरङ्गिणी इदित्त्वादनुनासिकलोपाभावात् श्रेथे ग्रेथे इत्युदाहरन् वृत्तिकारो भ्रान्त इति, अत्र वृत्तिकार इति धातुवृत्तिकृदुच्यते। तथा सानुषङ्गपाठः कशिकावृत्तिकारस्याऽप्यनभिमतः। यतः। [श्रन्थिग्रन्थिदम्भिस्वञ्जीनाम्] इति लिटः कित्त्वविधौ श्रथतुर्ग्रथतुरिति परस्मैपदिनावेवोदाजहार। ग्रन्थ संदर्भे इति क्र्यादौ युजादौ च। ग्रन्थ बन्धन इति च युजादौ॥३६॥

कत्थ श्लाघायाम् कत्थते। चकत्थे। कत्थितेत्यादि। कर्मणि (कत्थ्यत इत्यादि, चिकत्थिषते चाकत्थ्यते। चाकत्थीतीत्यादि पूर्ववत्। विकत्थी।) *वौ कषलसकत्थस्रम्भः* इति वावुपपदे तच्छीलादिषु घिनुण्। वासरूपेण युच् , (विकत्थनः)॥ ३७॥ एधादय उदात्ता अनुदात्तेतः॥

अथ तवर्गीयान्ताः परस्मैपदिनः॥

अत सातत्यगमने॥ सातत्यगमनं सन्ततगमतम्। ग्राममतति। ग्रामादायाति। अतसि। अतामि। अतन्ति। *गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि* इति कर्मणि द्वितीयाचतुर्थ्यौ। चेष्टायामिति वचनान्मनसातति ग्राममित्यत्र द्वितीयैव। अध्वन्यर्थग्रहणान्मार्गमततीत्यादावपि द्वितीयैव (आत। आततुः। आतिथ। आतिव) "अत आदेः" इत्यभ्यासादेर्दीर्घो लिटि। (अतिता। अतिष्यति। अततु। आतत्। आटि वृद्धिः। अतेत्। आशिषि। अत्यात्। मा भवानतीन्) "वदव्रजहलन्तस्य" इति वृद्धेः "नेटि" इति निषेधः (आतिष्यत्। कर्मणि अत्यते। आते। अतिता। अतिष्यते। अत्यताम्। आत्यत। अत्येत। आशिषि। अतिषीष्ट। आतिष्ट। आतिषाताम्। आतिषत्) गत्यर्थानां कर्तृस्थक्रियत्वान्न कर्मकर्त्तास्ति। कर्मव्यतिहारे तङस्य नास्ति, "न गतिहिंसार्थेभ्यः" इति निषेधात् (व्यत्यततीत्यादि। अतितिषति आतयति देवदत्तं ग्रामम्) "गतिबुद्धि" इति प्रयोज्यस्य कर्मत्वम् (अतितो ग्रामम्। अतितो ग्रामः। अतितं देवदत्तेन, इदमेषामततम्) "गत्यर्थाकर्मक" इति "क्तोधिकरणे च" इति योगद्वयेन कर्तृकर्मभावाधिकरणेषु क्तः। (अक्तआसक्तः)। "इणभीकापाशल्यतिमर्चिभ्यः कन्"इति कन्। आतिः गन्तापक्षिविशेषश्च। "अज्यतिभ्यां च" इतीण्प्रत्ययः। पादाभ्यामततीति पदातिः। * पादस्य पदाज्यातिगोपहतेषु*इत्याज्यादिषूत्तरपदेषु पदादेशः। शोभनमततीति (स्वातिः नक्षत्रं, स्वाती।) "सर्वतोक्तिन्नर्थात्" इति वा ङीष्। स्वात्यां जातो माणवकः स्वातिः। अत्र "संधिवेलाद्यृतुनक्षत्रेभ्योण्" इति शैषिकोण्। यदा जातार्थे तदा तस्य "श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक्" इति लुकि "लुक्तद्धितलुकि" इति स्त्रीप्रत्ययस्य लुक्। स्वातीति ङीषन्तस्य ग्रहणाद्ङीषन्तादणो लुङ्नास्ति, तेन *न य्वाभ्यां पादान्ताभ्यां पूर्वौ

तु ताभ्यामैच्* इति यथासंख्यादिह वकारात्पूर्वमौकारे वृद्धिनिषेधे च सौवात इति भवति। वृद्धिनिषेधस्य प्रयोजनमन्यत्र, अस्तु चेहापि "टिड्ढाणञ्" इत्यादिना स्त्रियां ङीपि "यस्येति च" इत्यकारलोपे सौवाती भार्या यस्येति बहुव्रीहौ "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु" इति प्राप्तस्य पुंवद्भावस्य *वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे* इति रक्तविकारादतिरिक्तार्थस्य च वृद्धिनिमित्ततद्धितान्तस्य पुंवद्भावो नेति विधीयमानो निषेध इहालो वृद्धिनिमित्तत्वाभानान्नेति पुंवद्भावे सौवातभार्य्य इति भवति। *स्त्रियाः पुंवत् *इति सूत्रस्यार्थः। स्त्र्यर्थस्य शब्दस्य स्त्रियां वर्त्तमाने समानाधिकरणे पूरणीप्रियादिवर्जित उत्तरपदे पुंस इव रूपं भवति स चेत् स्त्रीशब्दो भाषितपुंस्कादनूङ् भवतीति। पूरणीति पूरणप्रत्ययान्तः स्त्रीलिङ्गपञ्चम्यादिशब्द उच्यते। भाषितः पुमान् यस्मिन्नर्थे प्रवृत्तिनिमित्ते स भाषितपुंस्कः, इह तु शब्दस्तद्योगात्तथोक्तः, ऊङो ऽभावो ऽनूङ् भाषितपुंस्कात्परोऽनूङ् निपातनात्पञ्चम्यलुक्। अतिथिः, "ऋतन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्गिकुयुकृशिभ्यः कत्निच्यतुजलिजिष्ठूजिष्टजिसनुस्यनिथिनुल्यसासानुक्" इत्यर्त्तादिभ्यो द्वादशभ्यः कत्न्यादयो द्वादश प्रत्यया यथा संख्यमित्यतेरिथिन्। अतिथौ साधुरातिथेयः। "पथ्यतिथिवसतिस्वपतेर्ढञ्" इति सप्तम्यन्तात्साधित्वर्थे ढञ्। ढस्य "आयनेयीनीय"इत्येयादेशः। अतिथय इदमातिथ्यम्। *अतिथेर्ञ्यः* इति चतुर्थ्यन्तात्तादर्थ्ये ञ्यः। अतसः क्षौमं प्रहरणं वायुश्च। "अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच्" इत्यसच्। अतसी उमा, "षिद्गौरादिभ्यश्च" इति स्त्रियां ङीष्। सातयतीति सातयः। "अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च" इति कर्त्तरि शे शपि गुणायौ, सातिः सौत्रो धातुरिति वृत्तौ। बौधिन्यासेपि सातिः सुखे वर्त्तते सौखे इति जिनेन्द्रहरदत्तौ सातिर्हेतुमण्ण्यन्त इति। इदिद्बन्धनार्थ उत्तरत्र भविष्यति ॥ ३८ ॥

चिती संज्ञाने ॥ संज्ञानं चैतन्यम् (चेतति। चिचेत। चिचिततुः। चिचेतिथ। चिचिते। चिचेत। चिचितिव। चिचितिम। चेतिता। चेतिष्यति। चेततु। अचेतत्। चेतेत्। आशिषि चित्यात्। अचेतीत्। अचेतिष्यत्) भावे (चित्यतइत्यादि, चिचितिषति। चिचेतिषति। चितित्वा। चेतित्वा) "रलो व्युपधात्" इति किस्त्वविकल्पः (चेचित्यते। चेचितीति) 'नाभ्यस्तस्य" इति गुणनिषेधः (चेचेत्ति। चेतयति देवदत्तम्। अचीचितत्) "अणावकर्मकात्" इति परस्मैपक्षमेव। "गतिबुद्धि" इति प्रयोज्यं कर्म। (चित्तः। चित्तवान्) 'श्वीदित" इति (चितः) इगुपधलक्षणः कः। (चेतनः) बाहुलकात्कर्त्तरि ल्युट्त्वम् ल्युः (चित् चैतन्यम्) संपदादित्वाद्भावे क्विप् (चेतः) '·असुन्" इत्यसुन्। (सुचेतीकरोति) "अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च" इति "कृभ्वस्तियोगे च्विः सलोपश्च"। "अस्य च्वौ" इतीकारो ऽकारस्य। अत्र मैत्रेयः "कणः करच" इति चितेः कणप्रत्यये धातोरन्त्यस्य ककारे चिक्कण इति। बहुलवचनाद्गुणाभावः प्रत्ययकस्येत्संज्ञाऽभावश्चेति। हरदत्तास्तु चिनोतेः क्विप् चित्, कणतेरच् कणः, तकारस्य ककारश्चिक्कणादिपाठात्। के चित्तु चिक्णादिषु तकारमेव पठन्ति। न्यासकारो ऽप्येवं निरुवाह। स्मरणार्थे ऽप्ययम्। चेतन्ती सुमतीनामिति दर्शनात्। "अधीगर्थदयेशां कर्मणि" इति कर्मणः शेषत्वे षष्ठी। अधीगर्थाः स्मरणार्थाः। तथा संधानार्थो ऽपि। यदाह श्रीरामस्वामी। प्रायो विनाशः चित्तं सन्धानं विनष्टस्य संधानं प्रायश्चित्तमिति। "प्रायस्य चित्तिचित्तयोः" इति पारस्करादिपाठात् सुट्। चिति स्मृत्यामिति चुरादौ। चित संचेतन इति तत्रैवात्मनेपदी ॥ ३९ ॥

च्युतिर् आसेचने ॥ "उपदेशेऽजनुनासिक इत्" "हलन्त्यम्" इतीकाररेफयोरित्वे। सेचनमार्द्रीभावनम्। यदाह हरदत्तः, सिचिः कर्मस्थक्रियः, आर्द्रीभावनं ह्यत्र प्रधानं तदर्थत्वात्कारकव्यापारस्येति। आङीषदर्थे ऽभिव्याप्तौ वा (च्योतति। चुच्योत। चुच्योतिथ। चुच्युतिव। च्योतिता। च्योतिष्यति। अच्योतत्। च्योतेत् आशिषि। च्युत्यात्) लुङि "इरितो वा"

इति च्लेः परस्मैपदे च्वङादेशविधानान् ङित्त्वन्न गुणः (अच्युतत्। अच्युततामित्यादि ।) अङभावे अच्योतीदित्यादि, कर्मादौ च्युत्यत इत्यादि। चुच्युतिषति। चुच्योतिषति । च्योतित्वा। च्युतित्वा) पूर्ववत् कित्त्वविकल्पः (चोच्युत्यते। चोच्युतीति। चोच्योत्ति) इटि "नाभ्यस्तस्य" इतिगुणनिषेधः (च्योतयति । अचुच्युतत्) निष्ठायाम् "उदुपधाद्भावादिकर्मणो" इति कित्त्वविकल्प उदाहार्यः। (च्युतितमनेन । च्योतितमनेनेत्यादि) कर्माविवक्षायां कर्मकर्त्तरि भावसम्भवः ॥ ४० ॥

श्च्युतिर् क्षरणे ॥ क्षरणं स्रुतिः (श्च्योयति । चुश्च्योतेत्यादि) च्युतिवत् । अभ्यासे खयः शेषः । सकारादिरयं, निर्देशः श्चुत्वेन । सकारादित्वे प्रयोजनं मधु श्च्योततीति (मधुश्च्युत्) क्विप् अस्मात् "तत्करोति तदाचष्टे" इति णिचि [णाविष्ठवत्प्रातिपदिकस्य] इष्ठनीव कार्यविधानाट्टिलोपे मधुश्च्यायतेः क्विप् । तस्य लोपे प्रत्ययलक्षणेन "णेरनिटि" इति णेश्च लोपे यकारान्ताद् अस्मात् कृदन्तात् प्रातिपदिकात्सौ तस्य हल्ङ्यादिलोपे प्रत्ययलक्षणेन सुबन्तत्वेन पदत्वे "संयोगान्तस्य" इति यलोपे श्चुत्वस्य पूर्वत्रासिद्धात्वात् "स्कोः" इति सलोपे "चोः कुः" इति चकारस्य पदान्तस्य कुत्वे तस्य जश्त्वे मधुगिति रूपसिद्धिरिति वृत्तिन्यासपदमञ्जरीसंमताकारमैत्रेयादिभिरुक्तत्। यद्येवमटतीत्यट्, अट् श्च्योततोत्यत्रापि श्चुत्वस्यासिद्धत्वात्सकारपरत्वात् "ङः सि धुट्" इति धुट् प्राप्नोति, नैतत् । [श्चुत्वं धुट्त्वे सिद्धं वक्तव्यम्] इत्युक्तत्वात् । अत एव वृत्तिकारादिविरोधात् तालव्योष्मादिवादिनौ स्वामिकाश्यपावुपेक्ष्यौ । यद्यपि तयोरट् श्श्चोतीतित्यत्र धुडभावः सिद्धः, मधुगित्यत्र "सयोगान्तस्य" इति यकारवकारयोर्लोपे *व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः* इति व्रश्चादीनां छकारशकारान्तानां च झलि पदान्तेच षत्वविधानाच् शकारस्य षकारे "झलां जश्" इति जश्त्वे मधुडिति स्यात्। अत्र श्चुतिरित्ययकारमपि पठन्ति । तथा च मधुश्चुतं घृतमिव सुपूतं श्चोतन्ति ते इत्यादौ भट्टभास्करः। अत्र मैत्रेयोपि। श्चुतिरित्यप्येके पठन्ति, चुतिर् हसन इति च ॥ ४१ ॥

मन्थ विलोडने ॥ विलोडनं क्षोभणम् (मन्थति । ममन्थ । ममन्थिथ । मन्थिता । मन्थिष्यति । मन्थतु । अमन्थत्। मन्थेत्। आशिषि । मथ्यात्) यासुटः कित्वान्नलोपः "अनिदितां हल उपधायाः क्ङिति" इति (अमन्थीत्। अमन्थिष्यत्।) कर्मादौ (मथ्यत (इत्यादि। मिमन्थिषति । मामथ्यते । मामन्थीति । मामन्थि) लङस्तिप्सिपोर्हल्ङ्यादिलोपे संयोगान्तलोपे (अमामन् मन्थयति । अममन्थत्। मथित्वा । मन्थित्वा) नोपधात्परस्य *नोपधात्थफान्ताद्वा* इति थकारफकारान्तात्सेटः क्त्वः कित्वविकल्पनात् पक्षे नलोपः (मन्थः) "हलश्च" इति करणे घञ्। (मन्थती) "करणाधिकरणयोश्च" इति अधिकरणे ल्युडन्तात् "टिड्ढाणञ्" इति ङीप् (मन्थानः) "सम्यानच् स्तुव" इत्यानज्बाहुलकादस्मादपि । अत्रायं धातुर्यद्यपि क्षीरस्वाम्यादिभिर्न पठ्यते तथापि मैत्रेयचन्द्रदुर्गैः पठितत्वात् शमीगर्भादग्निं मन्थति ततो यथा प्राशु मन्थति यदि मथ्यमानो न जायेतेत्यादिदर्शनादस्त्वेव । अयं द्विकर्मकः । दुहादित्वादप्रधाने कर्मणि लादयः । अमृतमम्बुनिधिर्मथ्यत इति । द्वितीयावत् क्रयोगलक्षणा षष्ठ्युभयत्र, कर्मणि गुणे तूभयथा गोणिकापुत्र इति वचनात् द्वितीयापि । अमृतस्याम्बुनिधेर्मन्थिता । अम्बुनिधिमिति च । अमृतं मन्थितव्योऽम्बुधिर्देवैरित्यत्र "कृत्यानाम्" इति योगविभागेन कर्तृकर्मणोः षष्ठी निषिध्यते । नाथतौ सर्वमेतद् उपपादितम् । अयं क्र्यादावपि। इह चाग्रे निरनुषङ्ग एदित् ॥ ४२ ॥

कुथि पुथि लुथि मथि हिंसासंक्लेशनयोः। (कुन्थति । चुकुन्थेत्यादि) मन्थिवत् । विशेषस्त्विदित्वात् क्ङिति नलोपाभावः (कुन्थ्यत इत्यादि) तथा हिंसार्थत्वात् "नगतिहिंस" इति कर्मव्यतिहारे हिंसायां तङ्निषेधश्च । एवं पुन्थतिलुन्थमन्थतयो ऽपि । मन्थतिस्तु सर्वत्र मन्थतिवत् । अत्र च क्षीरस्वामी मन्थं सानुषङ्गमनिदितं पठित्वा मथ्यतइति चोदात्यहू

मथीति दौर्गा मन्यन्त इत्याह । संमतायां तु द्वावपि पठ्येते । खड्गोपकुन्थं शत्रुं मारयति । खड्गोपकुन्थमिति वा। *हिंसार्थानां च समानकर्मकाणाम्* इति अनुप्रयोगधातुना समानकर्मकाणां हिंसार्थानां तृतीयान्त उपपदे वा णमुलिति णमुल् । "तृतीयाप्रभृतीनि" इति समासविकल्पः । सर्वस्मिन्नेवात्र णमुलप्रकरणे क्रियाभेदे सति वासरूपेण क्त्वापीति वृत्तावुक्तम्। तेन खड्गेनोपकुन्थ्येति "समानकर्तृकयोः पूर्वकाले" इति क्त्वापि भवति । एवं खड्गोपकुन्थमित्यप्युदाहार्यम्। कुन्थ संश्लेषण इति क्र्यादौ। कुथ पूतीभावे । पुथ हिंसायामिति दिवादौ। पुथ भाषार्थश्चुरादौ ॥ ४६ ॥

षिध गत्याम् ॥ के चिदुदितं पठन्ति । यदाह काश्यपः, उकार "उदितो वा" इति विशेषणार्थ इति, तरङ्गिणी चायमुदिदिति, तद्वृत्तिविरोधादुपेक्ष्यं, यदाह ततः परं सिध्यतिरेव नेतर इत्यनिट्कारिकायां सिध्यतिबुध्यत्योः श्यना निर्देशादन्यविकरणयोर्बुधिसिध्योरिड् भवत्येव । बोधिता । सेधिता । निष्ठायामपि प्रतिषेधाभावाद् बुधितं सिधितमित्येव भवतीति । उदित्त्वे हि "उदितो वा" इति क्त्वायां विकल्पस्योक्तत्वाद् *यस्य विभाषा* यस्य धातोः क चिद्विभाषेडुक्तस्तस्य निष्ठायामिण नेति प्रतिषेधेन भाव्यमिति कथमेवं ब्रूयात्। तत्र न्यासपदमञ्जर्योरपि सिधेरुदित्त्वमनार्षमित्युक्तम् । अत एव क्षीरस्वामी सिद्धमित्युदाहृत्य निरनुबन्धपाठे तु सिधित इत्यपरितुष्यन्नुदाजहार । अथोदाहरणानि "धात्वादेः षः सः" ॥ (सेधति । सिषेध । सिषेधिथ । सिषिधिव) "आदेशप्रत्यययोः" इति षत्वं, (सेधिता । सेधिष्यति । सेधतु । असेधत्। सेधेत्। आशिषि । सिध्यात् । असेधीत् । असेधिष्यत्। कर्मणि सिध्यत इत्यादि) गत्यर्थत्वेन कर्तृस्थक्रियत्वाद् न कर्मकर्तास्ति (सिसेधिषति । सिसिधिषति । सिधित्वा । सेधित्वा) "रलो व्युपधात्" इति कित्त्वविकल्पः । "स्तौतिण्योरेव षणी" इति नियमान्न षत्वम् (सेषिध्यते) कुटिलं गच्छतीत्यर्थः । "नित्यं कौटिल्ये गतौ" इति यङ् । नित्यग्रहणं क्रियासमभिहारे यङो निवृत्तय इति वृत्तौ प्रतिपादितम् (सेषिधीति । सेषेद्धि) "झषस्तथोः" इति धत्वे जश्त्वम् । (सेधयति । असीषिधत्) "दीर्घो लघोः" इति दीर्घः, "सिध्यतेरपारलौकिके" इति णावात्वं श्यना निर्देशादस्य न भवति । (प्रतिषेधति) । *उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्* इति उपसर्गस्थान्निमित्तात्परस्य सुनोत्यादिसकारस्य षत्वविधानात् "सात्पदाद्योः" इति निषेधं बाधित्वा सिधिसकारस्य षत्वं, सेधतीति शपा निर्देशो यङ्लुङ्निवृत्त्यर्थश्चेति हरदत्तः, तेन प्रतिसेषिधीतीत्यत्र अभ्यासे न षत्वं, परस्य "आदेशप्रत्यययोः" इति षत्वं अस्त्विह शपा निर्देशोयं सिध्यतेरेव निवृत्त्यर्थो न यङ्लुकः, तेनेह षत्वं भवत्येव, एवं हि "सेधतेर्गतौ" इति निषेधे शपा निर्देशो ऽर्थवान् अन्यथा यङ्लुकि षत्वस्यैवाप्रसङ्गात् किमनेनेति, प्रत्यषेधदित्यादौ उपसर्गस्थान्निमित्तात्परत्वाभावेऽपि *प्राक् सिताद्ड्व्यवाये ऽपि* इति षत्वम्। प्राक् सितादिति उपसर्गस्थात्सुनोतीत्यादयः परिनिविभ्यः सेवत्यन्ता उच्यन्ते । प्रतिषिषिधिषतीत्यत्र "स्तौतिण्योरेव" इति नियमं बाधित्वा "स्थादिष्वभ्यासेन चाभ्यासस्य" इति अभ्यासात्परस्य षत्वं, प्रकृतेतु "उपसर्गात्" इति । इदं षत्वमषोपदेशार्थमवर्णान्ताभ्यासार्थं "स्तौतिण्योरेव" इति नियमबाधनार्थं चेत्युक्तम् । सूत्रार्थस्तु स्थादिषु प्राक्सितीयेषु उपसर्गादिति अभ्यासेन व्यवहितस्य च भवति । अत्राभ्यासस्योपसर्गादित्येव सिद्धे ऽभ्यासग्रहणं योगभेदेन प्राक्सितीयेषु स्थादिष्वेवाभ्यासस्य षत्वं न त्वन्यत्रेति निषेधप्रतिपादनार्थम्, इदं च "उपसर्गाद्" इति षत्वं "सेधतेर्गतौ" निषेधात् (प्रतिसेधति गा) इत्यादौ गत्यर्थत्वे न भवति। (सुषेधः, दुःषेधः, निःषेधः) । "सुषामादिषु च" इति षत्वम् । नन्वत्राद्य उपसर्गस्थान्निमित्तात्परत्वादेव सिद्धम्, इतरयोरपि "नुम्विसर्जनीयशर्व्यवायेपि" इति किमेषां गणे पाठेन । अत्र वृत्तिः। सुशब्दस्य कर्मप्रवचनीयत्वान्निर्दुश्शब्दयोः क्रियान्तरविषयत्वादनुपसर्गत्वे सति पाठोयं, "सेधतेर्गतौ" इति प्रतिषेधबाधनार्थं

चेति । सिध्रः साधुपर्यायः सिध्यतेर्वायम् । "स्फायितञ्चि" इत्यादिना रक् । सिध्रको वृक्ष-विशेषः । संज्ञायां कन् । सिध्रकप्रचुरो वनविशेषः, सिध्रकावणम् । *वनगिर्योः संज्ञायां कोटर-किंशुलुकादीनाम्* इति कोटरादित्वाद्वन उत्तरपदे दीर्घः । *वनं पुरगामिश्रकासिध्रकासारिका-कोटराग्रेभ्यः* इति वननकारस्य णत्वम् , वनमिति षष्ठ्यर्थे प्रथमा । इदं णत्वं संज्ञायामप्रा-प्तत्वे ऽसंज्ञायामपीति स्थितम् । सिध्यं, बाहुलकान्मन् । (सिध्मलः) "सिध्मादिभ्यश्च" इतिप्रथमान्तादस्त्युपाधिकादस्त्यर्थे लच् ॥ ४७ ॥

षिधू शास्त्रे माङ्गल्ये च ॥ शास्त्रं शासनमिति मैत्रेयशाकटायनौ, शिष्टावित्येव चन्द्रः । शास्त्रं शास्त्रविषयं शासनम् । माङ्गल्यं मङ्गलक्रियेति क्षीरस्वामी । एवं तरङ्गिण्यामपि (से-धतीत्यादि) पूर्ववत । विशेषस्तूदित्त्वाद्वलादावार्धधातुके "स्वरतिसूतिसूयतिधूञूदितो वा" इति इटो विकल्पनात् (सेद्धा । सेत्स्यति असैत्सीद्) इति, लुङि "वदव्रज" इति वृद्धिः । तथा ऽऽशीर्लिङ्लुङोरात्मनेपदेषु । *लिङ्सिचावात्मनेपदेषु* । इक्समीपाद्धलः परौ झलादी लिङ्सिचावात्मनेपदेषु किताविति कित्त्वादगुणः, (व्यतिषित्सीष्ट । व्यत्यषिद्ध्वम् । व्य-त्यषित्साताभित्यादि) भवति । क्त्वासनोश्चेडभावे (सिद्धा सिषित्सति) । *हलन्ताच्च* इति इक्समीपाद्धलः परस्य झलादेः सनः कित्त्वान्न गुणः निष्ठायां "यस्य विभाषा" इति इण्निषेधात्सिद्धमिति भवति । अत्र मैत्रेयसंमताकारौ *कृसभृवृस्तुद्रुस्रुश्रुवो लिटि* । क्रादय एव लिट्यनिटस्ततोन्ये लिटि सेडित्यनेन नियमेन पुरस्तात्प्रतिषेधकाण्डस्यारम्भात् तस्य तदाश्रयस्य नियमस्य च बलीयस्त्वमिति यावान्कश्चिदिडभावः प्रतिषेधनिबन्धनो वा विकल्प-निबन्धनो वा स सर्वो बाध्यत इत्युदिल्लक्षणं विकल्पं बाधित्वा लिटि क्रादिनियमान्नित्यमि-डिति (सिषेधिथ) इत्याहतुः । तथा "अचस्तास्वत्" इत्यत्र वृत्तिकारो नित्यग्रहणं किं विधोता, तासौ विभाषितेटस्थलि नित्यमिडागमो भवतीति । अत्र न्यासे "स्वर" सूत्रेण धूञ इड्-विकल्पः, तस्य नित्यग्रहणाद्विभाषितेटस्थलि नित्यमिडागमो भवतीति । हरदत्तस्तु नित्य-मिडागमो भवतीति वृत्तिमुपादाय यावान् कश्चिदिडभावः प्रतिषेधनिबन्धनो विकल्पनिब-न्धनो वा स सर्वः क्रादिसूत्रेण नियम्यत इत्यस्मिन्पक्ष इति भावः । यदा तु प्रतिषेधाधिकारेण क्रादीनामेव लिटीण् न भवतीति नियमात् प्रतिषेध एव सर्वो निवर्त्त्यते, "स्वरति" इत्यादि सूत्रेण विकल्पो भवत्येवेति पक्षस्तदा विदुधोथ, विदुधविथेत्युभयं भवतीति । अस्यायमभि-प्रायः । अत्र वृङ्व्यतिरिक्तानां क्रादीनाम् *एकाच उपदेशेनुदात्तात्* एकाज् यो धातुरुप-देशे ऽनुदात्तस्तस्मात्परस्य वलादेरार्धधातुकस्येण्नेति प्रकृत्याश्रयः प्रतिषेधः सिद्धः, वृङ्वृञो-स्तूगन्तत्वात् "श्र्युकः किति" इति प्रत्ययाश्रय इति सिद्धे सत्यारभ्यमाणेनानेन नियमेन तुल्यजातीयानां क्रादिव्यतिरिक्तानां येषां प्रकृत्याश्रयः प्रत्ययाश्रयो वा निषेधः प्राप्तस्तेषामे-वेट् प्राप्यत इति पुरस्तात्प्रतिषेधकाण्डारम्भस्य प्रयोजनं स्मृत्वा स्मृत इत्यादौ परमपि स्व-रत्यादिविकल्पं बाधित्वा "श्र्युकः कित्" इति निषेधप्रवृत्तिरिति च तेनोक्तम् । हरदत्तानुवा-दी रामदेव(१)मिश्रोपि क्रादिसूत्रे ऽनुदात्तोपदेशानामत्र प्रकृत्याश्रयः प्रतिषेधः वृङ्वृञोस्तु प्र-त्ययाश्रयस्तदुभयस्याप्ययं नियम इति वृत्तिग्रन्थोप्यत्रैवानुकूलः । अत्र मते (सिषेधिथ सि-षेद्ध सिषिधिव सिषिध्वेत्यादि) भवति । एतदनन्तरं मृ मरण इत्याभरणे पठ्यते, तद्भाष्य-विरोधादुपेक्ष्यम् । यद्ययं स्यात्कथं "व्यत्ययो बहुलम्" इत्यत्र स च न मरति, न म्रियत इति प्राप्त इति ब्रूयात् । अयमनूदित्संराध्यर्थे दिवादौ ॥ ४८ ॥

खादृ भक्षणे ॥ (खादति । चखाद । चखादिथ । खादिता । खादिष्यति । खादतु । अ-खादत् । खादेत् । आशिषि खाद्यात् । अखादीत् । कर्मादौ खाद्यत इत्यादि । चिखादिषति । चाखाद्यते । चाखादीति, । चाखात्ति खादयति मोदकं देवदत्तेन,) "गतिबुद्धि" इत्यादिना

(१) वेदेति पाठः कुत्रचित् ।

प्राप्तं प्रयोज्यस्य कर्मत्वम् [आदिखाद्योः प्रतिषेधः] इति निषिध्यते । "निगरणचलन" इति नित्यं परस्मैपदम् । ऋदित्त्वादचखादादित्यत्र उपधाह्रस्वो न भवति (खादितो मोदकः, खादितमनेन, इदमेषां खादितं,) "क्तोधिकरणे च" इत्यादिना कर्मभावाधिकरणेषु क्तः । खादकः, । *निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूञो वुञ्* इति ताच्छीलिको वुञ् । ण्वुलैव सिद्धे वुञ्विधानं ज्ञापकार्थं तच्छीलादिषु वासरूपविधिना तृजादयो न भवन्तीति वृत्तौ ॥ ४९ ॥

खद स्थैर्ये हिंसायां च ॥ चकाराद्भक्षणे च । स्थैर्ये ऽकर्मकः । (खदति । चखादेत्यादि) खादिवत् । लुङि (अखादीत् । अखदीत्) "अतो हलादेर्लघोः" इति वृद्धिविकल्पः (खादयति । अचीखदत्) स्थैर्ये कर्मबलात् प्रयोज्यं कर्म, खदिरः । "अजिरशिशिरश(१)बिरशिथिलस्थिरस्फिरस्थविरखदिराः" इति किरजन्तो निपातितः । यवखदा, यवस्य सारः । स्वभावात्स्त्रीविषयोयं, यवखदी । "व्रीह्यादिभ्यश्च" इति मत्वर्थे इनिः ॥ ५० ॥

बद स्थैर्ये ॥ ओष्ठ्यादिः (बदति । बबादेत्यादि) खदिवत् । किति लिटि थलि च सेटि रूपाभेदे आदेशादित्वानाश्रयणादेत्वाभ्यासलोपयोः (बेदतु, बेदुः, बेदिथेत्यादि) (बदरं) बाहुलकादरन्प्रत्ययः (बदरी) "षिद्गौरादिभ्यश्च" इति ङीष् । अत्र पाठादेवारन् प्रत्ययः । अत्र मैत्रेयः सानुषङ्गं पठित्वा नलोपे कृते एत्वाभ्यासलोपयोर्बेदतुरित्याह, तदसत् । संयोगान्तत्वेन मन्थ्यादिवद्बिदिः कित्त्वाभावात् । बिदि अवयवे इत्यग्रे ॥ ५१ ॥

गद व्यक्तायां वाचि ॥ (गदति । जगाद । गदितेत्यादि) खदिवत् । वचनं शब्दप्रकाशनफलत्वात्कर्मस्थमिति न्यासपदमञ्जरीकैयटेषु (प्रणिगदति) *नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च* इति उपसर्गस्थान्निमित्तात्परस्य नेर्गदादिषु णत्वमिति णत्वम् । अड्व्यावाये ऽपि इदमिष्यत इति प्रण्यगददित्यादावपि भवति । (गादयति पुत्रं श्लोकं देवदत्तः ।) "गतिबुद्धि" इत्यादिना प्रयोज्यस्य कर्मत्वम् । अत्र शब्दकर्मेति कर्मशब्देन साधनमुच्यते न क्रिया । यदि हि स्याद्गतिबुद्धिप्रत्यवसानशब्दार्थाकर्मकेति लघ्वसंदिग्धं च ब्रूयात् । एवं न्यासकैयटपदमञ्जर्यादिष्वपि स्थितमिति न शिष्येण धर्मं गादयतीत्यत्र प्रयोज्यस्य कर्मत्वम् । अत्रानित्याकर्मकगत्यर्थाभ्यवहारार्थशब्दकर्मदृशो ऽखाददिक्रन्दिशब्दायह्वेञ इति शाकटायनसूत्रव्याख्यायाममोघायां नित्याकर्मकेभ्यो गत्यर्थेभ्योभ्यवहारार्थेभ्यः शब्दनक्रियेभ्यः शब्दकर्मकेभ्यश्च दृशेश्च यो णिस्तस्य कर्ता कर्म भवति खादादिक्रन्दिशब्दायह्वेञ इत्येतान् वर्जयित्वेत्युक्तम् । तन्मते क्रन्दित्रयव्यतिरिक्तेषु शब्दार्थेषु प्रयोज्यस्य कर्मत्वेन भाव्यम्, सूत्रे शब्दकर्मकेति कर्मग्रहणात् क्रन्द्यादिपर्युदासाच्च । तेनार्थद्वयस्य लाभः । (गद्यम्) । "गदमदचरयमश्चानुपसर्गे" इति कर्मणि यत् । उपसृष्टात्तु ण्यत् । (प्रगाद्यमिति । निगदः ।) "नौ गदनदपठस्वनः" इति पक्षे ऽप् । अन्यदा घञि (निगादः अनुगदतीत्यानुगादिकः ।) "अनुगादिनष्ठक्" इति स्वार्थे ठक् । अस्मादेव निपातनाण्णिनिः । न त्वयं केवलं प्रयोगार्हः, ठको नित्यत्वादिति न्यासपदमञ्जर्यादिषु । कर्मव्यतिहारे नास्य तङस्ति । [प्रतिषेधे हसादीनामुपसंख्यानम्] इति निषेधात् । हसादयो हसिप्रकारास्ते च शब्दनक्रियाः । स्तनगदी देवशब्द इति चुरादौ ॥ ५२ ॥

रद विलेखने ॥ विलेखनं भेदनम् (रदति । रराद । रेदतुः । रेदिथेत्यादि, पूर्ववत् । रदनः) "करणाधिकरणयोश्च" इति ल्युट् ॥ ५३ ॥

णद शब्दे ॥ "णो नः" । धात्वादेरिति शेषः (प्रणदति । प्रणनाद । प्रणेदतुः, प्रणेदिथेत्यादि गदिवत्) *उपसर्गादसमासे ऽपि णोपदेशस्य* इति उपसर्गस्थान्निमित्तात्परत्वेन नकारस्य णत्वम् । प्रणिनदतीत्यादौ "नेर्गद" इति णत्वम् । इदमप्यड्व्यवायेपीति प्रण्यनद-

---

(१) बाहुलकाच्छीङो बुग् ह्रस्वत्वं चेति दीक्षताः ।

दित्यादावपि भवति । धातुनकारस्य निशब्देन व्यवधानादुपसर्गादिति णत्वं न भवति । अ-शब्दकारकत्वे ऽपि "अणावकर्मक"इति प्रयोज्यस्य कर्मत्वं घटं नादयतीति । (नदी) । पचादौ नदडिति पाठात् टित्वात् ङीप् (नद्यां भवा नादेयाः) ;"नद्यादिभ्यो ढक्" इति शैषिको ढक्, तस्यैयादेशः । पञ्चानां नदीनां समाहारः (पञ्चनदम्)। "नदीभिश्च" इति नदीवचनैः सह संख्याया अव्ययीभावः । अभिधानस्वभावादयं समासः समाहार इत्युक्तम् । अजिति योग-विभागादच् समासान्तः । उक्तं च ।

> कृष्णोदक्पाण्डुपूर्वाया भूमेरच् प्रत्ययः स्मृतः ।
> गोदावर्याश्च नद्याश्च संख्याया उत्तरे यदि ॥

इति (निनदः) "नौ गदनद" इति पक्षे अप् । तदभावे घञ् । निनादः । इदित्समृ-ध्द्यर्थो ऽग्रे, णदं भाषार्थश्चुरादौ ॥ ६४ ॥

अर्द गतौ याचने च ॥ याचने द्विकर्मकः । नायत्यादिवल्लादयो नेयाः (अर्दति । आ-नर्द । आनर्दतुः । आनर्दिथ । आनर्दिव) "अत आदेः" इत्यभ्यासादेर्दीर्घे "तस्मान्नुड् द्वि-हलः" इति दीर्घभूतादभ्यासात्परस्य नुडागमः (अर्दिता । अर्दिष्यति । अर्दतु । आर्दत् । अर्देत् । आशिषि । अर्द्यात् । माभवानर्दीत्) "नेटि" इति सिचि वृद्धेर्निषेधः (कर्मार्द्रौ अ-र्द्यते इत्यादि) गत्यर्थत्वे कर्तृस्थक्रियात्वान्न कर्मकर्त्तास्ति । "क्तोधिकरणे च" इत्यादिना क-र्तृकर्मभावाधिरणेषु क्त उदाहार्यः । तथा "गत्यर्थकर्म" इति द्वितीयाचतुर्थ्यौ । कर्मव्यति-हारे "न गतिहिंसा" इति तङ्निषेधः, णौ "गतिबुद्ध" इति प्रयोज्यस्य कर्मत्वं च (अ-र्दिदिषति) "न न्द्राः" इति निषेधान्नदरवर्जितस्य द्वितीयस्यैकाचो द्विर्वचनम् (समर्णः । न्यर्णः । व्यर्णः । अभ्यर्णः) "अर्देः संनिविभ्यः" । "अभेश्चाविदूर्ये" इति समादिपूर्वप दादर्देः परस्य निष्ठाया इण्णिषेधे "रदाभ्याम्" इति तकारदकारयोर्नत्वं पूर्वस्य "रषाभ्या-म्" इति णत्वे परस्य ष्टुत्वे णकारः । "अभेश्चाविदूर्ये" इति निषेधादन्यत्र (अभ्यर्दितो वृषलः शीतेनेति भवति) आविदूर्यं प्रत्यासत्तिः । अस्मादेव निपातनाद् "न नञ्पूर्वात्" इति निषेधं बाधित्वा भावे ष्यञ् । हिंसार्थो ऽयं चुरादौ ॥ ६६ ॥

नर्द गर्द शब्दे ॥ दन्त्यादिः, नृतिनन्दिनर्दीति पर्युदासात् (नर्दति । ननर्देत्यादि । यङ्-लुकि पर्दत्यादिवत् । गृहेनर्दी) "पात्रे समितादयश्च" इति, पक्षे तत्पुरुषस्तत्रैव पाठात्सप्त-म्या अलुक् । एवं गर्दतीत्यादि । (गर्दभः) "शृकरिकलिगर्दिभ्यो ऽभच्"इत्यभच् ॥ ६७ ॥

तर्द हिंसायाम् ॥ सकर्मकः । तर्दतीत्यादि, पूर्ववत् । "न गतिहिंसा" इति तङ्निषेधात् कर्मव्यतिहारेपि परस्मैपदम् । दण्डोपतर्दं गाः कालयति । दण्डेनोपतर्दमिति च, "हिंसा र्थानाम्" इति णमुल् । "तृतीयाप्रभृति" इति समासविकल्पः । वासरूपेण क्त्वायां द-ण्डनोपतर्द्यम् ॥ ६८ ॥

कर्द कुत्सिते शब्दे ॥ कुत्सितशब्द इह कौक्षः । यदाह केशवस्वामी कौक्षि कर्दति पर्दते गुदरव इति (कर्दतीत्यादि नर्दतिवत् । कर्दमः) बाहुलकादमच् ॥ ६९ ॥

खर्द दन्दशूके ॥ दन्दशूकइति दन्दशूककर्तृका क्रिया ऽभिधीयते । साधनप्रधानप्रयोगि-त्वस्थापनार्थं दन्दशूकग्रहणमिति संमतातरङ्गिण्यौ । दन्दशूको गर्हितो दशनशीलः, इह तु तत्स्था क्रिया, दंश इत्यनुक्तिस्ताच्छील्यादिप्रतिपत्त्यर्थेति मैत्रेये प्रतिपादितम् । दन्तशूक इति केशवस्वामी दकारस्य स्थाने तकारमाह, तन्महान्तो न सहन्ते । यदाह दन्दशूको बिलेशय इति, अत्र सुभूतिचन्द्राः दंशेर्यङन्तादूकप्रत्यये ऽल्लोपयलोपयोरिति । तथा इषुमति रघुसिंहे दन्दशूकान् जिघांसाविति भट्टिश्लोकव्याख्याने दन्दशूकान् हिंस्रान् दंशेर्लुपसदेत्याद्युक्तं शंक-राचार्येण । हिंस्रमात्रे प्रयुञ्जनो भट्टिकारो दन्दशूकशब्दस्य नैघण्टुकप्रसिद्धिं नाद्रियते । ख-र्दतीत्यादि पूर्ववत् ॥ ६० ॥

अति अदि बन्धने ॥ अत्र धनपालः, तान्तं द्रविडाः पठन्ति । आर्यास्तु दान्तमिति ।

उभयमिति मैत्रेयस्वामिकाश्यपसंमताकारादयः । (अन्तति । आनन्त । आनन्ततुः । आनन्तिथ । आनन्तिव । अन्तितेत्यादि) इदित्वान्नुमि द्विहल्त्वात् "तस्मान्नुड् द्विहलः" इति लिटि नुडागमः । अन्तितिषति । अनुस्वारपरसवर्णयोः पूर्वत्रासिद्धत्वात् । "न न्द्राः" इति नकारवर्जं द्विरुच्यते । न च [पूर्वत्रासिद्धीयमद्विर्वचने] इत्यसिद्धत्वनिषेधः । अस्य द्विर्वचननिषेधरूपत्वात् । उक्तं चात्रैव 'हयवरट्' इत्यत्र कैयटे । अन्तयति । आन्तिनत् । एवमन्दतीत्यादि । अन्तः । यजज्वा । उणादिवृत्तौ तु "हसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन्" इति अमेस्तनि व्युत्पाद्यते । अन्ते भवमन्त्यम् । "दिगादिभ्यो यत्" इति सप्तम्यन्ताद्भवार्थे यत् । अन्तिमम् [अन्ताच्चेति वक्तव्यम्] इति शैषिको डिमच् । अन्तिकः । *अत इनिठनौ* । अदन्तादस्त्युपाधिकादस्येति षष्ठ्यर्थे इनिठनाविति ठन् । "ठस्येकः" । आवसथस्यान्तिके । "दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्" इत्यन्तिकयुक्तात् षष्ठीपञ्चम्यौ । अन्तिकशब्दात्तु "दूरान्तिकार्थेभ्यो द्वितीया च" इत्यत्र पञ्चम्यनुवर्त्तते, चकारेण तृतीया समुच्चीयत इति द्वितीयापञ्चमीतृतीयाः स्युः । तथा "सप्तम्यधिकरणे च" इति चशब्दाद् दूरान्तिकार्थसमुच्चयार्थात्सप्तमी चेति चतस्रो विभक्तयः (अन्तिकम् । अन्तिकात् । अन्तिकेन । अन्तिके इति) एताश्चतस्रो विभक्तयोसत्त्ववचनेभ्यः प्रातिपादिकार्थे इति वृत्तौ । भाष्ये

दूरादावसथान्मूत्रं दूरात् पादावसेचनम् ।
दूराच्च भाव्यं दस्युभ्यो दूराच्च कुपितादुगुरोः ॥

इति । सत्त्ववचनादधिकरणे पञ्चमी दृश्यते । कैयटे चावसथस्य दूर इत्यर्थ इति । अन्तिकादागतः *स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन*स्तोकाद्यर्थाः कृच्छ्रशब्दश्च पञ्चम्यन्ताः क्तान्तेन वा समस्यन्त इति तत्पुरुषपक्षे विभक्तेस्तु "पञ्चम्याः स्तोकादिभ्यः" इत्यलुक् । ऐकपद्यमैकस्वर्यञ्च विशेषः (नेदिष्ठः । नेदीयान्) "अन्तिकबाढयोर्नेदसाधौ" इति इष्ठन्नीयसुनोर्यथासङ्ख्यन्नेदसाधावादेशौ । अस्मादेव वचनात् "अजादी गुणवचनादेव" इति बाध्यते । अन्दूर्भाषायां शृङ्खले च । "अन्दूदृम्भूः" इत्यूकारप्रत्यये निपातितः । अन्दुको गजनिगलः । संज्ञायां कनि "केणः" इति ह्रस्वः ॥ ६२ ॥

इदि परमैश्वर्ये ॥ (इन्दति । इन्दाञ्चकार । इन्दितेत्यादि) लिटि "इजादेश्च" इत्याम् । इन्द्रः । "ऋज्रेन्द्र इरनन्तो निपातितः । इन्द्राणी । *इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्* इति पुंयोगादाख्यायां ङीषानुकौ । *पुंयोगादाख्यायाम्* पुंसोयोगात्तच्छब्देन स्त्रियामभिधानम् । इन्द्रमात्मन इच्छति "सुप आत्मनः क्यच्" इति इषिकर्मणः सुबन्तादात्मेच्छायां क्यचि अकारस्य "अस्य च्वौ" क्यचि च" इतीकारे इन्द्रीयति। अस्मात्सन्यतो लोपे "नन्द्राः" इत्यत्राजादेरिति वर्त्तते, स च कर्मधारयः पचम्यन्त इत्यादेरचः परेषां नदराणां द्विर्वचननिषेध इति व्यवहितत्वादिकारस्य द्विर्वचने (इन्दिद्रीयिषतीति भवति । अग्नीन्द्रौ देवते अस्य आग्नेन्द्रं हविः) "देवताद्वन्द्वे च" इति पूर्वपदस्यानङ्, "सास्य देवता" । प्रथमान्ताद्देवतोपाधिकादस्त्यर्थेऽणित्यणि "देवताद्वन्द्वे च" इति प्राप्तया उत्तरपदवृद्धेः "नेन्द्रस्य परस्य" इति निषेधः (इन्दिरा) बाहुलकात् किरच् ॥ ६३ ॥

बिदि अवयवे ॥ अवयव इति अवयवक्रियोच्यते । बशादिः । (बिन्दति । बिबिन्द । बिन्दितेत्यादि) (बिन्दुः) बाहुलकादुप्रत्ययः । अत्र मैत्रेयः । "बिन्दुरिच्छुः" इति सूत्रं बशादिं पठन् बिन्दुशब्दं व्युदपादयत् । वृत्तौ तु वेतेरेव तत्र पाठः । अत्र सम्मतायां भिदि अवयवे । भिन्दति । यद्यभिधानमस्ति भिन्दुरिति दृश्यत इति ॥ ६४ ॥

गडि वदनैकदेशे ॥ इह वदनैकदेशारम्भलक्षणा क्रिया वदनैकदेशशब्देनोच्यते (गण्डति । गण्डः) अच् । अत्यादयः पञ्चैते न तिङ्विषया इति काश्यपः । सम्मतायां बिदिभिदी एव प्रकृत्यैवमुक्तम् । अविगीतमन्ये सर्वेषां तिङ्मुदाहरन्ति ॥ ६५ ॥

णिदि कुत्सायाम् । (निन्दति । निनिन्द । निनिन्दिथ । निनिन्दिव । निन्दितेत्यादि) ।

कर्मादौ (निद्यते) इत्यादि । (प्रणिन्दति) । "उपसर्गादसमासेपि" इति णत्वम् । अत्र मैत्रेयाभरणसम्मतकाराः "वा निंसनिक्षनिन्दाम्" इति णत्वविकल्पमिच्छन्ति, तदयुक्तम् । यतोत्र "कृत्यचः" इत्यतः कृतीति वर्त्तते, तच्च निन्दादिभिर्विशेष्यमाणमर्थात्परसप्तम्यन्तमिति उपसर्गस्थान्निमित्तात्परस्य निंसादिनकारस्य कृति परे वा णत्वमिति सूत्रार्थः । तथा च शाकटायनः । 'निंसनिक्षनिन्दः कृति वा' इति । एवं हि प्रकरणमबाधितं भवति णोपदेशश्च सार्थकः । वृत्तौ च प्रणिन्दनम् । प्रनिन्दनमिति कृदन्तमेवोदाहारि । (निन्दकः) । "निन्दहिंस" इति वुन् । णिदृकुत्सासन्निकर्षयोरिति दिवादौ ॥ ६६ ॥

टुनदि समृद्धौ । *आदिर्ञिटुडवः* इति त्रय एते धात्वादयः समुदाया इतः । प्रयोजनं नन्दथुरित्यत्र "द्वितोऽथुच्" इति भावादावथुच् । (नन्दति । ननन्द । नन्दितेत्यादि । भावे नन्द्यत इत्यादि । निनन्दिषति । नानन्द्यते । नानन्दीति । नानन्ति । नन्दयति । अननन्दत् । नन्दयतीति नन्दनः) । "नन्दिग्रहि" इति ल्युः । अयं तनर्गीयोपदेशः, नृतिनन्दीति णोपदेशलक्षणपर्युदासात् (न नन्दतीति ननान्दा । ननान्दरौ) "नञि च नन्देः" इति ऋन्प्रत्ययो वृद्धिश्च, "न षट्स्वस्रादिभ्यः" इति "ऋन्नेभ्यः" इति ङीपो निषेधः । *ष्णान्ता षट्* इति षकारनकारान्ता सङ्ख्या षडित्युच्यते । स्वस्रादिपाठादेव नञो नलोपाभावः । ननान्दुरपत्यं नानान्द्रः ।। *अनृष्यानन्तर्ये बिदादिभ्योञ्* । अनृषीत्यविभक्तिकं भिन्नं पदं, तेन बिदादिभ्यो गोत्रापत्येऽञ् अनृषिभ्यस्त्वनन्तरापत्ये इति सूत्रार्थः ॥ ६७ ॥

चदि आह्लादने दीप्तौ च ॥ (चन्दति । चचन्द । चन्दितेत्यादि) (चन्दनः) । करणे ल्युट् । (चन्द्रः) । "स्फायितञ्चि" इत्यादिना रक् । (चन्द्रकम्) । संज्ञायां कन् । (चन्द्रिका) । टापि *प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः* इति इत्वमकारस्य, असुप इत्यापो विशेषणम्, स चेदाप् सुपः परो न भवतीति । (चन्दिरः) । "इषिमुषि" इत्यादिना किरच् ॥ ६८ ॥

त्रदि चेष्टायाम् ॥ (त्रन्दति । तत्रन्द । त्रन्दितेत्यादि) ॥ ६९ ॥

कदि क्रदि क्लदि आह्वाने रोदने च ॥ आह्वाने सकर्मकः । (कन्दति । चकन्द । कन्दितेत्यादि । चिकन्दिषति । चाकन्द्यते । चाकन्दीति । चाकन्ति । कन्दयति पुत्रन्देवदत्तेन) । "गतिबुद्ध" इत्यत्र शब्दकर्मेति साधनकर्मणो ग्रहणात् प्रयोज्यस्य न कर्मत्वं, शाकटायनमते त्वस्यैव सर्वमेतद्वददतौ प्रतिपादितं तत एवावगन्तव्यम् । क्रन्दतीत्यादि पूर्ववत् । (संक्रन्दयतीति संक्रन्दनः) । नन्द्यादित्वाद् ल्युः । आक्रन्दत्यस्मिन्नित्याक्रन्दो देशः । आक्रन्दाते रक्षणार्थमाह, आक्रन्दात इत्याक्रन्दः शरणम् । कर्मण्यधिकरणे वा घञ् । (आक्रन्दं धावति आक्रन्दिकः) । "आक्रन्दाट्ठञ्च" इति ठञ् ठकौ । अनयोः स्वरे विशेषः (कन्दरः) बाहुलकादरः । यद्वा । कन्दं वैक्लव्यं राति भीरूणामिति (कन्दरः । कन्दलः) । बाहुलकाद् लप्रत्ययः । यद्वा पूर्ववद्रातेः कः । "कपिलकादीनां संज्ञाछन्दसोः" इति लत्वम् । अथ वा लातेरन्तर्भावितण्यर्थात्कः । (कन्दली) । गौरादित्वाद् ङीष् । एते घटादयोऽपि । आद्यावेवेत्यपरे ॥

क्लिदि परिदेवने ॥ (क्लिन्दतीत्यादि) । अस्यानुदात्तेत्सु पठितस्येह पाठः परस्मैपदार्थं स्वरितेत्सु पाठः क्रियाफलस्य कर्तृगामित्वेऽपि परस्मैपदं यथा स्यात् ॥ ७३ ॥

शुन्ध शुद्धौ ॥ (शुन्धति । शुशुन्ध । शुन्धितेत्यादि) । आशीर्लिङि कित्त्वात् "अनिदिताम्" इति उपधालोपे शुध्यात् । तथा यक्यङोरपि (शुध्यते, शोशुध्यत इति) । यङ्लुकि लङि तिप्सिपोर्हल्ङ्यादिलोपे संयोगान्तलोपे च प्रत्ययलक्षणेन लघुपधगुणो न भवति, संयोगान्तलोपस्य पूर्वत्रासिद्धत्वात् । (शुधितः । शुधितवान् । शुधित्वा) । "उदुपधात्" इति निष्ठायाः कित्त्वविकल्पो न भवति 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति । अत्र कित्त्वसन्निपातनिमित्तमुदुपधत्वं यदिदं कित्त्वाश्रये नलोपे भवति । धान्तप्रकरणमपहाय संयोगान्तप्रकरणानुरोधेनायमिह निर्दिष्टः । अयं शौचकर्मणि शुजादौ । शुधि शौच इति दिवा-

दौ । अनुषङ्गो नेह ॥ अन्तादय उदात्ता उदात्तेतो गताः ॥ ७४ ॥

प्रथमं माङ्गलिकमेधतिं पठित्वा मातृकापाठक्रमेण कवर्गीयान्तानाह ॥

शीकृ सेचने ॥ तालव्यादिः । दन्त्यादिरिति धनपालकाश्यपौ । अत एव षोपदेशलक्षणे सृपिसृजिस्तृस्त्यासीकृसेकृस्रवर्जमिति पेठतुः । पुरुषकारस्त्वत्र सृप्यति पठति यदाह सीकृ इत्यायों इति धनपालः । तत्र चायं पक्षः शीकर इति प्रयोगाननुगुणः । योऽपि षोपदेशलक्षणे सीकृपाठः सोऽप्येवं प्रत्युक्त इति । (शीकते । शिशीके । शीकिता । शीकिष्यते । शीकताम् । अशीकत । शीकेत । आशिषि । शीकिषीष्ट । अशीकिष्ट । अशीकिष्यत) । कर्मणि (शीक्यते) इत्यादि । (शिशीकिषते । शेशीक्यते । शेशीकीति । शेशीक्तिः, इति । लुङि अशेशीकीत्) हलङ्यादिलोपः । अशेशीक् स्यातेत्यत्र "स्कोस्" इति लोपो न भवति । निमित्तनिमित्तिनोर्भिन्नपदस्य सत्वात् । उक्त चैवं "परेश्च घाङ्कयोः" इत्यत्र कैयटे । पदस्येत्यधिकारात् प्रत्यासत्तिन्यायाश्रयणादेकपदस्थयोर्निमित्तनिमित्तिनोर्ग्रहणमिति । (शीकयति । अशिशीकत् । शीका) । "गुरोश्च हलः" इत्यकारः । (शीकायते) । [तत्करोत्यर्थेऽटाट्टाशीकाकोटापोटासोटाप्लुष्टाग्रहणं कर्त्तव्यम्] इति क्यङ् । भयमपि पाठस्तालव्यादित्वे प्रमाणम् । अयं क्यङ् "तत्करोति" इति णिचोपवाद इत्येके, सोपीष्यत इति न्यासादौ । कान्तत्वादस्मात् क्विप् नोदाहर्त्तव्यः, स्थितं चैवं "परेश्च घाङ्कयोः" इत्यत्र भाष्यकैयटयोः, तथा "स्कोः संयोगाद्यो" इत्यत्र वृत्तितद्व्याख्यानेष्वपि । मर्षणार्थोयं युजादौ ॥ ७५ ॥

लोकृ दर्शने ॥ (लोकते । लोकः) । भाषार्थोयं चुरादौ ॥ ७६ ॥

श्लोकृ संघाते ॥ (श्लोकते) । संघातो ग्रन्थः, स चेदं पठ्यमानव्यापार इति स्वाम्यादयः । काश्यपादयस्तु ग्रन्थितृव्यापार इति मथ्नातिवत्सकर्मक इति, श्लोकैरुपस्तौति, उपश्लोकयति । "सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्" इति णिच् ॥ ७७ ॥

द्रेकृ ध्रेकृ शब्दोत्साहयोः ॥ शब्दोत्साह इति केचित् । यदाह काश्यपः (द्रेकते) शब्देनोत्साहं करोतीति । उत्साहो वृद्धिरिति चन्द्रः । औद्धत्यमिति स्वामी । (द्रेकते । दिद्रेके । द्रेकितेत्यादि । द्रेकणः) । "रषाभ्याम्" इति णः । एवं ध्रेकत इत्यादि ॥७९॥

रेकृ शङ्कायाम् ॥ आङ् पूर्वः संशये । आरेकं संशयं प्राहुरिति वचनात् । रेकत इत्यादि॥८०॥

सेकृ स्रेकृ स्रकि श्रकि श्लकि गत्यर्थाः ॥ अन्त्यौ तालव्यादी, अन्ये दन्त्यादयः । (सेकते । सिसेके । सेकिता सेकते । सिस्रेके । स्रङ्कते । सस्रङ्के । स्रङ्किता । श्रङ्कते । शश्रङ्के । श्रङ्किता । श्लङ्कते । शश्लङ्के । श्लङ्किता) । इत्यादि । अत्र मैत्रेयः । तृतीयं श्लेकृ इति तालव्यादिमेकारोपधं पठति ॥ अत्र क चित्सीकृ इति दन्त्यादिरपरोपि धातुः पठ्यते, तदनार्षम् । स्तृस्तृजिसृपिसृस्त्यासेकृस्रजमिति षोपदेशपर्युदासे भाष्याद्विष्वपाठात् । अत्र क्षीरस्वामी । अत्र दन्त्यादेः स्थाने तालव्यादिं पठित्वाऽर्थभेदात्पुनः पाठ इत्युक्त्वा षेकृ इत्यन्ये विकल्पेन षोपदेशं कार्यार्थं पेठुरिति ॥ ८५ ॥

शकि शङ्कायाम् ॥ (शङ्कते । शशङ्के । शङ्कितेत्यादि । शिशङ्किषते । शाशङ्कीति । शाशङ्क्ति । लङि ईडभावे अशाशन् । शङ्कुः) । "खरुशङ्कुपीयुनीलङ्गुलिगु" इत्युप्रत्ययान्तो निपातितः । (शङ्कुला) । बाहुलकादुलच् । शक्लृ शक्ताविति स्वादौ । शकविभाषितो मर्षण इति दिवादौ ॥ ८६ ॥

अकि लक्षणे ॥ (अङ्कते । आनङ्के । अङ्कितेत्यादि । अञ्चिकिषते) । अनुस्वारपरसवर्णयोः पूर्वत्रासिद्धत्वात् । "नन्द्राः" इति निषेधात् ककारादिर्द्विरुच्यते । न च [पूर्वत्रासिद्धीयमद्विर्वचन]इति असिद्धत्वनिषेधः । "नन्द्राः" इत्यस्य निषेधरूपत्वादित्यतन्त्रौ स्थापितम् । आहुश्चात्र स्वामिकाश्यपादयोपि, "नन्द्रा" इति निषेधात् कादेर्द्विर्वचनम् । (प्राङ्कनम्) । "कृत्यचः" इतिः णत्वस्य *इजादेः सनुमः* । हशन्ताद्धातोः सनुमो यदि भवति तर्हि इजादेरे-

वेति नियमादभावः (अङ्कुरः)। "मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरच्" इत्युरच् । अकि कुटिलायां गतावित्यग्रे । अङ्क लक्षण इति चुरादौ ॥ ८७ ॥

वकि कौटिल्ये ॥ (वङ्कते । ववङ्के । वङ्कितेत्यादि । प्रवङ्कनम्) । पूर्ववदणत्वम् ।(वङ्किः) "वङ्क्यादयश्च" इति क्रिन्नन्तो निपातितः । अयं गत्यर्थः पठिष्यते ॥ ८६ ॥

मकि मण्डने ॥ (मङ्कते) इत्यादि । (प्रमङ्कनम्) । अङ्किवदणत्वम् । (मङ्कनः) । "क्रुधमण्डार्थेभ्यश्च" इति युच् । कर्मकर्त्तरि " भूषाकर्म" इति यक्चिणोर्निषेधाद् (मङ्क्ते कन्या स्वयमेव, अमङ्क्ष्टि कन्या स्वयमेवेति) शप्सिचोर्निषेधाद् (मङ्क्ते कन्या स्वयमेव, अमङ्क्ष्टि कन्या स्वयमेवेति) शप्सिचौ भवतः मङ्किः । इन्नितीन् ॥ ८९ ॥

कक लौल्ये ॥ लौल्यं गर्वश्चापल्यं च । (ककते । चकके । ककितेत्यादि । काकः,) घञ् । बाहुलकात्कर्तरि, गत्यर्थः, पठिष्यते तस्माद्वा घञ् ॥९०॥

कुक वृक आदाने । (कोकते । चुकुके । कोकितेत्यादि । चुकुकिषते । चुकोकिषते । कुकित्वा । कोकित्वा) । "रलो व्युपधात्" इतिकित्त्वविकल्पः । (कुकितमनेन, कोकितमनेन । प्रकुकितः । प्रकोकितः । प्रकुकितवान् । प्रकोकितवान्) । "उदुपधात्" इति कित्त्वविकल्पः । (प्रकोकनम् । प्रकोकणम्) ॥ *हलश्चेजुपधात् * हलादेरिजुपधात्परो यः कृत् तत्स्थस्य नकारस्य उपसर्गस्थान्निमित्तात्परस्य वा ण इति णत्वविकल्पः । "कृत्यचः" इत्यस्यापवादः । (कोकः) । देवसेवमेषादयः पचादिषु द्रष्टव्या इत्यादिशब्दस्य प्रकारार्थत्वादिदुपधात्कं बाधित्वा ऽच् प्रत्ययः । (कोकिलः) । "सलिकल्यनिमहिव(१)डिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्" इति इलच । (कोकिला) । जातिलक्षणङीषं बाधित्वा ऽजादित्वाट्टाप् । वृक । (वर्कते । ववृके । वर्कितेत्यादि । विवर्किषते । वरीवृक्यते) । *रीगृदुपधस्य च* ॥ ऋत्वतोभ्यासस्य रीगिति रीगागमः, (वरीवृकांचक्रे) इत्यादावल्लोपस्य स्थानिवत्त्वात् "न धातुलोपः" इति वा गुणभावः (वर्वर्क्ति । वरिवर्क्ति । वरीवर्क्ति ॥ वर्वृकीति । वरिवृकीति । वरीवृकीति ।) *रुग्रिकौ च लुकि* इति ऋत्वतोभ्यासस्य रुग्रिकौ चकाराद्रीक् । ईटि "नाभ्यस्तस्याचि पिति" इत्यगुणत्वम् । एवं वर्वृक्त इत्यादि । वर्वर्कां चकारेत्यादौ यङ्लुकोऽनैमित्तकत्वात् "न धातुलोपः" इति गुणनिषेधाभावः । (अवर्वृकीत् । अवर्वर्क् स्थातेत्यत्र) "स्कोः" इति कलोपो भिन्नपदत्वान्नेति सीकतावुक्तम् । लुङि सार्वधातुकाश्रये गुणे "नाभ्यस्तस्य" इति निषिद्धेपि सिजाश्रयो भवत्येव प्रत्ययलक्षणेन, (अवर्वर्कीत् । अवर्वर्किष्टामित्यादि) । हलन्तलक्षणा वृद्धिः "नेटि"।इति निषिध्यते । (वर्कयति । अववर्कत् । अवीवृकत्) *उर्ऋत्* ॥ चङ्परे णावुपधाया ऋकारस्य वा ऋकार इत्यृकारः । इररारामपवादः । वृकः । इगुपधलक्षणः कः । मृगविशेष आयुधजीविसंघविशेषश्च । तत्र द्वितीयार्थाभिधायिनो "वृकाट्टेण्यण्" इति स्वार्थे टेण्यणि वार्केण्यः।।*ञ्यादयस्तद्राजाः* । "पूगाञ्ञ्यो ग्रामणीपूर्वात्" इत्यारभ्यापादपरिसमाप्तेर्वक्ष्यमाणाः प्रत्ययास्तद्राजसंज्ञा इति टेण्यस्य तद्राजत्वे "तद्राजस्य बहुषु तेनैवास्त्रियाम्" इति लुकि बहुषु वृकाः । तेनैवेति वचनाद्यदि बहुत्वं तद्राजकृतमेवेत्यवगतेर्वार्केण्यमतिक्रान्ता अतिवार्केण्या इत्यादावर्थान्तरकृते बहुत्वे लुग् न भवति । तथा । अस्त्रियामितिवचनात् स्त्रियां टित्त्वात् ङीपि हलस्तद्धितस्य । हल उत्तरस्य तद्धितयकारस्य लोपो भवतीति परत इति "आदेः परस्य" इति यकारलोपे च इत्यकारलोपे (वार्केणी । वार्केण्यौ । वार्केण्य) इति भवति । वर्करस्तरुणः पशुः । बाहुलकादरच् ॥ ९२ ॥

चक तृप्तौ प्रतिघाते चेति धनपालमैत्रेयादयः । चक तृप्तावित्येव क्षीरस्वामिशाकटायनौ । (चकते । चेके । चकितेत्यादि । चकोरः) । "कटिचकिभ्यामोरच्" इत्योरच् । अयं

---

(१) वडीतिः पञ्चपादीवृत्तौ नास्ति ।

घटादावपि ॥ ९३ ॥

ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ रघि लघि गत्यर्थाः ॥ (कङ्कते । चकङ्के । कङ्कितेत्यादि । वङ्कते । ववङ्के । वङ्कितेत्यादि प्रवङ्कनम् । प्राङ्कनम्)। "कृत्यचः" इति णत्वम् "इजादेः सनुमः" इति नियमान्न भवति । (कङ्कतम्)। बाहुलकादतच् । कङ्कत एव कङ्कतिका । संज्ञायां कनि टापि "प्रत्ययस्थात्" इतीत्वम् । (श्वङ्कते । शश्वङ्के । श्वङ्किता । त्रङ्कते । तत्रङ्के । त्रङ्किता ॥ ढौकते । डुढौके । ढौकिता ॥ त्रौकते । तुत्रौके । त्रौकिता । ष्वष्कते । ष्वष्किता) । [सुब्धातुष्ठिवुष्वष्कतीनां सत्वप्रतिषेधो वक्तव्यः] इति सत्वनिषेधः । (वस्कते । ववस्के । वस्किता । मस्कते । ममस्के । मस्किता टेकते । टिटिके । टेकिता । "असंयोगाल्लिट् कित्" इति कित्त्वान्न गुणः । (टीकते । टिटीके । टीकिता । रङ्घते । ररङ्घे । रङ्घिता । लङ्घते । ललङ्घे । लङ्घितेत्यादि) ढौकतित्रौकत्योर्यङ्लुकोरभ्यासस्य ह्रस्वे गुणः । न च ह्रस्वस्य "दीर्घोकितः" इत्यनेन बाधः । 'अभ्यासविकारेष्वपवादा नोत्सर्गान् विधीन् बाधन्त' इति तन्त्राकित इत्यनेन ज्ञापितत्वात् । अस्ति च दीर्घस्य दीर्घत्वे प्रयोजनं स्वस्वनिवृत्तिः । कृते तु ह्रस्वे तस्य दीर्घे ऊकारो न भवति, "गुणो यङ्लुकोः" इत्यस्य निर्विषयत्वप्रसङ्गात् । ढौकतित्रौकतिटेकतिटीकतीनामृदित्त्वाण्णौ चङ्युपधाया ह्रस्वाभावः । (अडुढौकत् । अतुत्रौकत् । अटिटेकत् । अटिटीकदित्याह) । लघु । "लङ्घिबंह्योर्नलोपश्च" इत्युप्रत्ययनलोपौ । (लघिमा) । *पृथ्वादिभ्य इमनिज्वा* इति भावकर्मणोरिमनिच् । इतीष्टेमेयस्सु लोपः । वाग्रहणात् *इगन्ताच्च लघुपूर्वात्* इति अणि लाघवमित्ति, लघुपूर्वान्तादिति सूत्रार्थः । रघुः । "बालमूललघ्वङ्गलीनां वा लो रत्वमापद्यते" इति पक्षे लकारस्य रेफः । श्वङ्कुतिः संमतायां दन्त्यादिः पठ्यते । अत्र दण्डके तिकृ तीकृ इति क्वचित्पठ्येते, तदपि तिकः प्रतीक इति दर्शनाद् ग्राह्यमेव, इगुपधलक्षणकान्तौ । तिकस्यापत्यं, (तैकायनिः) । 'तिकादिभ्यः फिञ्" इति फिञ् । फस्यायनादेशः । तैकायनयश्च कैतवायनयश्च कितकितवाः । *तिककितवादिभ्यो द्वन्द्वे* इति द्वन्द्वे बहुषु फिञो लुक् । लघि भोजननिवृत्तौ चेति स्वाम्यादय । लघि शोषण इत्यग्रे । भाषार्थोयं चुरादौ ॥ १०६ ॥

अघि वघि मघि गत्याक्षेपे ॥ आक्षेपो निन्दा, गतौ गमनारम्भे चेति स्वामी । (अङ्घते । आनङ्घे । अङ्घितेत्यादि । अञ्जिघिषते) । "नन्द्राः" इति नवर्जं द्विरुच्यते । अभ्यासस्य चुत्वेन झकारे जश् वे जकारः । (अङ्घयति । आञ्जिघत् । वङ्घते । मङ्घते) । इत्यादि । प्राङ्घनमित्यादौ "इजादेः सनुम" इति नियमादणत्वम् । मघि कैतवे च ॥ १०९ ॥

राघृ लाघृ सामर्थ्ये ॥ (राघते । रराघे । राघितेत्यादि । रिराघिषते । राराघ्यते । राराघीति । रारारिध । लङि । आराराक् । राघयति । अरराघत् ।) ऋदित्त्वादुपधाह्रस्वनिषेधः । एवमितरयोरपि (उल्लाघः) "अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः" इति क्ते उडभावस्तलोपश्च निपात्यते । उल्लाघेतिवचनाद् अनुपसृष्टाच्च (लाघितः प्रलाघित) इति भवति । द्राघृ आयामे च । आयामो दैर्घ्यक्रियेति कौशिकः । कदर्थनमिति स्वामी । धाघृ इति तवर्गचतुर्थादिमपि के चित्पठन्ति ॥ १११ ॥

श्लाघृ कत्थने ॥ कत्थनं श्लाघनम् (देवदत्ताय श्लाघते ।) देवदत्तं स्तुवँस्तमेव बोधयितुमिच्छतीत्यर्थः । *श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः* । श्लाघ्यादीनां प्रयोगे ज्ञीप्स्यमानो ज्ञापयितुमिष्यमाणः संप्रदानमिति देवदत्ताच्चतुर्थी, के चिदाहुः । आत्मानं परं वा स्तुवन् तां स्तुतिं बोधयितुमिच्छतीत्यर्थ इति । तथा च भट्टिः, श्लाघमानः परस्त्रीभ्यस्तत्रागाद्राक्षसेश्वर इति । देवदत्तं श्लाघत इति ज्ञीप्स्यमानत्वाविवक्षायां कर्मत्वम् ॥ शीकादय उदात्ता अनुदात्तेतो गताः ११२

अथ परस्मैपदिन. आह—

फक्क नीचैर्गतौ ॥ इलः शिष्यन्ता उदात्ता उदात्तेतः । नीचैर्गतिर्मन्दगमनमसद्व्यवहारो चेति स्वामी (फक्कति । पफक्क । फक्किता । फक्किष्यति फक्कतु । अफक्कत् । फक्केत् ।

आशिषि फक्यात् । अफक्कीत् । अफक्किष्यत् । कर्मादौ फक्क्यत इत्यादि । पिफक्किषति । पाफक्क्यते पाफक्कीति । पाफक्ति । फक्कयति । अपफक्कत् ॥ ११३ ॥

तक हसने ॥ (तकति । तताक । तेकतुः । तकिता । अतकीत् । अताकीद्) इत्यादि । अतो हलादे इति वा वृद्धिः । (व्यतितकन्ति) [प्रतिषेधे हसादीनाम्] इति तङ्निषेधः । (तक्यम्) । "तकिशसि" इति यत् ॥ ११४ ॥

तकि कृच्छ्रजीवने ॥ (तङ्कति । ततङ्क । तङ्कितेत्यादि । यङ्लुकि लङि ईडभावे अतातन्) । अस्यानन्तरं मैत्रेयः शुक गताविति पठित्वा शोकति, शुकः, शुक्र इत्युदाजहार, अस्मिन्हि सति शुकवल्कोल्का इति शुभेः कनि भलोपे शुकशब्दनिपातनमनर्थकं स्यात्, इगुपधलक्षणेन कप्रत्ययेनैव सिद्धत्वात्, तथा शुकेरगिवधानेनापि शुक्रशब्दे सिद्धे ऋजेन्द्रादौ शुचेर्निपातनमनर्थकं स्यादित्यस्य पाठोऽनार्ष इव प्रतीयते ॥ ११५ ॥

बुक्क भषणे ॥ भषणमिह श्वरवः । (बुक्कति । बुबुक्क । बुक्कितेत्यादि) । अयं चुरादावपि ॥ ११६ ॥

कख हसने । (कखति । चकाख । कखितेत्यादि । अकखीत् । अकाखीत्) । "अतो हलादेः" इति वा वृद्धिः ॥ ११७ ॥

ओखृ राखृ लाखृ द्राखृ ध्राखृ शोषणालमर्थयोः । (ओखति । ओखांचकार । ओखितेत्यादि । ओचिखिषति । ओखयति । (मा भवानोचिखत्) । "द्विर्वचनेचि" इति णिलोपस्य स्थानित्वात् खिशब्दस्य द्वितीयस्यैकाचो द्विर्वचनमृद्धित्त्वान्नोपधाह्रस्वः । इदमेव ऋदित्त्वं ज्ञापकमन्तरङ्गादपि द्विर्वचनात्पूर्वमुपधाह्रस्वत्वं भवतीत्यस्य । अस्य च प्रयोजनं मा भवानिदिधदिति सिद्धिरित्येधतावुक्तम् । (प्रोखति) । *एङि पररूपम्* । अवर्णान्तादुपसर्गादेङि परे पूर्वपरयोः पररूपमिति पररूपत्वम् । (राखति । अरराखत् । लाखति । द्राखति । ध्राखतीत्यादि) ॥ १२२ ॥

शाखृ श्लाखृ व्याप्तौ ॥ (शाखति । श्लाखतीत्यादि । शाखा) । "गुरोश्च" इत्यकारः । शाखेव शाख्यम् । "शाखादिभ्यो यः" इति इवार्थे यः । (प्रतिशाखं भवं प्रातिशाख्यम् ।) "अव्ययीभावाच्च" इति भवार्थे ण्यः । शाखा अस्य सन्तीति, शाखी । "व्रीह्यादिभ्यश्च" इति इनिः । विशिष्टा शाखा विशाखा । सा प्रयोजनं प्रयोजिका यस्य वैशाखो मन्थः । "विशाखाषाढादण्मन्थदण्डयोः" इति प्रयोजने णप्रत्ययः । विशाखेति नक्षत्रं तत्र जातः । "सन्धिवेलाद्यृतुनक्षत्रेभ्योण्" इत्यण् । तस्य "श्रविष्ठाफल्गुनी" इत्यादिना लुकि "लुक् तद्धितलुकि" इति स्त्रीप्रत्ययस्य लुकि विशाखो माणवकः ॥ १२४ ॥

उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः ॥ द्वितीयन्ताः पञ्चदश, तृतीयान्तास्त्रयोदश ॥ (ओखति । प्रोखति) 'एङि पररूपम्' । (उवोख । ऊखतुः । उवोखिथ । उवोख) । गुणविषये *अभ्यासस्यासवर्णे* इति अभ्यासस्येवर्णोवर्णयोरसवर्णेऽचि परत इयङुवङावित्युवङ् । लिटि पिद्वचनेषु गुणः, गुरुमानयं धातुरिति तेषां स्थानिवत्वेन लिट्त्वाद् आम् प्राप्तः । सन्निपातपरिभाषया निवर्त्तते । आमि गुणनिमित्तप्रत्ययस्य "आमः" इति लुक् स्यात् । ऊखतुरित्यादौ सवर्णदीर्घस्यान्तवत्त्वेनाभ्यासत्वाद् ह्रस्वो न भवति, अभ्यासमात्राश्रयत्वेनान्तरङ्गेऽस्मिन् पूर्वपराश्रयस्य बहिरङ्गस्य सवर्णदीर्घस्य 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्यसिद्धत्वात् । ओखितेत्यादि । लुङि "नेटि" इति वृद्धेनिषेधे लघूपधगुणेन मा भवानोखीदिति भवति । (ओचिखिषति) लघुपधगुणे कृते द्वितीयस्यैकाचो द्विर्वचनम् । (ओखयति मा भवानुचिखत्) । द्विर्वचनात् पूर्वमेवोपधाह्रस्वत्वमिति ज्ञापितम् । (ओखित्वा) "न क्त्वा सेट्" इति अकित्त्वाद्गुणः । भावादिकर्मणोर्निष्ठायाम् । "उदुपधात्" इति कित्त्वविकल्पनादुखितमनेन, ओखितमनेनेत्यादि नेयम् । उखो मुनिः ।

इगुपधत्वात्कः । उखेन प्रोक्तमौखीयः श्लोकः । "तित्तिरिवरतन्तुखण्डिकोखाच्छण्" इति तृतीयान्तात् प्रोक्तार्थे छण्, णित्त्वाद्वृद्धिः । यदा तु प्रोक्तं छन्दो ब्राह्मणं वा तदा "छन्दोब्राह्मणानि च तद्विषयाणि" इति नियमाद् अध्येतृवेदितृप्रत्ययविषयमेव, तेन "तदधीते तद्वेद" इति औखीयशब्दाद् द्वितीयान्ताद् अध्येतृवेदित्रोरण, तस्य "प्रोक्तप्रत्ययाच्छणः परत्वेन लुकि औखीयो माणवकः । औखीया ब्राह्मणीत्यत्र प्रत्ययलक्षणेनाणन्तत्वाद् "टिड्ढाञ्" इति न ङीब् भवति, अत इत्यनुवर्त्याणोऽकारस्य च विशेषणविशेष्यत्वाद् 'वर्णाश्रये नास्ति प्रत्ययलक्षणम्' इति प्रत्ययलक्षणनिषेधात् । (उखायां संस्कृतमुख्यम्) । *शूलोखाद्यत्* इति सप्तम्यन्तात्संस्कृतमित्यर्थे यत । प्रोंखणम् । "कृत्यचः" इति णत्वम् । (उङ्खति । उङ्खांचकार । उङ्खिता । उञ्चिखिषति । उङ्खयति । औञ्चिखदित्यादि) प्रोङ्खणम् । "इजादेः सनुमः" इति णत्वम् । (वखति । ववाख । वखितेत्यादि, ववखतुरित्यादौ किति लिटि वकारादित्वादेत्वाभ्यासलोपौ न । लुङि "अतो हलादेः" इति वा वृद्धिः । (अवाखीदिति) एवं परेषामनिदितान् । (वङ्खयति । प्रवङ्खनम्) । "इजादेः" इति नियमादणत्वम् । (मखति । ममाख । मखितेत्यादि । मङ्खति । नखति । नङ्खति) । मूर्धन्यादेरुपदेश "उपसर्गात्" इति णत्वेन प्रणखतीत्याद्यपि यथा स्यादिति (रखति । रङ्खति । प्ररङ्खणम्) । "रषाभ्याम्" इति णत्वम् । इजादेरिति नियमं उपसर्गात्कृत्यच इति प्राप्तस्यैव । (लखति । लङ्खति । एखति । इयेख । एखितेत्यादि । ओखतिवत् । (इङ्खति । इङ्खां चकार । ईखति । ईखां चकार) । यद्यपि मैत्रेयेणादितस्त्रय इदित उखिवखिमखयः । मूर्द्धन्यादिर्नखिरनिदित, इखिश्च न पठ्यते, तथापि इतरानेकव्याख्यातॄणां प्रामाण्यादस्माभिः पठित । अत्र चन्द्रो मुखिमपि पपाठ । संमतायां तु त्रख त्रखि शिखि इति त्रयः पठ्यन्ते । द्रविडास्तु रिखमपि पठन्ति, एवमेकोनविंशतिः खान्ताः । वल्गति रङ्गति) रङ्गन्त्यस्मिन् प्रेक्षकाणां मनांसीति, रङ्गः । "हलश्च" इति संज्ञायामधिकरणे घञ् । रञ्जेर्वा घो द्रष्टव्यः (लङ्गति । विलगितः) अनिदितां नलोपे [लङ्गिकम्पोरुपतापशरीरविकारयोरुपसंख्यानम्] इति नलोपः उपतापादन्यत्रावयवीत्यङ्गम् । रङ्गवद् घञ् । अङ्गिरगतौ विपरीतलक्षणया प्रवर्तते, दर्श इत्यत्र दृशिवत् । न दृश्यतेऽस्मिन् चन्द्र इति हि दर्शशब्दो धूर्त्तस्वामिना व्युत्पादितः । कल्याणान्यङ्गन्यस्याः सन्तीति अङ्गना । "अङ्गात् कल्याणे" इति पामादिपाठान्मत्वर्थीयो नः, विशिष्टं विहीनं वा ऽङ्गमस्येति व्यङ्गः, तस्यापत्यं व्याङ्गिः "अत इञ्" "स्वागतादिनां च" इति वृद्धिप्रतिषेधैजागमयोर्निषेधः । एवं स्वाङ्गिरित्यत्रापि सर्वाङ्गं व्याप्नोतीति सर्वाङ्गीणः स्नायुः, *तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति* इति सर्वादेः पथ्याद्यन्ताद् द्वितीयान्ताद्व्याप्नोतीत्यर्थे खः । अग्निः । "आर्गोर्निर्नलोपश्च" इति निप्रत्ययो नलोपश्च । अग्निर्देवता अस्य, आग्नेयं हविः । [सर्वत्र अग्निकलिभ्यां ढक् प्रत्ययः]। सर्वत्रेति वचनादर्थान्तरेप्ययमेव । (अग्नीषोमौ अग्नीवरुणौ) । "ईदग्नेः सोमवरुणयोः" इति देवताद्वन्द्वलक्षणस्यानङोपवाद ईकारः । अग्नीवरुणौ देवता अस्याग्निवारुणम् । "देवताद्वन्द्वे च" इत्युभयपदवृद्धिः "इद्वृद्धौ" इति वृद्धिमत्युत्तरपदे अग्नेरिकार ईत्वापवादः । अग्नायी । *वृषाकुप्यग्नकुसितकुसिदानामुदात्त* इति पुंयोगे ङीब्युदात्तऐकारान्तादेशे आयादेशः । आग्नायी देवता अस्य आग्नेयम् । लिङ्गविशिष्टपरिभाषया [सर्वत्राग्निकलिभ्यां ढक्] इति ढकि [भस्याढे तद्धिते] इति पुंवद्भावपर्युदासे स्त्रीभ्यो ढको ग्रहणमिति कैयटाद्यावुक्तत्वात्पुंवद्भावः । अग्निमिन्धइत्यग्निमिन्धः । [भ्राष्ट्राग्न्येरिन्धे 'मुम्वक्तव्य] इति मुम् ॥ अयम् । "रुद्रेन्द्रा" इति निपातनाद्रकि नलोपः । अये भवयमिम् ।' "अग्रादिपश्चाडिमीच् इति डिमच् । (अङ्गारः) "अगिमगिनन्दिभ्य आरन्" इत्यारन् । (अङ्गुलिः) । "रुतञ्जी" इत्यादिना उलिप्रत्ययः (अङ्गुरिः) । "घालमूल" इत्यादिना पक्षे रः । पञ्चाङ्गुलयः प्रमाणमस्य पञ्चाङ्गुलः । *तद्धितार्थोत्तरपदसमाहारे च* तद्धितार्थे विषयभूते उत्तरपदे परतः समाहारे चाभिधेये दिक्संख्ये समानाधिकरणेन समं समस्येते इति प्रमाणे तद्धितार्थे विषयभूते समासः ॥ "सङ्ख्यापूर्वो

द्विगुः” इति द्विगुत्त्वे “द्विगुश्च” इति तत्पुरुषश्चार्थात्तत्र *प्रमाणे द्वयसज्दघ्नञ्मात्रचः* इति प्रमाणोपाधिकादस्मात्प्रमाणि मात्रच्, तस्य “द्विगोर्लुङ् नित्यम्” इति लुकि “तत्पुरुषस्याङ्गुलेः सङ्ख्याव्यादेः” इत्यचि “यस्येति च” इतीकारलोपः । अत्यङ्गुलम् ।·[अत्यादयः क्रान्ताद्यर्थे] इति तपुरुषः, अव्ययादित्वादिच् । शोभनाङ्गुलिः स्वङ्गुलिः । *न पूजनात्* । यान् शब्दानुपादाय समासान्तो विधीयते ते यदा पूजावचनात्परे भवन्ति तदा समासान्तो नेत्यत्राचोभावः । (कुत्सिताङ्गुलिः किमङ्गुलिः) । *किं क्षेपे* । क्षपे यः किं शब्दः स समानाधिकरणेन सुबन्तेन समर्थेन समस्यत इति तत्पुरुषः । *किमः क्षेपे* इति क्षेपवचनादस्मात्परस्य समासान्तनिषेधाद् अच्न भवति । (माङ्गुलिः, अनङ्गूलिः)। यत्र *नञस्तत्पुरुषात्* इति समासान्तनिषेधः । नञः परे ये वक्ष्यमाणा ऋगादयस्तदन्तात्तत्पुषचिति सूत्रार्थः । पञ्चाङ्गुलिसदृशा अवयवा अस्य पञ्चाङ्गूल एरण्डः। धान्यादीनां विक्षेपदारु च पञ्चाङ्गुलमाहुः । *अङ्गुलेर्दारु* इति बहुव्रीहौ षच् (अङ्गुलीयकम्) संज्ञायां कन् । “जिह्वामूलाङ्गुलेच्छः” इति सप्तम्यन्ताद्भवार्थे छः । (वङ्गयीति वङ्गाः जनपदः) । अङ्गव्युत्पत्तिः । (मङ्गलम्) । “मङ्गेरलच्” इत्यलच् । तङ्गति । अङ्गति । श्लङ्गति । इङ्गति । रिङ्गति । लिङ्गति) । लिगि चित्रीकरण इति चुरादौ च ।

त्वगि कम्पने च (त्वङ्गति) ॥ १९३ ॥

युगि जुगि रुगि वर्जने ॥ (युङ्गति । जुङ्गतीत्यादि) ॥ १९६ ॥

घघ हसने ॥ (घघति । जघाथ । घघितेत्यादि) ॥ १९७ ॥

मघि मण्डने ॥ (मङ्घति । । मङ्घते कन्या स्वयमेव । अमङ्घिष्ट कन्या स्वयमेव, भूषाकर्मत्वाद् यक्चिणौ । मङ्घनः । “क्रुडमण्डार्थेभ्यश्च” इति युच् ॥ १९८ ॥

शिघि आघ्राणे ॥ (शिङ्घति) । शिङ्घानको रोगविशेषः । “लृशिघिधाभ्यश्च” इत्यादिनानक् प्रत्ययः ॥ फक्कादय उदात्ता उदात्तेतः ॥ १९९ ॥

अथ क्रमप्राप्तांश्चवर्गान्तानात्मनेपदिन आह ॥

वर्च दीप्तौ ॥ एतदादय ईजन्ता उदात्ता अनुदात्तेतः ॥ (वर्चते ॥ ववर्चे । वर्चिता । वर्चिष्यते । वर्चताम् ॥ अवर्चत । वर्चेत) । आशिषि (वर्चिषीष्ट । अवर्चिष्ट । अवर्चिष्यत । भावे वर्च्यते) इत्यादि । (विवर्चिषते । वावर्च्यते । वावर्क्षीति ॥ वावर्क्ति ॥ अवावर्चीत् । अवावर्क्) । “रात्सस्य” इति नियमान्न संयोगान्तलोपः ॥ अवावर्क् स्थातेत्यादौ कुत्वस्यासिद्धत्वात्स्कोः इति कलोपो न भवति, यद्वा तत्र निमित्तनिमित्तिनोः समानपदस्थत्व एव सलोप इतीह नैव प्रसङ्गः । (वर्चयति । अववर्चत्) । वर्चः दीप्तिः पुरीषं च ॥ “असुन्” इत्यसुन् । वर्चस्कः पुरीषम् । संज्ञायां कन्, “सोपदादौ” इति विसर्जनीयस्य सत्वं, “कुप्वोः ॥ इत्यस्यापवादः । ब्रह्मवर्चसम् । हस्तिवर्चसम् । “ब्रह्महस्तिभ्यां वर्चसः” इत्यच् समासान्तः । (पल्यवर्चसम् । राजवर्चसम्) । [पल्यराजभ्याञ्च] इत्यच् । ब्रह्मवर्चसनिमित्तं संयोग उत्पातो वा ब्रह्मवर्चस्यम् ॥ [तस्य निमित्तप्रकरणे ब्रह्मवर्चसादुपसङ्ख्यानम्] इति यत् । वर्च्यम् । ण्यति “चजोः कुघिण्ण्यतोः” इति कुत्वं न भवति । “न क्वादेः” इत्यत्र क्वाद्यजिव्रजियाचिरुच्यादीनां न प्रतिषेधो निष्ठायामनिटः कुत्ववचनात्] अस्यार्थः । चजोः कुघिण्ण्यतोनिष्ठायामनिटः इति सूत्रं कर्त्तव्यं, तेन “न क्वादेः” “अजिव्रज्योश्च” इति योगद्वयं “यजयाचरुचप्रवचर्चश्च” इत्यत्र याचिरुच्यृचिग्रहणं न कर्त्तव्यं भवतीति । तेषां सेट्त्वादित्यभिप्रायः । अयमत्र विवेकः । ये क्वादयोऽन्ये वा निष्ठायामनिटस्तेषां कुत्वं ये तु सेटस्तेषां नेति । एवञ्चात्र मते ग्लुचादीनां कवर्गादित्वेपि निष्ठायामनिट्त्वात्कुत्वेन भाव्यम् । अत्र हरदत्तः । [यथोत्तरं मुनीनां प्रामाण्यम्] इति वार्त्तिककारानुसारेण कुत्वस्य भावाभावौ व्यवस्थाप्याविति । कथन्तर्हि शोकः समङ्ग इति । यतः शुच्युब्जी निष्ठायां सेटौ । अत्र भाष्यं, [शुच्युब्ज्योर्घञि कुत्वं

वक्तव्यम्] इति । अत्र हरदत्तः । तच्च यथान्यासेपि वक्तव्यं घन्येव यथा स्याद्णयति माभूदिति, तदेव वार्त्तिककारपक्षे विध्यर्थं भविष्यतीति ॥ १६० ॥

षच सेचने ॥ अयं सेवनार्थोपि, तथा च 'त्रय एनां महिमानः सचन्त' इत्यत्र क्षुरभट्टभास्करीययोः सचते सेचतइति । निरुक्ते च सक्तः सचित इति, सेव्यमानस्येति । अस्यैतौ वाचकावित्यर्थः । 'प्रनूमहित्वं वृषभस्त वोचं यं पूरवो वृत्रहणं सचन्त' इति । (सचते । सेचे । सचिता । सचिष्यते । सचताम् । असचत । सचेत । आशिषि सचिषीष्ट । असचिषत्) । "स्तौतिण्योरेव" इतिसत्वम् (सासच्यते । सासक्ति । साचयति । असीषचत्) सक्तुः । "सितनिगमिमसिसचि"इति तुन् "तितुत्र"इतीण्निषेधः । सक्तुलः । "सिध्मादिभ्य"इति मत्वर्थे लः । सचिवः । बाहुलकाद्वप्रत्ययः । यद्वा सचिः सेवा, इन प्रत्ययः, तां वातीति सचिवः, "आतोनुपसर्गे कः" । यद्वा "केशाद्वोन्यतरस्याम्" इति वप्रत्ययः "अन्येभ्योपि दृश्यते" इति मणिवराजीवादिवदस्मादपि । अयं समवाये स्वरितेदग्रे ॥ १६१ ॥

लोचृ दर्शने ॥ (लोचते । लुलोचे । लोचितेत्यादि । लुलोचिषते । लोलोच्यते । लोलोचीति । लोलोक्ति । लोचयति । अलुलोचत्) । ऋदित्वाण्णौ चङि ह्रस्वाभावः । भाषार्थोयं चुरादौ ॥ १६२ ॥

शच व्यक्तायां वाचि ॥ (शचते । शेचे । शचितेत्यादि । शची) इन्नन्तात्कृतम् "इकारादक्तिन" इति ङीष् ॥ १६३ ॥

श्वच श्वचि गतौ ॥ (श्वचते । शश्वचे । श्वचिता । श्वञ्चते । शश्वञ्चे । श्वञ्चितेत्यादि) । अच्यादयस्तालव्यादयः ॥ १६५ ॥

कच बन्धने ॥ (कचचे । चकचे । कचितेत्यादि) कचते यूनां मनांसि बध्नातीति कचः । पचाद्यच् (काचः) "हलश्च"इति संज्ञायां घञ् ॥ १६६ ॥

कचि काचि दीप्तिबन्धनयोः ॥ (कन्चते । चकञ्चे । कञ्चिता । काञ्चत) इत्यादि । (कञ्चुकः) । बाहुलकादुकः प्रत्ययः । (काञ्चनम्) । अनुदात्तेत्वाद्युच् । काञ्चनस्य विकारः । (काञ्चनम्) "प्राणिरजतादिभ्योञ्" इति । रजतादित्वादञ् "नित्यं वृद्धशरादिभ्यः" इति मयटोपवादः । (काञ्चिः । काञ्ची ।) इन्नन्तात् कृदिकारादक्तिनः" इति वा ङीष् । (काञ्चिकम्) । संज्ञायां कल्कने कन् । दीप्तौ चेति वक्तव्ये बन्धनग्रहणं प्रपञ्चार्थम् १६८

मच मुचि कल्कने ॥ कल्कनं दम्भः शाठ्यं चेति मैत्रेयः । दम्भभः कत्थनं चेति स्वामी । मचते । मेचे । मचिता । मुञ्चते । मुमुञ्चे । मुञ्चितेत्यादि) । मुचेति चन्द्रः । तन्मते मोचत इति । मुच्लृ मोक्षणइति तुदादौ । मुच प्रमोचन इति चुरादौ ॥ १७० ॥

मचि धारणोच्छ्रायपूजनेषु ॥ (मञ्चते) इत्यादि । (मञ्चः) । पचाद्यच् । शाकटायनस्तु मुचिं हित्वा द्वावेव धातू पपाठ । सचि कल्कने । मञ्चु धारणोच्छ्रायपूजनेष्विति । तेन चानुदात्तेत्स्थाने इडिवक्रियते । तस्य स्थाने वोदित्, धनपालस्तावत् शाकटायनानुसारी ॥ १७१ ॥

पचि व्यक्तीकरणे ॥ पञ्चते । पङ्कः । "चजोः कुघिण्ण्यतोः" इति कुत्वम् । वार्त्तिकमते न्यङ्क्वादिर्द्रष्टव्यः । तेन हि निष्ठायामनिटः कुत्वमुच्यते । पञ्चन् बाहुलकात्कनिन् बहुवचनान्तः । तत्र "ष्णान्ता षट्"इति षट्संज्ञाविधानात् । षड्भ्यो लुक्" इति जस्शसोर्लुक् । पञ्चानामित्यत्र "षट्चतुर्भ्यश्च" इत्यामो नुटि *नोपधायाः* नान्तस्योपधाया नामि दीर्घ इति दीर्घे "न लोपः प्रातिपदिकान्तस्य" इति नलोपः स्त्रियामपीदमेव रूपम् । "न षट्स्वस्रादिभ्य" इति टापो ङीषश्च निषेधात । अस्ति च टापः प्रसङ्गो नकारे लुप्ते । पञ्चानामपत्यं, पाञ्चिः । बाह्वादित्वादिञ् *नस्तद्धिते* नान्तस्य भस्य तद्धिते टिलोप इति टिलोपः । (पङ्क्तिः) । "पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्" इति "तदस्य परिमाणम्" इति विषये तिप्रत्ययो निपात्यते । पञ्च परिणामस्य वर्गस्य पञ्चत् । "पञ्चद्दशतौ

वर्गे वा” इति डत्यन्तो निपातितः। वाग्रहणात् “इत्संख्याया अतिशदन्ताया कन्” इति कनि पञ्चकः। पञ्चेति दुर्गः। तथा वर्धमानोपि, यदाह। अनिड्विधौ पच्यादिसूत्रे डुपचष्पाके पच व्यक्तीकरणइति। संमतायां तु वर्धमानवदुक्त्वाऽन्यैस्त्वयमिदित् पठ्यतइत्युक्तम्। “तिङो गोत्रादीनि” इत्यत्र प चतिगोत्रमित्युपादाय पच व्यक्तीकरणइति पठन् न्यासकारः पपरस्मैदिनं च मन्यते। डुपचष्पाकइत्यग्रे। पचि विस्तारवचनइति चुरादौ ॥ १७२ ॥

ष्टुच प्रसादे ॥ स्तोचते। “धात्वादेः षः सः”। ष्टुत्वं निमित्ताभावान्न भवति। सत्वात्पूर्वं तु पूर्वत्रासिद्धत्वेन न भवति। (तुष्टुचे)। “शपूर्वाः खय” इति शेषः। (स्तोचितेत्यादि तुस्तुचिषते। तुस्तोचिषते। स्तुचित्वा। स्तोचित्वा) “रलो व्युपधात्” इति कित्वविकल्पः। “स्तौतिण्योरेव” इति नियमात्सन्यषत्वम्। (तोष्टुचयते। तोष्टुचीति। तोष्टोक्ति स्तोचयति। अतुष्टुचत्। स्तोकः)। घञ्। (उदश्वित्स्तोकम्) अल्पमुदश्विदित्यर्थः। *पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः*। पोटादिभिः समानाधिकरणैः जातिवाचि सुबन्तं समस्यत इति तत्पुरुषः। अत्रैव निर्देशाद् वार्त्तिककारमते कुत्वम्। स हि “चजोः कु घिण्ण्यतोर्निष्ठायामनिटः” इति सूत्रं न्यास्थत्। (स्तोकान्मुक्तः, स्तोकेन मुक्तः।) स्तोकत्वेन मुक्त इत्यर्थः। ‘करणे च स्तोकाल्पकृच्छ्रकतिपायस्यासत्ववचनस्य” इति तृतीयापञ्चम्यौ। असत्त्ववचनस्येति वचनात् स्तोकेन विषेण हत इति सत्त्ववचनात्तृतीयैव। स्तोकान्मुक्त इत्यत्र ‘स्तोकान्तिके’ इत्यादिना समासे ‘पञ्चम्याः स्तोकादिभ्य” इत्यलुग्वचनात्तदेव रूपम्। संस्तोजा इति वर्णविकाराभ्युपगमादिति मैत्रेयः ॥ १७३ ॥

‘ऋज गतिस्थानार्जनोपार्जनेषु’ अयं पाठो मैत्रेयस्य। ऊर्जनेष्विति क्षीरस्वामिधनपालशाकटायनाः। अर्जते। “उरण् रपरः” इति रपरो गुणः। आनृजे। अत्र ऋजशब्दस्य द्विर्वचने हलादिशेषे “उरत्” इति ऋवर्णान्ताभ्यासत्त्वाद् इति नुट् ॥ ऋकारैकदेशस्यापि रेफस्य हल्त्वाश्रयणाद् द्विहल्त्वम्। तत्र हि द्विहलपरत्वं गौणस्येदृशस्य हलः परिग्रहार्थम्। अन्यथा तस्मान्नुडित्येव ब्रूयात्। न चाटतुरित्यादावेकलहल्यतिप्रसङ्गः। “अश्नोतेश्च” इत्यनेनद्विहलो यदि भवत्यश्नोतेरेवेति नियमात्, अस्याश्नोतिमात्रनिवृत्यर्थत्वे नाश्न इत्येव ब्रूयात्। “ऐऔच्” इत्यत्र द्विहल्ग्रहणं न करिष्यत इति भाष्यम्। तत्र कैयटे। ‘अवर्णोपधस्य यदि भवति अश्नोतेरेवेति नियमाश्रयेण द्विहल्ग्रहणं प्रत्याख्याय नुडुक्तः”। (अर्जिता। अर्जिष्यते। अर्जताम्। आर्जत)। आशिषि। (अर्जिषीष्ट। आर्जिष्ट। अर्जिष्यत। अजादित्वादाडागमः। (अर्जिजिषते) सनीटि गुणे “न न्द्राः” इति रेफवर्जं द्विरुच्यते। (अर्जयति। आर्जिजत्)। प्राज्यतइत्यत्र कर्मादौ यकि। *“उपसर्गादृति धातौ”*। परे पूर्वपरयोर्वृद्धिरेकादेश इति आर्वृद्धिः। (अर्जित्वा)। “न क्त्वा सेट्” इत्यकित्त्वाद्गुणः। ऋज्यम्। ‘ऋदुपधाच्चाक्लृपिचृतेः” ॥ इति भावकर्मणोः क्यप् ॥ १७४ ॥

ऋजि भृजी भर्जने ॥ द्वितीय ईदित्। भर्जनं पाकविशेषः। (ऋञ्जते। प्रार्ञ्जते) ॥ “उपसर्गादृति” इति वृद्धिः। ऋञ्जां चक्रे। आनृञ्जइति संमतातरङ्गिण्योः। तदसत्। नुम्विधावुपदेशिवद्वचनात्। अत एव काश्यपमैत्रेयादय आममेव सर्वे उदाजह्रुः। (ऋञ्जिता। ऋञ्जिष्यते। ऋञ्जताम्। आर्ञ्जत। ऋञ्जेत। ऋञ्जिषीष्ट। आर्ञ्जिष्यत। “आटश्च” इति वृद्धिः। ऋञ्जिजिषते। “न न्द्राः” इति नवर्जं द्विरुच्यते। (ऋञ्जयति। मा भवान् ऋञ्जिजत्। भर्जते। बभृजे। भर्जितेत्यादि। बिभर्जिषते। बरीभृज्यते)। “रीगृदुपधस्य च” इति रीक्। (बर्भृजीति। बरिभृजीति। बरीभृजीति। बर्भर्क्ति। बरिभर्क्ति। बरीभर्क्ति)। “रुग्रिकौ च लुकि” इति रुग्रिकौ, (भर्जयति। अबीभृजत्।) उर्ऋद्वा। अन्यदा (अबभर्जत्। भृक्तः। भृक्तवान्)। “श्वीदितो निष्ठायाम्” इति अनिट्त्वम्। भर्गः। घञि कुत्वम्। भ्रस्ज पाक इति तुदादौ ॥ १७६ ॥

एजृ भ्रेजृ भ्राजृ दीप्तौ । (एजते । भ्रेजते) "एङि पररूपम्" । एजां चक्रे । एजितेत्यादि । एजिजिषते । एजयति । मा भवानेजिजत्) ऋदित्त्वान्नोपधाह्रस्वः । अन्यथा इदिधदित्यादिवद् द्विर्वचनात्पूर्वमेवोपधाह्रस्वः स्यात् । अङ्गमेजयतीत्यङ्गमेजयः । "एजेः खश्" इति ण्यन्तादस्मात्कर्मण्युपपदे खशः शित्त्वात्सार्वधातुकत्वाच्छपि गुणायादेशौ । अन्यथार्धधातुकत्वात् "ण्यल्लोपः" इत्यादिना गुणं बाधित्वा णिलोपः स्यात् । खित्त्वात् "अरुर्द्विषदजन्तस्य" इति पूर्वपदस्य मुम् । वृत्तौ तु एजृ कम्पनइति परस्मैपदिण्यन्तात् खशुक्तः उदेजयतीत्युदेजयः । "अनुपसर्गाल्लिम्प०" इत्यादिना उत्पूर्वात् ण्यन्तादस्माच्छप्रत्यये शपि गुणायौ । अनुपसर्गग्रहणमर्थादन्यविशेषणम् । अत्राप्युपसर्गान्तरनिवृत्त्यर्थं च, तेन (समुद) इत्यादौ अचि णिलोपः । (भ्रेजते । भ्रेजितेत्यादि । बिभ्रेजिषते । बेभ्रेज्यते । बेभ्रेजीति । बेभ्रेक्ति । भ्रेजयति । अबिभ्रेजत्) "ह्रस्वः" इति इकारोभ्यासस्य, पूर्ववद्दित्वान्नोपाधाह्रस्वः । भ्राजत इत्यादि भ्रेजिवत् । "व्रश्चभ्रस्जसृज" इत्यादिना झलि पदान्ते च विधीयमानं षत्वमस्य नास्ति । राजिसाहचर्यात्फणादिपठितस्यैव तत्र ग्रहणादिति मैत्रेयक्षीरस्वामिसंमताकारादयः । एवं चावश्यपठितव्येन फणादिकेन भ्राजत इत्यादीनां सिद्धेरिह पाठोऽनार्ष इवेति न्यासोक्तं दुरुक्तं, यद्वा तत्रापीवशब्देन पूर्वोक्त एव पक्षः सूच्यते । (भ्राजयति । अबिभ्रजत् । अबभ्राजत्)। *भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्* इति चङ्परेणौ उपधाह्रस्वविकल्पः। एवं चास्य ऋदित्त्वमनुदात्तेत्त्वमात्रफलम् । भ्राजिष्णुः । "भुवश्च" इति चकारादिष्णुच् । विभ्राक् । "भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप्" "चोः कुः" इति कुत्वम् । व्रश्चादिसूत्रे राजिसाहचर्यात् फणादिकस्यैव ग्रहणमित्युक्तत्वान्न षत्वम् । यत्तु वृत्तौ क्विप्सूत्रे विभ्राडिति कृतषत्वस्यैवोदाहरणं तद्व्यनुबन्धकत्वेपीह फणादिकमपि गृह्यत इति सूचयितुं न त्वस्यापि षत्वमस्तीति । अत्र रेजिरपि क्वचित्पठ्यते, तदनार्षमिव । यदाह भट्टभास्करः । 'रेजते अग्ने पृथिवीमखेभ्य' इत्यत्र राजतेश्छान्दसत्वमिति ॥ १७९ ॥

ईज गतिकुत्सनयोः । (ईजते । ईजांचक्रे । ईजिता) इत्यादि । कर्मणि (ईज्यते) इत्यादि । (ईजिजिषते । ईजयति । मा भवानिजिजत्) द्विर्वचनात्पूर्वं "णौ चङि"ति ह्रस्व इत्युक्तम् । वर्चादय उदात्ता अनुदात्तेतः ॥ १८० ॥

शुच शोके । एतदादयो व्रजन्ता उदात्ता उदात्तेतः ॥ (शोचति । शुशोच । शोचिता । शुशुचिषति । शुशोचिषति । शुचित्वा ।) शोचित्वा । क्त्विविकल्पः।(शोशुचीति । शोशोक्ति । शोचयति। अशूशुचत्)"दीर्घो लघोः"। (शोचनः) "जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपद'इति तच्छीलादौ युच् । प्रशुचितः । "उदुपधाद्०" इति क्त्विविकल्पः । शूद्रः। "शुचेर्दश्च" इति रक्प्रत्ययो दकारोन्तादेशः दीर्घश्च, [शूद्रा चामहत्पूर्वा जातिः] इत्यजादिपाठात् "जातेरस्त्रीविषयाद०" इति ङीषं बाधित्वा स्त्रियां टापि शूद्रा । जातिवचनात्पुंयोगे शूद्रीति ङीष् भवति । अमहत्पूर्वेत्युक्तेर्महाशूद्रशब्दाज्जातिलक्षणो ङीषेव भवति महाशूद्रीति । महाशूद्रशब्दो ह्याभीरजातिवचनः । अयमेवामहत्पूर्वस्येतिप्रतिषेधो ज्ञापकः स्त्रीप्रत्ययेषु तदन्तविधेः । (शोकः) । घञ् वार्त्तिकमते "तुन्दशोकयो०" इति निपातनान् कुत्वमेष्टव्यम् । शुचिर् पूतीभावइति दिवादौ ॥ १८१ ॥

कुच शब्दे तारे ॥ (कोचति । चुकोच । कोचिता) इत्यादि पूर्ववत् (कुचः) इगुपधात्कः । कुच गताविति स्वामी, अयं सम्पर्चनार्थे ज्वलादौ, पुनः पाठे प्रयोजनं तत्रैव वक्ष्यते । सङ्कोचनार्थस्तुदादौ ॥ १८२ ॥

कुञ्च क्रुञ्च कौटिल्याल्पीभावयोः ॥ दन्त्योपधौ । गतिकौटिल्याल्पीभावयोः, गतौ कौटिल्ये द्रव्याल्पत्वे चेति क्षीरस्वामी । (कुञ्चति । चुकुञ्च । कुञ्चितेत्यादि । कुचुञ्चिषति चोकुच्यते) "अनिदिताम्०" इति नलोपः (चोकुञ्चीति) "न लुमताङ्गस्य" इति निषेधात् प्रत्ययलक्षणेन नलोपो न भवति, "चोः कु" इति। कुत्वेन चकारे निवर्त्तिते निमित्ताभावे नैमित्ति-

कस्याप्यभाव इति ञकारे निवृत्तेऽनुस्वारस्य पुनः परसवर्णो ङकारः। (अचोकुञ्चीत् अचोकुन्) संयोगान्तलोपे सति पूर्ववन्निमित्ताभावात् ञकारेऽनुस्वारे च निवृत्ते नकारोऽवतिष्ठते (कुञ्चयति। अचुकुञ्चत्) चङपेक्षो "अनिदिताम्०" इति नलोपो णिलोपस्य स्थानिवत्त्वात् "असिद्धवदत्रा०" इत्यसिद्धत्वाद्व्यवधानान्न भवति। (कुचितः, कुचितवान्)। "अनिदिताम्०" इति नलोपः। कुञ्चित्वेत्यत्र तु "न क्त्वा सेट्" इत्यकित्त्वान्नलोपो न भवति। निकुचितमनेनेत्यादौ भावादिकर्मणोः "उदुपधाद्०" इति कित्त्वविकल्पो न भवति, सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य इति। तथा चास्याः परिभाषायाः प्रयोजनवार्किम्—उदुपधत्वमकित्वस्य निकुचितमिति, इदमेवास्य।नोपधत्वे मानम्। अत एवोदित्पाठिनौ चन्द्रतरङ्गिणीकारौ प्रत्युक्तौ, यतस्तन्मते "उदितो वा" इति क्त्वायामिटो विकल्पनान्निष्टायां "यस्य विभाषा" इति प्रतिषेधात्सेटो निष्ठाया एवाभावः। इदित्पाठोप्यनेनैव प्रत्युक्तः। यत इदित्वान्नलोपस्य नैव प्रसङ्गः, निकुचितमित्यत्र "तितुत्रथसिसुसरकसेषु च" इति तिप्रत्ययस्य विधीयमानमनिट्त्वं तितुत्रेष्वग्रहादीनामित्युक्तत्वान्न भवति। एवं कुञ्चतीत्यादि कुङ् "ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च" इति क्विन् तस्य सर्वापहारी लोपः। पदत्वे चकारस्य संयोगान्तलोपे "क्विन्प्रत्ययस्य कुः" क्विन्प्रत्ययो यस्माद्विहितस्तस्य पदस्य कवर्गादेश इति नकारस्य ङकारः। संयोगान्तलोपात्पूर्वं प्रत्ययलक्षणेन "अनिदिताम्०" इतिलोपो न भवति। ऋत्विगित्यादिभिर्निपातनैः साहचर्यात्। अन्तस्याप्यलाक्षणिकस्य कार्यस्य ज्ञापनात्। तदुक्तं वृत्तौ। नलोपः कस्मान्न भवति। ऋत्विगित्यादिनिपातनैः साहचर्यादिति। अत एव साहचर्यादुपपदाधिकारेपि केवलात् क्विन्प्रत्ययः। (क्रुञ्चा) अजादिपाठाद्धलन्तादपि टाप् (क्रुञ्चैव क्रौञ्चः) "प्रज्ञादिभ्यश्चेति स्वार्थेण् प्रत्ययः (क्रुञ्चकीयो देशः)। "क्रुञ्चा ह्रस्वत्वं च" इति नडादिपाठात् चातुरर्थिकः छप्रत्ययस्तत्सन्नियोगेन कुगागमो ह्रस्वत्वं च। "चोः कुः" इत्यत्र यदुक्तं वामनेन। क्रुञ्चेत्यत्र सङ्गीतिवचनाञ्जकारस्य चकारे झलि परतः कुत्वं न भवति, "युजिक्रुञ्चांच"इति निपातनाद्वा। नकारोपधो वा धातुरपरे रेफवर्जितः कुञ्च कौटिल्याल्पीभावयोरिति पठ्यते, नलोपो निकुचित इत्यत्र दृश्यते, युजिक्रुञ्चामिति तस्यैव रेफाधिको नलोपाभावश्च निपात्यतइति तत्क्रुञ्चेर्नोपधत्वेपि क्रुञ्चाशब्दे दोष इत्येवंपरं न त्वयं धातुर्नास्ति। यद्वा ञकारोपध इत्येवं परम्। स्पष्टं चैवं तत्र न्यासपदमञ्जर्योः "न क्त्वासेट्" इत्यत्र च द्वावपि धातू न्यासकृतोपात्तौ। तथा "ऋत्विक्०" इत्यादिसूत्रे जयादित्यश्च, क्रुञ्चेर्नलोपः कस्मान्न भवति निपातनैः साहचर्यादिति ॥ १८४ ॥

लुञ्च अपनयने ॥ लुञ्चतीत्यादि पूर्ववत् (लुञ्चित्वा। "वञ्चिलुञ्च्यृतश्च" इति सेटः क्त्वः कित्त्वविकल्पनात् पक्षे नलोपः। केचिदमुं "लुचितं पठन्ति तदनार्षं, राजदन्तादिषु लुचितमिति पाठाद्, उदित्त्वे हि क्त्वायाम् "उदितो वा" इतीटो विकल्पनाद् निष्ठायां "यस्य विभाषा" इति प्रतिषेधाल्लुचितमिति न स्यात् ॥ १८५ ॥

अञ्चु गतिपूजनयोः ॥ (अञ्चति। आनञ्च। अञ्चितेत्यादि) गतौ व्यत्यञ्चतीत्यत्र "न गतिहिंसा०" इति तङ्निषेधः। पूजायां तु "नाञ्चेः पूजायाम्" इति नलोपनिषेधाद् (अञ्च्यते गुरुः, अञ्च्यादिति,भवति। अञ्चित्वा। अङ्क्त्वा) "उदितो वा" इति इड्विकल्पः। इटि "न क्त्वा सेट्" इत्यकित्त्वान्नलोपाभावः। निष्ठायां "यस्य विभाषा" इतीटः प्रतिषेधात्समक्तमिति, "अञ्चोनपादाने" इति निष्ठानत्वम्। अपादाने तूदक्तमुदकं कूपादिति। पूजायां तु क्त्वानिष्ठयोः "उदितो वा" इति विकल्पं "यस्य विभाषा" इति निषेधं च बाधित्वा "अञ्चेः पूजायाम्" इति नित्यमिट्। (अञ्चित्वा। अञ्चितोऽस्य गुरुः।) "मतिबुद्धिपूजार्थेभ्यश्च" इति वर्त्तमाने क्तः। मतिरिच्छा, बुद्धिर्ज्ञानं, पूजा सत्कारः, "क्तस्य च वर्त्तमाने" इति "न लोकाव्यय०" इति निषेधं बाधित्वा कर्त्तरि षष्ठी। अस्याश्च "क्तेन च पूजायाम्" इति समासो निषिध्यते। पूजितो यः सुरासुरैरपीत्यत्र वर्त्तमानक्तेन तक्रकौण्डिन्यायेन भूते क्तस्य बाधात्

तृतीया चिन्त्या । यद्वा तेनेत्यधिकार, "उपज्ञाते' इति भूते क्तेन निर्देशाद् अयं वर्त्तमानक्तेन न बाध्यत इति सामान्येन ज्ञापकाश्रयणेनायं प्रयोगः समर्थनीयः। तैलमुदच्यतेऽस्मिन्निति तैलोदङ्कुश्चर्ममयस्त्रिकाष्ठिः। "उदङ्कोनुदके" इति घञ्निपात्यते। उदके तूदकोदञ्चनम्। ल्युट्। "पुंसि संज्ञायाम्०" इति घस्तु न प्रत्युदाहृतः, घघञो रूपे स्वरे वा विशेषाभावात्। घञोपि कृदुत्तरपदप्रकृतिस्वरमाद्युदात्तत्वं बाधित्वा "थाथघञ्क्ताजबित्रकाणाम्" इति उत्तरपदं घञन्तादात्तमेव। प्रत्यञ्चतीति (प्रत्यङ्) "ऋत्विक्०" इत्यादिना क्विनि "अनिदिताम्०" इत्यादिना नलोपे सौ"उगिदचां सर्वनामस्थाने०"इति नुमि हल्ङ्यादिसंयोगान्तलोपयोः "क्विन्प्रत्ययस्य कुः" इति कुत्वं ङकारः, प्रत्यञ्चावित्यादि। भसंज्ञायां तु "अचः"। लुप्तनकारस्याञ्चतेरकारस्य लोपो भसंज्ञायामित्यल्लोपे *चौ* लुप्तनकारेञ्चतौ परे पूर्वपदस्य दीर्घ इति दीर्घे (प्रतीच इत्यादि) हलादौ जश्त्वे (प्रत्यग्भ्यामित्यादि) प्रत्यक्ष्वित्यत्र "खरि च" इति चर्त्वम्। नपुंसके तु स्वमोर्लुकि प्रत्यक्। द्विवचनबहुवचनयोः "नपुंसकाच्च"इति शीभावे भत्वे पूर्ववदल्लोपदीर्घयोः (प्रतीची) "जश्शसोः शिः" इति तस्य सर्वनामस्थानत्वाद् "नपुंसकस्य झलचः" इति नुमि (प्रत्यञ्चि) शेषं पूर्ववत्। स्त्रियां (प्रतीची) "अञ्चतेश्चोपसंख्यानम्" इति ङीपि भत्वे पूर्ववदल्लोपदीर्घत्वे। पूजायां तु सर्वत्र नकारस्य लोपनिषेधाच्छ्रवणम्। अत एव "अचः" "चौ" इति अल्लोपदीर्घत्वे न भवतः। (प्रत्यञ्चावित्यादि) पदत्वे संयोगान्तलोपे "क्विन्प्रत्ययस्य" इति कुत्वं ङकारः, सप्तमीबहुवचने *ङ्णोः कुक् टुक् शरि*। ङकारणकारयोः पदान्तयोर्यथासंख्यं कुक्टुकौ शरि वेति कुकि [चयो द्वितीयाः शरि पौष्करसादे०] इति वा खकारे (प्रत्यङ्क्षु प्रत्यङ्षु प्रत्यङ्ख्ष्विति) त्रीणि रूपाणि। नपुंसके शीभावे विशेषः।उत्पूर्वत्वे *उद ईत्* इति उदः परस्य लुप्तनकारस्याञ्चतेरादेः भसंज्ञायामीकारे (उदीचः) इत्यादि। अन्यत्सर्वं प्रत्यक्शब्दवत्। प्रतीच्यादिभ्यो *दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः* इति दिगादिवृत्तिभ्यः सप्तम्याद्यन्तेभ्यः स्वार्थे वास्तातिः। दिशि दृष्टः शब्दो दिक्शब्दः। "अञ्चेर्लुक्" इत्यस्तातेर्लुक्। "लुक् तद्धितलुकि" इति स्त्रीप्रत्ययस्य लुक्। (प्रत्यग्वसति। प्रत्यगागतः। प्रत्यग्रमणीयमित्यादि।) प्रत्ययलक्षणेन तद्धितान्तत्वात् "तद्धितश्चासर्वविभक्तिः"इति अव्ययत्वात्सुपो लुक्। अस्तातेरभावे प्रतीच्यामागतः,(प्रतीची रमणीया) इत्यादि। (प्रागेव पुरुषः प्राचीनः। प्रागेव कुलं प्राचीनम्। प्राच्येव ब्राह्मणी प्राचीना) इति "विभाषाञ्चेरदिक्स्त्रियाम्" इत्यञ्चत्यन्तात् प्रातिपदिकात्स्वार्थे वा खः। अदिक्स्त्रियामित्युक्तत्वाद् दिग्वृत्तेरप्यस्तात्यन्तादव्ययादलिङ्गादस्त्रीवृत्तित्वात्खो भवति प्राचीनं दिगिति। यदा सप्तमीपञ्चम्यर्थादस्मात् खस्तदापि सप्तमीपञ्चम्योरर्थस्याभिहितत्वात् प्रादिकार्थत्वात् प्रथमैव, (प्राचीनं दिशि वसति, प्राचीनं दिश आगत) इति। तथा च स्थानिवत्सूत्रे भाष्यं, (प्राचीनं ग्रामादाम्रा) इति, प्राचि देश इत्यर्थः। खान्तोयं स्वभावान्नपुंसकलिङ्गः, (प्राच्यम्। अपाच्यम्। उदीच्यम्। प्रतीच्यम्) "द्युप्रागपागुदक्प्रतीचो यत्" इति शैषिको यत् (सम्यक्।) "समः समि" इति अञ्चतावप्रत्ययान्त उत्तरपदे समः सम्यादेशः। तिर्यङ्। "तिरसस्तिर्यलोपे" इति "अचः" इति लोपाभावे तिर्यादेशे यण् लोपे तु (तिरश्च) इत्यादि। सहाञ्चतीति (सध्र्यङ्) "सहस्य सध्रिः"इत्यञ्चतावप्रत्ययान्त उरपदे सध्र्यादेशः। विष्वगञ्चतीति (विष्वगद्र्यङ्। देवानञ्चतीति देवद्र्यङ्) *विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये* अप्रयान्तउत्तरपदे चकारात्सर्वनाम्नश्च। (सर्वद्र्यङ् इत्यादि) अदसोद्र्यादेशे मतभेदः। "अदसोसेर्दादु दो मः" इति असकारान्तस्यादसो दकारात्परस्य विधीयमानमुत्वमकाररेफयोरपि, तथा दो म इति मत्वमपि द्वयोरपि दकारयोरिति (अमुमुयङ्) इति भवतीति केचित्। अदसो रेफादेशस्योकारस्य इकारापेक्षया यण् उत्वस्य पूर्वत्रासिद्धत्वान्न भवति। शसादौ भत्वे "अचः" इत्यल्लोपे 'चौ' इति अद्रेरिकारस्य दीर्घे पूर्ववदुकारस्य रेफादेशस्य यणभावे (अमुमुईचः) इत्यादि। अपरे तूत्वमत्वे अन्त्यसदेशयोरेव रेफदकारयोरिति (अदमुयङिति)

रूपं प्रतिपन्नाः। अत्रापि पूर्ववदुकारस्य यणभावः शसादावल्लोपादि च। अन्ये च असेरिति पदमः सेः सकारस्थानिकोऽकारो यस्येति व्याचक्षाणा अद्र्यादेशे त्यदाद्यत्वाभावान्नोत्वमत्वे इति अद्र्यङिति रूपमाहुः। तथा च श्लोकवार्त्तिकम्

अदसोद्रेः पृथङ् मुत्वं के चिदिच्छन्ति लत्ववत्।
के चिदन्त्यसदेशस्य नेत्येके ऽसेर्हि दृश्यते॥ इति

अञ्चु गतियाचनयोरित्यग्रे स्वरितेत्। विशेषणार्थो युजादौ॥ १८६॥

वञ्चु चञ्चु तञ्चु त्वञ्चु म्रुञ्चु म्लुञ्चु म्रुचु म्लुचु गत्यर्थाः॥ (वञ्चति। ववञ्च। वञ्चितेत्यादि) आशीर्लिङि यासुटः कित्वादनुनासिकलोपे वच्यात्। विवञ्चिषति। वनीवच्यते) "नीग्वञ्चस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम्" इति यङ्लुकोरभ्यासस्य नीगागमः (वनीवञ्चीति। वनीवङ्क्ति)। यङो लुका लुप्तत्वान्नलोपाभावः। वनीवक्त इत्यादौ तसादीनां ङित्त्वेन नलोपः। माणवकं वञ्चयते। विप्रलभतइत्यर्थः। *गृधिवञ्च्योः प्रलम्भने* इति ण्यन्ताभ्यामाभ्यामकर्त्रभिप्रायेपि तङ्। प्रलम्भनं मिथ्याफलाख्यानमतोऽन्यत्र वञ्चयति वञ्चयतइत्युभयं भवति। (वङ्क्त्वा। वञ्चित्वा) "उदितो वा" इतीड्विकल्पः। "वञ्चिलुञ्च्यृ" इति सेटः क्त्वो वा कित्वविधानात्पक्षे नलोपः (वक्तः। वक्तवान्) "यस्य विभाषा" इत्यनिट्त्वं (वञ्च्यं वञ्चन्ति वणिजः)। गन्तव्यं गच्छन्तीत्यर्थः। "ऋहलोर्ण्यत्" इति ण्यति "चजोः कु घिण्ण्यतोः" इति कुत्वं "वञ्चेर्गतौ" इति निषिध्यते। अन्यत्र वङ्क्यं काष्टमिति कुत्वं भवति। कुटिलमित्यर्थः। वक्रम्। "स्फायितञ्चि" इत्यादिना रकि। चञ्चतीत्यादि पूर्ववत्। चञ्चत्। चञ्चन्नेव कश्चिद् विशेषश्चञ्चत्कः। यश्च मण्यादिः स्वयमचञ्चन्नपि प्रभया चञ्चन्निव लक्ष्यते सोपि चञ्चत्कः। "स्थूलादिभ्यः प्रकारवचने कन्" इत्यत्र [चञ्चद्बृहतोरुपसंख्यानात्] कः। प्रकारश्च भेदः सादृश्यं च। अपरे [चञ्चाबृहतोरुपसंख्यानम्] इति पठन्ति, तृणमयः पुरुषश्चञ्चा, तत्प्रकारश्चञ्चकः। "केणः" इति ह्रस्वः। (तञ्चति। तक्रम्) "स्फायितञ्चि" इत्यादिना रक् (त्वञ्चति।। म्लुञ्चति। म्रोचति म्लोञ्चति। अम्रुचत्। अम्रोचीत्। म्रुञ्चति। म्लुञ्चति। म्रुचति। म्लोचति। अम्रुचत्। अम्रुचीत्। अम्लुचत्। अम्लोचीत्) "जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च" इति च्लेर्वा ऽङ्। (मुमुचिषति। मुम्रोचिषति म्रुचित्वा। म्रोचित्वा) "रलो व्युपधाद्" इति कित्त्वविकल्पः। भावादिकर्मणोः उदुपधादितिकित्वविकल्पनाद् (म्रुचितमनेन, म्रोचितमनेनेत्यादि) एवं म्लुचेरपि सर्वेषामुदित्वेन क्त्वायामिड्विकल्पनान्निष्ठायामनिट्त्वम्। वच प्रलम्भनइति चुरादौ। तञ्चू सङ्कोचनइति रुधादौ॥ १९४॥

ग्रुचु ग्लुचु कुजु खुजु स्तेयकरणे (ग्रोचति। जुग्रोच। ग्रोचितेत्यादि। ग्लोचतीत्यादि म्लुचिवत्।) जृस्तम्भुसूत्रे ग्रुचिमपि केचित्पठन्ति (कोजति। खोजति) इमावपि म्लुचिवत्, अङभावो विशेषः (प्रणिकोजति। प्रणिखोजति) *शेषे विभाषा* इति उपसर्गस्थान्निमितात्परस्य नेर्णत्वं तत्रैव सूत्रे "कखादावषान्तउपदेश" इति पर्युदासान्न भवति, शेषश्च गदादिव्यतिरिक्तो धातुः। (ग्रोकं, ग्रक्यं) घञ्ण्यतो "श्चजोः कु घिण्ण्यतोः" निष्ठायामनिटः इति वार्त्तिकसूत्रेण कुत्वम्॥ १९८॥

ग्लुञ्च षस्ज गतौ॥ ग्लुञ्चति। जुग्लुञ्च। ग्लुञ्चितेत्यादि। लुङि "जृस्तम्भु०" इत्यादिना वाऽङ्नलोपे। (अग्लुचत्। अग्लुञ्चीत्) अङ्विधौ ग्लुचिग्लुञ्च्योरेकतरोपादानेनापि अग्लुचदग्लोचीदिति सिद्धौ उभयोपादानमर्थभेदादिति केचित्। अपरे तूभयोपादानसामर्थ्याद् ग्लुञ्चेर्नलोपो न भवतीति अग्लुञ्चदिति चतुर्थमपि रूपमाहुः। इदमुन्नाष्यमन्यतरोपादानेनापि रूपत्रयसिद्धेरन्यतरच्छक्यमकर्त्तुमिति प्रतिपादितत्वात्। अनेकार्थत्वाद् धातुनामत्र विषये ऽर्थभेदो न प्रयोजक इति तत्र कैयटे (ग्लुचित्वा सज्जति) "धात्वादेः षः सः" इति द्वितीयस्य सकारस्य जशूत्वेन शकारे तस्य 'झलां जश झशिति जश्त्वेन जकारः (ससज्ज।

सज्जितेत्यादि । सिसज्जिषति) "स्तौतिण्योरेव०" इति नियमात्षणाबषत्वं, हेतुमति च" इत्यत्र यदभिप्रायेषु भाष्यप्रयोगादयमात्मनेपद्यपि, अतो ऽस्यात्मनेपदं दूषयन्तो वर्द्धमानक्षीरस्वामिप्रमुखा एव दुष्टाः । अत्र सञ्जिमपि के चित्पठन्ति 'तमजिकोसश्च'इत्यादि च दृश्यते ॥२००॥

गुजि अव्यक्ते शब्दे ॥ (गुञ्जति । जुगुञ्ज । गुञ्जितेत्यादि । गुञ्जा) *गुरोश्च हलः* गुगुरुमतो हलन्ताद्धातोरकार इत्यकरः, (गुञ्ज्यते) इदित्त्वान्नलोपाभावः । अत्र स्वामी अनिदिदित्येकइति स्वसूत्रे । सुधाकरस्तु अनिदित्पारायणेष्वपाठात्, लक्ष्ये पुनरिदमविगीतमिति । शाकटायनस्तु द्वावपि पपाठ । गुञ्जशब्दइति तुदादौ ॥ २०१ ॥

अर्च पूजायाम् ॥ (अर्चति । आनर्च । अर्चितेत्यादि) अयं युजादौ स्वरितेत् पठिष्यति । तत एवार्चतीति सिद्धे क्रियाफलस्य कर्तृगामित्वे परस्मैपदार्थं इह पाठः । अयमात्मनेपदीति शकटायनः, प्रयोजनं तु तन्मते क्रियाफलस्याकर्तृगामित्वेपि तङ् । 'यः पूर्णदुदर्चति अविरह्मीमुदचन्त्वाप' इत्यादिदर्शनात्, अञ्च इत्येकइत्याभरणोक्तं युक्तम् ॥ २०२ ॥

म्लेच्छ अव्यक्ते शब्दे ॥ इहाव्यक्तशब्दोऽस्फुटशब्दोपशब्दश्च । उक्तं हि पस्पशायां 'तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितव्यै म्लेच्छोह वा एष यदपशब्द' इति, न म्लेच्छितवा इत्यस्य पर्यायो नापभाषितवाइति कैयटे । (म्लेच्छति । मिम्लेच्छ म्लेच्छितेत्यादि) *दीर्घात्* दीर्घाच्छकारे परतो दीर्घस्य तुगिति तुक् *तस्मिन्निति निर्दिष्टे पूर्वस्य* इति सप्तमीनिर्देशे पूर्वस्य षष्ठी प्रकल्प्येति दीर्घस्य तुगागमः । ननु "तस्मादित्युत्तरस्य" इति पञ्चमीनिर्देशे उत्तरस्य षष्ठी प्रकल्प्येत्युक्तत्वादिह चानवकाशया दीर्घादितिपञ्चम्या "छे च" इत्यत्र सावकाशाया छइति सप्तम्या एव षष्ठी प्रक्लृप्सियुक्ता, ततश्च तुकः कित्त्वेन छकारात्परत्वे चुत्वचर्त्वयोर्म्लेच्चतीति द्विचकारकं रूपं स्यात् । नैष दोषः । यतः "विभाषा सेनासुराच्छाया०" इति निर्देशाल्लिङ्गात् पञ्चम्या एव षष्ठी प्रकल्पयिष्यते (मिम्लेच्छिषति । मेम्लेच्छ्यते । मेम्लेच्छीति । मेम्लेष्टि । मेम्लेष्टः । मेम्लेच्छति) इत्यादि, झलि 'व्रश्च०" आदिना षत्वे ष्टुत्वम् । म्लेक्षि । "षढोः कः सि" इति कत्वे षत्वं, (म्लेश्मि म्लेश्म) इत्यत्र *च्छ्वोः । शूडनुनासिके च* च्छकारवकारयोर्यथासङ्ख्यं शकारोठौ भवतो ऽनुनासिकादौ प्रत्यये झलादौ च ङ्क्तीति च्छकारस्य शकारः । अयं च "क्रमश्च क्त्वि" "च्छ्वो" इतिनिर्देशात्सतुक्कस्य । अन्त्यादेशस्तु न भवति "नानर्थके ऽलोत्यस्य विधि" इति नञो ङित्करणाद्वा, अन्त्यादेशे विश्न इत्यत्रानिगुपधत्वादेव गुणाप्रसङ्गात् किं कित्त्वेन । अत एव ङित्त्वाच्छ्वोरितिनिर्देशः सतुक्कस्येत्यपि ज्ञायते, ये तद्विधौ ङ्क्तीति नानुवर्त्तयन्ति तेषां झलादिमात्रे शकारे कृते तस्यैव "व्रश्च०" आदिना षत्वं द्रष्टव्यम् । अत्र मते तत्र छग्रहणं व्यर्थं स्यात्, वृत्तिप्रदीपे तु छस्य शावादेश उक्तः, तुगभावस्तु "अकृतव्यूहाःपाणिनीयाः" कृतमपि शास्त्रं निवर्त्तयन्तीति । म्लिष्टम् । "क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरब्धफाण्टबाढानि मन्थमनस्तमः सक्ताविस्पष्टस्वरानायासभृशेषु" इति अविस्पष्टार्थे निपातितः । अपशब्दे तु म्लेच्छितमिति भवति. अस्य शपि पाठो म्लेच्छतीति "शप्श्यनोर्नित्यम्" इति नित्यनुमर्थः, शे हि विकल्पः स्यात, स्वरे भेदः । शपि शपः पित्त्वाद् "अनुदात्तौ सुप्पितौ" इति अनुदात्तः, शस्तु प्रत्ययस्वरेणाद्युदात्तः । एवमीदृशामन्येषामपि धातूनां विकरणभेदे फलत्रयम् । अयञ्चुरादावपि ॥ २०३ ॥

लछ लाछि लक्षणे ॥ (लच्छति । ललच्छ । लच्छितेत्यादि) *छे च* ह्रस्वस्य छे परतस्तुगिति तुक् । अलच्छीदित्यत्रान्तरङ्गत्वात्पूर्वं तुकि अकारस्यालघुत्वाद् "अतो हलादे०" इति वा वृद्धिर्न भवति । तथा ललच्छेत्यादौ "अत उपधायाः"इति वृद्धिरनुपधात्वान्न भवति । लाञ्छतीत्यादिपूर्ववत्, लालाञ्छ्यत इत्यादाविदित्त्वान्नलोपो न भवति (लाञ्छः) 'क्विप०" इति सोपपदनिरुपपदसाधरणे क्विपि तस्य लोपे "च्छ्वोः शू०" इत्यत्र द्विच्छकारनिर्देशः, एकः सतुक्को ऽपरः केवल इति न्यासपदमञ्जर्यादिपूक्तत्वात् (लान् लांशौ

लांश) इत्यादि भवति । च्छ्वोरिति निर्देशः पूर्वं वितुक्सतुक्योः समाहारद्वन्द्वे पश्चाद् वकारेणेतरेतरयोगे द्विवचनयथासङ्ख्ययोरुपपत्तिः, "द्वन्द्वाच्चुदषहान्तात्" इति समासान्तः सौत्रत्वान्न भवति । हरदत्तस्तु सतुक्छकारवकारयोः समाहारद्वन्द्वे पश्चाद्वितुक्छेनेतरेतरयोग इति समासान्ताभावो द्विवचनोपपत्तिश्चेति । अत्र मते सतुक्कस्यापि च्छुकारस्योठ् स्यादिति तदभावे यत्नः कर्त्तव्यः । एवं च यङ्लुक्यपि शत्वे (लालांष्टि लालीष्टि लालांष्ट इत्यादि पूर्ववद्भवति) शूड्विधौ क्ङिद्ग्रहणानुवृत्तिपक्षे लालांष्टीत्यादौ व्रश्चादिसूत्रे छग्रहणे षत्वम्, तत्रापि पूर्ववत् केवलोपि छो गृह्यते ॥२०५॥

वाञ्छि इच्छायाम् ॥ (वाञ्छतीत्यादि लाञ्छिवत्) ॥ २०६ ॥

आञ्छि आयामे ॥ (आञ्छति। आञ्छ ।) अत्र लिट्यभ्यासह्रस्वे "अत आदेः"इत्यत्र तपरकरणं स्वाभाविकह्रस्वपरिग्रहार्थमिति न्यासकारहरदत्तादिभिः प्रतिपादितत्वाद् दीर्घाभावाद् नुडभावे सवर्णदीर्घः । अन्ये तु तपरकरणं मुखसुखार्थमिति आनाञ्छेत्युदाहरन्तीति मैत्रेयः । (आञ्छितेत्यादि । आञ्चिच्छिषति ।) "न न्द्राः" इति नकारवर्जं द्वितीयैकाच् द्विरुच्यते । (आञ्छयति आञ्चिच्छत्) ॥ २०७ ॥

ह्रीच्छ लज्जायाम् (ह्रीच्छति जिह्रीच्छ । ह्रीच्छितेत्यादि) म्लेच्छिवत् । ह्री लज्जायामिति जुहोत्यादौ ॥ २०८ ॥

हुर्छा कौटिल्ये ॥ इह कौटिल्यमपसरणमिति मैत्रेयस्य मतम् । (हूर्छति । जुहूर्छेत्यादि) "उपधायां च" इतीको दीर्घः । (जुहूर्छिषति । जोहूर्छीति । जोहोर्त्ति । जोहूर्त्तः । जोहोर्षि । जोहोर्मि । जोहूर्वः । जोहूर्मः) । *राल्लोपः* इति रेफात्परयोः छ्वोर्लोपः क्वौ झलादावनुनासिकादौ प्रत्यये । अत्र सतुक्कस्य छस्याभावात् केवलो गृह्यत इति वृत्त्यादौ । हूः । हुरौ हुरः । "राल्लोपः" तत्र पदत्वे च *र्वोरुपधाया दीर्घ* इति रेफवकारान्तस्य धातोः पदस्योपधाया इको दीर्घ इति इको दीर्घः । हूर्णः । हूर्णवान् । "आदि तश्च" इत्यनिट् निष्ठायाम् । राल्लोपे "रदाभ्याम्" इति नत्वे "रषाभ्याम्" इति णत्वम् । भावादिकर्मणोस्तु *विभाषा भावादिकर्मणो* इति आदितो निष्ठायाः पक्षे इड्विधानाद् हूर्णमनेन, हूर्छितमनेनेत्यादि द्रष्टव्यम् ॥ २०९ ॥

मूर्छा मोहसमुच्छ्राययोः (मूर्छति) हूर्छिवत् । विशेषस्त्वनिटो निष्ठायां "न ध्याख्यापॄमूर्छिमदाम्" इति नत्वनिषेधः (मूर्त्तः । मूर्त्तवान् । मूर्त्तमनेनेत्यादि । मूर्छाऽस्य सञ्जाता, मूर्छितः) *तदस्य सञ्जातं तारकादिभ्य इतच्* । तदिति प्रथमासमर्थात् सञ्जातोपाधिकादस्येत्यर्थादितच् ॥ २१० ॥

स्फुर्छा विस्तृतौ (स्फूर्छति) । पुस्फूर्छेत्यादि) पूर्ववत् । अभ्यासे खयः शेषः ॥२११॥

युच्छ प्रमादे (युच्छति । युयुच्छ । युच्छितेत्यादि) म्लेच्छादिवत् । अन्तरङ्गत्वात्तुकि अलघूपधत्वान्न गुणः । "वार्णादाङ्गं बलीयः" इत्याङ्गस्य बलीयस्त्वं यत्राङ्गवार्णयोर्युगपत्प्राप्तिः समानाश्रयत्वं च तत्रेति, इहवैपरीत्यान्न भवति ॥ २१२ ॥

उच्छि उञ्छे ॥ 'उञ्छः कणश आदानं कणिशाद्यर्जनं शिलम्' इति यादवप्रकाशः । एवं विज्ञानेश्वरोपि । "उञ्छति" सूत्रे उञ्छति उच्चिनोतीत्यर्थ इति न्यासो बदराण्युञ्छति बादरिकः । श्यामाकानुञ्छति श्यामाकिक इत्युदाहरतो वृत्तिकारस्यापि व्यापित्वेनोच्चयनार्थ इत्यभिप्रायो लक्ष्यते (उञ्छति । उञ्छांचकार । उञ्छितेत्यादि) इदित्त्वाद् उञ्छ्यते इत्यादौ नलोपो न भवति (उञ्चिच्छिषति) "न न्द्रा०" इति छादेर्द्विर्वचनमभ्यासस्य चर्त्वे ह्रस्वे "छे च" इति तुकि हलादिशेषो न भवति, अवयवभक्तत्वेनाभ्यासभक्तत्वाभावात् । न च स्वङ्गुलिर्देवदत्त इत्यादिवत् इहावयववायवस्य समुदायवयवत्वम् । यतः "छेच" इत्यात्रागमिनो भावादेव पूर्वसूत्रात् ह्रस्वस्येत्यनुवृत्तिसिद्धावपि चकारेण तदनुकृष्यते, पूर्वसूत्रे ह्रस्वान्तस्येति स्थितम् । इह तु तथा माभूदिति हि भावः । (उञ्छयति मा भवानुञ्चिच्छत्) अयं

तुदादौ पठिष्यते । स पाठ (उञ्छती उञ्छन्तीति) शीनद्योर्नुम्विकल्पार्थोऽवश्याभ्युपगन्तव्य इति पाठः किमर्थं इति चेत् स्वरार्थः । उञ्छतीत्यत्र शपि "अनुदात्तौ सुप्पितौ" इति शप्तिपोरनुदात्तत्वेन । *धातोः* । धातोरन्त उदात्त इत्युकारस्योदात्तत्वे "उदात्तादनुदात्तस्य स्वरितः" इति शबकारस्य स्वरितत्वे "स्वरितात् संहितायामनुदात्तानाम्" इति तीकारस्य प्रचयत्वे अचः क्रमेणोदात्तस्वरितप्रचया भवन्ति, शे तु आद्युदात्तत्वे प्रत्ययादित्वेनाकारयोदात्तत्वे *अनुदात्तं पदमेकवर्जम्* यत्र पदे उदात्तः स्वरितो वा विधीयते तत्र तं वर्जयित्वाऽन्यदनुदात्तमिति धातोरप्यनुदात्तत्वे पूर्ववत्तिपः स्वरितत्वेऽचोनुदात्तोदात्तस्वरिता भवन्ति । विपर्ययः कस्मान्न भवति धातोरन्तोदात्तत्वेशस्यानुदात्तत्वमिति यतोऽयं स्वरभेदो न स्यात् । नैतदस्ति । सति शिष्टस्वरो बलीयानिति यस्मिन्नसति यः शिष्यते स बलीयानित्यर्थः । ननु "अन्यत्र विकारणेभ्य" इत्यपि तत्र पठ्यते । नायं पर्युदासो धातुस्वरविषयः । किंतु लसार्वधातुकस्वरविषयः । लादेशस्य सार्वधातुकस्य प्रत्ययाद्युदात्तत्वं सति शिष्टेपि विकरणस्वरो न बाधत इति, अस्य च ज्ञापकं तादृशमेव । तथाहि । "तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमन्ह्विङोः" इति तासेः परस्य सार्वधातुकस्य सति शिष्टस्वरेणानुदात्तत्वेपि सिद्धे पुनर्विधानाज् ज्ञायतेऽन्यत्र विकरणेभ्य इति तच्च लसार्वधातुकविषयम् ॥ २१३ ॥

उच्छी विवासे ॥ समाप्तिविवास इति तरङ्गिण्यां, विपूर्वश्चायं प्रायः प्रयुज्यतइति पुरुषकारे (व्युच्छति । । व्युच्छां चकार । व्युच्छितेत्यादि) आम्विधावागमनिमित्ता गुरुमत्ता गृह्यते, अत एव अनृच्छ" इति प्रतिषेधः (उचिच्छिषति) अत्र द्विवर्चने तुकि श्चुत्वस्य पूर्वत्रासिद्धत्वात् हलादिशेषेण तकारस्य शेषे प्राप्ते [षर्पूर्वाः खय इति वक्तव्यं] शर्पूर्वाः खय इत्यत्र शर्ग्रहणमपनीय खर्ग्रहणं कर्त्तव्यमित्यर्थः । तेन शर्पूर्वाः खयः शिष्यन्ते अन्ये निवर्त्तन्त इति तकारस्य निवृत्तौ छकारस्य "अभ्यासे चर्च" इति चर्त्वे रूपम् । अभ्यासचर्त्वस्य तुक्यसिद्धत्वादुकारस्य पुनस्तुङ्ग भवति [अभ्यासजश्त्वचर्त्वमेत्वतुकोः सिद्धं वक्तव्यम्] इति चर्त्वस्य सिद्धत्वात् । अत्र पूर्वत्रासिद्धीयमद्विर्वचनइति अनाश्रित्योक्तं षर्पूर्वाः खय इति । यदाहुर्हरदत्तादयः । तदाश्रयणे हि श्चुत्वस्य द्विर्वचने सिद्धत्वाद्धलादिशेषेण छस्य निवृत्ताविष्टसिद्धेः (व्युष्टः । व्युष्टवान्) "श्वीदितो निष्ठायाम्" इतीड्भावः (व्युष्टे दीयते कार्यं वा वैयुष्टम् । "व्युष्टादिभ्योऽण्" इति "तत्र च दीयते कार्यम्०" इति विषयेऽण् प्रत्ययः । "न य्वाभ्याम्०" इति ऐच् वृद्धेरभावश्च । अयमपि तुदादौ पठिष्यते । पूर्ववदुभयत्र प्रयोजनम्॥२१४

ध्रज ध्रजि धृज धृजि ध्वज ध्वजि गतौ ॥ (ध्रजति । दध्राज । ध्रजितेत्यादि । अध्रजीत् । अध्राजीत्) । "अतो हलादे०" इति वा वृद्धिः । (दिध्रजिषति । दाध्रज्यते । दाध्रजीति । दाध्रक्ति) "चोः कुः" झलि पदान्ते च । "खरि च" इति चर्त्वम् (ध्राजयति । अदिध्रजत् । ध्रञ्जति । दध्रञ्ज । ध्रञ्जितेत्यादि । दिध्रञ्जिषति । दाध्रञ्ज्यते । दिध्रञ्जिषति । दाध्रज्यते । दाध्रञ्जीति । दाध्रङ्क्ति) लङि तिप्सिपोर्हल्ङ्यादिलोपे संयोगान्तलोपे च (अदाध्रन् । धर्जति । दधर्ज । धर्जितेत्यादि । दिधर्जिषति । दरीधृज्यते) "रीगृदुपधस्य च" इति रीक् (दर्धर्जीति । दरिधृजीति । दरीधृजीति । दर्धर्क्ति । दरिधर्क्ति । दरीधर्क्ति)' 'रुग्रिकौ च लुकि" इति रुग्रिग्रीकः । "नाभ्यस्तस्याच्" इति पक्षे न गुणः, एवं तसादौ (दर्धर्क्तः)इत्याद्युदाहार्यम् । (धर्जयति । अदधर्जत् । अदीधृजत् । उर्द्धा । धर्जित्वा) "न क्त्वा सेट्" इत्यकित्त्वादुगुणः, धृज्यम्, "ऋदुपधाच्चाक्लृपिचृतेः" इति क्यप् । धर्जः । "चजोः कुघिण्ण्यतोर्निष्ठायामनिटः" इति वार्त्तिकसूत्रेणकुत्वम् (धृञ्जति । दधृञ्ज । धृञ्जितेत्यादि । दिधृञ्जिषति । दरीधृञ्ज्यते) पूर्ववद्रीक् । (दाधृञ्जीति । दाधृङ्क्तीत्यादि धृञ्जिवत्) लङि तिप्सिपोर्हल्ङ्यादिलोपसंयोगान्तलोपयोरदाधृन् । संयोगान्तलोपस्यासिद्धत्वात् अलघूपधत्वात् प्रत्ययलक्षणेन न गुणः (धृञ्जयति । अदधृञ्जत् । ध्वजति । ध्वञ्जतीत्यादि) ध्रजधृजिवत् । तरङ्गिणीकाश्यपसंमतास्तु आद्यौ व्रजव्रजी इति दन्त्योष्ठ्यादी पठ्येते । सर्वत्र तवर्गीयादी एव २२०

कूज अव्यक्ते शब्दे (कूजति । चुकूज । कूजिता । कूजिष्यति । चोकूज्यते । चोकूजीति । चोकूक्ति । कूजयति । अचूकुजत् । कूजः । कूज्यम्) "न क्वादेः" इति निष्ठायां सेट्त्वात्कुत्वाभावः ॥ २२१ ॥

अर्ज षर्ज अर्जने ॥ (आनर्ज । अर्जितेत्यादि । अर्जिजिषति । अर्जयति । आर्जिजत् । स्वर्गः) वार्त्तिककारमते न्यङ्क्वादित्वात् कुत्वम् । (ऋजुः) "अर्जिदृश्" इत्यादिना कुप्रत्ययः, ऋजादेशश्च । अर्ज प्रयत्न इति चुरादौ । (सर्जति । ससर्ज । सर्जिता । सिसर्जिषति) "स्तौतिण्योरेव०" इतिनियमान्न षत्वम् । (सासर्ज्यते । सासर्क्तीत्यादि । सर्जयति । अससर्जत्) ॥ २२३ ॥

गर्जशब्दे ॥ (गर्जतीत्यादि) ॥ २२४ ॥

तर्ज भर्त्सने (तर्जति । ततर्जेत्यादि) अयं चुरादावपि ॥ २२५ ॥

कर्ज व्यथने ॥

खर्ज पूजने च ॥ (कर्जति । चकर्ज । कर्जिता । खर्जतीत्यादि) (खर्जूरः) "खर्जपिञ्जादिभ्य ऊरोलचौ" इत्यूरः ॥ २२७ ॥

अज गतिक्षेपणयोः (अजति । विवाय । विव्यतु विव्युः । विवयिथ । विवेथ । विव्यथुः । विव्य । विवाय । विवय । विव्यिव । *अजेर्व्यघञपोः* ॥ घञपोरन्यस्मिन्नार्द्धधातुके विषयभूते वीभाव इति वीभावे द्विर्वचने *एरनेकाचोऽसंयोगपूर्वस्य* धातोरवयवः संयोगो यस्मादिवर्णात्पूर्वो नास्ति तदन्तस्यानेकाचोऽङ्गस्याजादौ यणिति यण् । अत्र वकारस्य हल्परत्वात् "उपधायां च" इति दीर्घे "अचः परस्मिन्" इति यणः स्थानिवत्त्वात् 'असिद्धं बहिरङ्गमन्तरङ्गे' इति असिद्धत्वाद्वा न भवति । वृद्धिगुणयोर्विषये परत्वात्तौ भवतः । "णलुत्तमो वा" इति उत्तमे णित्त्वविकल्पनात्पक्षे गुणः । वलादौ क्रादिनियमादिट्, वीभावो ह्यनुदात्तत्त्वाद् अनिट्, थलि तु *अचस्तास्वत्थल्यनिटो नित्यम्* अजन्तो यो धातुस्तासौ नित्यमनिट् तस्य तासाविव थलीड्निषेधे प्राप्ते । *ऋतो भारद्वाजस्य* । योयं तासौ नित्यानिटः स्थलीण्निषेधः स भारद्वाजस्य मतेन ऋकारान्तस्यैवेति नियमादन्यत्रार्थाद्विकल्प इतीडागमः पाक्षिकः, अजेरुदात्तत्वस्य इडर्थत्वात् वलादावार्द्धधातुकेऽयमादेशो विकल्पित इति पक्षे व्यादेशाऽभावात् आजिथेत्यपि भवति, तथा वमयोरपि (आजिव आजिमेति) उक्तञ्च वृत्तौ । वलादावार्द्धधातुके विकल्प इष्यते इत्यत्र केचिन्मतेवलादित्वस्य क्र्यादिनियमेनेटः पर्यवसानान्न कदाचिदपि वलाद्यार्द्धधातुकव्यक्तिरिति न तत्रायमादेशविकल्पः, थलि तु भवत्येव यतस्तत्रेड्विकल्पित इति । ननु विव्यतुरित्यादौ द्विर्वचनात्पूर्वं परत्वादियङि "द्विर्वचनेचि" इति तस्य द्विर्वचने कर्त्तव्ये स्थानिवत्त्वादुत्तरखण्डेजग्मुरित्यादिवत् आदेशरूपमेवावतिष्ठेतेति कुतो यणः प्रसङ्गः । उच्यते । द्विर्वचनार्थमियङि निवृत्ते पुनरयमिच्छतावश्यं प्रवर्त्तयितव्यः, तत्र दशायाम् "असिद्धवदत्रा०" इतीयङोऽसिद्धत्वादङ्गस्यानेकाचत्वादपवादत्वेन वा यणेव भविष्यतीति इट किटेतयत्रायमर्थः प्रपञ्चयिष्यते । (अजिता । वेता । अजिष्यति । वेष्यति । अजतु । आजत् । आशिषि । वीयात्) वलाद्यार्द्धधातुकत्वान्नित्यं वीभावः (आजीत् । अवैषीत् । आजिष्यत् । अवेष्यत् । अजिजिषति । विवीषति) "इको झल्" इति सनः कित्त्वान्न गुणः । आर्द्धधातुक इत्यस्य विषयसप्तमीत्वात् प्रागेव प्रत्ययोत्पत्तौ वीभावे हलादित्वाद्यङि (वेवीयते) नात्र यङ्लुगस्ति । यतो लुका यङार्द्धधातुकस्य विषयत्वापहारान्नार्द्धधातुकाभिव्यक्तिरिति वीभावस्य नैव प्रसङ्गः, उक्तञ्चैवं "न लुमताङ्गस्य" इत्यत्र कैयटे 'न लुमता यस्मिन्निति चेत् हनिणिङादेशा न सिद्ध्यन्ति' इति भाष्यवार्त्तिकयोरुक्तौ "लुङि च" इत्यादौ विषयसप्तम्याश्रयणेनादेशाः सेत्स्यन्तीत्याशङ्क्य लुका लुङो विषयत्वापहाराद्विषयसप्तम्याश्रयणेप्यसिद्धिरिति (वाययति, अवीवयत्) कर्मादौ (वीयतइत्यादि) स्यादिषु स्यसिच्सीयुट्तासिषु-वाचिण्वदिडिति वृद्ध्याययोः (वायिष्यते । अवायिष्यत । अवायिष्यथ । अवायिष्यताम् ।

वायिषीष्ट । अवायिष्टत्यादि) चिण्वदिटोऽभावे (वेष्यते, अवेष्यत, अवेष्ट । वेषीष्ट, वेतेत्यादि) अत्र पक्षे वलाद्यार्धधातुकसद्भावात्पक्षे व्यादेशाभावे (अजिष्यते । आजिष्यत आजिषाताम् । अजिषीष्ट । आजितेत्यादि) इति त्रैरूप्यम् । लिटि ध्वमि चिण्डवत्पक्षे वृद्ध्यायादेशयोः "विभाषेटः" इति मूर्द्धन्यौ विकल्पेन, अन्यदा तु 'इणः षीध्वम्०" इति नित्यो व्यादेशाभावश्चेति चातूरूप्यम् (वायिषीध्वम् । वायिषीढ्वम् । वेषीढ्वम् । अजिषीध्वमिति) लुङि तु "धि च" इति सिचो लोपे चिण्वदिटि व्यादेशस्य वृद्ध्यायययोर्मुर्द्धन्यस्य पूर्ववद्विकल्पः । अचिण्वत्पक्षे तु नित्यः, आदेशाभावे च सिज्लोपे इदमङ्गमिणन्तमिति नित्यो मूर्धन्यः (अवायिध्वम् । अवायिढ्वम् । अवेढ्म् । आजिढ्वमिति) चातूरूप्यम् , येषां तु दर्शनम् "इणः षीध्वम्" इत्यत्रेण् ग्रहणेनेटो न ग्रहणमिति तेषां मूर्द्धन्याभावात् लिङ्वदेव रूपाणि । कर्मकर्त्तरि तशब्दे "अचः कर्मकर्त्तरि "इति चिणो विकल्पनात्पक्षे सिचि चिण्वदिटि च (अवायि अवेष्ट । अवायिष्टे) इति त्रैरूप्यम् , अन्यत् सर्वं कर्मवत्, संभवति च क्षेपणार्थस्य कर्मकर्त्ता (प्रवयणम् । प्राजनम्) "वा यौ" इति वीभावविकल्पः, "कृत्यच" इति विभाषा णत्वम् । (समजः) पशूनां संघ इत्यर्थः, (उदजः) तेषामेव प्रेरणम् । "समुदोरजःपशुषु" इत्यप् । धात्वर्थस्यापशुविषयत्वे (समाजः । उदाज) इति घञेव । अघञपोरिति पर्युदासान्न वीभावः । "अजिव्रज्योश्च"इति अकुत्वम् । (समज्या) । *संज्ञायां समजनिषदनिपतमनविदूपुञ्शीङ्भृञिणः* इति स्त्रियां भावादौ क्यप् । [प्रतिषेधे क्यप उपसंख्यानम्] इति वीभावनिषेधः । (प्रवेयम् ।) आर्द्धधातुके इत्यस्य विषयसप्तमीत्वात् प्रागेव वीभावे "अचोयत्", अन्यथा ण्यति वृद्धौ प्रवेयमिति स्यात् । [वातशुनीतिलशर्धेष्वजधेट्तुदजहातिभ्य उपसंख्यानम्] इति खश् । अस्य शित्त्वेन सार्वधातुकत्वान्न वीभावः । अजिरम् । "अजिरशिशि०" इति निपातितः । (वेणुः ।) "अजिवृरीभ्यो निद्०" इति णुः । (वेणुकीयम्) "नडादीनां कुक् च" इति चातुरर्थिकश्छः कुगागमश्च । (आजिः) । "अज्यतिभ्यां च" इतीणि वृद्धिः, "पादस्य पदाज्यात्०" इति निर्देशान्न वीभावः । अच्, (अजा) अजादिपाठाट्टाप् । अत एव वीभावाभावः । अजानां समूहः (आजिकम्) । "गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ्" इति वुञ् ॥ २२८ ॥

तेज पालने ॥ (तेजति) (तितेज । तेजितेत्यादि । तेजः ।) "असुन् तिजः' इति नित्यासुन्नन्तः । क्षमार्थोऽग्रे । तिज निशान इति चुरादौ ॥ २२९ ॥

खज मन्थे (खजति । चखाज । खजितेत्यादि । अखजीत् अखाजीत्) "अतो हलादेः"इति वा वृद्धिः । (खजाको मन्थः । "खजेराकः" इत्याकः । अत्र के चित् कज मद इत्यपि पठन्ति ॥

खजि गतिवैकल्ये (खञ्जति । चखञ्ज । खञ्जितेत्यादि) इदित्त्वान्नलोपाभावः ॥ २३० ॥

एज कम्पने ॥ एजति । एजां चकार । एजिता । एजिजिषति । एजयति । मा भवानेजिजत् । ऋदित्वान्नोपधाह्रस्वः । एजतिर्दीप्तौ गतः ॥ २३१ ॥

टुओस्फूर्जा वज्रनिर्घोषे ॥ टुशब्दस्य "आदिर्ञिटुडवः" इतीत्वे लोपः । "ट्वितो ऽथुच्" इत्यथुचि (स्फूर्जथुरिति) । ओकार "ओदितश्च" इति निष्ठानत्वार्थः । (स्फूर्णवान्) । "आदित" इत्यनिट्त्वम् । ननु, निष्ठानत्वार्थादोदित्करणसामर्थ्यादेवानिट्त्वं सिद्धम् । एवं तर्हि "विभाषा भावादिकर्म्मणोः" इति इड्विकल्पार्थमादित्वम् (स्फूर्णमनेन स्फूर्जितमनेनेत्यादि । स्फूर्जति । पुस्फूर्ज । स्फूर्ज्जिता । पुस्फूर्जिषति । पोस्फूर्ज्यते । पोस्फूर्क्ति । अपोस्फूर्क् । स्फूर्जयति । अपुस्फूर्जत्) अस्य दीर्घोपदेशेन "उपधायां च" इति दीर्घस्यानित्यत्वज्ञापनात् (मुर्छति हुर्छति स्फुर्छति इत्यपि भवतीति के चिदिति मैत्रेयप्रतिपादिते ॥ २३२ ॥

क्षि क्षये ॥ अनिट् स्वरान्त इत्ययमनिट इह पाठस्तु उत्तरधातुसादृश्यादिति मैत्रेये प्रतिपादितम् । (क्षयति । चिक्षाय । चिक्षियतुः । चिक्षेथ । चिक्षयिथ । चिक्षियिव) क्रादिनियमादिट् थलि "अचस्तास्वात्"इति निषेधाद् भारद्वाजनियमाच्च विकल्पितः । अजादौ "अचि श्नुधातु" इत्यादिनेयङ्, "एरनेकाच" इति यण् तु संयोगपूर्वत्वान्न भवति (क्षेता । क्षेष्यति ।

क्षयतु । अक्षयत् । क्षयेत् । आशिषि क्षीयात्) "अकृत्सार्वधातुकयोः" इति दीर्घः । (अक्षैषीत्) सिचि वृद्धिः । कर्मादौ (क्षीयते) इत्यादि वीवत् । अन्तर्भावितण्यर्थोयं सकर्मकः । 'न क्षीयतइत्यक्षरम्' इति भाष्ये दर्शनात् (चिक्षीषति) *अज्झनगमां सन* इति झलादौ सनि दीर्घः (चेक्षीयते । चेक्षयीति । "सार्वधातुकयोः" इति गुणः । "नाभ्यस्तस्य" इति निषेधो लघूपधगुणस्य । क्षीणः । (क्षीणवान् । क्षीणमिदम्) । अस्य ध्रौव्यार्थत्वात् क्तोधिकरणे क्तः । "अधिकरणवाचिनश्च" इति तद्योगे कर्तरि षष्ठी* निष्ठायामण्यदर्थे* इति क्षियो दीर्घः, ण्यदर्थो भावकर्मणी, "क्षीयो दीर्घात्" इति निष्ठानत्वम् । ण्यदर्थे तु (क्षितमनेन क्षितोयमनेन क्षीणस्तपस्वी । क्षीणो जाल्मः । क्षित इति,) *वाक्रोशदैन्ययोः* इति क्षियो निष्ठायां वा दीर्घः । पूर्ववद्दीर्घपक्षे नत्वम् (क्षेतुं शक्यः क्षय्यः) "क्षय्यजय्यौ शक्यार्थे" इति निपातनादयादेशो भवति । (प्रक्षीय) । 'क्षियः" इति ल्यपि दीर्घः । क्षी निवासगत्योरिति तुदादौ । क्षीष हिंसायामिति क्र्यादौ । क्षिणु हिंसायामिति तनादौ ॥ २३३ ॥

क्षीज अव्यक्ते शब्दे ॥ (क्षीजति । चिक्षीज । क्षीजिता । चिक्षीजिषति । चेक्षीज्यते । चेक्षीक्ति । क्षीजयति । अचिक्षिजत्) "णौ चङ्यु०" इति ह्रस्वः । कूजिना सहायं न पठितोऽप्रसिद्धत्वात् ॥ २३४ ॥

लज लजि भर्जने ॥

लाज लाजि भर्त्सने च ॥ चकारो भिन्नक्रमः एतावपि भर्जनइति मैत्रेयः । भर्त्सनग्रहणं भर्जनस्याप्युपलक्षणमिति पुरुषकारः । (लजति । ललाज । लेजतुः । लजिता । अलजीत्) अलाजित्) "अतो हलादे०" इति वा वृद्धिः (लिलजिषति । लालज्यते । लालक्ति । लाजयति । अलीलजत् । लञ्जति । ललञ्ज । लञ्जिता । लिलञ्जिषति । लालञ्ज्यते) इदित्त्वान्नलोपाभावः (लालङ्क्ति । लञ्जयति । अललञ्जत् । एवं लाजति लाञ्जतीत्यादि । लाजः) । ओलजी ओलस्जी व्रीडनइति तुदादौ । लज प्रकाशनइति कथादौ । लजिति दण्डके भाषार्थः।२३८

जज जजि युद्धे (जजति । लजिवत् । जङ्गलम्) बाहुलकात् कलप्रत्ययः कुत्वं च (कुरुजङ्गलेषु भवं (कौरुजाङ्गलम्, कौरुजङ्गलम्) । "तत्र भवः" इत्यण् । "जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम्" इति पूर्वपदस्य नित्या वृद्धिः, उत्तरपदस्य तु वा ॥ २४० ॥

तुज हिंसायाम् ॥ तोजति । तुतोज । तोजिता । तुतोजिषति । तुतुजिषति । तुजित्वा । तोजित्वा । "रलोव्युपधाद्०" इति कित्त्वविकल्पः । (तोतुज्यते । तोतोक्ति । तोजयति । अतूतुजत्) भावादिकर्मणोः "उदुपधाद्०" इति कित्त्वविकल्पनात् तुजितमनेन तोजितमनेत्यादि ॥ २४१ ॥

तुजि पालने (तुञ्जति । तुतुञ्ज । तुञ्जिता तुतुञ्जिषति । तोतुञ्ज्यते । तोतुङ्क्ति । अतोतुन् । तुञ्जयति । अतुतुञ्जत् तुङ्गः) । वार्त्तिकमते न्यङ्क्वादित्वात् कुत्वम् । भाषार्थोयं युजादौ॥२४२॥

गज गजि गृज गृजि मुज मुजि शब्दार्थाः ॥ (गजति । गञ्जतीत्यादि) । लजलजिवत् । (जगजतुः) इत्यादावादेशादित्वान्नेत्वाभ्यासलोपौ।(गजः । अच् । गञ्जा तु मदिरागृहम् गर्जति । जगर्ज । गर्जिता । जिगर्जिषति । जरीगृज्यते । जर्गृजीतीत्यादि पूर्ववत् । (गर्जयति । अजगर्जत् । अजीगृजत्) "उऋत्" (गृञ्जति । जगृञ्ज । गृञ्जिता । जिगृञ्जिषति । जरीगृञ्ज्यते) "रीगृत्वतः" इति रीक् । (जरिगृञ्जीति) इत्यादि । (मोजति । मुञ्जतीत्यादि । तुजिवत् । मृजमृजीति स्वामिचन्द्रौ । गज मदने च । अयं चुरादावपि शब्दार्थः । गर्ज शब्द इत्यग्रे ॥ २४८ ॥

वज व्रज गतौ । (वजति । ववाज । ववजतुः । वजितेत्यादि) 'न शसददवादिगुण०" इत्येत्वाभ्यासलोपनिषेधः (अवजीत् । अवाजीत्) "अतो हलादे०" इति वा वृद्धिः । (वाजः । वाज्यम्)। वञ्ण्यतौ । "अजिवज्योश्च" इति चकारेण कुत्वनिषेधः । (व्रजति)इत्यादि । लुङि "वदव्रज"इतिनित्या वृद्धिः। (अव्राजीदिति । व्रज्या)"व्रजयजोर्भावे क्यप्" इति क्यप् । व्रजः ।

"गोचरसंचरवहव्रजव्यजापणनिगमाश्च" इति अधिकरणे घञन्तो निपातितः । परिव्राट् । *परौ व्रजेः षः पदान्ते* इति क्विपि षत्वं दीर्घश्च । एतौ चुरादावपि ॥ शुचादय उदात्ता उदात्तेतः क्षिवर्जम् ॥ २६० ॥

अथ क्रमेण प्राग्गनात्मनेपदिनष्टवर्गीयान्तानाह—

अट्ट अतिक्रमहिंसयोः ॥ इतः शाड्यन्ता उदात्ता अनुदात्तेतः । दोपधोयं स्मर्यतइति मैत्रेयः । तोपधोयमिति "ष्टुना ष्टुः" इत्यत्र न्यासवृत्तिप्रदीपकारादयः । स्वाम्यपि क्विपि अदिति तकारश्रवणार्थं तोपधत्वमुक्त्वा दोपधत्वमप्याह । मैत्रेयस्तु स्वमते दोपधत्वमुक्त्वा तोपधत्वं मतान्तर आह । अड्ड इति डान्तपाठः प्रकरणविरोधादुपेक्ष्यः (अट्टते । आनट्टे । अट्टताम् । आट्टत । अट्टेत । आशिषि । अट्टिषीष्ट । मा भवानट्टिष्ट । आट्टिष्यत) ष्टुत्वं सर्वत्र, डोपधत्वे चर्त्वं (अटिट्टिषते) तोपधत्वे [पूर्वत्रासिद्धीयमद्विर्वचने] इति ष्टुत्वस्यासिद्धत्वाभावाद् द्विटकारस्य सन्नन्तस्य द्विर्वचने हलादिशेषे रूपम् । यद्यपि प्राणिणिषतीत्यादौ णत्वे कृते तस्यासिद्धत्वाभावात्सणस्य द्विर्वचनेनैवेष्टसिद्धौ "उभौ साभ्यासस्य" इति पुनर्णत्वविधानात् "पूर्वत्रासिद्धीयमद्विर्वचने' इत्यस्यानित्यत्वज्ञापनात् ष्टुत्वस्यासिद्धत्वात् तकारादेर्द्विर्वचनं तदापि "शर्पूर्वाः खयः" इति टकारस्यैव शेषादिदमेव रूपम् । एवं च पुरुषकारादिषु अतिट्टिषतीति तकारस्य शेषेणोदाहरणप्रदर्शनं चिन्त्यम् । दोपधत्वे तु "पूर्वत्रासिद्धीयमद्विर्वचने" इत्यस्य द्विर्वचनविषयत्वात् "नन्द्राः" इति द्विर्वचननिषेधे प्रवृत्त्यभावात् ष्टुत्वस्यासिद्धत्वात् दकारवर्जं द्विरुच्यते, दकारस्य पुनर्ष्टुत्वे चर्त्वं च अट्टिटिषत इति भाव्यम् । (अट्टयति । आट्टिट्टत् दोपधत्वे तु अट्टिटत् । अट्टा) । "गुरोश्च" इत्यकारः । अट्टां करोति । (अट्टायते) । अटाट्येत्यादिना क्यप् । अयमनादरे चुरादिः ॥ २६१ ॥

वेष्ट वेष्टने (वेष्टते । विवेष्टे । वेष्टिता । विवेष्टिषते । वेवेष्ट्यते । वेवेष्टीति । वेवेष्टि । वेवेष्टः । लङि अवेवेट् । वेष्टयति । अविवेष्टत् । अववेष्टत्) "विभाषा वेष्टिचेष्ट्योः' इति चङ्परे णावभ्यासस्य पक्षे ऽकारः । कर्मादौ वेष्ट्यत इत्यादि ॥ २६२ ॥

चेष्ट चेष्टायाम् ॥ वेष्टिवत्, अकर्मकस्त्वयम् ॥ २६३ ॥

गोष्ट लोष्ट संघाते ॥ (गोष्टते । जुगोष्टे । गोष्टिता । लोष्टते । लुलोष्टे । लोष्टिता) इत्यादि, वेष्टिवत् ॥ २६५ ॥

घट्ट चलने ॥ (घट्टते । जघट्टे । घट्टितेत्यादि) । अयं चुरादावपि ॥ २६६ ॥

स्फुट विकसने ॥ (स्फोटते । पुस्फुटे । स्फोटितेत्यादि । पुस्फुटिषते । पुस्फोटिषते । स्फुटित्वा । स्फोटित्वा) । "रलो व्युपधात्" इति कित्त्वविकल्पः । (पोस्फुट्यते, पोस्फुटीति । पोस्फोट्टि । अपोस्फोट् । स्फोटयति । अपुस्फुटत्) । अयं तुदादावपि, विशरणार्थोग्रे परस्मैपदिषु, भेदनार्थश्चुरादौ ॥ २६७ ॥

अठि गतौ ॥ (अण्ठते । आण्ठे । अण्ठिता । अण्टिटिषते । अण्ठयति । आण्टिटत्) । "न न्द्राः" इति नवर्जं द्विरुच्यते ॥ २६८ ॥

वठि एकचर्यायाम् ॥ एकचर्या सहायगमनम् । (वण्ठते । ववण्ठे । विवण्ठिषते वावण्ठीति । वावण्टि ।) ष्टुत्वम् । चर्त्वम् । लोटि हेर्द्धित्वे ष्टुत्वे जश्त्वे (वावण्ढि) । लङि अवावन् । (वण्ठयति । अववण्ठत्) । अयमनिदित् स्थौल्यार्थः परस्मैपदिषु ॥ २६९ ॥

मठि कठि शोके ॥ इह शोक आध्यानम् । कर्तुर्मण्ठते उत्कण्ठत इत्यर्थः । "अधीगर्थ" इति कर्मणि शेषे षष्ठी । मठ मदनिवासयोः, कठ कृच्छ्रजीवनइत्यग्रे परस्मैपदिष्वनिदितौ । कठि शोकइतीदित् चुरादौ ॥ २६९ ॥

मुठि पालने ॥ मुण्ठतइत्यादि ॥ २६२ ॥

हेठ विबाधायाम् ॥ अमुं परस्मैपदिष्वपि केचित् पठन्ति । विबाधनं शाठ्यम् । (हेठते । जिहेठे । हेठिता । इत्यादि, हेठयति । अजीहिठत्, अजिहेठत्) । [काण्यादीनां वा] इति

णौ चङ्युपधाया ह्रस्वविकल्पः । काणेराणेस्तथा श्राणेर्भाणेर्हेठेर्लुठेरपीति ण्यन्तस्य भाष्यकारेण काण्यादित्वं प्रदर्शितम् ॥

बोधिन्यासकृता लोठिर्लोपिर्वाणिश्च ह्वायिना ।
सहिताः पूर्वमुक्ताश्च काण्यादौ परिकीर्त्तिताः ॥
दुर्गश्चाणिं च काण्यादिं मन्यते शाकटायनः ।
लोठिं तदेव मैत्रेयो धातवो द्वादश स्मृताः ॥ २६३ ॥

एठ च ॥ विपूर्वोयमिति स्वामिकाश्यपौ । मैत्रेयादयस्तु केवलमेवोदाजहुः । (एठते । एठांचक्रे । एठिता । एटिठिषते । एठयति । मा भवानिटिठत्) द्विर्वचनात् पूर्वमुपधाह्रस्व इत्युक्तम् ॥ २६४ ॥

हिडि गत्यनादरयोः ॥ (हिण्डते । जिहिण्डे । हिण्डिता । जिहिण्डिषते । जेहिण्डयते । जेहिण्डि । अजेहिन् । अजिहिण्डत्) ॥ २६५ ॥

हुडि संघाते ॥ (हुण्डते । जुहुण्डे । हुण्डितेत्यादि) पूर्ववत् । अत्र काश्यपः । आर्यास्तु न पठन्ति । द्रविडास्तु पठन्तीति । भाष्यादौतु हुण्डेत्यविगीतमुदाह्रियते ॥ २६६ ॥

कुडि दाहे ॥ (कुण्डते इत्यादि । कुण्डः । कुण्डम्) अच् । स्त्रियां (कुण्डी) । "जानपदकुण्डगोणस्थलभाजनागकाशनीलकुशकासुकक्कवराद् वृत्त्यमत्रावपनाकृत्रिमाश्रणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु" इति अमत्रे ङीष् । अन्यत्र कुण्डा । वैकल्यार्थोत्रैव पठिष्यते, रक्षणार्थश्चुरादौ ॥ २६७ ॥

वडि विभाजने ॥ २६८ ॥

मडि च ॥ अत्र स्वामी वडि विभाजने, मडि चेति पृथक् सूत्रणादर्थान्तरेऽपि । नन्दी तु वडि विभाजने, मडि वेष्टन इति भङ्क्त्वा पठतीति । (वण्डते । ववण्डे । वण्डिता । ममण्डे । मण्डितेत्यादि । मण्डूकः) । "शरिमण्डिभ्यामूकण्" इत्यूकण् । कूपमण्डूकः । (उदपानमण्डूकः कच्छमण्डूकः) "पात्रेसमितादयश्च" इति क्षेपे सप्तमीतत्पुरुषः । क्षेपश्च कूपे मण्डूक इवेत्यदृष्टविस्तारतायवगमात् । "क्रुधमण्डार्थेभ्यश्च" इति युज्विधौ भूषणार्थ एव वृत्तौ उदाहृतः । तस्यानुदात्तेत इति युचः सिद्धत्वान्न त्वस्य युज् नेतीति । मण्डि भूषायामित्यग्रे परस्मैपदिषु, णौ हर्षे च ॥ २६९ ॥

भडि परिभाषणे ॥ परिहास इति देवः । परितो भाषणं परिभाषणमिति स्वाम्यादयः । यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणमिति निघण्टुः । भण्डतइत्यादि । भण्डिलो दूतः । "सलिकल्पनिमहिभडिभण्डी" इत्यादिना इलच् कल्याणार्थश्चुरादौ॥ २७० ॥

पिडि संघाते ॥ (पिण्डयते) इत्यादि । पिण्डिलो माणवकः । पूर्ववदिलच् । चुरादावव्ययम् ॥ २७१ ॥

मुडि मार्जने ॥ शुद्धिन्यग्भावौ मार्जनम् । मुण्डतइत्यादि । खण्डनार्थः परस्मैपदिषु२७२॥

तुडि तोडने ॥ तोडनं दारणं हिंसनं च । (तुण्डते) इत्यादि । (तुण्डिः) । "इन्" इतीनूप्रत्ययो नाभिवृद्धौ । सास्यास्तीति तुण्डिलः । "तुण्डादिभ्य इलच्च" इत्यत्र स्वाङ्गाद् वृद्धाविति गणसूत्रेण वृद्धौ वृत्तात्स्वाङ्गादस्माद्दिलच् तुण्डिल एव तुण्डिभः । "तुण्डिवलिवटेर्भः" इति मत्वर्थीयो भः । तुण्डिलो बहुभाषी । "सलिकल्पनी" इत्यादिनेलच् । अयमनिदित्परस्मैपदिषु ॥ २७३ ॥

हुडि वरणे ॥ वरणं स्वीकारः । हरणमिति मैत्रेयः । (हुण्डते । जुहुण्डे । हुण्डितेत्यादि ।) स्फुडि विकसनइत्येके पठन्ति ॥ २७४ ॥

चडि कोपे ॥ (चण्डते) इत्यादि । (चण्डनः) । "क्रुधमण्ड०" इति वा "अनुदात्तेतः" इति वा युच् । (चण्डालः) । "चण्डपतिभ्यामालच्" इत्यालच् । चण्डालस्यापत्यं, (चाण्डालकिः) । अत इञि "सुधातुरकङ् च" "व्यासवरुडनिषादचण्डालबिम्बानाम्" इत्यकङा-

देशोऽन्त्यस्य । चाण्डालीति शार्ङ्गरवादित्वात् ङीनि तद्युक्तादिति सूत्रकरणे । "[कुलालवरुडनिषादचण्डालमित्रामित्रेभ्यश्छन्दस्युपसंख्यानम्" इति उक्तत्वाच्छान्दसः"। (चण्डालः । चण्डीति) "कृदिकारादक्तिनः" इति ङीष् । अयं चुरादौ च ॥ २७५ ॥

शडि रुजायां संघाते च ॥ तालव्योष्मादिः । (शण्डते) इत्यादि । शण्डः, असुरपुरोहितः । शण्डिलः तीर्थमृषिश्च) । "सलिकल्पनी" इत्यादिनेलच् ॥ २७६ ॥

तडि ताडने ॥ (तडते) इत्यादि । तण्डः । अच् । (वतण्डः) । 'वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः' इत्युपसर्गस्याल्लोपः । वतण्डस्य गोत्रापत्यं, (वातण्ड्यः । वातण्डः) । "गर्गादिभ्यो यञ्", "शिवादिभ्योण्" इति यञणौ । यदा त्विदमपत्यमाङ्गिरसं भवति तदा "वतण्डाच्च" इति शिवाद्यणं बाधित्वायमेव अपत्ये तु स्त्री लिङ्गे "लुक् स्त्रियाम्" इति लुक् । "शार्ङ्गरवाद्यञो ङीन्" इति ङीना वतण्डी । अनाङ्गिरसे तु लुगभावात् वातण्ड्यायनी । "प्राचां ष्फ तद्धिते" इति यञन्तात् ष्फः, फस्यायनादेशः । षित्करणसामर्थ्यात् स्वार्थे ङीष्ष्फप्रत्ययाभावे "यञश्च" इति ङीषि "यस्येति च" इत्यल्लोपे *आपत्यस्य च तद्धितेनाति* । आपत्ययकारस्यानकारादौ भसंज्ञानिमित्ते तद्धितेइति च परे लोपे वातण्डी । अनातीति वचनात् वातण्ड्यायनीत्यत्र यलोपो न भवति । (वितण्डा, तण्डुला) । "लुठितनितण्डिभ्य उलच् इत्युलच् ॥ २७७ ॥

पडि गतौ ॥ (पण्डते । पण्डितः । गोष्ठेपण्डितः) । "पात्रेसमितादयश्च" इति क्षेपे सप्तमीतत्पुरुषः तत्रैव पाठादलुक्, गोष्ठएव पण्डितो न सदसीति क्षेपावगतिः । पण्डः । अच् । पणतेर्वा "अमन्ताड्डः" । पण्डस्यापत्यं, पाण्डारः । "आरगुदीचाम्" इत्यत्र क्वापि गोधार इति सिद्धे आरग्वचनादन्यत्रापि भवतीति वृत्तावुक्तम् । नाशार्थश्चुरादौ ॥ २७८ ॥

कडि मदे ॥ (कण्डते) इत्यादि । भेदने चुरादिः । अनिदिदिहैव । अदादौ च परस्मैपदी ॥ २७९ ॥

खडि मन्थे ॥ खुडीत्यप्येके पठन्ति । (खण्डते । खण्डः ।) खडि भेदने चुरादिः ॥२८०॥

हेडृ होडृ अनादरे ॥ (हेडते । जिहेडे । हेडिता । जिहेडिषते । जेहेड्यते । जेहेड्डि । हेडयति । अजिहेडत्) । ऋदित्वान्नोपधाह्रस्वः । एवं (होडत जुहोडे) इत्यादि । होडः । पचाद्यच् । होडइवाचरति । (होडते) [आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा] इति क्विपि "सनाद्यन्ता"इति धातुत्वे लादयः । होडादीनामकारस्यानुदात्तत्वानुनासिकत्वयोः प्रतिज्ञानात् "अनुदात्तङितः" इति तङ् । तथा च भाष्यम् । सर्वप्रातिपदिकेभ्यः क्विबित्युक्त्वा न तर्हीदानीं गल्भाद्यनुक्रमणं कर्त्तव्यं, कर्त्तव्यं च, आत्मनेपदार्थमनुबन्धानासङ्क्ष्यामीति क्विब् भवति, "कर्तुः क्यङ्सलोपश्च" इति उपमानात्कर्तुः सुबन्तादाचारे क्यङिति क्यङ् । उपमानस्य कर्तृत्वं संनिधानादाचरणक्रियापेक्षं, लोपश्चेति चशब्दस्यान्वाचयशिष्टत्वात् यत्रान्त्यः सकारः संभवति तस्य लोपः, स च व्यवस्थितविभाषया, (होडायते) अनुनासिकत्वप्रतिज्ञानं क्विप्संनियोगेनैवेतीत्संज्ञाया अभावात् "अकृत्सार्वधातुकयोः" इति दीर्घः । हेडृ वेष्टनइति घटादौ । होडृ गतावित्यग्रे परस्मैपदी ॥ २८२ ॥

वाडृ आप्लाव्ये ॥ वशादिः । आप्लवनमाप्लवः । (वाडते । अववाडतेत्यादि) ॥२८३॥

द्राडृ ध्राडृ विशरणे ॥ द्राडते । ध्राडतइत्यादि ॥ २८४ ॥

शाडृ श्लाघायाम् ॥ शाडतइत्यादि । लडयोरैक्यात् शालतइति काश्यपः । अत एव मैत्रेये रूपशाली शालेत्युदाहृतं, "लस्य" इत्यत्र भाष्यकैयटयोः शालेति श्यतेर्लप्रत्यये व्युत्पादनीयः । (शालीनः, अधृष्टः) "शालीनकौपीने अधृष्टाकार्ययोः" इति खञि निपातितः । गवां शाला, (गोशालं, गोशाला) । *विभाषा सेनासुराच्छायाशालानिशानाम्* इति सेनाद्यन्तस्य तत्पुरुषस्य वा नपुंसकत्वं, गोशाले जातः । गोशालः । "तत्र जातः" इत्यण्, "स्थानान्तगोशालखरशालाच्च" इति लुक् । लिङ्गविशिष्टपरिभाषया गोशालाशब्दादप्यणो

लुग्भवति । एवं खरशालः । वत्सशालायां जातः, वत्सशालः । वात्सशालो वा । "वत्सशालाभिजिदश्वयुक्शतभिषजो वा" इति अणो वा लुक् । शालिः, अन इनितीन् । शालीनां भवनं क्षेत्रं, शालेयम् । "व्रीहिशाल्योर्ढक्" इति ढक् ॥ अट्टादय उदात्ता अनुदात्तेतः ॥२८६॥

शौट्ट गर्वे ॥ इतो गडन्ता उदात्ता उदात्तेतः । (शौटति । शुशोट । शौटिता । शौटिष्यति । शौटतु । अशौटत् । आशिषि शौट्यात् । अशौटीत् । अशौटिष्यत् । शुशौटिषति । शोशौट्यते । शोशौट्टि) । अभ्यासस्य ह्रस्वः । गुणः । (शौटयति, अशुशौटत् । शौटीरः) । "कॄगॄशॄपॄकुटिपटिशौटिभ्यईरन्" इतीरन् ॥ २८७ ॥

यौट्ट बन्धे ॥ यौटतीत्यादि ॥ २८८ ॥

म्रेट्ट म्लेट्ट उन्मादे ॥ द्वितीयस्तृतीयान्तः । तथा च "तस्य परमाम्रेडितम्" इति दृश्यते, अत्र न्यासे आम्रेड्यते आधिक्येनोच्यतइति, टान्तमध्ये पाठस्तु तदर्थसाम्यान्नाथतिवत् । (म्रेटति । म्लेडतीत्यादि) ॥ २९० ॥

कटे वर्षावरणयोः ॥ अयमनेदिदेव । (कटति चकाट कटित) इत्यादि । (अकटीत्) । "अतो हलादेः" इति वा वृद्धिः "ह्मयन्तक्षणश्वसजागृणिश्व्येदिताम्" इति एदितां निषिध्यते । (कटः) । पचाद्यच् । (कटी) । कटात्तु श्रोणिवचनइति ङीष् । निकटे वसति नैकटिकः, "निकटे वसति" इति सप्तम्यन्ताद्वसत्यर्थे ठक् । (काटोङ्कनं,) अधिकरणे संज्ञायां घञ् । (कटीरः) । जघनं कञ्चुकम् । कृशशृइत्यादिना ईरन् । कटिरं चर्म । असित्रादिनेरन् । कटित्रं चर्म । अशित्रादिभ्य इतीत्रः (कटकम्) । "क्वुन् शिल्पिसंज्ञयोः" इति क्वुन् । (कटुः) बाहुलकादुप्रत्ययः । (कट्वरः) । "छित्वरछत्वरधीवरपीवरमीवरचीवरनीवरगह्वरकट्वरसयद्वरा" इति वरचि निपात्यते । चटत्येकइति काश्यपः । चटतीत्यादि पूर्ववत् । (चाटुः) । "सनिजनिचटिहिभ्य उण्" इति उण् । (चटुः) । बाहुलकादुकारः । (चटुलः) । बाहुलकादुलच् । (चटकः) । "क्वुन् शिल्पिसंज्ञयोः" इति क्वुन् । (चटका) । अजादिपाठाट्टाप्, "प्रत्ययस्थात्" इतीत्वाभावश्च । चटकाया अपत्यं, चाटकैरः । "चटकाया ऐरग्" इत्यैरक् । [चटकाच्चेति वक्तव्यात्] चटकस्यापत्यमपि चाटकैरः, स्त्रियां त्वपत्ये [स्त्रियामपत्येलुग्वक्तव्यः] इति ऐरको लुकि चटकेति भवति । भेदनार्थोयं चुरादौ ॥ २९१ ॥

अट पट गतौ ॥ (अटति । आट । अटिता । अटिष्यति । अटतु । आटत् । अटेत्) । आशिषि (अट्यात् मा भवानटीत्) "नेटि" इति सिचि वृद्ध्यभावः । (अटिटिषति । अटाट्यते) [सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतीनामुपसंख्यानम्] इति यङ् अजादित्वात् ट्यशब्दस्य द्विर्वचने ऽभ्यासस्छ "दीर्घोकित" इति दीर्घः । नन्वत्र यङेव कार्यी निमित्तं च, एकस्य कार्यिनिमित्तत्वं च विरुद्धं । नैतत् । आकारभेदात्, अनभ्यासाकारेण कार्यी यङाकारेण निमित्तम्, तथा हि । देवदत्तशालायां ब्राह्मण आनीयतामित्युक्ते यदि देवदत्तोपि ब्राह्मणश्च शालास्थश्च भवति तदा सोप्यानीयते, यङ्लुकि "सन्यङोः" इत्यस्य षष्ठ्यन्तत्वात् यङपेक्षया पूर्वस्य कार्याभावात् "न लुमत" इति प्रत्ययलक्षणस्य प्रतिषेधाभावाद्यङन्तत्वाद् अटशब्दस्य द्विर्वचने हलादिशेषे "दीर्घोकितः" इति दीर्घे सवर्णदीर्घे च तिपष्टुत्वे (आट्टि) इति भवति । ईट्पक्षे तु । (आटीति । आट्टः । आटति । आटसि । आट्टः । आटांचकारेत्यादि) । आड्ढीत्यत्र हेर्धिभावे ष्टुत्वे पूर्वस्य जश्त्वं डकारः । लङि इलङ्यादिना तिस्योर्लोपे (आट् । अटतीत्यटा ।) अचि टाप् । तां करोति । (अटायते) अटाट्येत्यादिना क्यङ्, कुलस्य (अटा कुलटा ।) शकन्ध्वादित्वात "कुलटाया वा" इति निर्देशाद्वा पररूपं, कुलटाया अपत्यं, (कौलटिनेयः । कौलटेयः) । स्त्रीभ्यो ढकि "कुलटाया वा" इति पक्षे इनङादेशोऽन्त्यस्य । यदायं कुलटाशब्दः क्षुद्रायां वर्त्तते क्षुद्रा दुःशीला अङ्गहीना वा तदा "क्षुद्राभ्यो वा" इति द्रकि कौलटेर इति भवति, तदभावे वाशब्देन ढकि कौलटेय इति । अटाट्या । [परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानम्] इति गमनमात्रे शप्रत्यये यकि द्विर्वचनहलादिशेषाभ्यासदीर्घेषु निपात्यते ।

) पटति । पपाट । पेटतुः । पेटिथ । पटिता अपटीत् । अपाटीत्) "अतो हलादेः" इतिवृद्धिः। (पिपटिषति । पापट्यते, पापटीति । पापट्टीत्यादि । पाटयति । अपीपटत् । पाटूपटः) ण्यन्तात्पचाद्यचि [पाटेर्णिलुक् चोक् चाभ्यासस्य] इति णिलुक्, द्विर्वचनमभ्यासस्योगाम उपधादीर्घश्च, ऊको दीर्घोच्चारणसामर्थ्यात ह्रस्वस्याभावः अस्यागमत्वसामर्थ्याच्च हलादिशेषः । अन्यथादेशमेव विदध्यादुकारम् । "अभ्यासस्यानचि" इति वा हलादिशेषह्रस्वयोरभावः, अभ्यासस्य यदुक्तं तदचि नेति "णेरनिटि" इति णिलोपे सिद्धे लुग्वचनं प्रत्ययलक्षणे वृद्धेरभावार्थं, पाट्यका सुराविशेषः । पाट्यकालावदातसुरायामिति स्थूलादिपाठात् ण्यन्तादस्मात् कुन् । पटुः, "कलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च" इत्युप्रत्यये यथासंख्यात्पटादेशः, अत्र गुगेक आगमः, अन्ये आदेशाः, पटोर्भावकर्मणी । पटिमा । "पृथ्वादिभ्य इमनिज्वा" इतीमनिच्, "टेः" इति टिलोपः । तदभावे "इगन्ताच्च लघुपूर्वात्" इत्यणि पाटवम् । गोष्ठेपटुः । "पात्रेसमितादयश्च" इति क्षेपे सप्तमीतत्पुरुषः तत्रैव पाठादलुक्, गोष्ठ एवपटुर्न सदसीति क्षेपावगतिः । (पटाका) । "शलिपटिपदिभ्यो निदित्याकिन्निच्च" । (पटलम्) । "वृषादिभ्यश्चित्" इति कलप्रत्ययः चिच्च । पटलिका, संज्ञायां कन् । (पटीरः) । कृटइत्यादिनेरन् । (पाटलम्) । ण्यन्तात्कलप्रत्ययो बाहुलकात् । (पाटली) । "जातेरस्त्रीविषयादयोपधात्" इति ङीष् । पाटल्याः पुष्पाणि, पाटलानि । "बिल्वादिभ्योण्" इति विकारावयवयोरण् , तस्य "पुष्पफलमूलेषु बहुलम्" इति लुप् तत्रैव बहुलग्रहणान्न भवति, लुपि हि कौशीतक्याः फलानीत्यादिवत् "लुपि युक्तवद्व्यक्तिवचने" इति युक्तवद्भावः स्यात् ॥ २९३ ॥

रट परिभाषणे ॥ रटतीत्यादि । (परिराटी) । "संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च" इति परिपूर्वादस्मात्ताच्छीलिको घिनुण् । (परिराटकः) । "निन्दहिंसा" इत्यादिना वुन् ताच्छीलिकः ॥ २९४ ॥

लट बाल्ये ॥ लटतीत्यादि । लट्वा । "अशुश्रुंशुपुटिलटिकाणिखटिपिशिभ्यः क्वन्" इति क्वन् । लाटयतीति लाटः । ण्यन्तादच् । केवलाद्वासंज्ञायां घञ् ॥ २९५ ॥

शट रुजाविशरणगत्यवसादनेषु ॥ (शटतीत्यादि । शाटकः) । घञन्तात्संज्ञयां कन् । (शाटी) । जातिलक्षणो ङीष् ॥ २९६ ॥

वट वेष्टने ॥ (वटति । ववाट । ववटतुः) वादित्वादेत्त्वाभ्यासलोपाभावः । (वटिः) । "इन्" इतीन्प्रत्ययः । (वटिभः) "तुन्दवलिवटेर्भः" इति मत्वर्थे भः । (वटकः) । "संज्ञयां कन्" वटका अन्नमस्यां पौर्णमास्यां वटकिनी पौर्णमासी । "तदस्मिन्नन्नं प्राये संज्ञायाम्" इन्यत्र [वटकेभ्य इनिर्वक्तव्यः] इतीन् । घटादावयं परिभाषणार्थः । पट वट ग्रन्थइति कथादौ । वटवेष्टनइति क्षीरस्वामी । यस्तु तत्र विभाजनार्थः तं वटीति शाकटायनादयः पठन्ति । वटी विभाजनइति इहैवाग्रे चुरादौ चानदन्तेषु ॥ २९७ ॥

किट खिट त्रासे । (केटति । चिकेट । केटिता । चिकिटिषति । चिकेटिषति । किटित्वा केटित्वे त्यादि । एवं खेटतीत्यादि । (खेटः) । "हलश्च" इति संज्ञयां घञ् इह त्रासो भयोत्पादनम् । किटिर्गत्यर्थोग्रे भविष्यति । इहैके न पठन्ति । मैत्रेयादीनामर्थभेदात् पुनः पाठ इत्यभिप्रायः ॥ २९९ ॥

शिट षिट अनादरे ॥ आद्यस्तालव्यादिः, अपरो मूर्द्धन्यादिः । (शेटति) । सेटतीत्यादि किटिवत् । (सिसेटिषति) इत्यत्र "स्तौतिण्योरेव" इति नियमान्न षत्वं, षोपदेशफलं तु (सेषिट्यते । असीषिटत्) इत्यादौ ॥ ३०१ ॥

जट झट सङ्घाते ॥ (जटति । जजाट । जेटतुः । जटिता । जटा ।) अजादित्वाट्टाप् । निन्दिता जटा अस्य जटालो जटिलः । जटाघटाकलाः क्षेपइति सिध्मादौ पिच्छादौ च पाठाज्जटिलचौ । जटीति भाष्यकारप्रयोगाद् अनदन्तत्वेपीनिः (झटति । जझाट । जझटतुः । झटि-

तेत्यादि ॥ ३०३ ॥

भट भृतौ ॥ (भटति) । भटित्रं शूलेन संस्कृतं मांसमिति निघण्टुः । वेतनमित्युणादिवृत्तौ । अशित्रादिभ्य इतीत्रः । अयं घटादिः परिभाषणार्थः ॥ ३०४ ॥

तट उच्छ्राये ॥ (तटति) । तटोस्या अस्तीति तटिनी । "अत इनिठनौ" इति मत्वर्थे इनिः । (तटी) । गौरादिपाठान् ङीष् । तड आघातइति डकारान्तश्चुरादौ ॥ ३०५ ॥

खट काङ्क्षायाम् ॥ (खटति । खट्वा) । अशुप्रुषीत्यादिना क्वुन् । खट्वारूढो जाल्मः "खट्वा क्षेप" इति क्षेपे गम्यमाने द्वितीयान्तस्य खट्वाशब्दस्य क्तान्तेन तत्पुरुषः ॥ ३०६ ॥

णट नृतौ ॥ अत्र पुरुषकारे णट नृत्तावित्यपि क्षीरस्वामी, इत्युभयथापि नर्तनमेवार्थ इति, अयं णोपदेशः । नृतिनन्दीति णोपदेशपर्युदासवाक्ये नाटीति सवृद्धिकस्य ग्रहणादस्य घटादित्वान्मित्त्वात् नाटिरूपाभावादग्रहणम् । यदाह हरदत्तः । "जासिनिप्रहण" इत्यत्र नट नृता इत्यस्य घटादिपठितस्याग्रहणं, विकृतनिर्देशादिति, अत एव णोपदेशपर्युदासविवरणेपि न्यासपदमञ्जरीपुरुषकारादिभिरवस्यन्दनार्थस्य चौरादिकस्य ग्रहणं कृतम् । ननु क्षीरस्वामी घटादौ नट नृताविति पठित्वा नटयति शाखा इत्युदाहृत्य नृत्तौ नाटयतीति वक्ष्यति, अवश्यं हरदत्तादिभिरप्युभयत्र पाठसामर्थ्यादस्य नाटयतीत्यङ्गीकार्यं, तत्कथमुक्तं विकृतनिर्देशादिति । उच्यते । द्वयोर्ग्रहणे नटीत्येव निर्दिशेत् न नाटीति विकृतं, तत्सामर्थ्यात् यस्य नाटीत्येव रूपं तस्यैव पर्युदासो विज्ञास्यते न तु यस्य नटिरूपं नाटिरूपं च । ननु योऽस्ति घटादिधातुर्नित्यं नटिरूपमापन्नः, स एव विकृतनिर्देशेन व्यावर्त्यते, मैवम् । ये ऽप्यत्र पठिता घटादौ पठ्यन्ते न ते पृथग् धातवः, किन्तु मित्त्वार्थमेव तेषामनुवाद इति तत्र स्थितत्वात् । इह नृत्तिर्नर्त्तनं, यत्कारिषु नटव्यपदेशः । न तु मार्गदेशीशब्दाभ्यां प्रसिद्धं नृत्तं नृत्यं च, यत्कारिषु नर्त्तकव्यपदेशः । तत्र वाक्यार्थाभिनयो नाट्यं, पदार्थाभिनयस्तु नृत्यम् । अभिनयशून्यः पुनः शास्त्रोक्ताङ्गभङ्गः स्वगात्रविक्षेपो नृत्त इति तद्विदः, नैघण्टुकानां तु ताण्डवं नटनं नाट्य लास्यं नृत्यं च नर्त्तनमिति अभेदव्यवहारो निरूढलक्षणया नेयः । (प्रणटतीत्यादि । नटी) । गौरादित्वान् ङीष् ॥ ३०७ ॥

पिट शब्दसङ्घातयोः ॥ (पेटति । पिपेट । पेटितेत्यादि । पिपिटिषति । पिपेटिषति । पिटित्वा । पेटित्वा । पेटयति । अपीपिठत् । पिटकम्) "क्वुन् शिल्पिसंज्ञयोः" इति क्वुन् । (पिटाकः) । पिटाकादयश्चेत्याकः ॥ ३०८ ॥

हट दीप्तौ ॥ (हटति । जहाट । हटिता । अहटीत् । अहाटीदित्यादि । हाटकम्) । "संज्ञायां च" इति ण्वुल्, बाहुलकादयस्त्रियामपि हाटशब्दात् कन्वा ॥ ३०९ ॥

षट अवयवे । (सेटति । ससाट । सेटतुः । सटिता । सिसटिषति) "स्तौतिण्योरेव" इत्यषत्वम् । (साटयति । असीषटत् । सटा) । अजन्ताट्टाप् ॥ ३१० ॥

लुट विलोडने ॥ एतदादयः पाठत्यन्तास्टवर्गतृतीयान्ता इति कौशिककाश्यपनन्दिद्रविडाः । ते चास्मादनन्तरे पिटहटी च पेठुः । (लोटति । लुलोट । लोटिता । लुलुटिषति । लुलोटिषति । लुटित्वा । लोटित्वा । लोटयति । अलूलुटत् । अलुलोटत्) । काण्यादित्वादुपधाह्रस्वविकल्पः । लसूत्रे सुधाकरः, लुल विलोडन इति लान्तोपि दृश्यते । लोलद्भुजाकारबृहत्तरङ्गमिति माघः । डलयोरेकत्वस्मरणमिति वा प्रतिविधेयमिति । अयं दिवादावपि । भाषार्थश्चुरादौ । प्रतिघाते द्युतादौ इति । स्तेयार्थः परस्मैपदिषु । लुठतिः चुरादौ ॥ ३११ ॥

चिट परप्रेष्ये ॥ (चेटतीत्यादि) । पूर्ववत् । काण्यादित्वाभावो विशेषः । (चेटी) । इनन्तात् "सर्वतोक्तिन्नर्थादित्येके" इति ङीष् ॥ ३१२ ॥

विट शब्दे ॥ (वेटतीत्यादि । विटः) । इगुपधलक्षणः कः । (विटपः) विटपविष्टपविशिपोलपा इति निपातितः ॥ ३१३ ॥

बिट आक्रोशे ॥ बशादिः । बेटतीत्यादि । हिठेत्यत्र के चित्पठन्ति, हेठतीत्यादि ॥३१४॥

इट किट कटी गतौ ॥ अत्र मैत्रेयः । कटीति ह्रस्वान्तं पठन्तीति चतुर्थं धातुमुक्त्वा मतान्तरेण दीर्घान्तं पठन् ई इति चतुर्थं धातुं दीर्घमुक्त्वा फलं च व्यपदेशिवद्भावेन गुरुमत्त्वे इजादित्वात् अयांचकारेत्याम्सिद्धिमाह । क्षीरस्वामी तु त्रयो धातवः । तृतीय ईदिदित्यङ्गीकृत्य कटित्वा कट्वा, कट्टवानित्युदाहृत्य अन्ये कटीति धात्वन्तरं प्रश्लिष्टमाहुरिति चोक्त्वा कण्टति । कण्टकः । 'उदयति दिननाथे याति शीतांशुरस्तम्' इति चोदाजहार । सम्मतातरङ्गिण्योस्तु कटि इति चत्वारो धातव इति व्याख्यायि । धनपालशाकटायनौ त्रीनेव धातूनाहतुः । अयं पक्षः समर्थितः पुरुषकारेण । यदाह, ईईइति ह्रस्वः दीर्घो धातुः प्रस्तुत्य अन्ये पुनरुभावपि न पठन्ति । व्यक्तं चैतत् धनपालशाकटायनवृत्त्योः । अपि च शौटृ गर्वइत्यादिकान् कांश्चन धातून्पठित्वा अन्ते चोदात्ता इत्युच्यन्ते तचास्मिन्प्रकरणे ऽयतेरपि पाठे सति तस्य अनिट्स्वरान्तो भवतीति दृश्यतामित्यनुदात्तत्वात् प्राचुर्याभिप्रायेण कथं चिन्नेयं स्यात्, यथाह मैत्रेयरक्षितः । उदात्तत्वमयतिवर्जं भट्टग्रामन्यायेनोदात्ता इत्युच्यन्ते इति, स चायं न्यायः सुनिश्चित एवायतेः पाठे शोभते, विप्रतिपन्ने पुनरुदात्तत्वोक्त्याऽस्यवशादपपाठ एव ज्यायान् । उदयतीत्यादि चैवमसाध्वेवास्त्विति हरदत्तस्याभिप्रायोयमेव पक्षोऽभिमतः । यदाह "उपसर्गस्यायतौ" इत्यत्रायतिरनुदात्तेत्कथं तर्हि उदयति विततोर्ध्वरश्मिरज्जाविति परस्मैपदं, किमनेन वन्यगजशौचेन, यदि वा पचाद्यजन्तादुदयशब्दादाचारक्विपि लट् । केचित् तु इटकिटकटीत्यत्र इकारमपि धातुं पठन्तीति । वृत्तिकारोपि प्रायेणात्रैवानुकूलः । यदाह "एतिस्तुशासु" इत्यत्र क्यपि इत्य इत्युदाहृत्य कथमुपेयमिति, ईइत्यस्यैतद्रूपमिति । यदि ह्रीमौ स्यातां प्राथम्यादनयोरेकमुपाददीत । अथोदाहरणानि । (एटति । इयेट । ईटतुः । इयेटिथ) । पिद्वचनेषु "द्विर्वचनेचि" इति गुणस्य स्थानिवत्त्वादिट्शब्दस्य द्विरुक्तौ हलादिशेषे "अभ्यासस्यासवर्णे" इति इयङ् । नन्वेवं गुणस्य स्थानिवत्त्वादवश्यं स पुनः प्रवर्त्तयितव्यः, तस्यां च दशायां गुणादन्तरङ्गत्वात् सवर्णदीर्घेण भाव्यम् । न चास्ति वार्णादाङ्गं बलीय इति, यत इदमाङ्गवार्णयोः समाननिमित्तत्वे प्रवर्त्तते । न च कार्यौ निमित्तत्वेनाश्रीयते, सत्यम् इदानीमेवाग्रे परिहरिष्यते (एटितेत्यादि । एटिटिषति । एटयति । मा भवानिटिटत्) । णिलोपस्य "द्विर्वचनेचि" इति स्थानिवत्त्वाट्टिशब्दस्य द्विर्वचनम् । अतः पूर्वमेवोपधाह्रस्व इत्युक्तम् । (केटति । चिकेट । केटिता । चिकेटिषति । किटित्वा । केटित्वेत्यादि) । (किटिः) । इगुपधादितीन् कित्त्वान्न गुणः । (कण्टति । चकण्ट । कण्टिता : कण्टकः) । संज्ञायां क्वुन् । (कण्टकितम्) । तारकादित्वादितच् । अनिदिद्वा । एवं (कटतीत्यादि) । इ इति चतुर्थधातुवादिनाम्, (अयति । इयाय । इयतुः । इयुः । इययिथ । इयेथ) । भारद्वाजनियमादिड्विकल्पः । (इयय । इयाय । इयिव । इयिम ।) पिद्वचनेषु । गुणवृद्ध्योः 'द्विर्वचनेचि" इति स्थानिवत्त्वाद् इकारस्य द्विर्वचने "अभ्यासस्यासवर्णे" इतीयङ् । अन्यत्र पूर्ववदियङ् । स्थानिवद्भावादिशब्दस्य द्विरुक्तौ पुनरियङः प्रवर्त्तनायां तं बाधित्वा "एरनेकाचः" इति प्राप्तं यणमन्तरङ्गत्वाद्बाधित्वा सवर्णदीर्घः । पुनरियङादेशः । यदापि सवर्णदीर्घस्य यणश्चेकार आश्रयो भवति स्थानित्वेनेति समानाश्रयणे वार्णादाङ्गं बलीय इति दीर्घं बाधित्वा यण् प्रवर्त्तते ततोपीदमेव रूपम् । अत्र पक्षे इययिथेत्यत्रापि न दोषः । यतस्तत्रापि समानस्थानित्त्वे चास्ति समानाश्रयणत्वं दीर्घगुणयोः । एवमपि न सिद्ध्यति, यदत्र द्विर्वचनकाले ऽपहृतो गुणः पुनः प्रवर्त्तते, ततश्चानादिष्टादचः पूर्व्वत्वेनाभ्यासो दृष्ट इति तस्य "अभ्यासस्यासवर्णे" इति इयङि कर्त्तव्ये गुणस्य स्थानिवत्त्वाद् असवर्ण इति प्रतिषेधः स्यात्, एवं तर्हि अत एवासवर्णग्रहणसामर्थ्यात् स्थानिवत्त्वं न भविष्यति । नन्वयमस्ति वचनस्यावकाशोऽर्त्तेर्लिटि द्विर्वचने "अर्त्तिपिपर्त्त्योश्च" इति अभ्यासेत्वे इयर्त्ति इयृत इत्यादि । नैतत् । न ह्येकमुदाहरणं योगारम्भं प्रयोजयति । इयति प्रयोजने अभ्यासस्यार्त्ताविर्त्येव ब्रूयात् । उवोणादि तु न प्रयोजनं तस्य छान्दसत्वे तन्वादीनां छन्दस्युपसङ्ख्यानमिति सुवर्गादिवदुवङः

सिद्धत्वात् भाषायामामा भाव्यम् । (एता । एष्यति) । स्वरान्तत्वादनिट्त्वम् । (अ-तु । आयत् । अयेत) । आशिषि (ईयात्) । "अकृत्सार्वधातुकयोः" इति दीर्घः । ऐषीत् । मा भवानेषीत् । ऐष्यत् । कर्म्मणि ईयत इत्यादि । स्यादौ चिण्वदिटि वृद्धौ आयिष्यतेत्या-दि । (ईषिषति) । "अज्झनगमां सनि"ति दीर्घः । "इको झल्" इति सनः कित्वान्न गुणः । आययति । मा भवानयियत् । णौ चङि वृद्ध्यायायोः "णौ चङि" इति ह्रस्वे णिलोपे तस्य स्थानिवत्त्वेन यिशद्बस्य द्विर्वचनम् । (इतः । इतवान्)। प्रेत्य । ल्यपि "षत्वतुकोरसि-द्धः" इति एकादेशस्यासिद्धत्वाद् ह्रस्वनिबन्धनस्तुक् । किटेति मैत्रेयमतेन त्रासे गतः । क-टिश्च वर्षावरणयोः ॥ ३१७ ॥

मडि भूषायाम् ॥ (मर्डिति । ममण्ड । मण्डितेत्यादि) । मण्डते कन्या स्वयमेव । अमण्डिष्ट कन्या स्वयमेव । भूषाकर्मत्वाद्यक्चिणोर्निषेधः । (मिमण्डिषित । मामण्ड्यते । अमामन् । मण्डयति । अममण्डत् । मण्डनः) । "क्रुधमण्डार्थेभ्यश्च" इति युच् । मण्ड इ-ति विभागे गतः ॥ ३१८ ॥

कुडि वैकल्ये ॥ कुण्डतीत्यादि । कुण्डत इति दाहे गतम् । अत्र स्वामी । कुटीति कौशि-कदुर्गाविति, शाकटायनः पुनः प्रकरणानुरोधेन डान्तमेवाध्यगीष्ट ॥ ३१९ ॥

मुट प्रमर्दने ॥ (मोटति । मुमोट । मोटिता । मुमुटिषति । मुमोटिषति । मुटित्वा । मोटित्वा) । "रलो व्युपधात्" इति कित्त्वविकल्पः । मुडेति धनपालः । पुडिति पकारादि-डान्त इति शकाटायनः । क्षीरस्वामी तु द्वावपीदितौ पपाठ । मैत्रेयस्त्वमुं टान्तमेव पठित्वा मुडि खण्डन इति चाग्रे पठित्वा पुडि चेत्येकइत्याह । मुट प्रमर्दनाक्षेपयोरिति तुदादौ । मुड संचूर्णनइति चुरादौ ॥ ३२० ॥

चुडि अल्पीभावे ॥ चुण्डतीत्यादि । चुटेति दुर्गः । चुटच्छेदनइति तुदादौ । चुटच्युटी द्वावपि चुरादौ ॥ ३२१ ॥

मुडि खण्डने ॥ मुण्डतीत्यादि । मुण्डः तं करोतीति (मुण्डयति ।) "मुण्डमिश्रश्लक्ष्णलव-णव्रतवस्त्रहलकलकृतस्तूस्तेभ्यो णिच्" इति करोत्यर्थे णिचि णाविष्ठवदिति टिलोपः । (य-वनमुण्डः । काम्बोजमुण्डः) । मयूरव्यंसकादित्वाद्विशेषणस्य परनिपातः अत्र मैत्रेयः । पुडि चेत्येके । (पुण्डति । पुण्डः । पुण्डरीकमिति) । डकारवत् पवर्गादिप्रकारणादिहायं निर्दिश्यते, मुडि भूषायामित्युकारवन्न भवति इति डकारान्तोप्यकारवत्त्वादादौ निर्दिष्ट इति मैत्रेयः । अत्र शुठि खण्डनप्रमर्द्दनयोरिति क्वचिद्धातुकोशे पठ्यते । मैत्रेयादयस्तु न पठन्ति । तत्राद्य-पाठ एव ज्यायान्यदिहैवाग्रे शुठि शोषणइति भविष्यति, अस्मिन् हि सति तस्य रूपाभेदाद् शोषणग्रहणमपीहैव कर्त्तव्यं स्यात् ॥ ३२२ ॥

रुठि लुठि स्तेये ॥ (रुण्ठति । लुण्ठतीत्यादि) । रुठिलुठीत्येकइति क्षीरस्वामी । शा-कटायनस्तृतीयान्तौ पपाठ । लोठतीति विलोडने गतम् । लुठ प्रतिघातइति युजादौ । रुठ रो-षणइति चुरादौ । तत्र रुठेत्येके ॥ ३२४ ॥

स्फुटिर्विशरणे ॥ अयं पाठो मैत्रेया दीनाम्(१) । (स्फोठति । पुस्फोठ । स्फोठिता । पुस्फुठिषति । पुस्फोठिषति । स्फुठित्वा । स्फोठित्वा ।) इत्यादि । इकाररेफयोः "उपदेशे-जनुनासिक इत्" "हलन्त्यम्" इतीत्त्वं, तेन लुङि "इरितो वा" इति परस्मैपदे विधीयमानो ऽङ्विकल्पो भवति । (अस्फुटत् । अस्फोटीदिति) । "इदितो नुम् धातोः" इति नुम् अ-न्तेदितो विधानादस्य न भवति । स्फुटेति चन्द्रः । अस्याङ् नास्ति । स्वामिकाश्यपौ तु स्फट स्फुठि स्फुटिरिति त्रीन् धातून् पठतः । (स्फुण्ठति । स्फोटतीत्यादि स्फुटा) । अच्, टाप् । स्फुट विकाशनइत्यात्मनेपदिषु टान्तः ॥ ३२५ ॥

---

(१) देवेत्यधिकं क्वचित् पु० ।

पठ व्यक्तायां वाचि ॥ (पठति । पपाठ । पेठतुः । पठिता । अपाठीत्) पाठयति श्लोकं पुत्रमित्यादि ॥ ३२६ ॥

वठ स्थौल्ये ॥ (वठति । ववाठ । वठितेत्यादि) । वादित्वान्नैत्वाभ्यासलोपौ । वठि एकचर्यायामात्मनेपदी गतः ॥ ३२७॥

मठ कठ मदनिवासयोः ॥ अयं पाठो मैत्रेयस्य । अन्येषां मठ मदनिवासयोः । कठ कृच्छ्रजीवनइति । (मठति । कठति) । इत्यादि । (कठः) । अच् । कठेन प्रोक्तं च्छन्दः "कलापिवैशम्पायनान्तेवासिभ्यश्च" इति वैशम्पायनान्तेवासित्वाण्णिनिः । तस्य "कठचरकाल्लुक्" इति लुक् । "छन्दोब्राह्मणानि च तद्विषयाणि" इति नियमात् तदधीते तथैवं" इति अध्येतृवेदितृप्रत्ययान्त एव प्रयोगार्हः । तस्य चाणः "प्रोक्ताद् लुक्" इति लुक् । तदव कठेन प्रोक्तं छन्दोधीयमानोपि (कठः । कठिनम् ।) औणादिक इन् । वंशकठिने व्यवहरति (वांशकठिनिकः । "कठिनान्तप्रस्तारसंस्थानेषु व्यवहारति" इति कठिनान्तादिभ्यः सप्तम्यन्तेभ्यो व्यवहरतीत्यर्थे ठगिति ठक् । (कठोरम्) । कठिचकिभ्यामोरजित्योरच् । अनन्तरं मठ गताविति क्वचित्पठ्यते । मैत्रेयादयस्तु न पठन्ति ॥ ३२९ ॥

रठ परिभाषणे ॥ रठतीत्यादि ॥ ३३० ॥

हठ प्लुतिशठत्वयोः ॥ (हठति । जहाठेत्यादि) । हठ बलात्कार इति चन्द्रदुर्गौ ॥३३१॥

रुठ लुठ उठ उपघाते ॥ (रोठति । । लोठतीत्यादि) अत्र मैत्रेयः । उठेत्यप्येकइति । धनपालशाकटायनौ तु रुठलुठेत्येव पेठतुः । क्षीरस्वामी तु उठिं पठित्वा रुठ लुठ इत्यपि दौर्गा इत्याह । (उठति । उवोठ । ऊठतुः) । ओठितेत्यादि । पठतिवत्प्रक्रिया । लुठः काण्यादित्वात् अलूलुठत् । अलुलोठदिति भवति अयं श्लेषणे तुदादिः । लुठि आलस्ये प्रतिघाते च । रुठि लुठि गतावित्यग्रे इदितौ । लुठ श्लेषणइति तुदादौ । असौ डान्त इत्येकइति मैत्रेयः । तथा च स्वामी लुठतीति लक्ष्यदर्शनात् तुदादौ पाठ इति । लुठ प्रतिघात इति द्युतादौ ॥ ३३४ ॥

पिठ हिंसासंक्लेशनयोः ॥ पेठतित्यादि । (पीठम्) । घञ् । "अन्येषामपि दृश्यते" इति दीर्घः । (पीठी) । इन्नन्तात् "कृदिकारादक्तिनः" इति ङीष् ॥ ३३५ ॥

शठ कैतवे च ॥ चकाराद्धि सासंक्लेशनयोश्च । शठति इत्यादि । स्वाम्यादयः पुनश्चकारं नैव पेठुः । गत्यसंस्कारकारयोरयं चुरादौ । तत्रैव श्लाघायामात्मनेपदिषु, सम्यग्गवभाषणे कठादौ ॥ ३३६ ॥

शुठ गतिप्रतिघाते ॥ प्रतिघात इत्येव धनपालः । तथा च कुठि इत्युत्तरधातौ प्रतिहतिमात्रं प्रतीयते इत्यर्थ इति स एवाह । शोठतीत्यादि । शुठीति क्षीरस्वामी । आलापइति चुरादौ । शुठि शोषणइत्यत्रैवाग्रे ॥ ३३७ ॥

कुठि च ॥ (कुण्ठतीत्यादि । कुण्ठः) ॥ ३३८ ॥

लुठ आलस्ये प्रतिघाते च ॥ (लुण्ठतीत्यादि) । लोठतीत्युपघाते गतम् ॥ ३३९ ॥

शुठि शोषणे । (शुण्ठति । शुण्ठः । शुण्ठी) । शोठतीति गतिप्रतिघाते गतः ॥ ३४० ॥

रुठि लुठि गतौ ॥ अर्थभेदात्पुनः पाठो लुण्ठेरित्याहुः । रुण्ठति । लुण्ठन्तीत्यादि) ३४२ ॥

चुड्ड भावकरणे ॥ भावकरणमभिप्रायसूचनम् । (चुड्डति । चुचुड्ड । चुड्डितेत्यादि । चुचुड्डिषति । चोचुड्यते । अचोचुत्) अयं दोपध इति संयोगान्तलोपे तकारस्य श्रवणम् । (चुड्डयति । अचुचुड्डत्) ॥ ३४३ ॥

अड्ड अभियोगे ॥ अयमपि दोपध इति क्विप्यदिति भवति । (अड्डति । आनड्ड । अड्डिता । अड्डिडिषति) । "न न्द्राः" इति दकारवर्ज्जस्य द्विर्वचनम् । (अड्डयति आड्डिडत्) ॥ ३४४॥

कड्ड कार्कश्ये ॥ कड्डतीत्यादि अस्यापि दोपधात्वाद्यड्लुकि क्विपि च । (अचीकत् कद्र)

इति च भवति । कच्चं तत् जलं च (कज्जलम्) ॥ ३४५ ॥

क्रीडृ विहारे ॥ (क्रीडति । चिक्रीड । क्रीडिता । चिक्रीडिषति । चेक्रीड्यते । चेक्रीड्टि । अचेक्रीट् । आक्रीडते) । "क्रीडोऽनुसंपरिभ्यश्च" इति अन्वादिपूर्वाच्चकाराद् आङ्पूर्वाच्चङ्, एवमनुक्रीडतइत्याद्युदाहार्यम् । समासाहचर्यादनोरुपसर्गस्य ग्रहणं, तेन "तृतीयार्थे" इति यदानोः कर्मप्रवचनीयत्वं तदा तङ् न भवतीति (माणवकमनुक्रीडतीति) माणवकेन सह क्रीडतीत्यर्थः। "कर्मप्रवचनीययुक्ते द्वितीया" इति माणवकाद् द्वितीया । संक्रीडन्ति शकटानीत्यत्र । [समोकूजन इति वक्तव्यम्] इति उक्तत्वान्न तङ् । कूजन्ति शकटानीति ह्यस्यार्थः ।

(आक्रीडी) । "संपृचे" इत्यादिना घिनुण् । चिक्रीडः । "क्रुआदीनां के द्वे भवतः" इति कप्रत्यये द्विर्वचनम् ॥ ३४६ ॥

तुडृ तोडने ॥ तोडनं दारणं हिंसनं चेत्युक्तम् । (तोडति । तुतोड । तोडितेत्यादि) । तुड इति स्वामिशाकटायनौ, तुडतइत्यात्मनेपदी गतः ॥ ३४७ ॥

हूडृ हुडृ होडृ गतौ ॥ (हूडति । जुहूड । हूडिता । हूडयति । अजुहूडत् । होडति । जुहोड । होडिता । होडयति । अजुहोडदित्यादि) हुडृ हूडृ गताविति धनपालशाकटायनौ । होडतइत्यनादरे गतः ॥ ३५० ॥

काडृ अनादरे ॥ काडतीत्यादि ॥ ३५१ ॥

रोडृ लोडृ उन्मादे ॥ (रोडति । लोडतीत्यादि) ॥ ३५३ ॥

अड उद्यमे ॥ (अडति । अडो) वृश्चिकलांगूलं तेन तैक्ष्ण्यं लक्ष्यते । विशिष्टो ऽडस्तैक्ष्ण्यमस्य व्यडः, तस्यापत्यं व्याडिः । "अत इञ्" "स्वागतादीनां च" इति वृद्धिप्रतिषेधैजागमयोर्निषेधः ॥ ३५४ ॥

लड विलासे ॥ लडतीत्यादि । जिह्वोन्मथने वटादौ । अनन्तरे लल ईप्सायामिति क्वचित्पठ्यते । तत् क्षीरस्वामिपुरुषकारादयो नानुमन्यते, यत् रलयोर्डलयोश्चैकत्व स्मरणात् ललयति ललनेत्याहुः । लड उपसेवायामिति चुरादौ ॥ ३५५ ॥

कड मदे ॥ कडतीत्यादि । क्षीरस्वामी तु कडीति पठित्वा कडेति दुर्गा इत्याह । अयं तुदादौ च उभयत्र पाठफलं तत्रैव वक्ष्यते । कण्डतइति गतः ॥ ३५६ ॥

गडि वदनैकदेशे ॥ आगण्डतीत्यादि । अत्र वक्तव्यं दन्त्यादिष्वमुं पठित्वोक्तम् । शौटादय उदात्ता उदात्तेतः तवर्गान्ताः ॥ ३५७ ॥

केचनैधत्यादयो गताः । केचन द्युतादौ वक्ष्यन्ते । इति क्रमप्राप्तानात्मनात्मनेपदिनः पवर्गान्तानाह ॥

तिपृ तेपृ ष्टिपृ ष्टेपृ क्षरणार्थाः ॥ एतदायस्तोभत्यन्ता उदात्ता अनुदात्तेतः । तर्पि तिर्पि चापीत्यनिट्कारिकासु पाठात् तिपिरेकोऽनुदात्तः, ऋदित्पवर्गान्तात्मनेपदित्वसाम्याच्चेह पाठः । क्षीरस्वामिना त्वयं सेडुदाहृतः, तत्काश्यपवृत्तिन्यासपदमञ्जर्यादिविरोधात् तर्पि तिपिसिति व्याघ्रभूतिवचनविरोधात् चोपेक्ष्यम् । (तेपते । तितेपे । तितपिषे । तितपिवहे) । क्रादिनियमादिट् । (तेप्ता । तेप्स्यते । तेपताम् । अतेपत । तेपेत । आशिषि । तिप्सीष्ट । अतिप्त । अतिप्साताम्) झलि सिजूलोपः *लिङ्सिचावात्मनेपदेषु* इति इकूसमीपा द्धलः परयोर्झलाद्योर्लिङ्सिचोः कित्त्वान्न गुणः । आत्मनेपदेष्वितिसिच एव विशेषणं न लिङः, परत्वासम्भवात् परस्मैपदिषु झलादित्वासंभवाच्च (तितिप्सते) । *हलन्ताच्च* इति इकूसमीपाद्धलादेः सनः कित्त्वान्न गुणः, (तेतिप्यते । तेतिपीति । तेतेप्ति । तेपयति । अतितेपत्) । ऋदित्त्वाण्णौ चङि ह्रस्वाभावः । (तेपते । तितेपे । तेपिता । तेपिष्यते । तेपताम् । अतेपत । तेपेत । तेपिषीष्ट । अतेपिष्ट । तितेपिषते, तेतिप्यते । तेतेपीत । तेतेप्ति । स्तेपते । तिष्टिपे । तिष्टिपाते) । "अभ्यासे खयः शेषः, स्तेपितेत्यादि । तेपिवत् । (तिस्तेपिषते । तिस्त्विपिषते, स्तिपित्वा, स्तेपित्वा)। "स्तौतिरण्यो-

व" इत्यषत्वम् । "रलो व्युपधात्" इति वा कित्त्वम् । (तेष्टिप्यते । तेष्टिपीति । तेष्टेप्ति । ढुष्टिप्तः) । तिपिवत् छर्पिः। अभ्यासे खयः शेषो विशेषः । दिप्ट देप्ट इति च काश्यपः ॥३६१॥

तेपृ कम्पने च ॥ ३६२ ॥

ग्लेपृ दैन्ये ॥ ग्लेपत इत्यादि ॥ ३६३ ॥

टुवेपृ कम्पने ॥ (वेपते । वेपथुः) । "ट्वितो ऽथुच्" इत्यथुच् । विपिनम् । "वेपितुह्योर्ह्रस्वश्च" इतीनचि ह्रस्वः ॥ ३६४ ॥

केपृ गेपृ ग्लेपृ च ॥ चकारात्कम्पने गतौ च । सूत्रविभागादिति स्वामी । मैत्रेयस्तु चकारमन्तरेण पठित्वा कम्पनइत्यपेक्षतइत्याह । वेपतिना सहैषामपाठोऽप्रसिद्धत्वज्ञापनायेति तस्याभिप्रायः । ग्लेपेरर्थभेदात्पुनः पाठः । केपतइत्यादि । केपादीनां वेपतेश्चलनार्थत्वात् "निगरणचलना" इति णौ परस्मैपदमेव । एषामनुदात्तेत्वात् "चलनशब्दार्थादकर्मकाद्युच्" इति युचि वेपन इत्युदाहार्यम् ॥ ३६७ ॥

मेपृ रेपृ लेपृ गतौ ॥ अयं पाठः स्वामिनः । मैत्रेयस्तु मेपृ लेपृ सेवने, रेपृ प्लवगताविल्याह । मेपते, रेपते, लेपत इत्यादि । क्वचित्पठ्येते हेपृ वेपृ इति च ॥ ३७० ॥

त्रपूष् लज्जायाम् ॥ त्रपते । त्रेपे । "तृफलभजत्रपश्च" इति किति लिटि एत्वाभ्यासलोपौ त्रपेस्थलि नास्ति । (त्रपिता । त्रप्ता । त्रपिष्यते । त्रप्स्यते) । उदित्त्वादिड्विकल्पः । (त्रपताम् । अत्रपत । त्रपेत । आशषि त्रपिषीष्ट । त्रप्सीष्ट । अत्रपि । अत्रप्त)। झलि सिचो लोपः । (तित्रपिषते तित्रप्सते । तात्रप्यते । तात्रपीति । तात्रप्ति । त्रपयति । अतित्रपत्) । घटादित्वान्मित्त्वम् । (त्रपित्वा । त्रप्त्वा । त्रप्तः । त्रप्तवान्) । "यस्य विभाषा" इति निष्ठायामिण्निषेधः । त्राप्यम् । "आसुयुवपिरपिलपित्रपिचमश्च" इति भावे ण्यत् "पोरदुपधात्" इति यतोऽपवादः । (त्रपा) । "षिद्भिदादिभ्योऽङ्" इति स्त्रियामङ् । अपत्रपिष्णुः । "अलङ्कृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्" इति तच्छीलादाविष्णुच् । त्रपु । "शस्वृस्निहित्रप्यसिहनिक्लिदिबन्धिमनिभ्यश्च" इत्युप्रत्ययः । त्रपुणो विकारस्त्रापुषम् । *त्रपुजतुनोः षुक्* इति षुगागमोऽणूप्रत्ययश्च ॥ ३७१ ॥

कपि चलने ॥ (कम्पते । चकम्पे । कम्पितेत्यादि । कम्पयति) । "निगरणचलना" इति नित्यं परस्मैपदम् । कम्प्रः "नमिकम्पिस्म्यजसकमहिंसदीपो रः" इति तच्छीलादौ रः । वा सरूपविधिना "अनुदात्तेतः" इति वा "चलनशब्दा" इति वा यु विकम्पनः । ननु पदेरनुदात्तेत्वादेव युचि सिद्धे "जुचङ्क्रम्या" इत्यादिना पुनर्युज्विधानेन ताच्छीलिकेषु वासरूपविधिर्नेति ज्ञापितम् । अन्यथा लषपतपदेत्युक्त्वा अनुदात्तेल्लक्षणयुचः समावेशे सिद्धे पुनस्तद्विधानमनर्थकं स्यात् । नैतदस्ति । "सूददीप" इतियुज्निषेधादस्यानित्यत्वज्ञापनात्, नित्ये हि "नमिकम्पि" इत्यादिना विशेषविहितेन रप्रत्ययेन युचो बाधस्य सिद्धत्वात् किं तन्निषेधेन । (विकम्पितः) । विकृतशरीर इत्यर्थः । "लगिकम्प्योरुपतापशरीरयोः" इति नलोपः । कपिः । "कटिकम्प्योर्नलोपश्च" इतीन्प्रत्यये नलोपः । कपेर्भावकर्मणी कापेयम् । "कपिज्ञात्योढक्" इति ढक् । वृषो धर्मस्तस्याकपिः, अकम्पिता, वृषाकपिः विष्णुः रुद्रश्च । वृषाकपायी । श्री गौरी च । "वृषाकपी" इत्यादिना पुंयोगलक्षणे ङीषि अन्त्यस्यैकारः । कपिलः । "कपेश्च" इतीलच्प्रत्ययः बाहुलकादत एव निर्देशाद्वा नलोपः । (कबलः कम्बलः) बाहुलकात् कलप्रत्ययः पकारस्य बकारः पक्षे नलोपश्च । कम्बल्यमूर्णापलशतम् । कम्बलाय हितमिति विषये "कम्बलाच्च संज्ञायाम्" इति यत् । द्वाभ्यां कम्बल्याभ्यां क्रीता शाटी द्विकम्बल्या । "तद्धितार्थोत्तरपदसमाहारे च" इति तद्धितार्थे समासे "द्विगुश्च" इति द्विगुत्वं "प्राग्वतेष्ठञ्" इति प्राग्वतीयेष्वर्थेषु विहितस्य ठञः ,'अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायाम्" इतिलुक् । अत्र "द्विगोः" इति प्राप्तस्य ङीपः *अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि* इति निषेधः । अपरिमाणान्तात्परिमाणत्वेपि बिस्ताद्यन्ताच्च द्विगोस्तद्धितलुकि सति ङी-

ब्नेति सूत्रार्थः । पाण्डुकम्बलेन परिवृतो रथः पाण्डुकम्बली । "पाण्डुकम्बलादिनिः इति पाण्डुकम्बलशब्दात्तृतीयान्तात् परिवृतो रथ इत्यर्थे इनिः । येन तत्परिकृतं तत्तस्यास्ति इति मत्वर्थीयेन सिद्धे इदं वचनं ठनो निवृत्त्यर्थम् ॥ ३७२ ॥

रबि लबि अबि शब्दे ॥ (रम्बते । ररम्बे । रम्बिता । रिरम्बिषते । रारम्ब्यते । रारम्बीति । रारम्प्ति । अरारन् । हे इति रम्बतइति हे रम्बः । लम्बतइत्यादि । अम्बते । आनम्बे । अम्बिबिषते । अम्बयति । आम्बिबत् ।) त्रीण्यम्बकानि चक्षूंषि अस्येति (त्र्यम्बः) त्रयाणां लोकानामम्बः पितेत्यागमविदः । द्यौर्भूमिरापस्तिस्रोम्बा अस्य इति भारतम् । शब्दा अकारोकाराः प्रतिपादका अस्यवेति भट्टभास्करः स एव सृष्टिस्थितिसंहारविषयास्तिस्रो वा शक्तयोऽस्येति च । (अम्बरीषम्) । "आष्टमम्बरीषम्" इति निपात्यते । अम्बा । हे अम्ब । "अम्बार्थनद्योः इति ह्रस्वः सम्बुद्धौ ॥ ३७५ ॥

लबि अवस्रंसने च ॥ 'नञि लम्बेर्नलोपश्च" इति नञ्युपपदे उकारप्रत्ययो नलोपश्च णिद्वद्भावात् वृद्धिश्च ॥ ३७६ ॥

कबृ वर्णे ॥ (कबते । चकबे : कबिता । चिकबिषते । चाकब्यते । चाकप्ति । काबयति । अचकाबत् । कबरः) बाहुलकादरः । (कबरी) । "जानपद" इत्यादिना केशवेश ङीष् अन्यत्र कबरा । कर्बुरः । बाहुलकादुरः प्रत्ययो रेफोपजनश्च ॥ ३७७ ॥

क्लीबृ अधार्ष्ट्ये ॥ (क्लीबते । चिक्लीबे । क्लीबिता । क्लीबयति । अचिक्लीबत् । क्लीब इवाचरति क्लीबते) । "आचारेवगल्भक्लीब" इति क्विप् तत्सन्नियोगेन चैषामकारस्यानुदात्तताऽनुनासिकताप्रतिज्ञानादनुदात्तेत्वात्तङिति होडतौ प्रतिपादितम् । क्विभावे "उपमानादाचारे" इति क्यङि क्लीबायते ॥ ३७८ ॥

क्षीबृ मदे ॥ (क्षीबते । चिक्षीबे । क्षीबिता । क्षीबयति । अचिक्षीबत् । क्षीबः) । "अनुपसर्गात्फुल्लक्षीब" इति निष्ठायामिडभावस्तलोपश्च, इच्छब्दलोपो वा निपात्यते ॥ ३७९ ॥

शीभृ कत्थने ॥ (शीभते) शिशीभे । शीभिता । शिशीभिषते । शेशीभ्यते । शेशीब्धि "झषस्तथोः" इति तकारस्य धकारे "झलां जश् झशि" इति भकारस्य बकारः । (शीभयति । अशिशीभत् । शीभरः बाहुलकादरः ॥ ३८० ॥

चीभृ च ॥ चीभतइत्यादि ॥ ३८१ ॥

रेभृ शब्दे ॥ (रेभते । अरेभतेत्यादि । विरिब्धः ।) "क्षुब्धस्वान्तः" इत्यादिना स्वरे निष्ठायामिडभावे उपधाह्रस्वत्वं च निपात्यते । अन्यत्र रेभितः । अभिरभी च क्वचित्पठ्येते । अम्भते रम्भतइत्यादि । (अम्भः) असुन् । अम्भसोपत्यं आम्भिः । 'अम्भसः सलोपश्चे'ति बाह्वादिपाठादिञि सलोपः ॥ ३८२ ॥

ष्टभि स्कभि प्रतिबन्धे ॥ (स्तम्भते । तस्तम्भे ।खयः शेषः । स्तम्भिता । तिस्तम्भिषते) "स्तौतिण्योरेव" इत्यषत्वम् । षोपदेशफलं ण्यन्तात्सनि तिष्टम्भयिषतीति षत्वम् । (उत्तम्भते । उत्तम्भिता । उत्तम्भितः) । *उदः स्था म्भस्तम्भोः पूर्वस्य* इति उदः परयोरनयोः सकारस्थाने पूर्वस्य सवर्ण इति तकारः स्तम्भेः" इत्यादावुपसर्गात्परस्य षत्वविधौ स्तम्भुस्तुम्भ्वति प्रतिपदोक्तस्यैव ग्रहणं स्तम्भेः, न त्वस्य लाक्षणिकस्येति विस्तम्भ इत्यादौ न षत्वम् । "उदः स्यास्तम्भोः" इत्यत्र तु नायं न्यायः, यतस्तम्भुरूपमुभयोरपि लाक्षणिकम् । अत्र स्वामिमैत्रैयो ष्टभेष्टकारमेकीयमतेनौपदेशिकमाहतुः । तत्र ष्टम्भते विष्टम्भतइत्यादौ सर्वत्र ष्टुत्वेन षत्वे लिडादावभ्यासे टकारस्य शेषे तष्टम्भइत्यादि भवति । स्कम्भते । (चस्कम्भे । स्कभित । स्कम्भिता) "यसितस्कभत" इति निपातनं तु छन्दसि "वेः स्कम्भातेर्नित्य इति षत्वं श्नानिर्देशात् सौत्रस्यैव नास्येति विस्कम्भितइति भवति । स्तम्भु स्तुम्भुस्कम्भु स्कुम्भु इति सैत्राश्चत्वारो धातवस्ते च 'स्तम्भुस्तुम्भु स्कम्भुस्कुम्भस्कुञ्भ्य श्नुश्चे" इति वा श्नाश्नुविकरणा इति तत्रोदाहियते । स्तोभतइ-

स्कम्भे स्तम्भार्थे ॥ ३८४ ॥

जभी जृभि गात्रविनामे ॥ जभीत्येके, जब्धमिति मैत्रेयः । अयमेव पाठः प्रायेण वृत्तिकारस्य संमतः । यत्तु्विह "रधिजभोरचि" इत्यत्र अजग्रहणप्रत्युदाहरणे जब्धमिति, अनीदित्त्वे इटा भाव्यमिति कथमेवमुदाहरेत् । (जम्भते । जजम्भे । जम्भिता । जम्भिष्यते । जम्भताम् । अजम्भत । जम्भेत । जम्भिषीष्ट । अजम्भिष्यत । जिजम्भिषते) । "रधिजभोरचि" इति अजादौ प्रत्यये नुम् (जञ्जभ्यते) "लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्" इति यङ् । भावो धात्वर्थस्तस्य गर्हा भावगर्हा । अयं च यङ् पूर्वसूत्रान्नित्यग्रहणानुवृत्त्या तक्रकौण्डिन्यन्यायेन वा क्रियासमभिहारयङो बाधक इति भाष्यादौ स्थितम् । "जपजभदहदशभञ्जपशां च" इति अभ्यासस्य यङि यङ्लुकि च नुगागमः । इदं च नुग्ग्रहणमनुस्वारोपलक्षणार्थं "नुगतोनुनासिकान्तस्य" इति अत्रान्तग्रहणात्, तद्धि तदन्तविधिनाप्यनुनासिकान्तस्य धातोरभ्यासस्य नुकि सिद्धे तदन्तस्य यत्कार्यं तद्यथा स्यादिति । न च नुकोन्त्यत्वे किंचित्कार्थमस्ति, अस्ति चानुस्वारस्य "वा पदान्तस्य" इति परसवर्णविकल्पः । "कर्तुः क्यङ् स०" इति वदनुनासिकेत्यविभक्तिको निर्देशः । तेन जञ्जभ्यते इत्यत्रानुस्वारस्यापि पक्षे श्रवणं भवति । (जञ्जभीति । जञ्जब्धि । जञ्जब्धः । जञ्जम्भतीत्यादि) । "रधिजभोरचि" इत्यत्र प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणमिति अजादौ नुमागमः । (जम्भयति । अजजम्भत्) जम्भो दन्तविशेषो ऽभ्यवहार्यं च,शोभनो जम्भोस्यास्तीति सुजम्भा । "जम्भासुहरिततृणसोमेभ्यः" इति स्वाद्यादेर्जम्भात् बहुव्रीहेरनिचि "सर्वनामस्थाने चासंबुद्धौ" इति नान्तस्योपधाया दीर्घः । पदत्वे "न लोपः प्रातिपदिकान्तस्य" इति नलोपः भसंज्ञायां "अल्लोपोनः" इत्यल्लोपः । (सुजम्भ्न) इत्यादि । ङौ तु "विभाषा ङिश्योः" इति विकल्पित इति सुजम्भ्नि सुजम्भनीति भवतः । सम्बुद्धौ "न ङिसम्बुध्योः" इति नलोपनिषेधः । नपुंसके तु "वा नपुंसकानाम्" इति पक्षे नलोपः । अन्यत्र तु नित्यः, दीर्घस्तु न भवति असर्वनामस्थानत्वात् । शौ सर्वनामस्थानपरत्वात् सुजम्भानीति "विभाषा ङिश्योः" इति श्यामल्लोपविकल्पनात् (सुजम्भ्नी सुजम्भनी) इति भवतः । स्त्रियां 'ऋन्नेभ्यः' इति ङीपः "अनो बहुव्रीहेः" इति निषिद्धत्वात् पुंसीव रूपम् । यदा तु *डाबुभाभ्यामन्यतरस्याम्* । अन्नन्तात्प्रातिपदिकादनन्ताद्बहुव्रीहेश्च डाबिति डाप्तदा डित्वाट्टिलोपे (सुजम्भा सुजम्भे) इत्यादि । ङीपः प्रतिषेधस्य डापः श्रवणस्य च वचनद्वयप्रामाण्यादेव सिद्धौ अन्यतरस्याग्रहणेन भिन्नेन योगेन ङीपोभ्यनुज्ञानात् (सुजम्भ्नी)इत्याद्यपि भवति । अत्र च योगे "अनो बहुव्रीहेः" इत्येवानुवर्त्तते न तु "मनः" इति सीमादेः प्रातिपदिकाद् ङीबभावः । (सुजम्भ्नी) इत्यादौ तु अन्नन्तबहुव्रीहित्वाद्भवत्येव । (सुपर्वा सुशर्मा)इत्यादौ तु "अन उपधालोपिनोन्यतरस्याम्" इति नियमान्न भवति। सिद्धे सत्यारभ्यमाणोयं नियमार्थः । यदन्यतरस्यां ङीब्विधानं तदुपधालोपिन एवेति,अत्र ह्यल्लोपो *न संयोगाद्वमन्तात्* इति निषिद्ध्यते । वमन्तात् ।संयोगात् भसंज्ञानिमित्ते प्रत्यये परे ऽल्लोपो नेति सूत्रार्थः । "जम्भा सुहरिततृण०" इत्यत्र जम्भेति भाविना समासान्तेन निर्देशात्समासार्थं तदुत्तरपदादकृते एव समासे समासान्ता इत्ययं पक्षो ज्ञाप्यते । तेनद्विपुरीत्यादि सिद्ध्यति । यदि ह्यत्र "ऋक्पूरब्धूः" इत्यकारः समासे कृते स्यात् तदा समासस्याकारान्तोत्तरपदत्वाभावात् [अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्यते] इति स्त्रीलिङ्गता न स्यात् । जृम्भते । जृम्भितेत्यादि । यङ्लुको "रीगृत्वतः" इति वचनाद्रुग्रिग्रीको भवन्ति । (जरीजृभ्यते । जरीजृम्भीति । इत्यादि । जृम्भयति । अजजृम्भत्) । जृभिति विनाशनार्थं चुरादौ । भाषार्थोयं परस्मैपदिष्वपि इति केचित् ॥ ३८६ ॥

शल्भ कत्थने ॥ शल्भते । शशल्भे । शल्भितेत्यादि ॥ ३८७ ॥

वल्भ भोजने ॥ दन्त्योष्ठ्यादिः । वल्भते । णौ निगरणार्थत्वात् नित्यं ।परस्मैपदम् । वल्भयति ॥ ३८८ ॥

गल्भ धार्ष्ट्ये ॥ (गल्भते । प्रगल्भः । अवगल्भ इवाचरति अवगल्भते)। "आचारे ऽवग-ल्भः" इति क्विप्, तत्संनियोगेनाकारस्यानुदात्तत्वानुनासिकत्वप्रतिज्ञानात्प्रागेवोक्तमित्यनु-दात्तत्वात्तङ् क्विपोरभावे क्यङि (अवगल्भायते)। अवगल्भेति विशिष्टग्रहणादनुपसृष्टाद-न्योपसृष्टाच्चाचारक्विपि (गल्भति । प्रगल्भति) इति भवति ॥ ३८९ ॥

श्रम्भु प्रमादे ॥ तालव्योष्मादिः, एवं काश्यपः । दन्त्यादिरिति चन्द्रः । स्वामी चैवं पठि-त्वा मतान्तरेण स्रन्सेति दन्त्यान्तमप्याह । मैत्रेयस्य त्वयमेव पक्षः । यदाह स संयोगान्त-साधर्म्येण सान्तोप्यत्र निर्दिश्यते । द्युतादावप्ययं पठिष्यते । तस्यैव च ध्वंसुसाहचर्यान्नो-गित्याहुः । दत्ते पुनरसाहचर्यमिच्छन्नीति । दैवेप्येवमेवोक्तम् । तत्र तावदयं पक्षो वृत्तित-द्व्याख्याकृतामनभिमत इव प्रतीयते, यद्दत्तवसूत्रे, उभयोर्ग्रहणं नोक्सूत्रे नास्येति चाहुः । सति ह्येवमवश्यवक्तव्यं, तथैव स्वामिचन्द्रयोरपि पाठोनभिमत इव । यत् "वौ कषलसकत्थश्रम्भ" इत्यत्र श्रम्भु विश्वास इति वदन्नमुं नोपाददते, वृत्तिकारोऽग्रहणे कारणं चाचष्ट । तथा व्या-ख्याकृतोपि न वृत्तिकारवचनमुपलक्षणमाचक्षता नान्यग्रहणे कारणम् । (श्रम्भते । शश्रम्भे । श्रम्भिता । श्रम्भित्वा श्रब्ध्वा) । उदित्त्वादिड्विकल्पः "न क्त्वासेट्" इत्यकित्त्वान्नलोपा-भावः । (श्रब्धः) । "यस्य विभाषा" इत्यनिट्त्वम् ॥ ३९० ॥

ष्टुभु स्तम्भे ॥ (स्तोभते । तुष्टुभे । स्तोभितेत्यादि । तुस्तुभिषते । तुस्तोभिषते । स्तु-भित्वा । स्तोभित्वा) "रलो व्युपधात्" इति वा कित्त्वम् । उदित्त्वात्पक्षे क्त्वायामिडभावे "निष्ठा" इति निष्ठायां "यस्य विभाषा" इति (स्तुब्धम्), सनि "स्तौतिण्योरेव" इत्यषत्वं, (निष्टोभिता । निष्टोब्धा) । "उपसर्गात्सुनोति" इत्यादिना "प्राक् सितादड्व्यवायेपि" इति नियम एवावतिष्ठते । (अनुष्टुप्) । पूर्ववत् षत्वं, (त्रिष्टुप्) "सुषामा-दिषु च" इति षत्वम् । अनुष्टबेवआनुष्टुभम् । एवं (त्रैष्टुभं), [छन्दसः प्रत्ययविधाने नपुंसके स्वार्थउपसंख्यानम्] इति स्वार्थे उत्सादिभ्यः प्राग्दीव्यतीयोण्, स्वार्थेपि प्राग्दीव्यतीयः । तिप्यादय उदात्ता अनुदात्तेतः तिपिवर्जम् ॥ ३९१ ॥

गुपू रक्षणे ॥ एतदादयः शुम्भान्ता उदात्ता उदात्तेतः ॥ "गुपूधूपविच्छिपणिपनिभ्य आ-यः" इत्यायः स्वार्थे । "आयादय आर्द्धधातुके वा" इति आर्द्धधातुके विषये विकल्पेनाय-मुत्पाद्यते । तस्मिन् लघूपधगुणः, आयादय आयेयङ्णिङः । "सनाद्यन्ता धातवः" इति धातुत्वं, (गोपायति । गोपायांचकार) । "कास्प्रत्ययात्" इत्याम् । (गोपायिता । गोपायि-ष्यति । गोपायतु । अगोपायत् । गोपायेत् । आशिषि गोपाय्यात् । अगोपायीत् । अगोपा-यिष्टाम् । अगोपायिष्यत् । जुगोपायिषति । गोपाययति । अजुगोपायत्) । सर्वत्रार्द्धधा-तुके अतो लोपः अत एवाग्लोपित्वात् "णौ चङि" इति ह्रस्वाभावः । (गोपाय्यम्) । "अचो यत्" (गोपायितः । गोपायित्वा । गोपाया) । "अप्रत्ययात्" इत्यकारः । आयाभावे (जु-गोप । जुगुपतुः । जुगोपिथ । जुगोप्थ । जुगुपिव । जुगुप्व) । ऊदित्त्वादिड्विकल्पः । यावत् कश्चिदिडभावः प्रतिषेधनिबन्धनो वा विकल्पनिबन्धनो वा सर्वः क्रादिसूत्रेण नियम्यत इति मैत्रेयः सेधतावाह । तन्मते नित्यमिटा भाव्यम् । क्रादिनियमः प्रतिषेधविषय इति वादिनां हरदत्तादीनां विकल्प एव । आयादीनामुत्पत्तिविकल्प इत्युक्तेर्निवृत्तिविकल्पे हि प्रत्ययलक्ष-णेन प्रत्ययान्तत्वात् धातुत्वात् (गोपायांचकारेति स्यात् । गोपिता । गोप्ता । गोपिष्यति । गोप्स्यति । गुप्यात्)। "किदाशिषि" इति कित्त्वान्न गुणः । (अगौप्सीत् । अगोपीत् । अ-गोपिष्यत् । अगोप्स्यत् । जुगुप्सति । जुगुपिषति । गुप्त्वा । गुपित्वा । गोपित्वा) । "रलो-व्युपधात्" इति क्त्वासनोः कित्त्वविकल्पः । सनि अनिट् पक्षे "हलन्ताच्च" इति कित्त्वम् । (जोगुप्यते) । आयान्तस्यानेकाच्त्वात् न यङुदाहृतः । आयोत्पत्तिविकल्पस्य यङपि प्रयोजनम् । नात्र यङो लुगस्ति यत् "आयादय आर्द्धधातुके वा" इति आर्द्धधातुकव्यक्तेरभि-व्यक्तावेवायं विकल्प उच्यते । लुकि हि तेन विषयत्वापहारान्नार्द्धधातुकव्यक्तेरभिव्यक्तिरि-

ति कथमायाभावः स्यात्। उपपादितश्चायं प्रकारोऽजगतिक्षेपणयोरित्यत्र । (गोपयति । अजूगुपत् । गुप्तः । गुप्तिः) । "तितुत्र" इति नेट्, "यस्य विभाषा" इति नेट उत्पत्तिः । उत्पत्तिविकल्पस्य चेदं प्रयोजनम् । अन्यथा प्रत्ययान्तत्वादकार एव स्यात् । (गोप्यम्) । ण्यत् । (कुप्यम्)। "राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः" इति क्यपि गुपेरादिकत्वं निपात्यते । अयं भाषार्थो रक्षणार्थश्चुरादौ । गुप गोपनइति इहैवाग्रे । गुप व्याकुलत्व इति दिवादौ ॥ ३९२ ॥

धूप संतापे ॥ अस्यापि पूर्ववदायस्तदभावश्च । (धूपायति । धूपायांचकार । धूपायिता) इत्यादि । नायाभावे वलादौ सर्वत्र नित्यमिडस्य विशेषो, "रलो व्युपधात्" इति कित्त्वविकल्पस्याप्यत्र न प्रयोजनम्, अलघूपधत्वात्, आयाभावेपि नास्य क्तिनस्ति गुरुमत्त्वात् । तेन (धूपा)इत्यकार एव भवति, भाषार्थेऽयं चुरादौ ॥ ३९३ ॥

जल्प जप व्यक्तायां वाचि ॥ जप मानसे च ॥ (जल्पति । जजल्प । जल्पितेत्यादि । जल्पाकः) । "जल्पभिक्षकुट्टलुण्टवृङः षाकन्" ॥ इति तच्छीलादौ षाकन् । स्त्रियां जल्पाकी । जल्पति पुत्रं देवदत्तः । जल्पयति पुत्रं देवदत्तं यज्ञदत्तः । ["जल्पत्यादीनामुपसंख्यानम्] इति प्रयोज्यस्याशब्दकारकत्वेपि कर्मत्वम् । (जपति । जजाप । जेपतुः । जपिता । अजपीत् । अजापीत्) "अतो हलादेः" इति वा वृद्धिः (जिजपिषति । जञ्जप्यते) । "लुपसद" इत्यादिना । भावगहार्यां यङ् । "जपजभ" इत्यादिनाभ्यासस्य नुक्यनुस्वारे परसवर्णविकल्पो जभतिवत् । (जञ्जपीति । जञ्जप्ति । जापयति । अजीजपत् । जप्यम्) । "पोरदुपधात्" इति यत् । (कर्णेजपः) । *स्तम्बकर्णयोरमिजपोः* इति यथासंख्यं जपेः कर्णे सुबन्ते उपपदे च [हस्तिसूचकयोः] इति वचनात् सूचकविषयः, "तत्पुरुषे कृति बहुलम्" इति सप्तम्या अलुक् । (जञ्जपूकः) । "यजजप" इति यङन्तात्तच्छीलादावूकप्रत्यये "अतो लोपः" "यस्य हलः" इति अतो लोपयलोपौ । (जपः) । "व्यधजपोरनुपसर्गे" इति अप् । उपसृष्टात्तु घञ् (उपजापः) । अनयोः कर्मव्यतिहारे न तङस्ति । [प्रतिषेधे हसादीनामुपसंख्यानम्] इत्युक्तत्वात् ॥३९५॥

चप सान्त्वने ॥ (चपति । चचाप । चेपतुः । चपिता) इत्यादि जपिवत् । चपो वृक्ष इति मैत्रेयः । वेणुविशेष इति दण्डनाथः । तस्य विकारः । (चापम्) । "तालादिभ्योऽण्" इति विकारावयवयोरण् ॥ ३९६ ॥

षप समावाये ॥ समवायः संबन्धः सम्यगवबोधो वा । (सपति)इत्यादि जपिवत् । (सिसपिषति) । "स्तौतिण्योरेव" इति अषत्वम् । (सापयति । असीषपत् । सप्तिः) । "क्तिच्क्तौ च संज्ञायाम्" इति क्तिच् । (सप्त) । "सप्यशूभ्यां तुट् च" इति कनिन्प्रत्ययः तुडागमश्च । पञ्चशब्दवत् षट्संज्ञा तत्कार्यं च, सप्तानामपत्यं (साप्तिः) । "बह्वादिभ्यश्च" इतीञि "नस्तद्धिते" इति टिलोपः । अत्र शाकटायनः क्षीरस्वामी सचतिं चाहुरित्युक्त्वा (सचति सचितः) इत्यप्याह ॥ ३९७ ॥

रप लप व्यक्तायां वाचि॥ (रपति । लपति) इत्यादि जपिवत् । (विलापयति पुत्रम्) इत्यत्र जल्पत्यादित्वात्प्रयोज्यस्य कर्मत्वम् । (अलीलपत् । अललापत्) । काण्यादित्वाद् उपधाह्रस्वविकल्पः । (राप्यः । लाप्यः) । "आसुयुवपिरपिलपित्रपि" इति ण्यत् । यतोऽपवादः । अत एव जपतिना समानार्थत्वेपि पृथङ्निर्देशः । (रिपुः) । "रपेरिच्चोपधायाः" इति उप्रत्यय उपधाया इकारः ॥ ३९९ ॥

चुप मन्दायां गतौ ॥ (चोपयति । चुचोप । चोपिता । चुचुपिषति । चुचोपिषति । चुपित्वा) । "रलो व्युपधात्" इति कित्त्वविकल्पः । (चोचुप्यते । चोचुपीति । चोचोप्ति । चोपयति । अचूचुपत् । चोपनः) । चलनार्थत्वाद् युच् । णौ नित्यं परस्मैपदम् । गले चोप्यते (गलेचोपकः) । "कृत्यल्युटो बहुलम्" इति बहुलवचनाद् ण्यन्तादस्मात्कर्मणि ण्वुल् । "कर्तृकरणे कृता बहुलम्" इति बहुलवचनात् सप्तम्यन्तस्यापि समासः । "तत्पुरुषे कृति बहुलम्"

इति अलुक्, "अमूर्द्धमस्तकात्स्वाङ्गादकामे" इति च, "उदुपधाद्भावादिकर्मणोः" निष्ठायां वा कित्त्वे (चुपितमनेन । चोपितमनेनेत्यादि । चुप्रम्) । ऋजेन्द्रादौ रकि निपातितः । "स्वरेण नीचेन शपिञ्छुपि क्षिपिम्" इत्यनिट्कारिकापाठो द्वितीयादेरिति तत्र तौदादिकस्य छुप संस्पर्शन इत्यस्यैव ग्रहणं न त्वस्य ॥ ४०० ॥

तुप तुम्प त्रुप त्रुम्प तुफ तुम्फ त्रुफ त्रुम्फ हिंसार्थाः ॥ तोपतीत्यादि चुपिवत् । (तुम्पति । तुतुम्पतुः) । संयोगान्तत्वाल्लिटो न कित्त्वम् । (तुम्पिता । तुम्पिष्यति । तुम्पतु । अतुम्पत् । तुप्यात्) । "किदाशिषि" इति कित्त्वात् अनिदितामिति नलोपः । (अतुम्पीत् । अतुम्पिष्यत् । तुतुम्पिषति । तोतुप्यते । तोतुम्पीति । तोतुम्प्सि । तोतुप्तः । तुम्पयति । अतुतुम्पत् । प्रस्तुम्पति गौः) । "प्रात्तुम्पतौ गवि कर्त्तरि" इति सुट् । तुम्पतेस्तुम्पताविति धातुनिर्देशो न तिङन्तानुकारणमिति प्रस्तुम्पः प्रस्तुम्पक इत्यादावपि भवति, प्रतोतुम्पीतीत्यादावत एव श्तिपा निर्देशान्न भवति । (त्रोपति । त्रुम्पति । तोफति । त्रुम्फति) इत्यादि तुपितुम्फिवत् । तत्रारेफसरेफयोः सानुषङ्गद्वितीयान्तयोः सेट्त्वाद् "नोपधात्थफान्ताद्वा" इति कित्त्वविकल्पनात् पक्षे नलोपे (त्रुपित्वा । त्रुम्पित्वा । त्रुफित्वा । त्रुम्फित्वा) इति भवति । अरेफाश्चत्वारस्तुदादावपि । आद्यस्तु चुरादावपि । तत्र त्वर्दनमर्थः ॥ ४०८ ॥

पर्प रफ रफि अर्ब पर्व लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ ॥ आद्यः प्रथमान्तः । परौ द्वावपि द्वियीयान्तौ । एकादश परे तृतीयान्ताः । द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः । (पर्पति । पपर्प । पर्पितेत्यादि । पर्प्यतेनेनेति पर्पः,) येन पीठेन पङ्गवश्चरन्ति स उच्यते । "हलश्च" इति घञ् । पर्पेण चरति, (पर्पिकः) । *पर्पादिभ्यष्ठन्* इति तृतीयान्ताच्चरत्यर्थे ष्ठन् । षित्वात् स्त्रियां (पर्पिकी । रफति । अर्बति । आनर्ब । अर्बिता । पर्बति । लर्बति । बर्बति । मर्बति । कर्बति । खर्बति । गर्बति । शर्बति । सर्बति । असिषर्बत् । चर्बति) । अर्बादयो नोपधा इति कौशिकः ॥ ४२२ ॥

कुबि छादने ॥ (कुम्बतीत्यादि । कुम्बा) । गुरुमत्त्वादकारः । "चिन्तिपूजिकथिकुम्बिचर्चश्च" इत्यङ्विधौ चौरादिकस्य ग्रहणम् ॥ ४२३ ॥

लुबि तुबि अर्दने ॥ (लुम्बति । तुम्बतीत्यादि । तुम्बी) अलाबूः । गौरादित्वान् ङीष् ॥४२५॥

चुबि वक्त्रसंयोगे ॥ चुम्बतीत्यादि । लुम्ब्यादस्त्रयश्चुरादौ ॥ ४२६ ॥

ष्टभु ष्टम्भु हिंसार्थौ ॥ अत्र मैत्रय एवं पठित्वा षिभु षिम्भु इत्येकइति ऋकारस्य स्थाने इकारमप्याह । तरङ्गिण्यां तु ऋकारवन्तौ दन्त्यादौ पठित्वा षोपदेशपर्युदासे सृग्रहणेनानर्थकस्यापि ग्रहणमित्युक्तम् । (सर्भति । ससर्भ । सर्भितेत्यादि । सिषर्भिषति) । मैत्रेयपाठे "स्तौतिण्योरेव" इत्यषत्वम् । (सरीष्टभ्यते । सरीष्टभीति । सरिष्टभीति । सर्ष्टर्भीति । सरीष्टब्धि । सरिष्टब्धि । सर्ष्टब्धि । सर्भयति । अससर्भत् ।) असीसृभत् । "उऋद्वा" । (सिषर्भिषति) तरङ्गिणीमते तु षत्वं न भवति । (सर्भित्वा । सृप्त्वा) । ऊदित्त्वादिड्विकल्पः । (सृब्धम्) । "यस्य विभाषा" इत्यनिट्त्वम् । (सृभ्यम्) । ऋदुपधत्वात् क्यप् । (सृम्भति । ससृम्भ । सृभ्यात् । ससृम्भतुः) । नलोपः ङ्कितोः । इकारवत्पाठपक्षे (सेभति । सिम्भतीत्यादि) ॥४२८॥

शुभ शुम्भ भाषणे ॥ हिंसायां द्वाविमौ देवमैत्रेयादयः पठन्ति । स्वामी तु निरनुषङ्गेन पपाठ । इदमेवात्रेयस्यापि मतम् । तुदादौ शोभतइति शपीतिवचनात् । दुर्गस्तु भासनइत्यस्यार्थमाह । एवं धनपालशाकटायनौ । गुप्तस्तु 'सावष्टम्भनिषुम्भसम्भ्रमनमद्गोल' इत्यादिदर्शनान्मूर्धन्यादित्वमाह (शोभति । शुम्भतीत्यादि), तोपति तुम्पतिवत् । (शुभः) । इगुपधलक्षणः कः । (शुभ्रम्) । स्फायितञ्चीत्यादिना रक् । इमौ शोभार्थौ तुदादौ । निरनुषङ्गस्त्वग्रे । गुपादय उदात्ता उदात्तेतः ॥ ४३० ॥

अथानुनासिकान्ताः ॥

घिणि घुणि घृणि ग्रहणे ॥ एतदादयः कम्यन्ता उदात्ता अनुदात्तेतः । (घिण्णते । जिघि-

णे । विण्णिता । विण्णिष्यते । विण्णताम् । अविण्णत । विण्णेत । आशिषि विण्णिषीष्ट । अविण्णिष्ट । अविण्णिष्यत । जिविण्णिषते । जेविण्ण्यते । जेविण्णीति । जेविण्टि । लङि । अजेविन् । विण्णयति । अजीविण्णत् । विण्णित्वा) । सर्वत्र नुमि ष्टुत्वम् । यङ्लुकि लङि संयोगान्तलोपस्यासिद्धत्वात् नकारान्त एव । (वुण्णते । घृण्णते । जघृण्णे) इत्यादि । (जरिघृण्ण्यते) । "रीगृत्वतः" इति रीक् । (जरीघृण्णीति । (जर्घृण्णीति)इत्यादि । (अजर्घृन्) इत्यत्र संयोगान्तलोपस्यासिद्धत्वान्न गुणः, "पदान्तस्य",इति णत्वं न ॥ ४३३ ॥

घुण घूर्ण भ्रमणे ॥ (घोणते । जुघुणे । घोणिता । जुघुणिषते । जुघोणिषते । घुणित्वा । घोणित्वा) । "रलो व्युपधात्" इति कित्त्वविकल्पः । (जोघुण्यते । जोघुणीति । जोघुण्टि । जोघूण्टः) इत्यादौ अनुनासिकान्तत्वात् "अनुनासिकस्य क्विझलोः क्ङिति" इति दीर्घ उपधायाः । झलिति क्ङितोर्विशेषणम् । (घोणयति । अजूघुणत्) उदुपधाद्भावादिकर्मणोः (घुणितमनेनत्यादि) (घोणा) । क्रोडादिनिपातनादचि टाप् । (कल्याणघोणा) । अत्र *स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्* इति उपसर्जनसंयोगोपधस्वाङ्गान्ताद्बहुव्रीहेर्वा ङीषिति प्राप्तस्य ङीषः *न क्रोडादिबह्वचः* इति निषेधः । अयं ङीष् क्रोडाद्यन्ताद्बह्वजन्ताच्च नेत्यर्थः । (घूर्णते) इत्यादि । यङ्लुकि लुङि (अजोघूर्ण्) । "रात्सस्य" इति नियमात् संयोगान्तलोपाभावः । इमौ तुदादौ परस्मैपदिनौ ॥ ४३४ ॥

पण व्यवहारे स्तुतौ च ॥ ४३५ ॥

पन च ॥ पृथङ्निर्देशात् स्तुतावित्यनेनैवायं सम्बध्यते । (शतस्य पणते। शतं पणते) । *व्यवहृपणोः समर्थयोः* इति कर्मणि शेषे षष्ठी । अन्यदा द्वितीयैव । समर्थयोरिति समानार्थयोरित्यर्थः, शकन्ध्वादित्वात् समशब्दाकारस्य पररूपम् । द्यूते क्रयविक्रयव्यवहारे च समानार्थत्वमनयोः । (पेणे । पणिता । पणिष्यते । पणताम् । अपणत । पणिषीष्ट । अपणिष्ट । अपणिष्यत । पिपणिषते । पम्पण्यते) । "नुगतोनुनासिकान्तस्य" इति नुक् । पम्पणीति । पम्पण्टि । पम्पाण्टः) । "अनुनासिकस्य क्विझलोः" इति दीर्घः (अपम्पण् । पाणयति । अपीपणत् । पण्यम्) । "अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु" इति पणितव्ये व्यवहर्तव्ये निपातितः । अन्यत्र ण्यति (पाण्यम् । मूलकपणः । शाकपणः) । यः संव्यवहाराय मूलकादीनां परिमितो मुष्टिर्बध्यते स उच्यते । *नित्यं पणः परिमाणे* इति परिमाणे गम्यमाने अप् प्रत्ययः । अन्यत्र (पाणः) । व्यावहारिकोप्युन्मानलक्षणपरिमाणयोगात् पण इत्युच्यते, स पणश्चेद्विवादः स्यादित्यादौ इदं दास्यामीति पणनस्य परिच्छेदनात् पणोक्तिः । (अध्यर्द्धपण्यम् । द्विपण्यम्)*पणपादमाषशतात्यत्*इति अध्यर्धपूर्वात् प्रातिपदिकात् पणाद्यन्ताद् द्विगोश्चार्हीयेष्वर्थेषु यत् । एत्यात्र आपणतइति (आपणः) । "गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च" इत्यधिकरणे घान्तो निपातितः । (पणितम्) । क्विपि (पाण्) । "अनुनासिकस्य" इति दीर्घः । (वणिक्)। "पणोरिज्यादेश्च वः"इति इजिप्रत्ययः, पकारस्य च वकारः । वणिजो भावो (वाणिज्या) "दूतवणिग्भ्यां च" इति यत् । यद्यप्ययं भावकर्माधिकारे तथापि स्वभावाद्भाव एव स्त्रियां च । (वाणिज्यमिति) "प्रज्ञादिभ्यश्च" इत्यणन्ताद् वाणिजशब्दात् "गुणवचनब्राह्मणादिभ्यः कर्मणि च" इति ब्राह्मणादेराकृतिगणत्वात् ष्यञि कर्मणि चेति चकारेण भावः समुच्चीयते । विविधमत्र पणन्तइति (विपणिः) । इनितीन् । (पणसम्) । पण्यपर्यायः । "अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच्" इत्यसच् । "गुपूधूप" इत्यायो व्यवहारार्थस्य नेत्युक्तान्युदाहरणानि तद्विषयाणि । तथा च वृत्तिः, स्तुत्यर्थेन पनिना साहचर्यात्तदर्थः पणिः प्रत्ययमुत्पादयतीति । एवं न्यासपदमञ्जर्यादिष्वपि । अत एव तरङ्गिण्यामपि । 'न चोपलेभे वणिजां पणाया' इति प्रयुञ्जानो भट्टिर्भ्रान्त इत्युक्तम् । (पणायति राजानम् । पणायां चकार । पणायिता)इत्यादि । आर्द्धधातुकविवक्षायामायानुत्पत्तौउक्तान्येवोदाहरणानि । गुप्यादिवदायोत्पत्तिविकल्पस्य प्रयोजनं पणतइत्यादिसिद्धिः । पणां चकारेत्यादिनिवृत्तिश्च । निवृत्तिविकल्पे हि

प्रत्ययलक्षणेन प्रत्ययान्तादाम् स्यात्। एवमन्यत्रापि प्रयोजनानि गुपिवन्नेयानि। अत्र स्वामिकाश्यपसम्मताकारवासुदेवादयः पणायतइत्यायान्तादात्मनेपदमुदाहरन्ति। तदसत्। यदस्यानुदात्तत्वं व्यवहारार्थस्यायाभावात् स्तुत्यर्थस्यार्द्धधातुक आयविकल्पनात् प्रकृतावेव चरितार्थम्। अवयवे चाचरितार्थं लिङ्गं समुदायस्य विशेषकं यथा जुगुप्सतइति, स्पष्टं चैवं "गुपूधूप" इत्यत्र न्यासपदमञ्जर्यादिषु। अत्र मैत्रेयेन्द्रन्यासे पणतेः सार्वधातुकादिपाठाल्लिङ्गात सार्वधातुके ऽपि विकल्पमाहुः नित्ये ह्याये विच्छायतीति शपापि सिद्ध्यतीति किं तत्र पाठेन। न चास्ति स्वरभेदः। ने कृते प्रत्ययस्वरेण तस्योदात्तत्वे धातुवर्ज्यमानस्वरेणानुदात्तः शपि तु अस्य पित्त्वेनानुदात्तत्वात् धातोरन्त इति धातुरन्तोदात्तः। तत्र "एकादेश उदात्तेनोदात्तः" इत्युभयथापि विकरणान्तस्योदात्तत्वात्। अनेनैवाभिप्रायेण "च्छ्वोः शूट्" इत्यत्र न्यासे गां विच्छति गोविडित्युक्तम्। नैतत्साधु। (विच्छायती विच्छायन्ती) "आच्छीनद्योः" इति नुम्विकल्पस्य प्रयोजनस्य सम्भवात्। शपि तु "शप्श्यनोर्नित्यम्" इति नित्यो नुम् स्यात्। "गुपूधूपविच्छि" इत्यत्र कैयटपदमञ्जर्यादिष्वप्येवमेव स्थितम्। विच्छ गतावित्यत्रात्रेयमैत्रेयावप्येवमेवाहतुः। तथा देवोपि विच्छेरपि शतृवा नुम् स्यादिति तुदादितेति। अत्र पुरुषकारे तुतादौ त्रिच्छिः पठ्यते, न तु विच्छायतिरिति विच्छेरैवानन्तरेण शेन भाव्यम्। स चैवं भवन्नाय विकल्पस्य कल्पकः स्यादेव। अत्रैव "आयादय आर्द्धधातुके वा" इत्यत्र न्यासान्तरम्, आयादयः शपि नित्यमिति भाष्यं चानुकूलम्। नित्ये विच्छेराये शब्ग्रहणं शित उपलक्षणमिति कल्प्यं स्यादिति सुधाकराद्युक्तमेव समर्थितं, नायं भाष्यस्यार्थः। तत्र हि परसप्तमीत्वमाश्रित्य सूत्रं दूषयित्वा तत्परिहाराय सार्वधातुके नित्यमित्यभिहितम्। तत्राप्यायेरनवकाशेन विकरणानां बाधदोषमुद्भाव्य तत्परिहारायैव तथा पुनरयं सूत्रभेदेन परिहारः, यदि पुनः शपि नित्यमित्युच्येत तदा सिध्यतीत्युक्तं, तेनापि न्यासेन सार्वधातुके नित्यमित्यनेन समानफलेन भाव्यं, तच्च शब्ग्रहणस्य शित उपलक्षणत्वेन युज्यते, अतश्चोपलक्षणत्वमेष्टव्यम्, तत्तत्र यथान्यासमेवास्तु इति सूत्रमेव विषयसप्तम्याश्रयणेन सिद्धान्तितम्। अत एव च तत्र कैयटेन तौदादिकाद्विच्छेः शेन भाव्यं न तु शपा, एवं तर्हि न्यासभेदोपलक्षणार्थमिदं शिति नित्यमिति न्यासः कर्त्तव्य इत्युक्तम्। यदप्युक्तं पुरुषकारे "तुदादिभ्यः शः" इति हि शो विधीयते न तु विच्छाये, विच्छेरेव तुदादिषु पाठात्तस्मैतद्विच्छेः शविधानमाये नित्ये सति गुणादिष्वनुबन्धकरणवत् विच्छेः पाठोऽपि समुदायार्थतया युज्यतइति न संकटम्। तथा च हरदत्तः। विच्छिरयं तुदादौ पठ्यते तत्सामर्थ्यादायप्रत्ययान्तादपि शविकरणो भवति न तु शप्, यथा जुगुप्सते इत्यात्मनेपदं, तेन (विच्छयती विच्छायन्तीति) "अच्छीनद्योः" इति नुम्विकल्पो भवतीति। पनायतीत्यादि। पणिवत्। (पनसः)। "अत्यसि" इत्यादिना असच्॥ ४३६॥

भाम क्रोधे। (भामते। बभामे। भामितेत्यादि। बिभामिषति। बाभान्ति। बाभान्मि बाभान्मः)। "नुगतः" इति तपरकरणात् यङ्लुकोरभ्यासस्य न नुगागमः। "म्वोश्च" इति मकारान्तस्य धातोर्नकारादेशो भवति मकारवकारयोः परत इति मकारस्य नकारः। लुङि- (अबाभान्)। "मो नो धातोः" इति नकारः पदस्येति शेषः। एवं क्विपि (भान्)। (भामः) क्रोधः। सोऽस्यास्तीति (भामिनी)। देवदत्ताय भामत इत्यत्र *क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः* इति कोपविषयत्वेन देवदत्तस्य संप्रदानत्वम्। अमर्षः क्रोधः। अपकारो द्रोहः। अक्षमा ईर्ष्या। गुणेषु दोषाविष्करणमसूया॥ ४३७॥

क्षमूष् सहने॥ (क्षमते। चक्षमे। चक्षमिषे। चक्षंसे। चक्षमिध्वे। चक्षन्ध्वे। चक्षमिवहे। चक्षण्वहे। चक्षमिमहे। चक्षण्महे)। ऊदित्त्वात्सर्वत्र वलाद्यार्द्धधातुक इड्विकल्पः। अनिट्पक्षे "म्वोश्च" इति नत्वे "रषाभ्याम्" इति णत्वं, (क्षमिष्यते। क्षंस्यते। क्षमताम्। अक्षमत। क्षमेत। आशिषि। क्षमिषीष्ट। क्षंसीष्ट। अक्षमिष्ट। अक्षंस्त। अक्षमिष्यत,

अक्षंस्यत्) कर्मादौ (क्षम्यते । अक्षमि) *नोदात्तोपदेशस्य मान्तस्यानाचमेः* इति चिणि ञ्णिति कृति च वृद्धिनिषेधः । (चिक्षमिषते । चिक्षंसते । चङ्क्षम्यते । चङ्क्षमीति । चङ्क्षन्ति)। "नुगतः" इत्यभ्यासस्य नुक् । लुङि "ह्मयन्त" इति वृद्धिनिषेधात् (अचङ्क्षमीत् । क्षमयति । अचिक्षमत्) । 'जनीजृष्क्नसुरञ्जोमन्ताश्च" इति अमन्तत्वलक्षणे मित्त्वे "मितां ह्रस्वः" इत्युपधाया ह्रस्वः । (क्षमित्वा । क्षान्तः । क्षान्त्वा) । "यस्य विभाषा"इत्यनिट्त्वम् । (क्षमः) । घञ् । (क्षमकः) । ण्वुल् । (अपराधक्षमः अपराधक्षमा) । "ईक्षिक्षमिभ्यां च" इत्यणोपवादो णः । अणि हि ङीप्स्यात् । (क्षमा) "षिद्भिदादिभ्योऽङ्" इति षित्त्वात् स्त्रियामङ् , ण्यन्तस्यास्य "चिण्णमुलोर्दीर्घोऽन्यतरस्याम्" इति चिण्णमुल्परे णौ मितामुपधाया दीर्घविकल्पनात् (अक्षमि । अक्षामि । क्षमंक्षमम् क्षामंक्षामम्) इति भवति । "आभीक्ष्ण्ये णमुल्" । चकारः क्त्वासमुच्चयार्थः । "आभीक्ष्ण्ये द्वे भवत" इति द्विर्वचनम् । पौनःपुन्यमाभीक्ष्ण्यम् । स्यादिष्वपि दीर्घविकल्पः चिण्वदिट्पक्षे भवति । (क्षामिष्यते । क्षमिष्यते । अक्षामिषाताम् । अक्षमिषाताम् । क्षामिषीष्ट । क्षामिता । क्षमितेत्यादि) चिण्वदिटोभावे (क्षमयिष्यते । अक्षमिषाताम् । क्षमयिषीष्ट । क्षमयितेति) । लुङ्येकवचने चिण्परो णिरिति पक्षे दीर्घो भवति । (अक्षमि, अक्षामीति) । यङ्लुगन्तादपि चिण्णमुलोश्चिण्वदिटि च अयं दीर्घविकल्पो द्रष्टव्यः । (अचङ्क्षामि । अचङ्क्षमि चङ्क्षामं चङ्क्षामम् । चङ्क्षमं चङ्क्षम् । चङ्क्षामिष्यते । चङ्क्षमिष्यते) इत्यादि । अत्राप्यचिण्वत्पक्षे (चङ्क्षमिष्यते) इत्यादि । अत्र "चिण्णमुलोरन्यतरस्याम्" इति ह्रस्वविकल्पेनापि सिद्धे दीर्घग्रहणं ण्यन्ताद्यङन्ताच्च णौ चिण्णमुल्परे दीर्घार्थम् , अक्रियमाणेस्मिन् णिलोपाल्लोपयोः परनिमित्तयोः पूर्वस्य ह्रस्वविकल्पे कर्त्तव्ये स्थानिवत्त्वान्न चिण्णमुल्परे णौ यदङ्गमनन्तरमित्यसौ न स्यात्, क्रियमाणे तु दीर्घविधिं प्रति न स्थानिवदिति स्थानिवत्त्वं निषिध्यते । एवमपि दीर्घे कर्तव्ये ण्यल्लोपयोः "असिद्ध" इत्यसिद्धत्वात् व्यवधानं दुर्वारम् । नैतत् । व्याश्रयत्वेनासिद्धत्वाभावात्, तथा च वामनः, णौ हि णियङोर्लोपः, चिण्णमुल्परे णावङ्गस्येति दीर्घत्वमिति । अयमपि दिवादौ ॥ ४३८ ॥

कमु कान्तौ ॥ "कमेर्णिङ्" इति स्वार्थे णिङ् , अयमार्द्धधातुके विकल्पनोत्पद्यते । अत्राप्युत्पत्तिविकल्पस्य प्रयोजनं गुपिवद् द्रष्टव्यम् । कामयतेर्ङित्त्वात्तङ्, (कामयाञ्चक्रे । कामयिता कामयिष्यते । कामयताम् । अकामयत । कामयेत । आशिषि कामयिषीष्ट । अचीकमत) । णिग्रहणेष्वयमपि गृह्यत इति "णिश्री" इति कर्तरि चङ् । "णेरनिटि" इति णिलोपे "णौ च" ति ह्रस्वः । (चिकामयिषते । कामयति) णिङन्ताण्णौ "णेरनिटि" इति लोपः (कामयित्वा । कामना) । "ण्यासश्रन्थः" इति युच् । (मांसकामः । मांसकामा) । "शीलिकामिभिक्षिचरिभ्यो णः" इति अणोऽपवादो णः । अणि हि सति स्त्रियां ङीप्स्यात् । णिङभावे (चकमे । कमिता । कमिष्यते । कमिषीष्ट । अचकमत) ।

["कमेरुपसंख्यानम्] इति कर्तरि चङ् । (अकमिष्यत । चिकमिषते । चङ्कम्यते) । अत्र यङ्लुङ् नेति गुपू रक्षण इत्यत्र स्थापितं तत एवावगन्तव्यम् । (कामयति) । "न कम्यमिचमाम्" इति मित्त्वनिषेधाद् वृद्धिः । "चिण्णमुलोः" इति दीर्घविकल्पो मिद्विषय इत्यस्यामित्वात् चिण्णमुल्परेपि णौ नित्या वृद्धिः । (कामङ्कामम् इति) । तथा चिण्वदिट्यपि मित्त्वाभावात् (अकामिष्यत) इत्याद्येव भवति न तु कमिष्यत इत्यादि । अचिण्वत्पक्षे तु गुणाययोः (कामयिष्यत) इत्यादि। अस्योदित्त्वमणिङपक्षे क्त्वायामिड्विकल्पार्थं,तेन (कमित्वा, कान्त्वेति) । निष्ठायां तु "यस्य विभाषा" इति निषेधात् (कान्त इति । कामुकः)। "लषपत"इत्यादिभ उकञ् । (कामङ्कामम्) । "नादात्तोपदेशस्य"इति चिणि ञिति णिति कृति वृद्धिनिषेधोऽस्य न भवति । तत्राचमिकमिवमीनामिति पर्युदासात् । (कामुकी)।"जानपद" इत्यादिना ङीष् । (कमन) इति वासरूपेणानुदात्तेल्लक्षणे युचि।(कन्तुः) कामः । अर्जिदृशीत्यादिनो-

प्रत्ययस्तुगागमश्च । (कन्तुकम्) । "कुमारीक्रीडनकानि च" इति कुमारीक्रीडनकादस्मात् कन् । (कंसः)। "वृतॄवदिहनिकमिकषिभ्यः सः" इति सः । (कंसाय हितं, कंसीयम्)। "तस्मै हितम्" इति विषये "प्राक् क्रीताच्छः" इति छः । तस्य विकारः (कांस्यम्)। "कंसीयपरशव्ययोर्यञञौ लुक्च" इति यथासंख्यादस्माद्विकारे यञि प्रातिपदिकादित्यधिकारात्ततः परस्य छस्य यतश्च लुक्, यञञोस्तु विधानसामर्थ्याच्च भवति। कंसेन क्रीतं (कंसिकम्)। *'कंसाट्टिठन्* इति टिठन् आर्हीयेष्वर्थेषु । टित्वात् स्त्रियां (कंसिकी) ॥ घिण्णादय उदात्ता अनुदात्तेतः ॥ ४३९ ॥

अण रण वण भण मण कण क्वण व्रण भ्रण ध्वण शब्दार्थाः ॥ इतः क्रम्यन्ता उदात्ता उदात्तेतः । (अणति । आण । अणिता । अणिणिषति आणयति । मा भवानणिणत् । अणुः) स्वल्पो धान्यविशेषश्च । "अणश्च" "धान्येनित्" इत्युप्रत्ययः । अणूनां धान्यानां भवनं क्षेत्रम् । (अणव्यम् आणवीनम्) । "विभाषा तिलमाषोमाभङ्गाणुभ्यः" इति षष्ठ्यन्ताद्भवने क्षेत्रे यत्, विभाषाग्रहणात् खञ्च । यति *ओर्गुणः* । उवर्णान्तस्य गुणो भवति भसंज्ञानिमित्ते तद्धिते परे इति गुणे "वान्तो यि"इत्यावादेशः अणुप्रकारः(अणुकः)*स्थूलादिभ्यः प्रकारवचने कन्* इति कन् प्रकारो भेदः सादृश्यं च, (अणुकः) सूक्ष्मदृक्। अणु निपुण इतियावादिपाठात् कन् । (अण्डः) "यमन्ताड्डः" इति डः । बाहुकाड्डुकारस्य नेत्त्वम् । (अड्डुः) (जलतरणिः) । "अणो डश्च" इत्युक्तारप्रत्ययो डश्चान्तादेशः । (रणति । रराण । रणिता अरणीत् । अराणीत्)"अतो हलादेः" इति वा वृद्धिः । (रिरणिषति । रंरण्यते । रंरणीति । रंरण्टि । रंराण्टः) "नुगतोनुनासिकान्तस्य" इत्यभ्यासस्यानुस्वारः, "अनुनासिकस्य क्विझलोः क्ङिति" इति दीर्घः । (रणयति । अरीरणत । अरराणत्) काण्यादित्वाद् ह्रस्वविकल्पः । राणयतीति गतौ घटादिः । (रणनं) शब्दः । रणन्त्यस्मिन्निति (रणो) तेजः संग्रामश्च। [वशिरण्योरुपसंख्यानम्] इति अकर्त्तरि कारके अच् प्रत्ययः । (रणितं, रण्डा) । "जमन्ताड्डः"। (रणरणको) हृल्लेखः। [घञ् कविधानम्] इति कः। [क्रन्यादीनां के द्वे भवतः] इति द्विर्वचनं, संज्ञायां कन् । पृषोदरादित्वाद्धलादिशेषाभावो ऽभ्यासस्याकारश्च । (वणति । ववाण । ववणतुरित्यादि) । वकारादित्वादेत्वाभ्यासलोपाभावः । अयमपि काण्यादिः । (वाणः) शतं तनुः । "हलश्च" इति संज्ञायां घञ् । (वाणी) "इञ् लपाकादिभ्यः" इति इञन्तात् [सर्वतोक्तिन्नर्थादित्येके] इति ङीष् । अन्तर्वाण्यस्येति (अन्तर्वाणिः), विपश्चित् । "निष्प्रवाणिश्च" इति चकारात् "नद्यूतश्च" इति कपो निषेधः । अवश्यं वणतीति (वाणिनी) आवश्यकणिन्यन्तान्ङीप् । (वण्डः) । पूर्ववड्डः । अल्पतनुः पशुः । (भणति । बभाण । भणितेत्यादि) अयमपि काण्यादिः । भण्यत इति (भाणः) । कर्मणि घञ् । (भणितिः ।) "तितुत्र" इतीण्निषेधे [तितुत्रेष्वग्रहादीनाम्]इति वचनादिडागमः । (भण्डः । भाण्डः)। भण्डेर्वा "पुच्छभाण्ड" इति निर्देशाद्दीर्घः । भामेर्वा डप्रत्यये । (संभाण्डयति), भाण्डानि सञ्चिनोतीत्यर्थः । "पुच्छभाण्डचीवराण्णिङ्" इति णिङ्, "भाण्डात्समाचयने" इति च वृत्तिः । ङित्वात्तङ् । (समबभाण्डत) । "णिश्रि" इति चङ् । (मणवि । ममाण । मेणतुः । मणितेत्यादि । मणितम् । मणिः) । इन्प्रत्ययः । मणिप्रकारो मणिकः । स्थूलादित्वात् कन् मणिरेव (मणिकः) यावादित्वात्कन् । (मणिको) लञ्जरः । संज्ञायां कन् । (मण्डः) । मण्डतेर्वा । (कणति चकाण । कणितेत्यादि) । अयमपि काण्यादिः । कणयतीति गतौ घटादित्वात् । (कणः) । लेशः सूक्ष्मतण्डुलश्च । गोचरादिसूत्रे चकारस्यानुक्तसमुच्चयार्थत्वाद् घः । (कणिका) । संज्ञायां कनि "प्रत्ययस्थात्" इतीत्वम् । (कण्ठः) । कणेष्ठः । बाहुलकात् ठस्येकाभावः । अयं निमीलनार्थश्चुरादौ । (क्वणति । चक्वाण । क्वणितेत्यादि । क्वाणः । क्वणः । निक्वाणः निक्वणः । कल्याणप्रक्वणा वीणा । कल्याणप्रक्वाणेति वा) । *क्वणो वीणायां च* । अनुपसृष्टान्निपूर्वात् वीणाविषयाच्च क्वणेर्वा ऽप्प्रत्ययः । सोपसर्गार्थं वीणाग्रहणम् । (कुणालो) धान्यं यज्ञोपकरणं च । "पीयूक्वणिभ्यां कलायन्

ह्रस्वः संप्रसारणं च" इति कालन्प्रत्ययः यथासंख्यात्संप्रसारणं च ।(कुणपम्) । "क्वणः संप्रसारणं च" इति पन्प्रत्ययः संप्रसारणं च । (कङ्कणीका) । प्रतिसरः । "चङ्क्कणेः कङ्कणश्च" इति यङ्लुगन्तादीकन्प्रत्ययः कङ्कणादेशश्च । (व्रणति । वव्राण । व्रणितेत्यादि) । अयं बशादिः क्वचित्पठ्यते । दन्त्योष्ठ्यादिरेव सर्वत्र, तथा च यादवः, व्रणेश्शब्दार्थविषये, व्रणगात्रचूर्णने इति गात्रचूर्णनार्थोयं कथादिः । (भ्रणति । बभ्राण । भ्रणिता । ध्वणति । दध्वाण । ध्वणितेत्यादि) । ध्रणिरपि संमतायामत्र पठ्यते ॥ ४४९ ॥

ओणृ अपनयने ॥ (ओणति । प्रोणति । ओणां चकार । ओणिता । ओणिणिषति । ओणयति) । मा भवानौणिणत् । ऋदित्त्वान्नोपधाह्रस्वः । इदमेव ऋदित्त्वं द्विर्वचनात् पूर्वमुपधाह्रस्वत्वे ज्ञापकमित्युक्तम् । (अवावा) । "अन्येभ्योपि दृश्यते" इति वनिपि "विड्वनोरनुनासिकस्यात्" इति णकारस्याकारेऽवादेशे "सर्वनामस्थाने" इत्युपधादीर्घे नलोपः । स्त्रियाम् (अवावरी) । *वनो र च* इति वन्नन्तप्रातिपदिकत्वात् ङीब्रौ । [वनो न हशः] । हशन्ताद्यो वन् विहितस्तदन्तान् ङीब्रौ नेत्ययं प्रतिषेधः प्रायिकत्वादत्र नेति न्यासादौ ॥४५०॥

शोणृ वर्णगत्योः ॥ (शोणति । शुशोण । शोणिता । शुशोणिषति । शोशोण्यते । शोशोण्टि । शोणयति । अशुशोणत् । शोणितम् । शोणः । शोणी । शोणा) । "शोणात्प्राचाम्" इति वा ङीष् ॥ ४५१ ॥

श्रोणृ संघाते ॥ (श्रोणतीत्यादि । श्रोणिः)। इन्प्रत्ययः । (श्रोणी) । कृदिकारत्वाद्वा ङीष् । (श्रोणा) । नक्षत्रम् । अजन्ताट्टाप् ॥ ४५२ ॥

श्लोणृ च ॥ (श्लोणतीत्यादि) । शोणादयः तालव्योष्मादयः ॥ ४५३ ॥

पैणृ गतिप्रेरणश्लेषणेषु ॥ लेणृ इति क्वचित्पठ्यते । पैणतीत्यादौ ॥ ४५४ ॥

ध्रण शब्दे ॥ उपदेशे नान्तोयमिति प्रागस्य निर्देशो न कृतः । तस्य प्रयोजनं यङ्लुकीति मैत्रेयः' अतोस्य दण्डके पाठः प्रत्युक्तः । ध्रणतीत्यादि । "रषाभ्याम्" इति णत्वम् । यङ्लुकि (दन्ध्रन्ति दन्ध्रान्त) इत्यादौ णत्वस्य "नश्चापदान्तस्य" इत्यनुस्वारेऽसिद्धत्वात् कृते तस्मिन्परसवर्णः, तस्यासिद्धत्वात् पुनर्णत्वं न भवति । अभ्यासस्य "नुगत" इति नुक् । अस्मादनन्तरं क्वचित् कोशे वण भण धण इति त्रयः पठ्यन्ते, तत्र भणिर्मैत्रेयानुसारेण दण्डके पठितः । धणिरपि संमतायामिति तत्रैवोक्तम् । (वणतिः । वणः) । "उद्वण" इत्यच् ॥४५५॥

कनी दीप्तिकान्तिगतिषु ॥ (कनति । चकान । कनितेत्यादि । कन्या) । कन्याया अपत्यं (कानीनः) "कन्यायाः कनीन च" इति अण् कनीनादेशश्च । अत एव निर्देशाद्यत्, स्वरितान्तत्वं तु "तिल्यशिक्यमर्त्यकाश्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः" इति,अन्यथा *यतोनावः* इति यदन्तस्य द्व्यचो विधीयमान आद्युदात्तः स्यात् । (कनकम्)"कुन् शिल्पिसंज्ञयोः" इति कुन् ॥ ४५६ ॥

ष्टन वन शब्दे ॥ (स्तनति । तस्तान । स्तनितेत्यादि । तिस्तनिषति । तंस्तन्यते । तंस्तनीति । तंस्तन्ति) । ध्वनतिवत्प्रक्रिया । (स्तनयति । अतिष्टनत् । अभिनिष्टानः) । विसर्जनीयः । "अभिनिसः स्तनः शब्दसंज्ञायाम्" इति षत्वम् , अन्यत्राभिनिस्तनति मृदङ्गः अत्र न्यासे सकारादिरयं पठितः । तदस्य षोपदेशपर्युदासवाक्ये उपादानान्निर्मूलम् । अत एव पुरुषकारे मूर्द्धन्यादिरेवायं दर्शितः । (स्तान्यम्) ण्यत् । (स्तनः) । अच् । (स्तन्यम्) "शरीरावयवाद्यत्" इति भवार्थे यत् । (स्तनितम् । स्तनयतीति देवशब्दार्थस्य कथादिपठितस्य । (वनति । ववान । ववनतुः । वनितेत्यादि । वनितम् । वनित्वा । वतिः) क्तिनि "तितुत्र" इतीण्निषेधात् "अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति" इत्यनुनासिकलोपे (वतिः) इति भवति । अनुदात्तोपदेशा यमिरमिनमिहनिगमिमन्यतयः । (प्रवत्य) । "वा ल्यपि" इत्यनुदात्तोपदेशादीनां विधीयमानोयमनुनासिकलोपविकल्पो व्यवस्थितविभाषाविज्ञानात् नान्तेषु नित्यः, अन्यत्र विकल्प इतीह नित्यः । (वन्तिः) ।

क्तिच् "न क्तिचि दीर्घश्च" इति दीर्घानुनासिकलोपयोर्निषेधः । "अनुदात्तोपदेशवनति" इति-शितपा निर्देशात् (वंवान्त) इत्यादावनुनासिकलोपो न भवति । वनोतिनिवृत्त्यर्थं तु शितपा निर्देशो न भवति । तनोत्यादित्वेन तस्यानुनासिकलोपस्येष्टत्वात् । (वनिष्ठः) । अपानं मांस-विशेषश्च । ऋतन्यञ्जिवनिचत्यादिनेष्टच् (वनम्) अच् । वनानां समूहो (वन्या) "पाशा-दिभ्यो यः" इति समूहे यः । तदेतत्स्वभावात् स्त्रीलिङ्गम् (वन्यम्) दिगादित्वाद्भवार्थे यत् । (वानेयम्) पूर्वनगरीतिनद्यादित्वात् ढक् शैषिकः । (वनिः । वनी) । "कृदिकारादक्तिनः" इति वा ङीष् ॥ ४५८ ॥

वन षण संभक्तौ ॥ वनेरर्थभेदात्पुनः पाठ इति मैत्रेयः । तथैवेदाहरणानि । (सनति । ससान । सेनतुः । सनितेत्यादि । सायात् । सन्यात्) "किदाशिषि" इति कित्त्वाद् । * ये विभाषा * जनसनखनां यकारादौ किङत्यात्वं वेति तद्विकल्पः । एवं यङयङोरपि । धातुपारा-यणे तु "लोपोयि" इतिवद्वर्णमात्रे निर्देष्टव्ये य इत्यस्वतो निर्देशाद्यासुडात्वं नेत्युक्तम् । (सिसनिषति । सिषासति) । "सनीवन्तर्द्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्" इतीड्वि-कल्पः । इडभावे "जनसनखनां सञ्झलोः" इति झलादौ सनि क्ङिति विधीयमानमात्वं भवति (सासायते । संसन्यते) "ये विभाषा" इत्यात्वम् । इदं च क्ङित्येवेति ण्यति न भवति (सान्यमिति । संसनीति । संसन्ति । संसातः) । प्रकृतिग्रहणन्यायेन "जनसन" इत्यात्वे "अनुनासिकस्य" इतिदीर्घे परत्वाद् बाधित्वा ऽत्रापि भवति (सातिः । सातः । सातवान्) आत्वसूत्रे च झलादिसन् जनसनोर्न संभवतीति सनोतेरेव विशेषणमिति वदता वृत्तिकारेण सनोतेः "सनीवन्त" इति पक्ष इडागमः, तदिह सनोत्यर्थमेव सन्ग्रहणमित्यभिधा-नादिड्विधावात्वे च तानादिकस्यैव ग्रहणमिति च प्रतीयते । अन्ये तु पुनरुभयत्रोभयोर्ग्रहण-माहुः । एवं वृत्तौ सनोतेरित्युपादानं [तस्यानुनासिकलोपादात्वं विप्रतिषेधेन]इति वक्ष्यामी-त्येवमर्थं मन्तव्यम् । (सानुः) "दृसनिजनिचरिचटिभ्यो ञुण्" इति ञुण्प्रत्ययः । वनु पाने,षणु दानइति द्वयं तनादौ ॥ ४६० ॥

अम गत्यादिषु ॥ कनी दीप्तिगतीत्यत्र गतेः परयोः शब्दसम्भक्त्योरादिशब्देन ग्रहः । (अमति । आम । आमतुः । अमितेत्यादि । असिमिषति) । आमयतीत्यत्र "न कम्यमि-चमाम्" इति मित्त्वनिषेधात् "मितां ह्रस्वः" इति ह्रस्वाभावः । (अम्यम् । अमितवान्) "पोरदुपधात्" इति यत् । अमित्त्वात् निष्ठायां "हृष्यमत्वरसंघुषास्वनाम्" इतीड्विकल्पनात् (अमितः । आन्तः । अमितवान्, आन्तवान्) इति भवति । इडभावे "अनुनासिकस्य क्विझलोः क्ङिति" इति दीर्घः क्विपि पूर्ववत् । दीर्घे "मो नो धातोः" इति नत्वे आनिति भवति । नलोपस्तु न भवति असिद्धत्वादिति प्रागेवोक्तम् । (अमः) । घञि "नोदात्तोपदेश" इति वृद्धिनिषेधः । अत एव चिण्यपि ण्यन्तात् "न कम्यमि" इति मित्त्वनिषेधात् । ण्यपेक्षया वृद्धौ (मा भवान् आमीति) भवति । (आमयः) इत्यम रोगइति चौरादिकस्य ।(अमत्रम्)। "अनिनक्षियजिवञ्चिपतिभ्यो ऽत्रन्" इत्यत्रन् । (अमित्रः) । "अमेर्द्विषि चिच्च" इतीत्रप्रत्य-यः । (आम्राः) । "अमितम्योर्दीर्घश्च" इति रप्रत्यये दीर्घः । (आन्त्रम्) । "अत्यमिचमिश-सिभ्यः क्रन्" इति क्रन् ॥ ४६१ ॥

द्रम हम्म मीमृ गतौ ॥ (द्रमति । दद्राम । द्रमितेत्यादि) । लुङि "ह्म्यन्त" इति वृद्धिनिषेधात् (अद्रमीत् । दिद्रमिषति । दन्द्रमीति । दन्द्रन्ति । दन्द्रान्त इत्यादि) उत्तमे "म्वोश्च" इति नत्वे णत्वम् । (दन्द्रणमीत्यादि)। (अदन्द्रन्)इत्यत्र तिप्सिपोर्हल्ङ्यादिलोपे "मो नो धातोः" इति नत्वे "पदान्तस्य" इति णत्वं न भवति । (द्रमयति । अदिद्रमत) अम-न्तत्वान्मित्त्वम् । (अद्रमि । अद्रामि । द्रमन्द्रमम् । द्रामन्द्रामम्) "चिण्णमुलोः" इति दीर्घविकल्पः । स्यादिषु चिण्वदिट्पक्षे दीर्घविकल्पे णिलोपेच (द्रमिष्यते द्रामिष्यत)इत्यादि । शुद्धे पुनरिटि णेर्गुणायादेशयोः(द्रमयिष्यते),इत्यादि । अण्यन्तात् चिणि "नोदात्तोपदेश" इति

वृद्धिनिषेधात् (अद्रमि) इत्येवेति । एवं णिति कृति च (द्रमः द्रमक) इत्यादि। (दन्द्रमणः)' जुचङ्क्रम्य" इत्यादिना तच्छीलादौ यङन्तादस्माद्युचि अल्लोपयलोपौ । (द्रमिडः) । "जमत्ताड्डः" इति डः । 'नेड्वशि कृति" इति निषेधो बाहुलकान्न भवति । (हम्मति । जहम्म हम्मितेत्यादि । जिहम्मिषति । जेहम्म्यते । जंहम्मीति । जंहन्ति जंहन्त) इत्यादावनुपधात्वान्नोपधादीर्घः । लङि हल्ङ्यादिसंयोगान्तलोपयोः "मो नो धातोः" इति नत्वे (अजंहन् हम्मयति । अजहम्मत । हम्मित्वा । हम्मतिः) । ज्ञानं, गत्यर्था बुद्ध्यर्थः, न हम्मतिः (अहम्मति) अज्ञानम् । यद्वा अहमिति मतिः । अहंशब्दो मान्तोहङ्कारवचनोऽव्ययम् । (मीमति । मिमीम । मिमीमतुः । मीमितेत्यादि । मिमीमिषति । मेमीम्यते । मेमीमीति । मेमीन्त इत्यादि । लङि अमेमीन् । मीमयति । अमिमीमत । मीमित्वा मीमितः) अयं शब्दे चेति क्वचित्पठ्यते ॥ ४६४ ॥

चमु छमु जमु झमु अदने ॥ (चमति । चचाम । चेमतुः । चमितेत्यादि) । आङ्पूर्वत्वे तु "ष्ठिवुक्लमुचमां शिति" इति दीर्घः । (आचामति । आचामतु । आचामत् । आचामि । आचामयति) चिणि ञिति णिति कृति च "नोदात्तोपदेश" इति वृद्धिनिषेधात् (अचमि । चमः चमक) इत्यादि अत्रापि "अनाचमि"इति वचनात् (आचामि आचाम) इति वृद्धिरेव । ननु वार्त्तिके"अचमिकमिवमोनाम्"इति केवलस्योपादानात् सर्वत्र वृद्ध्या भाव्यम्। नैतत्। यत इदं वार्तिकं धात्वन्तरमपि पर्युदसनीयं न केवलं सूत्रोपात्त इत्येवं परम् । तथा च भाष्ये "अध्यगीष्ट । अत्यल्पमिदमुच्यते अनाचमेरिति" । अत एव न्यासश्चमेस्तावत् अनाचमेरिति सूत्र एवोपादानात् प्रतिषेध इति । तथा वर्द्धमानोपि उपसर्गोपादानात् (अचमि, पर्यचमीति) । अपि च वृत्तावपि वार्त्तिकस्योदाहरणमाङ्पूर्वमेव दर्शितम् । (चिचमिषति । चञ्चम्यते । चञ्चन्ति । चञ्चान्त) इत्यादि । अत्रापि प्रकृतिवदाङः पूर्वत्वे चिणि ञिति णिति कृति वृद्धिः, अन्यत्र तदभावश्च । (चामयति)। "न कम्यमिचमाम्" इति मित्त्वनिषेधः। चम्यतेत्रेति (चमसः) "अत्यमिचमि" इत्यसन् । (चमूः) । "कृषिचमितनिरमिसर्जिभ्य ऊः" इत्यूकारप्रत्ययः । (छमति । चच्छाम । छमितेत्यादि । चिच्छमिषति । चञ्छम्यते । चञ्छमीति । चञ्छन्ति । चञ्छान्त) इत्यादि । (छमयति) अमन्तत्वान्मित्त्वम् । चिण्णमुल्परे णौ "चिण्णमुलोर्दीर्घोन्यतरस्याम्" इति वा दीर्घः । (अच्छमि । अच्छामि, छमंछमम् । छामछाममिति) । चिण्वदिटि वृद्धेर्भावाभावाभ्यां, णिलोपे (छमिष्यते, छामिष्यते) इत्यादि । शुद्धे पुनरिटि गुणाययोः (छमयिष्यत)इत्यादि। णिचोभावे चिणि ञिति णिति कृति च "नोदात्तोपदेशस्य" इति वृद्धिनिषेधात् (अच्छमि) इत्यादिरेव भवति । (जमति । जजाम । जेमतुः । जमिता । झमति । जझाम । झमिता) इत्यादि पूर्ववत् । अत्र मैत्रेयः । जिमिं केचिदिच्छन्ति, (जेमनमिति)। एषामुदित्त्वात्क्त्वायामिड्विकल्पे (चमित्वा । चान्त्वेत्यादि भवति)। निष्ठायां "यस्य विभाषा" इत्यनिट्त्वात् (चान्त) इत्यादि । अनिटि । "अनुनासिकस्य क्विझलोः क्ङिति" इति दीर्घः ॥ ४६८ ॥

क्रमु पादविक्षेपे ॥ (क्रामति । चक्राम । चक्रमतुः । क्रमिता । क्रमिष्यति । क्रामतु । अक्रामत् ।क्रामेत् । आशिषि । क्रम्यात् । अक्रमीत्)। "ह्यन्तक्षण" इति वृद्धिनिषेधः ।(अक्रमिष्यत्) । *क्रमः परस्मैपदेषु* (क्राम)इति परस्मैपदे शिति दीर्घः। इत्यत्र हेलुकि प्रत्ययलक्षणेन परस्मैपदपरशितपरत्वेन दीर्घः । न च "न लुमता" इति निषेधः । तस्य लुमता लुप्तप्रत्ययनिमित्ताङ्गसंज्ञाविषयत्वात् । इह च हौ विकरणान्तमङ्गं क्रमस्तु विकरणे, विकरणश्च नित्यत्वात् पूर्वमत्र भवति । "वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः" इति शब्विषये पक्षे श्यनो विधानात् (क्राम्यति, क्राम्यतु, अक्राम्यत् । क्राम्येत्) इत्यपि भवति । पूर्ववद्दीर्घः । (चिक्रमिषति । चङ्क्रम्यते । चङ्क्रमीति । चङ्क्रन्ति) । इत्यादि । (क्रमयति । अचिक्रमत्) । "मितां ह्रस्वः" इत्यत्र वृत्तिः । के चिदत्र वेत्यनुवर्त्तयन्ति सा च व्यवस्थितविभा-

षा, तेन संक्रामयतीत्येवमादि सिद्धं भवति, अविगीतस्तु संक्रमयतीति, अत्रैव रसातले संक्रमितेत्यादिप्रयोगोनुकूलः। (क्रमते। चक्रमे। क्रन्ता। क्रंस्यते। अक्रमत। क्रमेत, क्रंसीष्ट। अक्रंस्त। अक्रंस्यत)। "अनुपसर्गाद्वा" इति पक्षे तङ्। अत्रापि शब्विषये वा श्यनि (क्रम्यते) इत्यादि *वृत्तिसर्गतायनेषु क्रमः* इति वृत्त्यादिषु नित्यस्तङुदाहार्यः। वृत्तिरप्रतिबन्धः। सग उत्साहः। तायनं स्फीतता, अयं वृत्त्यादिविषयस्तङ् "उपपराभ्याम्" इति सिद्धे सत्यारम्भान्नियमादन्योपसृष्टान्न भवति, तेन संक्रामतीति परस्मैपदमेव। यदायमाङ्पूर्व उद्गमनार्थस्तदा "आङ उद्गमने" इति वचनात् नित्यस्तङुदाहार्यः (आक्रमते भानुः) इत्यादि। अत्र [ज्योतिरुद्गमनइति वक्तव्यम्]इत्युक्तत्वात (आक्रामति धूमो हर्म्यतलात्)इत्यत्र न भवति। उद्गमने वर्तमानोयमकर्मक इति कैयट उक्तम्। पदमञ्जर्यां तु आक्रमति धूमो हर्म्यतलमिति वृत्तिमुपादाम उद्गमने क्रमिरकर्मकः तस्मादाक्रामति धूमो हर्म्यतलादिति पठितव्यमित्युक्तम्। यद्वा उद्गमनपूर्विकायां व्याप्तौ अत्र क्रमिर्द्रष्टव्य इति द्वितीया समर्थिता। (नभः समाक्रामति चन्द्रमाः) इत्यत्र नोद्गमनं विवक्षितं किं तर्हि व्याप्तिरिति परस्मैपदमिति तत्रैवोक्तम्।(विक्रमते)। सुष्ठु पदानि विक्षिपतीत्यर्थः। अश्वादीनां गतिविशेषो विक्रम इति वृत्तिः। "वेः पादविहरणे" इति नित्यस्तङ् अण्यत्र(विक्रामत्यजिनसन्धिः)इति। त्रुट्यतीत्यर्थः।(प्रपक्रमते भोक्तुम्)। उपक्रमते भोक्तुम्)। "प्रोपाभ्यां समर्थाभ्याम्" इति नित्यस्तङ्। समर्थौ समानार्थौ। तच्च समानार्थत्वमादिकर्मणि। अन्यत्र (प्रक्रामति उपक्रामतीति) आगच्छति उपगच्छतीति चार्थः। आत्मनेपदेषु वलाद्यार्धधातुकस्य *स्नुक्रमोरनात्मनेपदनिमित्त* इतीडभावः। स्नुक्रमोर्वलाद्यार्द्धधातुकस्येडागमो भवति आत्मनेपदनिमित्ताभाव इत्यक्षरार्थः। तदर्थादनयोरुदात्तत्वादेवेटः सिद्धावारम्भादात्मनेपदनिमित्तत्वे निषेधार्थं सूत्रं भवति। निमित्तग्रहणं कुर्वद्रूपताप्रतिपत्त्यर्थं,न तु ,योग्यतापरमिति कर्मकर्तृविषयाद्भावकर्मविषयाच्चास्मात् कृतः सत्यामपि योग्यतायामात्मनेपदाभावात् (प्रक्रमिता प्रक्रमितुं प्रक्रमितव्यम्)इतीड् भवत्येव। न चार्थविशेषादुपसर्गविशेषाच्चात्मनेपदस्य निमित्तं न क्रामतिरिति कथमस्यात्मनेपदनिमित्तत्वमिति मन्तव्यम्। यतस्तेषां विषयतया विशेषणत्वात् तद्विशिष्टो धातुरेव निमित्तम्। (चिक्रंसते) इत्यादौ "पूर्ववत् सनः" इत्यतिदेशात्प्रकृतिगतमेव सनन्तेप्यात्मनेपदस्य निमित्तमिति तस्य क्रमिनिमित्तत्वादिडभावः। (चिक्रंस्यत)इत्यादौ भावकर्मणोरपि परत्वात् "पूर्ववत् सनः" इत्यात्मनेपदमिति प्रकृतेरेवात्मनेपदनिमित्तत्वमितिड्भावः सिद्धः। अस्ति च विप्रतिषेधः, "भावकर्मणोः इत्यात्मनेपदक्रमिनिमित्तत्वाभावादिट् स्यात्, अनेन तु सति नेति। यदा तु सनन्ताण्णिच् तदात्मनेपदस्य क्रमिनिमित्तत्वाभावात् चिक्रमीषयतीतीटा भाव्यम्। तथा (चिक्रमिषते स्वयमेव) इति कर्मकर्तर्यपि। अत्र तु कर्मवदतिदेशनिमित्तमेवात्मनेपदं न तु क्रमिनिमित्तम्। अत्र हरदत्तः सिद्धं स्नुक्रमोरात्मनेपदेन समानपदस्तस्येण्निषेधात्। "क्रमेश्च" इति वार्तिककारवचनादिहाप्यात्मनेपदेन समानपदस्य लाभादिटा न भाव्यमित्याह। भाष्यवार्तिकपूर्वापरपर्यालोचनायां समानपदस्थत्वे तात्पर्यं नेति प्रतीयते। यतस्तु वार्तिककार आत्मनेपदे परे स्नुक्रमोर्नेत्येवं सूत्रार्थे आश्रीयमाणे निर्दिष्टपरिभाषायाः आनन्तर्ये एव भाव्यत्वात् प्रचिक्रमिष्यतइत्यत्र स्येन व्यवधानात् प्रक्रसिष्टेत्यत्र च सीयुट आत्मनेपदभक्तत्वात् प्रक्रस्येते इत्यत्र व्यपवर्गाभावात् आत्मनेपदपरत्वाभावादिण्निषेधाप्रसङ्गाद् [आत्मनेपदपरतङ्परसीयुडेकादेशेषु च प्रतिषेधो वक्तव्यः]इत्युक्तत्वात्, परिहारमात्रीयं [सिद्धं त्वात्मनेपदेन समानपदस्यस्येण्निषेधाद्[इत्याह। भाष्यकृता च यथान्यासमेवास्त्विति सूत्रमेव स्थापितम्। न च तत्र समानपदस्थत्वावगतिः, तथा वृत्तावपि, न चेत्स्नुक्रमी आत्मनेपदस्य निमित्ते, निमित्तग्रहणं सीयुडादेस्तत्परस्य च प्रतिषेधार्थमित्युक्तम्। गतमदः, प्रक्रान्तेत्यादावात्मनेपदाभावेपि क्रमेस्तु कर्त्तर्यात्मनेपदविषयादसत्यप्यात्मनेपदे [प्रकृतिप्रतिषेधो वक्तव्य] इति इडभावः। अनुपसर्गात् क्रमेः(क्रन्ता क्रमिता)इत्युभयमपि भवति। "अनुपसर्गाद्वा" इति विकल्पेनात्मनेपदविषयादित्येके। अन्येत्वात्मनेपदविषयादिति अनन्यभावे विषयशब्दं वर्णयन्तः क्रमितेत्येव

भवितव्यमित्याहुरिति पदमर्थ्यम्। क्रमेरात्मनेपदे तासावनिट्त्वात् "उपदेशेत्वतः" इति थल इण्निषेधो नाशङ्क्यः। यतः परस्मैपदे तासौ सेट्त्वान्नित्यानिट्त्वाभावः (क्रान्त्वा क्रमित्वा)। उदित्त्वादिड्विकल्पः, इडभावे "क्रमश्च क्त्वि" इति वा दीर्घः। (क्रान्तः।) "यस्य विभाषा" इतीण्निषेधः (क्रमः) घञ्। "नोदात्तोपदेश" इति वृद्धिनिषेधः। क्रममधीते (क्रमकः)। "क्रमादिभ्यो वुन्" इति तदधीते तद्वेदेति विषये वुन्। (चङ्क्रमणः)। "जुचङ्क्रम्य इति युच्। न क्रामतीति नक्रः। "डोन्यत्रापि दृश्यते" इति डः। "नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या" इति निपातनान्नञो नलोपाभावः। (क्रिमिः)। क्रमिगमिनमिस्थम्भामच इच्चेतीन्प्रत्यये अकारस्येकारः। (क्रिमिणः)। "लोमादिपामादिपिच्छादिभ्यः शनेलच" इति पामादिपाठान्मत्वर्थीयो नः॥

यज्ञनारायणार्येण (१)प्रक्रियेयं प्रपञ्चिता।
तस्या निःशेषतस्सन्तु बोद्धारो भाष्यपारगाः॥
अणादय उदात्ता उदात्तेतः॥ ४६९॥

अय वय पय मय चय तय णय गतौ॥ इत आरभ्य रेवत्यन्ता उदात्ता अनुदात्तेतः। (अयते। अयां चक्रे)। "दयायासश्च" इत्याम्। (अयिता। अयिष्यते। अयताम्। आयत। अयेत। आशिषि। अयिषीष्ट। आयिष्यत।) अस्य लुङ्लिटोर्ध्वमि "विभाषेटः" इति मूर्द्धन्यविकल्प उदाहार्यः। एवमन्येष्वपि यान्तेषु। (अयियिषते। अययति माभवानायियत्। आयः अयः) घञचौ। चलनार्थत्वेपि नास्य युजस्ति, "न ये" इति यान्तानां तन्निषेधात्। तेन अयितेति सामान्यतृन् भवति। (प्लायते) *उपसर्गस्यायतौ* इति उपसर्गस्थस्य रेफस्यायतिपरत्वाल्लत्वम्। नन्वेकादेशस्य स्थानिवत्त्वाद्रेफस्यायतिः परो न भवति। सत्यम्। 'येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात्' इति एकेन वर्णेन व्यवधानमाश्रयिष्यते। न चास्ति "पूर्वत्रासिद्धे न स्थानिवद्" इति, "तस्य दोषः संयोगादिलोपलत्वणत्वेषु" इति तस्य सापवादत्वात्। एवं च (पल्ययते) इत्यत्रापि लत्वं भवति। न चानन्तरो निर्दुरो रेफोवकाश इति वाच्यम्। तर्हि लाघवार्थं तावेवोपाददीत। येषामुपसर्गविशेषणमयतिग्रहणम्। अयतिपरस्योपसर्गस्य यो रेफ इति तेषां नैवास्य चोद्यस्यावसरः, किं तु प्रत्यय इत्यत्रापि लत्वं स्यात्। भवितव्यमेवेति तेषामेव के चित्, अपरे तु प्रतिपूर्वस्यायतेर्नैष प्रयोग इति, तेषां प्रत्ययशब्दः प्रतिपूर्वादिणोचि, प्रत्ययितशब्दोप्यस्मादेव तारकादित्वादितचि। (निरयते। दुरयते।) इति प्रयोगस्सान्तयोर्द्रष्टव्यः। नह्यत्र लत्वप्रसङ्गः, "ससजुषोः" इत्यस्यासिद्धत्वात्। (वयते। ववये।) वादित्वान्नैत्त्वाभ्यासलोपौ। (वयिता) इत्यादि पूर्ववत्। (विवयिषते। वावय्यते। वावयीति। वावति। वावतः। वावयति। वावयीषि। वावसि। वावथः। वावथ। वावयीमि। वावामि। वावावः। वावामः)। वलि यलोपः। यञादौ तु कृते लोपे "अतो दीर्घो यञि" इति दीर्घः। ञो यलोपात्पूर्वं नित्यत्वादड्भावे वल्परत्वाभावाद्यलोपाभावः, लोटि सेर्हिभावात् परत्वात्पूर्वं वलि लोपे तदनन्तरं हिरादेशः, तस्यैव "अतो हेः"। इति लुकि (वाव) इति भवति। पूर्वं तु हिभावे तमाश्रित्य वलि लोपे संनिपातपरिभाषया हेर्लुङ् न स्यात्, उत्तमे तु नित्यत्वादाटि यलोपाप्रसङ्गात्, (वावयानि) इत्यादि भवति, लङि तिप्सिपोः परमपि हल्ङ्यादिलोपं यलोपो बाधतइति (अवावत्, अवाव) इति भवति। इदं च व्योर्वलि लोप इत्यनुवादपूर्वं विधेयं निर्दिश्य तस्य पूर्वनिर्देशेन विध्यन्तराद्बलीयस्त्वज्ञापनादवगम्यते, यत्तु तत्र वृत्तावुक्तं पूर्वनिर्देशस्य फलं वेरपृक्तलोपात्पूर्वं वलि लोप इति, तद्विध्यन्तरोपलक्षणम्। आहुश्चैवं तत्र व्याख्यातारः। यद्वा प्रकृतिविशेषं प्रत्ययविशेषं चापेक्षमाणाद्धल्ङ्यादिलोपात् वर्णमात्रापेक्ष-

(१) ग्रन्थकर्तुरपरं नामैतत्।

त्वादन्तरङ्गो वलि लोप इति पूर्वमेवासावत्र प्रवर्तिष्यते । (पयते । पेये । पयिता । मयते । मेये । मयिता । चयते । चेये । चयिता । तयते । तेये । तयिता । नयते । नेये । नयिता) इत्यादि । चयिवत् । नयतेर्णोपदेशत्वात् प्रणयतइति णत्वं भवति । अत्र षयीति मूर्द्धन्योष्मादिरपि क्वचित् कोशे पठ्यते, मैत्रेयादिभिस्तु न पठ्यते । नयादीनामपि अयिवत् "न ये" इति युजनिषेधात् तच्छीलादौ तृनेव । णय रक्षणे चेति मैत्रेयः । तय णयेत्येके । अयादीनां क्वौ वलि लोपे तुकि (यत्, वत्,) इत्यादि भवति । अतो लोपस्तु न भवति, आर्द्धधातुकोपदेशे यदकारान्तं तस्य तद्विधानात् ॥ ४७६ ॥

दय दानगतिरक्षणहिंसादानेषु॥ (सर्पिषो दयते । सर्पिर्दयते) "अधीगर्थदयेशां कर्मणि" इति कर्मणि शेषे षष्ठी । अशेषे तु द्वितीयैव । दयां चक्रे । "दयायासश्च" इत्याम् । (दयिता) इत्यादि वयिवत् । (दयालुः ।) "स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्" इति ताच्छीलिक आलुच्, दया । दयतिर्भिदादिषु द्रष्टव्यः ॥ ४७७ ॥

रय गतौ ॥ (रयते) इत्यादि वयिवत् । (रायः,) घञ् । (रयः) तु अचि ॥ ४७८ ॥

ऊयी तन्तुसंताने ॥ (ऊयते । ऊयां चक्रे ।) "इजादेश्च गुरुमतः" इत्याम् । (ऊयितेत्यादि। ऊययति । मा भवानूयियत्)। द्विर्वचनात्पूर्वमुपधाह्रस्वत्वमित्युक्तम् । (ऊयित्वा, ऊतः, ऊतवान् ।) ईदित्त्वान्निष्ठायामनिट्त्वम् । (ऊतिः) । बाहुलकात् क्तिन् "ऊतियूति" इति निपातनमव्रतेः क्तिनि उदात्तार्थमिति वृत्तावुक्तम् ॥ ४७९ ॥

पूयी विशरणे दुर्गन्धे च ॥ (पूयते । पुपूये । पूयितेत्यादि । पुपूयिषते । पोपूययते । पोपूयीति । पोपोति । पोपूतः) । इत्यादि वयतिवत् । तस्मादौ ङित्त्वान्न गुणः । (पूययति । अपूपुयत् । पूयित्वा । पूतः । पूतवान्) । ईदित्त्वान्निष्ठायामनिट्त्वम् । (पूतिः) । "गन्धस्येदुत्पूति" इत्यादिनिर्देशात् क्तिन् । (पूयः) । पचाद्यच् ॥ ४८० ॥

क्नूयी शब्दे उन्दे च ॥ (क्नूयते) । चुक्नूये । क्नूयिता) इत्यादि पूयतिवत् । क्नोपयति "अर्त्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ" इति पुकि यलोपे "पुगन्तलघूपधस्य च" इति गुणः । (अचुक्नूपत्) कृतेपि गुणे "णौ चङि" इति ह्रस्वः । क्नूयीति सानुबन्धकस्य निर्देशाद्यङ्लुकि (चोक्नूयीतीति) भवति । (चेलक्नोपं वृष्टो देवः) । "चेले क्नोपेः" इति ण्यन्तादस्मात् कर्मणि चेल उपपदे वर्षप्रमाणे गम्यमाने णमुल् । यावता वर्षेण चेलं क्नूप्यते तावद् वृष्ट इत्यर्थः । चेलइत्यर्थग्रहणमिति । (वस्त्रक्नोपम्) इत्याद्यपि भवति। अस्यापीदित्त्वान्निष्ठायामनिट्त्वम् ॥४८१॥

क्ष्मायी शब्दे विधूनने ॥ (क्ष्मायते । चक्ष्माये । क्ष्मायितेत्यादि । चिक्ष्मायिषते । चाक्ष्माय्यते । चाक्ष्मायीति । चाक्ष्माति) । तस्मादौ क्ङिति सार्वधातुके "श्नाभ्यस्तयोरातः" "ईहल्यघोः" इतीत्वम् । (चाक्ष्मीत) इत्यादि । लोटि तातङ्पक्षे तस्य ङित्त्वात् (चाक्ष्मीतात) इति भवति, हेरप्यपित्त्वात् ङित्त्वात् चाक्ष्मीहि । लङि नित्यत्वाद्यलोपात्पूर्वं "सिजभ्यस्त" इति जुसभावो भवति । (अचाक्ष्मायीत् ।अचाक्ष्मीताम् । अचाक्ष्मायुरित्यादि । क्ष्मापयति। अचिक्ष्मपत्) "अर्त्तिह्री" इत्यादिना पुक् । अस्यापि सानुबन्धकस्य निर्देशात् यङ्लुकि (चाक्ष्मायतीति) । ईदित्त्वान्निष्ठायां क्ष्मातः । (क्ष्मातवान्) ॥ ४८२ ॥

स्फायी ओप्यायी वृद्धौ । (स्फायते । पस्फाये) अभ्यासे "शर्पूर्वाः खयः" इति खयः शेषः (स्फायितेत्यादि) क्ष्मायिवत् । णौ "स्फायो वः" इति यकारस्य वकारे (स्फावयति । अपिस्फवदिति भवति, स्फीतः, स्फीतवान्) "स्फायः स्फी निष्ठायाम्" इति स्फीभावः । वत्वस्फीभावौ प्रकृतिग्रहणन्यायेन यङ्लुक्यपि भवत इति (पास्फावयति । स्फीतः स्फीतवानिति भवति । स्फायतइति स्फाः) क्विपि वलि लोपः । अयं वेरपृक्तलोपात्पूर्वं भवतीति वयतौ प्रतिपादितम् । स्फाश्च तदण्डं च (स्फाण्डम् । एवं स्फाण्त्रम्) । वृद्धाण्डमुच्यते (स्फारः) । "स्फायितञ्चि:" इत्यादिना रक् (प्यायते । पिप्ये । पिप्यिषे । पिप्याये । पिप्यिध्वे ।

पिप्यिवद्दे) परत्वात् "लिड्यङोश्च" इति प्यायः पीभावः । पुनः प्रसङ्गविज्ञानात् पीशब्दस्य द्विर्वचनम् । "एरनेकाच०" इत्यजादौ यण् (प्यायितेत्यादि) पूर्ववत् । लुङि "दीपजन-बुधपूरितायिप्यायिभ्योऽन्यतरस्याम्" इति कर्त्तरि तशब्दे वा चिणि (अप्यायि अप्यायिष्टेति) भवति । यङि लिड्वत्पीभावे (पेपीयते) इत्यादि । यङ्लुकि तु (पाप्याति । पाप्यात इत्यादि) पूर्ववत् (पीनः पीनवान्), "प्यायः पीनिष्ठायाम्" इति वा पीभावात् । इयं च व्यवस्थित विभाषेति अनुपसृष्टे नित्यम्, उपसृष्टे तु नैव । (आप्यानः प्रप्यानश्चन्द्रमा) इति, आङ्पूर्वादन्धूधसोर्भवत्येव । (आपीनोन्धुः, आपीनमूधः) इति । "ओदितश्च" इति निष्ठानत्वम् । ईदित्त्वं पीभावाभावे निष्ठाया इण्निवृत्त्यर्थम् । ईदितोनन्तराया निष्ठाया नत्वार्थमिदमोदित्त्वम् । कृते । पीभावे स्वरान्तत्वादनिट्स्वरान्तइत्यनिट्त्वे सावकाश इति पीभाव इण्निवृत्तेर्न ज्ञापकः । स्फायससूत्वीदित्त्वे स्फीभावस्य नित्यत्वात् स्वरान्तत्वादनिट्त्वे सिद्धे अनुदात्तत्वमात्रं फलम् । न च सत्यपीटि सवर्णदीर्घत्वेनेदमेव रूपमिति मन्तव्यम् । परत्वादियङ्प्रसङ्गात् ॥ ४८४ ॥

ताय् सन्तानपालनयोः ॥ संतानः प्रबन्धः (तायते । तताये । तायितेत्यादि । पूर्ववत् । लुङि "दीपजन०" इत्यादिना कर्त्तरी तशब्दे वा चिणि (अतापि अतायिष्टेति भवति) ऋदित्त्वाण्णौ चङ्युपधाया ह्रस्वाभावात् (अततायत्) अनीदित्त्वान्निष्ठायां (तायितः तायितवान्) ॥ ४८५ ॥

शल चलनसंवरणयोः (शलते शेले । शलिता । शलिष्यते । शलताम् । अशलत । शलेत) आशिषि शलिषीष्ट । अशलिष्ट । शाशल्यते । शाशलीति । शाशल्ति) लङि तिप्सिपोर्हल्ङ्यादिलोपः । (अशाशल् । शालयति । अशीशलत् । शलित्वा । शलितः । शलभः) "कृगृशृशलिभ्यो भच्" (शल्कम्) । "इणिकापाशल०" इति कन् । शलाका । "शलिपतिपटिभ्यो नित्" इत्याकः । (शालूकः) । "शलिमण्डिभ्यामूकण्" इत्यूकण् । शललं, कलप्रत्ययश्चेत्यत्र प्रत्ययस्य पूर्वनिर्देशस्य धात्वन्तरादप्ययं भवतीति सूचनार्थत्वात् कुण्डलादिवत् कलः प्रत्ययः (शलली) । पिप्पल्यादित्वात् ङीष् जातिलक्षणो वा (शलालुः) गन्धद्रव्यविशेषः, शलालुः पण्यं व्यवहार्यमस्य (शलालुकः) । "शलालुनोन्यतरस्याम्" इति प्रथमान्तादस्य पण्यमित्यर्थे ष्ठन् , षित्त्वात् स्त्रियां (शलालुकी) । अन्यतरस्यांग्रहणात् "प्राग्वहतेष्ठक्" इति ठकि "किति च" इत्यादिवृद्धौ (शालालुकः) । उभयोरपि ठशब्दयोरुकः परत्वात् "इसुसुक्तान्तात्कः" इति कादेशः । अत एव शलालुन इति निर्देशादालुप्रत्ययः । शालेति शालतावुक्तम् । अयं गत्यर्थो ज्वलादौ परस्मैपदी ॥ ४८६ ॥

वल वल्ल संवरणे सञ्चरणे च ॥ (वलते । ववले । वलितेत्यादि) शलिवत् । णौ घटादित्वाद्वलयतीति । (वालः) । "हलश्च" इति करणे घञ् । (वारः) । वालमूलेत्यादिना पक्षेरः (वलिः) (वली) इन्नन्तात् "कृदिकारादक्तिनः" इति वा ङीष् । (वलिनः) पामादित्वान्मत्वर्थे नः । वलिभः । "तुन्दिवलिवटेर्भः," अयमपि मत्वर्थीयः (वलिः) "वलेर्बलश्चाहिरण्य" इति इनूप्रत्यये वलादेशः । वलभी । बाहुलकादभचिपिप्पल्यादिदर्शनात् ङीष् (वलयः) वलि सलि तनिभ्यः कयन् इति कयन्(वल्गुः) "वलेर्गुक्च" इति उक्प्रत्ययो गुगागमश्च (वलाकः) "वलाकादयश्च" इत्याकनन्तो निपातितः । वलाकाया अपत्यं (वालाकिः) "बाह्वादिभ्यश्च" इतीञ्प्रत्ययः । अत्र पाठात् जातिलक्षणङीषं बाधित्वा टाप् अजादित्वाद्वा । वलाका अस्य सन्तीति वलाकी. "व्रीह्यादिभ्यश्च" इति मत्वर्थइनिः । (वलिकं लिङ्गम्) । "अलीकादयश्च" इतीकन् । वल्मीके बाहुलकान्मुडागमः । (वल्लते । ववल्ले । वल्लितेत्यादि) । यङ्लुकि तिप्सिपोर्हल्ङ्यादिलोपे संयोगान्तलोपे च अवावल् । (वल्लभः) । "रासिवल्लिभ्यां च" इत्यभच् । (वल्लरी) । बाहुलकादरप्रत्यये पिप्पल्यादिदर्शनात् ङीष् । (वल्लिः वल्ली) इति कृदिकारत्वाद्वा ङीष् ।

(वल्लूरं) शुष्कमांसम् । खर्जपिञ्जादिभ्य ऊरोलचाविति ऊरः ॥ ४८८ ॥

मल मल्ल धारणे ॥ (मलते । मेले । मलिता) । मल्लतइत्यादि पूर्ववत् । (माला) । "अकर्त्तरि च कारके०" इति कर्मणि घञ् । "लस्य" इत्यत्र भाष्यकैयटयोर्माङो ऽयं लप्रत्यय उक्तः । (माली) व्रीह्यादित्वादिनिः । (मालभारी) "इष्टकेषीकामालानां चिततूलभारिषु" इति यथासंख्यान्मालाया भारिण्युत्तरपदे ह्रस्वः । के चित्तु तत्र हारीति पठन्ति । (माल्यम्) । ऋहलोर्ण्यत्" । (मलयः) । वलिमलीति कयन् । शरीरं धार्यतइति (मलम्) । अच् । मृजेर्वा व्युत्पादयिष्यते । (मलिनः मलीमसः) "ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः" इतीनजीमसजन्तौ मत्वर्थे निपातितौ । केन मल्यतइति (कमलम्) । घनर्थे कविधानमिति कः, "कर्तृकरणे कृता" इति समासः । कमेर्वा कलप्रत्यये व्युत्पादनीयः । (आमलकी) । "क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि" इति क्वुनि गौरादित्वान्ङीष् । (मल्लः) । अच्प्रत्ययः । (मल्लिका) । "संज्ञायाम्" इति स्त्रियां ण्वुल् । मल्लकः । क्वन् । मलं मल्लते धारयतीति (मलमल्लं कौपीनम्) ॥ ४९० ॥

भल भल्ल परिभाषणहिंसादानेषु ॥ (भलते भल्लतइत्यादि । भालम् ।) "अकर्त्तरि च कारके" इति घञ् । भां दीप्तिं लातीति वा (भालः । भल्लूकः श्वापदः ।) "उलूकादयश्च" इति ऊकन्नन्तो निपातितः भल्लूकोप्युलूकादिः । भल्यते हिंस्यतेऽनेनेति (भल्लः ।) "पुंसि संज्ञायाम्" इति घः, "हलश्च" इति घञ् वा । (भल्ली) । "जातेरस्त्रीविषयादयोपधात्" इति ङीष् । अयमाभण्डने चुरादिः ॥ ४९२ ॥

कल शब्दसंख्यानयोः ॥ (कलतइत्यादि । कालः) । "अकर्त्तरि च कारके" इति घञ् । काले भवं (काल्यम्) । "दिगादिभ्यो यत्" इति सप्तम्यन्ताद्भवार्थे यत् । कालः प्राप्तोस्य (काल्य उत्सवः) । *कालाद्यत्* इति प्रथमान्तादस्य प्राप्तमित्यर्थे यत् । अनित्यो वर्णः कालेन रक्तो वा (कालकः) *कालाच्च* इति अनित्ये वर्णे रक्ते च वर्त्तमानात्स्वार्थे कन् । (काली)। "जानपद०"इत्यादिना वर्णे ङीष् । अन्यत्र (काला कालिका) संज्ञायां कनि "केणः," इति ह्रस्वः । (कलिकम्) । "सलिकलि" इति इलच् । (कलभः) । "कृगृशृसलिकलि" इत्यभच् । (कलिः) । इनितीन्प्रत्ययः । कलिना दृष्टं साम (कालेयम्) । "कलेर्ढक्" इति तृतीयान्ताद् दृष्टं सामेत्यर्थे ढक् , "आयनेयी इत्यादिनैयादेशः । [सर्वत्राग्निकलिभ्यां ढग्वक्तव्यः] इत्युक्तत्वात् सर्व्वेष्वर्थेष्वयं ढग्भवति । (कलिका) । संज्ञायां क्वुन् प्रत्ययः । कलिं गृह्णाति (कलयति) "मुण्डमिश्र०" इत्यादिना गृह्णात्यर्थे णिचि णाविष्ठवदिति टिलोपः । अत्र हलिकल्योरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थमिति णिसंनियोगेनाकारविधानादग्लोपित्वाद् ह्रस्वाभावात् अचकालदिति भवति । अत्र यद्यपीकारोप्यगेव तथापि तस्य टेरिति लोपात्परत्वाद्वृद्धौ ऐकारे तस्य चायादेशात्पूर्वं परत्वाट्टिलोपे ऽयमग्लोपि न स्यात् कृते त्वत्त्वे वृद्धौ कृतायामप्यग्लोप्येव । ननु च वृद्धावात्वे पुकि च तत्सहितस्य टिलोपेन भाव्यमित्यनग्लोपित्वात् कथमग्लोपः । नैषः दोषः । तत्राग्लोपिग्रहणस्य समुदायार्थत्वात् , अन्यथा मालामाख्यत् (अममालत) इत्यादौ केवलस्याप्यको लोपे अचः परस्मिन् इति तस्य स्थानिवत्वात् अभ्यासस्य चङ्परणिपरत्वाभावादेव सन्वद्भावो न भविष्यतीति किमग्लोपिग्रहणेन । न च मन्तव्यं सर्वत्राभ्यासस्य चङ्परणिपरत्वायोगाद्व्यवधानेन भाव्यमेवेत्य का प्राप्तेन स्थानिवद्भावेन व्यवधानेपि तदिति तत्रैव निषेधार्थमेतदस्त्विति । येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यादिति न्यायेनावर्जनीयोत्तरव्यंजनव्यवधानस्यैवाश्रयणं युक्तम् । अयं क्षेपे चुरादिः, गतिसंख्यानयोः कथादिः ॥ ४९३ ॥

कल्ल अव्यक्ते शब्दे ॥ (कल्लतइत्यादि । कल्लोलः) । किशोरादित्वादोरप्रत्ययः, कपिलकादित्वाल्लत्वम् । अशब्दइति स्वामी । अशब्दस्तूष्णींभाव इति च ॥ ४९४ ॥

तेवृ देवृ देवने ॥ (तेवते । तेविता । तेविष्यते । तेवताम् । अतेवत । तेवेत । तेविषीष्ट । अतेविष्यत इत्यादि । तितेविषते । तेतेव्यते । तेवयति । अतितेवत्) ऋदित्वान्नोपधाह्रस्वः । वकारान्तानामूठ्भाविनां भाषायां यङ्लुङ्नास्ति "च्छ्वोः शूठ्" इत्यत्र क्ङिद्ग्रहणानुवृत्त्यननुवृत्ती प्रस्तुत्य तत्र त्वेतावानेव विशेषः, अनुवर्त्तमाने क्ङिद्ग्रहणे छः षत्वं वक्तव्यमिति भाष्य उक्तत्वात् । छः षत्वमित्यक्ङिति झलादौ षत्वार्थं "व्रश्चभ्रस्ज" इत्यत्र छग्रहणं कर्त्तव्यं क्ङिदधिकाराभावे तु झलादिमात्रे छः षत्वं शकारान्तत्वादेव सिद्धमित्यर्थः । यदि च वकारान्तानामपि यङ्लुक् स्यात्तत्रापि क्ङिद्ग्रहणानुवृत्तौ ऊठा न भाव्यमन्यदा तु भाव्यमिति विशेषस्य विद्यमानत्वाद् तत्रैतावान् विशेष इत्यादि भाष्यं कथं संगच्छेत, स्पष्टं चैतत्तत्र कैयटे । (देवत) इत्यादि पूर्ववत् । (आदेवकः) । 'देविक्रुशोश्चोपसर्गे' इति तच्छीलादौ वुन् । (देवरः) । "अतिकमिभूमिवाशिभ्यश्च" इत्यरः (देवलः) "कपिलकादीनां संज्ञाच्छन्दसोः" इति वा लत्वम् , यद्वा देवाँल्लाति आदत्ते इति (देवलः) । अनयोः क्विपि वलि लोपापरत्वात् 'च्छ्वोः शूठ्' इत्यूठ्ययादेशे (तयूर्दयूः) इति भवति । एवमन्यत्रापि वकारान्तेषु दिवीति प्रीणनार्थौ परस्मैपदी, दिवु इति क्रीडार्थो दिवादिः परिपूजनार्थश्चुरादिः ॥ ४९६ ॥

षेवृ गेवृ ग्लेवृ पेवृ म्लेवृ सेचने ॥ शेवृ खेवृ मेवृ इत्यप्येकइति मैत्रेयः (सेवते । सिषेवे । सेवितेत्यादि । सिसेविषते) । "स्तौतिण्योरेव" इत्यषत्वम् । (सेषेव्यते । सेवयति । असिषेवत्) । एषाम् ऋदित्वात् "ण्णौचङि" इति न ह्रस्वः । (परिषेवयते) "परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्" इति षत्वं "सात्पदाद्योः" इति निषेधापवादः । "प्राक् सितादड्व्यवायेपि" इति वचनात्पर्यषेवतेत्यादावपि भवति । (परिषिषेविषते) इत्यषणीति नियमः "स्थादिष्वभ्यासेन चाभ्यासस्य" इत्यनेन बाध्यते । एवं विनिभ्यामप्युदाहार्यम् । (सेवित्वा । सेवितः । क्विप् सयूः ।) अत्र मैत्रेयादयोदन्त्यादिमपि वदन्ति । तथा च "परिनिविभ्यः सेव" इत्यत्र न्यासेपि षोपदेशस्य "सात्पदाद्योः" इति निषेधे प्राप्ते ऽपरस्य त्वप्राप्ते चेति तदिदं षोपदेशलक्षणपर्युदासे सेक्तृवर्जमिति स्त्यायतिवदनुपादानाद्भाष्यकारस्यानभिमतत्वमिव प्रतीयते । अत एव "परिनिविभ्यः" इत्यत्र हरदत्तः । सेवतिर्भ्वादिष्वनुदात्तेदित्याह न तु सेवतीति (पेवते । ग्लेवते । तेवते । म्लेवते । शेवते । खेवते । मेवते) क्लेवृ इत्यपि क्वचित्पठ्यते ॥ ५०१ ॥

रेवृ प्लवगतौ ॥ प्लवगतिः प्लुतिगतिः (रेवतइत्यादि । रेवा) अचि टाप् (रेवणः) । अनुदात्तेत्त्वाद्वाचलनार्थत्वाद्वा युच् । अत्र मैत्रेयः प्लव इति धात्वन्तरमाह तच्चिन्त्यं यदि हि स्यात् आप्लवशब्दस्यास्मात घञि सिद्धौ तदर्थं "विभाषाङि रुप्लवोः" इति प्लुवः पक्षे घञ्विधानमनर्थकं स्यात् । तथा प्लुङेर्णौ वृध्यावादेशयोश्चङि णौ कृतस्य स्थानिवत्त्वात् प्लुशब्दस्य द्विरुक्तावपुप्लुवदिति नित्ये प्राप्ते पक्षे अपिप्लवदिति सिद्ध्यर्थं "स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा" इत्युकारस्येत्त्वविधानमनर्थकं स्यादिति, सति ह्यस्मिन्ननेनैवापिप्लवदिति भविष्यति । अत एव किलापरितुष्यन्मैत्रेयोपि प्लव इत्येकइत्याह । आयादय उदात्ता अनुदात्तेतः ॥ ५०२ ॥

मव्य बन्धने ॥ एतदादयो वन्यन्ता उदात्तेतः । (मव्यति । ममव्य । मव्यिता । मव्यिष्यति । मव्यतु । अमव्यत् । मव्येत्) आशिषि (मव्यात्) । "हलो यमां यमि लोपः" इति वायलोपः' (अमव्यीत्) "नेटि" इति न वृद्धिः "हम्यन्त०" इति वा, (मिमव्यिषति । मामव्यते) अत्र वृजादौ यदा "हलो यमाम्" इति धातुयकारस्य लोपः, तदार्धधातुकमाश्रित्याल्लोपः, "यस्य हलः" इति यङोपि लोपः । (मामवितेत्यादि,) यदा "हलो यमाम्" इति न भवति तदा पूर्ववद्यङोलोपे (मामव्यितेत्यादि । मामव्यीती । मामति) इडभावे "लोपो व्योर्वलि" इति वयोर्लोपः (मामौतः) यलोपे वकारस्याङ्गात्परत्वाद्वलि लोपमपवादत्वाद्वा-

षित्वोठि वृद्धिः। (मामव्यति) । अङ्भावो नित्यत्वाद्वलि लोपं बाधते। (मामव्यीति । मामसि । व्योर्लोपः । मामौथः । मामौथ) । यलोपः ऊठि वृद्धिः । (मामव्यीसि, मामौमि) । अनुनासिकत्वादूठि वृद्धिः (मामौवः), व्योर्लोपः "अतो दीर्घो यञि" इति दीर्घः। (मामौमः । मामव्यीतु। मामतु। मामौतात्। मामौताम्। मामव्यतु। मामौहि। मामौतात्। मामौतम्। मामौत। मामव्यानि। मामव्याव) । उत्वहित्वाभ्यां परत्वात्पूर्वमेव व्योर्लोपे पश्चात् "तु ह्योः" इति तातङि तदाश्रय उङ् नाशङ्कनीयः । पूर्वमेव वकारस्य लुप्तत्वात्, हेस्तु "अतो-हेः" इति लुक्। उत्तमे नित्यत्वादाटि न व्योर्लोपः। (अमामव्यीत्। अमामौताम्। अमा-मव्युः । अमामः । अमामव्यम् । अमामाव । अमामौम) तिप्सिपोर्हल्ङ्यादिलोपादान्त-रङ्गत्वात् द्वलिलोपः । झिमिपोर्जुस्भावात्भावौ वलिलोपं नित्यत्वात्बाधेते । वसि व्यो-र्लोपे "अतो दीर्घो यञि" इति दीर्घः। मसि यलोपेऽनुनासिकादित्वादूठि वृद्धिः (मव्ययति । अममव्यत्। मव्यित्वा । मव्यितः) । क्विपि "लोपो व्योर्वलि" इति विधेयस्य लोपस्य पूर्वनिर्देशाद् वेरपृक्तलोपाद्वलिलोपस्य बलीयस्त्वस्य ज्ञापनादपृक्तलोपात् पूर्वं यकारस्य वलि लोपः, वकारस्य त्वपवादेनोठा बाधान्न भवतीति ऊड्वृद्ध्योर्मौः यथातु भाष्यं तथास्य न यङ्लुगस्ति तच्च तेवतावुक्तमुपपादितं च ॥

अत्रापि शिष्यबोधाय प्रक्रियेयं प्रपञ्चिता ।
यज्ञनारायणार्येण बुध्यतां भाष्यपारगैः ॥ ६०३ ॥

सूक्ष्यं ईक्ष्यं इर्ष्य ईर्ष्यार्थाः ॥ (सूक्ष्यति । सुपूक्ष्यं । सूक्ष्यिता । सूक्ष्यिष्यति । सूक्ष्यतु। असूक्ष्यत्। सूक्ष्येत्। आशिषि। सुक्ष्यात्। असूक्ष्यीत् असूक्ष्यिष्यत् । सुसूक्ष्यिषति) स्तौ-तिण्योरेव" इति नियमान्न षत्वम्। (सोसूक्ष्यते)। "हलो यमाम्" इति पक्षे यलोपः । अ-न्यदा तु यकारद्वयम्। (सोसूक्ष्यीति । सोसूष्टि ।) बहूनां समवाये द्वयोरपि संयोगसंज्ञाया आश्रितत्वात् "स्कोः" इति कलोपः। लङि तिप्सिपोर्हल्ङ्यादिलोपे पदान्तसंयोगादित्वात कलोपे जश्त्वचर्त्वयोः (असोसूट् । सर्वत्र यकारस्य वलि लोपः। (सूक्ष्ययति । असुसूक्ष्यत । सूक्ष्यं आदरइत्यग्रे । (ईक्ष्यति । ईक्ष्यांचकार) ईक्ष्यिता । ईक्ष्यिष्यति । ईक्ष्यतु । ऐक्ष्यत । ईक्ष्येत्। ईक्ष्यात्। ऐक्ष्यिष्यत्। ईर्चिक्ष्यिषति)। "न न्द्राः" इति रेफवर्जस्य द्विर्वचनहला-दिशेषे चर्त्वम्, (ईक्ष्ययति । ऐर्चिक्ष्यत् । ईर्ष्यति । ईर्ष्यांचकार । ईर्ष्यितेत्यादि)। सनि [ईर्ष्यतेस्तृतीयस्य द्वे भवत इति वक्तव्यम्] इत्यत्र वृत्तौ कस्य तृतीयस्य के चिदाहुर्व्य-ञ्जनस्य। अपरे पुनराहुस्तृतीयस्यैकाच इति। तत्र तृतीयस्य व्यञ्जनस्येति पक्षे यकारादे-र्द्वितीयस्यैकाचो द्विवचनम्। (ईर्ष्यियिषति) पक्षान्तरे तु तृतीयस्यैकाचः सन एव द्विवर्च-नम्। (ईर्ष्यिषिषतीति) भवति । (ईर्ष्ययति, ऐर्षिष्यत् । ईर्ष्या) "गुरोश्च हलः" इत्यकारप्रत्ययः। एषामीर्ष्यार्थत्वात् "क्रुधद्रुह०" इति कोपविषयस्य सम्प्रादानत्वाच्चतुर्थी। (देवदत्ताय सूक्ष्यतीत्यादि) क्विपि वलि लोपे च पदान्तसंयोगादित्वात् "स्कोः" इति कलो-पे जश्त्वचर्त्वयोः (सूट्) "रात्सस्य" इति नियमान्न संयोगान्तलोपः। एवमीक्ष्यतेरपि। ई-र्ष्यतेरपीदमेव रूपम्॥ ६०६ ॥

हय गतौ ॥ भक्तिशब्दयोरपीति केचित्॥ हयति। जहाय। जहयिथ। हयिता। अहयी-त्)। "ह्मन्त०" इति न वृद्धिः। (जिहयिषति। जाहय्यते। जाहयीति। जाहति। जाह-तः। जाहयति)। [अदादेशो वलि लोपान्नित्यः] इत्युक्तम्। (जाहसि। जाहामि) यलोपे य-ञौ दीर्घः। (हाययति। अजीहयत्। हयित्वा) हयतेः क्वौ वलि लोपे तुकि (हत्) अतो लोपो नेत्ययतावुक्तम्। (हयः हयी वडवा) गौरादित्वान् ङीष्॥ ६०७ ॥

शुच्य अभिषवे॥ अवयवानां शिथिलीकरणं सुरायाः संधानं वाऽभिषवस्तथा सोममभि-षुणोत्यृजीषमभिषुणोतीति सुराप्रकरणे च संधानं स्यादभिषव इति । अभिषवः स्नानमिति

चन्द्रः । (शुच्यति । शुशुच्य । शुच्यिता । शुशुच्यिषति । शोशुच्यते) । "हलो यमाम्" इति यलोपपक्षेऽतो लोपे "यस्य हलः" इति चार्धधातुके यशब्दलोप इति चाल्लोपस्य असिद्धत्वात् स्थानिवत्त्वाद्वा गुणाभावे (शोशुचिता) । यङो लोपाभावे तु (शोशुच्यिता। शोशुच्यीति । शोशोक्ति) वलिलोपे लघूपधत्वाद्गुणः । यङ्लुकोनैमित्तिकत्वाद्गुणस्यानार्द्धधातुकनिमित्तत्वाद्वा "न धातुलोपः" इति निषेधाभावः । (शोशुक्तः । शोशुच्यति । शोशुच्यीषि । शोशोक्षि । शोशुच्यीमि । शोशोच्मि । शोशुच्वः । शोशोक्तु । शोशुग्धि) । हेर्धित्वम् । "चोः कुः"इति चकारस्य ककारे "झलां जश् झशि" इति गकारः अशोशुच्युरित्यत्र वलि लोपान्नित्यत्वाज्जुस्भावः । इगन्तविषयत्वाज्जुसिगुणो न भवति, (अशोशुच्यम्) नित्यत्वाद्वलि लोपात् पूर्वमम्भावः । (शुच्ययति, अशुशुच्यत् । शुच्यित्वा, शुच्यितः) शुक्तिरित्यत्र "तितुत्र" इत्यनिट्त्वम् । चुच्य इत्यपि पठन्तीति मैत्रेयः चुच्यतीत्यादि ॥ ५०८ ॥

हय गतिकान्तयोः ॥ (हर्यति । जहर्य्य । हर्यिता । अहर्य्यीत्) । "नेटि" इति न वृद्धिः । (जिहर्यिषति । जाहर्य्यते) । पूर्ववदार्धधातुके यसो यमि लोपे यलोपाल्लोपाभ्यां (जाहार्ता ।) अन्यदा जाहर्यितेत्यादि (जाहर्य्यीति । जाहर्ति । जाहर्तः जाहर्यति । जाहर्षि । *शरोचि* अचो रहाभ्यां शरोचि न द्वित्वमिति षकारस्य द्वित्वाभावः । (जाहर्मि) । लोटि (जाहर्हि)। (जाहर्य्याणि) इत्यत्राड् नित्यत्वाद्वलि लोपं बाधते। (अजाहर्यीत्) । इडभावे वलिलोपहलङ्यादिलोपयोः (अजाहः । अजाहर्त्ताम् । अजाहर्युः। अजाहर्य्यम् । हर्य्ययति । अजहर्य्यत् हर्य्यित्वा । हर्य्या) स्त्रियामकारः । क्विपि वलि लोपे (हः । हर्य्यतो) यज्ञः । "दृशियजियच्यनि महर्य्येभ्योतच्" इत्यतच् ॥ ५०९ ॥

अल भूषणपर्याप्तिवारणेषु ॥ अलति । आल । अलिता । मा भवानालीत् । *अतो लरान्तस्य* अकारसमीपरेफलकारान्ताद्धातोः परस्मैपदपरे सेटि सिच्यतो वृद्धिरिति वृद्धिः। (अलिषति । आलयति । आलिलत् । अलित्वा । अलितः। अलकम्) "संज्ञायाम्" इति क्वुन् । (अलका) । टापि "प्रत्ययस्थात्कात्" इति । क्षिपकादित्वान्नभवति (अलिः) इन्सर्वधातुभ्यः" इति । अल्यादि-भ्यः"। (आली) कृदिकारत्वात् ङीष्) (अलीकम्) । अलीकादयश्चेति कन् । अत्र मैत्रेयोऽकारमनुनासिकस्वरितमिच्छतीत्याह । तत्रालतइत्यादि ॥५१० ॥

ञिफला विशरणे ॥ ञित्त्वं "ञीतः क्तः" इति वर्त्तमानक्तार्थम् । (फलति । पफाल । फेलतुः) । "तृफलभजत्रपश्च" इति किति लिटि थलि च सेट्येत्वाभ्यासलोपौ । निरनुबन्धकपरिभाषायाः प्रत्ययग्रहणविषयत्वादस्यापि तत्र ग्रहणं, न केवलं फलनिष्पत्तावित्यस्यैव । अन्ये त्वियं परिभाषा सार्वत्रिकीति भजत्रपश्चेति च शब्देन सानुबन्धकमस्य समुच्चिन्वन्ति। उभयथा रूपे न विवादः । (फलितेत्यादि । अफालीत्) इत्यत्र "अतो लरान्त इति" वृद्धिः (पिफलिषति । पम्फुल्यते । पम्फुलीति । पम्फुलतः । पम्फुल्मि। । "चरफलोश्च" इति यङि यङ्लुकि अभ्यासस्य नुक् । अत्रापि पूर्ववत् सानुबन्धकस्यापि "उत्परस्यातः" इत्यभ्यासाच्चरफलाकाकारस्योत्वम् । तपरकरणं लघूपधगुणनिवृत्त्यर्थम् । (फालयति । अपीफलत् । फलम्) । अच् । (फलित्वा । फुल्लः) अस्याकर्मकत्वात्कर्तृभावाधिकरणे क्तः। "आदितश्च" इति निषेधे "अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः" इति निपातनान्निष्ठातकारस्य लत्वत् । अत एव निपातनादुत्वं च । यद्वा लत्वस्यासिद्धत्वात्तकारादिप्रत्ययपरत्वात् "ति च" इत्युक्ते "आदितश्च" इतिनिषेधस्य"विभाषा भावादिकर्मणोः"विकल्पनात् (फलित ः) इत्यपि भवति। अनुपसर्गादिति वचनादुपसृष्टस्योत्वे (लत्वाभावात्प्रफुल्तम्) इति भवति । समुत्पूर्वत्वे तु [उत्फुल्लसंफुल्लयोरुपसंख्यानम्"] इति लत्वम् । क्तवतोरप्येतल्लत्वमिष्यतइति वृत्तिः। तेन (फुल्लवान्) इति भवति । (फल्गुः) फलिपाटीत्यादिनोप्रत्यये गुगागमः । क्विपि (फल) फलिवाचरतीति "सर्वप्रातिपदिकेभ्यः" इति क्विपि फलो धातुत्वे (फलति । प-

फाल । फेलतुः । फेलुः पम्फुल्यते) इत्यादि प्रकृतिवत्। प्रत्ययान्तधातुत्वे आम् न भवति, [कास्य नेकाच] इति उक्तत्वात्। निष्ठायां फलितिमिति नित्यमिडेवादित्त्वा भावात्॥ ५११॥

मील श्मील क्ष्मील निमेषणे॥ निमेषणं सङ्कोचः द्वितीयस्तालव्यादि। तृतीयो दन्त्यादिः (मीलति । मिमील । मीलिता) इत्यादि। (मिमीलिषति । मेमील्यते । मेमीलीति । मेमील्ति । मीलयति । अमीमिलत् । अमीमीलत्) "भ्राजभास०" इत्यादिना णौ चङ्युपधाया ह्रस्वविकल्पः। श्मीलति । क्ष्मीलतीत्यादि। मिल श्लेषणइति ह्रस्वोपधस्तुदादौ॥५१४॥

पील प्रतिष्टम्भे॥ प्रतिष्टम्भो रोधनम्। (पीलति पिपील । पीलितेत्यादि । पीला नाम) का चित्। इगुपधलक्षणे कप्रत्यये टाप्। पीलाया अपत्यं (पैलः)। "पीलाया वा" इत्यण्। तदभावे ढक् च इति (पैलेयः)। अणन्तादपत्याञि "तस्य "पैलादिभ्यश्च" इति लुकि (पैलः) पुत्रः। (पीलुः)। मृगय्वादिभ्यश्चेति उप्रत्ययः। (पीलोः पाकः, पीलुकुणः,) "तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ" इति षष्ठ्यन्तात्पील्वादेः कर्णादेश्च यथासंख्यंपाकमूलयोः कुणब्जाहचोविधानादस्मात् कुणप्, ककारस्य "लशक्वतद्धिते" इति तद्धितत्वान्नेत्वम्॥५१५॥

णील वर्णे (नीलति । प्रणीलति । निमील । नीलिता इत्यादि । नीलः) इगुपधलक्षणः कः। (नीली) औषधिर्वडवा च। "जानपद०" इत्यत्र [नीलादोषधौ प्राणिनिच] इति ङीप्। अन्यत्र नीला शाटी। जानपदाभावे च संज्ञयां वेति वचनात्संज्ञायां (नीलि नीला) इत्युभयं भवति। नील्या रक्तं वस्त्रं (नीलं) "तेन रक्तं रागात्"। रज्यतेऽनेनेति रागः, शुक्लस्य वर्णान्तरापादनमिह रञ्जेर्धर्म इति वृत्तिः। रागवचनात्तृतीयान्ताद्रक्तार्थे यथाविहितं प्रत्यय इत्थणि प्राप्ते [नील्या अन्वक्तव्यः] इत्यन्। णिल गतौ इति ह्रस्वोपधस्तुदादौ॥ ५१६॥

शील समाधौ॥ (शीलतीत्यादि । शीलम्) इगुपधलक्षणः कः, घञ् च। शीले समाधाने भवा वृत्तिः (शैली)। अणि ङीप्। शील उपधारणइति चुरादौ। शिल उञ्छइति ह्रस्वोपधस्तुदादौ ॥ ५१७॥

कील बन्धने॥ कीलतीत्यादि। कीलः। इगुपधलक्षणः कः, "हलश्च" इति घञ् वा। (कीलकं) संज्ञायां कन्, कुन्वा॥ ५१८॥

कूल आवरणे॥ (कूलतीत्यादि । कूलं) पूर्ववत्कः॥ ५१९॥

शूल रुजायां संघाते च॥ (शूलति । शूलम्)शूलेषु संस्कृतं (शूल्यम्) *शूलोखाद्यत्*इति सप्तम्यन्तत्संस्कृतमित्यर्थे यत्। शूले पचति (शूलाकरोति)।शूले प्रोप्य पचतीत्यर्थः, "शूलात्पाके"इति कृञा योगे डाच्। (डाचि बहुलं द्वे भवतः) इति द्वित्वम्, अव्यक्तानुकरणस्य डाजन्तस्य नेष्यतइत्युक्तत्वान्न भवति। "ऊर्यादिच्विडाचश्च" इति डाजन्तस्य निपातत्वं गतित्वं च। तत्र निपातत्वेऽव्ययत्वात्सोर्लुक्, गतित्वात् शूलाकृत्येत्यत्र "कुगतिप्रादयः" इति समासे क्त्वो ल्यप्, अयःशूलेनान्विच्छति (आयःशूलिकः) "अयःशूलदण्डाजिनाभ्यां ठक्ठञौ" इति तृतीयान्तादस्मादन्विच्छतीत्यर्थे यथासंख्यं ठक्। अयःशूलशब्देन क्रूराकार उच्यते॥ ५२०॥

तूल निष्कर्षे॥ निष्कर्षो निष्कोषणं तच्चान्तर्गतस्य बहिर्निःसारणम् (तूलति । तूलम् । तूलेनानुकुष्णाति, अनुतूलयति) "सत्यापपाश०" इत्यादिना णिचि टिलोपः। णौ चङ्यग्लोपित्वात् (अतुतूलत्) ॥ ५२१॥

पूल संघाते (पूलति । पूलः) ॥ ५२२ ॥

मूल प्रतिष्ठायाम् (मूलति । मूलम् । मूले जातो मूलकः) "पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन्" इति तत्र जात इति विषये वुन्। नक्षत्राणोपवादः। उत्पाटनीयं मूलमस्य इति मूल्यो मुद्गः मूलमस्याबर्हि इत्यौपाधिकात्प्रथमान्तान्मूलादस्येत्यर्थे यत्। आबर्हीति बृहू

उद्यमनइत्यस्माद्भावे घञा बर्हः । सोऽस्यास्तीतीनिः । उद्यमनमिहोत्पाटनं, ये सुपक्का मूलोत्पाटनमन्तरेण ग्रहीतुं न शक्यन्तइति ते एवमुच्यन्ते, मुद्गादिषु मध्यतो लूयमानेषु कोशा अपि लूयेरन्नित्यवश्यमेषां मूलमुत्पाटनीयम्, मूलेनानाम्यं (मूल्यं) लाभाख्यं द्रव्यम् । "नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्थ्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु" इति यथासंख्यं मूलादानाम्ये यत्, आनाम्यमभिभवनीयं शेषीक्रियमाणमित्यर्थः । मूलं नाम पादादीनामुत्पत्त्यर्थं वणिग्भिर्विनियुक्तं द्रव्यं, तेन हि स्वस्मादतिरिक्तं लाभाख्यं शेषीक्रियते । आत्मन उपकारकं क्रियते, यतः स्वयं तेन सगुणी, गुणो भागः, इदमेव मूलमस्य भागीकरणं, तत्प्रति मूलस्योपकारकत्वं शेषत्वमानाम्यत्वं च । मूलेन समो (मूल्यः) पटः । उपादानसमानफल इत्यर्थः । अनेनैव सूत्रेण तृतीयान्तान्मूलात्समे यत् । न विद्यते मूलमस्याः सा (अमूला) "पाककर्ण०" इत्यादिना प्राप्तं ङीषं बाधित्वा "मूलान्नञः" इत्यजादिपाठाट्टाप् । (शतमूली) । "पाककर्ण०" इत्यादिना ङीष् । अयं रोहणार्थश्चुरादिः ॥५२३॥

फल निष्पत्तौ ॥ (फलति) इत्यादि ञिफलावत् । (फलितम्) इति निष्ठायामिडेव । फलतीति फलं (संफल) । पाककर्ण०" इति ङीषं बाधित्वा संभस्राजिनशणपिण्डेभ्यः फलात्" इत्यजादिपाठाट्टाप् । भस्त्रफलाद्योप्येवम् । "ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्" इति ह्रस्वः । अल्पं फलं, (फलिका) । ततोन्यत्फलम् । फलं च तत्फलिका च (फलाफलिका) । [कृताकृतादीनामुपसंख्यानम्] इति कर्मधारयः । "अन्येषामपि दृश्यते" इति दीर्घः पूर्वपदस्य । एकमेव फलमत्रस्थभेदादल्पत्वमहत्वाभ्यां युज्यते । (त्रिफला) । अजा दिदर्शनाट्टाप् । (फलिनः) । [फलबर्हाभ्यामिनज्वक्तव्यः] इति मत्वर्थे इनच् । (फलकं) संज्ञायाम् कन् । निष्पाद्यते कृषिरनेनेति फालः । "हलश्च" इति करणे घञ् ॥ ५२४ ॥

चुल्ल भावकरणे ॥ भावकरणमभिप्रायाविष्कारः । चुल्लिः । (चुल्ली) । इनन्तत्वाद्वा ङीष् ॥ ५२५ ॥

फुल्ल विकसने ॥ (फुल्लति । फुल्लः । अच् । फुल्लित्वा । फुल्लितः) ॥ ५२६ ॥

चिल्ल शैथिल्ये भावकरणे च ॥ (चिल्लति । चिल्लः) तिल गतौ इति दुर्गमैत्रेयौ । तिल्लेत्यन्ये । (तेलतीत्यादि । तिलः) । इगुपधलक्षणः कः । तिल स्नेहनइति तौदादिकाद्वा । तिलानां भवनं क्षेत्रं (तिल्यं तैलीनम् ।) "विभाषा तिल०" इति यत्खञौ । तिलेभ्यो हितं (तिल्यम्) "खलयवमाषतिलवृषब्रह्मणश्च इति चतुर्थ्यान्ताद्धितार्थे यत् । निष्फलस्तिलः (तिलपेजः) । तिलपिञ्जः) । "तिलान्निष्फलात्पिञ्जपेजौ" इति तौ । (तिलकम्) संज्ञायां क्वुन् । तिल स्नेहनइति चुरादौ च ॥ ५२७ ॥

वेलृ चेलृ केलृ खेलृ क्ष्वेलृ वेल्ल चलने ॥ (वेलतीत्यादि । वेला) । "गुरोश्च" इत्यकारः । (चेलति । चेलः) । पचादौ चेलडिति पाठात् अच्, टित्वं स्त्रियां ङीबर्थं, चिल वसनइत्यस्माद्वा चेलम् । प्रसङ्गादत्र किं चिदुच्यते । कुत्सिता ब्राह्मणी ब्राह्मणिचेलीति "कुत्सितानि कुत्सनैः" कुत्साहेतुधर्मवचनैः समानाधिकरणैः समस्यन्तइति तत्पुरुषः । "घरूप" इत्यादिना ह्रस्वः । चेलादयो वृत्तिविषये कुत्सनवचना इति भवतावुक्तम् । तत्र चेलमकुलीनेन तन्तुवायेनोत्पादितं भवति, तत्सादृश्याद् ब्राह्मण्यादिषु वृत्त्या चेलशब्दस्य कुत्सनवचनत्वम् । (स्त्रिचेली, स्त्रीचेली वा, वामोरुचेली, वामोरूचेली वा ।) *नद्याः शेषस्यान्यतरस्याम्* इति ह्रस्व विकल्पः अङीच या नदी ङ्यन्तं च यदेकाच् सशेषः तस्य घादिषु वा ह्रस्व इति सूत्रार्थः । अत्रान्तरेणापि शेषग्रहणं पूर्वसूत्रव्यतिरिक्तविषयत्वे सिद्धे तत्सामर्थ्यात्पूर्वश्रुतङ्यन्तानेकाजपेक्षं शेषत्वं बोधयितुं, तेन यदङ्यन्तमनेकाच ङ्यन्तमेकाच् तत्रैवायं विकल्प इति यद्भाषितपुंस्कमामलक्यादि यच्च समानायामाकृतौ अभाषितपुंस्कं द्रोण्यादि पूर्वसूत्रविषयं तत्र न भवति । (लक्ष्मीचेली यवागूचेली) । इत्यादौ च ङ्यन्तनदीत्वेपि [कृन्नद्याः

प्रतिषेधः] इत्युक्तत्वान्नायं विधिर्भवति । (श्रीचेली) इत्यादौ तु नदीग्रहणान्नास्य प्रसङ्गः । नापि पूर्वसूत्रस्य, ङ्यन्तानेकाच्त्वाभावात् । (विदुषीचेली) इत्यादौ *उगितश्च* उगितः परा या नदी तस्या ह्रस्वविकल्पः विद्वच्छ्रेयसोः पुंवद्भावोत्र पक्षे वक्तव्य इति वृत्तावुक्तत्वात् (विद्वच्चेली) इत्यपि भवति । (केलति । केलिः) । इन्प्रत्यये (केली) । अप्रत्ययः (केला । केलयति) । "कण्ड्वादिभ्यो यक्" इति स्वार्थे यक् सनाद्यन्तत्वेन धातुत्वे लडादि । (खेलति । खेला) अयमपि कण्ड्वादिः (वेल्लति । वेल्लो विषम्) । संज्ञायां घञ् । (वेल्लयति) वेल्लादीनां पञ्चानामृदित्त्वाच्चङीति ह्रस्वाभावात (अविवेलदिति) भवति । वेल्लस्त्वनुपधात्वान्न ह्रस्वप्रसङ्गः ॥ ५३३ ॥

पेल शेल फेल गतौ ॥ (पेलति । अपिपेलत पेला) भुक्तमुज्झितम् । (शेलति ।-अशिशेलत्) अत्र क्वचित्खेलपेलसेल इत्यपि त्रयः पठ्यन्ते । तत्र खेलतिर्मैत्रेयाद्यनुसारेणाग्रे पठिष्यते । सेलतेस्तु दन्त्यादेः पाठः षोपदेशपर्युदासकाक्येनुपादानादनार्षः । मूर्द्धन्यादिस्तु सेलुः श्लेष्मान्तक इत्यादिदर्शनाद् ग्राह्यः ॥ ५३६ ॥

स्खल संचलने ॥ (स्खलति । चस्खाल । अस्खालीत्) । णौ घटादित्वात (स्खलयति, ॥ ५३७ ॥

खल संचये ॥ खलति । (चखाल । अखालीत्) । खलति पापानि संचिनोतीति, (खलः) । खल्यते संचीयते धान्यादिकमिति (खलम्) । "खनो घच" इत्यत्र वृत्तिः खलं भगः पदं चेति वक्तव्यमिति । अत्र हरदत्तः । वित्करणसामर्थ्यादन्येभ्योप्ययं भवति, नहि खनः कश्चिदवयवः क्त्वभागस्ति । खलानां समूहः, (खल्या) । "खलगोरथात्" इति षष्ठयन्तात्समूहे यत्, (खलिनी) । 'इनित्रकट्यचश्च" इति पुर्वत्रैव विषये इन्यादिविधानादिह यथासंख्यादिनिः सर्व एते थादयः स्वभावात् स्त्रीविषयाः । खलाय हिता (खल्या) "खलयव०" इति यत् । यस्मिन्काले खले यवा भवन्ति स कालो (खलेयवः) । एवं (खलेबुसम्) । "तिष्ठद्गुप्रभृतीनि च" इत्यव्ययीभावः । तत्र ह्येवं पठ्यते, खलयवादीनि प्रथमान्तानि विभक्त्यन्तरेण न संबध्यन्ते, अन्यपदार्थे च वर्त्तन्ते इति । नैतौ प्रथमान्तावेव अव्ययीभावात् "अव्ययीभावश्च" इति नपुंसकत्वम् । खलन्ति संचलन्ति केशा अस्मादिति (खलतिः) । अयं च भीमादिषु पाठात् "भीमादयोपादाने" इत्यपादानविषयः।अत्रैव पाठादेवातिप्रत्यये धातूनामनेकार्थत्वात्संचलने वृत्तिः । यद्वा पूर्वस्यैव धातोर्भीमादिषु पाठात् सलोपः । (खलत) इत्यपि निपातितः । शास्त्रं शाठ्यं शिरोमध्यं च ॥ ५३८ ॥

गल अदने ॥ (गलति । अगालीत् । गलः) "गोचरसंचर०" इत्यादौ चकारेण "पुंसि संज्ञायां घः प्रायेण" गिरतेर्वा ॥ ५३९ ॥

षल गतौ ॥ (सलति । सालयति । असीसलत् । सालः) अकर्त्तरि च कारके०" इति संज्ञायां घञ् । (सलिलम्) । सलिकलि०" इत्यादिनेलच् ॥ ५४० ॥

दल विशरणे ॥ (दलति) । णौ घटादित्वात (दलयति) दाडिमम् । दालशब्दात् घञन्तात्तेन निर्वृत्तमित्यत्र विषये [भावप्रत्ययान्तादिमज्वक्तव्यः] इतीमच् डलयोश्चाभेदः कुं दलतीति (कुद्दालः) पृषोदरादिः । अयं घटादावपि ॥ ५४१ ॥

श्वल, श्वल्ल आशुगमने (श्वलति । शश्वाल । अश्वालीत् शिश्वलिषति । शाश्वल्यते । श्वालयति । अशिश्वलत् । श्वल्लति । अश्वल्लीत्) अत्राङ्गान्त्यस्य लकारस्याकारसमीपत्वाभावात "अतो ल्रान्तस्य" इति वृद्धिर्न भवति ॥ ५४३ ॥

खोल खोर्ऋ गतिप्रतिघाते (खोलति । चुखोल । खोलयति । अचुखोलम्) ऋदित्वान्नोपधाह्रस्वः (खोडः खञ्जः) पचाद्यच्, डलयोरभेदः । एवं (खोरतीत्यादि) ॥ ५४५ ॥

धोर्ऋ गतिचातुर्य्ये ॥ (धोरति । धोरिता । अदुधोरत् । धौरितकः) अश्वानां गतिवि-

शेषः । निष्ठान्तात्सञ्ज्ञायां कन् ॥ ९४६ ॥

त्सर छद्मगतौ ॥ (त्सरति । तत्सार । तत्सरतुः । त्सरिता । अत्सारीत्) "अतो ल्रान्तस्य" इति वृद्धिः ।)तित्सरिषति । तात्सर्यते । तात्सरोति। तात्सर्त्ति ।तात्सर्षि। अतात्सः। त्सरुः।). "भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः" इति उप्रत्ययः । त्सरौ कुशलः (त्सरुकः) "आकर्षादिभ्यः कन्" इति सप्तम्यन्तात् कुशल इत्यर्थे कन् ॥ ९४७ ॥

क्मर हूर्छने । (क्मरति । चक्मार । क्मरिता । अक्मारीदित्यादि) पूर्ववत् ॥ ९४८ ॥

अभ्र वभ्र मभ्र चर गत्यर्थाः ॥ चरतिर्भक्षणार्थोपि (अभ्रति । आनभ्र । अभ्रिता । मा भवानभ्रीत् । अङ्गान्त्यस्य रेफस्याकारसमीपत्वाभावात् "अतो ल्रान्तस्य" इति न वृद्धिः (अबिभ्रिषति । अभ्रयति । आबिभ्रत । अभ्र्याद्) इत्यत्र रेफस्य हलः परत्वाद्यम्परत्वाच्च "हलो यमाम्०" इति पाक्षिको लोपो न भवति । तत्र यथासंख्याश्रयणात् । तथा चोत्तरसूत्रे सवर्णग्रहणसमर्थंवत् । उक्तं च वृत्त्यादौ सवर्णग्रहणस्य फलं शिण्ढीत्यादौ यथासंख्यनिरासः (अभ्रम्) । अच् । भ्रमो वा व्युत्पादयिष्यते । (अभ्री) इनन्तः काष्ठकुद्दालः । (अभ्रकम्) । संज्ञायां कन् (बभ्रति । बबभ्र । बभ्रिता । बिबभ्रिषति । बाबभ्र्यते) उक्तो रेफे लोपाभावः (बाबभ्रित) भकाररेफतकाराः संयुज्यन्ते। "अनचि च" इति भकारस्य पक्षे द्विर्वचने "झलां जश् झशि" इति पूर्वस्य जश्त्वेन बकारभकाररेफतकाराः द्रष्टव्याः । लङि तिप्सिपोर्हल्ङ्यादिलोपे संयोगांतलोपे च "झलां जशोन्ते" इति जश्त्वे च "वावसाने" इति चर्त्वे (अबाबब् । अबाबप्) एवं (मभ्रतीत्यादि चरति । चचार । चेरतुः चेरुः चरितेत्यादि । अचारीत्) "अतो ल्रान्तस्य" इति वृद्धिः (विचरिषति । चञ्चूर्यते) "लुपसदचर०" इति भावगर्हायामेव यङ् । "चरफलोश्च" इत्यभ्यासस्य नुकि "उत्परस्यात" इत्युत्वे तस्य हल्परत्वे "हलि च" इति दीर्घः (चञ्चुरीति । चञ्चूर्ति) अत्र दीर्घस्य पूर्वत्रासिद्धत्वेन प्राप्तो लघूपधगुण उदिति तपरकरणसामर्थ्यान्न भवति, तपरत्वं हि विकारनिवृत्यर्थम् । यद्येवं दीर्घोपि निवर्त्तेत इति न मन्तव्यम् । यतस्तपरत्वेन निवृत्तौ प्रसक्तायामपि दीर्घत्वमसिद्धम् । (अचञ्चूः) लङि तिप्सिपोर्हल्ङ्यादिलोपे रेफस्य विसर्जनीयः । यदायमुत्पूर्वः सकर्मकस्तदा "उदश्चरः सकर्मकात्" इति तङ्, गुरुवचनं (उच्चरन्त) इति उत्क्रम्य गच्छन्तीत्यर्थः। तथासमुपसृष्टात् "समस्तृतीयायुक्तात्" इति तङ् (अश्वेन सञ्चरतइति) सम इतीयं षष्ठी तेन व्यवहितेपि भवति (अश्वेन समुदाचरतेइति । (चर्य्यम्) "गदमदचर०" इति भावकर्मणोर्यत् । अनुपसर्गे इति वचनात्सोपसर्गे उपचार्य्यामतिण्यदेव, (आचार्यादेशः [चरेराङि चा गुरौ] इति यत् गुर्वौत्वाचार्यं इति ण्यदेव आचार्य्यस्य स्त्री (आचार्य्यानी) "इन्द्रवरुण०" इत्यादिना ङीषानुकौ । [आचार्य्यादणत्वं च] इति णत्वाभावः । चरतीतिचरः । चरडिति पचादिपाठादच् टित् । स्त्रियां (चरी) । चरस्य गोत्रापत्यं (चारायण) । "नडादिभ्यःफक्" इति षष्ठ्यान्ताद्गोत्रापत्ये फक्, फस्यायनादेशः । (चराचरः) । [चरिचलिपतिवदीनां वा द्वित्वमच्याक्चाभ्यासस्य] इति अचि पक्षे द्विर्वचनम् । अभ्यासस्यागागमः, आगमसामर्थ्यान्न हलादिशेषः । अन्यथादेशमेव कुर्यात् । दीर्घोच्चारणसामर्थ्यान्न ह्रस्वः । (कल्याणाचारः। कल्याणाचारा) । "शीलिकामि०" इत्यादिना कर्म्मण्युपपदे णः । कुरुषु चरतीति (कुरुचरः,) "चरेष्टः" इत्यधिकरणे उपपदे टप्रत्ययः। टित्त्वात् स्त्रियां (कुरुचरी । भिक्षाचरः) "भिक्षासेनादायेषु च" इति भिक्षादिषूपपदेषु टप्रत्ययः । एवं (सेनाचर आदायचर)।इत्यनधिकरणार्थमिदं सूत्रम् । (चरिष्णुः) "अलंकृञ्०" इत्यादिना इष्णुच् । (अतिचारी । अपचारी) । "संपृच०" आदिना ताच्छीलिको घिनुण् । ब्रह्म वेदस्तदर्थं व्रतं चरतीति (ब्रह्मचारी) । "सुप्यजातौ०" इति णिनिः,।समानो ब्रह्मचारी (सब्रह्मचारी) *चरणे ब्रह्मचारिणि* इति चरणे गम्यमाने समानस्य सभावः । चरणशब्दः शाखाध्यायिषु रूढः, सब्रह्मचारिण इमे (साब्रह्मचाराः) [नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकौथु-

मितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानम्] इति टिलोपः। चर्य्यतेऽनेनेति (चरित्रम्) "अर्त्तिलूधूसूखनसहचर इत्रः" इतीत्रः, करणे प्रज्ञादिपाठात्स्वार्थेऽणि चारित्रम् (गोचरो विषयः, सञ्चरो मार्गः ।) "गोचरसञ्चर" इत्यधिकरणे घञ्प्रत्ययान्तो निपात्यते । अत्र सञ्चरत्यनेनेति (सञ्चर) इति वृत्तिः'। तत्र सुधाकरः। "समस्तृतीयायुक्तात्" इति तङा भाव्यमिति । 'परिचर्यापरिसर्या०" इत्यादीना स्त्रियां भावे शे यक् । चरितं तदिति (चर्म।) "मन्" इति मन् । अयं "उणादयो बहुलम्" "भूतेपि दृश्यन्ते" इति भूते चर्माण्यस्याः सन्ति (चर्मण्वती नदी) "आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती" इति मतुपि नलोपाभावो णत्वं च संज्ञायां निपात्यते। (चर्मी)। "व्रीह्यादिभ्यश्च" इति मत्वर्थ इनिः "नस्तद्धिते" इति टिलोपः । चर्मिणोऽपत्यं (चार्मिकायणिः)। "वाकिनादीनां कुक्च" इति फिञ् कुक्चागमः। कुकि नान्तत्वाभावेऽपि [चर्मचर्मिणोर्नलोपश्च]इति वचनान्नलोपः।सर्वचर्मणा कृतः (सर्वचर्मीणः। सार्वचर्मीणः) । *सर्वचर्मणः कृतः खखञौ* इति कृत इत्यर्थे तृतीयान्ताद् अस्मात् खखञौ, सर्वचर्मेण इत्यसमर्थः समासः, यतः सर्वशब्दस्य कृत इत्यनेन सम्बन्धो वृत्त्यादावुक्तः । चर्मणः कोशः(चार्मः।) "[चर्मणः कोश उपसंख्यानम्]" इति टिलोपः, अन्यत्र "अन्" इति प्रकृतिभावात (चार्मणं चक्षुः) । (चारु)। दृसनिजनिचरीति ञुण् प्रत्ययः।(चरुः) भृमृशीतृचरीत्युप्रत्ययः । अयं हि भीमादित्वादपादाने चरन्त्यस्मादिति हि व्युत्पत्तिः । (चरकः) वुक्, चरकेण प्रोक्तमपि । (चरकम्)। "तेन प्राक्तम्" इत्यण्, "कठचरकाल्लुक्" इति लुक्,चरको नाम वैशम्पायनः। उक्तं च "कलापिवैशम्पायनान्तेवासिभ्यश्च" इत्यत्र (अलम्बिश्चरकः) प्राचां पतिलिटिकिमलाबुभावान्युपादाय चरको नाम वैशम्पायन इति, तत्राभेदविवक्षायां भव्यादीनामिदं विशेषणं, चरकाय हितं (चारकीणम्) । "माणवचरकाभ्यां खञ्" इति "तस्मै हितम्" इति विषये खञ् । चर सञ्चयन इति चुरादौ ॥ ५५२ ॥

ष्ठिवु निरसने ॥ [सुब्धातुष्ठिवुष्वष्कतीनां प्रतिषेध] इति प्रतिषेधः सत्वस्य । अस्य द्वितीयस्थकारष्ठकारो वेति वृत्तिः, आचार्येण शिष्येभ्य उभयथा प्रतिपादनात् उभयमपि प्रमाणमिति व्याख्यातारः (ष्ठीवति) "ष्ठिवुक्लमुचमां शिति" इति दीर्घः (तिष्ठेव । तिष्ठिवतुः । अभ्यासे खयः शेषः (ष्ठेविता । ष्ठेविष्यति । ष्ठीवतु । आशिषि ष्ठीव्यात्) "हलि च" इति दीर्घः (अष्ठेवीत् । तिष्ठेविषति । तुष्ठयूषति) "सनीवन्तर्द्ध०" इति सनः पक्षे इडागमः, अन्यदा च "हलन्ताच्च" इति सनः कित्त्वे वलि लोपं बाधित्वा "च्छ्वोः शूठ०" इति ऊठि यणादेशे द्विवर्चनम् । अत्र वर्णमात्राश्रयत्वेन चान्तरङ्गे यणि कर्त्तव्ये बाह्यप्रकृतिप्रत्ययाश्रयत्वेन बहिरङ्गस्योठोऽसिद्धत्वं न भवति 'नाजानन्तर्ये' इति निषेधात् (तेष्ठीव्यते । ष्ठेवयति । अतिष्ठिवत्) ऊड्भाविनां वकारान्तानां यङ्लुङ्नास्तीति तेवतावुक्तम् । ठकारपक्षे सर्वत्राभ्यासे टकार उदाहार्यः । (टिष्ठेवेत्यादि । ष्ठेवित्वा । ष्ठ्यूत्वा) उदित्त्वादिड्विकल्प इति "न क्त्वासेट्" इति कित्त्वनिषेधाद्गुणः, अन्यदा तु कित्त्वादूठि यणादेशः । ष्ठ्यतः । ष्ठ्यतिः । "यस्य विभाषा" "सितुत्र०" इत्यनिट्त्वम् (ष्ठीवनम् । ष्ठेवनम्) पृषोदरादित्वात्पक्षे दीर्घः, तथा च चान्द्रसूत्रम् । "ष्ठिवुसिवोर्दीर्घश्च" इति । अयं दिवादावपि ॥ ५५३ ॥

जि जये॥ अत्र मैत्रेय उत्तरधातुसाहचर्यानुरोधेनाजन्तोप्यत्र निर्दिश्यतइति । इह जय उत्कर्षप्राप्तिरित्यकर्मकोयम् । यस्त्वभिभवार्थः स सकर्मकः । यदाह देवः—

जयिर्जयाभिभवयोराद्येर्थेऽसावकर्मकः।
उत्कर्षप्राप्तिराद्योर्थोऽद्वितीयेर्थे सकर्मक इति ॥

(जयति । जिगाय । जिग्यतुः । जिगयिथ । जिगेथ । जिग्यिव) *सन्लिटोर्जेः* इत्यभ्यासादुत्तरस्य कुत्वं गकारः । अजन्तत्वादनिट्त्वे क्रादिनियमादिट् थलि तु भारद्वाजनियमादिड्विकल्पः । अजादौ कङिति लिटि "एरनेकाच०", इति यण् (जेता । जेष्यति ।

जयतु। अजयत्। जयेत्। जीयात्) "अकृत्सार्वधातुकयो०" इति दीर्घः (अजैषीत्। जिगीषति) "इको झल्" इति सनः कित्त्वान्न गुणः *अज्झनगमां सनि* अजन्तानां हन्तेर्गमेश्च झलादौ सनि दीर्घ इति दीर्घः। पूर्ववदभ्यासात्परस्य कुत्वम्। (जेजीयते। जेजयीति। जेजेति। जेजितः। जेज्यति)। अजादौ क्ङिति यण्।(जापयति) "क्रीङ्जीनां णौ" इत्येचःस्थाने आत्वे पुगागमः। (अजीजपत्। विजयते। पराजयते) "विपराभ्यां जेः" इति तङ्। अयं प्रकृतिग्रहणन्यायेन यङ्लुगन्तादपि (विजेजिते पराजेजित इति)। यङ्लुगन्तात्सनि "सन्लिटोर्जेः" इति कुत्वं न भवति, तत्र प्रत्यासत्त्या सन्लिड्निमित्तस्यैवाभ्यासस्य ग्रहणात्। तथा च वृत्तिः। सनि लिटि च प्रत्यये जेरङ्गस्य योऽभ्यास इति। "विपराभ्याम्" इत्यत्रोपसर्गयोर्ग्रहणात् (परा जयति सेना) त्यादौ तङ् न भवति। अस्याकर्मकत्वात्सर्वे कृतो न सन्तीति तन्त्रेणाभिभवार्थे प्रदर्शयिष्यन्ते॥ ९५४॥

जीव प्राणधारणे॥ प्राणलक्षणस्य कर्मणो धात्वर्थेनोपसंग्रहणादकर्मकोयम् (जीवति। जिजीव। जीवितेत्यादि। जिजीविषति। जेजीव्यते) वकारान्तानामूठ्भाविनां यङ्लुङ् नास्तीति तेवतावुक्तम् (जीवयति। अजिजीवत्। अजीजिवत्) "भ्राजभास०" इत्यादिना णौ चङ्युपधाह्रस्वविकल्पः। (यावज्जीवम्)। "यावति विन्दजीवोः" इति यावत्युपपदे णमुल्। (जीविका) [धात्वर्थनिर्देशे ण्वुल् वक्तव्यः] इतिण्वुल्। जीवनस्य मूतो (जीमूतः)। पृषोदरादिपाठाज्जीभावः। उणादौ तु जेर्मुट् चोदात्त इति जयतौ व्युत्पादितः। (जीवातुः)। "जीवेरातुः" इत्यातुप्रत्ययः। (जैवातृकः)। "जीवेरातृकन् वृद्धिश्च" इति आतृकनि वृद्धिः। (जीवन्तः)। "रुहिनन्दिजीविप्राणिभ्यो झच् षिद्वदाशिषि" इति झच्, षिद्वद्भावात् स्त्रियां ङीषि (जीवन्ती)। जीवन्तस्य गोत्रापत्यं, (जैवन्वायनः)। "द्रोणपर्वतजीवन्तादन्यतरस्याम्" इति गोत्रापत्ये वा फक्। तदभावे इञि (जैवन्तिः)॥ ९५५॥

पीव मीव तीव णीव स्थौल्ये। (पीवति। पिपीव। पीविता। पिपीविषति। पेपीव्यते पीवयति। अपीपिवत्। एवं मीवति। तीवतीत्यादि। प्रणीवति) "उपसर्गादसमासेणो०" इति णत्वम्। (पीवरः स्थूलः, मीवरः मानी, तीवरो निषादः नीवरो वणिक्)। "छित्वर०" इत्यादिना तरचि वलि लोपे निपात्यन्ते। टित्त्वात् स्त्रियां ङीपि (पीवरीत्यादि) उणादिवृत्तौ तु पा पाने, तेवृ देवने, मार्ग मार्गणे, णीञ् प्रापण इत्येतेभ्य एते व्युत्पादिताः॥ ९५९॥

क्षीवु निरसने॥ (क्षीवतीत्यादि)। उदित्त्वात् क्त्वायामिड्विकल्पः। (क्षीवित्वा क्ष्यूत्वा)। इडभावे ऊठि यणादेशो निष्ठायां "यस्य विभाषा" इतीडनिषेधात् (क्ष्यूतः) क्षेवु निरसन इति चन्द्रः। (क्षेवतीत्यादि)॥ ९६०॥

उर्वी तुर्वी थुर्वी धुर्वी दुर्वी हिंसार्थाः (ऊर्वति ऊर्वां चकार। ऊर्विता। ऊर्विष्यति। ऊर्वतु। और्वत्। ऊर्वेत्। ऊर्व्यात्। और्वीत्। ऊर्विविषति। ऊर्वयति। मा भवानूर्विवत्) रेफोपधत्वात् "उपधायां च" इति सर्वत्र दीर्घः (ऊर्णः। उर्णवान्) ईदित्त्वान्निष्ठायामनिट्त्वे झलादिप्रत्ययपरत्वात् "राल्लोपः" इतिवलोपे रेफस्य हल्परत्वाद् "हलि च" इति दीर्घः। "रषाभ्याम्०" इति निष्ठानस्य णत्वम्, एवं क्विप्यपि "राल्लोपः" इति वलोपे "र्वोरुपधायाः०" इति पदत्वे दीर्घः, (ऊः उरौ उर इत्यादि तूर्वति। तुतूर्व। तूर्विता। तुतूर्विषति। तोतूर्व्यते) "हलो यमाम्०" इति वकारस्य लोपो यथासंख्यान्न भवति (तोतूर्वीति। तोतोर्त्ति। तोतूर्त्तः। तोतूर्वति इत्यादि) पिद्वचनेष्वनिट्त्वं वकारस्य झल्परत्वेनानुनासिकादिप्रत्ययपरत्वेन च राल्लोपे लघूपधगुणः। "हलि च" इति दीर्घत्वं तु गुणे पूर्वत्रासिद्धम्। ङित्स्वरेनैव दीर्घः। तोतूर्वतीत्यत्र परत्वान्नित्यत्वाद् राल्लोपात्पूर्वमद्भावे कृते झल्परत्वाभावान्न राल्लोपः। "उपधायां च" इति रेफोपधत्वाद्दीर्घः। (तोतूर्तः) इत्यत्र वलि लोपे "हलि च" इति दीर्घः। अझलादित्वादनुनासिकत्वाच्च राल्लोपस्य न प्रसङ्गः (तोतोर्तु। तोतूर्तात्। तोतूर्हि। तोतूर्त्तम्) उत्तमे राल्लोपस्यानित्यत्वादाडागमः। लुङितिप्सिपोः पर-

त्वाद्राल्लोपे हलङ्यादिलोपे (अतोतोरिति । अतोतूर्वुः) इत्यत्र परत्वाद् जुसि झल्परत्वाभावान्न राल्लोपः (तूर्वयति । अतुतूर्वत् । तूर्वित्वा । तूर्णः । तूर्णवान्) ईदित्त्वान्निष्ठायामनिट्त्वम् (एवं थूर्वति, दूर्वति, धूर्वतीत्यादि धूः । धुरौ ।) "भ्राजभासभाष०" इत्यादिना क्विपि राल्लोपः । पदत्वे "र्वो०" इति दीर्घः । धूर्ष्वित्यत्र "खरवसानयो" इति विसर्जनीयो "रोः सुपि" रोरेव सुपीति नियमान्न भवति (धूर्पतिः) । [अहरादीनां पत्यादिषु उपसंख्यानम्] इति विसर्जनीयापवादः पक्षे रेफः । उभयत्राप्यादिशब्दः प्रकार इति हरदत्तः । रेफाभावे विसर्जनीयो धूःपतिः । अत्र विसर्जनीयस्य "कुप्वोः ᳲकᳲपौ च" इति पवर्गपरत्वेन पक्ष उपध्मानीय उदाहार्यः । "इणः षः" इति षत्वमपदादिकवर्गपवर्गपरविसर्जनीयविषयमिति न भवति । (धुर्यो धौरेयः) । "धुरो यड्ढकौ" इति द्वितीयान्ताद्वहतीत्यर्थे यड्ढकौ । धुर्यमित्यत्र "हलि च" इति दीर्घस्य "न भकुर्छुराम्" इति प्रतिषेधः । "र्वो०" इति दीर्घस्तु "यचि भम्" इति भत्वेन पदत्वस्य बाधान्न भवति । सर्वधुरं वहति (सर्वधुरीणः) । "खः सर्वधुरात्" इति खः । ख इति योगविभागात् (दक्षिणधुरीणः । उत्तरधुरीणः) इति वृत्तिः । योगविभागस्येष्टसिद्ध्यर्थत्वाद् (धुरीण) इत्यपि द्रष्टव्यम् । अत्र "ऋक्पूरब्धूःपथामानक्षे" इति ऋगाद्यन्ते समासे अकारस्य सामासान्तस्य विधानात् "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इति परवल्लिङ्गतया सर्वधुराया इति निर्देष्टव्ये सर्वधुरादिति निर्देशः शब्दरूपापेक्ष इति वृत्तावुक्तम् । अनक्षइति वचनादक्षस्य धूरक्षधूः दृढा धूरस्य (दृढधूरक्ष) इत्यादावकारो न भवति। (सुधूरतिधूः किंधूरधूः) इत्यत्र "न पूजनात्" "किमः क्षेपे" "नञस्तत्पुरुषात्" इति समासान्ताभावः । पूजायां स्वती परिगणितौ । "किमः क्षेपे" इत्यत्र न्यासान्तरेणापि क्षेपग्रहणं लक्षणप्रतिपदोक्तपरिभाषया "किं क्षेपे" इति विहितस्य क्षेपविषयस्यैव तत्पुरुषस्य लाभे तत्करणात्सा च नेहास्तीति कुत्सिता धूरस्य किंधूः शकट इत्यत्रापि समासान्तो नेत्युक्तं पदमञ्जर्याम्, तद्भाष्यविरोधादुपेक्ष्यमिति । अयं चाकारः समासार्थादुत्तरपदादकृत एव समासे भवति, तेन द्विधुरीत्यादावकारान्तोत्तरपदत्वाद् "द्विगोः" इति ङीप्सिद्धः । एतच्च जेमतावुपपादितम् । एकधुरं वहति, (एकधुरीणः । एकधुरः) । "एकधुराल्लुक् च" इति लुक् खश्च पक्षे । (धूर्तो हस्ती) । "हसिमृग्रिण्वाम्" इत्यादिना तन् । अक्षेषु धूर्तः । "सप्तमी शौण्डैः" इति सप्तम्यन्तं शौण्डादिना समस्यते, (ब्राह्मणधूर्त्तः) "पोटायुवती०" इत्यादिना समासः ॥ ९६६ ॥

गुर्वी उद्यमने ॥ मूर्वी बन्धने ॥ (गूर्वति । मूर्वति । सुमूर्वेत्यादि । गूर्वा) । "गुरोश्च०" इत्यकारप्रत्ययः । (मौर्वी) । "तस्य विकारः" इत्यण्, ङीप् ॥ ९६७ ॥

पूर्व पर्व मर्व पूरणे ॥ (पूर्वति) । "उपधायां च" इति दीर्घः । क्विपि राल्लोपे (पूः) । पिपर्तौ च व्युत्पादयिष्यते । पुरि भवादि (पौरेयम्) । "नद्यादिभ्योढक्" इति शैषिको ढक् । वृत्तौ पूर्वनगरीति पठित्वा केचित्पूर्वनगरीति पठन्ति विच्छिद्य च प्रत्ययं कुर्वन्ति, उभयमपि प्रमाणमित्युक्तम् । (द्विपुरी) "ऋक्पूरब्धू०" इत्यकारः समासान्तः, स चाकृत एव समास इति जम्भतावुक्तं, तेनाकारान्तोत्तरपदद्विगुत्वे ङीप् पूर्ववदत्रापि । स्वतिकिंनञः परत्वे समासान्तो न भवन्ति । पूर्वः । अच् । *'सर्वादीनि सर्वनामानि'* असंज्ञोपसर्जनानि सर्वादीनि सर्वनामसंज्ञानीति सर्वनामत्वे "सर्वनाम्नः स्मै" इति ङेः स्मैभावः (पूर्वस्मै) "पूर्वादिभ्यो नवभ्यो वा" इति (पूर्वस्मात् । पूर्वात् । पूर्वस्मिन् । पूर्वे ।) इति पूर्वस्य स्मात्स्मिनौ, "आमि सर्वनाम्नः सुट्" इति (पूर्वेषाम्) इत्यामः सुडागमः, "बहुवचने झल्येत्" इत्येत्वे षत्वम् । "जसि च" "पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्" इति जसः कार्यं प्रति सर्वनामसंज्ञाविकल्पनात सर्वनामत्वे "जसः शी" इति शीभावे (पूर्वे । पूर्वाः) । जसः कार्यं प्रतीत्युक्तत्वात् "अव्ययसर्वनाम्नामकच् प्राक् टेः" इत्यकचि संज्ञायां विकल्पनाभावात (पूर्वके । पूर्वका) इति भवति । व्यवस्था नाम स्वाभिधेयापेक्षो ऽवधिनियमः । मासेन पूर्वाय (मासपूर्वाय) इत्यत्र "पूर्वसदृ०" इति तृतीयासमासत्वे "तृतीयासमास" इति सर्वनामत्वाभा-

वः। अत्र समासइति प्रकृते पुनः समासवचनाद्वाक्येपि नेयं संज्ञा। स्त्रियां तु "सर्वनाम्नः स्याड् ह्रस्वश्च" इति ङिद्वचनेषु स्याडागमे ह्रस्वत्वे (पूर्वस्यै, पूर्वस्याः, पूर्वस्यामिति ।) शीभावाद्यनदन्तत्वान्न भवति । पूर्वस्मिन्नहनि, (पूर्वेद्युः) । "सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः" इति द्युप्रत्यये यस्येति लोपो निपात्यते । "तद्धितश्चासर्वविभक्तिः" इति अव्ययश्चायम् । (पुरो वसति । पुरत आगतः, पुरो रमणीयम्)। *पूर्वाधरावराणामसिपुरधवश्चैषाम्* इति सप्तमीपञ्चमीप्रथमान्तेभ्यः पूर्वादिभ्यो ऽसिप्रत्ययः स्वार्थे तत्संनियोगेनैषां यथासंख्यं पुरादय आदेशा इत्यसिप्रत्यये पूर्वस्य पुरादेशः (पुरस्ताद्वसति । पुरस्तादागतः । पुरस्ताद्रमणीयम्) ।*अस्ताति* च अस्तातौ परतः पूर्वादिभ्यः पूर्ववत् पुराद्यादेशाः । (पूर्वतः । पूर्वत्र ।) किंसर्वनामबहुभ्यो ऽद्व्यादिभ्यः" इत्यधिकृत्य "पञ्चम्यास्तसिल्" "सप्तम्यास्त्रल्" इति स्वार्थे तसिल्त्रलौ. पुरो भवं (पौरस्त्यम्) । "दक्षिणापश्चात्पुरसस्त्यक्" इति शैषिकस्त्यक्, (पुरस्कृत्य) "पुरोऽव्ययम्"इति क्रियायोगे गतित्वात् कुगतिसमासे क्त्वो ल्यप् । "नमस्पुरसोर्गत्योः" इति कुप्वोः परतो विसर्जनीयस्य सत्वम्, गतिसंज्ञायामव्ययवचनात् पुरः कृत्वेत्यत्रानव्ययत्वेन गतित्वाभावात् सत्वसमासयोरभावः। पूर्वं कृतमनेन (पूर्वी) *पूर्वादिनिः* इति प्रथमान्तात्पूर्वशब्दादनेनेत्यर्थे इनिः, पूर्वं कृतमनेनेति "सुप्सुपा" इति समासः । (कृतपूर्वी कटम्)"सपूर्वाच्च" इतीनिः । सपूर्वाद्विद्यमानपूर्वादित्यर्थः । (पूर्वपुरुषः। पूर्वपूरुषः) । "पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च" इति समानाधिकरणविशेषणसमासः, (पूर्वः कायस्य पूर्वकायः) *पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे* इति एकदेशिना ऽवयविना षष्ठ्यन्तेन पूर्वादीनि सामर्थ्यादवयववचनानि समस्यन्त इति तत्पुरुषः । एकाधिकरण इत्युक्तत्वादवयविन्येकद्रव्ये सत्ययं समासः । तेन पूर्वः छात्राणामित्यत्र समासो न भवति । (पूर्वापरम् । पूर्वापरे, पूर्वापरौ) "विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्" इति द्वन्द्वस्य विभाषयैकवद्भावः । "नपुंसकम्" इति विहितैकवद्भावो नपुंसकलिङ्गः । (पूर्वंपूर्वं पुष्यति)। पूर्वतरं पुष्यतीत्यर्थः । [पूर्वपरयोरर्थातिशयविवक्षायां द्वे भवतः] इति द्वित्वम् । (पर्वति । पपर्व । पर्विता । पिपर्विषति । पापर्व्यते । पापर्ति) लङ्तिप्सिपोः (अपापः) । क्विपि । "राल्लोपः", (पूः, परौ परः, पर्वतः) "भृमृदृशियजिपर्वि०" इत्यादिनातच्, पर्वते भवो मनुष्यः (पर्वतीयः) "पर्वताच्च" इति शषिकः छः । भवादावमनुष्ये "विभाषा ऽमनुष्ये" इत्यणि (पार्वतम्) इत्यपि भवति। तस्य जन्यं रघोर्घोरं पार्वतीयैर्गणैरभूदिति प्रयोगः "तस्येदम्" इत्यणि द्रष्टव्यः । पर्वतोभिजनोस्याः (पार्वती)। *सिन्धुतक्षशिलादिभ्योऽणञौ* इति प्रथमान्तादभिजनोपाधिकादस्येत्यर्थे तक्षशिलादित्वादञि ङीप्, यत्र पूर्वैरुषितः सोभिजनः । एवं (पर्वतितः) इत्यादि । पूर्व निकेतनइति चुरादौ । अत्र देवः । पूर्व्यतीति तु यक् । स्वप्न एतत्कण्ड्वादिषु दर्शनादित्याह। गणपाठे पुनः पूर्वशब्दो न दृश्यते, यस्त्वर्थनिर्देशसहिते गणे पठ्यते लेट् लोट् धौत्ये पूर्वभावे स्वप्ने चेति सोनयोरर्थनिर्देशः । अत एव शाकटायनायां वृत्तावर्थनिर्देशमन्तरेण कण्ड्वादीनां पाठे पूर्वशब्दो न पठ्यते । स्पष्टं चैतत्पुरुषकारे ॥ ५७० ॥

चर्व अदने (चर्वतीत्यादि । चर्वयति देवदत्तं) "निगरणचलने०" इति नित्यं परस्मैपदम् । "गतिबुद्धी०" इति प्रयोज्यस्य कर्मत्वम् ॥ ५७१ ॥

भर्व हिंसायाम् ॥ भर्वतीत्यादि । अयमीदित्स्वपि क्वचित्पठ्यते ॥ ५७२ ॥

कर्व खर्व गर्व दर्पे ॥ (कर्वति । खर्वति । गर्वतीत्यादि ।) कर्वतीतीदित्स्वपि पठ्यते॥५७५॥

अर्व शर्व षर्व हिंसायाम् । (अर्वति । आनर्व । अर्विता । अर्विविषति । शर्वः) शृणोतेरौणादिके वप्रत्ययेपि । शर्वस्य स्त्री (शर्वाणी)। "इन्द्रवरुण०"इत्यादिना ङीषानुकौ । (सिसर्विषति)इत्यत्र "स्तौतिण्योरेव०"इत्यषत्वम् । ण्यन्तात्सनि (सिषर्विषतीति । सर्वः) सर्वत्रैवप्रत्ययेपि सर्वनामकार्यम् । सर्वस्मिन्काले (सर्वदा) । "सर्वैकान्यकिंयत्तदः काले दा" इति काले

वर्त्तमानात्स्वार्थे दाप्रत्ययः, "सर्वस्य सोन्यतरस्यां दि" इति पक्षे सभावः। सर्वस्मैहितं (सार्वम्। सर्वीयम्)। सर्वपुरुषाभ्यां णढञौ" इत्यत्र [सर्वाण्णस्य वा वचनम्] इति उक्त्वा-चतुर्थ्यन्ताद्धितमित्यर्थे छाणौ। (सवदेवः)। "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन" इति कर्मधारयः। सर्वेषां शुक्लतरः (सर्वशुक्लः),[गुणात्तरेण समासस्तरलोपश्च] इति तरबन्तस्य तरबन्तेन समासस्तरलोपश्च ॥ ५७८ ॥

इवि व्याप्तौ ॥ (इन्वति) इदित्त्वान्नुम्। नुम्विधावुपदेशिवद्वचनादिजादिगुरुमत्त्वात् इन्वाञ्चकार इन्विता। इन्विष्यति। इन्वतु। ऐन्वत्। इन्व्यात्। ऐन्वीत्। इन्विविषति। इन्वयति। ऐन्विवत् इन्वन्तीति इन्वकाः) तारकाविशेषाः। संज्ञायां कुन्. क्षिपकादित्वात् "प्रत्ययस्थात्०" इतीत्वाभावः ॥ ५७९ ॥

पिवि मिवि णिवि सेवने ॥ अयं पाठो मैत्रेयस्य च, अन्ये तृतीयं मूर्धन्योष्ठ्यादिं पठन्ति। सेचन इति तरङ्गिण्याम् (पिन्वति। पिपिन्व। पिन्विता। पिपिन्विषति। पेपिन्व्यते। पिन्वयति। अपिपिन्वत् एवं मिन्वतीत्यादि) ॥ ५८२ ॥

हिवि दिवि धिवि जिवि प्रीणनार्थाः ॥ अत्र के चिदाद्यमिकारादिं पठित्वा पुनः पाठोर्थ-भेदादिति, धातूनामनेकार्थत्वे तु न प्रयोजनमस्ति। तस्मात् मैत्रेयोक्त एव हिवीति पाठो ज्यायान्। (हिन्वतीत्यादि। जिहिन्व। हिन्वितेत्यादि पिन्वतीवत्। एवं दिन्वतीत्यादि) धिनोतेः *धिन्विकृण्व्योर च* इति शब्विषये उप्रत्ययः, अकारश्चान्तादेशः। तस्यातो लोपः, तस्य स्थानिवत्त्वात् उप्रत्ययमपेक्ष्य लघूपधगुणो न भवति, तस्य पित्सु गुणः (धिनोति। धिनुतः। धिन्वन्ति) अन्तादेशे यणादेशः (धिनोषि। धिनुवः। धिन्वः) *लोपश्चास्यान्यतरस्यां म्वोः* । असंयोगपूर्वो य उकारस्तदन्तस्य वकारमकारादौ प्रत्यये वा लोप इति पक्षे उलोपः। पिति तु परत्वाद्गुणे उकारस्याभावः (धिनोतु। धिनु) *उतश्च प्रत्ययादसंयोगपूर्वात्*। योयमुकारो ऽसंयोगपूर्वः तदन्तात्प्रत्ययात् परस्य हेर्लुगिति लुक्। (धिनवानि) नित्यत्वादुकारलोपात् पूर्वमाट्। (अधिनोत्। अधिनुताम्। अधिनोः। अधिनवम्। अधिन्व। अधिनुव। धिनुयात्) अन्यत्र लकारे पूर्ववत्। (धिन्वयति इत्यादि। जिन्वतीत्यादि देवने गतम् ॥ ५८६ ॥

रिवि रवि धवि गत्यर्थाः ॥ (रिण्वति। धन्वतीत्यादि। धान्वा) "कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः" इति कनिन्। उणादिवृत्तौ धन्विः सौत्रो धातुरुच्यते। नान्तत्वादसंबुद्धौ सर्वनामस्थाने दीर्घः। भसंज्ञायां "न संयोगाद्वमन्तात्" इति अल्लोपनिषेधात् (धन्वन) इति। स्त्रियाम् "अनो बहुव्रीहेः" इति ङीपो निषेधात् सुधन्वा सुधन्वानौ इत्यादि। यदा "डाबुभाभ्याम्"इति डाप् तदा सुधन्वा सुधन्वे इत्यादि। अत्रान्यतरस्यां ग्रहणात् यत् डापोभ्यनुज्ञानमुक्तं तदुपधालोपिन एवेति जेमतावुक्तम् ॥ ५८६ ॥

कृवि हिंसाकरणयोश्च ॥ चकाराद्गतौ। (कृणोति) "धिन्विकृण्व्योर, च" इति शब्विषये उकारप्रत्ययोकारश्चान्तादेशः। अल्लोपादिसर्वं धिन्विवत्। अयं स्वादौ च ॥ ५९० ॥

मव बन्धने ॥ (मवति। ममाव। मेवतुः। मविता। अमवोत्। अमावीत्) "अतो हलादेः" इति वा वृद्धिः (मिमविषति। मामव्यते। मामवीति। मामोति। मामूतः। मामवति. मामोषि। मामोमि। मामावः। मामूमः) "ज्वरत्वरस्रिव्यविमवामुपधायाश्च" ज्वरादीनामुपधावकारयोः क्वौ झलादावनुनासिकादौ च प्रत्यये परे ऊडित्यूडादेशे पिति गुणः। मामवतीत्यत्र परत्वात् नित्यत्वात् अड्भावे ऽझलादित्वं पर्यवसन्नमिति ऊण्न भवति। मामावेत्यत्र वलि लोपे "अतो दीर्घो यञि" इति दीर्घः। "ज्वरत्वर०" इत्यत्र क्व चित् वृत्तिकारैः क्वौ झलादौ क्ङितीति न पठ्यते तत्र क्ङिद्ग्रहणं संपातायातम्। अवतेस्तुन्योरिति दर्शनात्, तथा अनुनासिकादिग्रहणं चावश्यमत्रानुवर्त्यम्। अवतेर्मनिन्प्रत्यये तस्य च टिलोपे ओमिति दर्शनात्। तथा च "न धातुलोप०" इत्यत्र कैयटे आस्रेमाणमिति उपादाय छान्द-

सत्वाद्वकारस्य ऊण् न भवतीत्युक्तम् (मामोतु । मामौतात् । मामौहि । मामवानि) नित्यत्वादाटि अझलादित्वं पर्यवसन्नमित्यूडभावः । लङि तिप्सिपोरूठि (अमामोत् । अमामोः) मिपि नित्यत्वादम्भावे (अवामवम् मावयति । अमीमवत्) वकारान्तानामूठ्भाविनां यङ्लुङ् नेति यदुक्तं तत् "च्छ्वोः०"इति ऊठ्विषयं द्रष्टव्यम् । क्विपि (मूः, मुवौ) ॥ ९९१ ॥

अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु (अवति । आव । आवतु । अविता । मा भवानवीत् । अविविषति । आवयति । मा भवानविवत्) क्विपि "ज्वरत्वर०"इत्यादिनोठ् । (ऊतिः) । "ऊतियूति०" इत्यादिना क्तिनि निपात्यते । स्त्रियां क्तिनि सिद्धे निपातनमुदात्तार्थम् । (अविषः) । "अविमह्योष्टिषच्" इति टिषचि टित्वात् स्त्रियाम् (अविषी । ऊनः) । "इणुसिञ्जिदीङुष्यविभ्यो नक्" इदि नकि कित्वादगुणत्वम् । (ओम्) । "अवतेष्टिलोपश्च" इति मन् तस्य च टिलोपः उठ् गुणः, (ओतुः) । "सितन०" इत्यादिना तुनि ऊठि गुणः, (कृष्णोतुः) । [ओत्वोष्ठयोः समासे वा] इति वा पररूपम् । अन्यदा "वृद्धिरेचि" इति वृद्धिः । (अविः) । इन्नितीन् । अविरेव(अविकः) "अवेः कः" इति स्वार्थे कप्रत्ययः । (अवनिः) । "अर्त्तिसृधृधम्यम्यश्यवितृभ्यो ऽनिः" इत्यनिः, (अवनी) । कृदिकारत्वात् ङीष् । (अवीः) । "अवितृस्तृतन्त्रिभ्यईः" इति ईप्रत्ययः ॥ अव्यादय उदात्तेतो जयतिवर्जम् ॥ ९९२ ॥

धावु गतिशुध्योः ॥ उदात्तः स्वरितेत् । "स्वरितञितः कर्त्रभिप्राये क्रियाफले"इति क्रियाफलस्य प्रधानस्य कर्तृगामित्वविवक्षायां तङ् (धावति । दधाव । दधावतुः । धावितेत्यादि । तङ्पक्षे धावते) इत्यादि । यदा क्रियाफलस्य कर्तृगामित्वमुपपदेन प्रतीयते तदा "विभाषोपपदेन प्रतीयमाने"इति परस्मैपदं भवति (स्वार्थं धावतीति । दिधाविषति ।, दिधाविषते)"पूर्ववत्सनः" इति क्रियाफलस्य कर्तृगामित्वे तङ् (दाधाव्यते । धावयति । अदीधवत् । धावित्वा । धौत्वा) "उदितो वा" इतीड्विकल्पः । इडभावे "च्छ्वोः शूड्०" इति ऊठि "एत्येधत्यूठ्सु" इति वृद्धिः, निष्ठायां "यस्य विभाषा" इति अनिट्त्वात् (धौतः धौतवान्) । अत्र मैत्रेयः, कथं धावितो धावितवानिति उपक्रम्य कृतिचृतिनृतीनामीदित्वं "यस्य विभाषा" इत्यस्यानित्यत्वे ज्ञापकमाह, नित्यत्वे ह्येतेषां "सेसिचि कृतचृतछृततृदनृतः" इति सकारादाविटो विकल्पनात् निष्ठायामनिट्त्वस्य सिद्धत्वात्किं तदर्थेनेदित्त्वेन ॥ ९९३ ॥

अथ ऊष्मान्ता आत्मनेपदिनः ॥

धुक्ष धिक्ष संदीपनक्लेशनजीवनेषु (धुक्षते । दुधुक्षे । धुक्षिष्यते । धुक्षताम् । अधुक्षत । धुक्षेत । धुक्षिषीष्ट । अधुक्षिष्ट । दुधुक्षिषते । दोधुक्षीति । दोधुष्टि) अनिटि "स्कोः०" इति कलोपः । तस्यासिद्धत्वात् लघूपधगुणः (दोधुक्षि) अनिट्त्वे "स्को०" इति कलोपे "षढोः कः सति" इति कत्वे सिपः षत्वम् (दोधुष्टु । । दोधुढ्ढि । अत्र सेहिः, तस्य धित्वे "झलां जश् झशि" इति डकारः । (दोधुक्षाणि) । लङि तिप्सिपोर्हल्ङ्यादिलोपे पदान्तसंयोगत्वात् कलोपे "झलां जशोन्ते" इति जश्त्वस्य "वावसान" इति चर्त्वे (अदोधोट् (धुक्षयति । अदुधुक्षत् । धुक्षः एवं धिक्षतइत्यादि) ॥ ९९५ ॥

वृक्ष वरणे ॥ (वृक्षते । ववृक्षे) द्विर्वचने उरदत्वे च हलादिशेषः । (वृक्षितेत्यादि । विवृक्षिषते । वरीवृक्ष्यते) । "रीगृत्वतः" इति रीगागमः । (वर्वृष्टि । वरिवृष्टि । इत्यादि । वृक्षयति । अववृक्षत् । वृक्षः । वृक्षाः) ॥ ९९६ ॥

शिक्ष विद्योपादाने ॥ (शिक्षते । शिशिक्षे) इत्यादि धुक्षिवत् । अत्र तरङ्गिणीकारादयः शिक्षेर्जिज्ञासायाम् इति वचनं नियमार्थमिति व्याचक्षाणा जिज्ञासाया अन्यत्र परस्मैपदमाहुः । तदयुक्तम् । शकेः सन्नतस्य विध्यर्थसंभवात्, न च विधिसंभवे नियमो युज्यते, एवमेव समर्थितः न्यासकैयटपदमञ्जर्यादिषु ॥ ९९७ ॥

भिक्ष भिक्षायामलाभे लाभे च ॥ (भिक्षते) इत्यादि पूर्ववत् । अयं द्विकर्मकः, तत्राप्रधाने

दुहादीनामिति वचनात् लकृत्यखलर्था अप्रधाने भवन्ति (पौरवो गां भिक्ष्यते । भिक्षितव्यः भिक्षितः सुभिक्ष इत्यादि)। षष्ठी तु द्वितीयावदुभयत्र भवति । (भिक्षिता गौः पौरवस्येति)। अप्रधाने तूभयथा गोणिकापुत्र इति भाष्य उक्तत्वात् पौरवमिति द्वितीयापि भवति । (भिक्षितव्यो राजा देवदत्तेन) इत्यत्रानभिहिते कर्मणि कर्त्तरि च "कर्तृकर्म्मणोः" इति षष्ठ्या उभयप्राप्तौ कृति प्रतिषेध इत्युक्तत्वात् न भवति सर्वमेतन्नाथतावुपपादितं तत एवावगन्तव्यम् । (भिक्षुः)। "सनाशंसभिक्षउः" इति ताच्छीलिक उप्रत्ययः । (भिक्षाकः)। "जल्पभिक्ष०" इति षाकन् । षित्त्वात् स्त्रियां (भिक्षाकी) ॥ ५९८ ॥

क्लेश अव्यक्तायां वाचि ॥ बाधन इति दुर्गः। अत्र स्वामी क्लेश व्यक्तायां वाचि चेति पठन्निमावपि पूर्वधातोरर्थावेवाह । चन्द्रदुर्गमैत्रेयसंमताकारदेवादयस्तु धात्वन्तरमेवाहुः (क्लेशते । चिक्लेशे । क्लेशितेत्यादि । चिक्लेशिषते । क्लेशयते) ॥ ५९९ ॥

दक्ष वृद्धौ शीघ्रार्थे च ॥ (दक्षते । ददक्षे । दक्षितेत्यादि । दक्षिणः) "द्रुदक्षिभ्यामिनन्" इतीनन्, पूर्वशब्दवत् सर्वनामत्वं तत्कार्यं च स्त्रियां तु टापि (दक्षिणा) । दक्षिणामर्हतीत्यादि (दक्षिणीयः । दक्षिण्यः)। "कडंकर दक्षिणाच्छ च" इति द्वितीतान्तादर्हतीत्यर्थे छयतौ । (ग्रामस्य दक्षिणतो वसति। दक्षिणत आगतः। दक्षिणतो रमणीयम् ।) *दक्षिणोत्तराभ्यामतसुच्* इति सप्तमीपञ्चमीप्रथमान्तात् स्वार्थे ऽतसुच्, "षष्ठ्यतसर्थप्रत्ययेन" इति तद्युक्तात्षष्ठी अतसर्थप्रत्यय इति सप्तम्याद्यन्तात्स्वार्थे यो विहितः स उच्यते । (दक्षिणा ग्रामस्य) । "उत्तराधरदक्षिणादातिः" इत्ययमातिरतसुज्विषये पूर्ववत् ग्रामतः षष्ठी । (दक्षिणेन ग्रामम् । ग्रामस्येति वा, "एनबन्यतरस्यामदूरे पञ्चम्या इति वचनादयं सप्तमीप्रथमान्तेभ्य उत्तराद्यर्थोऽवधिसापेक्ष इति अवधिमतस्तस्य सामर्थ्यादवध्यपेक्षमदूरत्वम् । अन्यतरस्यांग्रहणं यथाप्राप्तातसुजाद्यभ्यनुज्ञानार्थमितरथा ह्ययं दूरे बाधकः स्यात्, "एनपा द्वितीया" इति तद्युक्तात् द्वितीया षष्ठ्यपीष्यते इति षष्ठी पक्षे (दक्षिणा ग्रामात्), "दक्षिणादाच्" इत्याच् एनपो विषये, "अन्यारादितरर्त्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते" इत्याजन्तयुक्तात्पञ्चमी । अन्यइत्यर्थग्रहणम्, आरादितरर्त्ते इतिस्वरूपग्रहणम् । दिक्शब्दा दिशि दृष्टाः पूर्वादयः । अञ्चूत्तरपदाः प्रागादयः । आजाही प्रत्ययौ दिक्शब्दत्वादेव सिद्धे ऽञ्चूत्तरपदग्रहणमस्तात्यन्तार्थम् । तत्र हि ' षष्ठ्यतसर्थप्रत्ययेन" इति षष्ठी विधीयते, एवमाजाह्योरपि । (दक्षिणाहि ग्रामात्) । "आहि च दूरे" इत्याहिः पूर्ववदवध्यपेक्षदूरत्वे चकारादाजपि द्रष्टव्यः । सर्व एते "तद्धितश्चासर्वविभक्तिः" इति अव्ययसंज्ञकाः । दक्षिणा भवः । (दाक्षिणात्यः) । "दक्षिणापश्चात्पुरसस्त्यक्" इति शैषिकस्त्यक् । दक्षिणाशब्दः पश्चात्पुरोभ्यां साहचर्यादिहाजन्तोऽव्ययं गृह्यते । अत एव सर्वनामत्वाभावात् [सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः] इति पुंवद्भाव वो न भवति ॥ ६०० ॥

दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु ॥ (दीक्षतेइत्यादि) । "अनुदात्तेतश्च०" इति युच् "सूददीपदीक्षश्च" इति निषेधाद्दीक्षितेति सामान्यस्तु न भवति ॥ ६०१ ॥

ईक्ष दर्शने (ईक्षते। ईक्षां चक्रे । ईक्षिता । ईक्षिष्यते । ईक्षताम् । ऐक्षत । ईक्षेत । ईक्षिषीष्ट । ऐक्षिष्ट । ईचिक्षिषते । ईक्षयति । ऐचिक्षत् देवदत्तायेक्षते नैमित्तिकः) पृष्टः सन् शुभाशुभं पर्यालोचयतीत्यर्थः। "राधीक्ष्योर्यस्य विप्रश्नः" । यद्विषयं पृच्छयत इत्यर्थः । स्वसंबन्धिनः शुभाशुभस्य विप्रश्नयोगित्वात्कारकमपि तथोच्यते । तदिह धातुरर्थात् शुभाशुभपर्यालोचनवृत्तिः । अन्यत्र देवदत्तमिति द्वितीयव । (सुखं प्रतीक्षते सुखप्रतीक्षः । सुखप्रतिक्षा ।) [ईक्षिक्षमिभ्यां चेति वक्तव्यम्] इति कर्मण्युपपदेऽणप्रत्ययः ॥ ६०२ ॥

ईष गतिहिंसादर्शनेषु ॥ (ईषते । ईषां चक्रे ईषतेत्यादि) "तीष सहलुभरुषरिषः" इत्यत्र ह्रस्वादेर्ग्रहणात् ईषितेत्यादौ नेड्विकल्पः (ईषा) । मनस (ईषा मनीषा) पृषोदरादिः । (समीष्ट आचार्यः) । ईष्व इति वनन्तस्य निपातनमस्येति मैत्रेयः। उणादिवृत्तौ त्विषु इच्छायामिति-

तौदादिकस्य निपातनमुच्यते, इषु इति ह्रस्वादिः। तन्मतेयमुञ्छार्थः । परस्मैपदिषु इषु गताविति दिवादौ, अयमिच्छार्थः तुदादौ, आभिक्ष्ण्यार्थः क्र्यादौ ॥ ६०३ ॥

भाष व्यक्तायां वाचि । (भाषते । बभाषे । भाषिता । भाषिष्यते । बाभाष्यते । बभाष्टि । भाषयति । अबभाषत् । अबीभषत्) "भ्राजभास" इत्युपधाह्रस्वविकल्पः (भाषकः) । "निन्दहिंस०" इत्यादिना वुञ् ताच्छीलिकः॥ ६०४ ॥

वर्ष स्नेहने ॥ दन्त्योष्ठ्यादिः (वर्षते । ववर्षे । वर्षिता । विवर्षिषते । वावर्ष्यते । वावर्ष्टि) लङि तिप्सिपोः (अवावर्ट्) । "रात्सस्य" इति नियमान्न संयोगान्तलोपः। वृषु सेचन इत्यग्रे परस्मैपदी । शक्त्यर्थश्चुरादौ ॥ ६०५ ॥

गेष्ट अन्विच्छायाम् ॥ ग्लेष्ट इति मैत्रेयः । अन्विच्छान्वेषणम् । (गेषते । जिगेषे । गेषिता । जिगेषिषते । जेगेष्टि । जेगेष्टः । गेषयति । अजिगेषत्) ऋदित्त्वान्नोपधाह्रस्वः ।६०६

एष्ट प्रयत्ने ॥ (एषतइत्यादि) ॥ ६०७ ॥

जेष्ट णेष्ट एष्ट प्रेष्ट गतौ ॥ (जेषते नेषते । प्रणेषते । एषते । एषां चक्रे एषिता । एषिष्यते । एषयति । भवानेषिषत । प्रेषते) ॥ ६११ ॥

रेष्ट हेष्ट अव्यक्ते शब्दे ॥ (रेषते) । अयं स्वभावाद्वृकविषयः (हेषते । अयमश्वविषयः हेष्ट इति सरेफश्चात्र द्रष्टव्यः । यदाह केशवस्वामी । कौक्षे कर्दति पर्दते गुदरवे रेषेति वार्के-हसे बुक्कति श्वरवे भषेति हयजे ह्रेषेति हेषेति चेति। तथा हेषा ह्रेषा च निःस्वने इत्यमरः॥

कासृ शब्दकुत्सायाम् (कासते । कासां चक्रे) । "कास्प्रत्ययात्०"इत्याम् (कासिता । कासिष्यते । कासताम् । अकासत । कासेत । कासिषीष्ट । अकासिष्ट । चिकासिषते । चाकास्यते) लोटि हेर्धिभावे "धि च" इति सलोपे चकाधि । न च "धि च इत्यत्र भाष्ये सिजपेक्ष्यते । लङि तिपि हल्ङ्यादिलोपे प्रत्ययलक्षणेन तिप्स्वरत्वात् *तिप्यनस्तेः* इति अस्तिवर्जितस्य सान्तस्य पदस्य तिपि परे दकार इति दकारे तस्य चर्त्वे(अचकात)। सिपि तु *सिपि धातोरुर्वा* इति सान्तस्य अस्तिवर्जितस्य धातोः पदस्य पक्षे रुत्वे (अचकाः) इत्यपि भवति । (कासयति । अचकासत) ऋदित्त्वान्नोपधाह्रस्वः (कासः) "हलश्च" इति संज्ञायां घञ् । (कासारः) औणादिको बहुलाकादारः । (कासूः शक्तिः। कासूतरी) । "कासूगोणीभ्यां ष्टरच्" इति अल्पत्वे द्योत्ये ष्टरच् । षित्त्वात् ङीष् । अस्मादेव निर्देशादूकारप्रत्ययः।कसतीति ज्वरादौ गत्यर्थः । कस इति गतिशासनयोरादिकस्य तत्रधान्ये निदित्यादिना ऊः (कसूः) इत्याहुः । अन्ये तु तालव्यान्त पठन्ति (कशूरिति) ॥ ६१४ ॥

भासृ दीप्तौ (भाषते । इत्यादि कासिवत् । भासयति । अबीभसत् । अबभासत्) "भ्राजभास" इत्युपधाह्रस्वविकल्पः, एवं चास्य ऋदित्त्वं तङ्मात्रफलम् । अनुबन्धान्तराकरणं तु प्रकरणानुरोधात् । (भास्वरः) । "स्थेशभास०"इत्यादिना तच्छीलादौ वरच् । (भाः भासौ । भासः) । "भ्राजभास०" इति ताच्छीलिकः कर्त्तरि क्विप् ॥ ६१५ ॥

णासृ रासृ शब्दे॥ (नासते । प्रणासते । रासतइत्यादि कासिवत नासा) । अकारः। (नासिका) संज्ञायां कनि "केणः" इति इति ह्रस्वः । "प्रत्ययस्थात्०" इतीत्त्वम् । नासायां भवं तस्मै हितं (नास्यम्)"शरीरवयवाद्यत्" इति यत् । नासिकाशब्दात्तु यति "नस् नासिकायायत्तत्क्षुद्रेषु" इति नस्यभावे (नस्यमिति)।एवं नस्तो नः क्षुद्र इत्यादि । [अद्यादिभ्य उपसंख्यानम्] इति सार्वविभक्तिकस्तसिः । *अपादाने चाहीयरुहोः* इति वा अपादाने या पञ्चमी तदन्तात्स्वार्थे तसिः । हीयरुहोः प्रयोगे नेति, नः क्षुद्रः इत्यत्र नासिकया क्षुद्र इति "पूर्वसदृश०" इत्यादिना समासस्तृतीयायाः । तत्र ह्यून इत्यर्थग्रहणम् । (नासिक्यो वर्णः । नासिक्यं नगरम्)इत्यत्र यति [वर्णनगरयोर्न] इति नस्भावप्रतिषेधः, वाध्रीव। नासा यस्य (वाध्रीणसः) अजविशेषः। *अञ् नासिकायाः संज्ञायां नसं चास्थूलात्*इति नासिकान्ताद्बहुव्रीहेः संज्ञायामच् समासान्तः नासिकायाश्च नसादेशः अस्थूलादिति निषेधात् स्थूलनासि

क इत्यत्राङ्नस्भावौ न भवतः। खुरणाः, [खुरखराभ्यां नस् वक्तव्यः] इति नस्भावः। आदेशान्तरकरणं प्रत्ययनिवृत्त्यर्थमिति कैयटपदमञ्जर्यादौ। अत्र वृत्तावजपीष्यत इति, तेन (खुरणसः, खरणस) इत्यपि भवति। प्रगता नासिका अस्य (प्रणसः)। *उपसर्गाच्च* उपसर्गपूर्वनासिकान्ताद्बहुव्रीहेरजित्यज् नासिकाश्च नस्भावः *उपसर्गाद्बहुलम्* इति। उपसर्गस्थान्निमित्तात्परस्य नसो नकारस्य णत्वम्। उभयत्रोपसर्गग्रहणं प्राद्युपलक्षणार्थम्। विगता नासिका अस्य (विग्रः)। [वेर्ग्रो वक्तव्यः] इति ग्रादेशो नासिकायाः। यद्यहं नाथ नायास्यं विनसा गतबान्धवा इति भट्टिप्रयोगे विशेषविहितेन ग्रादेशेन भाव्यमिति महान्तो न सहन्ते। केचित्तु वार्त्तिकं वेः षो वक्तव्य इति पठन्तो विष इति उदाहरन्ति। (तुङ्गनासिका)। *नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च* इति। नासिकाद्यन्ताद्बहुव्रीहेर्वा ङीष्। (रासः) क्रीडा विशेषः। (रासभः)। "रासिवल्लिभ्यां च" इति अभच्। (रास्ना)। "रास्नासास्नास्थूणावीणा" इति नप्रत्यये निपातितः ॥ ६१७ ॥

णस कौटिल्ये ॥ (नसते। प्रणसते। नेसे। नसितेत्यादि नासयति। अनीनसत्) ॥६१८॥

भ्यस भये (भ्यसते। बभ्यसे। भ्यसिता। भ्यसिष्यते। बाभ्यस्यते। बाभ्यस्ति। बाभ्यासति। अबिभ्यसत् बाभ्यधि) इत्यत्र हेर्धिभावे "धि च" इति सलोपस्तस्यासिद्धत्वात् "अतो हेः" इति लुक् न भवति। एवं नसेरपि (नानधि) इति भवति ॥ ६१९ ॥

आङः शसि इच्छायाम् ॥ आङः शसीति प्रयोगादयमाङ्पूर्व एव प्रयोक्तव्यः। तथा च काश्यपः। अयमाङः पर एव प्रयोक्तव्य इति, संमतायां न च केवलो नाप्युपसर्गान्तर पूर्व इति। (आशंसते। आशशंसे। आशंसिता। आशिशंसिषते। आशाशंस्यते) इदित्त्वान्नुम् नलोपाभावश्च। (आशाशंस्ति, आशाशन्धि इत्यत्र "धि च" इति सलोपेऽनुस्वारपरवर्णौ लङि तिप्सिपोर्हल्ङ्यादिलोपे संयोगान्तलोपे च(आशाशन्। आशंसयति। आशशंसत्। आशंसुः)। "सनाशंसभिक्ष उः" इत्युप्रत्ययः। (आशंसितः। आशंस्यम्। आशस्यः)। क्त्वो ल्यप्। दौर्गस्तु नोपधमनिदितं पठति। स्वामी च। तेषां नलोपाभावे विशेषः शंस स्तुतावित्यग्रे परस्मैपदिषु। आङः शासु इच्छायाम्। शासु अनुशिष्टाविति द्वयमदादौ ॥ ६२० ॥

ग्रसु ग्लसु अदने ॥ (ग्रसते। जग्रसे। ग्रसितेत्यादि पूर्ववत्। ग्रासयति पिण्डं देवदत्तः।) निगरणार्थत्वान्नित्यं परस्मैपदम्। प्रयोज्यस्य कर्मत्वं च। (ग्रसित्वा ग्रस्त्वा)उदित्त्वादिड्विकल्पः (ग्रस्तः)"यस्य विभाषा"इति अनिट्त्वम्। ग्रस्यत इति(ग्रासः)कवलः। पिण्डं गसते-(पिण्डग्रः),"अत्वसन्त०"इति दीर्घोऽधातोरिति प्रतिषेधान्न भवति। ग्रसिष्णुरिति हेलाराजीयेलिङ्गनिर्देशे प्रयुज्यते "भुवश्च" इत्यत्र चकारास्यानुक्तसमुच्चयार्थत्वात् भ्राजिवन्निर्वाहः अत एव "भुवश्च" इत्यत्र वृत्तौ चकाराद् भ्राजेश्च प्रयुज्य भाषायामिति चशब्दः क्रियते। एवं ग्लसतीत्यादि ॥ ६२२ ॥

ईह चेष्टायाम् ॥ (ईहते। ईहां चक्रे। ईहिता। ईहिष्यते। ईहताम्। ऐहत। ईहेत। ईहिषीष्ट। ऐहिष्ट। ईजिहिषत। ईहयतित। मा भवानीजिहत्। ईहा। ऐही। पर्यैहि। आङ्पूर्वाच्चेनन्तात् शार्ङ्गरवादिपाठान्ङीन् ॥ ६२३ ॥

बहि महि वृद्धौ ॥ (बंहते। बबंहे। बंहिता। बंहिषीष्ट। बिबंहिषते। बाबंह्यते)। इदित्त्वान्नुम्। नलोपाभावः। (बाबण्ढि)। झलि पदान्ते च "हो ढः" इति ढकारस्य ढकारः। "झषस्तथोर्धोऽधः" इति तकारस्य धकारे "ष्टुना ष्टुः" इति ष्टुत्वे "ढो ढे लोपः" इति पूर्वस्य लोपः। अत्र ष्टुत्वे आश्रयात् सिद्धे नकारस्यानुस्वारपरसवर्णौ (बाबण्ढः बाबंहति। बाभङ्क्षि) ढत्वे "एकाचो बशो भष् झषन्तस्य स्ध्वोः" इति बकारस्य भष्भावेन भकारः। "षढोः कस्सि" इति कत्वम्। (बाबंह्मि। बाबंह्वः)। लङि तिप्सिपोर्ढत्वात् पूर्वं हल्ङ्यादिलोप इति झषन्तत्वाभावान्न भष्भावः। (बंहयति। अबबंहत्। एवं मंहतइत्यादि)। अयं भावार्थश्चुरादाविति स्वामी। मह पूजायामिति इहैवाग्रे परस्मैपदिषु। (महीयत) इत्यादि

महोङितिकण्ड्वादिपाठात् ॥ ६२३ ॥

अहि गतौ ॥ (अंहते । आनंहे । अंहिता । अञ्जिहिषति) । "कुहोश्चुः" इति हकारस्य झकारे "अभ्यासे चर्च"इति जश्त्वेन जकारे नकारस्यानुस्वारपरसवर्णौ । (अंहयति । अञ्जिहत् । अंहः) । असुन् । चुरादौ भाषार्थः ॥ ६२६ ॥

गर्ह गल्ह कुत्सायाम् ॥ (गर्हते । जगर्हे । गर्हिता । जिगर्हिषते । जागर्ह्यते । जागर्ढि) इत्यादि बंहितवत् । लङि तिप्सिपोर्हल्ङ्यादिलोपे "रात्सस्य" इति नियमात् संयोगान्तलोपाभावाद्धकारस्य ढकारे झषन्तत्वात् पदान्तविषयत्वाच्च भष्भावे (अजर्घर्ट्) । अयमाधृषीयोऽपि । गल्हतइत्यादि पूर्ववत् । यङ्लुकि तिप्सिपोर्लोपे संयोगान्तलोपे (अजागल्) ॥ ६२८ ॥

बर्ह बल्ह प्राधान्ये ॥ ओष्ठ्यादी । (बर्हते । बल्हते) ।इत्यादि । बर्हते सर्वेष्ववयवेषु प्रधानं भवति । (बर्हं बर्हिणः) । [फलबर्हाभ्यामिनज्वक्तव्यः] इतीनच् । (बर्ही), सत्त्वर्थीय इनिः । इमौ भाषार्थौ चुरादी । बर्हस्हिंसायामपि तत्रैव, बृहविवृद्धाविति अत्रैवाग्रे परस्मैपदिषु ॥ ६३० ॥

बर्ह बल्ह परिभाषणहिंसादानेषु ॥ दन्त्यौष्ठ्यादी । (बर्हते । बल्हते । बबल्हे । बल्हिता) इत्यादि । अत्र धनपालमैत्रेयौ परिभाषणादावोष्ठ्यादित्वं वाहतुः । छादयन्यनेनेति बर्हः, घञिति वदन् शाकटातनोऽप्यत्रैवानुकूलः । यथा वयं तथा स्वामी । यदाह बर्ह बल्ह प्राधान्ये, मुनिबर्हणमिति । एवं मुनिप्रवर्हा इतिप्राधान्ये प्रयोग उपपद्यते । प्रवल्हिकेति च भाषार्थे । तदुक्तं पुरुषकारे प्रवल्हिका प्रहेलिकेति चात्रैवानुकूलं भाषाविशेषत्वात् (प्रवल्हेति) तथा च बह्वृचब्राह्मणं "प्रवल्हिकाश्शंसति प्रवल्हिकाभिर्वै देवा असुरान् प्रवल्ह्याथैनानत्यायन्" । व्याकृतं चैतत् गोविन्दस्वामिना प्र(१)वल्ह्या अनृतभाषया इति । यत्तूक्तं शाकटायनेन आच्छाद्यतेऽनेनेति बर्हः घञिति, नैतदोष्ठ्यादित्वे साधकं सर्व्वेष्ववयवेषु प्रधानं भवतीत्येवं व्युत्पादितत्वात् । बृह उद्यमने चुरादौ ॥ ६३२ ॥

प्लिह गतौ ॥ (प्लेहते । पिप्लिहे । पिप्लिहिषते । प्लिहित्वा । प्लेहित्वा) । "रलोव्युपधा" इति कित्त्वविकल्पः (प्लीहा) "श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्सूर्द्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्" इति कनिनन्तो निपातितः । उणादिवृत्तौ तु प्लिहतशब्दपूर्वाद्धन्तेष्टिलोपे व्युत्पादितम् । यथा वयं तथा मैत्रेयः, प्लीहानावित्यादौ "इन्हन्पूष०" इति नियमो हन्शब्दस्यानर्थकत्वान्नेति भाष्यादौ स्थितम् ॥ ६३३ ॥

वेहृ जेहृ बाहृ प्रयत्ने ॥ आद्यो दन्त्यौष्ठ्यादी । अन्त्यः केवलोष्ठ्यादिः । उभावपि केवलौष्ठ्यादी इत्येके । दन्त्यौष्ठ्यादी इत्यन्ये । (वेहते । जेहते । बाहते) इत्यादि, ऋदित्त्वाण्णौ चङि ह्रस्वाभावः । (अविवेहत् इत्यादि । वेहत्) गर्भोपघातिनी गौः । (संश्रुत्पद्वेहत्) इति अतिप्रत्यये निपात्यते । (गोवेहत्) । "पोटायुवतिस्तोक०" इत्यादिना कर्मधारयः (वाहा) अजन्तत्वाट्टाप्, (बाढं), "क्षुब्ध०" इत्यादिना निष्ठायामिडभावो भृशार्थेऽन्यत्र (बाहितम्) । जेहतिर्गत्यर्थोपि, उक्तं च रेणुभिर्जेहमासं भट्टभास्करीयम् ॥ ६३६ ॥

द्राहृ निद्राक्षये ॥ (द्राहते) । निक्षेपइति के चित् । यङ्लुकि "दादेर्धातोर्घः" इति झलि पदान्ते चेति हस्य घकारे "झषस्तथोः०" इति धत्वे जश्त्वे च (दाद्राग्धि । दाद्राग्धः) इत्यादि सिपि भष्भावेन दकारस्य धकारः । "खरिच" इति धकारस्य चर्त्वे सिपः तकारस्य षत्वे (दाध्राक्षि) । लङि हल्ङ्यादिना तिप्सिपोर्लोपः, भष्भावजश्त्वचर्त्वेषु (अदाध्राक्) ॥६३७॥

काशृ दीप्तौ ॥ (काशते । चकाशे । काशिता । काशिष्यते । काशताम्) अकाशत । काशेत । कशिषीष्ट । अकाशिष्ट । अकाशिष्यत । चिकाशिषते । चाकाश्यते । चाकाष्टि) । व्रश्च्यादिना षत्वे (चाकाक्षि । चाकाश्मि । चाकाश्वः चाकाश्मः । चाकाड्ढि)इत्यत्र हेर्धिभावे व्रश्चादिना षत्वे ष्टुत्वे जश्त्वम् । लङि (अचाकाट् । काशयति । अचकाशत् काशः) । अचि

(१) प्रवल्ह्य अनृतं भाषयित्वेति युक्तः पाठः ।

घञि वा । (नीकाशः) । *इकः काशे* इति इगन्तस्योपर्गस्य काश उत्तरपदे दीर्घः (काशिः । काशी) । अक्तिन्नत्वात् वा ङीप् । काशिषु भवा (काशिका) । "काश्यादिभ्यष्ठञ्ञिठौ" इति शैषिकौ ठञ्ञिठौ । ठञि "टिड्ढ" इति ङीप् । (काशिकी । काष्ठम्) । "हनिकुषिनीरमिकाशिभ्यः क्थन्" इति क्थन् । आकारोपधप्रकरणादयमिह पठितः अयं दिवादौ च । काश्ट गतिशासनयोरित्यदादौ । अन्ये दन्त्यान्त्यमिदितं पठन्ति ।अनिदितमपरे ॥ ६३८ ॥

ऊह वितर्के ॥ वितर्कः संभावनम् (ऊहते । ऊहां चक्रे । ऊहिता । ऊहिष्यते । ऊहताम् । औहत । ऊहिषीष्ट । औहिष्ट । ऊजिहिषति । ऊहयति । औजिहत् । समूहति। समूहते) [उपसर्गादस्यत्यूहोर्वावचनम्] इति उपसृष्टादस्मात्परस्मैपदम् । (समूह्यात्) इत्यत्र "किदाशिषि" इति कित्त्वे *उपसर्गाद्ध्रस्व ऊहतेः* इति यकारादौ क्ङिति ह्रस्वः । एवं यक्यपि (समुह्यते) इति । यद्यप्युपसर्गादस्यत्यूहोरिति वार्त्तिकमकर्मकाधिकारे पठितं तथापि वृत्तिकैयटादौ सकर्मकसाधारणमुक्तम् । अनुक्तमप्यूहति पण्डितो जन इति प्रयोग आङ्पूर्वस्येति सुधाकरः । एवं च सति ओहतीति गुणः पठितव्यः । ओह्यत इत्यत्रान्तादिवद्भावेनोपसर्गात्परत्वेन "उपसर्गाद्ध्रस्व ऊहतेः" इति ह्रस्वो न भवति । [उभयतश्चाश्रये नान्तादिवद्भाव] इति वचनात् । यद्वात्राण इति वर्त्तते, स च सामर्थ्यात्पूर्वेण णकारेणेति ह्रस्वाप्रसङ्गः । एवं च (समोह्यत) इत्यादावप्यादिवृद्धौ ह्रस्वो न भवति ॥ ६३९ ॥

गाहू विलोडने (गाहते । जगाहे । जघाक्षे) "थासः से" झलि "हो ढः" इति ढत्वे भष्भावे कत्वम् । ध्वमि ढत्वभष्भावयोः ष्टुत्वे ढलोपः । क्रादिनियमस्य प्रतिषिद्धविषयत्वादिट्पक्षे (जगाहिषेत्यादि । गाढा । गाहिता । घाक्ष्ये । गाहिष्यते । गाहताम् । अगाहत । गाहेत । गाहिषीष्ट । अगाढ । अघाक्षाताम् । अघाक्षत । अगाढाः । अघाढ्वम् । अघाक्षि) झलादौ सिज्लोपे ढत्वषत्वष्टुत्वढलोपाः । प्रत्ययलक्षणेन सादिप्रत्ययपरत्वाद्भषभावो नाशङ्क्यः सिज्लोपस्य प्रत्ययलक्षणे पूर्वत्रासिद्धत्वात् । अत एवासिद्धत्वात्सिज्लोपात्पूर्वं न भष्भावः, ध्वमि तु परत्वाद्भष्भावः । इट्पक्षे (अगाहिष्टेत्यादि । जिघाक्षते । जिगाहिषते । जागाह्यते । जागाढि । गाहयति । अजीगहत । गाढ्वा । गाहित्वा । गाढा । गाहः) गाहडिति पचादौ पाठात् । टित्त्वात् स्त्रियां (गाही । गह्वरम्) । धित्वरेत्यादिक्वरचि ह्रस्वो निपात्यते । उणादिवृत्तौ तु गाधतेर्निपातनमुक्तम् । गहनं करोति गहनायते । "सत्रकक्ष०" इत्यनेन कण्वचिकीर्षायां क्यङ् । कण्वं पापं, सत्रादयश्च वृत्तौ पापवचना इति हरदत्तादिभिरुक्तमत्रैव वार्त्तिके निर्देशात् ल्युटि ह्रस्वः, गहे भवं (गहीयम्) "गहादिभ्यश्च" इति शैषिकोऽत्र छः । गह इति निर्देशादचि ह्रस्वः ॥ ६४० ॥

गृहू ग्रहणे ॥ (गर्हते । जगृहे । जगृहिषे । जघृक्षे । जगृहिध्वे । जघृढ्वे । गर्हिता । गर्ढा । गर्हिष्यते । घर्क्ष्यते । गर्हताम् । अगर्हत । गर्हिषीष्ट । घृक्षीष्ट) "लिङ्सिचावात्मनेपदेषु" इत्यनिट्पक्षे कित्त्वान् न गुणः । (अगर्हिष्ट । अघृक्षत । अगर्हिषाताम् । अगर्हिषत । अघृक्षाताम् अगर्हिष्ठाः । अघृक्षथाः । अगर्हिढ्वम् । अगर्हिध्वम् । अघृक्षध्वम् । अगर्हिषि । अघृक्षि । अगर्हिष्वहि । अघृक्षावहि) अनिट्पक्षे "शल इगुपधादनिटः क्सः" "क्सस्याचि" इत्यल्लोपः । यत्रादौ "अतो दीर्घो यञि" इति दीर्घः, ढत्वादि तु पूर्ववत् (जिगर्हिषते । जिघृक्षते) इडभावे "हलन्ताच्च" इति सनः कित्त्वम् (जरीगृह्यते) "रीगृत्वतः" इति रीक् (जर्गृहीति जर्गर्ढि । जर्गृढः) रुग्रिकोरप्युदाहार्यम् (गर्हित्वा । गृढ्वा । गृहम्) इगुपधलक्षणः कः । अत्र मैत्रेयः । "गेहे कः" इति गृह्णातेः कविधानं तस्यापि गृहमिति यथा स्यादिति । अयं क्वचित्कोषे ग्रिह इदुपधः पठ्यते तदनार्षः, यदाह देवः । ण्यन्तस्य ग्रहणे ग्रहेर्ग्रहयते तत्राऽनदन्तत्वाद्गृहेर्भ्वादेः शपि गर्हते श्नि प्रत्यये गृह्णाति अगृहीत् चेति । अत्र पुरुषकारे गृह इत्यनेनैव पूर्वस्माददन्तत्वमात्रविशेषः । गृहीत्वा विशिष्टमिति दर्शयिनां गृहपाठाशङ्का निरवकाशतां नीता । ग्लह इति स्वामिकाश्यपसम्मताकारादयः पठन्ति तदपि ग्राह्यम् ।

तथा च "अक्षेषु ग्लहः" इत्यत्र वृत्तिः । ग्लहिः प्रकृत्यन्तरमिति । ग्लहत इत्यादि पूर्ववत् । (ग्लहोऽक्षस्य) । "अक्षेषु ग्लहः" इत्यप् । अक्षादन्यत्र (ग्लाह) इति घञ् । एषां तु निपातनं ग्रहेरेतदिति तेषामनक्षे ग्रह इति प्रत्युदाहार्यम् । लत्वाभावो विशेषः ॥ ६४१ ॥

घुषि कान्तिकरणे॥ (घुंषते । जुघुंषे । घुंषिता । जुघुंषिषते । जोघुंष्यते । जोघुष्टि) । लोटि हेर्धिभावे ष्टुत्वजश्त्वानुस्वारपरसवर्णेषु (जोघुण्ढि) । लङि तिप्सिपोर्लोपे (अजोघुन्) । घिषी-तीदुपधं पेठतुश्चन्द्रकाश्यपौ । स्वामी घसेति दन्त्यान्तमदुपधं पपाठ । यथा वयं तथा देवमै-त्रेयदुर्गाः । षकारान्तोप्ययम् ॥ ६४२ ॥

घुषिरविशब्दने ॥ उदात्तधातुसाम्यादिह पठितः, घुषाद्यन्ता उदात्ता अनुदात्तेतः । घुषि-रविशब्दनार्थः । इतो ऽर्हत्यन्ता उदात्ता उदात्तेतः । विशब्दनं प्रतिज्ञानं, तच्च शब्देन स्वा-भिप्रायप्रकाशनमिति न्यासे । अस्मादन्यस्मिन्नर्थे यथाप्रयोगमयं धातुर्वर्त्तत इति पुरुषकारे । सर्वत्र क्षीरस्वामिधनपालभागवृत्तिकारा घुषिं शब्दार्थं पेठुः । चन्द्रदुर्गौ त्वर्थशब्दमपहाय शब्दइत्येवं पेठतुः । घुष शब्द इति पठन् शाकटायनोप्यत्रै वानुकूलः । तेन हि य इति स्थाने अनेति न क्रियते । यदि शब्द इत्यर्थः स्यात् तर्हि "घुषिरविशब्दने" इति इट् प्रतिषेधेति-लघु घुषिरविशब्द इत्येव वाच्यं स्यात् इति घुषिरविशब्दार्थ इति मैत्रेयादिपाठो ज्यायान् । (घोषति । जुघोष, घोषिता), लुङि "इरितो वा" इति परस्मैपदेषु च्लेरङादेशविकल्पनात् । (अघुषत् । अघुषताम् । अघोषीत् अघोषिष्टाम्) इत्याद्युभयं भवति । "लुग्वा दुह०" इत्यत्र न्यासे व्यत्यघुक्षतेति वृत्तौ प्रत्युदाहरणमुपादायानित्यमागमशासनमित्यनिट्त्वमुक्त्वा "शल इगुपधात्"इति क्स उक्तः । हरदत्तादयस्तु प्रत्युदाहरणं घुष्यतेरिति मन्वाना इड्भावाय यत्नं कृतवन्तः । घुष्यतिर्हि नित्यानिट् (जुघुषिषति । जुघोषिषति । घुषित्वा । घोषित्वा) "रलो व्युपधात्०" इति कित्त्वविकल्पः (जोघुष्यते । जोघोष्टि) लोटि हेर्धित्वे ष्टुत्वे च जश्त्वे च षकारस्य (जोघुड्ढि) लङि तिप्सिपोः (अजोघोट् । घोषयति । अजूघुषत् । घुष्टा रज्जुः) "घुषिरविशब्दने" इति निष्ठायामनिट्त्वं संपूर्वत्वे तु "रुष्यमत्वरसंघुषास्व-नाम्" इति इटो विकल्पनात् (संघुष्टा रज्जुः, संघुषिता रज्जुः,) इत्युभयं भवति । घुषिरविश-ब्दन इति चुरादौ ॥ ६४३ ॥

अक्षू व्याप्तौ (अक्षति । आनक्ष । आनष्ठ । आनक्षिथ । आनक्ष्व । आनक्षिव) उदि-त्त्वादिड्विकल्पः । थल्यनिट्पक्षे "स्कोः०" इति कलोपे ष्टुत्वे । (अक्षिता । अष्टा । अक्षिष्यति । अक्ष्यति) "षढोः कः सि" इति कत्वे आद्यस्य "स्कोः०" इति लोपः (अक्षतु । आक्षत् । अक्षेत् । अक्ष्यात् । मा भवानक्षीत् । मा भवानक्षिष्टाम्) "नेटि" इति न वृद्धिः । अनिट्पक्षे "वदव्रजहलन्तस्य०" इति वृद्धौ (मा भवानाक्षीत् । मा भवानाक्षिष्टामित्यादि) । ननु येन नाव्यवधानमिति न्यायेनैकेन वर्णेन व्यवधानमाश्रयितुं युक्तं व त्वनेकेनेति वलोप-स्यासिद्धत्वादनेकेन व्यवधानात् कथं वृद्धिः । नैतत् । तत्र हल्यग्रहणं हल्समुदायप्रतिपत्त्य-र्थमित्युक्तत्वात् । तथाहि । "वदव्रजोः" इति योगो विभज्यते । तत्रात इति अनुवर्त्तयिष्यते । ततो ऽचइति द्वितीयो योगस्तत्राङ्गेनाचो विशेषणात अपाक्षीदित्यादावेकेन वर्णेन व्यवधाने वृद्धिसिद्धौ पुनः क्रियमाणं हल्यहणं हल्समुदायप्रतिपत्त्यर्थं भवति । अस्य कर्तृवाचिसार्वधा-तुकपरत्वे "अक्षोन्यतरस्याम्" इति पक्षे श्नुर्भवति (अक्ष्णोति । अक्ष्णुतः । अक्ष्णुवन्ति) अजादौ "अचि श्नुधातु०" इत्यादिनोवङ् । (अक्ष्णोतु । अक्ष्णुहि) इत्यत्र "उतश्च प्रत्ययात्०" इति हिलुङ् न भवति, तत्रैवासंयोगपूर्वादित्युक्तत्वात् । (अक्ष्णवानि) इत्यत्र आटि परत्वादुवङ बाधित्वा गुणः (आक्ष्णोत् । अक्ष्णुयात् । अचिक्षिपति) अनिट्पक्षे [पूर्वत्रासिद्धीयमद्विर्व-चने] इत्युक्तत्वात् अस्मात्परत्वात् "स्कोः" इति कलोपे "षढोः०" इति कत्वे च सनः ककारसहितस्य द्वितीयस्यैकाचो द्विर्वचने हलादिशेषे "सन्यतः" इतीत्वे (अचिक्षतीति) भवति । (अक्षयति) चङि णिलोपस्य स्थनिवत्त्वात् क्षिशब्दस्य द्विर्वचने (आचिक्षत

अक्षित्वा । अष्टा निष्ठायामष्टः । अक्षी)"इन्" इतीन्प्रत्ययः (अक्षणा) । *अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः* इति तृतीयाद्यजादावन्तस्यानङादेशे "अल्लोपोनः" इत्यल्लोपः । ङौ "विभाषाङिश्योः" इति विकल्पनात् (अक्षणि अक्ष्णि) इत्युभयं भवति) विशालमक्षि यस्य स (विशालाक्षः) "*बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच*" इति षच् । स्वाङ्गवाचिसक्थ्यक्षन्ताद् बहुव्रीहेः षच् । षित्त्वात् स्त्रियां (विशालाक्षी) । स्वाङ्गाचिति वचनात् (स्थूलाक्षा वेणुयष्टिः) इत्यत्र *अक्ष्णोदर्शनात्* इत्यचि टाब् भवति । अदर्शनवाच्यक्षन्तात् समासमात्रादजिति सूत्रार्थः । इह च दर्शनं चक्षुरिति (गवाक्षं कबराक्षम्) इत्यत्राचक्षुर्वचनस्याक्षिशब्दस्याज् भवति । यद्वात्र समुदायो दर्शनसाधनं न तु तदवयवोक्षिशब्द इति तस्य दर्शनयोगाभावाददर्शनादिति निषेधस्य नैव प्रसङ्गः । कबराक्षमिति सच्छिद्रं यदश्वानां मुखपिधानं तदुच्यते । कथं स्थूलाक्षिरिक्षुरिति, यदि दृश्यते, अनित्यः समासान्तइति निर्वाह्यः । अयं समासान्तः स्त्रतिपूर्वस्यापि भवति । "न पूजनात्" इत्यत्र [बहुव्रीहौ सक्थ्यक्ष्णोरनिषेधः] इत्युक्तत्वात् ॥ ६४४ ॥

तक्षू त्वक्षू तनूकरणे ॥ (तक्षति । ततक्षेत्यादि) । अक्षिवत् । "तनूकरणे तक्षः" इति पक्षे शब्विषये श्नु, (तक्ष्णोति), इत्यादि । अक्ष्णोतिवत् । (तक्षा) । "कनिन्युवृषिवक्षि०" इति कनिन् । तक्ष्णोऽपत्यं, (ताक्ष्णः)। "शिवादिभ्योण्" इत्यण् । अत्र "अन्नति" अन्नन्तस्याणपरत्वात्प्रकृतिभावे प्राप्ते *षपूर्वहन्धृतराज्ञामणि* इति षपूर्वो योऽन्शब्दो हनश्च तयोर्धृतराजन्शब्दस्य चाणि प्रत्यये ऽल्लोप इत्यल्लोपः । शिवाद्यणा *सेनान्तलक्षणकारिभ्यश्च* इति ण्यस्य बाधो नेष्यत इति वृत्तावुक्तत्वात् (ताक्षण्यः).इत्यपि भवति । "नस्तद्धिते" इति लोपो "ये चाभावकर्मणोः" इति प्रकृतिभावान्न भवति । सेनान्तइति सेनाशब्दान्तो गृह्यन्ते लक्षण इति स्वरूपग्रहणं, कारिणः शिल्पिन इति । ग्रामस्य तक्षा (ग्रामतक्षः) । कुट्यां भवः कौटः, स चासौ तक्षा च (कौटतक्षः) स्वतन्त्रतक्षोच्यते, "ग्रामकौटाभ्यां च तक्ष्णः"ति टच् समासान्तः । पञ्चानां तक्ष्णां समाहारः (पञ्चतक्षः, पञ्चतक्षी) । 'तक्षन्नलोपश्च" इति नलोपः । पक्षे स्त्रीत्वं च (द्वितक्षी) "द्विगोः" इति ङीप् । अन्यदा "स नपुंसकम्" इति नपुंसकत्वम् । त्वक्षु त्वचन इत्यग्रे तुदित् ॥ ६४६ ॥

उक्ष सेचने ॥ (उक्षति । उक्षां चकार । उक्षिता) इत्यादि पूर्ववत् । उक्षां प्रचक्रुर्नगरस्य मार्गा इति भट्टिप्रयोगमुपादाय सुधाकरादयः, उक्ष्यत इत्युक्षाः, कर्मणि घञ्, उक्षान् प्रचक्रुरिति पाठान्तरं चास्थन् । (उक्षा) । ।श्वन्नुक्षन्निति कनिनन्तो निपातितः । उक्ष्णां समूहः (औक्षणम्) "गोत्रोक्ष०" इत्यादिना वुञ् । उक्ष्ण इदम् (औक्षम्) । औक्षमनपत्ये" इति निपातनाट्टिलोपः । अपत्ये तु (औक्ष्णः) "षपूर्वहन्०" इत्यल्लोपः । (जातोक्षः । महोक्षः वृद्धोक्षः) । "अचतुर०" इतिकर्मधारयादचि टिलोपो निपात्यते ॥ ६४७ ॥

रक्ष पालने ॥ (रक्षति । ररक्ष । रक्षितेत्यादि । निरक्षतीति, निरक्षी),। रक्षश्रुचिपशानामितिग्रह्यादिपाठाण्णिनिः । (रक्षणः रक्ष्णः) । ।"यजयाच०" इत्यादिना नङ् । (रक्षः) । असुन् । (राक्षसः) । "प्रज्ञादिभ्यश्च" इति स्वार्थेण् ॥ ६४८ ॥

णिक्ष चुम्बने ॥ निक्षति । निनिक्ष । निक्षितेत्यादि । प्रणिक्षणम् । (प्रनिक्षणम्) । 'आनिलनिक्षनिन्दाम्" इति णत्वविकल्पः । अयं विकल्पः कृत्येवेति निन्दतौ प्रतिपादितम् । तेन (प्रणिक्षति) इत्यादौ "उपसर्गात्०" इतिणत्वं भवति ॥ ६३९ ॥

तृक्ष स्तृक्ष णक्ष गतौ ॥ (तृक्षति । ततृक्ष । तृक्षितेत्यादि । तितृक्षिषति । तरीतृक्ष्यते) । "रीगृत्वतः" इति रीक् । (तरीतृष्टि) । "स्कोः०" इतिकलोपस्यासिद्धत्वाल्लघूपधत्वाभावान्न गुणः । एवं रुप्रिकौ (तृक्षयति । अततृक्षत् । तृक्षतीति, तृक्षः तस्यापत्यं तार्क्ष्यः) "गर्गादिभ्यो यञ्" इति यञ् । स्तृक्षति । तस्तृक्षेत्यादि पूर्ववत् । षोपदेशफलं (तरीष्टृक्ष्यत) इत्यादौ । (नक्षति । प्रणक्षतीत्यादि । नक्षत्रम् ।) अमिनक्षीत्यत्रप्रत्ययः । "नभ्राण्" इत्यत्र नञ्पूर्वात् क्षरतेः

क्षीयतेर्वा नक्षत्रमिति निपातितम् ॥ ६५१ ॥

वक्ष रोषे ॥ सङ्घातइत्येके । (वक्षतीत्यादि) । वक्षः असुन् ॥ ६५२ ॥

मृक्ष सङ्घाते ॥ (मृक्षतीत्यादि) । मक्ष इत्यप्येक इति मैत्रेयः । (मक्षति ममक्ष । मक्षितेत्यादि । मक्षिका) । "कुन् शिल्पिसंज्ञयोः" इति कुनि टापि "प्रत्ययस्थात्०" इतीत्वम्॥६५३॥

तक्ष त्वचने ॥ त्वचनं संवरणमिति दुर्गकाश्यपमैत्रेयाः । त्वचो ग्रहणमिति स्वामी । (तक्षतीत्यादि) । अयमूदित्तनूकरणे गतः । अत्रैव पक्षपरिग्रह इत्यप्येक इति । (पक्षति । पक्षः) । घञ् । पक्षस्य मूलं, (पक्षतिः) । "पक्षात्तिः" इति तिप्रत्ययः, पक्षे भवं (पक्ष्यं) "दिगादिभ्यो यत्" इति यत्प्रत्ययः । (पक्षः) पक्षतीच्छतिपर्यायः । वत्सरार्द्धवचनश्च । असुन् प्रत्ययः॥६५४॥

सूर्क्ष आदरे ॥ अनादर इति क्वचित्पठ्यते । तदसत् । सोमेन यक्ष्यमाणो नभूनसूर्क्षन्नक्षत्रमिति दर्शनात् सोमेन यक्ष्यमाणो वसन्ते ब्राह्मणोऽग्नीनादधीत । उत्तरयोः फल्गुन्योरग्निमादधीतेत्यादिना चोदितनक्षत्राणि नाद्रियेत इति तत्रार्थः । तथा अवहेडनमसूर्क्षणमिति दृश्यते । सूर्क्षणमादरः । ततोन्यदसूर्क्षणमनादरः । (सूर्क्षति । सूर्क्षितेत्यादि) ॥ ६५५ ॥

काक्षि वाक्षि माक्षि काङ्क्षायाम् ॥ (काङ्क्षति । चकाङ्क्ष । काङ्क्षितेत्यादि । चिकाङ्क्षिषति । चाकाङ्क्ष्यते । चाकांष्टि, इत्यादि । काङ्क्षयति । अचकाङ्क्षत् एवं वाङ्क्षति माङ्क्षतीत्यादि)॥६५८॥

द्राक्षि ध्राक्षि ध्वाक्षि घोरवासिते च ॥ (द्राङ्क्षति । ध्राङ्क्षति । द्राक्षा । ध्राक्षा । द्राक्षामत् । ध्वाक्षामत्) *मादुपधायाश्च मतोर्वोऽयवादिभ्यः* । मकारान्तात् मवर्णोपधात् अवर्णान्तात् अवर्णोपधाच्च परस्य मतुपो मकारस्य वकार इति प्राप्तं वत्वं यवादिभ्यः परस्य नेति निषेधात् न भवति । द्राक्षाध्राक्षाशब्दयोरनुनासिकलोपोपि यवादिपाठादेव । (ध्वाङ्क्षति । ध्वाङ्क्षः) । तीर्थं ध्वाङ्क्ष इव तीर्थध्वाङ्क्षः । *ध्वाङ्क्षेण क्षेपे* इति सप्तम्यन्तं ध्वाङ्क्षवाचिना क्षेपे गम्यमाने नित्यं समस्यत इति तत्पुरुषः । क्षेपोत्रानवस्थादिनाऽवगम्यते ॥ ६६१ ॥

चूष पाने ॥ (चूषति । चुचूष । चूषितेत्यादि । चुचूषिषति । चोचूष्यते । चोचूष्टि । चूषयति । अचूचुषत्) ॥ ६६२ ॥

तूष तुष्टौ ॥ (तूषतीत्यादि) पूर्ववत् ॥ ६६३ ॥

पूष वृद्धौ(१) ॥(पूषतीत्यादि । पूषी) । दीपस्थापनार्थं कुड्यकल्पितो बिलविशेषः । पचाद्यच्, गौरादित्वात् ङीष् ।(पूषा)। "श्वन्नुक्षन्०" इत्यादिना कनिनन्तो निपात्यते ।(पूषणौ)। *इन्हन्पूषार्यम्णां शौ* इति उपधालक्षणस्य दीर्घस्य शावेव प्रत्यये नियमात्सर्वनामस्थान इति दीर्घो न भवति । सौ च "सौ च"इति विधानाद् भवति । अयमसम्बुद्धिविषयः । अतिपूषाणि ज्योतींषि इत्यत्र शिपरत्वात् दीर्घः। अपत्यादावणि (पौष्णः)। "षपूर्वहन्०" इत्यल्लोपः । पुष पुष्टाविति इहैवाग्रे दिवादौ क्र्यादौ च । पुष धारण इति चुरादौ ॥ ६६४ ॥

मूष स्तेये ॥ (मूषति । मूषकः) । संज्ञायां कुन् । (मूषिका) । अजादिपाठात् जातिलक्षणङीषं बाधित्वा टाप् । मुष स्तेय इति ह्रस्वोपधः क्र्यादौ, लूष रूष भूषायामिति सुधाकरः । (लूषति । रूषति । रूषिता) ॥ ६६५ ॥

शूष प्रसवे । तालव्योष्मादिरिति पारायणिका इति स्वामी । दृश्यते च तैत्तिरीयके । 'अक्षशूषा' इति । केचित् दन्त्यादिं पठन्ति । तदनार्षं, षोपदेशलक्षणविरोधात् । (शूषतीत्यादि) ॥ ६६६ ॥

यूष हिंसायाम् ॥ (यूषति) । यूषः मांसरसविशेषः ॥ ६६७ ॥

जूष च ॥ (जूषते) । जुषी प्रीतिसेवनयोरिति चुरादौ, जुष परिभाषण इति युजादौ ह्रस्वोपधौ ॥ ६६८ ॥

भूष अलङ्कारे ॥ भूषति । (भूषते कन्या स्वयमेव । अभूषिष्ट कन्या स्वयमेव ।) "भूषाकर्म०" इति यक्चिणोर्निषेधः । भूषाफलं शोभनाख्यं कर्मणि दृश्यत इति कर्मस्थक्रियात्वं कैयट

---

(१) पुष्टाविति पाठ एकस्मिन् पुस्तके ।

इत्युक्तम् । अङ्क्षा सूनाः परिभूषन्त्वश्वमित्यत्र भट्टभास्करः सूना मांसविकर्षणसाधनान्य-श्वादीनि, अश्वं परिभूषन्तु परितो भवन्त्विति । भवतेर्लोटि सिपि रूपमुक्त्वा भूषयतेर्वा शप् । "छन्दस्युभयथा" इत्यसार्वधातुकत्वाण्णिलोप इत्याह । तदस्य धातोरस्मरणात् । न चायं नास्तीति शक्यते वक्तुं, सर्वेषु व्याख्यानेष्वविवादेनोपादानात् । अयं चुरादौ च ॥ ६६९ ॥

ऊष रुजायाम् ॥ (ऊषति । ऊषां चकार । ऊषिषति । मा भावानूषिषत् ।) णिलोपस्य स्थानिवत्त्वात् षिशब्दस्य द्विर्वचनम् । (ऊषः) । घञ् (ऊषरः) "ऊषशुषिमुष्कमधो रः" म-त्वर्थे रः । (ऊषयति) । उष दाह इति अग्रे ह्रस्वोपधः ॥ ६७० ॥

ईष उञ्छे ॥ (ईषतीत्यादि) ऊषिवत् । ईषत इति गतौ गतः ॥ ६७१ ॥

कष खष शिष जष झष शष वष मष रुष रिष हिंसार्थाः ॥ तृतीयषष्ठौ ताल्व्योष्मादी । सप्तमो दन्त्योष्ठ्यादिः । (कषति । चकाष । कषितेत्यादि । अकषीत् । अकाषीत् ।) "अतो हलादे०" इति वा वृद्धिः । (सर्वंकषम्) । "सर्वकूलाभ्रकरीषेषु कषः" इति खच् । *अरुर्द्विषद-जन्तस्य०* इति खिदन्त उत्तरपदे पूर्वपदस्य मुम् । एवं कूलादिपूदाहार्यम् । (विकाषी) । "वौ कषलषकत्थस्रम्भः" इति तच्छीलादिषु घिनुण् । (आकषः। निकषः) । "गोचर" आदिसूत्रे चका-रस्यानुक्तसमुच्चयार्थत्वात् अधिकरणे घः । आकषेण चरति, (आकषिकः) । *आकषात् ष्ठल्* इति तृतीयान्तात् अस्मात् चरतीत्यर्थे ष्ठल् । षित्त्वात् (आकषिकी) । आकषे कुशलः, (आक-षकः) । *आकषादिभ्यः कन्* इति सप्तम्यन्तात् कुशल इत्यर्थे कन् (निमूलकाषं कषति । समूलकाषं कषति) निमूलं समूलं च कषतीत्यर्थः । "निमूलसमूलयोः कषः" इति णमुल् । उपपदसमासः । *कषादिषु यथाविध्यनुप्रयोगः* इति यस्मात् णमुलो विधानं तस्यैवानुप्र-योगः, कषादयश्च "निमूलसमूलयोः कषः" इत्यारभ्य "उपमाने कर्मणि च" इत्येतदन्तेषू-पात्ता धातवः । अत्रानुशब्दो नानन्तर्येऽपि तु धात्वर्थानुवादेन पश्चाद्भावे, तेन व्यवहितपूर्व-प्रयोगोऽपि द्रष्टव्यः । तथा च वृत्तिः । धातुसम्बन्धे प्रत्ययविधानादनुप्रयोगार्थं वचनमिति । तथा "यथाविध्यनुप्रयोगः पूर्वस्मिन्" इत्यत्र हरदत्तः । अनुशब्दो धात्वर्थानुवादेन पश्चाद्भावे न त्वानन्तर्ये, पूर्वप्रयोगो व्यवहितप्रयोगोपि भवतीति न्यासे च । अथ पूर्वप्रयोगस्य व्यवहि-प्रयोगस्य च निवृत्त्यर्थं कस्मान्न भवति यथा "कृञ् चानुप्रयुज्यते लिटि" इत्येतत् । तन्न । एतयोरिष्टत्वात् । पादौ कषितुं शीलमस्य (पत्काषी) । "सुप्यजातौ णिनिस्ताच्छिल्ये" इति णिनिः, "हिमकाषिहतिषु च" इति हिमादावुत्तरपदे पादः पद्भावः। (कष्टं व्याकरणम्)। कृच्छ्र-साध्यमित्यर्थः । (कष्टानि वनानि) । दुष्प्रवेशानीत्यर्थः । "कृच्छ्रगहनयोः कषः" इति निष्ठा-यामनिट्त्वम् । अन्यत्र (कषितो देवदत्तः)। कष्टाय कर्मणे क्रामति,(कष्टायते) । *कष्टाय क्रमणे* इति चतुर्थ्यन्तादनार्जवे क्यङ्, क्रमणमिहानार्जवम् । कष्टं चिकीर्षति, (कष्टायते) । अत्र "सत्र-कक्ष०" इत्यादिना द्वितीयान्तात्कण्वचिकीर्षायां क्यङ् । (कक्षः) । "वृतिवदि०" इत्यादिना सप्रत्ययः । "षढोः कः सि" इति कत्वं, "तितुत्रेत०" इण्निषेधः। (कक्षायते) । "सत्रकक्षि०" इत्यादिना क्यङ् । (खषतीत्यादि पूर्ववत् । खष्पः।) बलात्कारः । "खष्पशष्पबाष्पपर्परूपकूर्प-शिल्पाः" इति पप्रत्ययान्ता निपात्यन्ते । (शिषति । शिशेष । शिशयिथ । शेष्टा । शेक्ष्यति । शेषतु । अशेषत् । शेषेत् । आशिषि । शिष्यात् । अशिक्षत्) "शल इगुपधा०" इति क्सः अनिट्त्वं च, शिषि पिषि श्लिष्यतिपुष्पती त्विषिमिति व्याघ्रभूतिवचनात् । तदुक्तं पुरुषकारे । शिषेरसर्वोपयोगे शपि । शेषयति । शेषतीत्युभौ, लुङ्यङ्भावादव्यशेषत् इति देवमुपादाया-शेषीदित्युक्तं, शिषि पुषिमित्यनिट्कारिकाप्रामाण्याच्छिषिमात्रस्यानिट्त्वेन क्से सति अ-शिक्षदिति युक्तम् । तथा मैत्रेयोपि शेष्टेत्यनिटमुदाजहार । एवं च लिटि सेट्त्वं क्रादिनियमा-त्सिद्धम् । एवं चास्य सेटो मध्ये पाठो यथा शिषिमात्रस्यानिट्त्वेन "शलइगुपधा" इति षा-न्तसाम्यात् षान्तपरस्मैपदिसाम्याच्च द्रष्टव्यः । (शिशिक्षति ।) "हलन्ताच्च" इति सनः कि-त्त्वम्. (शेशिष्यते । शेशेष्टि । शेषयति । अशीशिषत् शिष्ट्वा । शिष्टः । शिष्टवान् । शिष्टं) काल-

योगः । "खष्पशिष्प०"इति पप्रत्यये निपातितम् (जषति । जजाष । जेषतुः जषिता) इत्यादि कषिवत् । किति लिटि सेटि थलि चैत्वाभ्यासलोपौ । एवं (झषति, शषतीत्यादि शष्पं) पूर्ववत्पः । वष आदानसंवरणयोरित्यर्थं स्वरितेत । (वषति । ववाष । ववषतुः । वषितेत्यादि) वादित्वान्नैत्वाभ्यासलोपौ । (मषतीत्यादि । रोषति । रुरोष । रुरोषिथ । रोषिता । रोष्टा रोषिष्यति इत्यादि । तकारादौ "तीषसहलुभरुषरिषः इतीड्विकल्पः (रुषित्वा । रुष्ट्वा) इट्पक्षे "रलो व्युपधा०" इति कित्त्वविकल्पः । निष्ठायां "रुष्यमत्वरसंघुषास्वनाम्" इतीटो विकल्पनात् "यस्य विभाषा" इति निषेधो भवति । (रुष्टो, रुषितः ।) "मतिबुद्धिपूजार्थेभ्यश्च" इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वाद्वर्तमाने क्तः । इट्पक्षे "उदुपधाद्भावादिकर्मणोरन्यतरस्याम्" इति कित्त्वविकल्पनात्पक्षे गुणः (रोषितमनेनेत्यादि भवति) । रुष रोषइति दिवादौ चुरादौ च । रेषतीत्यादि रोषतिवत् । निष्ठायां"यस्य विभाषा"इतीटो निषेधात् (रिष्टः) । रेषत इति शब्दे गतः । अत्र दण्डके मुषिरपि धातुः कोशे पठ्यते । स्तेयार्थोयं पूर्ववच्चैष पठति इतीह पाठे नाभिनिवेष्टव्यम् । हिंसार्थत्वे यदि दृश्यते तदा धातूनामनेकार्थत्वाद्भविष्यति॥६८१॥

भष भर्त्सने ॥ इह भर्त्सनं श्वरवो यतस्तत्रैवायं प्रसिद्धः । (भषति । भषकः।) कुन् ॥६८२॥

उष दाहे ॥ (ओषति । ओषां चकार ।) "उषवि०" इत्याम्विकल्पः । (उवोष । ऊषतुः । उवोषिथ) । पिद्वचनेषु गुणस्य स्थानिवत्त्वादुषशब्दस्य द्वित्वम् । पुनर्गुणे "अभ्यासस्या०" इत्युवङ्वङ् । न चाभ्यासस्यानादिष्टादचः पूर्वत्वे गुणस्य स्थानिवत्त्वम्, असवर्णग्रहणसामर्थ्यादिति प्रागेवोपपादितम् । (ओषिता । ओषिष्यति । ओषतु । ओषत् । ओषेत् । उष्यात् । औषीत् । ओषिषिषति । ओषयति । मा भवानुषिषत्) प्रत्युष्टमित्यत्र भट्टभास्करः । "ओदितश्च" इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वादाश्वस्तादिवदिट्प्रतिषेधः। (ऊष्मा) । मनिनि बाहुलकाद् दीर्घः। ऊष रुजायामित्यस्माद्वा । (उष्णः)। उष्णिस्युषीति नक् ।(ऊष्णिका)। यवागूः । "ब्राह्मणकोष्णिके संज्ञायाम्" इति कनि निपात्यते। उष्णं करोति (उष्णकोलसः)। "शीतोष्णाभ्यां कारिणि" इति । कन् । उष्णं न सहते (उष्णालुः) । "शीतोष्णतृप्रेभ्यस्तदसहने" इत्यालुच् । (ओष्ठः) "उषिकुषिकाशिभ्यष्ठन्" इति ठन् (बिम्बोष्ठी । बिम्बोष्ठा) "नासिकोदरौष्ठ०" इति वा ङीष् [ओत्वोष्ठयोः समासे वा] इति पररूपं वृद्धेरपवादः । अन्यदा वृद्धौ (बिम्बौष्ठी बिम्बोष्ठा । पार्योष्ठ्यम् ।) सप्तम्यर्थेऽव्ययीभावः । तस्माद्भवार्थे [परिमुखादिभ्य उपसंख्यानम्] इति ष्यञ् । (उष्टः) । ष्टति ष्टन् बाहुलकादगुणत्वम् । उष्ट्राणां समूहः (औष्ट्रकम्) । "गोत्रोक्षोष्ट्र०" इति वुञ् । उष्ट्रस्य विकारावयवयोरपि (औष्ट्रकम्), "उष्ट्राद्वुञ्" इति वुञ् ॥ ६८३ ॥

जिषु विषु मिषु सेचने ॥ जेषति । जिजेष । (जेषिता । जिजिषिषति । जिजेषिषति । जिषित्वा । जेषित्वा) 'रलोव्युपधात्०" इति कित्त्वविकल्पः । "उदितोवा" इति क्त्वायामिड्भावे (जिष्ट्वा जिजिष्यते । जेजेष्टि । जेषयति । अजीजिषत । जिष्टम् । वेषति । विवेष । विविषतुः । विवेषिथ । विविषिव ।) शिषि पिषि शुष्यतिपुष्यती त्विषि श्लिषि विषि तुष्यतिद्विष्यति द्विषिमित्यनिट्कारिकापाठादस्यानिट्त्वेपि क्रादिनियमादत्रेट् (वेष्टा । वेक्ष्यति । अविक्षत्) "शल इगुपधा०" इति क्सः (विविक्षति) "हलन्ताच्च" इति सनः कित्त्वम् । उदित्त्वात् क्त्वायामिड्विकल्पः (विषित्वा । वेषित्वा । विष्ट्वा । विष्टम् । वेषेण संपादी वेष्यो नटः) "कर्मवेषाद्यत्" इति तृतीयान्तात्संपादिन्यर्थे यत् । संपत्तिः शोभातिशयः । वेषेणात्यन्तं शोभत इत्यर्थः । विष्ऌ व्याप्तौ जुहोत्यादौ । विष विप्रयोग इति च क्र्यादौ । (मेषतीत्यादि) जेषतिवत् । मेष इति पचादिषु दर्शनादचि चित्त्वात्स्त्रियां (मेषी) । अयं स्पर्द्धायां तुदादौ ॥ ६८४ ॥

पुष पुष्टौ (पोषति । पुपोष । पुपोषिथ । पोषिता । पोषिष्यति । अपोषीत्) शिषि पिषि शुष्यतिपुष्यती इति श्यना निर्देशादयं सेट् । तथा पुषादीत्यङ्विधावपि दैवादिकस्य ग्रहणं,

सेट्कत्वात् क्सोपि न भवति (स्वपोषं पोषति) "स्वे पुषः" इति णमुल्। अत्र स्वशब्दः पिन्नि- द्दिश्यते तेन पित्पर्यायवचनस्य तद्विशेषार्थस्य च द्व्यर्थमित्युक्तत्वात् स्वशब्दे तत्पर्यायवाचिनि विशेषवाचिनि चोपपदे प्रत्यय इति, गोपोषं धनपोषमिति दैवादिकस्य भवति (पोषितः। पुषितः। पुष्टमिति। पोषितमिति ण्यन्तस्य। पोषयतीति पोपयित्नुः) "स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच्" इति ण्यन्तादित्नुच्। "अयामन्ता०" इति णेरयादेशः। अयं दिवादिः क्र्यादिश्च। धारणार्थश्चुरादिः। नन्वेक एव पुषिः विकरणभेदाय पुनः पठ्यते क्व चिचायं सेट् अन्यत्र पाठादनिट् इत्यर्थादार्धधातुके विकल्पितेट्कत्वात् "यस्य विभाषा" इतीटा न भवितव्यं निष्ठायाम्। नैतत्। यस्य वाचनिक इड्विकल्पस्तस्यैव तत्राश्रयणात्॥ ६८७॥

श्रिषु श्लिषु प्रुषु प्लुषु दाहे॥ (श्रेषति। शिश्रेष। श्रेषिता। श्लेषति। शिश्लेष। शिश्लेषिथ। श्लेषिता) श्लिषि पिषि शुष्यतिशिष्यती त्विषि श्लिषिमित्यनिट्कारिकायां दैवादिकस्य श्लिषेर्ग्रहणं तेनास्येतीड् उदात्तः। उक्तं च कैयटे। श्लिष आलिङ्गन इति क्सविधावनिट इत्यनुवर्त्तनाद् दाहार्थस्य सेटो ग्रहणाभाव इति। एवं तत्र न्यासपदमञ्जर्योरपि। यस्त्वनिट्कारिकाव्याख्यानन्यासे द्वयोर्ग्रहणमिति पाठः स स्वोक्तिविरोधाद् ग्रन्थान्तरविरोधाच्च प्रमादलिखितः। तथा च वर्द्धमानस्वामिसंमताकारादयश्चामुं सेटमाहुः। श्लेषयतीति (श्लेषः) "श्याद्व्यधास्रुसंस्रवत्यवसावहृलिहश्लिषश्वसश्च" इति कर्त्तरि, णः (श्लेष्मा। श्लेष्मलः। मत्वर्थे। श्लेष्मणः) पामादित्वान्नः, अयमपि मत्वर्थे। श्लेष्मणः शमनं कोपनं वा (श्लेष्मिकम्)। तस्य निमित्तप्रकरणे "वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम्" इति ठक्। (श्लक्ष्णः)। "श्लिषेरचोपधायाः" इति क्नप्रत्ययः। उपधायाश्चाकारः। श्लिष्यतेर्वा (श्लक्ष्णः। आचारश्लक्ष्णः)। "पूर्वसदृश०" इत्यादिना समासः। आलिङ्गने दिवादिः। श्लेषणे चुरादिः। (प्रोषति। प्लोषतीत्यादि।) प्लुष्यतीति दिवादिपाठात् सेट् प्रुषिप्लुषी द्वौ स्नेहने क्र्यादौ॥ ६९१॥

पृषु वृषु मृषु सेचने॥ मृषु सहने च। इतरौ हिंसासंक्लेशनयोश्च। अत्र काश्यपः। पृषु हृषु वृषु हिंसासंक्लेशनदानेष्वित्यादि पपाठ (पर्षति। पर्षिता। पर्षिष्यति। पर्षतु। अपर्षत्। आशिषि पृष्यात्। अपर्षीत्। पिपर्षिषते। परीपृष्यति। पर्पृषीति। पर्पर्ष्टि। पर्पर्क्षि) लोटि पर्पृड्ढी) इत्यत्र हेर्ङित्त्वान्न गुणः (पर्पृषाणि) "नाभ्यस्तस्याचि पिति" इति गुणनिषेधः। लङि तिप्सिपोर्हल्ङ्यादिलोपः। (अपर्पर्ट्)। "रात्सस्य" इति नियमात् न संयोगान्तलोपः। (अपपृषीत्)। पूर्ववद्गुणत्वं रिक्रीकोरुदाहार्यम् (पर्षयति। अपपर्षत्। अपीपृषत्। पर्षित्वा। पृष्ट्वा) उदित्त्वाद्विकल्पः। (पृष्टं, पृषितम्) बाहुलकात् पृषेः किच्चेति तच् अस्मादपीति। (पृषतम्)। "पृषिरञ्जिभ्यां कित्" इत्यतच्। पृषन् बिन्दुर्मृगश्च। [वर्त्तमाने पृषन्महद्बृहज्जगच्छतृवच्च] इत्यतिप्रत्यये गुणाभावः। शतृवद्भावाद् "उगितश्च" इति स्त्रियां ङीपि (पृषती। पार्ष्णिः)। "घृणिपृश्निपार्ष्णिभूर्णिचूर्णितूर्णिः" इत्यादिणिज् प्रत्यये निपात्यते। (पार्ष्णीलः)। "सिध्मादिभ्यश्च" इत्यत्र पार्ष्णिधमन्योर्दीर्घश्चेतिपाठात् लचि दीर्घः। तच्चान्यतरस्यांग्रहणस्यानुवर्त्तनात् मतुपि (पार्ष्णिमान् वर्षति। ववर्ष। वर्षतीति वर्षः) [अज्विधौ भयादिभ्य उपसंख्यानं नपुंसके क्तादिनिवृत्त्यर्थम्] इत्यच्। वृषेर्वा वर्षणादिति भाष्यकारप्रयोगात् ल्युट्। (वृष्टिः)। "तितुत्र०" इति नेट्। (वृषभः) 'ऋषिवृषिभ्यां कित्' इत्यभच्। (वृषः)। इगुपलक्षणः कः। वृषाय हितं (वृष्यम्)। "खलयवमाषतिलवृषब्रह्मणश्च" इति यत्। अत्राकारान्तस्य वृषशब्दस्य ग्रहणात् कनिन्नुवृषीतिकनिः न्तात् वृषन्शब्दाद्यन्न भवति। प्राक्क्रीतीयस्त्वनभिधानान्न भवति। वृषमात्मन इच्छति (वृषस्यति)। मैथुनं इच्छति इत्यर्थः। "अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि" इत्यसुक्। अश्ववृषयोर्मैथुनेच्छायामिति। अन्यत्र "क्यचि च" इतीकारे (वृषीयति। वृष्णिः)। 'प्रवृषिभ्यां कित्" इति निः। (वृषणः) बाहुलकात् क्युन्। वर्षत इति स्नेहने गतः (मर्षति। ममर्ष। मृषित्वा। मर्षित्वा) "तृषिमृषिकृषेः काश्यपस्य" इति सेट्त्क्त्वः कित्त्वविकल्पः। अनिट्पक्षे (मृष्ट्वा, निष्ठायां मृष्टम्)। "मृषस्तितिक्षायाम्"

इति कित्त्वप्रतिषेधो निष्ठायामेवेति दैवादिकस्य तत्र ग्रहणं, स हि सेट्, मृषस्तितिक्षायामिति दिवादिर्युजादिश्च स्वरितेतौ ॥ ६९४ ॥

घृषु संघर्षे ॥ (घर्षति । संघर्षणम् । घृष्टम्) ॥ ६९५ ॥

हृषु अलीके ॥ (हर्षति । हृष्टानि लोमानि । हर्षितानि लोमानि। हृष्टं लोम, हर्षितं लोमभिः) । अत्रोदित्वान्नित्यसनिट्त्वे प्राप्ते "हृषेर्लोमसु" इति लोमविषयालीकत्वाचित्वात्पक्षे इडागमः । यस्तु दिवादौ हृष तुष्टाविति पठ्यते तस्य तु सेट्कत्वान्निष्ठायामनेन पक्षे इण्निषिध्यते इतीयमुभयत्र विभाषा, अत्र लोमान्यङ्गजानि केशाश्चेति वृत्तावुक्तम्। लोमभ्योन्यत्र हृष्टमित्येव भवति, दैवादिकस्य तु हृषितमिति । (हृष्टो देवदत्तः, हृषितो देवदत्तः,) विस्मत इत्यर्थः । (हृष्टा दन्ता हृषिता दन्ताः) । प्रतिहता इत्यर्थः । [विस्मितप्रतिघातयोश्चेति वक्तव्यम्] इति इड्विकल्पः । (हर्षुलः) । "हृषेरुलच्" इत्युलच् । (हर्षयित्नुः) । स्तनिहृषीत्यादिना ण्यन्तादित्नुच्॥ ६९६ ॥

तुस हस ह्लस रस शब्दे (तोसति । तुतोस । तोसिता । तोसिष्यति । तोसतु । अतोसत्। तोसेत्। आशिषि । तुस्यात्। अतोसीत्। तुतुसिषति । तुतोसिषति । तुसित्वा । तोसित्वा) "रलो व्युपधा" इति कित्त्वविकल्पः। (तोतुस्यते। तोतोस्ति । तोतुधि)इत्यत्र सेर्हेर्धिभावे चकाधीतिवत्"धि च"इति सलोपः। लङि तिप्सपोर्हल्ङ्यादिलोपे"तिप्यनस्तेः"इति सकारस्य दत्वे (अतोतोः) इति भवति (तोसयति । अतूतुसत्। हसति । जहास हसितेत्यादि । जिहसिषति । जाहस्यते । जाहस्तीत्यादि तुसिवत्। हासयति । अजीहसत । हस्त्रः ।) बाहुलकाद् "हृस्वं लघु" इति निर्देशाद्वा वप्रत्ययः । (हसिष्ठः । हसीयान्) "पृथ्वादिभ्य इमनिज्वा" इति इमनिच्। "स्थूलदूर०" इति इष्ठेमेयःसु यणादिपरं लुप्यते पूर्वस्य च गुणः। एतत्स्थूलादिविषयं यथासम्भवम् । अत्र यणादिलोपस्य "असिद्धवदत्रा०"इत्यसिद्धत्वाट्टेरिति लोपो न भवति । ह्रस्वं करोति (हसयति) णाविष्ठवदिति यणादिलोपः अङ्गवृत्ते पुनर्वृत्ताविति वृद्ध्यभावः। भाष्ये अग्लोपित्वाच्चङि इत्वाभावात् (अजहसत्। ल्हसतीत्यादि हसिवत्। रसतीत्यादि) । रस इति रस आस्वादनस्नेहनयोरिति चौरादिकस्य । ण्यन्तस्य, रसयतीति हि तस्य व्युत्पत्तिः ॥ ७०० ॥

लस श्लेषणक्रीडनयोः(लसतीत्यादि । विलासी) । "वौ कषलस०"इति तच्छीलादौ घिनुण् न लसः, (अलसः, आलस्यम्) । *न नञ्पूर्वात्तत्पुरुषादचतुरसङ्गतलवणवटयुधकतरसलसेभ्यः* इति नञ्पूर्वात्तत्पुरुषादचतुरसङ्गतलवणाद्युत्तरे भावप्रत्यया न भवन्तीति निषेधश्चतुरादिपर्युदासादिह नेति ष्यञ् भवति । एवं नरसेः, (अरस्यमिति । अलसोप्यालस्यः) । चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् भवति । लस शिल्पयोग इति चुरादौ ॥ ७०१ ॥

घस्लृ अदने ॥ अयं न सार्वत्रिकः,"लिट्यन्यतरस्याम्"इति अदेर्घस्लादेशविकल्पविधानवैयर्थ्यप्रसङ्गात्। द्वैरूप्यं हि साध्यम् । ततश्च यत्र लिङ्गं वचनं वास्ति तत्रैवास्य प्रयोगः । अत्रैव पाठः शपि परस्मैपदे लिङ्गम् । लृदित्करणमङि । घसिश्च सान्तेष्विति इण्निषेधो वलाद्यार्धधातुके । यत्र प्रत्यये प्रतिपदोपात्तं "सृघस्यदः क्मरच्" इत्यादौ तद्वचनम् । (घसति । घस्ता । घत्स्यति) । "सः स्यार्धधातुके" इति तत्वम् (घसतु । अघसत्। घसेत ।) शबभावादाशिष्यस्याप्रयोगः । (अघसत्),लृदित्वादङ्। (घत्स्यते देवदत्तेनान्नम्)इत्यादौ शप्परस्मैपदाभावेपि वलादिनिमित्तः प्रयोगः (घस्मरः) "सृघस्यदः क्मरच्" इति क्मरच् तच्छीलादौ । (घासः) भक्ष्यतृणादिः । जनिघसिभ्यामिण् । (घासिः),जघासेति घासः प्रघास इति भट्टभास्करो"बहुलं छन्दसि" इति घस्लादेश औणादिक इत्याह । तदस्य घसेरस्मरणात् ॥ ७०२ ॥

जर्ज चर्च झर्झ परिभाषणहिंसातर्जनेषु ॥ (जर्जति । चर्चति झर्झति । झर्झरः) बाहुलकादरः । चर्चझर्झयोस्तुदादौ पठिष्यमाणयोरिह पाठः स्वरार्थ इति देवमैत्रेयपुरुषकारेषु । उष्मान्तेषु पाठोर्थानुरोधादिति च मैत्रेयः । चर्च अध्ययनइति चुरादौ ॥ ७०९ ॥

पिसृ पेसृ गतौ (पेसति। पेसयति। अपिपेसत्। एकारोपधपाठः किंदर्थ इति (पिपेसतुः। पेपेस्यत इत्यादि। पेस्वरः) "स्थेशभासपिसकसो वरच्" इति वरच्। इह क चित् विसृ बेसृ पिश्र पेश्र इत्यपि पठ्यन्ते। आद्यौ दन्त्योष्ठ्यादी तालव्योष्मान्तौ चत्वार एते मैत्रयादिषु न दृश्यन्ते। पिस अवयव इति तु चुरादौ॥ ७०७॥

हसे हसने (हसति। जहास। अहसीत्। "ह्मयन्तक्षण०" इत्यादिना वृद्धिनिषेधः। (व्यतिहसन्ति)। [प्रतिषेधे हसादीनामुपसंख्यानम्] इति तङ्निषेधः। (हसः)। "स्वनहसोर्वा" इत्यनुपसृष्टात् पक्षे अप्। तदभावे घञ्, (हासः)। उपसृष्टात् तु नित्यं घञेव (प्रहास इति)। (हस्तः) हसिमृग्रिण्०" इत्यादिना तन्। "तितुत्रेति०" इण्निषेधः। हस्तोस्यास्तीति (हस्ती)"हस्ताज्जातौ"इति इन् प्रत्ययः। हस्तिनां समूहो (हास्तिकम्)। "अचित्तहस्तिधेनोष्ठक्" इति ठक् "नस्तद्धिते" इति टिलोपः। लिङ्गविशिष्टपरिभाषया हस्तिनीशब्दादपि ठकि "भस्याढे तद्धिते" इति पुंवद्भावः। (हास्तिकमित्येव)। हस्तिधेनुभ्यां तदन्तविधेरिष्टत्वात् (वानहस्तिकम्)इत्याद्यपि भवति। हस्ति प्रमाणमस्य (हास्तिनः पुरुषः)। पुरुषहस्तिभ्यामण् च" इति प्रथमान्तात् प्रमाणोपाधिकात् अस्येत्यर्थेऽण्प्रत्ययः। चकाराद्वयसच्दघ्नञ्मात्रचो भवन्ति (हस्तिद्वयसम्। हस्तिदघ्नम्। हस्तिमात्रमिति)। अणि "नस्तद्धिते" इति टिलोपः "इनण्यनपत्ये" इति प्रकृतिभावान्न भवति। हस्तेन दीयते कार्यं वा (हस्त्यम्)। "तेन यथाकथाचहस्तभ्यां णयतौ" इति तृतीयान्तात् दीयते कार्यमिति एतयोरर्थयोर्यत्। हस्ते नक्षत्रे जातो (हस्तः)। नक्षत्राणः "श्रविष्ठाफल्गुनी०" इत्यादिना लुक्। (हस्रं मुखम्।) "स्फायितञ्चि०" इत्यादिना रक्॥ ७०८॥

णिश समाधौ॥ तालव्योष्मान्तः (नेशति। प्रणेशति। निनेश। नेनिशानि। निनिशिषति। निनेशिषति। निशित्वा। नेशित्वा। नेनिश्यते। नेनेष्टि) व्रश्चादिना षत्वं त्वष्टुम्। (नेशयति। अनीनिशत्) अत्र मैत्रेयो निशाशब्दमस्मादाह। तस्याभिप्रायः, क्विपि आर्षं चैव हलन्तानां यथा वाचा निशा दिशेति टाप्। अन्ये तु नितरां शेरतेस्यामिति शेतेधिकरणे डप्रत्यये व्युत्पादयन्ति। निशायां भवं (नैशिकम्)। "निशाप्रदोषाभ्यां च" इति शैषिकः पक्षे ठञ्। तदभावे प्राग्दीव्यतीयेऽणि (नैशम्)॥ ७०९॥

मिश मश शब्दे रोषकृते च॥ इमौ तालव्योष्मान्तौ। (मेशति। मशतीत्यादि। मशकः।) सञ्ज्ञायां कुन्॥ ७१०॥

शव गतौ॥ दन्त्योष्ठ्यान्तः। (शवति। शवम्) क्विप्यूठि वृद्धौ (शौः)॥ ७११॥

शश प्लुतगतौ। तालव्योष्माद्यन्तः (शशति। शशः। शशनः) "चलनशब्दार्थ०" इति युच्। अत्र कश गताविति क्वचित् पठ्यते, तत् "प्रतिष्कशश्च कशेः" इत्यत्र वृत्तौ कश गतिशासनयोरित्यादादिकस्योपादानादनार्षमिव प्रतीयते। तथा "नाभ्यस्तस्य०" इत्यत्र प्रकृत्यन्तराणां चेति भाष्यवृत्ती प्रकृत्य तद्व्याख्यातृभिरादादिक एवोपादीयते॥ ७१२॥

शसु हिंसायाम्॥ दन्त्योष्मान्तः (शसति। शशास। शशसतुः) "न शस०" इत्येत्वाभ्यासलोपनिषेधः। शस्यतेनेनेति (शस्त्रम्)। "दाम्नीशस०" इति करणे ष्ट्रन्। षित्वात् स्त्रियां (शस्त्री। शस्यम्)। "तकिशसि" इत्यादिना यत्। शंस्यमिति "ह(१)न्त्यर्थाश्च" इति चुरादिपाठात् स्वार्थे णौ यति। (शसित्वा शस्त्वा।) उदित्त्वादिड्विकल्पः। (शस्तो वृषलः विनीत इत्यर्थः। "धृषिशसी वैयात्ये"। धृषिशसी यदा वैयात्यविषयौ तदैवैताभ्यां पराया निष्ठाया इडभाव इति नियमादन्यत्र (विशसित) इति भवति। विशसितुर्धर्म्यं (वैशस्रम्)। (१)ऋतोः इति षष्ठयन्ताद्धर्म्यमित्यर्थेऽङ्प्रत्ययः। तत्र [विशसितुरिड्लोपश्च] इति वचनादिड्लोपः। आशंसत इतीच्छायां गतः॥ ७१३॥

शसु स्तुतौ॥ अयं दुर्गः द्वावपि तालव्योष्मादी। (शंसति। शशंस। शंसितेत्यादि)।

(१) एतच्चुरादावुपलब्धपुस्तकद्वये ऽपि नोपलब्धमिति तत्रत्यटिप्पण्यां लिखितम्।

आशिषि कित्त्वात् "अनिदिताम्०" इत्युपधालोपे (शस्यात् । शिशंसिषति । शाशस्यते) । ङित्त्वान्नलोपः (शाशंस्ति) । यङो लुका लुप्तत्वात प्रत्ययलक्षणाभावान्नलोपाभावः। (शासस्तः) इत्यादौ तसादीनां ङित्त्वान्नलोपः। (शासधि) इत्यत्र हेरपित्त्वान् ङित्त्वान्नलोपे "धि च" इति सलोपः (शंसयति । अशशंसत् । शस्यम् ।) [शंसिदुहिगुहिभ्यो वेति वक्तव्यम्] इति नलोपः । क्यबभावे ण्यति (शंस्यम् । शंसित्वा । शस्त्वा) उदित्त्वादिड्विकल्प इति "न क्त्वा सेट्" इत्यकित्त्वान्नलोपाभावः। (शस्तम्)। "यस्य विभाषा" इति नेट्। नॄन् शंसतीति (नृशंसः।) कर्मण्यण्। नरा एनं शंसन्ति नरा अस्मिन्नासीनाः शंसन्तीति वा (नराशंसः,) घञ् । अग्निर्देशविशेषो वा । वनस्पत्यादिषु पाठात्पूर्वपदस्य दीर्घः । ब्रह्मणानि शंसतीति (ब्राह्मणाच्छंसी.) रूढिरियमृत्विग्विशेषस्य । "सुप्यजातौ०" इति णिनिः । [ब्राह्मणाच्छंसिन उपसंख्यानम्] इत्यलुक् । अस्मादेव निर्देशात् द्वितीयार्थे पञ्चमी (श्रेष्ठः । ज्येष्ठः । श्रेयान् । ज्यायान्) *प्रशस्यस्य श्रः* । *ज्य च* इत्यतिशायनिकयोरजाद्योः श्रज्यावादेशौ भवतः । आदेशयोरकारोच्चारणसामर्थ्याट्टिलोपो न भवति । ज्यायानित्यत्र "ज्यादादीयसः" इति ज्यशब्दात्परस्य ईयसुन आदेराकारः । श्रेयसोपत्यं (श्रायसः) । "देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्" इति वृद्धिनिमित्तात्परत्वादेकारस्य स्थाने आकारादेशः । प्रशस्यमाचष्टे (श्रापयति । ज्यापयति) । [तत्करोति०] इति णिचि णाविष्ठवदिति श्रज्यादेशयोर्वृद्धौ पुक् ७१४ ॥

चह परिकल्कने ॥ परिकल्कनं शाठ्यम् (चहति । चचाह । चेहतुः । चहितेत्यादि । अचहीत्) हान्तत्वान्न वृद्धिः (चिचहिषति । चाचह्यते । चाचाढि) "हो ढः" "झषस्तथोर्धो धः" "ष्टुना ष्टुः," "ढो ढे लोपः" "ढ्रलोपे०" इति दीर्घः । अयं चुरादौ मित्प्रकरणे, कथादौ च मित्सु पान्तं मैत्रेयः पठिष्यति ॥ ७१५ ॥

मह पूजायाम् । (महतीत्यादि) । चहिवत् । (महीति) गौरादिपाठात् ङीष् । (महिषः) । "अविमह्योष्टिषच्" । टित्त्वात् स्त्रियां (महिषी) । महिषा अस्मिन् सन्ति (महिष्मान् देशः । [महिषाच्चेति वक्तव्यम्] इति "तदस्मिन्नस्तीति देशे तन्नाम्नि"ति विषये ड्मतुप् । डित्त्वाट्टिलोपः । महिष्या धर्म्यं (माहिषम्)। "अण्महिष्यादिभ्यः" इत्यण् तस्य धर्म्यमिति विषये । (महान् महान्तौ । महान्तः) । [वर्त्तमाने पृषन्महद्बृहज्जगच्छतृवच्च] इत्यतिप्रत्यये निपातितः । शतृवद्भावान्नुम्, *सान्तमहतः०* इत्यसंबुद्धौ सर्वनामस्थाने दीर्घ उपधायां, संयोगापेक्षमुपधात्वम् । संबुद्धौ तु संयोगान्तलोपे (हे महन्) । शतृवद्भावादतिप्रत्ययस्य स्त्रियां "उगितश्च" इति ङीपि (महती) । महांश्चासौ पुरुषश्च (महापुरुषः) । *सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः* इति पूजावचनाः सदादयः पूज्यवचनैः सामानाधिकरण्यैः समस्यन्त इति तत्पुरुषे *आन्महतः समानाधिकरणजातीययोः* इति समानाधिकरण उत्तरपदे जातीयरि च प्रत्यये महत आत्त्वमित्याकारः । जातीयरि (महाजातीयः) । *प्रकारवचने जातीयर्* इति प्रकारो भेदः सादृश्यं च, तत्र वर्त्तमानात् स्वार्थे जातीयरिति जातीयर् । कथं महाबाहुर्वेवदत्त इति, यावता "सन्महत्०" इति प्रतिपदोक्ते समासे समानाधिकरणस्योत्तरपदस्य संभवस्तत्रैवात्वेन भाव्यम् । सत्यम् । यद्येतावत् प्रयोजनं स्यात् आन्महतो जातीयरि चेत्येव ब्रूयात् । चशब्देनोत्तरपदमाक्षेप्स्यते, तच्च प्रतिपदोक्तमेव भविष्यति, एवं सिद्धे सति यदेतत् समानाधिकरणग्रहणं तत्समानाधिकरणमात्रप्रत्ययार्थं विज्ञायते । महत्या घासो (महाघासः) । [महत आत्त्वे घासकरविशिष्टेषूपसङ्ख्यानं पुंवद्वचनं च] इति पुंवद्भाव आत्वं च । कथं महाकरो महाविशिष्ट इति । अमहान् महान् संपद्यते महद्भूतश्चन्द्रमाः । अत्र अमहत्यां प्रकृतौ वर्त्तमानात् महच्छब्दात् कारणभूतस्य कार्यात्मना भावे द्योत्ये विधीयत इति महच्छब्दस्य गौणार्थत्वात् मुख्ये च कार्यसम्प्रत्ययात् आत्वाभावः । महतो भावः (महिमा) । पृथ्वादिमनिचि "टेः" इतिटिलोपः । महत इति वृद्धौ गतः ॥ ७१६ ॥

रह त्यागे ॥ (रहतीत्यादि । महतिवत । रहः । रहसा ।) असुन्प्रत्ययः । (विरहीकरोति) ।

"अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्त्तरि०" "अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च" इति च्वि-प्रत्ययः सलोपश्च। "अस्य च्वौ" इति ईत्वम्। रहसि भवं (रहस्यम्)। दिगादित्वाद्यत्। (अरहसम्। अवरहसम्। तप्तरहसम्)। "अन्ववतप्ताद्रहसः" इति अन्वादिपूर्वाद्र हःशब्दान्तात् समासमात्रादच् समासान्तः। (राहुः)। "हसनिरहिजीनी०" इत्यादिना उण्। रह त्याग इति कथादौ मित्प्रकरणे च चुरादौ॥ ७१७॥

रहि गतौ (रंहति। ररंह। रंहिता) इत्यादि। इदित्त्वेन (रारंह्यते) इत्यादौ नलोपो न भवति। (रंहः)। असुन्॥ ७१८॥

दृह दृहि बृह बृहि वृद्धौ (दर्हति। ददर्ह। दर्हितेत्यादि। दरीदृह्यते) "रीगृत्वतः" इति रीक् (दर्दहीति। दर्दर्घि) *दादेर्धातोर्घः* इति झलि पदान्ते च हकारस्य घकारः। "झ-षस्तथो०" इति धत्वम्। "झलां जश् झशि" इति जश्त्वेन गकारः। (दाधर्त्सीत्यत्र) "एका-चो बशो०" इति दकारस्य धकारः। "खरि च" इति धकारस्य चर्त्वे तकारः। लङि तिप्सि-पोरपृक्तलोपे घत्वभष्भावजश्त्वचर्त्वेषु (अदर्धक्)। "रात्सस्य" इति नियमान्न संयोगान्तलो-पः। चर्त्वस्य पूर्वत्रासिद्धत्वाद् झषन्तत्वम् (दर्हयति। अददर्हत्। अदीदृहत्। दर्हित्वा। दर्हितुम्। दृंहति। ददृंह। दृंहिता। दिदृंहिषति। दरीदृंह्यते) "रीगृत्वतः" इति रीक् (द-र्दृंहीति। दर्दृङ्धि। दर्दृङ्धः) लङि तिप्सिपोर्हल्ङ्यादिलोपे पदान्तसंयोगान्तलोपे पदा-न्तत्वे झषन्तत्वाभावान्न भष्भाव इति (अदर्दृन्। दृंहित्वा। दृहित्वा। दृंहितम्। दृढः।) "दृढः स्थूलबलयोः" इति क्तस्यानिट्त्वात्तकारस्य ढत्वं नकारहकारयोर्लोपश्च निपात्यते। दृंहेरपीदं निपातनम्। तथा च वृत्तिः। अथ दृहिः प्रकृत्यन्तरमस्ति तस्याप्येतदेव सर्वं नलोप-वर्जमिति। स्थूलबलाभ्यामन्यत्र दृहितः। नन्वत्र तकारस्य ढत्वे हकारलोपश्च किमर्थं निपा-त्यते। यावता हो ढे "झषस्तथोः" इति धत्वे ष्टुत्वढलोपयोः सिद्धं दृढ इति। सत्यं सि-ध्यति। इह हि दृढिमा। द्रढीयान्। द्रढिष्ठः। दृढमाचष्टे द्रढयति। "र ऋतो हलादेर्लघोः" इति ऋकारस्य विधीयमानो रभावो ढलोपस्य पूर्वत्रासिद्धत्त्वात् संयोगपरत्वेन गुरुत्वाल्लघुत्वा-भावान्न स्यात्। तथा च परिद्रढय्येत्यत्र परिदृढमाचष्ट इति विगृह्य सोपसर्गाच्चेत्संग्रामय-तेरेवेति नियमाद् दृढशब्दाण्णौ टिलोपे क्त्वान्ते समासे क्त्वो ल्यपि च कृते "ल्यपि लघुपूर्वा-त्" इति लघुपूर्वाद्वर्णात्परस्य णेर्ल्यपि परे विधीयमानोऽयादेशो न स्यात्। नन्वेवमपि टिलो-पस्य "असिद्धवद्" इत्यसिद्धत्वान्न लघुपूर्वाद्वर्णात्परो णिर्भवति। नैतत्। णौ टिलोपो णे-र्ल्यप्ययादेश इति व्याश्रत्वेनासिद्धत्वाप्रसङ्गात्। न च पूर्वस्मादपि विधौ स्थानिवद्भाव इति टिलोपस्थानिवत्त्वेन व्यवधानम्। प्रवेभिदय्य गतः प्रस्तनय्य गत इत्यादीनां भाष्ये उदाहर-णात्। यद्वा लघुपूर्वादित्यनेन सामर्थ्यादन्यपदार्थस्य वर्णस्यापेक्षयात्र वर्णग्रहणे जातिग्रहण-मिति "निपात एकाच्०" इत्येकग्रहणेन ज्ञापकात्स्थानिवद्भावेन व्यवधानेपि न दोषः। यथा परिवृढस्यापत्यं पारिवृढी कन्येत्यत्र *अणिञोः०* इति अनार्षे गोत्रे यावणिञौ तदन्तयोर्गु-रूपोत्तमयोः स्त्रियां ष्यङिति ष्यङ् प्रसज्येत। (वर्हति। वृंहतीत्यादि पूर्ववत्।) दादित्वाभावान्न घत्वमिति झलि पदान्ते "हो ढः"। (एवं परिवृढः)। "प्रभौ परिवृढः" इति इडभावादि पूर्ववन्नि-पात्यते। अत्रापि हलोपादेः पूर्ववत् प्रयोजनम्। प्रभोरन्यत्र (परिवृंहित) इति। सानुषङ्गावेव पाणिनीयौ। यदाह वृत्तिकारः दृढपरिवृढनिपातनं, यदि दृहिः प्रकृत्यन्तरमस्तीति, निरनुष-ङ्गौ भाष्यकारीयौ, दृश्येते हि वृढनिपातनं किमर्थं, न दृंहेरिड् भवतीत्येवोच्येत परिवृढनिपात-नं किमर्थं परिपूर्वाद्वृहतेनड्भवतीत्येवोच्येतेति, तथा "न धातुलोप आर्धधातुके" इत्यत्र दृहिः प्रकृत्यन्तरमस्तीति॥ ७१९॥

वृहि शब्दने॥ वृंहितं करिगर्ज्जितम्। वृहिर् इति चन्द्रगुप्तौ। तत्फलं च (अवृहत्)॥ अवर्हीदिति पक्षे इट्सिद्धिरित्याह। क्षीरस्वामी वृह वृहि भाषार्थौ। वर्हत इति प्राधान्ये गतम्। तुहिर् दुहिर् उहिर् अर्दने॥ (तोहति। तुतोह। तोहिता)। लुङि "इरितो वा" इति पक्षे अ-

ङ् (अतुहत् । अतोहीत् । तुतुहिषति । तुतोहिषति । तुहित्वा ।) "रलो व्युपधाद्०" इति कित्त्वम् । (तुह्यते । तोतोढि । तोतूढ इत्यादि । तोहयति । अतूतहत् । तुहितम्) "वेपितुह्योर्ह्रस्वश्च" इतीन् प्रत्ययः, ह्रस्ववचनं वेपत्यर्थम् । (देहतीत्यादि । तोहतिवत् ।) दिहिर्दुहिमिहतिरोहती इत्यनिट्कारिकायां मैत्रेयादयो नास्य ग्रहणमिच्छन्ति । (उहति । उवोह । ऊहतुः ऊहुः ओहितेत्यादि) उषिवत्प्रक्रिया, लुङि (मा भवानुहत्) ॥ ७२६ ॥

अर्ह पूजायाम् ॥ हकारप्रसङ्गादनिडपीह पठितः । (अर्हति । आनर्ह । अर्हिता । अर्जिहिषति माभवानर्जिहत् । सुखार्हः दुःखार्हः) । "अर्हः" इति कर्मण्युपपदेऽच् । (अर्हन्) । "अर्हः प्रशंसायाम्" इति शता । प्रशंसाया अन्यत्र (वधमर्हति चोरः) । अर्हतो भाव (आर्हन्त्यम् ।) "अर्हतो नुम् च" इति ब्राह्मणादिपाठात् ष्यञ्नुमौ । (अर्घः) संज्ञायाम अर्घमेघनिदाघा इति न्यङ्क्वादिपाठात् कुत्त्वम् । अर्घो विक्रीयमाणस्य धान्यादेरियत्ता । अन्ये तु मूल्यमिति, तथा चानर्घ्य इति पठ्यते । अमूल्यमित्यर्थः । पूजाविधिरप्यर्घार्थमुदकम् (अर्घ्यम्) । "पादार्घाभ्यां च" इति तादर्थ्ये यत् । अर्हतिराधृषीयोपि । घुषिरादय उदात्ता उदात्तेतः ॥ ६६२ ॥

एवं तुहिरादितुह्यन्तात् विकल्पितेटः परिसमाप्य आत्मनेपदपरस्मैपदभेदेन विकल्पितेटो ऽन्यानप्याह ।—

द्युत दीप्तौ ॥ एतदादयः कृपूपर्यन्ता उदात्ता अनुदात्तेतः । (द्योतते । दिद्युते ।) "द्युतिस्वाप्योः सम्प्रसारणम्" इति हलादिशेषं बाधित्वा सम्प्रसारणमभ्यासस्येति शेषः (द्योतिता । द्योतिष्यते । द्योतताम् । द्योतेतेत । आशिषि द्योतिषीष्ट । अद्योतिष्ट । अद्युतत्) "द्युद्भ्यो लुङि" इति वा परस्मैपदम् । द्युद्भ्य इतिबहुवचनादाद्यर्थावगतिः । यदा परस्मैपदं तदा पुषादित्वादङ् (दिद्युतिषते । दिद्योतिषते । द्युतित्वा । द्योतित्वा) "रलोव्युपधा०" इति वा कित्त्वम् । देद्युत्यते । "द्युतिस्वाप्योः०" इत्यभ्यासस्य संप्रसारेण "गुणो यङ्लुकोः" इत्यभ्यासनिमित्तत्वेन प्रत्यये नानन्तर्यमाश्रीयते इति णिचा व्यवधानेप्यत्र संप्रसारणं भवति । अत एव तत्र वृत्तौ अद्युतदित्युदाहारि । तथा "दाधर्ति०" इतिसूत्रे दविद्युतदित्यत्र द्युतेर्यङ्लुगन्तस्य शतरि अभ्यासस्य संप्रसारणाभावो विगागमश्चात्वं चास्य निपात्यत इत्युक्तम् । आनन्तर्ये ह्याश्रीयमाणे यङो लुका लुप्तत्वादानन्तर्याभावान्न संप्रसारणस्य प्रसङ्ग इति किं तदभाववचनेन । अत्र शिवदेवः । "हेरचङि०" इति अभ्यासादुत्तरस्य हिनोतेः कुत्त्वमुक्त्वा तस्याचङीति निषेधाङ्गित्वात्प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणमिति सामान्येन परिभाषासाश्रित्य पर्यहार्षीत् । अभ्यासस्य निमित्ते प्रत्ययानन्तर्ये आश्रीयमाणे ऽजीहयदित्यत्र णिचा ऽङो व्यवधानात्कुत्त्वाप्रसङ्गेऽपि क्रियमाणोयं निषेधो ण्यधिकस्य ज्ञापयति । अस्याः परिभाषायाः सामान्यापेक्षत्वं वार्तिककारस्याभिमतम् । यदाह देवः चङोन्यत्र ण्यधिकस्यापि कुत्वं भवति, तेन प्रजिघाययिषतीति सिद्धं भवतीति । तथा च वार्किमपि । [हेश्चङि प्रतिषेधानर्थक्यमङ्गान्यत्वात] ज्ञापकं त्वन्यत्र ण्यधिकस्य कुत्वज्ञापनार्थमिति । एवं "स्तम्बकर्णयोरमिजपोः" "अर्हः" इत्यादौ ण्यधिकस्य ग्रहणाभावाद् ण्यन्तादचो ऽभावादणि सुखार्हीत्यादि सिद्धति । यदुक्तं सीरदेवेन ण्यधिकपरिभाषाया अव्यापिनीत्वात् अर्हादावप्रवृत्तिरिति । सामान्यत्वमङ्गीकृत्य तदपि वृत्तिवार्त्तिकविरोधादेव प्रत्युक्तम् । अस्योदुपधत्वाद् "उदुपधाद्भावादिकर्मणो०" इति निष्ठायाः कित्त्वविकल्प उदाहार्यः । (द्युतितमनेन द्योतितमनेनेत्यादि विद्युत्) । "भ्राजभास०" इत्यादिना क्विप् । (दिद्युत) । [द्युतिगमिजुहोतीनां द्वे च] इति क्वौ द्वित्वे ऽभ्यासस्य सम्प्रसारणम् । (ज्योतिः) । द्युतेरिसन्, आदेश्च ज इतीसन् आदेश्च जः ॥ ७२८ ॥

श्विता वर्णे ॥ (श्वेतते ! शिश्विते । श्वेतिता । अश्वितत् । आश्वेतिष्टेत्यादि पूर्ववत् । श्वितम्) "ओदितश्च" इति निष्ठायामनिट्त्वम् । भावादिकर्मणोस्तु "विभाषा भावादिकर्मणोः" इतीडप्युदाहार्यः । (श्वितितमनेनेत्यादि । श्वित्रम्) । "स्फायितञ्चि०" इत्यादिनारक् ७२

ञिमिदा स्नेहने ॥ (मेदते । मिमिदे । मेदिता । अमिदत् । अमेदिष्टेत्यादि) *मिदेर्गुणः* इत्यत्र शिद्ग्रहणमनुवर्त्तते तच्च कर्मधारय इति यस्मिन्विधिरितीत्संज्ञकशकारादौ गुण इति शप्यगुणाभावः । (भिन्नः)।"ञीतः क्तः"।"रदाभ्याम्"इति नत्वम् । आदित्त्वादनिट्त्वम् । भावादिकर्मणोस्तु "विभाषा भावादिकर्मणोः" इति वेट्,"निष्ठाशीङ्"इति सेटो निष्ठायामकित्त्वाद्गुणे (मेदितमनेनेत्यादि । (मेदुरः) । "भञ्जभासमिदो घुरच्" । (मित्रम्) । "अमिमिदिशसिभ्यः क्त्रन्" इति क्त्रन् । अयं दिवादिश्चुरादिश्च । मिद मेधाहिंसनयोरिति भ्वादौ । ञिमिदा स्नेहने मोचने च । स्नेहनमोचनयोरिति क्वचित्पठ्यते ॥ ७३० ॥

ञिष्विदा गात्रप्रस्रवणे ॥ (स्वेदते । सिष्विदे । स्वेदिता । अस्विदत् । अस्वेदिष्ट । सिस्विदिषते) । "स्वौतिण्योरेव०" इत्यषत्वम् । (सेष्विद्यते । सेष्वेत्ति । स्वेदयति । असिस्विदत्) ण्यन्तात्सनि "सः स्विदिस्वदिसहीनां च" इति अभ्यासात्परस्य षत्वम् । सिस्वेदयिषतीति । निष्ठायां मिदिवत् (स्विन्नः) इत्यादि । अत्र स्वामी ञिक्ष्विदेति क्ष्वकारं पठित्वा ञिष्विदेति नान्दीत्याह । तत्र (क्ष्वेदते । चिक्ष्विदे । अक्ष्विदत् । अक्ष्वेदिष्टेत्यादि) क्ष्वेदतीत्यव्यक्ते शब्दे भविष्यति । स्विद्यतीति स्नेहनसेकयोर्दिवादौ । स्विद्यतीति गात्रप्रक्षरणे ॥ ७३१ ॥

रुच दीप्तावभिप्रीतौ च ॥ (रोचते देवदत्ताय मोदकः) । "रुच्यर्थानां प्रीयमाणः" इति प्रीयमाणस्य संप्रदानत्वाच्चतुर्थी । (रुरुचे । रोचिता । अरुचत् । अरोचिष्ट । रुरुचिषते । रुरोचिषते । रुचित्वा । रोचित्वा) भृशं रोचतइत्यर्थे यङ्लुगिष्यत इतिवृत्तिन्यासादौ । (रोचयति । रोचयते) ।"अणावकर्मकात्"इति कर्त्रभिप्राये प्राप्तेःपरस्मैपदे"न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः" इति निषिध्यते (रोचयति । रोचनः । रोचनम्) नन्दिवासिदसिरुच्यसीधिवर्द्धिरोचिभ्यो ण्यन्तेभ्यः संज्ञायामिति नद्यादिपाठे ल्युः । (रोचिष्णुः) "अलंकृत०" इत्यादिनेष्णुच् (रुच्यः) "राजसूय०" इत्यादीना कर्त्तरि क्यप् निपात्यते । ।(रोकः) । घञ् । "चजोः कुघिण्ण्यतोः०" इति निष्ठायामनिटः कुत्वं वदतो वार्त्तिककारस्य "विभाषा श्यावारोकाभ्याम्" इति निपातनात् कुत्वम् । (रोचिः) । "शुचिरुच्योः संज्ञाम्" इति सिः । (रुक्मम् ।) "युजिरुचिनिजां कश्च" इति मन्प्रत्ययः ; तकारस्य ककारः (रोचकः) । "क्वुन् शिल्पिसंज्ञयोः" इति क्वुन् ॥ ७३२ ॥

घुट परिवर्त्तने ॥ (घोटते । जुघुटे । घोटिता । अघुटत् । अघोटिष्ट । घुटित्वा । घोटित्वा) "रलो व्युपधाद्०" इति वा कित्त्वम्, (जोघुट्यते । जोघोट्टि । घोटयति । अजूघुटत् । घुटितः) भावादिकर्मणो कित्त्वविकल्पे (घुटितमनेनःघोटितमनेनेत्यादि) । अच् । (घोटः । घोटकः) । संज्ञायां कन् । (घुटिका) । संज्ञायां क्वुन् । अयं तुदादौ च ॥ ७३३ ॥

रुट लुट लुठ प्रतीघाते ॥ आद्यौ प्रथमान्तौ । अन्त्यो द्वितीयान्तः । अयं पाठो देवमैत्रेयादीनाम् । हरियोगिनस्तु द्वावेव । "धातोः कर्मणः०" इत्यत्र कैयटे द्वितीयान्तौ पठितौ । क्षीरस्वामी त्वेवं पठित्वा आह रुट लुटेत्येके । बाधृ लोडने इति लिङ्गाद् इति तथा लुठ दीप्तावित्यप्यसावाह, लुट इति तु शाकटायनः । सुधाकरस्तु भूवादिसूत्रे लुठतिर्द्वितीयान्तोपि लुठितो लोठमान इति प्रयोगदर्शनादित्याह (रोठते । लोठते) इत्यादि पूर्ववत् । लोठतीति लोडने गतम् । (रुण्ठति लुण्ठतीति स्तेये । रोठति लोठतीत्युपघाते । लुण्ठतीत्यालस्यप्रतिघातयोः । रुण्ठति लुण्ठतीति) द्वयं गत्यर्थे ॥ ७३६ ॥

शुभ दीप्तौ ॥ (शोभते । शुशुभे । अशुभत् । शुशुभिषते । शुशोभिषते । शुभित्वा । शोशोभित्वा । शोशुभ्यते । शोशोब्धि । शोभयति । अशूशुभत्) हिंसाभवनयोः (शोभति । शुभति) ॥ ७३७ ॥

क्षुभ सञ्चलने ॥ संचलनं प्रकृतिविपर्यासो गमनं च (क्षोभते । अक्षुभत् । अक्षोभिष्टेत्यादि) पूर्ववत् । (क्षुब्धो मन्थः) । "क्षुब्धस्वान्त०" इति मन्थे निष्ठायामनिट्त्वं निपात्यते ।

अन्यत्र (क्षुभितः) । अयं दिवादिः क्र्यादिश्च ॥ ७३८ ॥

णभ तुभ हिंसायाम् ॥ (प्रणभते । नेभे । नभिता । अनभिष्ट । तोभते । तुतुभे । तोभिता । अतुभत् । अतोभिष्ट) । णभिरयमभावेपि वर्त्तते । नभन्तामन्यके सम इत्यत्र मा भूवन्नन्यके सर्वे इति निरुक्तम् । तथा नभन्तामन्यके मा ज्याका अधिधन्वसु' इत्यत्र भाष्येषु अन्यकेषां शत्रूणां धन्वसु स्थिता ज्याकाः छिन्ना मा भवन्त्विति । नभः समुद्रमाकाशश्च । असुन्नित्यादिना असुन्प्रत्ययः । इमौ दिवादी क्र्यादी च ॥ ७४० ॥

स्रंसु ध्वंसु भ्रंसु अवस्रंसने ॥

ध्वंसु गतौ च ॥ (स्रंसते । सस्रंसे । स्रंसिता । अस्रसत् । अस्रंसिष्ट) ।अङि नलोपः (सिस्रंसिषते । सनीस्रंसीति । सनीस्रस्तः) "नीग्वञ्चुस्रंसु०" इत्यादिना नीक् (स्रंसित्वा । स्रस्त्वा) उदित्त्वादिड्विकल्पः । इटपक्षे कित्त्वाभावान्नलोपाभावः (स्रस्तम्) उखायाः स्रंसते इति (उखास्रत्) "क्विप् च" इति क्विप् । "वसुस्रंसुध्वंसु०" इति पदान्तसकारस्य दकारः । (सनीस्रस्तः) । यङ्लुगन्तात् क्वौ नलोपः । दत्वं सानुबन्धकनिर्देशान्न भवति । रुत्वविसर्जनीयौ । "अत्वसन्तस्य०" इति दीर्घो ऽधातोरिति निषेधान्न भवति । (सनीस्रंसः) । अच्परे यङ्लुकि यङो लुप्तत्वात प्रत्ययलक्षणाभावान्नलोपाभावः । (एवं ध्वंसते) इत्यादि । अत्र तृतीयं मैत्रेयस्वामिबोधनिन्यासमम्मताकारादयः तालव्योष्मान्तं पठन्तो नीग्विधावपि तथा वदन्ति । (भ्रंशतइत्यादि) । अत्र क्वचित् भ्रशिरपि पठ्यते । भ्रशु भ्रंशु अधःपतनइति दिवादौ देवमैत्रेयादिमते । स्रसते इति प्रमादे गतः ॥ ७४४ ॥

स्रम्भु विश्वासे (विस्रम्भते । सस्रम्भे । स्रम्भिता । अस्रभत् । अस्रम्भिष्ट । सिस्रम्भिषते । सास्रभ्यते । सास्रम्भि । स्रम्भयति । असस्रम्भत । स्रम्भित्वा । स्रब्ध्वा । विस्रम्भी) "वौ कषलस्र०" इति घिनुण् । स्रम्भतइत्यादि तालव्यादिः काश्यपादिमते प्रमादे गतः ॥ ७४९ ॥

वृतु वर्त्तने (वर्त्तते । ववृते । वर्तिता । वर्त्तिष्यते । वर्त्स्यति । वर्त्तताम् । अवर्त्तत । वर्त्तेत । वर्त्तिषीष्ट । अवृतत । अवर्त्तिष्ट । अवर्त्तिष्यत । अवर्त्स्यत । विवर्त्तिषते । विवृत्सति) *वृद्भ्यः स्यसनोः*वा परस्मैपदम् । वृद्भ्य इति बहुवचननिर्देश आद्यर्थावगमार्थ इति वृतुवृधुस्यन्दिक्रृपीनामपि स्यसनोर्वा परस्मैपदं द्रष्टव्यम् । *न वृद्भ्यश्चतुर्भ्यः* इति सकादेरार्धधातुकस्य परस्मैपदपरस्य इडभावः, झलादेः सनः "हलन्ताच्च" इति कित्त्वादगुणत्वम् । "न वृद्भ्यश्चतुर्भ्यः" इति अत्र भाष्यवार्तिकयोः[सिद्धं तु वृतादीनामात्मनेपदेन समानपदस्थस्येड्वचनात्] इत्युक्तत्वात् कृत्परेपि सादौ परस्मैपदे लुकि चेटः प्रतिषेधो भवति । (विवृत्सिता । विवृत्सितुम् । विवृत्सितव्यम् ।) विवृत्सेति सामान्येन वलादाविति सिद्धे आरभ्यमाणमिदमात्मनेपदेन समानपदस्येड्विधाने ऽर्थादन्यनिवृत्त्यर्थं, विवृत्सिषीयत इति आत्मनेपदेन समानपदस्थत्वेप्यन्तरङ्गः प्रकृत्याश्रयः प्रतिषेधो भवति । न तु बहिरङ्ग आत्मनेपदाश्रयो विधिः । (वरीवृत्त्यते) । "रीगृत्वतः इति रीक । (अवर्वः) इत्यादि नेयम् (वर्त्तयति । अववर्त्तत् । अवीवृतत् ।) वर्त्स्यन् बर्त्तिष्यमाणो वा (वर्त्तिष्णुः) "अलंकृञ्०" इत्यादिना इष्णुच् । (हस्तवर्त्तं वर्त्तयति) । *हस्ते वर्त्तिग्रहोः* इति हस्तवाचिनि करणे उपपदे ण्यन्तादस्मात् ग्रहेश्च णमुल् । हस्तइत्यर्थग्रहणमिति (पाणिवर्त्तस्) इत्याद्यपि भवति । कषादित्वाद्यथा विध्यनुप्रयोगः वृत्तः। अयं यदान्तर्भावितण्यर्थस्तदा सकर्मकः, यथा "तेन निर्वृत्तम्" इति । निर्वर्त्तितमिति ह्यत्रार्थः, यद्येवं "णेरध्ययने वृत्तम्" इति निष्ठायामिडभावनिपातनं किमर्थं यस्मादन्तर्भावितण्यर्थादस्मात्वृत्तमध्ययनमिति भविष्यति । एवं तर्हि ण्यन्तादप्यध्ययने वृत्तमित्येव यथा स्यान्न तु वर्त्तितमित्येवमर्थं निपातनम् । अत्र वृत्तिकारो ऽमुं पक्षमुक्त्वा वर्त्तितो गुणो देवदत्तेनेति चेष्टमित्याह । अत्र हरदत्तः । तेषां नार्थः सूत्रेणेति । वृत्तं तदिति (वर्त्म) । "उणादयो बहुलम्" । "भूतेपि दृश्यन्ते" इति मनिन् । (वर्त्मनिः) । रथमार्गः । "अदेर्मुट्" "वृत्तेश्च" इति मुडागमो निप्रत्ययश्च । अदि-

वृतिभ्यां सुट् चेति वक्तव्ये पृथग्योगकरणात्पक्षे सुण्न भवति। (वर्त्तः) इत्यपि भवति। (वर्त्तनो)। ऋदिकारत्वाङ्गीन्। अयं भाषार्थश्चुरादौ ॥ ७४६ ॥

वृधु वृद्धौ ॥ (वर्धतइत्यादि पूर्ववत्। वर्धिष्णुः) "अलंकृञ्०" इत्यादिनेष्णुच् (वर्द्धनः) नन्द्यादिपाठात् ल्युः। (वृद्धः)। अतिशयेन वृद्धौ (वर्षिष्ठः। वर्षीयान्) *प्रियस्थिर०* इति इष्ठन्नीयसुनोर्यथासंख्याद् वृद्धस्य वर्षादेशः (ज्येष्ठः। ज्यायान्) "ज्य च" इति ज्यादेशः। अकारोच्चारणसामर्थ्याट्टिलोपो न भवतीति प्रागेवोक्तम्। (वृद्धमाचष्टे वर्षयति। ज्यापयति।) णाविष्ठवदिति वर्षज्यादेशौ। वृद्धिः। "तितुत्र०" इति नेट्। वृद्ध्यर्थं द्रव्यमपि, तत् प्रयच्छतीति (वार्द्धुषिकः)। *ततप्रयच्छति गर्ह्यम्* इति द्वितीयान्ताद् गर्ह्योपाधिकात्प्रयच्छतीत्यर्थे ठगिति ठक्। वृद्धेर्वृधुषभावः। वृधुषिः प्रकृत्यन्तरं वेति वृत्तिः। वृद्धेर्गर्ह्यत्वमशास्त्रीयत्वेन। अयं भाषार्थश्चुरादौ ॥ ७४७ ॥

शृधु शब्दकुत्सायाम् ॥ शर्द्धत इत्यादि पूर्ववत्। अयं प्रहसने चुरादिः। वृतादयस्त्रय उदितः ॥ ७४८ ॥

स्यन्दू प्रस्रवणे ॥ (स्यन्दते। सस्यन्दे। सस्यन्दिषे। सस्यन्त्से) ऊदित्त्वात् "स्वरतिसूति०" इत्यादिना वलादावार्द्धधातुक इड्विकल्पः (स्यन्दिता। स्यन्ता। स्यन्दिष्यते। स्यन्त्स्यते) "वृद्भ्यः स्यसनोः" इति यदा परस्मैपदं तदा स्यन्देरूदिल्लक्षणमन्तरङ्गमपीड्विकल्पं "न वृद्भ्यः०" इति निषेधश्चतुर्ग्रहणसामर्थ्याद्बाधते इति (स्यन्त्स्यति। अस्यन्त्स्यत्। सिस्यन्त्सतीत्येव भवति। स्यन्दताम्। अस्यन्दत। स्यन्दिषीष्ट। स्यन्त्सीष्ट। अस्यन्दिष्ट। अस्यन्दिष्यत) इडभावे झलि सिलोपे चर्त्वे (अस्यन्त। अस्यन्त्साताम् इत्यादि) "द्युद्भ्यो लुङि" इति यदा परस्मैपदं तदा "पुषादिद्युतादि०" इति अङ्। अनुनासिकलोपः (अस्यदत्। अस्यदतामित्यादि। अस्यन्दिष्यत। अस्यन्त्स्यत। सिष्यन्दिषते। सिस्यन्त्सते। सिस्यन्त्सति। अनुस्यन्दते जलम्। अनुष्यन्दत इति वा) "अनुविपर्यभिनिभ्यः०" इति वा षत्वम्। एवं पर्यादिभ्य उदाहार्यम्। अप्राणिष्वित्यस्य पर्युदासत्वात्प्राण्यप्राणिसमुदायोपि प्राणिव्यतिरिक्त इति मत्स्योदके अनुष्यन्देते इत्यत्रापि वा मूर्द्धन्यो भवति (स्यन्दित्वा। स्यन्त्वा) "क्त्वि स्कन्दस्यन्दोः" इत्यादिष्वपि नलोपो निषिध्यते। (स्यन्नः)। निष्ठायां "यस्य विभाषा"इत्यनिट्त्वम्। (स्यदः)। घञि"स्यदो जवे"इति निपातन्नलोपः,वृद्ध्यभावश्च। जवादन्यत्र (स्यन्दः, स्यन्दनः)।"अनुदात्तेतश्च० इति युज्वा। (सिन्धुः)। "स्यन्देः सम्प्रसारणं धश्च" इप्युप्रत्ययः सम्प्रसारणं धश्चान्तादेशः सिन्धौ जातः (सिन्धुकः। सैन्धवः)। "सिन्ध्वपकराभ्यां कन्"। "अणञौ च" इति कनणौ। सिन्धुरभिजनो यस्य (सैन्धवः)। "सिन्धुतक्षशिलादिभ्यामणञौ"इत्यण्। सिन्धौ भवादिरपि(सैन्धवः)। "कच्छादिभ्यश्च"इति शैषिकोण्। यदा त्वयं भवानिर्मनुष्यः तत्स्थो वा तदा "मनुष्यतत्स्थयोर्वुञ्" इति वुञ्। (सैन्धवको मनुष्यः। सैन्धवकं हसितमिति)। लवणसिन्धौ भवं (लावणसैन्धवम्)। "प्राग् दीव्यतोण्" "हृद्भगसिन्ध्वन्ते पूर्वपदस्य च"इत्युभयपदवृद्धिः ॥ ७४९ ॥

कृपू सामर्थ्ये ॥ (कल्पते। चक्लृपे। चक्लृपिषे। चक्लृप्से) इत्यादि स्यन्दिवत्। विशेषस्तु "लुटि च क्लृप" इति लुटि स्यसनोरित्यत्र परस्मैपदं तदा "तासि च क्लृपः" इति लुटि सकारादावनिट्त्वं च (कल्प्ता कल्पतासीति) पूर्ववदिदमूदिल्लक्षणं विकल्पं बाधते। अत्र चात्मनेपदेन सन्पदस्थस्येति स्थितमिति सन्नन्तात्कृति परस्मैपदे लुकि च निषेधो भवति। (चिक्लृप्सिता। चिक्लृप्सेत्यादि) "हलन्ताच्च" इति सनः कित्त्वान्न गुणः। तथा यदा लिङ्सिचोरात्मनेपदे इडभावस्तदा "लिङ्सिचावात्मनेपदेषु" इति कित्त्वान्न गुणः (क्लृप्सीष्ट। अक्लृप्त। अक्लृप्सातामित्यादि) इट्पक्षे (कल्पिषीष्ट)। अकल्पिष्टेत्यादि) "कृपो रो लः" इति रेफस्य लत्वम्। तत्र वर्णात्मकस्य रेफस्य वर्णात्मको लकारः, यस्त्ववर्णात्मक ऋकारस्तस्यावर्णात्मक लृकारस्तत्र स्थान्यादेशयोः वर्णैकदेशयोः निर्देष्टुमशक्यत्वात् ऋकार-

स्य लकारः सम्बध्यते (चलीक्लृप्यते । चल्कल्सि । चलिकल्सि चलीक) इत्यादौ रिग्री-
बुक्कामपि कृपो भक्तत्वेन तद्रेफत्वाल्लत्वं भवति । तथा ह्युक्तम् । 'अदसोद्रेः पृथङ् मुत्वं के-
चिदिच्छन्ति लत्ववत्'इति । द्युतादीनां यङ्लुगन्तानां लुङ्यङ् नास्ति । "पुषादिद्युतादि०"
इति गणनिर्देशात् तेन (अदोद्योतोत्) इत्येव भवति । सिजपेक्षोत्र गुणो नाजादिपिदपेक्षः । तथा
वृतादीनां यङ्लुगन्तानां "न वृद्भ्यः" इति इण्निषेधोपि गणनिर्देशान्न भवति । (वरीवर्त्ति-
ष्यतीत्यादेव) । कृपेस्तु गणनिर्देशाभावात् "तासि च क्लृप" इति इण्निषेधो भवत्येव । (च-
ल्क्लृप्सासीत्यादि) । द्युतादय उदात्ता अनुदात्तेतः ॥ ७५० ॥

वृत् ॥ वृत् सम्पूर्णो द्युतादिर्वृतादिश्चेत्यर्थः। वृतु वर्त्तन इत्यस्माद्धातोर्भूतेपि क्विप् ॥ गण-
प्रयुक्तकार्यभाजो द्युतादीन् वृतादींश्च परिसमाप्यान्यानपि गणप्रयुक्तकार्यभाज आह—

घट चेष्टायाम् ॥ एतदादयस्त्वकारान्ता उदात्ता अनुदात्तेतः षितश्च, तत्फलं घटेत्यादौ
"षिद्भिदादिभ्योङ्" इत्यङ् । घटादयः फणान्ता मितः, तत्फलं तत्रतत्र दर्शयिष्यते ।
(घटते । जघटे । घटितेत्यादि । जिघटिषते । जाघट्यते । जाघट्टि । घटयति । अजीघटत्) ।
मित्त्वात् "मितां ह्रस्वः" इति णावुपधाह्रस्वः, यदा तु ण्यन्ताच्चिण्णमुलौ तदा *चिण्णमुलो-
र्दीर्घोन्यतरस्याम्* इति चिण्णमुल्परे णौ मितामुपधाया वा दीर्घशासनात् (अघाटि अघटि
घाटम् २ घटम् २) इति भवति । अमितस्तु वृद्धिरेव । ण्यन्तात्स्यादिषु चिण्वदिट्यपि
वा दीर्घः । (घटिष्यते । घाटिष्यते । अघाटिष्यत । अघटिष्यत । अघाटिषाताम् । अघटि-
षाताम् । घाटिषीष्ट । घटिषीष्ट । घाटिता । घटिता) । चिण्वदिटोसिद्धत्वात् "णेरनिटि"
इति णिलोपः । चिण्वदिडभावे गुणायादेशयोः कृतयोः (घटयिष्यत इत्यादि) कर्मकर्त्तर्यप्येवम् ।
लुङ्येकवचने तु "णिश्रि" इति यक्चिणोर्निषेधादङि (अजीघटत स्वयमेवेति) भवति । "अचः
कर्मकर्त्तरि" इति चिण्विकल्पस्य ण्यन्ते न विषय इति प्रागेवोक्तम् । "घटादयो मितः"
इति गणनिर्देशेन विधीयमानत्वान्मित्त्वस्य यङ्लुक्यभावात् न ह्रस्वो नापि दीर्घविकल्प
इति (जाघाटयति। अजाघाटीत्यादि) भवति । (घटी) । अजन्तत्वात् "जातेरस्त्रीविषयात्" इति
ङीष् । (घटना) । "घट्टिवन्दिविदिभ्यश्च" इति युच् । (घटिका) । "क्वुन् शिल्पिसंज्ञयोः"
इति क्वुन् । अपरे गणान्तराधीता इह पठ्यन्ते तेषामिहोपात्त एवार्थे मित्त्वं, ये त्वपूर्वाः
पठ्यन्ते तेषामुपात्ते वानुपात्ते वार्थे मित्त्वं, तदुक्तं बोधन्यासे, केचिदिहैव पठ्यन्ते तेषामुप-
सर्गादिना अर्थान्तरेऽपि सानुबन्धत्वं यथा (विघटयतीति,) अपरे गणान्तराधीता इह पठ्यन्ते
तेषामर्थेन नियमः । यथा स्मृ चिन्तायामन्यत्र पठितो ऽत्र स्मृ आध्याने, आध्यानमुत्क-
ण्ठापूर्वकस्मरणम् । (स्मरयति । अन्यत्र स्मारयति) । अत्र तरङ्गिण्यामपीदमेवार्थतत्त्वं
स्थितम् । घाटयतीति घट सङ्घात इति चौरादिकस्य, तस्य हि मित्त्वं निषिध्यते । "नान्ये
मितो हेतौ" इति ज्ञपादिपञ्चकव्यतिरिक्ता अहेतौ स्वार्थे णिचि मितो न भवन्तीत्यर्थः । अत
एव स्वार्थे णिचि मित्त्वनिषेधाच्चेष्टायां मित्त्वार्थं तस्यायमनुवादो न भवति ॥ ७५१ ॥

व्यथ भयसञ्चलनयोः ॥ (व्याघ्रात् व्यथते) । *भीत्रार्थानां भयहेतुः* इति बिभेत्यर्थानां
त्रायत्यर्थानां च प्रयोगे भयहेतुः कारकमपादानमिति व्याघ्रस्यापादानत्वात्पञ्चमी । (व्यथते ।
विव्यथे) । "व्यथो लिटि" इत्यभ्यासस्य सम्प्रसारणं, *न सम्प्रसारणे सम्प्रसारणम्* इति
पूर्वस्य यणो यकारस्य सम्प्रसारणपरत्वात्सम्प्रसारणं न भवति, सम्प्रसारणइति च सम्प्रसा-
रणभाविनीत्यर्थः । अस्मादेव वचनसामर्थ्यात्पूर्वं परस्य सम्प्रसारणं क्रियते पश्चाद्न्यस्य,
अत्र च वेलायामस्ति सम्प्रसारणपरत्वम् । अथ वा "व्यथो लिटि" इति सम्प्रसारणं हला-
दिशेषापवाद इति परस्यैव प्रसज्यते न पूर्वस्येति न चोद्यावकाशः । (व्यथितेत्यादि ।
विव्यथिष्यते । वाव्यथ्यये । वाव्यथीति । वाव्यत्ति । व्यथयति । अविव्यथत्) घटिव-
च्चिण्णमुलोरुदाहार्यम् । न व्यथत इति (अव्यथ्यः)। "राजसूय" इत्यादिना निपातितः। (अ-
व्यथी) "जिदृक्षि" इत्यादिना नञ्पूर्वात्ताच्छीलिक इनिः । (व्यथा) । षित्त्वादङ् ।

(विथुरः) । "विदिभिदि०" इत्यत्र व्यथेः सम्प्रसारणं चेति वचनात्कुरचि सम्प्रसारणम् । (विधुरः) । "व्यथेः संप्रसारणं धः किच्च" इति वचनादुरचि सम्प्रसारणं थकारस्य धकारः । व्यथ दुःखचलनयोरिति दुर्गः । भयचलनयोरिति प्रकाशः । तवर्गचतुर्थान्तोयं दिवादौ ॥ ७९२ ॥

प्रथ प्रख्याने ॥ (प्रथते । पप्रथे । प्रथितेत्यादि । प्रथयति । अपप्रथत्) । *अत् स्मृदृत्वरप्रथम्रदस्तृस्पशाम्* इति चङ्परे णावभ्यासस्यात्वं मित्त्वापवादः । (अप्रथि । अप्राथीत्यादि) घटिवत् । (पृथिवी) । "प्रथेः षिवन्सम्प्रसारणं च" इति षिवन् षित्त्वान् ङीष् । पृथिव्या निमित्तं संयोग उत्पातो वा पार्थिवः । "सर्वभूमिपृथिवीभ्यामणञौ" इति अण् । पृथिव्या ईश्वरः पृथिव्यां विदित इति वा पार्थिवः । "तस्येश्वरः", "तत्र विदितइति च" इत्यण्, "पृथिव्या ञाञौ" इति प्राग्दीव्यतीयेष्वर्थेषु ञाञौ (पार्थिवम् ।) अनयोः स्त्रियां विशेषः । (पार्थिवा पार्थिवी । पृथुः) । "प्रथिप्रदिम्भ्रस्जां सम्प्रसारणं सलोपश्च" इति कुप्रत्ययः सम्प्रसारणं च । सलोपवचनं भृज्जत्यर्थम् । पृथोर्भावः (प्रथिमा) । "पृथ्वादिभ्य इमनिज्वा" इति इमनिच् । "र ऋतो हलादेः" इति ऋकारस्य रशब्दः। इमनिजभावे "इगन्ताच्च लघुपूर्वात्" इत्यणि (पार्थिवम्) । अत्र लवोः पूर्वत्वमिगपेक्षम् । तच्चेह द्वयोरचोरानन्तर्येणावस्थानासम्भवादेकहला व्यवधानमाश्रीयते । "वोतो गुणवचनात्" इति ङीषि (पृथ्वी) । गुणमुक्त्वा गुणिनि वर्त्तमानो गुणवचनः । अयं कथादावपि । अत्र के चित्पृथेति ऋकारोपधमपि पठन्ति । यदाह वर्द्धमानः । पृथिकन्दिक्षन्दिदृक्षादीनां घटादौ पाठः चिण्णमुलोर्वृद्ध्यर्थ इति । अत्र स्वामी प्रथेः सम्प्रसारणविधानमार्षं मन्यते । पुरुषकारोपि यद्प्रथयत् तत्पृथिव्याः पृथिवीत्वमिति श्रौतस्य निर्वचनस्यार्षपक्षेण्वाञ्जस्यमिति । अन्यथा यदपर्थयदित्येव ब्रूयात् । पुनश्चोक्तम् । अथापि पृथेर्घटादिपाठे तत्फलं घटादयः षित इति षित्त्वादङि सति पृथेति रूपं द्रष्टव्यमिति । व्यथादिस्थान्तः, पृथ प्रक्षेपइति चुरादौ ॥ ७९३ ॥

प्रस विस्तारे ॥ (प्रसते । पप्रसे । पिप्रसिषते । पाप्रस्यते । पाप्रस्ति) । लङि तिपि "तिप्यनस्तेः" इति दत्वे (अपाप्रत्) इति भवति सिपि "सिपि धातो रुर्वा" इति दत्वरुत्वयोः (अपाप्रत् । अपाप्रः । प्रसयति । अपिप्रसत् । अप्रसि । अप्रासीत्यादि । प्रसा) ॥ ७९४ ॥

म्रद मर्दने ॥ (म्रदते । मम्रदे । म्रदिता । मिम्रदिषते । माम्रद्यते । माम्रदीति । माम्रत्ति । म्रदयति । अमम्रदत्) । "अत् स्मृदृत्वरप्रथम्रद" इत्यादिनाभ्यासस्यात्वं मित्त्वापवादः । मृदुः । "प्रथिम्रदि" इत्यादिना कुप्रत्ययः सम्प्रसारणं च । नैतेन मृद्धातोरभावोनुमातव्यः । तत्र संप्रसारणस्यान्यार्थं वक्तव्यत्वात्, सत्त्व एव हि मृद्धातोर्मृदेत्यादिनिर्देशोपपत्तिः । मृदोरपत्यं, (मार्दयम्) "शुभ्रादिभ्यश्च" इति ढक् । "ढे लोपोकद्र्वाः" इति उकारलोपः (मृद्वी) गुणवचनत्वात् ङीप् । (मृद्विका) । कनि "केणः" इति ह्रस्वः । (म्रदिमा) । पृथ्वादिभ्य इमनिचि "र ऋतः" इति रः । तदभावे (मार्दवम् ,) स्वादुमृदुन इदं (सौवादुमृदवम्) "द्वारादीनां च" इति वृद्धिप्रतिषेध ऐजागमश्च । मृद क्षोद इति ऋकारोपधः क्र्यादौ॥७९५॥

स्खद स्खदने ॥ स्खदनं विद्रावणमिति स्वामी । (स्खदते । स्खदिता । स्खदयति । अचिस्खदत् । अस्खदि । अस्खादि) । "स्खदिरवपरिभ्यां च" इति मित्संज्ञानिषेधस्य वक्ष्यमाणत्वात् (अवस्खादयति । परिस्खायदति) इत्यत्र मित्त्वं न भवति । अपावपरिभ्य इति बोधिन्यासे पठ्यते । तन्मते अपस्खादयतीत्यत्रापि मित्त्वं न भवति ॥ ७९६ ॥

क्षजि गतिदानयोः ॥ क्षज इति कौशिकः । (क्षञ्जते । चक्षञ्जे । क्षञ्जिता । चिक्षञ्जिषते । चाक्षज्यते । चाक्षङ्क्ति) । झलि "चोः कुः" इति कुत्वे "खरि च" इति चर्त्वम् । अनुस्वारपरसवर्णौ । (क्षञ्जयति । अचक्षञ्जत् । अक्षञ्जि । अक्षाञ्जि । क्षञ्जंक्षञ्जम् । क्षाञ्जंक्षाञ्जम्) । मित्त्वसामर्थ्यादनुपधात्वेपि "चिण्णमुलोः" इति दीर्घविकल्पो भवतीति मैत्रेयसुधाकरादयः । क्षञ्जेति गुरुमत्त्वादङि सिद्ध्यति । एवमन्येषामपि संयोगान्तानां दक्षादीनां

मित्त्वसामर्थ्यात् दीर्घविकल्पः ॥ ७६७ ॥

दक्ष गतिशासनयोः ॥ वृद्धिशैघ्र्ययोरनुदात्तेदयं पठितस्तस्येहार्थविशेषे मित्त्वार्थोनुवादः । (दक्षयति । अददक्षत् । अदाक्षि । अदक्षीत्यादि) ॥ ७६८ ॥

क्रप कृपायां गतौ ॥ (क्रपते । चक्रपे । क्रपिता । चिक्रपिषते । चाक्रप्यते । चाक्रप्ति । क्रपयति । अचिक्रपत् । अक्रपि । अक्रापीत्यादि) । अस्येह पाठो मित्त्वार्थः । न तु षित्त्वार्थः । यतः क्रपेः सम्प्रसारणं चेति भिदादिपाठात् तत्फलमङ् सिद्ध्यति (क्रपेति । कृपाणः) । "त्यजियुधिकृपेः किच्च" इत्यानच् बहुलकादस्मादपि । (कृपणः) बाहुलकादेव क्युन् अस्मादपि । (कृपीटः) । "कृकृपिभ्यां कीटन्" इति कीटन् । अत्र "कृपो रोलः" इति लत्वाभावार्थं कृपिस्थाने क्रपिः पठितव्य इति "कृपो रो लः" इत्यत्र भाष्यादौ स्थितम् (कर्पूरः) । खर्जपिञ्जादिभ्य ऊरोलचावित्यत्रापि क्रपिग्रहणादूरः । कृपाणादौ बाहुलकात् सम्प्रसारणम् । यद्वा सर्व एववैते कृपेरेव लत्वाभावो बहुवचनादिति लत्वसूत्रे उक्तम् ॥ ७६९ ॥

कदि क्रदि क्लदि वैक्लव्ये ॥ अत्र क्षीरस्वाम्येवं पठित्वाह । वक्लव्य इति चन्द्रः । कद क्रद क्लदेति नन्दी अनिदितमाह । मैत्रेयस्तु कदिक्रदी द्वाविदितौ पठित्वा क्रदक्लदेति द्वावनिदितावाह । तत्रेदितोरन्त्यः सरेफ आद्यो नीरेफः, अनिदितोस्त्वाद्यः सरेफः, अपरो लकारवान् । वर्द्धमानोपि मैत्रेयवल्लकारवन्तमिदितं चापठत् । यदाह । प्रथिक्रन्दिक्लन्दिस्यन्दीनां घटादौ पाठः चिण्णमुलोर्वृद्ध्यर्थं इति । अत्र कदिक्रदिक्लदीनामाह्वानरोदनयोः परस्मैपदिषु गतानां पुनरिहापि पाठो न केवलमित्त्वार्थः किं त्वात्मनेपदिषु पाठसामर्थ्यात्तदर्थमपि । (कन्दते । चकन्दे । कन्दिता । चिकन्दिषते । चाकन्द्यते । चाकन्ति । कन्दयति । अचकन्दत् । अकान्दि, अकन्दि । कन्दंकन्दम् । कान्दंकान्दमित्यादि) । क्षजिवत् । मित्त्वसामर्थ्यादनुपधायामपि दीर्घविकल्पः । एवं (क्रन्दते । क्लन्दत इत्यादि) । अनिदित्पाठे (कदयति । अकादीत्यादि । एवं क्रदते । क्लदत इत्यादि । कन्दनं कन्दलः) । बाहुलकादलः । (कदली) । गौरादित्वान्ङीष् ॥ ७६२ ॥

ञित्वरा सम्भ्रमे ॥ (त्वरते । तत्वरे । त्वरिता । तित्वरिषते । तात्वर्यते । तातूर्ति । तातूर्त्तः । तातरीषि । तातूर्षि । तातूर्थः । तात्वरीमि । तातूर्मि) । *ज्वरत्वर* इत्युपधावकारयोः क्वौ झलादावनुनासिकादौ च झलिक्ङिति ऊठ् । लोटि हेरपित्त्वान्ङित्त्वादूठि (तातूर्हि । त्वरयति । अतत्वरत) "अत् स्मृदृत्वर" इत्यभ्यासस्यात्वम् । इत्वापवादः । (अत्वरि । अत्त्वारि । त्वरंत्वरम् । त्वारंत्वारम् । तूर्णः । त्वरितः) । "रुष्यमत्वरा" इति निष्ठायामिड्विकल्पः । अस्यादित्त्वमात्मनेपदमात्रफलमिति मैत्रेयहरदत्तादयः । अन्ये त्वादित्त्वं यङ्लुकीडभावार्थमाहुः । नहि तत्र "रुष्यमत्वर" इतीड्विकल्पः । एकाच इति तत्रानुवर्त्तनादिति । तेषामयमभिप्रायः । "आदितश्च" इत्यत्राव्यभिचारादेकाज्ग्रहणं न सम्बध्यते । न चावयवे चरितार्थमादित्त्वं यङ्लुगन्तार्थमपि स्यात्, तस्य धात्वन्तरत्वात् । त्वरतेरादित्त्वं नावयवे चरितार्थमिति सामर्थ्याद्यङ्लुगन्तार्थमिति । मैवम् । प्रयोजनकल्पनायामयमेव प्रकार इति नियमाभावात् । यदादित्त्वसामर्थ्यादिड्विकल्पेनैकाजिति सम्बध्यते तेन तत्र त्वरिग्रहणं यङ्लुगर्थं प्रकृतौ त्वादित्त्वात्प्रतिषेध एवेति वक्तुं शक्यते । एवं हि आदित्त्वं प्रकृत्यर्थमेव भवति । तस्मान्मैत्रेयाद्युक्तमेव ज्यायः । (तूः । तूरौ) । "ज्वरत्वर" इत्यूठ् । घटादयः षित उदात्ता अनुदात्तेतः । षित्फलमङुदाहृतः ॥ ७६३ ॥

एवमात्मनेपदिनः समाप्य परस्मैपदिन आह ॥

ज्वर रोगे ॥ एतदादयः फणान्ता उदात्ता उदात्तेतः । (ज्वरति । जज्वार । ज्वरिष्यति । ज्वरतु । अज्वरत् । ज्वरेत् । ज्वर्यात् । अज्वारीत्) । "अतो ल्रान्तस्य" इति वृद्धिः । (जिज्वरिषति । जाज्वर्यते । जाजूर्त्ति । जाजूर्त्तः । ज्वरयति । अजिज्वरत् । अज्वरि । अज्वारि । इत्यादि । ज्वरितः । जूः । जूरौ । जूरः) । "जरत्वर" इत्यूठ् । (संज्वारी) ।

"सम्पृच" इति चिनुण् । "रुजार्थानाम्" इत्यत्र अज्वरेरिति वचनात् कर्मणि षष्ठी न भवति । चोरं ज्वरयति रोगः ॥ ७६४ ॥

गड सेचने ॥ (गडति । जगाड । गडिता । जिगडिषति । जागड्यते । जागड्डि । गडयति । अजीगडत । अगाडीत्यादि । गडयस्यास्तीति गडुलः) । "सिध्मादिभ्यश्च" इति लच् । अत्रैव पाठात् बाहुलकात् वा उप्रत्ययः । (गडुली) । गौरादित्वात् ङीष् । कण्ठे गडुरस्य गडुकण्ठः । सप्तम्याः पूर्वनिपाते [गड्वादेः परवचनम्] इत्युक्तत्वात् सप्तम्यन्तस्य पूर्वप्रयोगो न भवति । अत्र वृत्तिः । कथं वहेगडुरिति, [प्राप्तस्य चाबाधो ऽन्वाख्येय] इति । "अमूर्द्धमस्तकात्" इति अलुक् । (गण्डतीति) वदनकदेशे गतम् ॥ ७६५ ॥

हेड वेष्टने ॥ हेडृ अनादरइति आत्मनेपदिषु गतः, तस्य परस्मैपदिषु अनुवादसामर्थ्यात् परस्मैपदमपि भवति । अन्यथा घटादयः षित इत्यस्यानन्तरं परस्मैपदिभ्यो ज्वरादिभ्यः पूर्ववदिति धात्वन्तरं नाशङ्क्यम् । यत इदितोनुवादेपि मित्त्वात् ह्रस्वत्वेन भाव्यमिति ऊत्सृष्टानुबन्धोयमनुवादः । (हेडति । जिहेड । हेडिता । जिहेडिषति । हिडयति । अजीहिडत्)। अत्र मितां ह्रस्वो भवन् "एच इग्घ्रस्वादेशे" इति नियमात् आन्तरतम्यादिकार एव ह्रस्वो भवति । अत एव ह्रस्वविधानसामर्थ्यात्पुनर्गुणो न भवति । (अहिडि। अहीडीत्यादि) । चिण्णमुलोर्दीर्घविकल्पे "असिद्धवदत्र०" इति ह्रस्वत्वे नासिद्धत्वं व्याश्रयत्वाण्णिमात्राश्रयो दीर्घविकल्पः । एवमाद्यर्थं हि तत्रादिग्रहणमन्यथा ह्रस्व एव विकल्प्येत । अनादरार्थस्य (हेडयति) ॥ ७६६ ॥

वट भट परिभाषणे ॥ वट वेष्टने । भट भृताविति पठितयोः परिभाषणे मित्त्वार्थोयमनुवादः । (वटयति । भटयति । अवटि । अवाटि । अभटि । अभाटि) । अत्र पुरुषकारे वटेत्यादिबहुषु दृश्यते इति ॥ ७६८ ॥

नट नृत्तौ ॥ पूर्वत्र नृतिर्नाट्यमित्युक्तत्वात् इइ नृतिशब्देन ततोन्योर्थो नृत्तनृत्यलक्षणः । चलनादिलक्षणश्चोच्यते । अत्र मैत्रेयः । गताविदयेके । नताविदयेके । स्वामी च नताविति पठित्वा नटयति शाखामित्युदाहृत्य नृत्तौ नाटयतीति । (नटयति । अनटि । अनाटीत्यादि)। अयं णोपदेश इति प्रागुक्तम् ॥ ७६९ ॥

ष्टक प्रतिघाते ॥ (स्तकति । तस्ताक । स्तकिता । तिस्तकिषति । तास्तक्यते । तास्तक्ति । स्तकयति । अतिष्टकत् । अस्तकि । अस्ताकि) अत्र दन्त्यादिरपि क्वचित्पठ्यते । तत् षोपदेशलक्षणविरुद्धम् ॥ ७७० ॥

चक तृप्तौ ॥ (चकति । चचाक । चकिता । अचकीत् । अचाकीत् । चकयति । अचीचकत् । अचकि । अचाकि) अस्यात्मनेपदिषु पठितस्य परस्मैपदिष्वनुवादात्परस्मैपदं हेडतिवत् । अत्र स्वामी । अयं तृप्तिप्रतिघातयोः पूर्वं पठितः तृप्तिमात्र इत्यर्थपाठं व्याख्यास्यत् । शाकटायनस्तूभयत्रोभयार्थत्वमाह । धनपालस्तु पुनर्यथास्वामि पठित्वा पूर्वं पठितस्यायमनुवाद इति आत्मनेपदमुदाजहार । तन्मते परस्मैपदिष्वनुवादो व्यर्थः स्यात् ॥ ७७१ ॥

कखे हसने ॥ (कखति । चकाख । चकखतुः । कखिता । अकखीत्) । एदित्त्वाद्वृद्ध्यभावः । (चिकखिषति । चाकख्यते । चाकक्ति) कखयति । अचीकखत् । अकखि । अकाखीत्यादि ॥ ७७२ ॥

रगे शङ्कायाम् ॥ लगे सङ्गे ॥ (रगति । लगतीत्यादि) कखिवत् । (लग्नः) । "क्षुब्धस्वान्त०" इति अनिट्त्वं निष्ठायां निपात्यते । अन्यत्र (लगितम्) । रङ्गतिलङ्गती गत्यर्थेषु गतौ ॥ ७७४ ॥

ह्रगे ह्लगे षगे ष्ठगे संवरणे ॥ क्वचित्कोशे स्थगे इति दन्त्यादिरपि पठ्यते । तत् षोपदेशलक्षणविरुद्धम् । (ह्रगति । जह्राग । अह्रगीत् । जिह्रगिषति । जाह्रग्यते । जाह्रक्ति । ह्रगयति । अजिह्रगत् । अह्रागि । अह्रगि । एवं ह्लगतीत्यादि । सगति । ससाग । सेगतुः ।

सेगुः)। आदेशादित्वमनैमित्तिकं न तु लिण्निमित्तिमिति एत्वाभ्यासलोपौ। (असगीत्। सिसगिषति। सासग्यते। तास्थक्ति। स्थगयति। अतिस्थगत्। अस्थगि अस्थागीत्यादि) ७७८

कगे नोच्यते ॥ अत्र मैत्रेयः। अस्यायमर्थ इति नोच्यते। क्रियासामान्यमर्थ इत्यर्थः। इह शास्त्र कगे नोच्यते इत्येके। स्वामी तु अस्यायमर्थ इति नोच्यते। अनेकार्थत्वात् इति, नोच्यत इति, योर्थस्तत्रार्थे कगे इत्येके। कगेत्युक्तत्वात्क्रियासामान्यमस्यार्थ इत्याहान्ते। (कगतीत्यादि)। कखादयो ऽष्टावेदितः ७७९ ॥

अक अग कुटिलायां गतौ ॥ (अकति। आक। अकिता। मा भवानकोत्। अचिकिषति। अकयति। मा भवानचकत्। माभवानकि। माभवानकीत्यादि)। अङ्कतइति लक्षणार्थे गतः। (अगतीत्यादि)। अकिवत्। अङ्गतीति गतौ गतम् ॥ ७८१ ॥

कण रण गतौ ॥ (कणतीत्यादि। अकणि। अकाणीत्यादि। एवं रणतीत्यादि)। [काण्यादीनां वा] इत्युपधाह्रस्वविकल्पो न शङ्क्यः, ह्रस्वभाविन्या उपधाया एवाभवात्। कणतिरणती शब्दार्थौ। गतौ एतयोः (काणयति। राणयति) ॥ ७८३ ॥

क्षण शण श्रण दाने च ॥ चणिश्रणोश्चौरादिकयोर्हेतुमण्णिचोभावात् स्वार्थे तु णौ "नान्ये मितो हेतौ" इति मित्त्वनिषेधान्न तयोरिमावनुवादाविति धात्वन्तरावेतौ। (चणति। चचाण। चेणतुः। चणिता। अचणीत्। अचाणीत्। चिचणिषति। चञ्चण्यते। चञ्चण्ढि। चञ्चण्ढः। चणयति। अचीचणत्। अचणि। अचाणि) इत्यादि। एवं (शणति। श्रणतीत्यादि)। शणगतावित्यन्ये। अन्त्यौ तालव्यादी ॥ ७८६ ॥

श्रथ कथ क्लथ हिंसार्थाः ॥ (श्रथति। शश्राथ। श्रथिता। शिश्रथिषति। शाश्रथ्यते। शाश्रत्ति। श्रथयति। अशिश्रथत्। अश्रथि। अश्राथि। एवं कथति। क्लथति) कथेस्तु "जासिनिप्रहणनाटक्राथ" इतिनिर्देशान्मित्त्वेपि वृद्धिरिति वृत्तिव्याख्यानेषु। (क्राथयति गोरस्येति) भवति। मित्त्वफलं तु (अक्रति अक्राथीत्यादौ) "चिण्णमुलोः" इति दीर्घविकल्पः। तथा "जासिनि" इत्यत्र हरदत्तः। घटादिपाठस्तु घटादयः षित इत्यातिदेशिकोऽन्यथा स्यात् "चिण्णमुलोः" इति दीघविकल्पश्च यथा स्यादिति। ननु घटादयः षित इति मध्ये सूत्रणात्पूर्वेषामेव षित्त्वं न परेषामिति कथं षित्त्वमुक्तम्। सत्यम्। अत एव किलापरितुष्यन् स्वयमेव दीर्घविकल्पप्रयोजनमाह। एवं च दीर्घविकल्पश्चेति च शब्दो वार्थो व्याख्येयः। अत्र न्यासे क्राथीति विकृतनिर्देशस्य प्रयोजनं मित्वेपि वृद्धिः। तत्रैव षष्ठीत्युक्त्वा, चङन्ते वृद्ध्यभावाचोरमचिकथदित्युक्तम्। तत्र शेषाधिकारात्पुनः समासनिवृत्तये पुनः शेषे षष्ठीविधानमिति शेषविवक्षायां षष्ठी दुर्वारा, कर्मविवक्षायां द्वितीया स्वतः सिद्धेति नेदं प्रयोजनम्। क्रथ हिंसायामिति युजादौ स्वरितेदिति देवः। अयमात्मनेपदीति शाकटायनः। "जासिनि" इत्यत्र क्राथीनि निपातनाद्वृद्धिरिति वदतां वृत्तिकारादीनां नायं धातुरेवास्ति ॥ ७८९ ॥

चन च ॥ हिंसायामिति शेषः। (चनति। चनयति। अचनि। अचानि) ॥ ७९० ॥

वनु च नोपलभ्यते ॥ न केवलं कगे, यावता वनु च नोच्यत इति स्वामिनोच्यत इति गतौ वाख्यातम्। उदित्करणसामर्थ्यादयमन्यो धातुः, न तानादिकस्यायमनुवादः, क्रियासामान्ये मित्त्वमात्रार्थे ह्यनुवादादिति तानादिकण्वानुवादः, न पुनः शब्दार्थः संभक्त्यार्थौ वावगतो वनतिरिति, कोयं नियमः। तेन क्रियासामान्येपि वनतीत्याति भवति। अस्योदित्त्वाद्धात्ववगतिः वान्तमिति। इदं च मित्त्वं "ग्लास्नावनुवमां च" इत्यनुपसृष्टानां विकल्पस्य वक्ष्यमाणत्वात्सोपसगार्थं, (प्रवनयति। प्रावोवनत्। प्रावनि। प्रावानीत्यादि) ॥ ७९१ ॥

ज्वल दीप्तौ ॥ ज्वल दीप्तावित पठिष्यते, तस्य मित्वार्थोयनुवादः। इदमपि मित्त्वं सोपसर्गविषयं, "ज्वलह्वलह्मलनमामनुपसर्गाद्वा" इति अनुपसृष्टानां विकल्पस्य वक्ष्यमाणत्वात्। (प्रज्वलयति। प्राज्वालि। प्राज्वलीत्यादिं) ॥ ७९२ ॥

ह्वल ह्मल चलने ॥ इमौ च सोपसर्गावेव नित्यं मित्वं प्रयोजयतः। ज्वलतिवदनुपसृष्टयो-

विकल्पस्य वक्ष्यमाणत्वात्। (ह्वलति। जह्वाल। ह्वलिता। अह्वालीत्।) "अतो ल्रान्तस्य" इति नित्यं वृद्धिः। (जिह्वलिषति। जाह्वल्यते। जाह्वल्ति। विह्वलयति। व्यह्वलि। व्याह्वालीत्यादि एवं ह्वलतीत्यादि) । किंव्ह्वलयतीत्यत्र [यवलपरे यवला वा] इति यवलपरे हकारे परे मकारस्य पक्षे यवलविधानात्सानुनासिको वकार उदाहार्यः। (किम् ह्वलयति। किं ह्वलयति। किं ह्मलयतीत्यत्र) *मपरे वा* इति मकारपरे हकारे परे मकारस्य पक्षे मकारविधानान्मकारोप्युदाहार्यः) ७९४ ॥

स्मृ अध्याने। स्मृ चिन्तायामित्यस्याध्याने मित्त्वार्थोऽनुवादः। आध्यानमुत्कण्ठापूर्वकं स्मरणम्। (मातुः स्मरति। मातुः स्मरयति। अस्मरि। अस्मारि। अनाध्याने स्मारयति) "अधीगर्थ०" इति कर्मणि षष्ठी। अधीगर्थाः स्मरणार्था इत्युक्तम् ॥ ७९५ ॥

दृ भये ॥ अत्र देवधनपालपूर्णचन्द्रा अमुं धात्वन्तरमाहुः। मैत्रेयस्तु दॄ विदारणइति क्र्यादिः, तस्य मित्वार्थं पाठः। (दृणन्तं प्रयुङ्क्ते दरयति। भयादन्यत्र दारयति)। धात्वन्तराभ्युपगमे दरतीत्येके इति क्षीरस्वामी। पुनर्दरतीत्युदाहृत्य कैयाटिकस्यैव मित्त्वार्थमिहानुवाद इत्येक इत्याह। तत्राभरणकारो ऽमुं ह्रस्वान्तं धात्वन्तरं पठित्वा "अतस्मृदृत्वर" इत्यत्रापि ह्रस्वान्तं पठन् णौ चङि अददरदित्युदाजहार। तदसत्। तत्र दीर्घान्तपाठस्याविगीतत्वात्, दॄ विदारणइति व्याख्यातृभिरुपादानाच्च। किं च ह्रस्वान्ताभ्युपगमे "शॄदॄप्रां ह्रस्वो वा"इति दृणातेर्विकल्पेन ह्रस्वविधानमनर्थकं स्यात्, यतः ह्रस्वान्तादस्मात् लिटि विदद्रतुरिति यणादेशे सिध्यति विददरतुरिति च दृणातेः "ऋच्छत्यॄताम्" इति गुणे। न च विदारणे रूपद्वयार्थं ह्रस्वविकल्पनं स्यादिति वाच्यम्। धातूनामनेकार्थत्वेन अस्यापि विदारणे वृत्तिसंभवात्। तथा च श्रृणातेः तत्र विशशरतुरिति भविष्यति विशश्रतुरिति श्रा पाक इत्यस्य, न चार्थभेदो, धातूनामनेकार्थत्वादिति श्रृग्रहणं प्रत्याख्याय ह्रस्वार्थमुक्तम् ॥ ७९६ ॥

नॄ नये ॥ (नरयति। अनरि। अनारीत्यादि। अन्यत्र नारयति)। मैत्रेयस्तु नामुमिच्छति यदाह नॄ नय इत्यप्येके इति ॥ ७९७ ॥

श्रा पाके ॥ श्रै पाकइत्यग्रे कृत्वात्वत्य तस्य श्रा इत्यादादिकस्य च सामान्येनेदमनुकरणम्, लुग्विकरणालुग्विकरणयोरिति श्रायतेः, लक्षणप्रतिपदोक्तयोरिति श्रातेः। अत्र सर्वत्र पाको विक्लित्तिरिति कैयटकारादयः। (श्रपयति। अश्रपि। अश्रापीत्यादि)। विक्लेदयतीत्यर्थः। पाकादन्यत्र (श्रापयति), स्वेदयतीत्यर्थः। धातूनामनेकार्थत्वात् स्वेदे वृत्तिः ॥७९८॥

मारणतोषणनिशामनेषु ज्ञा ॥ एषु जानातिर्मिद्भवति। (परं संज्ञपयति)। मारयतीत्यर्थः। (विष्णुं विज्ञपयति), संतोषयतीत्यर्थः। (प्रज्ञपयति रूपं) दर्शयतीत्यर्थः। कौमाराणां मतेनात्र सोपसर्गाः प्रदर्शिताः। अन्यत्र ज्ञापयति बोधयतीत्यर्थः। नेह निशामनं ज्ञापनमात्रं किं तु चक्षुःसाधनं ज्ञानं, शम लक्ष आलोचन इत्यस्य हीदं रूपम्, आलोचनं चक्षुर्विज्ञाने प्रसिद्धम्। उक्तं चैवं वृत्तिकारादिभिः। "त्यदादिषु दृशोनालोचने कञ्च" "पश्यार्थैश्चानालोचने" इत्यादौ मैत्रेयपुरुषकारादिष्वपि निशामनं चक्षुर्विज्ञानमिति स्थितम्। अत एव न्यासे "श्लाघह्नुङ्स्था०" इत्यत्र ज्ञीप्स्यमान इति मारणादिषु पठितस्य घटादेः हेतुमण्णिच इत्युक्त्वा अथ वेत्यपरितोषात् "ज्ञपमिच्च" इति चौरादिकस्य स्वार्थं णाविति प्रक्रियान्तरमुक्तं, चौरादिकस्य ज्ञानज्ञापनयोर्वर्त्तत इति तत्रैव वक्ष्यते, तेन ज्ञापने ज्ञपयति, यदवज्ञापयेदित्यपि स्यादिति। मैत्रेयोपि इहान्यत्र ज्ञपयति ज्ञापयतीति रूपद्वयं भवति। तथा च देवः। जानातीति श्नि सिद्धे ज्ञपयति तु पुनर्मारणादौ घटादौ णौ मित्त्वेपीदमेव ज्ञानमिति पदं ज्ञापने मारणादौ। तेनार्थात् ज्ञापनेर्थे ज्ञपयतिपदवत् ज्ञापयेदित्यपि स्यादिति, तथा मैत्रेयोपि इहान्यत्र ज्ञापयति स्वामिनमित्युदाहृत्य चुरादौ "ज्ञपमिच्च" इत्यत्र ज्ञपयतीति मितमुदाहृत्य ज्ञापने मारणादिषु चाभिधानमस्येत्याह। अत्र चन्द्रः। "मारणतोषणनिशानेषु" इति वर्द्धमानश्चैवं पठित्वा निशानं तीक्ष्णीकरणमिति चाभिधाय निशामन इति केचित् निशामनं दर्शनमिति। स्वामि-

शाकटायनौ वर्द्धमानवदेव, तत्र प्रज्ञपयति शरमित्युदाहरणं, तीक्ष्णीकरोतीत्यर्थः । अत्र मित्त्वं बोधिन्यासकारो न सहते । यदाह प्रचीनास्तु निशानं नेच्छन्तीति । एवं काश्यपसम्मताकारादयोपि, इति मैत्रेयाद्यङ्गीकृतो निशामनपाठ एव ज्यायान् । यच्चूक्तं "श्लाघन्हुङ्" इत्यत्र ज्ञीप्स्यमानो ज्ञपयितुमिष्यमाणो बोधयितुमभिप्रेत इति वृत्तिग्रन्थमुपादाय हरदत्तेन निशामनं ज्ञानमात्रं न चक्षुर्विज्ञानमेव, यदाहबोधयितुमभिप्रेत इति, कथं तर्हि प्रयुज्यते तज्ज्ञापयत्याचार्यः । विज्ञापना भर्तृषु सिद्धमेतीति । तस्मान्निशानेष्विति पाठः, शो तनूकरणे, ल्युट् ज्ञीप्स्यमानो ज्ञपयितुमिष्यमाण इति प्रयोगः "ज्ञप मिच्" इति चुरादिणिजन्तस्येति नात्र ज्ञापयतिप्रयोग उपोद्बलं निशानमिति पाठाङ्गीकारस्येति, यदस्माभिस्तत्सिद्धिरन्यथैवादौ साधिता । अपरे तु प्रतिपन्ना निशामनं ज्ञापनमात्रं ज्ञापयति प्रयोगो ज्ञा नियोग इति चौरादिकस्य धातूनामनेकार्थत्वात् इति, अनेकार्थताङ्गीकारे ज्ञान इव मारणतोषणयोरपि ज्ञापयतीति स्यात् ॥७९९

कम्पने चलिः ॥ चल कम्पन इति ज्वलादौ तस्य मित्वार्थ एवानुवादः । (चलयति शाखाम्)। कम्पयतीत्यर्थः । अन्यत्र शीलं चालयति, अन्यथा करोतीत्यर्थ इति स्वामी । सूत्रं चालयति, क्षिपतीत्यर्थ इति सुधाकरः ॥ ८०० ॥

छदिरूर्जने ॥ ऊर्जनं प्राणनं बलनं वा, ऊर्ज बलप्राणनयोरिति हि धातुः । छदि अपवारणे इति यौजादिकस्य स्वार्थे णिजभावे मित्वार्थोयमनुवादः । धातूनामनेकार्थत्वात् ऊर्जने वृत्तिः। (छदन्तं प्रयुङ्क्ते छदयति । बलवन्तं करोतीत्यर्थः)। अन्यत्र छादयति, अपवारयन्तं प्रयुङ्क्त इत्यर्थः । यदा च छादयतीति स्वार्थे ण्यन्तस्तदा बलीभवति प्राणीभवति, अपवारयतीत्यर्थः। अत्र बलप्राणनयोरपि "नान्ये मितोहेतौ" इत्यमित्वम् । अत्र स्वाम्यादयः छदि संवरणइति चौरादिकं छदेत्यनिदितं पठन्तः, तस्यायमूर्जने मित्वार्थो ऽनुवाद इत्याहुः । तदयुक्तम् । तस्यानिदित्पाठेपि नित्यण्यन्तत्वात् कर्तरि णिचोभावात् स्वार्थोपि णौ "नान्ये मितः" इति मित्वं निषिद्धमेव । अत्र देवः । छदिं धात्वन्तरं मन्यते । यदाह यो वा णावपवारणे छदतइत्येकं द्वितीयं वदन्नन्यं छादयति छदयति पुनः स्यादूर्जनेर्थे मित इत्यादि, चौरादिकस्यैव स्मरत्यादिवत् अनेकार्थत्वाऽङ्गीकरणात् ऊर्जनेपि छदतीति सिद्धे धात्वन्तराऽङ्गीकरणं परस्मैपदमेव यथा स्यादिति तन्मतम् । अनुवादे हि तस्य स्वरितेत्त्वात् छदत इत्यपि स्यात् । यद्यप्येतत्फलं भवति अथाप्यन्यत्र पठितानामिह पाठो मित्वमात्रफल इति घटतौ व्यवस्थापितत्वात पृथक् धातुत्वं न सुलभम् । किं चेह धातुनिर्देशार्थमिकारनिर्देशादवश्यमनुवादत्वमेष्टव्यम् , यत्फलमुक्तं नित्यं परस्मैपदमेव यथा स्यादिति तच्छाकटायनमतेनैव प्रयोजनं, यतः चौरादिकः परस्मैपद्येव ॥ ८०१ ॥

जिह्वोन्मथने लडिः ॥ लड विलास इति पठितस्य मित्त्वार्थोयमनुवादः । उन्मथनं ज्ञापनम् । अत्र मैत्रेयस्य जिह्वाया उन्मथने इति मतम् । यदाह लडयति जिह्वामिति । अयमेव पक्षो गुप्तस्यापि । पुरुषकारे तु जिह्वया उन्मथने लडयति जिह्वयेत्युक्तं भवति । अपरे तु जिह्वा चोन्मथनमिति समाहारद्वन्द्वं व्याचक्षते, जिह्वाशब्देन तद्विषयो व्यापार उच्यते । अत्र चोन्मथने चेति लडयति शत्रुं, लडयति दधि चेति भवति । धनपालस्त्वेवं पठित्वा आर्याणां जिह्वोन्मथनयोरिति पाठ इति । स्वामी तु जिह्वोन्मथनयोर्लडीति, मन्थनमेव मथनम् ,अन्यत्र लाडयति पुत्रम् । चल्यादीनां त्रयाणामिकारो धातुनिर्देशार्थः ॥ ८०२ ॥

मदी हर्षग्लेपनयोः ॥ दैवादिकस्य मित्त्वार्थोयमनुवादः । (मदयति)। हर्षयति ग्लेपयति चेत्यर्थः । ग्लेपनं दैन्यमन्यत्र (मादयति) चित्तविकारमुत्पादयतीत्यर्थः। विनमादयत्यक्षरव्यञ्जनानि स्पष्टमुच्चारयतीत्यर्थः । तथा च प्रातिशाख्यम् । उपलब्धिर्विमाद इति, अक्षरव्यञ्जनानामिति शेषः ॥ ८०४ ॥

ध्वन शब्दे ॥ भाव्ययं मित्त्वार्थमनूद्यते । (ध्वनयति घण्टाम् । अनत्र ध्यानयति)अस्पष्टाक्षरमुच्चारयतीत्यर्थः । तथा च प्रातिशाख्यमक्षरव्यञ्जनानामुपलब्धिर्ध्वनिरिति । अत्र

भोजः । दलिवलिस्खलिरणिध्वनिस्वनित्रपिक्षपयश्चेति पपाठ । तत्र ध्वनिर्वर्द्धमानानुसारेण पठितः, उदाहृतश्च । तथा रणिरपि । दल विदारणे । संवरणे, स्खल सञ्चलने, त्रपूष् लज्जाया- मितिगताः । तेषां णौ दलयति, वलयति, स्खलयति, त्रपयतीति । क्षपयति क्षै क्षयइति वक्ष्यमाणस्य कृतात्वस्य पुकि निर्देशः । तथा च सुधाकरः । क्षै क्षये णिचि पुकि मित्वे क्षप- यतीति । स्वन अवतंसने । स्वनयति, अन्यत्र स्वानयति । अयं शब्दार्थः पठिष्यते । अत्र मै- त्रेयः । ध्वन शब्दे । स्वन अवतंसनइत्येकइति ॥ ८०९ ॥

घटादयो मितः ॥ मित्संज्ञका इत्यर्थः ॥

"जनीजृष्क्नसुरञ्जोमन्ताश्च" ॥ चशब्दान्मित इत्यपकृष्यते । जनी प्रादुर्भावे, जृष् वयो- हानौ । क्नसु ह्वरणदीप्त्योः । दिवादयः. रञ्ज रागे । भूवादिश्च । अम् शब्दो ऽन्ते येषां ते अमन्ताः, यथासम्भवं सर्वेषु विकरणेषु ते च मितः । (जनयति । जरयति) । जृषिति षिन्नि- र्देशात् जृणातेरमित्त्वात् (जारयतीति)। बोधिन्यासादौ मैत्रेयो जृगातेः स्थाने झृ इत्येक इति चतुर्थादि च वक्ष्यति । (क्नसयति । रजयति मृगान्, रमयतीत्यर्थः) । [रञ्जेर्णौ मृगरम- ण उपसंख्यानम्) इति नलोपः । मृगादन्यत्र नलोपो न भवति रञ्जयति पक्षिणः। तथा रमणा- दन्यत्र न लोपः । रञ्जयति मृगान् तृणादिदानेन । नलोपाभावे मित्वफलम् (अरञ्जि, अराञ्जी- त्यादौ) "चिण्णमुलोः" इति दीर्घः । अमन्ताः खल्वपि क्रमयति, गमयतीत्यादि । अत्र के चित् । "जनीजृष्णसु" इति अक्कारं सूत्र पठन्तः षकारमुत्तरधातोरादिं व्याचक्षाणाः दैवा- दिकस्य निरसनार्थस्य स्नस्यतेः स्नसयतीति मित्वमाहुः । तथा च दिवादावात्रेयमैत्रेयौ ष्णसु निरसन इत्येके मिदिति ॥

"ज्वलह्वलह्मलनमामनुपसर्गाद्वा" ॥ ज्वलादीनां वा मित्त्वं भवति उपसर्गात् परेषां नायं विकल्प इत्यर्थः । क चित्तु पठ्यते । ज्वलह्वलनमोऽनुपसर्गाद् वेति । तत्र न क्लेशो मित इति सम्बन्धः । ज्वलादीनां पूर्वपाठात् प्राप्तिः, नमेस्त्वमन्तत्वात् । (ज्वलयति ज्वालयति । ह्वल- यति, ह्वालयति । ह्मलयति, ह्मालयति । नमयति, नामयतीति)। उपसृष्टे तु नित्ये मित्त्वे प्रज्वलयतीत्यादि । उन्नामयतीति प्रयोगो घञन्तात् "तत्करोति" इति णौ । एवमन्येषाम- पीदृशां निर्वाहः । "मितां ह्रस्वः"इति वृत्तौ "वा चित्तविरागे" इत्यतो वेत्यनुवृत्तेर्व्यवस्थि- तविभाषाविज्ञानाच्च संक्रामयतीत्यादिसिद्धिरिति । यत्तु सुधाकरोक्तं घञन्तादुत्क्रामशब्दात् "तत्करोति" इति णिचि उत्क्रामयतीति, तदयुक्तं, "नोदात्तोपदेशस्य" इति वृद्धिनिषेधात् उत्क्रामशब्दस्यैवाभावात् ॥

"ग्लास्नावनुवमां च" ॥ अनुपसर्गाद्वेति वर्त्तते । पूर्ववत् व्याख्यानमत्रापि । अत्रापि पूर्ववत् क चित ग्लास्नावनुवमश्चेति प्रथमान्तं पठ्यते । ग्लै हर्षक्षये । अत्र स्नेति ष्णै शौच- वेष्टनयोरिति वक्ष्यमाणस्य ष्णा शौच इत्यादादिकस्य च, श्रा पाक इत्यत्रोक्तन्यायेन । वनु च नोच्यत इति इह पठितो वनतिः अनन्तरस्य विधिरिति न्यायादनूद्यते न तु तानादिको वनो- तिः । टुवम उद्गिरणे । अमन्तः । तदयं वन्वमोः प्राप्ते ग्लास्नोरप्राप्ते इत्युभयत्र विभाषेयम् । (ग्लपयति । ग्लापयति । स्नपयति । स्नापयति । वनयति । वानयति । वमयति । वाम- यति) । ग्लास्नोरुपसृष्टयोर्मित्वाभावात् (प्रग्लापयति, प्रस्नापयतीत्येव)। वनुवमोस्तु निय- मितत्वात् (प्रवनयति । प्रवमयतीत्येव) ॥

"न कम्यमिचमाम्" ॥ कमु कान्तौ, अम गत्यादौ, चमु अदने, एषाममन्तत्वात् मित्त्वे प्राप्ते निषिध्यते । (कामयते । आमयति । आचामयति) ।

"शमो दर्शने" ॥ शम उपशमने दिवादिः । अयं च दर्शने न मिदमन्तोपि, (निशामयति रूपम्) अत्युत्कृष्टमिदं तीर्थं भारद्वाज निशामयेति, शम लक्ष आलोचन इति चौरादिकः । अस्मात् कारिते णावर्थो न संगच्छते । दर्शनादन्यत्र निशमयति वचः । अत्र स्वामी नेत्यन- पेक्ष्य अदर्शन इति पदं दर्शनादन्यत्र मिदिति संव्याचष्ट एवमप्यत्र न फलभेदः ॥

"यमो ऽपरिवेषणे" ॥ यम उपरम इत्यग्रे, अयं परिवेषणादन्यत्र भोजनाद् अन्यत्रामन्तोपि न मित । (आयामयति) । द्राघयति व्यापारयति वेत्यर्थः । परिवेषणे तु (यमयति ब्राह्मणान् ।) अत्र स्वाम्यादयो नेत्यनपेक्ष्य परिवेषणादन्यत्र मिदिति व्याचक्षते,। तद्वृत्तिविरुद्धम् । तथाहि "णदमि"० इत्यत्र आयामयति इत्युदाहृत्य यमोपरिवेषण इति मित्संज्ञा प्रतिषिध्यते इति । तत्र न्यासे च । तत्र हि न कम्यमिचमामित्यतो नेति प्रतिषेधो वर्त्तत इति, तथा मैत्रेयादयोपि नेत्यनुवृत्त्यैव व्याचक्षते । नियमयतीति प्रयोगोयं "तत्करोति" इति णौ द्रष्टव्यः॥

स्खदिरवपरिभ्यां च ॥ न मिदिति शेषः । (अवस्खादयति । परिस्खादयति) । अपावपरिभ्य इति बोधिन्यासे । अत्रापि स्वाम्यादयो नेत्यनपेक्ष्य स्खादेः पूर्वपाठात् सामान्येन प्राप्तं मित्वमुपसृष्टाद्यदि भवति अवाद्युपसृष्टादेवेति व्याचक्षाणाः प्रस्खादयतीत्यादौ मित्त्वं नेच्छन्ति । इदं वृत्तिकारादीनामनभिमतम् । यतस्तैः सर्वत्र नेत्यपेक्ष्यते, एवं हि निषेधानन्तरं पाठ उपपद्यते । अन्यथा स्खद् खद्न इत्यस्यानन्तरमेव अवपरिभ्यां चेति पठेत् (१), द्विःस्खदिग्रहणं न कर्त्तव्यं भवति ॥

फण गतौ ॥ नेति निवृत्तम्, असम्भवादिति मैत्रेयः । निषेधात्पूर्वमपाठः फणादिकार्यानुरोधात् इति च । (फणति । पफाण । फेणतुः । फेणुः । पफणिथ । पफण । पफणिव । फेणिव । पफणिम । फेणिम) *फणां च सप्तानाम्* इति किति लिटि थलि च सेटि एत्वाभ्याससलोपविकल्पः । (फणितेत्यादि । अफणीत् अफाणीत) । "अतो हलादेः" इति वृद्धिविकल्पः । (पिफणिषति । पम्फण्यते) अनुनासिकत्वान्नुक् , (पम्फणीति । पम्फाण्टि । पम्फाण्टः) । "अनुनासिकस्य क्वि झलोः ङ्क्ति" इति दीर्घः । (पम्फाण्हीत्यत्र) हेर्झलः परत्वाभावात् धिभावो न भवति । (फणयति । अपीफणत्) । अन्यत्र फाणयति सक्तून् स्नेहयतीत्यर्थं इति स्वामिसम्मताकारौ । (फाण्टः) । "क्षुब्धस्वान्त०" इत्यादिना अनायासेनिट्त्वं निपात्यते । अत्रानायासशब्देनाल्पप्रयाससाध्यः कषायविशेष उच्यते । तथाहि । औषधस्य पञ्चकल्पना, रसः, कल्कः, शृतः, शीतः, क्वाथः, शीतो नाम क्षुण्णमौषधमुदके प्रक्षिप्य रात्रावधिवासितं यदुदकं प्रातः पीयते सः, तदेवोष्णोदके प्रक्षिप्य सद्योभिषुच्य पूत्वा पीयते स फाण्ट इति तद्विदः ॥ ८०६ ॥

वृत् ॥ समाप्तो घटादिर्वर्तत इत्यर्थः । अस्मात्पूर्वं वृदित्येक इति मैत्रेयः । ज्वरादय उदात्ता उदात्तेतः ॥

राजृ दीप्तौ ॥ उदात्तः स्वरितेत् । (राजति । रराज । रेजतुः । रराजतुः । रेजिथ । रराजिथ । राजितेत्यादि । तङि राजते । रराजे । इत्यादि पूर्ववत् । रिराजिषति । रिराजिषते । राराज्यते । राराष्टि । व्रश्चादिना षत्वं झलि पदान्ते च । राजयति । अरराजत्) "नाग्लोपि०" इत्यृदित्वादुपधाह्रस्वनिषेधः । सम्यक् राजते इति (सम्राट्) । "सत्सूद्विष०"इत्यादिना *मो राजि समः क्वौ* इति समो मकारस्य मकारः क्विबन्तस्मिन् परे मोनुस्वरापवादः, सम्राजोपत्यं (साम्राज्यः) "सम्राजः क्षत्रिये" इति कुर्वादिपाठात् क्षत्रियवचनादस्मादपत्ये ण्यः, अक्षत्रियादणि (साम्राजः) । राजत इति (राट्)। "अन्येभ्योपि दृश्यते" इति क्विप् । (राष्ट्रम्) "ष्ट्रन्" इति ष्ट्रन् । "तितुत्र०" इतीण्निषेधः । षित्वात् स्त्रियां (राष्ट्री), स्वामिनीत्यर्थः। (राष्ट्रियः) । "राष्ट्रावारपाराद् घखौ" इति भावादौ शैषिकज्छापवादो घः । (राजा) । "कनिन्युषि" इत्यादिना कनिन् । दन्तानां राजा, (राजदन्तः)। *राजदन्तादिषु परम्* इति षष्ठ्यन्तस्य परप्रयोगः । (राजन्यः क्षत्रियः)। "राजश्वशुराद्यत्" इति अपत्येर्थं यति व्युत्पत्तिः, जातिवचनस्त्वयम् । तथा च तत्र वार्त्तिकं [राज्ञोपत्ये जातिग्रहणम्] इति । जतिश्चेह क्षत्रियजातिरुच्यते । "ये चाभावकर्मणोः" इति प्रकृतिभावात "नस्तद्धिते" इति टिलोपाभावात् । क्षत्रि-

---

(१) पाठात् सिद्धिरिति क्वचित्पाठः । द्विर्ग्रहणं च नास्ति ।

यजातेरन्यत्राणि (राजनः)। "अन्" इति प्रकृतिभावः, राज्ञां समूहो (राजकम्)।,"नस्तद्धिते" इति टिलोपः। "गोत्रोक्षोष्ट्रोरभ्रराज०" इति वुञ् । (राजन्यकम्)। *आपत्यस्य च तद्धितेनाति*इति यकारस्य अनाति तद्धिते भसंज्ञानिमित्ते विधीयमानो लोपः "प्रकृत्याके राजन्यमनुष्ययुवानः" इति प्रकृतिभावान्न भवति यद्वायं यकारो राज्ञोपत्ये जातिग्रहणमित्युक्तत्वान्नापत्ये, राज्ञ इदं (राजकीयम्)। "राज्ञः क च" इति छप्रत्ययः शैषिकः । कश्चान्तादेशः । राज्ञः कर्म भावो वा (राज्यम्)। पत्यन्तपुरोहितादिषु "राजासे" इति पाठादसमासेऽयम् । यकारस्य भावकर्मविषयत्वात् प्रकृतिभावाभावात् "नस्तद्धिते" इति टिलोपः । समासे तु ष्यञ् । (आधिराज्यम्) ब्राह्मणादिषु राजन्शब्दः पठ्यते, स हि तदन्तात ष्यञर्थः । केवलस्य यको विधानात्, "राजासे" इत्येतद्वचनं ज्ञापकमत्र तदन्तत्वम् । अत्रैके ब्राह्मणादेराकृतिगणत्वात् राजन्शब्दान्तात् ष्यञि सिद्धे तत्र राजन्शब्दस्य पाठसामर्थ्यात् केवलात ष्यञपि भवतीत्याहुः । तथा च शाबरभाष्यमते व्यधिकरणे (राज्यं,) तस्य कर्मणि ष्यञिति । अधिको राजा (अधिराजः,) "कुगतिप्रादयः" इति समासः। *राजाहः सखिभ्यष्टच्* इति राजाद्यन्तात् तत्पुरुषाट्टचि टिलोपः । अत्र लघ्वक्षरं पूर्वं निपतति इति "द्वन्द्वे घि" इति च लघ्वक्षरत्वात् घ्यन्तत्वात् सखिशब्दस्य पूर्वनिपाते कर्त्तव्ये राजन्शब्दं पूर्वं निपात्य सवर्णदीर्घेण निर्देशात् यस्य राजन्शब्दस्य सवर्णदीर्घप्रसङ्गस्तस्यैव टजिति ज्ञापनाल्लिङ्गविशिष्टपरिभाषया अधिराज्ञीत्यादौ टज्न भवति । अयं समासान्त उत्तरपदादकृत एव समासे भवतीत्युक्तं, तेन पञ्चराजीत्यादौ अकारान्तोत्तरपदसमाहारद्विगुत्वेन स्त्रियां ङीप् भवति । शोभनो राजा, (सुराजा । अतिराजेत्यत्र) "न पूजनात्" इति समासान्तनिषेधः । तत्र [स्वती पूजायाम्] इति परिगणितं, प्रतिराजेत्यत्र तु *प्रतेरंश्वादयस्तत्पुरुषे* इति प्रतेः परेषामंश्वादीनामाद्युदात्तविधौ प्रतिराजेति पाठात् समासान्ताभावः । (किंराजा अराजेत्यत्र) "किमः क्षेपे" "नञस्तत्पुरुषात्" इति समासान्ताभावः। महाराजो देवता अस्य, (महाराजिकः) *महाराजप्रोष्ठपदाट्ठञ्* इति प्रथमान्ताद्देवतोपाधिकात् अस्येत्यर्थे ठञ् । ' महाराजो भक्तिर्भजनीयो यस्य (महाराजकः) *महाराजाट्ठञ्* इति प्रथमान्तात् भक्त्युपाधिकात् अस्येत्यर्थे ठञ् । शोभनो राजा यस्यास्ति स।(राजन्वान्) "राजन्वान् सौराज्ये" इति मतुपि नलोपाभावो निपात्यते ॥ ८०७ ॥

टुभ्राजृ टुभ्राश्ट टुभ्लाश्ट दीप्तौ ॥ उदात्ता अनुदात्तेतः । अत्र स्वामी आद्यावधिकृत्य टुरुभयसङ्गीत्येके इत्याह । त्रयोपि द्वित इति मैत्रेयः । वृत्तिकारोप्यत्रैवानूकूलः । यदाह "वा भ्राश०" इत्यत्र टुभ्राश्ट टुभ्लाश्ट इति । तथा "फणां च सप्तानाम्" इत्यत्र न्यासपदमञ्जर्योः त्रयोपि द्वितः पठ्यन्ते । तस्मादयमेव पाठो बहूनां संमतः । भ्राजतेः पठितस्यापीह पाठः फणादित्वेन किति लिट्येत्वाभ्यासलोपविकल्पार्थः, द्वित्त्वं तु न फलं भवति तत्रापि टुशब्दस्यासङ्कुशक्यत्वात् । अनेनैव सिद्धे तस्य पाठो व्रश्चादिषत्वनिवृत्त्यर्थं इति इति तत्रैवोक्तं, (भ्राजते । बभ्राजे । भ्रेजे । भ्राजितेत्यादि । बाभ्राष्टि । अबाभ्राट्) इत्यादौ व्रश्चादिषत्वम् । (भ्राजथुः) "ट्वितो ऽथुच्" । न भ्राजयतइति (नभ्राट्)"नभ्राण्नपात्" इति नञः प्रकृतिभावः । चङ्परे णौ "भ्राज०" इत्यादिना उपधाह्रस्वविकल्पनात्(अबिभ्रजत् । अबभ्राजत्) अस्यापि ऋदित्त्वं पूर्ववत् अनुदात्तेत्त्वमात्रफलम् । (भ्राष्ट्रम्) । ष्ट्रन् । भ्राष्ट्रमिन्ध इति (भ्राष्ट्रमिन्धः) कर्मण्यण् । "भ्राष्ट्राग्न्योरिन्धे" इति मुम् । (भ्राशते । बभ्राशे । भ्रेशे । भ्राशिता । भ्राशिष्यते । भ्राशताम् । अभ्राशत । भ्राशेत । आशषि भ्राशिषीष्ट । अभ्राशिष्ट) । सार्वधातुके "वा भ्राश०" इत्यादिना पक्षे शपोपवादे श्यनि (भ्राश्यते । भ्राश्यताम् । अभ्राश्यत । भ्राश्येतेति भवति । बिभ्राशिषते । बाभ्राष्टि । भ्राशयति । अबभ्राशत) ऋदित्त्वान्नोपधाह्रस्वः। (भ्लाशति) सर्वं भ्राशतिवत् । (भ्राशथुः । भ्लाशथुः) । ट्वित्त्वात् थुच् ॥ ८१० ॥

स्यमु स्वन ध्वन शब्दे ॥ स्यमादयः ज्वलन्ता उदात्ता उदात्तेतः । (स्यमति । सस्याम । सस्यमतुः । स्येमतुः । सस्यमिथ । स्येमिथ । स्येमुः) । इत्यादि । (अस्यम्) इदित्यत्र "अतो

हलादेः" इति वृद्धिः "हम्यन्त०" इति निषिध्यते। (सिस्यमिषति। सेसिम्यते)। "स्वपिस्यमिव्येञां यङि" इति सम्प्रसारणे द्विर्वचने अभ्यासस्य गुणः। (संस्यमीति। संस्यन्ति)। यङो लुका लुप्त्वात् तत्परत्वाभावान्न संप्रसारणम्, "नुगतोनुनासिकान्तस्य" इति अभ्यासस्य नुक्। (संस्यान्त) इत्यादौ "अनुनासिकस्य क्विझलोः" इति दीर्घः। (संस्यन्मि) "मो नो धातोः" "म्वोश्च" इति नत्वम्। (संस्यादीत्यत्र) पूर्वमनुनासिकस्य दीर्घे पश्चात् "नश्चापदान्तस्य झलि" इत्यनुस्वारः। (असंस्यन्नित्यत्र) पदान्तत्वात् "मो नो धातोः" इति नः। (स्यमयति। असिस्यमत्)। अमन्तत्वान्मित्त्वम् (स्यमित्वा। स्यान्त्वा)। उदित्त्वादिड्विकल्पः। अनिट्पक्षे "अनुनासकस्य" इति दीर्घः। (स्यान्तम्)। "यस्य विभाषा" इत्यनिट्। (स्यमन्तको मणिः)। बाहुलकादन्तचि संज्ञायां कन्। अयं चुरादौ वितर्कार्थः। (स्वनति। सस्वान। सस्वनतुः। स्वेनतुः। स्वनितेत्यादि। अस्वनीत्। अस्वानीत)। "अतो हलादेः" इति वा वृद्धिः। (सिस्वनिषति। संस्वन्यते। संस्वन्ति। संस्वान्तः। स्वनयन्ति। असिस्वनत्)। शब्दे घटादित्वान्मित्त्वम्। (विष्वणति। अवष्वणति)। "वेश्च स्वनः०" इति षत्वम्। चकारेणावादित्यनुकृष्यते। (विष्वणनं) सशब्दभोजनम्। तथा च वृत्तौ अभ्यवहारक्रियाविशेषोभिधीयते। यत्र स्वननमस्तीति सशब्दं भुङ्क्ते इत्यर्थः। पिनाकी तु भुञ्जानः किं चिच्छब्दं करोतीति। काश्यपस्तु भोजनमेवार्थमाह। बोधिन्यासेपि पक्षत्रयमपि दर्शितम्। (विषष्वाण। विषिष्वणिषतीत्यादौ) "स्थादिष्वभ्यासेन०" इत्युभयत्र षत्वम्। तच्चाषोपदेशार्थमवर्णाभ्यासार्थं षणि प्रतिषेधार्थं चेत्युक्तम्। (व्यष्वणत)। "प्राक्सितात्" इति षत्वम्। (अवषंष्वण्यत) इत्यादौ "नुम्विसर्जनीय०" इति "वेश्च स्वनः" इति षत्वम्। उक्तं च अयोगवाहानामट्सु णत्वं शर्षु भष्भावषत्वे इति। अयोगवाहाश्चानुस्वारविसर्जनीयोपध्मानीयजिह्वामूलीययमा उक्ताः। षत्वे कृते "रषाभ्याम्" इति णत्वे विष्वणतीत्यत्र णत्वं, पूर्वत्रासिद्धत्वात् "नश्चापदान्तस्य झलि" इत्यनुस्वारे परसवर्णो नकारः। तस्य पुनर्णत्वं न भवति। असिद्धत्वादेव (स्वनः स्वानः)। "स्वनहसोर्वा" इति वा अप्। तदभावे घञ्। उपसृष्टात्तु (प्रस्वान) इत्येव। (निस्वानः, निस्वनः)। "नो गदनद०" इत्यादिना घञपौ। (स्वान्तम्)। "क्षुब्धस्वान्त" इत्यादिना निष्ठायामनिट्त्वं निपात्यत मनोभिधानं चेत, अन्यत्र (स्वनितो मृदङ्गः)। आङ्पूर्वादस्मात् "रुष्यमत्त्वरसंघुषा" इति निष्ठायाड्विकल्पः। इयं चोभयत्र विभाषेति मनसोन्यत्र च (आस्वानितम्, आस्वनितमिति)। फणादयो गताः। (ध्वनति। दध्वान। ध्वनितेत्यादि स्वनिवत्। ध्वान्तम्)। "क्षुब्धस्वान्त०" इति तस्यानिट्त्वम्। अन्यत्र (ध्वनितम्। ध्वनिः) अयं कथादिश्च। अत्र स्वनिध्वन्योर्मध्ये ष्टनेति क्वचित् पठ्यते। ष्टन वन शब्द इति पूर्वमेव गतत्वादयमनार्षः। केचित्पौनरुक्त्यपरिहारादन्त्यादिं पठन्ति सोप्यनार्षः। षोपदेशलक्षणविरोधात्। अत एव "फणां च" इत्यत्र सप्तानामिति किमित्युक्त्वा ध्वनिः प्रत्युदाह्रियते, तथा च न्यासे फणादीन् ध्वन्यन्तानष्ट पठित्वा ध्वनिवर्जिताः शेषाः फणादयः सप्तेत्युक्तम्। पदमञ्जर्यां चैवमष्ट पठित्वा ऽन्त्यवर्जं फणादय इत्युक्तम्॥ ८१३॥

षम ष्टम वैक्लव्ये॥ (समति। ससाम। सेमतुः। सेमिथ। समिता। सिसमिषति। संसम्यते। संसमीति। संसन्ति। ससान्तः। समयति। असीषमत्। स्तमति। तस्ताम। तस्तमतुः स्तमिता। तिस्तमिषति। तंस्तम्यते। तंस्तन्ति। स्तमयति। अतिष्टमत्)। अत्र स्वाम्यादयः केचिदेतदन्ता घटादय इति। बोधिन्यासे तु ध्वन्यन्ता इति। तत्र फणतौ मित्त्वे न विवादः। राजादीनां त्वनन्तराणां चतुर्णां णौ चङ्युपधाह्रस्वनिषेधार्थादुदित्करणाल्लिङ्गान्न मित्त्वं भविष्यति। स्यमेरमन्तत्वात्स्वनिध्वन्योश्च पूर्वत्र पाठान्मित्त्वं, सिद्धम् सर्वैरपि शब्दार्थत्व एव मित्त्वं यथा स्यादिति पूर्वत्र पाठोङ्गीकृतः। षमिष्टम्योरप्यमन्तत्वादेव मित्त्वं सिद्धमिति आहोपुरुषिकामात्रमेवैतत्, ध्वन्यन्ता घटादय इति मतद्वयम्। यत्तु तैरुक्तं षमिष्टम्योरमन्तयोः पुनः पाठेनामन्तलक्षणस्य मित्त्वस्यानित्यत्वज्ञापकादुत्कामयतीत्यादिसिद्धि-

रिति, तदस्माभिरमन्ताच्चेति मित्वविधौ प्रकारान्तरेणोपपादितम् ॥ ८१९ ॥

ज्वल दीप्तौ ॥ (ज्वलति । जज्वाल । जज्वलतुः । ज्वलिता । अज्वालीत्) । "अतो ल्रान्तस्य" इति वृद्धिः । (जिज्वलिषति । जाज्वल्यते । जाज्वलीति । ज्वालयति । ज्वलयति । प्रज्वलयति) घटादिपाठान्नित्यं मित्वं सोपसर्गत्वे, अन्यदा तु ज्वलह्वलेति विकल्पेन, घटादिपाठादेव ज्वलयतीति सिद्धाविहास्य पाठो "ज्वलीति कसन्तेभ्योणः" इति पाक्षिके णप्रत्यये (ज्वाल) इति यथा स्यादिति । ज्वलीतीतिशब्द आद्यर्थो । णोभावे पचाद्यचि (ज्वलः ज्वलनः), "जुचंक्रम्य" इति तच्छीलादौ युच् कर्त्तरि ॥ ८१६ ॥

चल कल्पने ॥ (चलति । चचाल । चेलतुः । चेलुः) । चलितेत्यादि पूर्ववत् । कम्पने घटादिपाठात् चलयति । अन्यत्र (चालयति । चलः । चालः) ज्वलतीति णविकल्पः । (चलाचलः) । इत्यर्थः । [चरिचलिपतिवदीनां द्वित्वमच्याक्चाभ्यासस्य] इति द्विर्वचनम् अभ्यासस्यागागमश्च । (चाचलिः) । सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनाविति तयोरन्यतरः । "अतो लोपः" "यस्य हलः" इति अल्लोपयलोपौ । (चलनः) । "चलनशब्दार्थादकर्मकाद्युच्" इति युच् । चल विसलन इति तुदादौ, चल गताविति चुरादौ ॥ ८१७ ॥

जल घातने ॥ घातनं तैक्ष्ण्यमिति स्वामी । जलतीत्यादि पूर्ववत । (जलः । जालः) । लडयोरेकत्वस्मरणात् (जडः) । गोधाशब्दाद्ढ्रकापि गौधार इति सिद्धे "आरगुदीचाम्" इत्यारग्वचनं (जाडारः पाण्डार) इति सिद्ध्यर्थमिति तत्र स्थितम् । (जाड्यम् । जडिमा) । "वर्णदृढादिभ्यः ष्यञ्" इति ष्यञ् । दृढादित्वात् भावकर्मणोः ष्यञिमनिचौ । जल अपवारण इति चुरादौ ॥ ८१८ ॥

टल ट्वल वैक्लव्ये ॥ टलतीत्यादि चलतिवत् । (ट्वलति । टट्वाल । टट्वलतुः । ट्वलितेत्यादि । अट्वालीत् । ट्वालः, ट्वलः) ॥ ८२० ॥

स्थल स्थाने ॥ स्थानं प्रतिष्ठा । (स्थलति । तस्थाल । स्थलिता । अस्थालीदित्यादि तिस्थलिषति) । "स्तौतिण्योरेव" इति न षत्वम् (तास्थल्यते । तास्थलन्ति । स्थालयति । अतिष्ठलत् । स्थलः । स्थालः । स्थलम् । स्थली) "जानपद" इत्यत्राकृत्रिमायां भूमौ ङीष् । अन्यथा (स्थला । स्थाली) । गौरादित्वात् ङीष् । (विष्ठलम्) । "विकुशमिपरिभ्यः स्थलम्" इति मूर्द्धन्यः ! एवं क्वादिभ्यः । (कपिष्ठलम्) । "कपिष्ठलो गोत्रे" इति मूर्द्धन्यो निपात्यते । अन्यत्र कपीनां स्थलं, (कपिस्थलम्) ॥ ८२१ ॥

हल विलेखने ॥ विलेखनं कर्षणम् । (हलति । जहाल । हलिता । अहालीदित्यादि । हलः । हालः । हलिः) । इन् । हलिं गृह्णाति (हलयति । अजहलत्) । "मुण्डमिश्र"इत्यादिना गृह्णातीत्यर्थे णिचि हलिकल्योरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थमितीकारस्यात्वे वृद्धौ कृतायामकृतायां वा लोपेऽग्लोप्यङ्गमित्यभ्यासस्य सन्वदित्वं न भवति । हलनां समूहो (हल्या) । "पाशादिभ्यो यः"इति पाशादिपाठात् समूहे यः । हलस्येदं,(हालिकम्),*हलसीराठक्* इति षष्ठ्यन्तात् इदमर्थे ठक् । हलं वहति (हालिकः) । बलीवर्दः । "हलसीराठ्ठक्" इति द्वितीयान्ताद्वहतीत्यर्थे ठक् । हलस्य कर्षः (हल्यः), कर्षः कर्षणं कृष्यमाणं वा,"मतजनहलात्करणजल्पकर्षेषु"इति षष्ठ्यन्तात् कर्षेर्थे वत् (द्विहल्या भूः) । "रथसीताहलेभ्यो यद्विधौ"इति तदन्तविधिः । न विद्यते हलिर्यस्य असौ (अहलः) । "नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम्" इति पक्षे समासान्ता । एवं दुःसुपूर्वादपि । अत्र हलिहलशब्दाभ्यां बहुव्रीहिणा रूपद्वये सिद्धे पक्षे समान्तविधानं *शेषाद्विभाषा* इति हल्यन्तात् कम्माभूदिति । यस्माद्बहुव्रीहेः समासान्तो नोक्तः स शेषः । न चात्र हलिग्रहणं मतभेदनिबन्धनं मन्तव्यं, महत्हलं (हलिः,) हलमात्रं त्वन्यदिति नायमर्थभेदः किंचित्करः, यस्मादकारान्येनापि समासो न दण्डवारित इति प्रकरणादिवशेनैवार्थविशेषावगतिः ॥ ८२२ ॥

णल गन्धे ॥ बन्धनइति काश्यपः । (प्रणलतीत्यादि । नालः, नलः । नाली । प्रणाली)

गौरादिः । डलयोरेकत्वस्मरणात् (नडः) व्युत्पन्नं प्रातिपदिकमिति हरदत्तः । नडानां समूहो (नड्या) "पाशादिभ्यो यः" इति यः । नडा अस्मिन्देशे सन्तीति (नड्वलः नड्वान् ।) "कुमुदनडवेतसेभ्यो ड्मतुप्" । "नडशादाड्वलच्" इति चातुरर्थिको ड्मतुप् ड्वलच्च (नली) नन्ददक्षिभ्यामिनन्निति इनन् बाहुलकादस्मादपि । (नलिनी) गौरादिषु दर्शनात् "जातेर-स्त्रीविषया" इति वा ङीष् । यद्वा नलशब्दात् "पुष्करादिभ्यो देशे"इति मत्वर्थीय इनौ ङीपि द्रष्टव्यः । नलं गन्धं ददातीति नलदं त्वामज्जकम् ॥ ८२३ ॥

पल गतौ ॥ पलतीत्यादि । पलमुन्मानविशेषः पललं मांसम् । "कलत्रपश्च"इत्यत्र प्राक् प्रत्ययनिर्देशादन्येभ्यो भवतीति कुण्डलादिवदस्मादपि कलप्रत्ययः । पलालं, स्थालयतीत्या-लच् बाहुलकादस्मादपि । महत पलालं (पलाली) । पिप्पल्यादित्वान् ङीष् । पलाली यस्या-स्तीति पलालिनः । शाकीपलालिदद्रूणां ह्रस्वत्वं चेति पामादिपाठान्नप्रत्ययो ह्रस्वत्वं च । पाल रक्षण इति चुरादौ ॥ ८२४ ॥

बल प्राणणे धान्यावरोधे च ॥ प्राणनं जीवनं, धान्यमवरुध्यते यत्र कुसूलादौ तद्वातूना-मनेकार्थत्वाद्धान्यावरोधनव्यापार इत्यर्थः । बलतीत्यादि । (बालं । बलम्) करणस्य कर्तृ-त्वोपचारादच् । (बाला) । अजादिपाठात् "वयसि प्रथमे" इति ङीपं बाधित्वा टाप् । (ब-लवान् । बलूलः) वातदन्त बलललाटानामूङ् चेति सिध्मादिपाठाल्लच्प्रत्यय ऊङ् चागमः । (बलः पुरुषः) "अर्श आदिभ्योच्" इति मत्वर्थेऽच् । (बाहुबली । ऊरुबली) "बलाद्बाहूरु-पूर्वपदात्" इति पुष्करादिपाठादिनिर्मत्वर्थे । (सर्वबली) तत्रैव सर्वादेश्चेति पठ्यते । (बलिः) । इन् । बल्यर्थास्तण्डुला (बालेयाः) । *छदिरुपधिबलेर्ढञ्* इति छदिबलिभ्यां विकृतवाचिभ्यां विकृत्यर्थायां प्रकृतौ ठञिति ठञ् । उपधेस्तु स्वार्थेयं प्रत्ययः । कुबेराय बलिः । (कुबेरबलिः)। *चतुर्थी तदर्था०* इति चतुर्थ्यन्तस्य तदर्थादिभिस्तत्पुरुषः । तदर्थेत्यर्थग्रहणं,'तस्मा इद तद-र्थम् । अन्यानि तु प्रातिपदिकानि । अयं चुरादिर्मित् ॥ ८२५ ॥

पुल महत्त्वे ॥ (पोलति । पुपोल । पोलिता । पुपुलिषति । पुपोलिषति । पुलित्वा, पोलि-त्वा) । "रलो व्युपधात्" इति कित्त्वविकल्पः । (पोपुल्यते । पोपुलीति । पोपोल्ति । पो-लयति । अपूपुलत्) "उदुपधात्" इति भावादिकर्मणोर्निष्ठायाः सेटः कित्त्वविकल्पनात् , (पुलितमनेन, पोलितमनेनेत्यादि । पुलः) । घ्यभावे इगुपधलक्षणः कः । (पुलकः) । संज्ञायां कुन् । पुलिनं, बाहुलकादिने गुणाभावः । (पुलाकः) । बलाकादयश्चेत्याकनन्तो निपातितः । अयं चुरादावपि । तुदादावपीति क्षीरस्वामी ॥ ८२६ ॥

कुल संस्त्याने बन्धुषु च ॥ सस्त्यानं संघात इति स्वामी । क्व चित्तु सन्तान इति पठ्यते । सन्तानी विजातीयैरवच्छिन्नः प्रवाहः । बन्धुशब्देन तद्व्यापारः सम्बन्धोभिधीयते । (कोलती-त्यादि), पोलतिवत् । कुलस्यापत्यं, (कुलीनः । कुल्यः । कौलेयः) । कुलशब्दो वृत्तौ तद्वति वर्तते । "कुलात्खः" । "अपूर्वपदादन्यतरस्यां यड्ढकञौ" इति खयड्ढकञः । अत एवापूर्वप-दग्रहणम् । खस्तदन्तादपि भवति । (ब्राह्मणकुलीनः । महाकुलीनः) "महाकुलादञ्खञौ" इति अञ्खञो । अन्यतरस्यांग्रहणानुवृत्तेः खश्चेति (माहाकुलः । महाकुलीनं) इति भवति । दुष्कुलशब्दात् "दुष्कुलाड्ढक्"इति ढक् । (दौष्कुलेयः) । अत्रान्यतरस्यांग्रहणानुवृत्तेः खे (दु-ष्कुलीनः । कौलेयकः श्वा) । *कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु* इति यथासंख्याच्छ्वन्यभिधेये कुलाड्ढकञ् । अमुष्य कुलस्य भावः (आमुष्यकुलिका) । मनोज्ञादिपाठाद्वुञ् । [आमुष्याय-णामुष्यपुत्रिकामुष्यकुलिका] इत्युपसंख्यानमिति षष्ठ्या अलुक् । स्वभावात्स्त्रीलिङ्गः । (का-लकम्), अयं मनोज्ञादिः । (निष्कुलाकरोति पशुम्) । *निष्कुलान्निष्कोषणे* इति कृञो योगे निष्कोषणार्थान्निष्कुलशब्दाद् डाच् । निष्कोषणमन्तरवयवानां बहिर्निस्सारणम् । नास्ति कुलमस्य, (नकुलः) । "नभ्राण्नपात्" इति नञ्प्रकृतिभावः । (कुलकम्) । श्लोकसंघातः । संज्ञायां वुन् । कुलशब्दात्कन्वा ॥ ८२७ ॥

शल हुल पत्लृ गतौ ॥ हुल हिंसासवरणयोश्च । अत्र मैत्रेयः । चकारोऽत्रान्वाचये गताव-स्य तावत्प्रयोगः । क चित्तु हिंसासंवरणयोश्चेति । क चित्तु पठ्यते शल हुल ह्मल पत्लृ गतौ । हुल हिंसासंवरणयोश्चेति । अत्र पाठे चकाराद्गतौ चेति व्याख्येयम् । ह्वलतेर्ह्मलतेश्च घटादिपठितस्यापीह पाठो न विकल्पार्थः, घटादिपाठस्त्वर्थविशेषे मित्त्वार्थ इति बोद्धव्यम् । (शलति । शशाल । शलितेत्यादि । शालः । शाला ।) शल इति चलनसंवरणयोर्गतः । (होलतीत्यादि) । पोलतिवत् । (पतति । पपात । पेततुः । पतिता । अपप्तत्) । लृदित्त्वा-दङ् । *पतः पुम्* इत्यङि परे पुमागमः । (पिपतिषति) । [तनिपतिदरिद्रातीनामुपसं-ख्यानम्]इति वा इडागमः । अनिट्पक्षे *सनि मीमा* इत्यादिना अच इस् सकारादौ सनि विधीयमाने इसभावे "सस्यार्धधातुके" इति तत्वे पित्स्शब्दस्य द्विर्वचनम् । "अत्र लोपो-ऽभ्यासस्य" इत्यभ्यासलोपः । अत्र ग्रहणं "सनिमीमा"इत्यादिचतुः सूत्रीविषये अभ्यासलोपा-र्थमिति स्थितम् । अभ्यासलोपोऽनर्थकत्वादन्त्यस्य न भवति । 'नानर्थकेऽलोन्त्यविधिः' इति । अन्ये त्वत्रग्रहणं सर्वाभ्यासलोपार्थमाहुः । तत्र मते ऽभ्यासलोपस्य सनि मीमादिचतुः सूत्री-विषयत्वमधिकाराद् बोद्धव्यम् । (पित्सति । पनीपत्यते । पनीपत्ति) । "नीग्वञ्चु" इति अभ्यासस्य नीक् । (प्रणिपतति) । "नेर्गद०" इति णत्वम् । अड्व्यवायेपीदमिष्यते । (प्रण्यप-प्तत् । पतापतः) । [चरिचलिपतिवदीनां द्वित्वमक् चाभ्यासस्य] इति पक्षे द्विर्वचनमक् चा-भ्यासस्य । (उत्पतिष्णुः ।) "अलंकृञ्" इत्यादिना इष्णुच् । पतनः । "जुचङ्क्रम्य"इत्या-दिना युच् । (पातुकः) "लषपत" इत्यादिना उकञ् । पतत्यनेनेति (पत्रम्) । "दाम्नी०" इत्यादिना करणे ष्ट्रन् । सर्वपत्रं व्याप्नोतीति (सर्वपत्रीणः) सारथिः,"तत्सर्वादेः"इत्यादिना सर्वपत्रं व्याप्नोतीत्यर्थे खः । (सपत्राकरोति) सपत्रं शरं मृगकाये प्रवेशयतीत्यर्थः । (निष्पत्रा-करोति) । सपत्रं शरमपरभागे निष्क्रामयतीत्यर्थः । *सपत्रनिष्पत्रादतिव्यथने* इति कृञो योगे डाच् । अतिव्यथनमतिपीड़ा । गेहानुप्रपातमास्ते । *विशिपतिपदिस्कन्दां व्याप्यमा-नासेव्यमानयोः* इति कर्मण्युपपदे व्याप्यमानत्वे आसेव्यमानत्वे गम्यमाने णमुल् । तत्र व्याप्तिर्गुणेन च क्रियया वा द्रव्याणां सम्बन्धः सा चेह विश्यादिक्रियादिभिर्गेहादिकर्मणः, आसेवा पौनः पुन्यं, तच्च स्वभावात्क्रियायाः । तदायमर्थः । (गेहङ्गेहमनुप्रपत्य आस्ते गेहमनु-प्रपत्य आस्ते गेहमनुप्रपत्यानुप्रपत्यास्ते) इति वा । आसिप्रयोगो धातुसम्बन्धे प्रत्ययविधा-नात् । तत्र व्याप्त्यासेवनयोः समासेनैवोक्तत्वान्नित्यवीप्सयोरिति द्विर्वचनं न भवतीति भा-ष्यादौ स्थितम् । यदा "तृतीयाप्रभृतीनि" इति समासः तदा गेहंगेहमनुप्रपातमास्ते गेह-मनुप्रपातमनुप्रपातमिति द्विर्वचनं भवत्येव । तत्र नित्यता पौनःपुन्यं, तच्च क्रियाविषयमिति तत्र क्रियावाचिनोर्द्विर्वचनम् । वीप्सातु व्याप्तुमिच्छा, सा च द्रव्यविषयेति द्रव्यवचनस्य । अत्रासेवायाम् "अभीक्ष्ण्ये णमुल् च" इति क्त्वाणमुलोर्विधानादेव णमुलि सिद्धे पुनर्विधानं तृतीयान्तस्योपपदत्वार्थं, तेन पाक्षिकः समासो भवति । क्त्वो निवृत्त्यर्थं तु न भवति इष्टत्वा-सत्येति हि स्थितम् । आपततीति (आपात्यः) । "भव्य"इति निपातनात्पक्षे कर्त्तरि ण्यत् । वाव-चनेन यथाप्राप्तस्याप्यनुज्ञानाद् (आपात्यमनेनेति) भावेपि ण्यद्भवति । (पतितः) । गत्यर्थत्वात्क-र्त्तरि क्तः । नरकं पतितः, नरकपतितः । "द्वितीयाश्रित०" इति समासः । स्वर्गात्पतितः (स्वर्गपतितः) "अपेतापोढ०" इति पञ्चमीतत्पुरुषः । अल्पश इति वचनात्क चित्समासो न भवति प्रासादात्पतित इत्यादौ । अत एव निपातनादिट् । अन्यथा "तनिपति" इति विक-ल्पट्कत्वात्" यस्य विभाषा" इति इट्प्रतिषेधः स्यात् । अन्ये तु कृतिवृत्तीनां "सेसिचि" इत्यादिना सकारादाविड्विकल्पनादेव निष्ठायामप्यनिट्त्वसिद्धावनिडथमिदित्करणात "यस्य विभाषा" इत्यस्यानित्यत्वज्ञापनादित्याहुः । (पापतिः) । 'सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ'इति किकिनोरन्यतरः । "अतो लोपः" । "यस्य हलः" इति अल्लोपयलोपौ । अ-भ्यासस्य "नीक् वञ्चु"इत्यादिना नीक् न भवति, सासह्यादीनां निपातनमिति वार्त्तिककारव-

चनात् । (सन्निपातः) । घञ् । तस्य शमनं कोपनं वा,(सान्निपातिकम्) । [सन्निपाताच्चेति वक्तव्यम्]इति ठक् । (पतङ्गः)। "पतेरङ्गच् पक्षिणि"इत्यङ्गच् । (पतत्रम्)। "पतेरत्रन्"इत्यत्रन् । (पतत्रिः) । "पतेरक्च"इति त्रिन्प्रत्ययः, अगागमश्च । पतत्रिशब्दः पतत्रशब्दादिनी मत्वर्थे । (पातालम्)। "पतिचण्डाभ्यामालन्"इत्यालन्, बाहुलकाद् वृद्धिः । के चिद्वृद्ध्यर्थमालजिति पठन्ति । तद्युक्तादित्यत्राण्प्रकरणे "कुलालवरुडकर्मरिनिषादचण्डालमित्रामित्रेभ्यः छन्दसि" इति चण्डालात्स्वार्थेऽण्विधानादयुक्तम् । (पताका) पिनाकादिर्बलाकादिर्वा आकप्रत्ययान्तः। (पताकी) । मत्वर्थीय इनिः । व्रीह्यादित्वात्, (पन्थाः) । "पतेस्थ च"इतीनूप्रत्ययः, तकारस्य थकारः । *पथिमथ्यृभुक्षामात्* इति आकारादेशोन्त्यस्य सौ परे, *इतोत्सर्वनामस्थाने* इति पथ्यादीनामिकारस्याकारे सवर्णदीर्घः । *थो न्थः* इति पथिमथोस्थस्य न्थादेशः सर्वनामस्थाने । (पन्थानौ) । सर्वनामस्थाने दीर्घः । शसादावजादौ (पथ) इत्यादि । *भस्य टेर्लोपः* भसंज्ञकानां पथ्यादीनां टेर्लोप इति लोपः, हलादौ नलोपः, (पथिभ्याम् । विपथम् । कापथम्) "कुगतिप्रादयः" इति तत्पुरुषः । *का पथ्यक्षयोः* इति पथ्यक्षयोरुत्तरपदयोः कुशब्दस्य कादेशः । त्रयाणां पन्थाः (त्रिपथम्) । "ऋक्पूरब्धूः" इति समासान्तो ऽकारः । "नस्तद्धित" इति टिलोपः । "पथः संख्याव्ययादेः" इति नपुंसकत्वम् । इदञ्च परवल्लिङ्गतापवाद इति (विपथो देशः । विपथा नगरी) । बहुव्रीहौ न भवति । यथा पन्थानमतिक्रान्तो ऽतिपथ इत्यादौ [अत्यादयः क्रान्ताद्यर्थे द्वितीयया] इत्यादिना तत्पुरुषोपि न भवति । अत्र हि [द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधः] इति परवल्लिङ्गता प्रतिषिध्यते । 'पथः संख्याव्ययात परे' इति यदमरसिंहेन नपुंसकत्वमुक्तं तदप्युत्तरपदार्थप्राधान्य एव, तथा च तत्र व्याख्यातारः, प्रधानलिङ्गापवादत्वात् क्लीबविधानप्रस्तावादिह न भवति । (अपथा नगरी । उत्पथो देश इति) । कथं तर्हि व्यध्वो दुरध्वो विपथः कदध्वा कापथः समा इति । विपथकापथयोः पुंस्त्वमुक्तम्, तत्रैवं व्याख्येयम् । अस्त्यन्यो ऽकारान्तः पथिपर्यायो पथशब्दो ऽर्द्धर्चादिपाठादुभयलिङ्गः । तेन समासात्पुंस्त्वमिति विपथकापथौ पुन्नपुंसकाविति चाहुः सुभूतिचन्द्रादयः। पठितश्च काण्डशेषे अकारान्तः पथशब्दः । पथः पन्थाश्च मार्गः स्यादिति । शाक्यमुनिस्तु संख्याव्ययाभ्यां परस्य पथशब्दस्य पुंस्त्वमेवाह, तत् [पथः संख्याव्ययात् परे]इति वार्त्तिकविरोधात् तत्रत्यभाष्यकैयटवृत्त्यादिमहाग्रन्थविरोधादमरविरोधाच्च चिन्त्यम् । अत्र कृतसमासान्तस्य निर्देशान् "न पूजनात्" "किमः क्षेपे" "नञस्तत्पुरुषात्" इति यदा समासान्तो निषिध्यते तदा "परवल्लिङ्गम्" इति पुंस्त्वमेव (सुपन्थाः । किंपन्था इति) "न पूजनात्" इत्यत्र स्वत्योः परिगणनात् सत्पथ इत्यादौ समासान्तो भवति । "अव्ययीभावश्च" इत्यत्र सुपथमिति यदुदाहरणं तत्र सुशब्दस्य वैपुल्यमर्थो न पूजेति समासान्तलाभः, अपथमित्यत्र "नञस्तत्पुरुषात्" इति निषेधस्य "पथो विभाषा" इति विकल्पनात् समासान्तः । "अपथं नपुंसकम्" इति नपुंसकत्वम् । "पथः संख्याव्ययादेः" इत्येव सिद्धे किं सूत्रेणेत्याशङ्कायां कैयटः पूर्वकालत्वात् सूत्रस्य नायं दोष इति, यदुक्तम् मस्त्यकारान्तः पथशब्द इति तत् "पथो विभाषा" इति सूत्रविरुद्धम्, सति हि तेनापथमिति सिद्ध्यति नकारान्तेन वा ऽपन्था इति तत्किं सूत्रेण । पथि जातः(पन्थकः)। *पथ पन्थ च* इति सप्तम्यन्ताज्जातेर्थे वुन् पथश्च पन्थादेशः। पथो ऽनपेतं (पथ्यम्) । *धर्मपथ्यर्थन्यायादनपेते* इति पञ्चम्यन्तादनपेतेऽर्थे यत् । पथि साधु (पाथेयम्) । "पथ्यतिथि" इति,ढञ् पन्थानं गच्छतीति (पथिकः । पथिकी) *पथः ष्कन्* इति द्वितीयान्ताद्गच्छतीत्यर्थे ष्कन्, षित्त्वात् स्त्रियां ङीष् । पन्थानं नित्यं गच्छतीति विवक्षायां "पन्थो ण नित्यम्" इति णप्रत्यये (पान्थः) । अत एव निर्देशात् णसन्नियोगेन पन्था देशः । शतपथमधीते वेद वा (शतपथिकः । एवं षष्टिपथिकः) । *शतषष्टेः पथः षिकन्* इति द्वितीयान्तात् षिकन् अध्येतृवेदित्रोः षित्त्वात् स्त्रियां(शतपथिकी)। पन्थानंपन्थानं प्रति प्रतिपथम्) । "अव्ययं विभक्ति"इत्यादिना वीप्सायामव्ययीभावः । पथोभिमुखमिति वा (प्रति-

पथम्) । *लक्षणेनाभिप्रती आभिमुख्ये* इति लक्षणं चिन्हं तद्वाचिनाऽभिप्रती आभिमुख्ये गम्यमाने समस्येते स चाव्ययीभावसमास इति । प्रतिपथमेति (प्रतिपथिकः प्रातिपथिको वा) । *प्रतिपथमेति ठंश्च* इति द्वितीयान्तादेतीत्यर्थे ठन्ठकौ । पन्थानं प्रति गच्छतीति समासेनाभिधानान्नेमौ प्रत्ययाविति व्याख्यातारः । सर्वपथं व्याप्नोति (सर्वपथीनः पथिकः) । "तत् सर्वादेः" इति खः । उत्तरपथेनाहृतं गच्छति वा (औत्तरपथिकः) । *उत्तरपथेनाहृतं च* इति तृतीयान्ताद्गच्छत्यर्थे ठञ्, [आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वादुपसंख्यानात्] वार्यादिपूर्वपदादपि ठञ् भवति । (वारिपथिकमित्यादि । आजिपथिकः शाङ्कुपथिकः) । "अजपथशंकुपथाभ्यां च" इति तेनाहृतम् इत्यत्र विषये ठञ् । स्थलपथेनाहृतं मधुकं मारिचं वा (स्थालपथम्) । मधुकमरिचयोः "अण् स्थलादिभ्य" इत्यण् । देवपथ इव प्रतिकृतिः (देवपथः) । *इवे प्रतिकृतौ* इति इवार्थे सादृश्ये वर्त्तमानात् प्रथमान्तात्कन्, तस्य सदृशस्य प्रतिकृतित्वे सतीति सूत्रार्थः । तदेतदुक्तं भवति । प्रतिकृतिरूपे सदृशे वर्त्तमानात् कन्निति कन् । देवपथ इव कश्चिद् (देवपथः) । सत्सङ्ग इवेत्यर्थे वर्त्तमानात् कन् । उभयत्र "देवपथादिभ्यश्च" इति कनो लुक् । परिपन्थशब्दस्तु परिपथपर्यायोऽव्युत्पन्नः, उक्तं च "परिपन्थं च तिष्ठति" इत्यत्र वृत्तौ, समर्थविभक्तिप्रकरणे पुनर्द्वितीयोच्चारणं लौकिकवाक्यप्रदर्शनार्थं परिपथशब्दपर्यायः परिपन्थशब्दोऽस्तीति ज्ञापयति स विषयान्तरे ऽपि प्रयोक्तव्य इति । एवं पथः पन्थाश्च मार्गः स्यादिति काण्डशेषे पथिपर्यायोऽयं पथशब्दः उक्तः । स नास्तीति प्रतीयते । सति हि परिपथशब्दवत् परिपन्थशब्दस्यापि सिद्धेः किं ज्ञापकवर्णनेन । "पन्थोण नित्यम्" इत्यत्र प्रत्ययसन्नियोगेन पथः पन्थादेशकल्पनं प्रकृत्यन्तराभाव एव घटते । अयं कथादावपि॥

क्थे निष्पाके ॥ (क्थति । चक्राथ । क्थिता । क्थीत् । क्राथः ।) क्वथयतीति घटादिपाठात्॥ ८३१ ॥

पृथे गतौ । (पथति ॥ पपाथ । पेथतुः । अपथीत् । पथः । पाथः) पथि गताविति चुरादौ ॥ ८३२ ॥

मथे विलोडने ॥ (मथति । ममाथ । मेथतुः । अमथीत् । माथः । मथः) क्थ्यादीनां त्रयाणामेदित्वात् "ह्ययन०" इति न वृद्धिः । दण्डमाथं धावति (दाण्डमाथिकः । माथः । मन्थाः) । दण्ड इव रज्जुरित्यर्थः । *माथोत्तरपदपदव्यनुपदं धावति* एभ्यो द्वतीयान्तेभ्यो धावतीत्यर्थं ठगिति ठक् ॥ ८३३ ॥

टुवम उद्गिरणे ॥ उद्गिरणमन्तर्गतस्य मुखान्निसारणम् । अत्र सुधाकर उद्गिरण इति पठन्निपानात् तत्र इद्धातोरित्याह । (वमति । ववाम । ववमतुः) वादित्वान्नेत्वाभ्यासलोपौ । भागवृत्तौ त्वनयोर्विकल्पेन वेमतुरित्युदाहृतं, तद्भाष्यादिषु चिरन्तनेषु कुत्रापि न दृष्टम् । (वमिता । अवमीत्) । "ह्ययन्त" इति न वृद्धिः । (विवमिषति । वंवम्यते । वंवन्ति । वंवान्तः) हेरपित्त्वात् ङित्त्वात् "अनुनासिकस्य" इति दीर्घेऽनुस्वारे (वंवांहि । अवंवन् । वमयति । वामयति) "ग्लास्नावनुवमामनुपसर्गाद्वा" इति मित्वनिषेधः । (वामः) । "नोदात्तोपदेशस्य" इति वृद्धिनिषेधस्य [आचमिकमिवमीनाम्] इति निषेधः । (वान्तः । वान्तवान्) "आदितश्च" इति चकारस्यानुक्तसमुच्चयार्थतया निष्ठायामनिट्त्वमिति वृत्तौ । भाष्यवार्त्तिकयोरनुक्तमपीदं प्रयोगबाहुल्यादुक्तमिति हरदत्तः, तदेवं काश्यादीनामुदित्पाठः प्रत्युक्तः । (वमथुः) टित्त्वादथुच् ॥ ८३४ ॥

भ्रमु चलने ॥ भ्रमति । बभ्राम । बभ्रमतुः । भ्रमतुः । भ्रेमुः । बभ्रमुः । बभ्रमिथ । भ्रेमिथ) "वा जॄभ्रमुत्रसाम्" इति किति लिटि थलि च सेटि वा एत्वाभ्यासलोपौ । (भ्रमिता । भ्रमिष्यति । भ्रमतु । अभ्रमत् । भ्रमेत् । भ्रम्यात् । अभ्रमीत्) शब्विषये "वा भ्राश०" इति पक्षे श्यनि (भ्रम्यति) भ्रम्यतु । अभ्रम्यत् । भ्रम्येत्) भ्राम्यतीति दिवादौ शमादिपठितस्यानवस्थानार्थस्य "शमामष्टानाम्" इति दीघ । (बिभ्रमिषति । बम्भ्रम्यते)

अनुनासिकान्तत्वाल्लुक्, (बम्भ्रन्ति । बम्भ्रान्तः) लोटि हौ (बम्भ्रांहि । अबम्भ्रन् । *मो नो धातोः* इति मकारस्य नकारः । (भ्रमयति) । अमन्तत्वान्मित्त्वम् । घञि (भ्रमः) । "नोदात्त०" इति वृद्धिनिषेधः । प्रयोजनं तु भ्रमितुं न शक्ताः अभ्रम इत्यत्र *अच्काववशक्तौ* इति अजन्तस्य कान्तस्य च नञः परस्योत्तरपदस्य तत्पुरुषे अशक्तौ गम्यमानायां विधीयमानस्यान्तोदात्तत्वस्याभावः । तेन *तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीया कृत्याः* । तत्पुरुषे तुल्यादिपूर्वपदस्य विधीयमानः प्रकृतिस्वरो भवति स च निपातत्वादाद्युदात्त एव । अचि तु "अच्कौ"इत्यन्तोदात्तमेव । (भ्रमित्वा । भ्रान्त्वा । भ्रान्तः) । भ्रान्तं देशमनेकदुर्गविषममित्यत्र देशश्चाकर्मणामिति देशस्य कर्मत्वेनाभिधानं तु भवतावेवोपपादितम् । (भ्रमणः) । चलनार्थत्वाद्युच् । (भ्रमीति) शमादिपठितस्य घिनुण् । (भ्रमरः) । "अर्त्तिचमिकमिभ्रमिदेविवासिभ्यश्च" इत्यरप्रत्ययः । (भ्रुमलः) अक्षिरोगः । "भ्रमेरुच्चोपधायाः" इति कलप्रत्यय उपधायाश्चोकारः (भ्रूः) "भ्रमेर्डूः" इति डूः । डित्त्वाट्टिलोपः । (भ्रुवौ । भ्रुवः) अजादौ "अचि श्नुधातुभ्रुवाम्" इत्युवङ् । (हे भ्रूः) इत्यत्र "नेयङुवङ्स्थानावस्त्री"इति नदीसंज्ञानिषेधः । "अम्बार्थनद्योर्ह्रस्वः" इति ह्रस्वाभावः । ङिद्वचनेषु *ङिति ह्रस्वश्च* इति नदीविकल्पः । ङिद्वचनेषु इयङुवङ्स्थानेष्वीदन्तमिकारोकारान्तं च स्त्र्याख्यं वा नदी स्त्रीशब्दं वर्जयित्वेति सूत्रार्थः । तेन नदीसंज्ञायाम् "आण् नद्याः"इत्यादि वृद्धावुवङि (भ्रुवै) इत्यादि । अन्यदा केवलमुवङि (भ्रुवे) इत्यादि । आमि स्त्रीशब्दव्यतिरिक्तयोरियङुवङ्स्थानयोः"वामि" इति नदीनिषेधविकल्पनात् (भ्रूणां भ्रुवामिति) । भ्रूर्नामा का चित्तस्या अपत्यं (भ्रौवेयः) । *भ्रुवो वुक् च* इति ढक् तत्सन्नियोगेन वुगागमः । (लेखाभ्रेयः) । "शुभ्रादिभ्यश्च"इत्यापत्ये ढक्, *ढे लोपो ऽकद्र्वाः* इति ढे परे कद्रूवर्जितस्योवर्णान्तस्याङ्गस्योकारस्य लोप इत्यूकारलोपः । अक्षिणी च भ्रुवौ च (अक्षिभ्रुवम्) । "अचतुर०"इत्यादिनाऽचि समासान्ते निपातितम् । भ्रूकुलं भ्रूभङ्ग इत्यादौ *इको ह्रस्वोऽङ्यो गालवस्य* इति इगन्तस्याङ्यन्तस्य उत्तरपदे विधीयमानो ह्रस्वस्तत्रानुवृत्तस्यान्यतरस्याङ्ग्रहणस्य व्यवस्थितविभाषात्वाद्वा भवति । (भ्रूकुसः । भ्रूकुटिः भ्रुकुटिः) इत्यत्र पक्षे ह्रस्वो भवति । अत्र भाष्ये अपर आह 'अकारो भ्रुकुंसादीनां वक्तव्यः' । भ्रकुटिः । भ्रकुंस इति ॥ ८३५ ॥

क्षर संचलने ॥ (क्षरति । चक्षार । क्षरिता । अक्षारीत) । "अतो ल्रान्तस्य" इति वृद्धिः । (चिक्षरिषति । चाक्षर्यते । चाक्षर्ति । चाक्षर्हि । अचाक्षः) । हल्ङ्यादिलोपः । (क्षारः । क्षरः । क्षरेजः) । *विभाषा वर्षक्षरशरवरात्* इति जशब्दे उत्तरपदे विभाषा सप्तम्या अलुक् । अत्र क्षल संचलन इति क्वचित्पठ्यते । तदपि क्षरवित् । शम्यादय उदाता उदात्तेतः ॥ ८३६ ॥

षह मर्षणे ॥ उदात्तोऽनुदात्तेत् । (सहते । सेहे । सहिता । सोढा) । "तीषसहलुभ"इतीड्विकल्पः । इडभावे ढत्वधत्वष्टुत्वढलोपाः, "सहिवहोरोदवर्णस्य" इति ढलोपे अवर्णस्यौकारः । (सिसहिषते) । "स्तौतिण्योरेव" इत्यषत्वम् । (सिसाहयिषतीत्यत्र) "स्तौस्ति" इति नियमं बाधित्वा "सः स्विदिस्वदिसहीनाम्" इति सत्त्वं भवति । (सासह्यते । सासोढि । सासोढः) पूर्ववद्ढत्वादि, (सासक्षि) षढोः कः सीतिकत्वम् । लोटिहेर्धिभावे ढत्वष्टुत्वढलोपाः । तेषु (सासोढीति) भवति । (साहयति । असीषहत् । परिषहते । विषहते) "परिनिविभ्यः" इति षत्वम् । इदं च *सिवादीनां वाड्व्यवायेपि* इति अड्व्यवाये विकल्प इति । (पयषहत । पर्यसहतेति) "स्वादिष्वभ्यासेन च" इत्यत्र "प्राक् सितात्" इत्यनुवर्त्तनात (परिषिसहिषत) इति । अत्रोत्तरखण्डस्य षणि प्रतिषेध एव भवति। अत एव "प्राक् सितात्" इत्यनुवर्त्तनात्तत्राभ्यसस्येति योगभेदेन स्थादिष्वेवाभ्यासस्य षत्वमिति क्रियमाणो नियमोस्मिन्प्राक्सितीये नेति षत्वमभ्यासस्य भवत्येव । तथा च तत्र वृत्तौ प्राक्सितीयः सुनोत्यादिरेव प्रत्युदाहृतः । अन्ययस्तु सामान्येन नियममिच्छन् षत्वमाह । तत्र

"स्तम्भुसिवुसहां च" इति अभ्यासे षत्वनिषेधे वैयर्थ्यप्रसङ्गात् वृत्त्यसामञ्जस्याच्च हेयम्। परिसोढेत्यादौ सहेः षोढरूपत्वात् "षोढः" इति षत्वं निषिध्यते। परिषासोढीत्यत्राभ्यासस्यासोढरूपत्वान्नायं निषेधः। पर्यसीसहदित्यादौ "स्तम्भुसिवुसहां चङि" इति "परिनिविभ्यः" इति षत्वं निषिध्यते। परस्य तु "इण्कोः" इति भवत्येव। "दाश्वान्साह्वान्" इत्यत्र वृत्तौ साह्वानिति निपातनमस्येत्युक्तम्। यदाह परस्मैपदमुपधादीर्घत्वमनिट्त्वं च निपात्यत इति। कैयटे तु "आद्यपाद्वा" इति विभाषितणिच इत्युक्तम्। एवं पदमञ्जर्यामपि। अत्र मते तस्य सहेः षादेशः क्वनिनश्च लुक् परस्मैपदित्वात्क्वसुर्निपात्यः। (सह्यम्)। "शकिसहोश्च" इति कर्मणि यत्। साहयतीति, (साहयः)। "अनुपसर्गाल्लिम्प०"इत्यादिना शप्रत्ययः। शपि गुणायौ। (साहः। सहः)। णाभावे ऽच्। (सर्वंसहा) वसुमती। "संज्ञायां भृतृवृजि"इत्यादिना खच्। "अरुद्विषत्" इति मुम्। सर्वं सहत इति (सर्वंसहः)। "पूः सर्वयोः" इति यथासंख्यादस्य सर्वशब्दे कर्मण्युपपदे खच्। (सहिष्णुः)। "अलङ्कृञ्" इत्यादिनेष्णुच्। (सहनः)। "अनुदात्तेतः" इति युच्। (सासहिः)। "सहिपतिवदिभ्यो यङन्तेभ्यः किकिनौ" इति किकिनोरन्यतरः। (सहित्रम्)। "अर्तिलूधूसूखनसहचर इत्रः"इति कारण इत्रप्रत्ययः। (षट्) "सिहेः षप् लुक् च" इति सहेः षषादेशः क्वनिनश्च लुक् "ष्णान्ताः षड्" इति षट्संज्ञायां "षड्भ्यो लुक्" इति जश्शसोर्लुक्। "विष्णुमित्यत्र "षट्चतुर्भ्यश्च" इति षट्संज्ञकत्वादामो नुट्। षण्णां पूरणः (षष्ठः)। *तस्य पूरणे डट्* इति षष्ठ्यान्तात्पूरणे संख्यान्तरस्योत्पादकर्थे डटि "षट्कतिकतिपयचतुराम्" इति थुक्। टित्वात् स्त्रियां (षष्ठी)। यदा तु पूरणो भागो भवति तदा "षष्ठाष्टमाभ्यां ञ च" इति स्वार्थे ञप्रत्ययः। चकारादन् च, (षाष्ठः। षष्ठः)। यदा तु पूरणो भागो माने भवति तदा *मानपश्वङ्गयोः कन्लुकौ च* इति तथासंख्यात् षष्ठस्य माने कन्। अष्टमस्य लुक् *षष्ठाष्टमाभ्यां ञ च* इति विहितयोर्ञाञोः, चकाराद् यथाप्राप्तौ ञाञौ। तेन(षष्ठकं मानं षाष्ठं षष्ठमिति) त्रीणि रूपाणि भवन्ति। "पूरणगुण०"इति पूरणात्समासनिषेधात्तान्युञ्छषष्ठेत्यादिप्रयोगश्चिन्त्यः। षट् दन्ता अस्य (षोडन्)। *वयसि दन्तस्य दतृ* इति दन्तान्तस्य बहुव्रीहौ वयसि गम्यमाने दत्रादेशः। उगित्त्वान्नुम्। षट् च दश च (षोडश इति)*चार्थे द्वन्द्वः* इति द्वन्द्वः। समुच्चयादयश्चार्थास्तत्रासामर्थ्यात् समुच्चयान्वाचययोर्न समास इति स्थितम्। (षोढा)। 'संख्याया विधार्थे धा'"अधिकरणविचाले च" इति धाप्रत्ययः। "तत्र षष उत्वम्" इति उत्वषत्वे धासु वेति वचनाद् धाप्रत्यये पक्षे न भवत इति (षड्धा) इत्यपि भवति। अत्र षकारस्य धाप्रत्यये "स्वादिषु" इतिपदत्वाज्जश्त्वं डकारः। धकारस्य ष्टुत्वं *न पदान्तात्* इति निषेधान्न भवति। पदान्ताट्टवर्गात् परस्य नाम्वर्जितस्य स्तोः ष्टुत्वं नेति सूत्रार्थः॥ ८३७॥

रम क्रीडायाम्॥ अनुदात्तोऽनुदात्तेत्। (रमते। रेमे। रेमिषे। रेमिध्वे)। क्रादिनियमादिट्। (रन्ता। रंस्यते। रमताम्। अरमत। रमेत। रंसीष्ट। अरंस्त। रिरंसते। रंरम्यते। रंरन्ति। रंरतः)। प्रकृतिग्रहणन्यायेन "अनुदात्तोपदेश०" इत्यनुनासिकलोपः। (रंरंसि। रंरण्मि। रंरण्मः)। "म्वोश्च"इति नत्वे णत्वम्। (रंरहीत्यत्र) अनुनासिकलोपस्यासिद्धत्वात् "अतो हेः" इति लुङ् न भवति। (अरंरन्)। "मो नो धातोः" इति नत्वम्। (रमयति। अरीरमद्। विरमति। आरमति। परिरमति) "व्याङ्परिभ्यो रमः" इति परस्मैपदम्। (उपरमति) "उपाच्च" इति परस्मैपदम्, इदं सकर्मकविषयम्। अकर्मकत्वे (उपरमति। उपरमते) "विभाषाकर्मकात्" इति विकल्पस्योक्तत्वात्। अन्तर्भावितण्यर्थोऽयं सकर्मकः। (विरराम। विरेमतुः। विरेमिथ। विररन्थ) थलि *उपदेशेत्वतः* इति उपदेशेत्वतस्तासौ नित्यानिटस्थलीणनिषेधेपि इह भारद्वाजनियमादिट् पक्षे न भवति। लुङि *यमरमनमातां सक् च* इति परस्मैपदपरे सक्। सिचश्चेट् "इट ईटि" इति सिज्लोपः। (व्यरंसीत्। व्यरंसिष्टाम्। रमः। रामः)। "ज्वलितिकसन्तेभ्योणः" इति णः। मातन्त्वेप्यनुदात्तोपदेश-

त्वात् वृद्धिनिषेधाभावः । (रमणः) । नन्द्यादित्वात् ण्यन्ताल्लुः । (स्तम्बेरमः) *स्तम्बकर्णयोरमिजपोः* इति स्तम्ब उपपदे च प्रत्ययः । [हस्तिसूचकयोः] इति वचनात् हस्तिविषयत्वायम् । "तत्पुरुषे कृति" इति सप्तम्या अलुक् । (रन्तिः) "न क्तिचि दीर्घश्च" इति दीर्घानुनासिकलोपनिषेधः । अयमुदिदिति के चित् । त्क्वायामिड्विकल्पमुदाहरन्ति । तन्महान्तो न सहन्ते । (रत्नम्) "रमेस्तश्च" इति नप्रत्ययस्तकारश्चान्तादेशः । (रमतिः स्वर्गः) "रमेर्नित्"इत्यतिप्रत्ययः। (सुरतः कामः) । "सौ रमे क्तः"इतिक्तः। (सुरतः । कृपावान्) । "रमेः पूर्वपदस्य च दीर्घः" इति क्ते पूर्वपदस्य दीर्घः । (रथः) । "हनिकुषि" इत्यादिना थन् । (रथ्या । रथकड्या) *खलगोरथात्* । *इनित्रकट्यचश्च* इति यत्कड्यचौ "तस्य समूहः" इति विषये । स्वभावात् स्त्रीलिङ्गता । रथस्येदं (रथ्यम्) । *रथाद्यत्* "तस्येदं"विषये यत् । अत्र वृत्तौ रथाङ्ग एवेष्यते इति [रथसीताहलेभ्यो यद्विधौ तदन्तविधिः] इत्युक्तत्वात् (परमरथ्यम्) इत्याद्यपि भवति । (आश्वरथम्) । *पत्रपूर्वादञ्*इति वाहनवाचिपूर्वपदात् रथान्तात् अञ् यतोपवादः । अयमपि रथाङ्ग एवेष्यते : रथं वहति (रथ्यः) । *तद्वहति रथयुगप्रासङ्गात्* । इति द्वितीयान्तात् वहतीत्यर्थे यत् (रथाय हिता रथ्या) *खलयवमाषतिलवृषब्रह्मणश्च* इति चकारस्यानुक्तसमुच्चयार्थत्वात् चतुर्थ्यन्ताद्धितार्थे यत् । वामरथस्यापत्यं (वामरथ्यम्) । "कुर्वादिभ्यो ण्यः"इति ण्यः, तत्र 'वामरथस्य कण्वादिवत् स्वरवर्जम्'इति पठ्यते । तस्यायमर्थः । वामरथ्यशब्दस्य गर्गाद्यन्तर्गतस्य यञन्तस्य काण्वादेर्यत्कार्यं तद्भवति स्वरं वर्जयित्वेति, तेन "यञञोश्च" इति गोत्रबहुत्वे विधीयमानो लुगस्यापि भवति । (वामरथा इति) । तथत्रायं "प्राचां ष्फ तद्धितः" इति स्त्रियां विधीयमानो ङीष्फश्चास्यापि भवतः । (वामरथ्यः । वामरथ्यायनी) ष्फस्य षित्त्वात् ङीष् । "हलस्तद्धितस्य" इति यलोपः । "यस्येति च" इत्यलोपः तथा यूनि "यञिञोश्च" इति विधीयमानष्फगत्रापि भवति । (वामरथ्यायन) इति । "आपत्यस्य" इति यलोपस्तत्रैव अनातीति निषेधान्न भवतीति । तथा *सङ्घाङ्कलक्षणेष्वञ्यञिञामण्* इति यञन्तात् सङ्घाङ्कलक्षणेषु विधीयमानोऽण् अस्मादपि भवति । (वामरथानि) सङ्घाङ्करणानीति । तत्र घोषग्रहणं चोदितं, तेन (वामरथो घोषः) इत्यपि भवति । "आपत्यस्य" इति यलोपः । तथा *कण्वादिभ्यो गोत्रे* इति गोत्रापत्यवाचिभ्यः कण्वादिभ्यो विधीयमानोण् अस्मादपि भवति । (वामरथाः छात्राः) । स्वरवर्जमित्युक्तत्वात् । "ञ्नित्यादिर्नित्यम्" इति प्रकृतेराद्युदात्तत्वं न भवति, प्रत्ययस्वर एव भवति ॥ ८६८ ॥

षद्लृ विशरणगत्यवसादनेषु ॥ अयं शदिक्रुशी चानुदात्ता उदात्तेतः(सीदति) *पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिशर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्छधौशीयसिदाः* इति शिति प्रत्यये परे यथासंख्यात् सदेः सीदादेशः । (ससाद । सेदतुः । ससत्थ । सेदिथ) थलि भारद्वाजनियमादिट्पक्षे "थलि च सेटि" इत्येत्वाभ्यासलोपौ । (सेदिव । सेदिम) क्रादिनियमान्नित्यमिट् । (सत्ता । सत्स्यति । असीदत । सीदेत् । सद्यात् । असदत्) लृदित्त्वादङ् । (सिषत्सति । सासद्यते) भावगर्हायां "लुपसद०" इति यङ् । (सासत्ति) । लङि सिपि "दश्च" इति वा रुत्वम् , (असासः । सादयति । असीषदत् । निषीदति) । *सदिरप्रतेः* इति अप्रतेरिणन्तादुपसर्गात् परस्य षत्वे (न्यषीदत्) । "प्राक् सितादड्व्यवायेपि" इति षत्वम् (निषिषत्सति) । न्यषीषदिदित्यत्र "स्थादिष्वभ्यासेन च" इत्युभयत्र षत्वम् । गद्वाभ्यासस्य "सदिरप्रतेः" । "प्राक् सितादड्व्यवायेपि" इति षत्वम् । उत्तरस्य तु"इण्कोः" इति । (निषसादेत्यत्र) तु "सदिष्वञ्जयोः परस्य लिटि" इति उत्तरखण्डस्य षत्वनिषेधः । (निषेदतुरित्यादौ) अभ्यासस्य लोपे सति अभ्यासात् परत्वाभावान्नायं निषेधः। (सेदिवान्)। *भाषायां सदवसश्रुवः* इति भूतसमान्ये वा लिट् , तस्य च क्वसुः । अस्मादेव वचनात् भूतसामान्ये सदादिभ्यो लिडनुमीयते । इदं चानुमानं विकल्पेन, अस्य च लिटो नित्यं क्वसु-

रिति न तिङां श्रवणं नापि लुङो धातुसामान्यविहितस्य सदादिविशेषविहितेनानेन बाधः। न च सदादौ भूतसामान्ये सावकाशस्यास्य लिटः "अनद्यतने लङ्" "परोक्षेलिट्" इति भूतविशेषविहिताभ्यां बाधः, तद्विधानेप्यस्यानुवर्त्तनादिति भाष्यादौ स्थितम्। क्रादिनियमादिट्, उगित्वान्नुम्। *सान्तमहतः* इति असंबुद्धौ सर्वनामस्थाने दीर्घे सोः "हल्ङ्याब्भ्यः" इति लोपः। सकारस्य संयोगान्तत्वात् लोपः। भसंज्ञायां वसोः संप्रसारणे "संप्रसारणाच्च" इति पूर्वत्वे परस्य (आसेदुष इत्यादि), सम्प्रसारणविषये नेडागमः प्रवर्तते। पश्चात् निमित्तविघातो भविष्यतीति, हलादौ "वसुस्रंसु" इत्यादिना दत्वे (आसेदिवद्भ्यामिति। परिषत्)। "सत्सूद्विष०" इति क्विप्। पर्षच्छब्दस्तु पृषोदरादित्वाद् परेरिकारलोपे, परिषदा कृतं (पारिषदम्।) *कुलालादिभ्यो वुञ्* इति तेन कृतमिति विषये वुञ्। परिषद इदं (पारिषदम्)। "पत्राध्वर्युपरिषदश्च" इति तस्येदमर्थे अञः। (परिषद्वलः)। "रजःकृष्यासुतिपरिषदो वलच्" इति मत्वर्थे वलच्। परिषदं समवैति, तत्र साधुर्वा (परिषद्यः)। *परिषदो ण्यः* इति योगाभ्यां समवैति तत्र साधुरिति विषये ण्यः। एकदेशविकृतस्यानन्यत्वात कृतेकारलोपस्याप्येते प्रत्यया भवन्ति। तथा च भाष्ये "एवोङ्" इत्यत्र पार्षदकृतिरेषा तत्र भवतामिति, तथा सम्प्रति पर्षद्वलोक्तमिति भारते वलच्। भट्टिकाव्ये पर्षद्वल इति वलच् दृश्यते। (दिविषत्)। पूर्ववत् क्विप्, "तत्पुरुषे कृति बहुलम्" इति अलुक्। सुषामादिपाठात षत्वम्। बहुलग्रहणात लुकि (द्युसत्)। "दिव उत्" इति पदत्वे उत्वम्। (सदः। सादः)। निषीदत्यस्मिन् पापमिति (निषादः)। "हलश्च" इति अधिकरणे घञ्। "उपसर्गस्य घञि" इति दीर्घस्तत्रैव "अमनुष्य" इति प्रतिषेधाच्च भवति। निषादस्यापत्यं, (नैषादकिः), "अत इञ्"। "सुधातृव्यासवरुडनिषाद०" इति अकङादेशः। (।सद्गुः)। "दाधेट्सिशदसदो रुः" इति तच्छीलादौ रुः। (निषद्या)। "संज्ञायां समज०" इत्यादिना स्त्रियामकर्त्तरि क्यप्। (सदः) असुन्। सत्रं, "गृधुविपचिवचियमिसदिभ्यश्च" इति त्रप्रत्ययः। पापं चिकीर्षति, (सत्रायते)। "सत्रकक्ष०" इत्यादिना कण्वचिकीर्षायां, क्यङ्। कण्वं पापं, सत्रादयो वृत्तिविषये पापार्था इत्युक्तम्। (निषद्वरः कामकर्दमौ,) "नौ सद०" इति वरच्। (सद्म)। मनिन्। सूकरसद्मन इमे (सौकरसद्माः)। "नान्तस्य टिलोपः" इत्यादिना अञिति प्रकृतिभावापवादः टिलोपः। (सादिः)। "वपिवदिराजिश्टिषिसहिनिवाशिषदिवृभ्यः" इतीञ् प्रत्ययः। अयं तुदादावपि। उभयत्र पाठे प्रयोजनं उञ्छतिवन्नेयम्। चुरादौ चायम् ॥ ८३९ ॥

शद्लृ शातने ॥ अत्र मैत्रेयः। शद्लृ विशातने। विशीर्णतायां वर्त्तते, शातनं विषयभावेन निर्दिश्यते प्रसिद्धत्वादिति। (शीयते)। "पाघ्रा" इत्यादिना शीयादेशः। "शदेः शितः" इति शिद्भाविनोस्मात्तङ्। (शशाद। शेदतुः। शशत्थ। शेदिथ। शेदिव) क्रादिनियमादिट्। थलि भारद्वाजनियमादिड्विकल्पः। (शत्ता, शत्स्यति। शीयताम्। अशीयत। शीयेत) आशिषि (शद्यात्। अशदत्) लृदित्त्वादङ्। (शिशत्सति)। शिद्भावे च शादेरात्मनेपदनिमित्तं केवल इति प्रकृतेरतङनिमित्तत्वात् "पूर्ववत्सनः" इति न भवति। (शाशद्यते। शाशत्ति। शातयति) "शदेरगतौ तः" इति णौ तत्वम्, गतौ तु (शादयते गोपालक) इति तत्वं न भवति। अयमेव गतौ तत्वप्रतिषेधो गत्यर्थत्वे प्रमाणम्। (शादः। शदः)। (शाद्वलम्)। "नडशादाड्ड्वलच्" इति वलच् चातुरर्थिकः, डित्वाट्टिलोपः। (शद्रुः)। "दाधेट्सिशदसदो रुः" शातयतीति (शत्रुः,) तृशदिभ्यां "त्रुन्" इति त्रुन्। बाहुलकात् णेर्लोपो वृद्ध्यभावश्चेति प्रत्ययलक्षणेन णिज्निमित्तं तत्वम् ॥ ८४० ॥

क्रुश आह्वाने रोदने च ॥ सदादयस्त्रयोनुदात्ता उदात्तेतः। तथा च व्याघ्रभूतिः।

अदिं हदिं स्कन्दिभिदिच्छिदिक्षुदीद् सदिं शदिं स्वद्यतिपद्यती स्विदिम्।
तुदिं नुदिं विद्यति विन्त इत्यपि प्रतीहि दान्तान् दशपञ्च चानिटः॥
दिशिं दृशिं दंशिमथो स्पृशिं मृशिम् रुशिं रिशिं क्रोशतिमष्टमं विशिम्।

लिशिं च शान्ताननिटः पुराणगाः पठन्ति पाठेषु दशैव नेतरान् ॥

(क्रोशति । चुक्रोश । चुक्रुशतुः । चुक्रोशिथ । चुक्रुशिव । चुक्रुशिम) क्रादिनियमादिट् । (क्रोष्टा । क्रोक्ष्यति । क्रोशेत्) आशिषि (क्रुश्यात् । अक्रुक्षत्) "शल इगुपधाद्" इति क्सः । (चुक्रुक्षति) । "हलन्ताच्च" इति कित्त्वं, (चोक्रुक्षते चोक्रोष्टि हौ चोक्रुड्डि । धित्वषत्वढत्वजश्त्वानि । लङि तिप्सिपोः (अचोक्रोट् । क्रोशयति । अचुक्रुशत् । आक्रोशकः) । *देविक्रुशोश्चोपसर्गे* इति तच्छीलादौ वुञ् । (हे क्रोष्टो ।) "सितनिगमि" इत्यादिना तुन् । अस्य *तृज्वत् क्रोष्टुः* इति असम्बुद्धौ सर्वनामस्थाने तृजन्तरूपातिदेशात् क्रोष्टा क्रोष्टारावित्यादि । शसि (क्रोष्टून्) । अन्यत्र *विभाषा तृतीयादिष्वचि* इति तृज्वद्भावविकल्पनात् (क्रोष्ट्रा । क्रोष्टुनेत्यादि) आमि [नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन] इति नुमि अनजादित्वात् तृज्वद्भावाभावे (क्रोष्टूनामिति) भवति । (क्रोष्ट्री) "स्त्रियां च" इति तृज्वद्भावः । "मतिबुद्धि" इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात् (अक्रुष्टः) । वर्त्तमाने क्तः । (क्रोशः । क्रुशः) णाभावे इगुपधत्वात्कः ॥ ८४१ ॥

कुच संपर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु ॥ एतदादयः कसन्ता उदात्ता अनुदात्तेतः । (कोचति) । कुच शब्दे तार इति पठितस्यापीह पाठः संपर्चनादादेव कोच इति ज्वालादिसम्बन्धेन णो यथा स्यादिति ॥ ८४२ ॥

बुध अवगमने । (बोधति । बुबोध । बोधिता इत्यादि बुबुधिषति । बोधित्वा) "रलो व्युपधा०"इति कित्त्वविकल्पः । रुधि संराधियुधिबन्धिसाधयः क्रधिक्षुधी युद्ध्यतिबुध्यती व्यधिरित्यत्र श्यनानिर्देशात् दैवादिकस्य ग्रहणं नान्यस्य नापि बुद्धिर् बोधन इति वक्ष्यमाणस्य (बोबुध्यते । बोबोद्धि)"झषस्तथोः"इति धत्वे जश्त्वे (बोभोत्सि) । "एकाचो बशो भष् झषन्तस्य स्ध्वोः" इति भष्त्वे "खरि च"इति चर्त्वे, लोटि हेर्द्धिभावे जश्त्वे च (बोबुद्धि । बोबुधानि) । "नाभ्यस्तस्य०" इति गुणनिषेधः । लङि तिपि (अबोभोत्) । पदत्वात् भष्भावो जश्त्वं च । सिपि तु "दश्च" इति वा रुत्वे (अबोभोरित्यपि भवति । बोधयति देवदत्तः । अबूबुधत् ।) "अणावकर्म्मकात्" इति परस्मैपदं, यदायमणावचित्तवत्कर्त्तृकस्तदापि "बुधयुध०" इति परस्मैपदमेव, न च तत्र युधादिसाहचर्यात् बुध्यतेरेव ग्रहणमिति वाच्यम् । एवं बुधिग्रहणं व्यर्थं स्यात् । यतो बोधने बोधयते इति दुर्वारम्, न च बोधतिबुध्यत्योरर्थभेदः, एवं "दीपजन०" इति लुङि तशब्दे वा चिण्विधावपि श्यन्विकरणैरात्मनेपदिभिश्च साहचर्यात् बुध्यतिबोधत्योर्द्वयोर्ग्रहणमिति (व्यत्यबोधि, व्यत्यबोधिष्टेति भवति), असत्यपि वाग्रहणे न विशेषः, यतो दैवादिकेन व्यत्यबोधि व्यत्यबोधिष्टेति रूपद्वयं दुर्वारं, भावादिकर्मणोः (बुधितमनेन बोधितमनेनेत्यादि) ॥ ८४३ ॥

रुह बीजजन्मप्रादुर्भावे च ॥ अनुदात्ता उदात्तेतः (रोहति रुरोह । रुरोहिथ रुरुहिव) क्रादिनियमादिट् । (रोढा) । गुणढत्वधत्वष्टुत्वढलोपाः (रोक्ष्यति) "षढोः कः सि" इति कत्वं (रोहतु । अरोहत् । रोहेत्) आशिषि (रुह्यात् । अरुक्षत्) "शल इगुपधादनिटः क्सः" (रुरुक्षति । रोरुह्यते रोरोढि । रोरूढः) "ढ्लोपे" इति दीर्घः (रोरोक्षि) लोटि सोढित्वे धित्वष्टुत्वलोपदीर्घेषु (रोरूढि) । लङि (आरोरोट् । अरोरूढाम् । रोहयति । अरूरुहत् । रोपयति । अरूरुपत्) "रुहः पोन्यतरस्याम्" इति पक्षे हकारस्य पकारः, (आरूढो वृक्षम् । आरूढो वृक्षः) । "गत्यर्थाकर्मकः" इत्यादिना कर्त्तृकर्मणोः क्तः (रोहितिः) "हूसृरुहिपुषिभ्य इतिः" इतीतिः । (रोहितः । लोहितः) "रुहेरितश्च लो वा"इति इतः । पक्षे रेफस्य लत्वम् । अलोहितो लोहितो भवति,(लोहितायते । लोहितायति)। *लोहितादिडाज्भ्यः क्यष्* च्व्यर्थविषयादच्व्यन्तात् भवत्यर्थे क्यष । "वा क्यषः"ति पक्षे तङ् । (लोहित एव लोहितको मणिः) । "लोहितान्मणौ"इति मणौ वर्तमानात् लोहितशब्दात् स्वार्थे कन् । (लोहितकं मुखं कोपेन) । "वर्णे चानित्ये" इति अनित्यवर्णे वर्त्तमानात् । लोहितशब्दात् स्वार्थे कन्, स्त्रियां

[लोहिताल्लिङ्गबाधनं वा) इत्युक्तत्वात् "वर्णादनुदात्तात्" इति पक्षे कनोन ङीब्विधिरिति (लोहितिकेति भवति)। अन्यदा तु ङीम्नकारयोर्लिङ्गविशिष्टपरिभाषया कनि ह्रस्वे च (लोहिनिकेति)। लोहितेन रक्तो (लोहितकः पटः)। "रक्तः" इति लाक्षादिना रक्तेर्थे वर्त्तमानात् लोहितशब्दात्स्वार्थे कन्, अत्रापि स्त्रियां "लोहिताल्लिङ्गबाधनं वा" इत्यस्यानुवर्तनात् (लोहितिका पटी लोहिनिका पटीत्युभयं भवति। रोहिषो मृगभेदः।) "रुहेर्वृद्धिश्च" इति टिषचि वृद्धिः। स्त्रियां (रौहिषी) ॥ ८४४ ॥

कस कतौ ॥ (कसति। चकास। कसिता। अकसीत्। अकासीत्। चिकसिषति। चनीकस्यते। चनीकसीति चनीकधीत्यत्र) "धिच" इति सलोपः तस्यासिद्धत्वात् "अतो हेः" इति लुङ् भवति। लङि तिपि "तिप्यनस्तेः"इति सकारस्य पदान्तत्वात् दत्वे (अचनीकत्)। "सिपिधातोर्रुर्वा" इति रुत्वं, "नीग्वञ्चु" इत्यभ्यासस्य नीक्। (कासयति। अचीकसत्। कस्वरः) "स्येशभास" इति वरच्। शब्दकुत्सायां कसत इति गतम्। कुञ्चादय उदात्ता उदात्तेतः। रुहिस्त्वनुदात्तः ॥ ८४५ ॥

वृत्। ज्वलादयो वृत्ता इत्यर्थः ॥

अथोभयपदिनः ॥

हिक्क अव्यक्तशब्दे ॥ एतदादयो गूहत्यन्ता उदात्ताः स्वरितेतः। (हिक्कति। जिहिक्क। हिक्किता। हिक्कियति। हिक्कतु। अहिक्कत्। हिक्केत्। हिक्यात्। अहिक्कीत्। जिहिक्किषति। जेहिक्यते। जेहिक्ति) "स्कोः" इति कलोपस्य असिद्धत्वात् अलघूपधत्वान्न गुणः (हिक्कयति। अजिहिक्कत्। हिक्कते। जिहिक्के। हिक्किता। हिक्किष्यते। हिक्कताम्। अहिक्कत। हिक्किषीष्ट। अहिक्किष्ट। जिहिक्किष्यते) "पूर्ववत्सनः" इति तङ् ॥ ८४६ ॥

अञ्चु गतौ याचने च ॥ (अञ्चतीत्यादि)। अञ्चु गतिपूजनयोरित्यत्रैवोदाहृतम्। (अञ्चते। आनञ्चे। अञ्चितासे। अञ्चिचिषते) पूर्वत्र गताविति पाठः क्रियाफलस्य कर्त्तृगामित्वे परस्मैपदार्थः। अचु इत्येक इति मैत्रेयः। क्षीरस्वामी अञ्चु गतौ, अञ्चि गताविति द्वौ धातू पपाठ। तत्र इदित्वप्रयोजनमञ्चित इत्यादौ नलोपाभावमाहुः। काश्यपमैत्रेयसंमताकारास्त्वस्य इदित्त्वं नानुमन्यन्ते, अञ्चु इति पठन् शाकटायनोपि उदित्पक्ष एवानुकूलः, तेन त्विदित्स्थान एव उदित्पठ्यते ॥ ८४७ ॥

टुयाचृ याञ्चायाम्। (याचति। ययाच। याचिता। याचते। ययाचे। यियाचिषते। यायाच्यते। यायाक्ति। याचयते। अययाचत्)। "नाग्लोपि" इति ह्रस्वनिषेधः। न याचत इति(अयाची)। ग्रहादिषु याचृव्यवहृप्रजवदसां प्रतिषिद्धानामिति पाठादिनिः। प्रतिषिद्धानां नञ्पूर्वाणामित्यर्थः। (याचथुः)। "ट्वितोऽथुच्"। के चित् ड्वितं पठन्ति। तदपि प्रमाणं तेन याचित्रमित्यपि भवति। याचितेन निर्वृत्तं (याचितकम्)। "अपमित्ययाचिताभ्यां कक्नौ" इति तृतीयान्तात् निर्वृत्तमित्यर्थे यथासंख्यात कन्, अपमित्यशब्दस्य अव्ययत्वात् न तृतीयास्तीति। (याञ्चा)। "यजयाच" इत्यादिना नङ्, श्चुत्वम्। (याच्यम्)। "यजयाचरुचप्रवचर्चश्च" इति ण्यति कुत्वनिषेधः। निष्ठायामनिट्त्वे कुत्ववचनमितिवार्त्तिकमते कुत्वस्य नैव प्रसङ्गः ॥ ८४८ ॥

रेटृ परिभाषणे ॥ (रेटति। रिरेट। रेटिता। रिरेटिषते। रेरेट्यते। रेरेट्टि। रेटयति। अरिरेटत्) ऋदित्त्वान्नोपधाह्रस्वः (रेटते। रिरेटे) इत्यादि। (रेटित्वा। रेटितः) ॥ ८४९ ॥

चते चदे याचने च ॥ (चचात। चेततुः। चतिता। अचतीत्)। एदित्त्वान्न वृद्धिः (चिचतिषति। चाचत्यते। चाचत्ति। चातयति। अचीचतत्। चतते। चेते। चिचतिषते) इत्यादि (चतित्वा। चतितः। चत्यम्) "चतितकिशसि" इति यत्। (चतुरः)। "मन्दिवशि" इत्यादिनोरच्। न चतुरः,अविद्यमाना वा चतुरा यस्य अचतुरः,तस्य भावः (आचातु-

र्य्यम्) । ब्राह्मणादिपाठात् ष्यञ् । "न नञ्पूर्वात् तत्पुरुषात्" इति निषेधोऽत्रैव अचतुरेति पर्यु-
।दासात् न भवति । (चत्वारः) "चतेरुरन्" इत्युरन् । *चतुरनडुहोरामुदात्तः* इति सर्वना-
मस्थाने आमागमः। तदन्तविधेरत्रेष्टत्वात् । प्रियचत्वाः।(प्रियचत्वारौ)इत्यादावाम् भवति ।
हे (प्रियचत्वः)। "अम् सम्बुद्धौ"इत्यमागमः । अयं समास एव । केवलस्य नित्यबहुवचना-
न्तत्वात् सम्बुद्ध्यभावात् । आमि "षट्चतुर्भ्यश्च"इति नुटि चतुर्णाम् । अत्रापि तदन्तविधिना
(परमचतुर्णाम्)इत्यत्रापि नुट् भवति । "षट्चतुर्भ्यश्च"इति बहुवचननिर्देशात् यत्र संख्यायाः
प्राधान्यं तत्रैवायमिति प्रियचतुरामित्यादौ अप्रधाने नुट् न भवति । (चतुर्षु) इत्यत्र "रोः सु-
पि" इति नियमाच्च विसर्जनीयः। स्त्रियां "त्रिचतुरोः स्त्रियां तिसृचतसृ" इति विभक्तौ चत-
स्रादेशे *अचि रऋतः* इति अजादावृकारस्य पूर्वसवर्णदीर्घापवादे च रेफे (चतस्रः) इत्यादि ।
"ऋन्नेभ्यो ङीप्"स्वस्रादिपाठात् "न षट्स्वस्रादिभ्यः"इति निषिध्यते । (चतसृणामित्यत्र)
[नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन] इति नुट् । अाजादिविभक्त्यभावे न रेफा-
देशः । नामि दीर्घो "न तिसृचतसृ" इति प्रतिषेधान्न भवति । चतस्रादेशस्तदन्तेपि भवति
(परमचतस्रः) इत्यादि । यत्र बहुव्रीह्यादिना समासस्यान्यलिङ्गत्वं तत्रापि चतुरर्थस्त्रीत्वाश्रयोय-
मादेशो भवति । प्रियाश्चतस्रो यस्य (प्रियचतसा ब्राह्मणः। प्रियचतस्रावित्यादि)। सावानङा-
देशः । आजादौ "अचि र ऋतः" अयं परत्वात् पूर्वसवर्णत्वं बाधते । "ऋतोङिसर्वनामस्थान-
योः" गुणं बाधित्वा पूर्वविप्रतिषेधेन, तेनाजादौ सर्वत्र रेफ एव भवति । अत्र "नद्यृतश्च" इति
कप् सन्निपातपरिभाषया न भवति । कपि हि प्रकृतिविभक्त्योरानन्तर्यं विहन्यते । प्रियाश्च-
त्वारोऽस्याः (प्रियचत्वा स्त्री । प्रियचत्वारौ) इत्यत्र अङ्गस्य स्त्रीत्वेपि चतुरर्थस्यास्त्रीत्वात् चत-
स्रादेशो न भवति । चतुर्णां पूरणः चतुर्थः) । "तस्य पूरणे डट्"इति डटि "षट्कतिकतिपयच-
तुरां थुक्" इति थुक्, (तुर्यः, तुरीयः) *चतुरश्छयतावाद्यक्षरलोपश्च* इति पूरणार्थं छयतौ
आद्यक्षरलोपश्चेति चशब्दस्य लोपः। तुरीयं भिक्षायाः(तुरीयभिक्षा),चतुर्थं भिक्षायाः(चतुर्थभि-
क्षा)। *द्वितीयातृतीयचतुर्थतुर्याण्यन्तरस्याम्* इति द्वितीयादीन्येकदेशवाचिना षष्ठ्यन्तेन सह
वा समस्यन्ते इति तत्पुरुषः । एकदेशिसमासः। अन्यदा षष्ठीसमासे (भिक्षातुरीयं,भिक्षाचतु-
र्थमिति भवति)। पूर्वनिपातभेदः। (चतुष्टयम्) । *संख्याया अवयवे तयप्* इति अवयवे वर्त्त-
मानायाः संख्याया अवयविनि तयप् । "खरवसानयोः" इति रेफस्य विसर्जनीये "ह्रस्वात्तादौ
तद्धिते" इति सस्य षत्वं ष्टुत्वं तकारस्य । जसि "प्रथमचरमतय०" इति वा सर्वनामत्वात्
(चतुष्टये, चतुष्टयाः)। स्त्रियां "टिड्ढाणञ्"इत्यादिना ङीप् ।(चतुष्टयी । चतुर्भुङ्क्ते,)चतुरो वारान्
भुङ्क्ते इत्यर्थः । *द्वित्रिचतुर्भ्यः सुच्* इति क्रियाभ्यावृत्तिगणने कृत्वसुचः । "रात्सस्य" इति
सकारलोपः । एककर्तृकाणां तुल्यजातीयानां क्रियाणां जन्मसंख्यानं क्रियाभ्यावृत्तिगणनम् ।
स्वाद्युत्पत्तिः । स्वरादिषु सुजितिपाठात् अव्ययत्वात् सुब्लुक् (चतुः करोति । चतुष्करोति)
द्विस्त्रिश्चतुरिति कृत्वोर्थे इति कृत्वोर्थे वर्तमानानामेषां विसर्जनीयस्य कुप्वोर्वा षत्वम् । अ-
न्यदा तु "कुप्वोः ≍क≍पौ च" इति विसर्जनीयजिह्वामूलीयौ (चतुष्कपालम् । चतुष्पात्)
इदुदुपधस्य चाप्रत्ययस्य इकारोकारोपधस्य यो विसर्जनीयोऽप्रत्ययसम्बन्धी तस्य कुप्वोः
षत्वमिति षत्वम् । अविद्यमानानि विशिष्टानि शोभमानानि चत्वारि यस्य सः (अचतुरः ।
विचतुरः । सुचतुरः) "अचतुर" इत्यादिना बहुव्रीहौ अचि निपात्यन्ते । त्रयश्चत्वारो वार्थोऽ-
न्यपदार्थः । (त्रिचतुराः) वृत्तिस्वाभाव्यात् संदिग्धस्य वृत्तिः । चतुर्णां समीपे (उपचतुराः)
संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये । अव्ययादीनि पूर्वपदानि संख्येयवाचीनि
संख्यया समस्यन्त इति बहुव्रीहिः । चतुरोच्प्रकरणे [त्र्युपाभ्यामुपसंख्यानम्] इत्यच्
समासान्तः । (चात्वालः) यत उत्तरवेद्यर्थाः पांसवो ह्रियते तदुच्यते ।। "स्थाचति-
मृजेरालज्वाजालीयचः" इति यथासंख्यात् वालञ् । (चत्वरम्) "छित्वरचत्वर०" इति ष्वरचि
निपात्यते ।उणादिवृत्तौ छद अपवारण इत्यस्य निपातनमुक्तम् । द्वितीयादिश्च पठ्यते (चदति।

चदते) । इत्यादि ॥ ८९१ ॥

प्रोथृ पर्याप्तौ (प्रोथति । पुप्रौथ । प्रोथिता । प्रोथते) इत्यादि । (पुप्रोथिषति । पुप्रोथिषते । पोप्रोथ्यते । पोप्रोति । प्रोथयति । अपुप्रोथत्) ऋदित्त्वान्नोपधाह्रस्वः । "प्रोथदश्वोभयवस"इत्यत्र प्रोथति सूदति शश्वदश्व इवायमग्निरिति भट्टभास्करः।अयमेवापप्रोथदुन्दुभे दुच्छुनादित्यत्रापप्रोथत्। यमारभ्य 'दुच्छुनात् दुरवलिप्तात् उपसर्गस्य तकारः, प्रोथु पर्याप्तिगतावित्याह । क्षरे अपुप्रोथनं कारणमिति । (प्रोथः) । "हलश्च" इति करणे घञ् ॥ ८९२ ॥

मिदृ मेदृ मेधाहिंसनयोः ॥ अयं पाठो दिवादीनाम् (मेदति । मिमेद । मेदिता । मेदिष्यति । मिमिदिषति । मिमेदिषति । मिदित्वा । मेमिद्यते । मेमेत्ति । मेदयति । अमिमेदत् । मेदत इत्यादि) द्वितीयस्य तु मिमेदतुरित्यादौ क्ङितोरेकारश्रवणं विशेषः। क्षीरस्वामी थान्तावेतौ । भिदादिसूत्रे मेधाशब्दं व्युत्पादयन् न्यासकरो धान्तावाह । भोजराजस्तु मेधिं नानुमन्यते । यदाह । अङ्विधौ रखिलिखिसिधिमिथिगुहिभ्यो गुणश्चेति । कौमारश्चात्रैवानुकूलः। मेदत इति द्युतादौ स्नेहने गतः ॥ ८९५ ॥

मेधृ संगमे च ॥ (मेधति । मिमेध । मेधिता । मेधिष्यते इत्यादि) मेधृ सेचने । भिदादित्वादङ् । गृहमेधो देवतास्य (गृहमेध्यम् । गृहमेधीयम्) । "द्यावापृथिवी" इत्यादिना छयतौ ॥ ८९६ ॥

णदृ णेदृ कुत्सासंनिकर्षयोः ॥ (नेदती) इत्यादि, मिदृमेदृवत् । (प्रणेदति) । "उपसर्गात्" इति णत्वम् । निन्दतीति कुत्सायां गतम् ॥ ८९७ ॥

श्रधु मृधु उन्दने ॥ उन्दनं क्लेदनम् । (शर्द्धति । शशर्द्ध । शश्रधतुः । शर्द्धिता । शर्द्धते शशृधे । इत्यादि । शिशर्द्धिषति । शरीश्रध्यते । शरीशर्द्धि) हौ हेर्द्धिः । "झषस्तथो" इति धत्वे जश्त्वे,लोटि हौ (शरीश्रद्धि) । लङि तिपि (अशरीशर्त) । "रात्सस्य" इति नियमा[त्] न संयोगान्तलोपः । सिपि तु कत्वे "दश्च" इति वा रुत्वे "रो रि"लोपे "ढ्लोपे" इति दीर्घे (अशरीशा) इत्यपि भवति । एवं रुग्रिकोरपि । (शर्द्धयति । अशशर्द्धत् । अशीशृधत्) । उदित्त्वाद्वेट् (शर्द्धित्वा । शृद्धा । शृद्धः) । एवं (मर्द्धतीत्यादि) । श्रधेर्वृतादौ पाठः शब्दकुत्सायां क्रियाफलस्य अकर्तृगामित्वेपि आत्मनेपदार्थः । तथा *वृद्भ्यः स्यसनोः* इति स्यसनोर्लुटि च क्रियाफलस्य कर्तृगामित्वेपि परस्मैपदार्थः । तथा "पुषादिद्युतादि" इत्यङर्थश्च । वृतादिश्च द्युताद्यन्तर्गणः। तथा "न वृद्भ्यश्चतुर्भ्यः" इति स्यसनोः परस्मैपद इण्निषेधार्थश्च॥

बुधिर् बोधने (बोधयति । बुबोध । बोधिता । अबुधत् । अबोधीत्) "इरितो वा" इत्यङ्विकल्पेन (बोधते । बुबुधे) इत्यादि । क्षीरस्वामी तु बुधेत्यनिरितं पपाठ । बोधतीति ज्वलादिः परस्मैपदी अवगमने गतः । अस्य तशब्दे "दीपजन" इति चिण् नेति अबोधिष्ट इत्येव भवति अत्र दैवादिकेन वात्मनेपदिभिरकर्मकैः साहचर्यात् तादृश एव बुधिर्गृह्यते । तथा "बुधयु० इत्यत्र युधनशजनैरकर्मकैः साहचर्यान्नास्य संग्रहः । स्पष्टं चैतत् तत्र वृत्तौ । तेन (बोधयति बोधयते इति भवति) ॥ ८६० ॥

उबुन्दिर् निशामने ॥ निशामनं चक्षुर्विज्ञानम् (बुन्दति । बुबुन्द । बुन्दिता । अबुन्दत् । अबुन्दीत् । बुबुन्दिषति । बोबुन्द्यते । बोबुन्ति) हौ ङित्वादनुनासिकलोपे (बोबुन्दि । बुन्दते । बुबुन्दे इत्यादि) उदित्वात् क्त्वायामिड्विकल्पनात (बुन्दित्वा । बुत्त्वा) निष्ठायां (बुन्नम्)। नलोपे "रदाभ्याम्" इति निष्ठानत्वम् ।'(बुबुदः) [घञर्थे कत्रादीनांके द्वेभवतः] इति द्विवचनम् । पृषोदरादित्वान्न हलादिशेषः ॥ ८६१ ॥

वेणृगतिज्ञानचिन्तानिशामनवादित्रगहणेषु ॥ वादित्रगहणं नाम वादित्रस्य वाद्यभाण्डस्य वादनार्थं ग्रणमिति क्षीरस्वामी (वेणति विवेण । वेणिता । विवेणिषति । वेवेन्यते । वेवेण्टि । वेणयति । अविवेणत् । वेणते । विवेणे इत्यादि । वेणिः । वेणी) इन् । "कृदिकारादक्तिनः" इति ङीष्वा । उत माता महिषमत्त्वेनम् इत्यत्र भाष्यकारास्तवर्गपञ्चमान्तममुं पेठुः ॥८६२॥

खनु अवदारणे ॥ (खनति । चखान । चख्नतुः) "गमहन०" इत्याजादावुपधालोपः । तस्य "द्विर्वचनेचि" इति स्थानिवत्त्वात् द्विर्वचनम् (खनिता । खनिष्यति । अखनत् । खनेत । खन्यात् । खायात्) "जनसनखनां सञ्झलोः" "ये विभाषा" इत्यात्वम् । धातुपारायणे तु "लोपो यि" इतिवत् "ये विभाषा" इति वर्णमात्रे निर्दिष्टेऽये य इत्यत्वतोनिदशादिदमात्वं यग्यङोरेव न तु यासुटीत्युक्तम् । (अखनीत् । अखानि । चिखनिषति चङ्खन्यते । चाखायते । चङ्खन्ति । चङ्खातः) "अनुनासिकस्य" इति दीर्घं परत्वात् बाधित्वा "जनसनखनाम्" इत्यात्वं भवति । तत्र झल्ग्रहणं सनोत्यर्थं तस्यैव झलादेः सनः संभवात्, तेन चिखनिषतीत्यत्रात्वाभावः। (खानयति । अचीखनत् । खनते । चखे इत्यादि । खेयम्)।*ईचखनः*क्यपि तत्संनियोगेन "ईकारेन्तादेशे आद्गुणः । इइ इति प्रश्लेषेणेकारद्वयं विधीयते । एकस्मिन्विधीयमाने"ये विभाषा" इत्यात्वाभावपक्षे सावकाशोसौ परेणान्तरङ्गेण चात्वेन बाध्येत, यतो हि यकारादौ बुद्धिस्थ एव विधानादन्तरङ्गमात्वम्, ईकारः, क्यप्संनियोगेन विधानात् बहिरङ्गः । यदा तु "ये विभाषा" इति परसप्तमी तदात्वमेव बहिरङ्गमीत्वं तु क्यप्संन्नियोगेनान्तरङ्गमिति नार्थः प्रश्लेषेणात्वबाधनार्थेन, एवं च सूत्रेपि ह्रस्व एव पठितव्यः । नन्वेवमेकादेशस्य "षत्वतुकोरसिद्धः" इत्यसिद्धत्वात् ह्रस्वाश्रयस्तुक् स्यात् । नैतत् । 'पदान्तपदाद्योरेकादेशोसिद्धः' इत्येवं तत्र व्यवस्थापनात् । (खनकः । खनकी) "शिल्पिनि ष्वुन्" । तत्र च "नृतिखनिरञ्जिभ्यः" इति पगिण्यते । परितः खाता, (परिखा) । "अन्येष्वपि दृश्यते" इति डः। खायते अनेनेति (खनित्रम्) । "अतः" इत्यादिना करणे इत्रः (खात्वा । खनित्वा) उदित्त्वादनिट्पक्षे झलादिक्त्विपरत्वात् पूर्ववदात्वम् । (निखाय) । "ये विभाषा" इति आत्वं । (खातः) " यस्य विभाषा" इत्यनिट्त्वम् । खन्यतेनेन अत्रेति (आखनः) *खनो घ च* इति करणाधिकरणयोर्घः चकारात् घञ् (आखानः । आखः) । [डो वक्तव्यः] इति डः ; (आखरः) । [डरो वक्तव्यः] इति डरः । (आखनिकः) । [इको वक्तव्यः] इतीकः । (आखनिकवकः) । [इकवको वक्तव्यः] इति इकवकः । आखादयः खनित्रवचनाः। परिखा भवेदस्मिन्नस्य वा (पारिखेयं स्थलम्)*परिखाया ढञ्* इति प्रथमान्तात् सभावनोपाधिकाद् अस्यास्मिन्नित्यर्थे ढञ् । (आखनतीत्याखुः) । "आङ्परयोः खनिशृभ्यां डित्"इति उप्रत्यये डित्त्वाट्टिलोपः । (मुखं) "डित् खनो मुट् चोदात्तः" इत्यत्र प्रत्यये डित्त्वाट्टिलोपः, धातोर्मुडागमश्च । मुखे भवं, (मुख्यम्) । "द्विगादिभ्यो यत्" इति यत्प्रत्ययः । इह पाठोऽशरीरावयवार्थः । शरीरावयवस्य तु "शरीरावयवाद्यत्" इत्येव सिद्धः । मुखमिव (मुख्या) । "शाखादिभ्यो यः" इति भवार्थे यः । मुखतो भवं (मुखतीयम्) । [मुखपार्श्वतसोर्लोपः] इति गहादिपाठाच्छप्रत्यये सलोपो "यस्य" इति लोपः परिमुखं भवं (परिमुख्यम्) । "अव्ययीभावाच्च" इति यः । तत्र हि [परिमुखादिभ्य उपसंख्यानम्] इति वार्त्तिकं, तेन परिमुखादेरेवाव्ययीभावादयं प्रत्ययः । परिमुखं वर्त्तते (पारिमुखिकः) सेवकः । *परिमुखं च* इति द्वितीयान्तात अस्माद्वर्त्तते इत्यस्मिन्नित्यर्थे ठक् । मुखस्य सादृश्यं (यथामुखं) प्रतिबिम्बम् । समं मुखं (संमुखम्) । समशब्दः सर्वपर्यायः । यथामुखं दर्शनः (यथामुखीनः) । आदर्शादिः । एवं संमुखस्य दर्शनः (संमुखीनः) । दर्शन इत्यधिकरणे ल्युट् । *यथामुखसंमुखस्य दर्शने* इति षष्ठ्यन्ताभ्यामाभ्यां दर्शन इत्यर्थे खः। अत एव सादृश्येपि निर्देशात् यथामुखमित्यव्ययीभावः । तथा समोन्त्यलोपश्च । अयं च लोपः प्रत्ययनियोगेनेति केवलो न प्रयोगार्ह इति व्याख्यातारः । यथामुखीना सीताया इति भट्टिप्रयोगश्चिन्त्यः । (गौरमुखा नाम का चित्) "नखमुखात् संज्ञायाम्" इति स्वाङ्गलक्षणस्य ङीषो निषेधात् टावेव । असंज्ञायां तु (सुमुखी सुमुखा) इत्युभयं भवति ॥ ८६३ ॥

चीवृ आदानसंवरणयोः ॥ (चीवति । चिचीव । चीविता । चिचीविषति । चेचीव्यते । चीवयति । अचिचीवत् । चीवते । चिचीवे) इत्यादि । उद्भावित्वाच्चास्य यङ्लुगस्ति ।

अनृदिदित्येके । (चीवरम्) । "छित्वर" इत्यादिना वरचि वलोपः । चिनोतेर्वा निपातनम् । (संचीवरयते भिक्षुः) चीवरमर्जयति परिधत्त इति वार्थः । "पुच्छभाण्डचीवराण्णिङ्" इति तत्र चीवरादर्जने परिधाने चेति वृत्तिः अयं चुरादौ च ॥ ८६४ ॥

चायृ पूजानिशामनयोः ॥ (चायति । चचाय । चायिता । चिचायिषति । चेकीयते) । "चायः की" इति यङ्यङ्लुकोः कीभावः । दीर्घोच्चारणं यङ्लुगर्थमिति स्थितम् । (चेकयीति । चेकेति । चेकीतः । चाययति । अचचायत् । चायते । चचाये । इत्यादि । अचायिष्ट । चायित्वा । अपचितः) । *अपचितश्च* इति निष्ठायामनिट्त्वं चिभावश्च पक्षे निपात्यते, अन्यदा (अपचायितम्) । [क्तिनि नित्यं चिभावो वक्तव्यः] । (अपचितिः । चनः) । अन्नम् । "चायतेर्हस्वश्च" इत्यसुनि नुगागमे ह्रस्वश्च, वलिलोपः ॥ ८६५ ॥

व्यय गतौ ॥ (व्ययति । वव्याय । व्ययिता । व्याययति । अविव्ययत् । व्ययते । वव्यये) इत्यादि । व्ययत इति वित्तत्यागे नित्यमात्मनेपदी । अयं चुरादावदन्तः ॥ ८६६ ॥

दाशृ दाने ॥ (दाशति । ददाश । दाशिता । दिदाशिषति । दादाश्यते । दादाष्टि । दाशयति । अददाशत् । दाशते । ददाशे) इत्यादि । *दाश्वान्साह्वान्* इति क्वसावद्वित्वमनिट्त्वं च निपात्यते । दाशतेस्मै इति (दाशः) । "दाशगोघ्नौ संप्रदाने" इति अचि निपात्यते । पुरो दाश्यत इति (पुरोडाशः) । तत्सहचरितग्रन्थोपि (पुरोडाशः) । पुरोडाशस्य संस्कारो 'मखस्य शिरोसि' इत्यादि मन्त्रः । (पौरोडाशः) । पुरोडाशस्य पौरोडाशस्य च व्याख्यानं तत्र भवं वा (पुरोडाशिकं, पौरोडाशिकम्) । *पौरोडाशपुरोडाशात्ष्ठन्* इति प्रत्येकं षष्ठ्यन्ताभ्यामाभ्यां भवव्याख्यानयोरर्थयोष्ठन् । अत्रैव निर्देशात् दाशेर्दकारस्य डकारः । अस्मादनन्तरं स्वामिकाश्यपावयतिं पठतः । तदनार्षं प्रतीयते । यदाह । "उपसर्गस्यायतौ" इत्यत्र हरदत्तः । अयतिरनुदात्तेदिति ॥ ८६७ ॥

भेषृ भये ॥ क्व चित् गतावपि वक्ष्यते । (भेषति । बिभेष । भेषिता । बिभेषिषति । बेभेष्टि । भेषयति । अबिभेषत् । भेषते । बिभेषे) इत्यादि ॥ ८६८ ॥

भ्रेषृ भ्लेषृ गतौ ॥ (भ्रेषतीत्यादि पूर्ववत् । (भ्रेषः) ॥ ८७० ॥

अस गतिदीप्त्यादानेषु ॥ (असति । आस । असिता । असिसिषति । आसयति । आसिसत् । आसते इत्यादि) अष इत्येकइति क्षीरस्वामिमैत्रेयौ । शाकटायनस्तूभावपि ॥७१॥

स्पश बाधनस्पर्शनयोः ॥ स्पर्शनं ग्रथनमिति स्वामी । ग्रहणश्लेषणयोरयं चुरादौ । (स्पशति । पस्पाश । स्पशिता । अस्पाशीत् । अस्पशीत् । पिस्पशिषति । पास्पश्यते । पास्पष्टि । पस्पशा) यङ्लुगन्तादचि टाप्, 'संज्ञापूर्वको विधिरनित्य' इति नाभ्यासस्य दीर्घः । (स्पाशयति । अपस्पशत्) । "अत्स्मृदृत्वर" इत्यादिनाभ्यासस्यात्वम् । (स्पशते । पस्पशे इत्यादि) अत्र स्वामी पष इत्येक इति, तेन (पाषण्डः, पाषाण, इत्याह) । दुर्गशाकटानयोरप्येवमेव पक्षः, अनयोः पाठे 'प्रतिस्पशो विसृजतूर्णितमं, यतो व्रतानि पस्पशे' उपसर्गश्च स्पशः । 'शब्दविद्येव नो भाति राजनीतिरपस्पशा' इत्यादिप्रयोगोननुगुणः । पाषण्डपाषाणप्रयोगस्तु "अनुपसर्गात्" इति कथादेर्भविष्यति । यद्वा पष गन्धन इति युजादेः । अस्ति चायं युधादौ, यद्वक्ष्यति चुरादौ मैत्रेयः पष बन्धन इति युजादावेके पठन्तीति । अत्र स्वामिकाश्यपादयः । पाशादिदर्शनात् पशेति पठन्ति । पाशादयोपि चौरादिकेन खण्डनार्थनापि सिद्धाः । पशुशब्दस्तु पशेर्व्युत्पादयिष्यते । पसेति दन्त्यान्तस्सौत्रो धातुः । तस्य पसतीत्यादि । पशेर्यङ्लुकि "जपजभ" इत्यादिना अभ्यासस्य नुकि (पंपश्यते । पंपशीतीत्यादि । पंपश्यतीति) कण्ड्वादेः । दुखायत इत्यर्थः ॥ ८७२ ॥

लष कान्तौ ॥ (कान्तिरिच्छा । लषति । ललाष । अलषीत् । अलाषीत् । लिलषिषति । लालष्यते । लालष्टि । लाषयति । अलीलषत् । लषते । लेषे) इत्यादि । "वा भ्राश०" इत्यादिना शब्विषये वा श्यनि । (लष्यति, लष्यते । लषणः) । "जुचङ्क्रम्य" इत्यादिना

युच् । (लापुकः) । "लषपत०" इत्यादिनोकञ् । (विलाषी । अपलाषी) । "अपे च लषः" इति घिनुण् । चशब्दाद्वौ च । त्रयोपि ताच्छीलिकाः ॥ ८७३ ॥

चष भक्षणे ॥ (चषतीत्यादि) । लषतिवत् । (चषकः) । "कुन् शिल्पिसंज्ञयोः" इति कुन् । (चाषः) । वञ् ॥ ८७४ ॥

छष हिंसायाम् ॥ (छषतीत्यादि) पूर्ववत् । (चच्छाष । चच्छतु) इत्यादौ अभ्यासस्य जश्त्वम् [जश्त्वचर्त्वमेत्वतुकोः सिद्धं वक्तव्यम्] इत्यत्र यथासंख्याश्रयणात् एत्वाभ्यासलोपयोरपि चर्त्वस्य सिद्धत्वादादेशादित्वान्नैत्वाभ्यासलोपौ ॥ ८७५ ॥

झष आदानसंवरणयोः ॥ (झषतइत्यादि) लषिवत् । अयं हिंसार्थः परस्मैपदिषु गतः८७६।

भ्रक्ष अदने ॥ भ्लक्षेति क्षीरस्वामी । भक्षेति मैत्रेयः । तत्र "गतिबुद्धि" [भक्षेरहिंसार्थस्य प्रतिषेधः] इति वार्तिकस्य भक्षयति पिण्डीं देवदत्तः । भक्षयति पिण्डीं देवदत्तेनेति ण्यन्ताद्धेतुमण्णौ प्रयोज्यस्य कर्मत्वाभावं दर्शयता भाष्यकृता भक्षतिरनभिहितः । सति हि अणिकर्त्ता स णावित्यसासञ्जस्यादस्मादेव हेतुमण्णावुदाहृतं स्यात्, तथा वृत्तितद्व्याख्यानेष्वपि [भक्षेर्हिसार्थस्य] इत्यत्र चुरादिण्यन्तादेव भक्षेर्हेतुमण्णावुदाह्रियते । (भ्लक्षति । भ्लक्षिता । बिभ्लक्षिषति । बाभ्लक्ष्यते । बाभ्लष्टि) । "स्कोः" इति कलोपः । लोटि हौ (बाभ्लड्ढि) धित्वष्टुत्वजश्त्वानि । लङि तिप्सिपोर्हल्ङ्यादिलोपो (अबाभ्लट् । भ्लक्षयति ।। अबभ्लक्षत । भ्लक्षयति । अबभ्लक्षत् । भ्लक्षते । बभ्लक्षे) इत्यादि । योत्र प्लक्ष इति केषांचित् पाठः सोपि प्रक्षरतीति प्लक्षइति प्रपूर्वात् क्षरतेः प्लक्षशब्दस्य भाष्यकारेण व्युत्पादितत्वादनार्ष एव । तथा च श्रुतिरपि 'तस्य शिरश्छित्वा मेध्यं प्राक्षारयात् स प्लक्षोऽभवत्तत्प्लक्षस्य प्लक्षत्वं, यत् प्लक्षशाखेति' अत्र लत्वं कपिलादित्वाद् द्रष्टव्यम् ॥ ८७७ ॥

दासृ दाने ॥ (दासति । ददास । दासिता । दासत इत्यादि) । दाशतिवत् ॥ ८७८ ॥

माहृ माने ॥ (माहति । ममाह । माहिता । माहते । ममाहे । मिमाहिषते । मामाह्यते । मामाढि) धित्वढत्वष्टुत्वढलोपाः (माहयति । अममाहत्) ॥ ८७९ ॥

गुहू संवरणे ॥ (गूहति । जुगूह) "ऊदुपधाया गोहः" इति अजादौ प्रत्यये ऊकारः । स च 'गोह' इति विकृतनिर्देशात् गुणविषय एव, तेन जुगुहतुरित्यादौ न भवति । (गूहिता) ऊदित्त्वादनिट्पक्षे धत्वढत्वष्टुत्वढलोपगुणेषु (गोढा) । ढत्वादेरसिद्धत्वात्पूर्वमेव गुण इति ढलोपदीर्घप्रसङ्गः । (गूहिष्यति । घोक्ष्यति) ढत्वभष्भावयोः "षढोः कः सि" इति कत्वम् । (गूहतु । अगूहत् । गूहेत् । आशिषि गुह्यात्) अगुणविषयत्वादनजादित्वाच्च ऊत्वं न भवति । (अगूहीत्) इडभावे "शल इगुपधा" इति क्सढत्वभष्भावेषु (अघुक्षत् । गूहते । जुगुहे । गूहितासे । गोढासे । गूहिष्यते । घोक्ष्यते । गूहताम् । अगूहत । गूहेत । आशिषि गूहिषीष्ट) इडभावे "लिङ्सिचौ" इति कित्त्वान्न गुणः । तत एव गोहिरूपाप्रसङ्गात् अजादित्वाभावाच्चोत्वं न भवति (घुक्षीष्टेति । अगूहिष्ट) इडभावे *लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये* इति दन्त्यादावात्मनेपदे पक्षे लुक्, धत्वष्टुत्वढलोपदीर्घेषु (अगूढ । अगूढाः) । अत्र ताविति वक्तव्ये दन्त्यग्रहणस्य दन्त्योष्ठ्यस्यापि परिग्रहार्थत्वात् । (अगुह्वहि) इत्यत्रापि लुग्भवति । अलुक्पक्षे ढत्वभष्भावकत्वेषु (अघुक्षत्, अघुक्षातामित्यादि) । "क्सस्याचि" इत्यजादावल्लोपः । कर्मकाण्येकवचने चिणि (अगूहि ।) अन्यत्र पूर्ववत् । सनि "सनि ग्रहगुहोश्च" इति इण्निषेधे "हलन्ताच्च" इति कित्त्वढत्वादौ (जुघुक्षति । जोगुह्यते । जोगुहीति) "नाभ्यस्तस्य" इति गुणनिषेधादूत्वाभावः । (जोगोढि) अनजादित्वादूत्वाभावः । (गूहयति । अजुगूहत्) । ऊदिति तपरकरणात् णौ चङ्युपधाह्रस्वत्वं बाध्यते इति केचिदाहुः । एतद्भाष्यवार्त्तिकादौ न दृश्यते । अपरे तु ब्रुवते निगुह्य गत इत्यत्र "ल्यपि लघुपूर्वात्" इति णेरयादेशे कर्त्तव्ये "असिद्धवदत्रा" इत्यूत्वस्यासिद्धत्वनिवृत्त्यर्थमिति । नै-

तद्युक्तम् । व्याश्रयत्वेनासिद्धत्वाप्रसङ्गात् । ल्यपि णेरयादेशः, ऊत्वगुणावुपधायाः । (गुह्यं,) [शंसिदुहिगुहिभ्यो वा] इति वक्तव्ये क्यपि मिप् । तदभावे ण्यति गोह्यं, । काकेभ्यो गुह्यन्त इति (काकगुहास्तिलाः) [मूलविभुजादिभ्य उपसंख्यदानम्] इति कः । गूहतेऽत्रानयेति वा (गुहा) । गिर्योषध्योरित्यङ् । (गूढिरन्यत्र । गूहित्वा । गूढ्वा । गूढः) ॥ हिक्कादय उदात्ताः स्वरितेतः ॥ ८८० ॥

अथाजन्तानुभयपदिन आह ॥

श्रिञ् सेवायाम् ॥ उदात्तः (श्रयति । शिश्राय । शिश्रियतुः । शिश्रियुः । शिश्रयिथ । शिश्राय । शिश्रय । शिश्रियिव) अचि इत्यादेशः । अन्यत्र वृद्धिगुणौ अत्र "असंयोगाल्लिट् कित्" इति लिटः कित्त्वात् "श्र्युकः किति" इति प्राप्तस्येटो निषेधस्य क्रादिनियमेन बाधः । (श्रयिता । श्रयिष्यति । श्रयतु । अश्रयत्) आशिषि (श्रीयात) । "अकृत्सार्वधातुकयोः" इति दीर्घः । (अशिश्रियत्) । "णिश्रि" इति चङ् । लघूपधगुणादन्तरङ्गत्वादियङ् । (श्रयते । शिश्रिये इत्यादि । शिश्रयिषति । शिश्रीषति) "सनीवन्तर्द्ध" इत्यादिना इड्विकल्पः । अनिट्पक्षे "अज्झन०" इति दीर्घः । "इको झल" इति कित्त्वादगुणत्वं, (शेश्रीयते । शेश्रयीति । शेश्रेति । श्राययति । अशिश्रयत) वृद्ध्यायौ, णौ कृतस्य स्थानिवत्त्वात् श्रीशब्दस्य द्विर्वचनम् (श्रायः) । "श्रिणीभूवोनुपसर्गे" इति घञ् । (उच्छ्रायः) । "उदि श्रयतियौतिपूद्रुवः" इति घञ् । कथं पतनान्ताः समुच्छ्रया इति, "कृत्यल्युटो बहुलम्" इति वचनात्, एवं च उदिश्रयतीति श्तिपा निर्देशात् यङ्लुगन्तात् (उच्छ्राय) इति अजेव । (विश्रायी) "जिदृक्षिविश्रि" इति ताच्छीलिक इनिः । (श्रित्वा । श्रितः) । "श्र्युकः किति" इति इण्निषेधः । (कष्टश्रितः) "द्वितीया श्रिता" इति समासः । (श्रेणिः) "वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्" इति निः । (श्रेणीकृताः) "श्रेण्यादयः कृतादिभिः" इति तत्पुरुषः । [श्रेण्यादिषु च्व्यर्थवचनम्] इति तत्र वार्त्तिकम् । [क्विब् वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च] इति क्विब्दीर्घौ । इयङ् स्थानित्वात, नदीत्वाभावात् (हे श्रीः) इत्यत्र "अम्बार्थनद्योर्ह्रस्वः" इति न ह्रस्वः। ङिद्वचनेषु "ङिति ह्रस्वश्च" इति पक्षे नदीत्वादाटि ङेश्चामि (श्रियै । श्रियाः । श्रियामित्यादि) अन्यदेयङि (श्रिये, श्रियः । श्रियि) षष्ठीबहुवचने च "वामि" इति नदीत्वे नुटि (श्रीणां, श्रियाम् । श्रिमन्यं ब्राह्मणकुलम्) भाष्यकारवचनात् श्रीशब्दस्य ह्रस्वः मुमभावश्च । (श्मश्रु) । "श्यनि श्रयतेर्डुन्" इति श्यन्शब्दे उपपदे डुन्, टिलोपः, (श्मश्रुणः,) पामादित्वान्नः ॥ ८८१ ॥

भृञ् भरणे ॥ एतदादयो वयत्यन्ता अनुदात्ता उभयपदिनः । (भरति । बभार । बभ्रतुः। बभर्थ । बभृव) । क्रादिनियमादिडभावः । पिति गुणः, वृद्धिः, अन्यत्राजादौ यण् । (भर्त्ता। भरिष्यति) "ऋद्धनोः स्ये" इतीट् । (भरतु । अभरत। भरेत) आशिषि (भ्रियात्)। "रिङ् शयग्लिङ्क्षु" इति रिङादेशः । रीङि प्रकृते रिङ्ग्रहणात् अकृत्सार्वधातुकयोर्न दीर्घः (अभार्षीत् । भरते । बभ्रे । भर्त्तासे । भरिष्यते । भरताम् । अभरत । भरेत) आशिषि (भृषीष्ट)। "उश्च" इति आत्मनेपदविषययोर्झलाद्योलिङ्सिचोः कित्त्वान्न गुणः । (अभृत) । "ह्रस्वादङ्गात्" इति सिचो लोपः । सिजाश्रयो गुणः "उश्च" इति कित्त्वान्न भवति । (बिभरिषति)। "सनीवन्त०" इत्यादिना वेट् । इडभावे सनो झलादित्वात "इको झल्" इति कत्त्वे"अजझनगमाम्" इति दीर्घे "उदोष्ठ्यपूर्वस्य" इति उत्वरपरत्वयोः "हलि च" इति दीर्घे (बुभूर्षति । बेभ्रीयते) । "रीङ ऋतः" इति परत्वाद्रीङि कृते द्विर्वचनं, (बर्भर्त्ति) लोटि हेर्ङित्त्वादगुणत्वे (बर्भृहि) लति "हल्ङ्याप्" इति लोपे (अबर्भः) एवं रिग्रीकोरपि । "सनीवन्त०" इत्यत्र भरेति शपा निर्देशात् यङ्लुकि नेड्विकल्प इति (बर्भरिषति) इत्येवं भवति । अत एव शपा निर्देशात् आचार्याः शब्विकरणं नेच्छन्तीति मतं प्रत्युक्तम् । तथा च वर्द्धमानसुधाकरशिवस्वाम्यादयो भरेति शपा निर्देशाद्भृञ् भरण इति भौवादिकस्य ग्रहणमिच्छन्ति ।(भारयति ।

अबीभरत् । भर्त्ता) भर्त्तुर्भावकर्मणी, (भार्त्रम्) । उद्गात्रादित्वादञ् । (ग्रामभर्त्ता) । याजकादित्वात् समासः । जारं भरति इति (जारभरः) । जारभरेति वचादिपाठादच् (भृत्यः) भरणीयः । "भृञोसंज्ञायाम्" इति क्यपि तुक् । संपूर्वाद् विभाषेत्युक्तत्वात् । ण्यदपि भवतीति (संभृत्यः संभार्य इति) क्यब्ण्यतौ भवतः । संज्ञायां ण्यदेव (भार्येति) पाणिगृहीतीत्यर्थः । (संभार्यं) गवामयनो हविर्विशेषः । भृत्या भरणविशेषः । "संज्ञायां समज०" इत्यादिना स्त्रियां भावे क्यप् , "कर्मणि भृतौ"इति निर्देशात् (भृतिरिति) क्तिन् भवति । (आत्मम्भरिः "फलेग्रहिरात्मम्भरिश्च" इति इन्प्रत्ययान्तो निपातितः । चकारात् (कुक्षिम्भरिश्चेति) वृत्तौ । अत एव चकारात् ज्योत्स्नाकरम्भमुदरम्भरयश्चकोरा इत्यपि निर्वाह्यः । (विश्वम्भरा) "संज्ञायां भृतॄवृजि०" इत्यादिना खचि मुमागमः । (भारः) घञ् । वंशभारं वहति, (वांशभारिकः) *तद्धरतिवहत्यावहति भाराद्वंशादिभ्यः"* वंशादिपूर्वपदाद् भारान्तात् प्रातिपदिकात् द्वितीयासमर्थात् वहत्यादिष्वर्थेषु ठगिति ठक् । अपो भरतीति (अभ्रम्)। मूलविभूजादित्वात् कः । अभ्रं करोति, (अभ्रायते) *शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे* इति द्वितीयान्तात् करणे क्यङ् । करणं क्रिया । "अकृत्सार्वधातुकयोः" इति दीर्घः । (भरुः, भर्त्ता)। भृमृशीत्युप्रत्ययः । (बभ्रुः) पिङ्गललोचनो नकुलश्च । "कुर्भ्रश्च" इति कुप्रत्यये द्वित्वम् । (भरतः) "पृशियज्" इत्यतच् । ड्विदयं जुहोत्यादौ, ऋकारान्तो भर्त्सनादौ क्र्यादौ ॥ ८८२ ॥

हृञ् हरणे ॥ हरणं प्रापणं स्वीकारः स्तैन्यं नाशनं च । यथा भारं हरति ग्रामं अशं हरति सुवर्णं हरति चौरः पापं हरतीति, विहाराहारादावर्थान्तराभिधानं तूपसर्गवशात् । तत्र यदा प्रापणार्थस्तदा "अकथितं च" इति द्विकर्मकोयम् । तत्रास्य लादयः प्रधानकर्मणि भवन्ति । (ह्रियते भारो ग्रामम् , हर्त्तव्यः, हृतः सुहर इति) । कृद्यागोलक्षणा षष्ठी द्वितीयावत् उभयत्र भवति (हर्त्ता हारस्य ग्रामस्येति) । उभयथा गोणिकापुत्र इति भाष्य उक्तत्वात् गुणकर्मणि द्वितीयापि द्रष्टव्या । हर्त्ता हारस्य ग्राममिति । हर्त्तव्यो भारो ग्रामं देवदत्तेनेत्यत्र "कर्तृकर्मणोः कृति" इति प्राप्ता षष्ठी "कृत्यानां कर्त्तरि वा" इति कृत्यानामिति योगं विभज्य उभयप्राप्ताविति नेति चानुवर्त्य उभयप्राप्तौ कृत्ये षष्ठी नेति भाष्ये प्रतिपादनान्न भवति । स्पष्टं चैतत् कैयटादौ । (हरति । हरते इत्यादि) भरतिवत् ।। (हारयति अजीहरत् भारं देवदत्तं यज्ञदत्तः, देवदत्तेनेति वा) "हृक्रोरन्यतरस्याम्" इत्यणौ कर्त्तुर्णौ वा कर्मत्त्वम् । इयं च विभाषा यदायमभ्यवहारार्थे तदा पूर्वेण नित्ये कर्मत्त्वे प्राप्ते, अन्यदा त्वप्राप्त इत्युभयत्र विभाषा द्रष्टव्या । (हारयति भारम् इत्यत्र) प्रापणार्थत्वेप्यस्ति गतिप्रतीतिरिति गत्यर्थत्वेन प्राप्तिरुक्ता, स्पष्टं चैतत "हृक्रो" इत्यत्र न्यासपदमञ्जर्योः । कैयटाकारस्याप्यत्र गत्यर्थत्वमनभिमतमेव, यदाह । "न वेति विभाषा" इत्यत्र हृक्रोरित्यस्य उभयत्रविभाषोक्तौ प्रत्युदाहरणप्रदर्शने विपूर्वोहरतिर्गत्यर्थ इति । संप्रहरन्ते राजान इत्यत्र हरतेर्हिंसार्थत्वेपि "न गतिहिंसा" इति निषेधस्य [हृवह्योरप्रतिषेधः] इति तङ् । अत्र हरदत्तः । अर्थग्रहणसामर्थ्यात् ये शब्दान्तरनिरपेक्षा गतिहिंसनयोर्वर्त्तन्ते त इह गृह्यन्ते इत्युपहसतीत्यत्र "निगरणचलनार्थेभ्यः" इति परस्मैपदनियमो न स्यात् , तथा इह येषामभ्यवहृतमित्यत्र "क्तोधिकरणे च" इति क्तो न स्यात् । किं चार्थग्रहणमन्तरेणापि यत एवान्यापेक्षया तदर्थाभिधायिनां ग्रहणस्य सिद्धत्वादर्थग्रहणं यथाकथंचित्तदर्थाभिधायिनां ग्रहण एव प्रत्युत प्रमाणम् , एवं हि "उपमानं शब्दार्थप्रकृतावेव"इति प्रकृतिग्रहणमप्यर्थवत् । तस्येदं हि प्रयोजनं यत्र णिनिप्रकृतिरेव शब्दार्थे तत्रैवायं स्वरो यथा स्यात् , यत्रोपसर्गाद्यपेक्षया शब्दार्थत्वं गर्दभोच्चारीत्यादौ तत्र मा भूदिति । यद्यर्थग्रहणमप्यन्यानपेक्षयोपात्तार्थाभिधायिनां ग्रहणार्थं स्यात् किं प्रकृतिग्रहणेन, तथा च वृत्तिरपि, प्रकृतिग्रहणं किं, प्रकृतेरेव यत्रोपसर्गनिरपेक्षा शब्दार्था भवतीति । एव तत्र न्यासपदमञ्जर्योरपि, तस्मादर्थग्रहणं यथाकथं चिदुपात्तार्थाभिधायिनो ग्रहण एव प्रमाणम् । अत एव "न

गतिर्हिंसा" इत्यत्र पदमञ्जर्यामाहुरिति कर्त्रन्तरनिर्देशः । ततः संग्रहरिष्यन्तौ दृष्ट्वा कर्णधनञ्जयौ इत्यत्र युद्धाभिमुख्यमात्रमर्थ इति कर्मव्यतिहारस्याभावात् परस्मैपदम् । (पैतृकमश्वा अनुहरन्ते,) पितुरागतं प्रकारं सततं शीलयन्तीत्यर्थः । *हरतेर्गतताच्छील्ये* इति तङ् । गतं प्रकारः । ताच्छील्यं तत्स्वभावता । न्यासे तु गतीति पठ्यते । यदाह गतौ ताच्छील्यमिति, (द्यूतस्य व्यवहरति) शतं पणते, क्रीणाति विक्रीणीत इति वार्थः । *व्यवहृपणोः समर्थयोः* इति शेषे कर्मणि षष्ठी । द्यूते क्रयविक्रयव्यवहारयोः समानार्थत्वमनयोः । अन्यत्र (शलाकां व्यवहरतीति) इति द्वितीयैव, विक्षिपतीत्यर्थः । (प्रतिहर्त्ता) तस्य भावकर्मणी (प्रातिहर्त्रम्,) ।उद्गात्रादित्वादञ् । (अवहारः । ग्राहः । ग्रहः) । "श्याद्व्यधा" इत्यादिना णः । (अंशहरः । *हरतेरनुद्यमनेच्* इति कर्मण्युपपदेऽच् । अनुद्यमनमनुत्क्षेपणम् । उद्यमने तु (भारहारं) इत्येव । (कवचहरः) । *वयसि च* इति कर्मोपपदात हरतेरच् वयसि गम्यमाने । कालकृतशरीरावस्थां यौवनादिर्वयः । उद्यमनार्थोयमारम्भः । उद्यमनं क्रियमाणं सम्भाव्यमानं वा वयो गमयतीति वृत्तिः । (पुष्पाहरः) । *आङि ताच्छील्ये* इति कर्मोपपदात् आङुपसृष्टात् ताच्छील्येऽच् प्रत्ययः । (दृतिहरिः पशुः । नाथहरिः पशुः) । *हरतेर्दृतिनाथयोः पशौ* इति दृतिनाथयोः कर्मणोरुपपदयोः हृञः पशौ कर्त्तरि इन् प्रत्ययः । संह्रियन्तेऽनेनात्रेति वा (संहारः) । *अध्यायन्यायोद्यावसंहाराधारावायाश्च* इति करणाधिकरणयोर्घञ् निपात्यते । (हरणं हारा) कारावन्धन इति भिदादिपाठादङ् गुणो दीर्घत्वं च । आह्रियन्तेस्माद्रस इति (आहारः) "अकर्तरि च कारके" इति घञ् । (हरिः) । इन्प्रत्ययः । (प्रहिः) कूपः । प्रहरतेः कूप इति प्रोपसृष्टादस्मादिकारप्रत्ययः । तत्र डिदित्यनुवृत्तेः टिलोपः । (हृदयम्) । "वृहृञोर्युक्दुकौ च" इति कयप् प्रत्ययो दुगागमः । हृदयस्य प्रियं, (हृद्यम्) *हृदयस्य प्रिय* इति षष्ठ्यन्ताद्यत् । हृदयस्य बन्धनो (हृद्यो मन्त्रः,) *बन्धने चर्षौ* इति षष्ठ्यन्तात यत् । बध्यते ऽनेनेति बन्धनम् । ऋषिर्वेदः । हृदये भवं (हार्दम्) । "प्राग्दीव्यतोण्" हृदयं लिखतीति (हृल्लेखः हृदय्यम्) ब्राह्मणादिपाठात् ष्यञ् । एवं (दौहृदय्यम्) । हृदयस्य लासो (हृल्लासः) । *हृदयस्य हृल्लेखयदण्लासेषु* इति हृदादेशः । तत्र वृत्तौ लेखेत्यणन्तस्य ग्रहणं घञि (हृदयलेख इति) हृदयस्य शोको (हृच्छोकः, हृदयशोकः) । रोगे, (हृद्रोगः । हृदयरोगः) । "वा शोकष्यञ्रोगेषु" इति हृदादेशविकल्पः । ष्यञि हृद्भावपक्षे "हृद्भगसिन्ध्वन्ते पूर्वपदस्य च" इत्युभयपदवृद्धिः । (सुहृत्, दुर्हृत्) *सुहृद्दुर्हृदौ मित्रामित्रयोः* इति बहुव्रीहौ हृदयस्य हृदादेशः समासान्तः । मित्रामित्राभ्यामन्यत्र (सुहृदयो दुर्हृदय इति) भवति । सुहृदो भावकर्म्मणी सुहृदयस्य, (सौहार्दम्) "हायनान्तयुवादिभ्यो ऽण्" इति अण् "हृद्भग०" इत्युभयपदवृद्धिः। "हृदयस्य हृल्लेख" इत्यादिना हृदयस्य हृद्भावः हृदयस्य भावकर्मणी (हार्दम् ।) युवादिषु हृदयस्य हृद् इति पाठात् अणि हृद्भावः । हृदयमस्यास्तीति (हृदयालुः) । "हृदयाच्चालुरन्यतरस्याम्" इति मत्वर्थीय आलुच् तद्भाव इनिठनौ । (हृदयी हृदयिक इति । हरिणः) "शास्त्याहृश्विभ्य इनच्" इत्यनच् । (हरिणी) । "जातेरस्त्रीविषयात्" इति ङीष् (हरेणुः) । गन्धद्रव्यविशेषः । "कृहृभ्यामेणुः" इति एणुः प्रत्ययः । (हरितः) "हृश्याभ्यां तन्" इति तन् । (हरिणी ब्राह्मणी । *वर्णादनुदात्तात्तोपधात्* इति स्त्रियां वा ङीष् तकारस्य नकारः । अवमितनो नित्त्वादुदात्तादिस्तकारोपधश्च भवति । ङीबभावे टापि (हरिता ब्राह्मणी । हरित्) "हृसृयुषिभ्य इतिः" इति इतिप्रत्ययः ॥ ८८३ ॥

धृञ् धारणे ॥ (धरतीत्यादि) भरतिवत् । "धारेरुत्तमर्णः" इत्यत्र धृञ् अनवस्थाने इति तौदादिकस्य ग्रहणमिति न्यासपदमञ्जर्यादिषु । "इङ्धार्योः" इत्यत्राप्यस्येति न्यासे, "अध्यायन्याय" इति निपातनमस्त्यस्येति वृत्तिकारेण दर्शितम् । धारयतीति (धारयः) ।

"अनुपसर्गाल्लिम्पविन्द०" इत्यादिना शे शपि गुणायौ । वसु धारयतीति (वसुन्धरा)। "संज्ञायांभृतॄवृजि" इति खचि "खचि ह्रस्वश्च" इति ह्रस्वत्वे मुमागमः । (धारा) धारा प्रपातन इति भिदादिपाठादङि गुणो दीर्घत्वं च । द्रवद्रव्यनिपातनं धारेतिन्यासे खड्गधारादावुपमानात् प्रयोगः । (धर्मः) । "अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्योमन्" इति मन् । धर्मं चरति (धार्मिकः) । *धर्मं चरति* इति द्वितीयान्तात् चरतीत्यर्थे ठक् । तत्र [अधर्माच्चेति वक्तव्यम्] इत्युक्तत्वात् (आधार्मिकोपि) । धर्मेण प्राप्यं, (धर्म्यम्) । *नौवयोधर्म* इति तृतीयान्तात् प्राप्येर्थे यत्, धर्मादनपेतमपि (धर्म्यम्) । "धर्मपथ्यर्थ०" इति यत् । कल्याणो धर्मो ऽस्येति (कल्याणधर्मा) *धर्मादनिच् केवलात्* इति धर्मान्तात् बहुव्रीहेरनिच् । अत्र केवलादिति बहुव्रीह्याक्षिप्तस्य पूर्वपदस्य विशेषणत्वेन पूर्वपदीभवतः केवलादन्यनिरपेक्षात्परो यो धर्मशब्दस्तदन्तात् बहुव्रीहेरिति सूत्रार्थः । तेन परमस्स्वोधर्मोस्य परमस्वधर्म इति त्रिपदे बहुव्रीहावनिच् न भवति । अत्रान्यपदापेक्षयैव स्वशब्दः पूर्वपदं भवति । [सर्वनामसंख्ययोरुपसंख्यानम्] इति स्वशब्दस्य पूर्वनिपातो न भवति आहिताग्न्यादेराकृतिगणत्वात् । यदा स्वो धर्मः स्वधर्मः । परमः स्वधर्मोस्येति बहुव्रीहिस्तदा यद्यपि पूर्वपदं केवलं भवति तथापि ततः परो न धर्मशब्द इति समासान्ताभावः । निवृत्तधर्मा हीत्यत्र निवृत्तिशब्दो बहुव्रीहेः पूर्वपदं भवन्नान्यमपेक्षत इति केवलादस्मात् परो धर्मशब्द इति अनिच् भवति । एवं (साध्यसमानधर्मा सपक्ष) इत्याद्यपि निर्वाह्यम् । साध्येन समानः साध्यसमानः, साध्यसमानः धर्मोस्येति । ब्राह्मणस्य धर्मो (ब्राह्मणधर्मः) सोऽस्यास्तीति (ब्राह्मणधर्मी) । *धर्मशीलवर्णान्ताच्च* इति मत्वर्थीय इनिः । सिद्धे सति वचनं ठनो निवृत्त्यर्थम् । धृञ् अवध्वंसन इत्यत्राग्रे । धृञ् धारणे चुरादौ क्षीरस्वामी । तद्भाष्यकारस्यानभिमतम् । यदाह भिदादौ धारा, प्रपतने वृत्तिरस्येति । यद्ययं चुरादिः स्यादस्मादेवाङि धारणाग्येति ब्रूयात् । एवं हि दीर्घनिपातनक्लेशोपि न भवति, न चास्त्यर्थे भेदः । तथा न्यासहरदत्तावपि न सहेते । यदाहतुः दीर्घत्वं निपातनादिति । तथा "अनुपसर्गाल्लिम्प०" इत्यत्र न्यासे धृञ् हेतुमण्ण्यन्त उक्तः । स पार्थादयस्तूभयथा, यदाह, पारतीरकर्मसमाप्तौ चुरादिण्यन्तः । अथ वा पॄ पालनपूरणयोर्हेतुमण्ण्यन्त इत्यादि, हरदत्तोपि धृञ् धारणे धृञ् अनवस्थाने ण्यन्तौ, विद चेतनाख्याननिपातनेषु चुरादिः । ज्ञानाद्यर्थानामन्यतमो वा हेतुमण्ण्यन्त इति । यदि चुरादिः स्यात् इतरच्चुरादिण्यन्तौ चेति ब्रूयाताम् । अत्र के चित् कृञ् करणइति धातुं पठन्ति तदनार्षम् । यदाहतुर्न्यासकारहरदत्तौ "कः करत् करति" इत्यत्र व्यत्ययेन शबिति । किं च यद्ययं स्यात् अकरदित्येवमर्थं "कृमृदृरुहिभ्यः छन्दसि" इति करोतेरङ्विधानमनर्थकं स्यात् । अस्मात् लङि शपि अस्य सिद्धे "छन्दसि लुङ्लङ्लिटः" इति लुङादीनामेकत्र विधानात नास्त्यर्थभेदः ॥ ८८४ ॥

णीञ् प्रापणे ॥ इह प्रापणं गमनाङ्गं भवति । (प्रणयति । अन्तर्णयति) [अन्तश्शब्दस्याङ्किविधिणत्वेषूपसर्गत्वमुक्तम्] (निनाय) वृद्ध्यायौ । "द्विर्वचनेचि" इति स्थानिवद्भावान्नीशब्दो द्विरुच्यते । (निन्यतुः) । इयङः स्थानिवद्भावान्निशब्दे द्विरुक्ते पुनरुत्तरखण्डस्येयङ् न भवति । अस्यां दशायामनेकाच्त्वात् "एरनेकाचः" इति यणा बाधादियेथेत्यत्रोपपादितम् । (निनयिथ । निनेथ । निन्यथुः । निन्य । निनाय । निनय) गुणवृद्ध्योरयायौ । (निन्यिव) । क्रयादिनियमादिट् । थलि भारद्वाजनियमाद्विकल्पः (नेता । नेष्यति । नयतु । अनयत् । नयेत् । नीयात् । अनैषीत् । निनीषति । नेनीयते । नेनयीति । नेनेति । नेनीतः । नाययति । अनीनयत् नाययति अजां यज्ञदत्तेन देवदत्तः) । [नीवह्योः प्रतिषेधः] इति प्रयोज्यस्य कर्मत्वनिषेधः । अत्र हरदत्तः । यद्यपि नैतयोर्गतिरर्थः, अथापि गतिफलं प्रापणमर्थ इति फलतया गातः प्रतीयते इति मत्वा प्रतिषेध इति । तथा च कैयटे

तयोर्गत्यर्थत्वमुक्तं तत्फलतया प्रतीयमानगत्यपेक्षम् । (नयते । निन्ये । निन्यिषे । निन्यिध्वे । निन्यिढ्वे । निन्यिवहे । नेतासे । नेष्यते । नयताम् । अनयत । नयेत । नेषीष्ट । अनेष्ट) । *सम्माननोत्सञ्जन०* इति आत्मनेपदम् । अकर्त्रभिप्रायार्थोयमारम्भः । सम्माननं पूजनम् । उत्सर्जनमुत्क्षेपणम् । आचार्यकरणमाचार्यक्रिया । ज्ञानं प्रमेयनिश्चयः । भृतिर्वेतनम् । विगणनमृणादेः प्रतिनिर्यातनम् । व्ययो धर्मादिप्रयोजनो विनियोगः । तत्र संमाननाचार्यकरणादयो धात्वर्थविशेषणानि । अन्ये तु धात्वर्थाः । ईदृशाज्जनेतेस्तङ् स्यात् । (नयते शास्त्रे) । अर्थान्युक्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रतिपादयतीत्यर्थः । इह पूजा शास्त्रार्थस्य युक्तिभिः स्थिरीकरणम् । शिष्याणां चैवंविधा प्रतिपादन । (पुत्रमुदानयते) । उत्क्षिपतीत्यर्थः । (माणवकमुपनयते) । शास्त्रीयेन विधिनात्मसमीपं प्रापयतीत्यर्थः । (नयते शास्त्रे) तत्त्वप्रमेयं निश्चिनोतीत्यर्थः । अत्रायमकर्मकः कर्मणो धात्वर्थान्तर्भावात् । (कर्मकरानुपनयते) । भृतिदानेनात्मनः समीपे प्रापयतीत्यर्थः । (ऋणं विनयते) । निर्यातयतीत्यर्थः । (शतं विनयते) । धर्मादौ विनियुङ्क्ते इत्यर्थः । *कर्तृस्थे चाशरीरे कर्मणि* । नयत्यर्थस्य यः कर्त्ता तत्स्थे शरीरैकदेशवर्जिते कर्मणि कारके सति नियस्तङ् स्यात् । इह शरीरं तदेकदेश इति वृत्तौ । (मन्युं विनयते) । कर्तृग्रहणाद् देवदत्तस्य मन्युं विनयतीत्यत्र न भवति, तथा शरीरग्रहणात् गडुं विनयतीत्यत्र न भवति । अयमकथितेप्सिततमाभ्यां द्विकर्मक इत्युक्तम् । तत्र लादयः प्रधाने कर्मणि भवन्ति, षष्ठी तूभयत्र । अत्र प्रधाने पक्षे द्वितीयापि "उभयप्राप्तौ कृति" कर्तृकर्मणोः षष्ठी नेति सर्वमेतद्धरतावुक्तमुदाहृतं च, इहापि तथैवोदाहरणं नेयम् । "अकथितं च" इत्यत्र न्यासे नीवहिहरिजिदण्डीन्प्रस्तुस्य ग्रामादीनामप्यजादिवत् क्रियाजन्यफलभाक्त्वे ऽपि तदविवक्षया ऽकथितत्वमुक्तम् । यदाह । अकथितत्वेप्येषां ग्रहणं यदा ग्रामादीनामीप्सिततमत्वमनीप्सिततमत्वं च न विवक्ष्यते किन्तु कर्तुरीप्सिततमत्वमात्रमेव तदर्थमिति । न्यासोद्योते च अजादीनां ग्रामादीनामीप्सिततमत्वमविशिष्टमित्युक्तम्, तत्र नीवहिहरीणां प्रापणमर्थः । तथा च "न गतिहिंसा" इत्यत्र भाष्यम् । देशान्तरप्रापणक्रिया वहिरिति । तत्रैव कैयटे । देशान्तरप्राप्त्युपसर्ज्जनं प्रापणमस्य वाच्यं, तत्र गतिर्नान्तरीयकत्वात्प्रतीयते न त्वसौ धात्वर्थ इति, "गतिबुद्धि" इत्यत्र नीवही प्रकृत्य पदमञ्जर्यामेतयोर्गतिफलं प्रापणमर्थ इति । तस्मादत्र गतेरधात्वर्थत्वादकर्तृकत्वात्तत्फलसंयोगाद्याप्यमानत्वेपि ग्रामादीनां न कर्मतोपपत्तिः । अजादीनां तु धात्वर्थकर्तृव्यापारप्रापणफलगतिद्वारेणाप्यमानत्वाद्युक्तं कर्मत्वम् । न चैवं वाच्यम् । अजादिभिः स्वव्यापारे गतौ कर्तृभिस्तत्संयोगद्वारेणाप्तुमिष्यमाणत्वादनीप्सितकर्मत्वमिति । यतः "कर्त्तुरीप्सिततमम्" इत्यत्र कर्तृग्रहणं कर्मणः स्वव्यापारद्वारेणाप्तुमिष्यमाणत्वमस्य कर्मत्वनिवृत्त्यर्थमिति स्थितम् । अत एव माषेष्वश्वं बध्नातीत्यत्र गन्धनकर्मणाश्वेन स्वव्यापारेण भक्षणेनाप्तुमिष्यमाणानामपि माषाणां कर्मत्वं न भवति । कथं तर्हि "गत्यर्थे०" इत्यत्र भाष्यकृता उह्यन्तां देवदत्तेनेति वहिर्गत्यर्थ उदाहृतः । नैष दोषः । तत्र गतिलोटीत्युच्यमानेपि अर्थाद् गत्यर्थलोटीति सिद्धे ऽर्थग्रहणस्य प्रतीयमानगतीनामीदृशामपि संग्रहार्थत्वात् । यच्च "हृक्रोरन्यतरस्याम्" इत्यत्र हरतेः "गतिबुद्धि" इति नित्ये प्राप्ते विकल्प इति हरदत्तादिवचनम् । तत्र "गतिबुद्धि" इत्यत्रार्थग्रहणस्य पूर्ववन्नयत्याद्यर्थपरिग्रहार्थत्वात् युक्तमेव । प्रतीयमानानां गतीनामपि तत्र ग्रहणं, एवं नीवह्योः प्रतिषेध उपपद्यते । "न गतिहिंसा" इत्यत्र त्वर्थग्रहणेन प्रतीयमानगतीनां ग्रहणं भाष्यकारस्य नेष्टम् । यत्तत्र "हृवह्योरप्रतिषेधः" इति वार्त्तिकपरिग्रहणान्न वहिर्गत्यर्थ इति प्रत्याचष्टे । (विनीयः कल्पः,) कल्कश्च पिष्टौषधे पक्वान्नतैलादीनामृजीषे पाके वर्त्तते । *विपूयविनीयजित्या मुञ्जकल्कहलिषु* इति विपूर्वादस्मात्कल्के क्यपि निपात्यते । (आनाय्यः) गार्हपत्यादाहवनीयादानीतो दक्षिणाग्निः । तस्य हि योनिर्विकल्प्यते वैश्यकुला-

द्वित्तवतो वा गृहात् गार्हपत्याद्वेति । *आनाय्योऽनित्ये* इति आङ्पूर्वादस्मात् ण्यदायौ निपात्येते । अनित्यत्वं चास्य नित्यमज्वलनात्, निपातनस्य रूढ्यर्थत्वाद्घटादावन्ययोनौ च दक्षिणाग्नौ च (आनेय इति) भवति । (प्रणाय्यः) अपूज्यो निष्कामो वा *प्रणाय्यो ऽसम्मतौ* इति प्रपूर्वादस्माण्ण्यदायौ । संमतिः पूजाभिलाषो वा, सा यस्य नास्तीत्यसावा संमतिः । संमतौ तु (प्रतिप्रणेयः । सान्नाय्यं हविः) तच्च दधिपयसी । "पाय्यसान्नाय्य०" इति हविषि ण्यदायौ । उपसर्गस्य दीर्घत्वं च । (नयतीति नायः) । *दुन्योरनुपसर्गे* इति अनुपसृष्टादस्मात्कर्त्तरि णः । उपसृष्टात् (अनुनयः) । पचाद्यच् । (प्रणीः) । "सत्सूद्विष०" इत्यादिना क्विप् । (ग्रामणीः) इत्यत्र पूर्ववत् क्विपि [अग्रग्रामाभ्यां नयतेरुपसंख्यानम्] इति णत्वम् । (नायः) । "श्रिणीभुवोऽनुपसर्गे" इति घञ् । उपसृष्टात्तु (निर्णायः) इत्येतत्तूपसर्गप्रतिरूपकात्परस्य निञो घञि णत्वे चानुपसर्गत्वादेव भवति । कथं नय इति बाहुलकादच् । (अवनायः । उन्नायः) "अवोदोर्नियः" इति घञ् । (उन्नयः पदार्थानाम्) इति बाहुलकादचि । (परिणायः) समन्तादक्षादिना यद् द्यूतम् । *परिन्योर्नीणोर्द्यूताभ्रेषयोः* इति यथासंख्यात्पराबुपपदे द्यूते नियो घञ्, अक्षादिभिः क्रीडनं द्यूतम् । भ्रेषश्चलनमचलनमभ्रेषः । अनपहार इति यावत् । (आनायः) । "जालमानायः" इति जाले घञि निपात्यते । (नीमिः) नीञो मिरिति मिः । (नेमः) अर्त्तिस्तुस्वित्यादिना मन् । अस्य सर्वादित्वात् तत्कार्यं पूर्वशब्दवत् । (नीथो) यज्ञः । "हनिकुषि" इत्यादिना थन् । (नेष्टा) । नयतेः षुक्चेति तृनि गुणो धातोः षुगागमः । *अप्तृन्* इत्यादिना *ऋतो ङि* इत्यादिना च यथायोगं गुणदीर्घौ सर्वनामस्थाने । हरत्यादयश्चत्वारोऽनुदात्ता उभयपदिनः ॥ ८८९ ॥

अथाजन्तानिटः परस्मैपदिन आह—

धेट् पाने ॥ एतदादयो जयत्यन्ता अनुदात्ता उदात्तेतः (धयति । दधौ । दधतुः । दधुः । दधाथ । दधिथ । दधिव) *आदेच उपदेशे शिति* इति एजन्तो यो धातुरुपदेशे तस्यात्वमिति सर्वत्राकारे "आत औ णलः" इति औत्वे वृद्धिः, अन्यत्र क्ङित्यजादावार्द्धधातुके "आतो लोपः" इत्याल्लोपः । इटि च तस्य "द्विर्वचनेऽचि"इति स्थानिवत्त्वाद्धाशब्दस्य द्विर्वचनं, क्रादिनियमादिट् । थलि भारद्वाजनियमादिड्विकल्पः (धाता । धास्यति । धयतु । अधयत् । धयेत् । आशिषि धेयात्) । "एर्लिङि" घुमास्थागापाजहातिसामित्येकारः । *दाधा घ्वदाप्* इति दाण् दाने, देङ् रक्षणे, डुदाञ् दाने, दो अवखण्डने, धेट् पाने, डुधाञ् धारणादौ एते घुसंज्ञकाः, दाप् शोधने दैप् लवन इत्येतौ वर्जयित्वा । प्रकृतिवदनुकरणं भवतीत्यात्वेनैजन्तानुकरणमपि दाधारूपमेव । लक्षणप्रतिपदोक्तपरिभाषाया नेह प्रसङ्गः । एवं हि अदाबिति सामान्यग्रहणार्थं दैपः पित्त्वमर्थवद्भवति । (अदधत् । अदधताम्) *विभाषा धेट्श्व्योः* इति कर्तृवाचिनि लुङि च्लेर्विभाषा चङि "आतो लोप इटि च०" इत्याल्लोपस्य स्थानिवत्त्वात् "चङि" इति धाशब्दस्य द्विर्वचनम् । चङभावे सिचि "यमरमनमातां०" इति सकि सिचश्चेटि (अधासीत् । अधासिष्टामित्यादि)। यदा "विभाषा घ्राधेट्शाच्छासः" इति घ्रादिभ्यः परस्मैपदपरस्य सिचो लुक् तदा (अधात् । अधाताम् । अधुरित्यादि) *आतः* इति झेर्जुस् सिज्लुगन्ताद्यदि भवति आत एवेति नियमार्थमिदं सूत्रमित्युक्तम्, यदा कर्मव्यतिहारे तङ् तदा (व्यतिधयते व्यतिदधे) इत्यादि । *आदेच उपदेशे* इत्यत्र शितीति कर्मधारये नञः तत्पुरुषे श एव इत् शित् न अित् अशित इति । तेन यस्मिन् विधिस्तदादावल्ग्रहण इतीत्संज्ञकशकारादावयं पर्युदास इति एशि आत्वमेव भवति । तङि "विभाषा धेट्श्व्योः" इति वा चङि (अदधत । अदधेताम्) । *स्थाघ्वोरिच्च इति* आत्मनेपदपरस्य सिचः कित्वे धातोश्चेत्वे "ह्रस्वादङ्गात्" इति झलपरत्वेन सिचो लोपेन (व्यत्यधित । व्यत्यधिषत)। सिचः कित्त्वात् गुणो न भवति । इत्वविधानं तु गुणविधानार्थमेव स्यात् "स्थाघ्वोरिच्च" इति एकारस्यावि-

धानमपि ह्रस्वादिति सिचो लोपार्थं लव्वर्थञ्च स्यात्। इदं चेत्वं न सिचीत्युच्यते, किं तर्हि इकारश्चान्तादेशः सिच् किद् भवति इत्येतावत्। तेनास्य सिज्निमित्तत्वात् संनिपातपरिभाषया सिलोपो न स्यादिति नाशङ्कनीयम्। कर्मणि लुङ्येकवचने (अधायि)। *आतो युक् चिण्कृतोः* इति युक्। चिणि ञ्णिति कृति परे आकारान्ताङ्गस्य युगित्यर्थः । द्विवचनादौ चिण्वदिट्पक्षे युकि (अधायिषातामित्यादि। अन्यदा (अधिषातामित्यादि धित्सति) "सनिमीमा" इत्यादिना इसिः "सः स्यार्द्धधातुके" इति तत्वे "अत्र लोपोऽभ्यासस्य" इति लोपः(देधीयते) घुमास्थागापाजहातिसां हलि"इति एषां हलादौ किङत्यार्द्धधातुके परे आकारस्येकार इतीकारो द्विर्वचनं, (दाधेति) ईटि "आद्गुणः"। अन्यदा (दधाति। दाद्धः) *श्नाभ्यस्तयोरातः* अनयोराकारस्य क्ङिति सार्वधातुके लोप इति लोपे "झषस्तथोः" इति धत्वे जश्त्वम्। "ई हल्यघोः" इतीत्वमत्रैवाघोरिति निषेधान्न भवति। आकारलोपस्य पूर्वस्मादपि विधाविति स्थानिवद्भावः पूर्वत्रासिद्धे न स्थानिवदिति निषिध्यते। अत एव हि अध इति दधातिः पर्युदस्यते। धयतेस्त्वयं पर्युदासो ऽस्मात् झषन्तात्परस्मैपदपरयोरभावान्न भवति। न च यङ्लुकि संभवात्तदार्थोयं पर्युदासः स्यादिति वाच्यम्। दधातौ चरितार्थत्वात्। तथा च तत्र वृत्तिः। दधातिं वर्जयित्वेति। काश्यपवर्षगणौ (दाधमि दाधामि। दाध्वः) लोटि हौ *घ्वसोरेद्धावभ्यासलोपश्च*इति अन्तस्यैकारोऽभ्यासलोपश्च। अत्र लोपस्य शित्वात्सर्वादेशत्वम्। तेन (धेहीति) भवति। लङि (अदाधात्। अदाद्धाम्। अदाधुः)। "सिजभ्यस्त" इति झेर्जुस् नित्यम्। परत्वात् "लङः शाकटायनस्यैव" एवेति आकारान्तनिबन्धनो विकल्पो नाशङ्क्यः। अस्मात्परत्वान्नित्यत्वाच्च "श्नाभ्यस्तयोरातः" इति पूर्वमेवाल्लोपे आकारान्तस्याभावात्, लिङि (दाध्यात्)। "श्नाभ्यस्त०" इत्याल्लोपः। आशिषि "एर्लिङि" इत्येत्वं (दाधेयात्। लुङि अदाधात्)) "गातिस्थ०" इति नित्यं सिचो लुक्। "विभाषा घ्राधेट्" इति विकल्पस्तु सानुबन्धकनिर्देशान्न भवति। अत एव "विभाषा धेट्श्व्योः" इति चङपि न भवति (धापयति धापयते शिशुम्) आत्वे पुक्। पादिषु [धेट उपसंख्यानम्] इति "निगरणचलन०" इति परस्मैपदं निषिध्यते। (अदीधपत्) इत्यत्राकाराश्रयः पुक् तस्योपधात्वसंपादनेन "णौ चङि" इति ह्रस्वस्य निमित्तं न स्यादिति नाशङ्क्यम्। 'मारणतोषणनिशामनेषु ज्ञा' इति जानातेर्णौ पुकि ह्रस्वार्थात् मित्त्वविधानाल्लिङ्गात्। (उद्धयः। धयः) *पाघ्राध्माधेट्दृशः* इति उपसृष्टादनुपसृष्टाच्च कर्त्तरि शः (स्तनंधयः। नासिकंधयः) "नासिकास्तनयोर्ध्माधेटोः" इति खशि मुमागमः। नासिकाथाः "खित्यनव्ययस्य" इति ह्रस्वश्च। धेटष्टित्त्वमवयवे ऽचरितार्थत्वात् (स्तनंधयीति) समुदाये ङीबर्थम्। अत्र हरदत्तः। स्तनन्धयीत्यत्रैव ङीबिष्यते नान्यत्रेत्याहुरिति। इदं खश्प्रत्ययान्तोपलक्षणमित्येके। तथा च क्षीरस्वामी स्तनन्धयीत्यादौ ङीबर्थं इति। वर्द्धमानोपि शुनिन्धयी स्तनन्धयी खश्प्रत्ययान्त एव ङीबिति। (नाडिन्धयः। मुष्टिंधयः) "नाडिमुष्ट्योश्च" इति खश्। (शुनिंधयः) खश्प्रकरणे [वातशुनीतिलशर्धेष्वज्धेट्तुदजहातिभ्य उपसंख्यानम्]इति शुनिशब्द उपपदे खश् (घटं(१) धयः खरिंधयः खरी गर्दभी, वातन्धयः) [खरीघटवातेषु] इति वक्तव्यात् खश्। केचित्तु खरीशब्दस्थाने खारीशब्दं परिमाणवचनं पठन्ति, वातशब्दो भाष्ये न दृश्यत इति हरदत्तः (धारुर्वत्सोमातरं) "दाधेट्सि" इति रुः। "न लोकाव्यय०" इति कर्मणि षष्ठ्या निषेधः। तत्र हि उकारोऽपि प्रश्लिष्यते। उउक इति, धयन्ति तामिति (धात्री) स्तनपायिका, "धः कर्मणि ष्ट्रन्" इति ष्ट्रन्, कर्मणीतीहाभिधेयनिर्देशः, षित्वं ङीषर्थं, धीत्वा "घुमास्थ०" इतीत्त्वम्। (प्रधाय) "न ल्यपि" इतीत्वनिषेधः, "ईत्त्वमवकरादौ" इति भाष्येऽ स्थितमिति किप्यपि (धीः। सन्धिः) "उपसर्गे घोः किः" इति किप्रत्ययः। धीयत इति (धाना) "धापूवस्यजनिभ्यो नः" इति नः। (धेनुः)। "धेट इच्च" इति नुप्रत्ययः,

(१) घटिमिति २ पु० पा०। घटीति २ पु० पा०।

इकारश्च धातोरिति । ङिद्वचनेषु "ङिति ह्रस्वश्च" इति पक्षे नदीसंज्ञायामाट्। (धेन्वाइति, धेन्वामित्यत्र) *इदुद्भ्याम्* इति इकारोकाराभ्यां परस्य ङेरामादेशः । विसंज्ञापक्षे गुणादौ (धेनवे, धेनोरिति, धेनावित्यत्र) *अच्चघेः* इति ङेरौत्वं, घेश्चाकारः धेनुनां समूहो, (धैनुकम्) "अचित्तहस्तिधेनोष्ठक्" इति ठकि "इसुसुक्तान्तात् कः" इति कादेशः । 'सामूहिकेषु तदन्तविधिरिष्यते' तेन गोधेनूनां समूहो, (गौधेनुकमिति भवति) *जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम्* इति वृद्धिनिमित्ते तद्धित उत्तरपदस्य वा वृद्धिः, पूर्वपदस्य तु नित्यम् । "पोटायुवति"इत्यादिना समासः । अधेनूनां समूहो आधैनवमित्यत्राधेनोरन इति तन्निषेधात् प्राग्दीव्यतीय उत्सादिलक्षणोञ् । धेनुः बन्धकीकृता, (धेनुष्या) आ(१)हितदुग्धेति यस्याः प्रसिद्धिः। "संज्ञायां धेनुष्या०" इति यत् प्रत्ययः पुगागमश्च निपात्यये । धेनुर्भविष्यतीति, (धेनुम्भव्या) "धेनोर्भव्ये मुम्" इति मुमागमः ॥ ८८६ ॥

ग्लै म्लै हर्षक्षये ॥ हर्षक्षयो धातुक्षयः (ग्लायति । जग्लौ । जग्लतुः । जग्लाथ । जग्लिथ । जग्लौ । जग्लिव । जग्लिम । ग्लाता । ग्लास्यति । ग्लायतु । अग्लायत् । ग्लायेत्) । आशिषि (ग्लायात् । ग्लायेत) *वान्यस्य संयोगादेः* इति घुमास्थादेरन्यस्य संयोगादेरार्द्धधातुके कृङिति लिङि वा एत्वम् । (अग्लासीत्) सगिटौ (जिग्लासति । जाग्लायते । जाग्लेति । जाग्लीतः) *ई हल्यघोः०* इति कृङिति सार्वधातुके श्नाप्रत्ययस्य चाघोरभ्यस्तस्य चकारस्य ईकारविधानादीत्वं लोटि हेरपित्त्वात् ङित्वादीत्वं, (जाग्लीहि । अजिग्लपत् ।प्रग्लापयति) *ग्लास्नावनुवमां च* इति अनुपसर्गस्य वा मित्त्वमुक्तम् । सुग्लायतीति (सुग्लः) "आदेच" इत्यात्वं प्रागेव प्रत्ययोत्पत्तेरनैमित्तिकमिति "आतश्चोपसर्गे" इति उपसृष्टादाकारान्तात् विहितः को भवति (ग्लानः) "संयोगादेरातो धातोर्यण्वतः"इति निष्ठानत्वम् (ग्लास्नुः) "ग्लाजिस्थश्च क्स्नुः" । (सुग्लानं भवता) *आतो युच्*इति ईषदादिषु कृच्छ्राकृच्छ्रार्थेषूपपदेषु युच् । स्त्रियां (ग्लानिः) । "ग्लाज्याहात्वरिभ्यां निः" । (ग्लौः) । "ग्लानुदीभ्यां डौः" इति डौः, डित्वात् टिलोपः । "चित्ररव्यम्" । एषां च्यन्तानामेवाव्ययत्वमिति नियमात् "कृन्मेजन्तः" इत्यव्ययत्वाभावात् (ग्लावौ ग्लावः) इत्यादि यथासम्भवं नेयम् । ग्लै गात्रविमान इतिक चित्पठ्यते, गात्रविमानः कान्तिहानिः॥८८८॥

घै न्यक्करणे । न्यङ्गविमानइति क्षीरस्वामी । न्यङ्गं कुत्सिताङ्गम् (घायति दध्यावित्यादि) ग्लायतिवत् ॥ ८८९ ॥

द्रै स्वप्ने ॥ ॥ ध्रै तृप्तौ ॥ ध्यै चिंतायाम् ॥ (द्रायति । ध्रायति । ध्यायति) इत्यादि ग्लायतिवत् । (निद्रालुः) । "स्पृहिगृहि" इत्यालुचि द्रा कुत्सायां गतावित्यदादिकस्य ग्रहणमिति वृत्तौ । (निद्रा) । "आतश्चोपसर्गे" इत्यङ् । अनिद्रो निद्रावान् भवति, निद्रायते । *लोहितादिडाज्भ्यः क्यष्* इति लोहितादेराकृतिगणत्वादस्मात् च्व्यर्थे भवत्यर्थे वा क्यष् । "वा क्यषः" इति पक्षे तङ् । निद्राशब्दो वृत्तिविषये तद्वति वर्तते इति न्यासकयटपदमञ्जर्यादिषु । निद्रातीति (निद्रः) । "आतश्चोपसर्गे" इति कर्तरि कः, अस्माद्वा, उक्तं चैतत् द्रा कुत्सायां गतावित्यत्र गणे । (निद्राणः) । अकर्मकत्वात् कर्त्तरि निष्ठा, "संयोगादेः"इति निष्ठानत्वम् । (निद्रितः) इति तारकादेराकृतिगणत्वादितच् । सुष्ठु ध्यायतीचि ध्यायतेः क्विप्प्रसारणयोः "संप्रसारणाच्च"इति परपूर्वत्वे "हलः"इति दीर्घः। (सुधीः। सुधियावित्यादौ) "एरनेकाचः" इति यणे "भूसुधियोः" इति निषेधात् "अचि श्नुधातु०"इति इयङ् ।(ध्यातः) संयोगादेः" इति निष्ठानत्वं "न ध्याख्या०" इति निषिध्यते । (धीवा) "ध्याप्योः सम्प्रसारणं च" इति क्वनिपि सम्प्रसारणं पूर्वत्वं दीर्घत्वं, स्त्रियां "वनो र च" इति ङीप्(धीवरी)८९२

रै शब्दे ॥ (रायति । ररौ रातेत्यादि) पूर्ववत् । कीति रायति इति (कीरः) "सुपि स्थः" इति अत्र सुपीति योगाविभागात्कः । एवमीदृशा अन्येपि निर्वाह्याः। रा दानइत्यदादौ८९३

(१) पीतदुग्धेति २ पु० पा० ।

स्त्यै ष्ट्यै शब्दसंघातयोः ॥ एको दन्त्यादिः। परो मूर्द्धन्यादिः। षोपदेशलक्षणपर्युदास एक एव गृह्यते उभयोः पाठवैयर्थ्यप्रसङ्गात्। तत्रार्थयोर्यथासंख्यं न भवति पृथग् निर्देशात्। (स्त्ययति। तस्त्यावित्यादि,) ग्लैवत्। षोपदेशस्यापि "धात्वादेः षः सः" इदमेव रूपम्। प्रयोजनं तु तिष्ट्यासति अतिष्ट्यपत्) इत्यादावादेशसकारत्वात् षत्वम्। यत्तु मैत्रेयसम्मताकारकाश्यपादिभिरुक्तं पुनः पाठफलं "धात्वादेः षः सः" इति सत्वाभावे दन्त्यपराः सादयः षोपदेशा इति लक्षणस्याव्याप्तिप्रसङ्गादुपेक्ष्यम्। पाठे षोपदेशानां प्रयोगे सादित्वादजन्त्यपरत्वं हि लक्षणं, व्यापकेन च नाम लक्षणेन भवितव्यम्। (प्रस्तीतः। प्रस्तीतवान् प्रस्तीमवान्)। "स्त्यः प्रपूर्वस्य" इति निष्ठायां संप्रसारणे परपूर्वत्वदीर्घत्वयो "प्रस्त्योऽन्यतरस्याम्" इति प्रोपसृष्टादस्मात्पराया निष्ठायास्तकारस्य पक्षे मकारः। मकाराभावे "संयोगादेः" इति निष्ठानत्वस्य "स्त्यः" इति संप्रसारणे पूर्वत्रासिद्धत्वात् कृते च तस्मिन् यण्वत्त्वाकारान्तत्वयोरभावादप्रसङ्गः। प्रस्त्य इति लघु वक्तव्ये "स्त्यः प्रपूर्वस्य" इति वचनं प्रशब्दो यस्माद्धातूपसर्गसमुदायात्पूर्वं इत्याश्रयणार्थम्। तेन (प्रसंस्तीत) इत्यादावन्योपसर्गव्यवधानेपि संप्रसारणं भवति। मत्वं तु "प्रस्त्यः" इति निर्देशाद्व्यवहिते न भवति। (स्त्यानः, संस्त्यान) इत्यादौ प्रस्त्याभावान्न संप्रसारणं, नापि मत्वं, संप्रसारणविधौ षोपदेशोप्ययं स्त्यायो गृह्यतइति वृत्त्यादौ, तेन तस्यापि निष्ठायामुक्तान्येवोदाहरणानि द्रष्टव्यानि। येऽस्य सत्वं नेच्छन्ति तेषां स्त्यारूमापन्नयोर्द्वयोर्ग्रह इति वृत्त्यादिमहाग्रन्थविरोधश्च। न च तस्य प्रकृतिवदनुकरणमिति स्त्यारूपत्वं यतस्तैः प्रकृतावेव सत्वं नाभ्युपगम्यते। स्त्यायति संहन्यते ऽस्यां गर्भ इति (स्त्री)। संस्त्याने "स्त्यायतेर्ड्रट्" इति। ड्रटि डित्त्वाट्टिलोपे वलि लोपे च टित्त्वान्ङीप्। अजादौ "स्त्रियाः" इतीयङि (स्त्रियावित्यादि)। अमृशसोस्तु "वाम्शसोः" इति इयङ्विकल्पनात् (स्त्रीम्। स्त्रियम्। स्त्रियः। स्त्रीरिति) प्रथमयोः पूर्वसवर्णदीर्घो भवति। "नेयङुवङ्" इत्यत्र अस्त्रीति निषेधादियङ्स्थानत्वेपि नदीत्वात् (स्त्रियै स्त्रियामित्यत्र) "आण् नद्याः" इति ङेराम् भवति। तथा (स्त्रीणाम्) इत्यत्र "ह्रस्वनद्यापो" इति नुड् भवति। (हे स्त्रि) इत्यत्र "अम्बाथनद्योः" इति ह्रस्वो भवति। स्त्रियाः संबन्धि (स्त्रैणम्)। *स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्*। आभ्यां यथासंख्यं प्राग्भवीयार्थेषु तत्तदर्थानुकूलसमर्थविभक्तिभ्यां नञ्स्नञाविति नञ्। (स्त्रीत्वम् स्त्रीता)। "आ च त्वात्" चकारेण त्वतलोरभ्यनुज्ञानात् त्वतलौ। स्त्रीवन्मा भूमेति भाष्यकारप्रयोगाद्वतिस्साधुः। "स्त्री पुंवच्च" इत्यादिनिर्देशस्य प्रयोगापेक्षत्वाद्वा। अत्र विषये बाधकान्येव निपातनानीति नञ्स्नञौ बाध्येते। यथा सर्वनामेत्यत्र णत्वम्। परस्त्रिया अपत्यं, (पारशवम्)। परस्त्री परशुं चेति शिवादिवाठादपत्ये परशुभावश्च। (पारस्त्रैणेयम्) "कल्याण्यादीनामिनङ्" इति ढकि ण्यादेशोन्त्यस्येनङ्। अनुशतिकादित्वादुभयपदवृद्धिः। कुस्त्रिया भावः कर्म वा (कौस्त्रम्) युवादित्वादण्। एवं (दौस्त्रम्। स्त्रीतरा, स्त्रितरा) "नद्याः शेषस्य" इति ह्रस्वो वा। सूत्रार्थश्च ज्वलत्यादौ द्रष्टव्यः(१)। (स्तूपः। उच्छ्रायः) "स्त्यः सम्प्रसारणमुच्च" इति पप्रत्ययः, प्रसारणपूर्वत्वे तस्य चकारस्य उकारो दीर्घः। उच्चेत्येव वक्तव्ये दीर्घविधानं ह्रस्वस्यापि श्रावणार्थं, तेन (स्तुपः) इत्यपि भवति ॥ ८९५ ॥

खै खदने ॥ खदनं स्थैर्यं हिंसा च (खायति। चखौ। खातेत्यादि) ॥ ८९६ ॥

क्षै जै षै क्षये ॥ (क्षायति। चक्षौ। क्षातेत्यादि। क्षामः। क्षामवान्) "क्षायो मः" इति निष्ठातो मः। णौ (क्षपयति)। अयं मिदिति घटादौ ध्वनतावुक्तम्। एवं (जायति, जजौ, जातौ। सायति। ससौ। साता) "घुमास्था" इत्यत्र साग्रहणेन स्यतेर्ग्रहणं नास्येति आशीर्लिङि ईत्वाभावात् (सायादिति भवति)। अत एव (साऽसायते

(१) व्याख्यात इति २ पु०।

सायते) इत्यादौ "घुमास्था" इति ईत्वं न भवति । तथा च तत्र न्यासे । गामादाग्रहणेष्वविशेषमुक्त्वा षो अन्तकर्मणीत्ययमेवोपात्तः । तथा च तन्त्रान्तरे । पास्यति जास्यति सास्यतीति स्पष्टं षो अन्तकर्मणीत्ययमेव निर्दिश्यते । "विभाषाघ्राधेट्शाच्छासः" इति सिचो लुग्विधावपि श्यन्विकरणाभ्यां साहचर्यात्स्यतिरेव गृह्यते इत्यस्मात्सिचि सति च असासीदित्येव भवति । (सिषासति) आदेशसकारत्वात्षत्वम् । (साययति । असीषयत्) "शाच्छासा०" इति युग्विधावपि श्यन्विकरणाभ्यां साहचर्यात् स्यतिरेव गृह्यते इति अस्य पुगेव भवति । के चिदमुं दन्त्यादिं पठन्ति । तत् षोपदेशलक्षणविरोधादुपेक्ष्यम् ॥ ८९९ ॥

कै गै शब्दे ॥ इह शब्दः शब्दविशेषः । उक्तं ह्येवं स्वामिना । (कायति । चकौ । काता । काकः) "इण्नीक"इति कन् (गायती । जगौ । गातेत्यादि) "घुमास्था०" इत्यत्र गामादाग्रहणेष्वविशेष इति लाक्षणिकगारूपस्य गायतेरपि ग्रहणात् आशीर्लिङि एत्वं (गेयादिति) भवति । "गातिस्था०" इत्यत्र गापोर्ग्रहणे इण्पिबत्योर्ग्रहणमिति वृत्तावनुक्तत्वात् अस्मात्सिचोलुगभावात् (अगासीदिति) भवति (गाथकः । गायनः) "गस्थकन्" इति "ण्युट् च" इति कर्त्तरि थकन् , ण्युटो णित्वात् "आतो युक्" इति युक् , टित्वात् स्त्रियां (गायनी) वासरूपेण ण्वुल्तृचौ, (गायकः, गातेति) भवति । (उद्गाता) । तस्य भावकर्म्मणी (औद्गात्रम्) । "उद्गात्रादिभ्योञ्" इति अञ् । साम गायतीति, (सामगः) । *गापोष्टक्* इति कर्मण्युपपदे टक् । टित्वात् स्त्रियां (सामगी । गीत्वा । गीतम्) "घुमास्था०"इति ईत्वम् । (प्रगीतिः)। "स्थागापापचो भावे" इति स्त्रियां भावे क्तिन् । "स्त्रियां क्तिन्" इत्येव सिद्धे पुनर्वचनं "आतश्चोपसर्गे" इति स्थन् । (अवगथः) प्रातस्सवनं सोमो वा । "निशीथगोपोथावगथाः" इत्यवपूर्वादस्मात्थनि धातोर्ह्रस्वत्वं च निपात्यते । (उद्गीथः) "गश्चोदि" इति उदुपसृष्टात्क्थन् । "घुमास्था०" इतीत्वम् ॥ ९०१ ॥

शै श्रै पाके ॥ इह पाको विक्लित्तिः । तथा 'श्रृतं पाक' इत्यत्र वृत्त्यादावुक्तम् (शायति शशौ । शाता । श्रायति । शश्रौ, श्रातेत्यादि) गायतिवत् । (श्रपयतीति) घटादित्वात्पाके मित्वम् । अन्यत्र (श्रापयति) स्वेदयतीत्यर्थः (श्रृतं क्षीरम्) । "श्रृतं पाके" इति क्ते श्रभावो निपात्यते । तत्र पाको विक्लित्तिः, तत्फलको व्यापारश्च । तत्र तत्फलके व्यापारे णिचमन्तरेण वृत्तेरभावात् श्रपेर्ण्यन्तस्यायं श्रभाव इति (श्रृतं क्षीरं देवदत्तेनेति भवति) । तथा च तत्र वार्त्तिकं, 'श्राश्रप्योः श्रभावो निपात्यते'इति । यत्तु श्रपेर्णिचि श्रपिशब्दः, न तस्यायमादेशः, पाक इति वचनात् , अत्र पाचनार्थः पाकस्तु गुणीभूतः । अयं श्रभावो व्यवस्थितविभाषाविज्ञानात् क्षीरहविषोर्नित्यं भवति । अन्यत्र तु न भवति । (श्राणा यवागूः । श्रपिता यवागूरिति) "संयोगादेः" इति निष्ठानत्वम् । श्राणास्मै नियमेन दीयते (श्राणिकः) । *श्राणामांसौदनाट्टिठन्* इति नियमेन दीयमानोपाधिकार्थात्तदस्मै दीयते चतुर्थ्यर्थे टिठन् । टित्वात् स्त्रियां (श्राणिकी श्राता) इत्यादादिकस्य, (श्रापयतीति) (चौरादिकस्य) ॥९०३॥

पै ओवै शोषणे ॥ (पायति । पपौ) "पाघ्रा"इत्यत्र नास्य ग्रहणम् । पारूपस्य लाक्षणिकत्वात् । एजन्तोपदेशसामर्थ्यादशिति पारूपस्य भेदाभावात् । (पपौ । पाता । पास्यति । पायतु । अपायत् । पायेत् , आशिषि पायात्) "घुमास्था" इतीत्वं तद्विशेष "एर्लिङि"इत्येत्वं चास्य न भवति, पारूपस्य लाक्षणिकत्वात् । अत एव "गातिस्था०"इति सिज्लुग्विधावपि अस्याग्रहणात् (अपासीदिति) भवति (पिपासति । पापयते) "ई हल्यघोः" इत्यभ्यस्ताश्रयमीत्वं ङित्सार्वधातुकविषयमितीह भवति (पापाति । पापेति) ईटि गुणः, (पापीतः) "ई हल्यघोः" इति ङित्सार्वधातुकपरत्वादीत्वम् । (पापति) । "श्नाभ्यस्तयोः" इत्यालोपः लङि (अपापेत् । अपापात , अपापीताम्) इत्यादि । "सिजभ्यस्त" इति नित्यं जुस्भावे (अपापुः) "लङः शाकटायनस्यैव" इति विकल्पो नेति धयतावुक्तम् । आशिषि लिङि आर्द्धधातुकत्वात् "ई हल्यघोः" इतीत्वाभावात् (पापायादिति भवति) । "घुमास्था" इति

ईत्वमस्य नेति प्रागेवोक्तं, (पाययति) "शाच्छासाह्वाव्यावेपां युक्" इति णौ युगागमः। तत्र लाक्षणिकपारूपस्य ग्रहणमिति वृत्तिन्यासपदमञ्जर्यादिषु। (पीत्वा पानं) सरः। पा इति पानार्थ इहाग्रे। रक्षणार्थोऽदादौ (वायति। ववौ) इत्यादि, पायतिवत्। णौ (वाययति शिरः) आत्वे युक्। "वो विधूनने जुक्" इति अत्र 'वा गतिगन्धनयोः'इत्यदादिकस्यैव ग्रहणं तस्यैव विधूनने वृत्तिसम्भवादिति व्याख्यातारः। "शाच्छासा" इति युक्तु तत्रैव वा इति निर्देशात् 'वेञ् तन्तुसन्तान'इत्यग्रे पठिष्यमाणस्यैव, न त्वस्य प्रसजति (वानं) तु फलम्, ओदित्वान्नम्॥ ९०५॥

ष्टै वेष्टने॥ (स्तायति। तस्तौ। स्ताता। स्तापयति। अतिष्टपत्) इत्यादि। अयं च पाठो मैत्रेयस्य। भट्टभास्कारोऽप्यत्रवानुकूलः, यदाह "स्तायूनां पतये नम" इत्यत्र स्तेना वस्त्रादीनपहरन्ति, (स्तायवः) 'ष्टै वेष्टने' इत्यस्माद्बाहुलकादुणिति। स्वाम्यादयस्तु ष्णै वेष्टन इति पठन्ति। तथा च निरुक्तम्—'उष्णीषं स्नायतेर्व्याचरकः'। एवमुष्णीषं शिरोवेष्टनम्। स्नायतेः शोभार्थस्य उभयत्रापि सम्भवादिति। अत एव व्याख्यानात् ष्णै शोभन इत्यपि भ्वादौ द्रष्टव्यः। प्रयुज्यते च भारते—

पाञ्चाल्याः पद्मपत्राक्ष्याः स्नायन्ति जवनं घनम्।
याः स्त्रियो दृष्टवन्त्यस्ताः पुम्भावं मनसा ययुः॥

इति। क्रियानिघण्टौ च स्तायति स्नायत्याप्लवत इति, दैवे च स्नातीति। शौचे स्नायेदिति चेच्छन्ति केचनेति॥ ९०६॥

दैप् शोधने॥ पकारो ऽदाबिति विशेषणार्थः। अयमेव लाक्षणिकानामपि घुसञ्ज्ञकानां ग्रहणे लिङ्गम्। दायतीत्यादि पायतिवत्। णिचि (दापयति अदीदपत्) दाण् दाने। 'दैङ् रक्षणे' इतीहैवाग्रे। 'दाप् लवने' इत्यदादौ। 'डुदाञ् दाने' इति जुहोत्यादौ। दो 'अवखण्डने' 'दीङ् रक्षण' इति दिवादौ॥ ९०७॥

पा पाने॥ (पिबति) "पाघ्रा"इत्यादिना पिबादेशः 'पिबेर्गुणप्रतिषेधः' इति कात्यायनः। वर्द्धमानस्तु—"लोपः पिबतेः" इति लिङ्गाद्गुणो नेति। वृत्तौ तु अकारान्तोऽयमादेश आद्युदात्त इति, अतो लघूपधत्वाभावान्न गुणप्रसङ्गः (पपौ। पाता। पास्यति। पिबतु। अपिबत्। पिबेत्। आशिषि पेयात्) "एर्लिङि" इत्येत्वम्। (अपात्)। "गातिस्था०" सिचो लुक्। (पिपासति। पेपीयते) "घुमास्था" इत्यादिनेत्वे द्वित्वम्। (पापेति। पापाति। पापीतः)। "ई हल्यघोः" इतीत्वम्। (पापति) "श्नाभ्यस्तयोः" इत्यालोपः। पापितेत्यादावपि "आतो लोप इटि च"इत्यालोपः। लङि "सिजभ्यस्त०"इति नित्यं जुसि (अपापुः)। "लङः शाकटायनस्यैव०" इति विकल्पो नेति धयतावुक्तम्। लिङि (पापायात्)। अनार्धधातुकत्वात् "घुमास्था" इत्वं न भवति। आशिषि आर्द्धधातुकत्वादीत्वापवादः, "एर्लिङि" इत्येत्वम्, (पापेयात्), लुङि "गातिस्था"इति सिचो लुकि (अपापात्। अपापुः) "आतः" इति जुस्। (पाययति। पाययते) "न पादमि" इति निगरणे परस्मैपदनिषेधः। "शाच्छासा०" इत्यादिना युक्। णेश्चङि "लोपः पिबतेरीच्चाभ्यासस्य" इत्युपधाया आकारस्य लोपः। युक्ययमुपधा भवति। अल्लोपस्य णौ कृतं स्थानिवदिति स्थानिवत्त्वात् पायशब्दस्य द्विर्वचनमीचाभ्यासस्येतीकारे (अपीप्यत्)। तत्र पिबतेरिति निर्देशाद् यङ्लुकि अपापदिति भवति। (उत्पिबः)। "पाघ्राध्माधेट्दृशाच्छा सः" इति कर्तरि शप्रत्यते पिबादेशः। (सुरापः। शीधुपः)। "गोपोष्टक्" इति कर्मण्युपपदे टक् टित्वात्स्त्रियां (सुरापी) अत्र पिबतेः सुराशीध्वोः इत्युपपदनियमादुपपदान्तरे "आतोऽनुपसर्गे कः" इति को भवतीति विशेषः। स्त्रियां ङीबभावः, (क्षीरपा ब्राह्मणीति)। द्वाभ्यां पिबतीति (द्वीपः)। "सुपि स्थः" इत्यत्र सुपीति योगविभागात्तत्र चात इत्यनुवर्त्तनादाकारान्तादस्मात्सुप्युपपदे कप्रत्ययः। एवं (कच्छपादयः)। प्रपिबन्त्यस्यामिति (प्रपा)। "घञर्थे क-

विधानम्" इति कः । (प्रपीतिः) । "स्थागापापचो भावे" इति भावे क्तिन् । "स्त्रियां क्तिन्" इत्येव सिद्धे वचनम् "आतश्चोपसर्गे" इत्यङ्बाधनार्थम् । (पीत्वा) "घुमास्था" इतीत्वम् । (प्रपाय) । "न ल्यपि" इतीत्वनिषेधः । (निपीयेति) पीङो रूपम् । (पीत्वा स्थिरकः) । "मयूरव्यंसकादयश्च"इति तत्पुरुषः । "समासे नञ्पूर्वे"इति क्त्वो ल्यबादेशोऽत एव मयूरव्यंसकादिपाठान्न भवति । यद्वा अनञिति नञसदृशमव्ययं परिगृह्यते, तेन नञोऽन्येनाव्ययेन क्तान्तस्य समासेऽयं ल्यब्विधिरिति इह नैव प्रसजति । (पीतिः) । पीयतेऽनेनेति पानं, क्षीरस्य पानं (क्षीरपानं, क्षीरपाणमिति वा) "वा भावकरणयोः"इति पूर्वपदस्थान्निमित्तादुत्तरस्य भावकरणविषयपाननकारस्य णत्वविकल्पः, क्षीरं पानं येषां ते (क्षीरपाणा उशीनराः) इत्यत्र "पानं देशे" इति पूर्वपदस्थान्निमित्तादुत्तरस्य भावकरणविषयपाननकारस्य देशेऽभिधेये नित्यं णत्वम् । 'पयः पानं भुजङ्गानाम्' इत्यत्र कर्मणि च येन संस्पर्शात् कर्त्तुः शरीरसुखं येन कर्मणा संस्पृश्यमानस्य कर्तुः शरीरस्य सुखं भवति तस्मिन्कर्मण्युपपदे धातोर्भावे ल्युडिति ल्युट् । एवं चोपपदसमासः सिद्धः । "ल्युट् च" इति ल्युटि तु षष्ठीसमासस्य "कर्मणि च" इति निषेधः स्यात् । (समाना पीतिः । संपीतिः) विशेषणसमासः, "समानस्य छन्दसि" इति समानस्येति योगविभागात्समानस्य सभावः । कथं पीता गाव इति ? यतः–प्रत्यत्र सानार्थत्वात्कर्त्तरि निष्ठया न भाव्यम् । उच्यते–पानं पीतमेषामस्तीत्यर्शआद्यजन्तोऽयं द्रष्टव्यः । (पायुः) । "कृत्वापाजि" इत्युण् । (सोमपीथः सोमपानम्) । "पावानुदिवदिसिविभ्यः क्यन्" इति क्यन् । (पेरुः । आदित्यः) "वापोरुच्च" इति रुप्रत्ययः, इकारश्चान्तादेशः । तस्य च गुणः । (पापम्) "पानीयाभ्यः पः" इति पः । (पाथः) । "पातेरसुन्" इत्यसुन्प्रत्ययः थुगागमश्च । (पयः) "पिबतेरीच्च" इत्यसुनि इकारन्तादेशे गुणायादेशौ । पय इवाचरति । (पयायते पयस्यते) "कर्तुः क्यङ्" इति क्यङ् । "ओजसोऽप्सरसो नित्यं"पयसस्तु विभाषया' इति पक्षे सलोपः । '"नः क्ये" इति नान्तस्यैव पदसंज्ञेति नियमात् "ससजुषोरुः" इति न भवति । पयसो विकारः (पयस्यः) । "गोपयसोर्यत्" इति यत् । (पाकः । अर्भकः) "इण्भीपाक०" इति कन् । (पात्रन्) । ष्ट्रन् । षित्त्वात् स्त्रियां ङीष् (पात्री) पञ्चानां पत्राणां समाहारः (पञ्चपात्रम्) "तद्धितार्थ" इति समाहारे द्विगुः, [अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते] इति ङीपि प्राप्ते ["पात्रादिभ्यः प्रतिषेधः"] इति निषिध्यते । "स नपुंसकम्" इति समाहारद्विगुद्वन्द्वनिबन्धनं नपुंसकत्वमेव भवति । पात्रस्य वापः क्षेत्रं (पात्रिकम्) उप्यतेऽस्मिन्निति वापः । "पात्रात् ष्ट्रन्"इति षष्ठ्यन्ताद्वापेऽर्थे ष्ट्रन् । षित्त्वात् ङीषि (पात्रिकी क्षेत्रभक्तिरीति) पात्रं परिमाणविशेषः । पात्रं सम्भवति अवहरति पचति वा (पात्रीणा स्थाली) "आढकाचितपात्रात्खोऽन्यतरस्याम्" इति द्वितीयान्तात्संभवत्यादिष्वर्थेषु खः । खाभावे प्राग्वतीये ष्ट्रनि (पात्रिकी) । आधारप्रमाणादाधेयप्रमाणानतिरेकः संभवः । उपसंहरणमभ्यवहारः । विक्लेदनं पाकः । द्वे पात्रे सम्भवति अवहरति पचति वा (द्विपात्रिकी, द्विपात्रीणा) । "द्विगोष्ठंश्च"इति आढकाचितपात्रान्तात् द्विगोर्द्वितीयान्तात् सम्भवत्यादिष्वर्थेषु ठक् । चकारात् खश्च । अत्रान्यतरस्यांग्रहणानुवृत्तेः प्राग्वतीयष्ठञपि भवति । तस्य चार्हीयप्रत्ययत्वात् "अध्यर्द्धपूर्वा"इति लुकि "द्विगोः"इति ङीपि (द्विपात्री) स्थालीत्यपि भवति । ठन्खञोस्तु विधानसामर्थ्यान्न लुक् । पात्रमर्हति (पात्रियः । पात्र्यः) "पत्राद् घंश्च"इति द्वितीयान्तादर्हतीत्यर्थे घयतौ । इह पात्रं भाजनं परिमाणं च । सर्वपात्रं व्याप्नोति (सर्वपात्रीणः सूपः) । "तत्सर्वादेः" इति खः (पात्रे समितः पात्रेबहुलः । "पात्रेसमितादयश्च"इदि क्षेपे सप्तमीतत्पुरुषः । अत्रैव पाठादलुक् । अत्रावधारणेन क्षेपः । पात्रण्व समितो न पुनः क्वचित्काय । (अयस्पात्रम्) "अतः कृकमिकंस"इत्यादिना अकारात्परस्य विसर्जनीयस्य पात्रे परतः सत्वम् । अत्र करोतिर्धातुः कमिश्च । अन्यानिप्रातिपदिकानि । लिङ्गविशिष्टपरिभाषया (अयस्पात्री) इत्यत्रापि भवति पायतीति शोषणे गतम् ॥९०८॥

घ्रा गन्धोपादाने ॥ (जिघ्रति) । "पाघ्रा" इत्यादिना जिघ्रादेशः शिति । (जघ्रौ । जघ्रिथ । घ्रातेत्यादि) आशीर्लिङि (घ्रायात् । घ्रेयात्,) "वान्यस्य" इति एत्वविकल्पः । लुङि (अघ्रात् अघ्रासीत्) "विभाषा घ्राधेट्" इति सिचो वा लुक् परस्मैपदे । आत्मनेपदे (अघ्रायि, अघ्रासाताम्) सुमनसौ इति नित्यं सिचः श्रवणमेव (जिघ्रासति । जेघ्रीयते) "ई घ्राध्मोः" इति यङीत्वम् । (जाघ्रेति । जाघ्राति । जाघ्रीतः) "ई हल्यघोः" इतीत्वम् । (घ्रापयति । अजिघ्रपत् । अजिघ्रिपत्) । "जिघ्रतेर्वा" इति चङ्परे णावुपधाया वेत्वम् । श्तिपा निर्देशात् यङ्लुकि (अजाघ्रपदित्येव) । आ जिघ्रतीति (आजिघ्रः) । "पाघ्रा" इत्यादिना उपसृष्टादस्माच्छे शपि जिघ्रादेशः, व्याजिघ्रतीति (व्याघ्रः) । "जिघ्रतेः संज्ञायाम्" इति कः । 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति सुबुत्पत्तेः प्रागेव समासस्तेन स्त्रियां "जातेरस्त्रीविषयात्" इति अदन्तलक्षणो ङीष् भवति (व्याघ्रीति) । सुबन्तेन समासे पूर्वं स्त्रियां टापि अदन्तत्वाभावात् ङीष् न स्यात् । व्याघ्रस्य विकारश्चर्म (वैयाघ्रम्) । *प्राणिरजतादिभ्योऽञ्* इति प्राणिवाचिभ्यो रजतादिभ्यश्च षष्ठ्यन्तेभ्यो यथायोगं विकारावयवयोरर्थयोरञि "न य्वाभ्याम्" इति वृद्धिनिषेधे ऐजागमश्च । वैयाघ्रेण परिवृतो रथो (वैयाघ्रः) । *द्वैपवैयाघ्रादञ्" इति द्वैपवैयाघ्रशब्दाभ्यां परिवृतो रथ इति विषयेऽञ् । प्राग्दीव्यतीयस्याणोऽपवादः । (घ्राणम् । घ्रातम्,) "नुदविद०" इति निष्ठानत्वविकल्पः ॥ १०९ ॥

ध्मा शब्दाग्निसंयोगयोः ॥ इहाग्निसंयोगो मुखवायुना ऽग्निसंयोगः । (धमति) । "पाघ्रा" इत्यादिना धमादेशः शिति । (दध्मौ, ध्मातेत्यादि) लिङि (धमेत्) । आशिषि (ध्मायात । ध्मेयात्) "वान्यस्य" इत्येत्वविकल्पः । (दिध्मासति । देध्मीयते) "ई घ्राध्मोः" इति यङीत्वे, दाध्मेति । "ई हल्यघोः" इतीत्वम् । (दाध्मति) "श्नाभ्यस्तयोः" इत्यालोपः । (ध्मापयति । अदिध्मपत् । उद्धमः) । "पाघ्राध्मा" इत्युपसृष्टाच्छे शपि धमादेशः । (नासिकंधमः) *नासिकास्तनयोः* इति नासिकायां कर्मण्युपपदे ऽस्मात खश् (नाडिंधमः) *नाडीमुष्ट्योश्च* इति नाडीमुष्ट्योः कर्मणोरुपपदयोः खश्प्रत्ययः । तस्य मुष्टिशब्दस्यापूर्वनिपाताल्लक्षणव्यभिचारात् लिङ्गात् ध्मायेटोरुपपदयोश्च यथासंख्यं न भवति । पाणयो ध्मायन्ते येषु (पाणिंधमाः पन्थानः) । "उग्रंपश्येरंमदपाणिंधमाश्च" इति खशि निपात्यते । (ध्मात्वा ध्मातम्) ॥ ११० ॥

ष्ठा गतिनिवृत्तौ । (तिष्ठति) । "पाघ्रा" इति तिष्ठादेशः । (तस्थौ । अधितष्ठौ) । "स्थादिष्वभ्यासेन चाभ्यासस्य" इति षत्वम् । (स्थाता । स्थास्यति । अधिष्ठाता । अधिष्ठास्यति) । "उपसर्गात्" इत्यादिना षत्वम् । (तिष्ठतु । तिष्ठेत्) आशिषि (स्थेयात्) "एर्लिङि" इत्येत्वं "वा न्यस्य" इति विकल्पस्तु न भवति । अन्यस्येति घुमास्थादिपर्युदासात् (अस्थात्) "गातिस्था" इति सिचो लुक् । (अध्यष्ठात्) "प्राक् सितादड्व्यवायेऽपि" इति षत्वम् । (तिष्ठासति । तेष्ठीयते) "घुमास्था" इतीत्वे द्वित्वम् (तास्थाति । तास्थीतः) । "ईहल्यघोः" इतीत्वम् । (तास्थति) । "श्नाभ्यस्तयोः" इत्यालोपः (स्थापयति । अतिष्ठिपत्) *तिष्ठतेरित्* इति चङ्परे णौ उपधाया इत्वं श्तिपा निर्देशात् अतास्थपदित्यत्र न भवति (संतिष्ठते । संतस्थे । संस्थाता । संस्थास्यते । संतिष्ठताम् । समतिष्ठत । संतिष्ठेत । संस्थासीष्ट) । "समवप्रविभ्यस्थः" इति तङ् । (समस्थित, समस्थिषातामित्यादि) "स्थाघ्वोरिच्च" इति सिचः कित्त्वं तिष्ठतेश्चेकारः । "ह्रस्वादङ्गात्" इति सिज्लुक् सन्निपातपरिभाषाया नेति धयतावुक्तं, सिचः कित्त्वात्प्रत्ययलक्षणेन गुणो न भवति । एवम् अवतिष्ठते प्रतिष्ठत इत्यादि नित्यं शब्दमातिष्ठते) । प्रतिजानातीत्यर्थः । "आङः स्थः प्रतिज्ञाने"इति तङ् । अर्थस्वभावादयमाङ्पूर्वः । (तिष्ठते कन्या छात्रेभ्यः) । स्थानेन स्वाभिप्रायं प्रकाशयतीत्यर्थः, प्रकाशनमर्थो ऽनेकार्थत्वाद्धातूनामिति कश्चित् । "श्लाघह्नुङ्" इत्यत्र पदमञ्यो

तु स्थानेन स्वाभिप्रायप्रकाशनसमर्थ इत्युक्तम् । "श्लाघह्नुङ्" इति ज्ञीप्स्यमानस्य सम्प्रदानत्वम् । (धर्माध्यक्षे तिष्ठते) । तत्र निर्णयमपेक्षमाणस्तिष्ठतीत्यर्थः । *प्रकाशनस्थेयाख्ययोश्च* इति तङ् । प्रकाशनं स्वाभिप्रायाविष्करणं, स्थेयस्याख्या, स्थेयाख्या । तिष्ठत्यस्मिन्निति स्थेयः । रूढश्चायं विवादपदस्य निर्णेतरि, तिष्ठत्यस्मिन्निति स्थेय इत्यत्र प्रकरणादिना विवादपदनिर्णेतुः प्रतीतिः ।

ननु शब्दे नेत्यात्मनेपदाभावो हरदत्तेनोक्तः । कुटुम्ब उत्तिष्ठते तदर्थं घटत इत्यर्थः । "उदोनूर्ध्वकर्म्मणि" इति तङ् । ऊर्ध्वकर्मणि आसनात् (उत्तिष्ठति) अत्र उद् ईहायामित्युक्तत्वात् अनूर्द्ध्वकर्मण ईहया विशेषणादस्माद्ग्रामाच्छतमुत्तिष्ठति इत्यत्र ईहाभावात्तङ् न भवति । उत्पद्यत इति ह्यत्रार्थः । (ऐन्द्र्या गार्हपत्यमुपतिष्ठते) । ऐन्द्र्या ऋचा गार्हपत्यमभिधत्त इत्यर्थः । "उपान्मन्त्रकरणे" इति तङ् । मन्त्रः करणं यस्यार्थस्य मन्त्रकरणः । तदर्थादुपोपसृष्टात् स्थस्तङिति सूत्रार्थः । (आदित्यमुपतिष्ठते) पूजयतीत्यर्थः । (गङ्गा यमुनामुपतिष्ठते) । संश्लिष्यतीत्यर्थः । (राजकीयानुपतिष्ठते) मित्रीकरोतीत्यर्थः । (अयम् पन्थाः स्रुघ्नमुपतिष्ठते) । प्राप्नोतीत्यर्थः । [उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वक्तव्यम्] इति तङ् । 'आशा प्रलिप्सुर्विनयादुपास्थुः' इत्यत्र भट्टिश्लोके देवपूजादिभ्योन्योऽर्थ इति तङ् न कृतः । (अर्थी राजानमुपतिष्ठते । उपतिष्ठतीति वा) । लिप्सुरुपसर्पतीत्यर्थः, उपोपसृष्टोऽयमार्थान्तरवृत्त्या सकर्मकः । "वा लिप्सायाम्" इति तङ् विकल्पः । (यावद्भुक्तमुपतिष्ठते) वीप्सायामव्ययीभावः । भोजने भोजने सन्निधत्त इत्यर्थः । "अकर्मकाच्च" इति' उपोपसृष्टादस्मादकर्मकात्तङ् । तिष्ठतीति (स्थायी) । ग्रहादित्वाण्णिनिः । समे तिष्ठतीति (समस्थः) । "सुपिस्थ" इत्यत्र सुपीति योगं विभज्य आकारान्तानां कर्त्तरि कविधानात्कः प्रत्ययः । अत्र स्थ इति वचनं तिष्ठतेरण्याकारान्तत्वात्पूर्वेणैव कस्य सिद्धत्वात् अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति भावे कविधानार्थं, तेनाखूनामुत्थानम् (आखुत्थम् । शलभोत्थम्) इति भवति । "उदः स्थास्तम्भोः पूर्वस्य" इति सकारस्य पूर्वसवर्णस्तकारः । शं सुखं तत्र तिष्ठतीति (शंस्थः) । "स्थः कः च" इति कप्रत्ययः । चकारात् क्विपि (संस्थाः) । "घुमास्था" इति' ईत्वं भाष्यकारप्रयोगान्न भवति । [ईत्वमवकारादौ] इति तु न स्थितम् ।

ननु "सुपि स्थः" इत्यत्र योगविभागात्कः सिद्धः, क्विविति क्विबपि वासरूपेण, तत्र किं "स्थः क च" इति सूत्रेण, उच्यते । "शसि धातोः संज्ञायाम्" इत्यत्र क्विबिति धात्वधिकारादेव धातुग्रहणे सिद्धे पुनर्धातुग्रहणं बाधकबाधनार्थमित्युक्तम् । तेन यदा शङ्करा नाम परिवाजिका तच्छीला चेत्यत्र "कृञो हेतुताच्छील्य०" इति टं बाधित्वाज् भवति, तथा कक्विपावपि बाधित्वात्राप्यच् स्यात्, कं तु परत्वादपि बाधेतेति, तन्मा भूदित्यारब्धव्यमेव "स्थः क च" इति सूत्रम्, एवमपि किं क्विपो विधानेन, यतो वासरूपेणायमपि भविष्यति । न । अस्य विधाने यथा कः अचं बाधते तथा क्विपमपि बाधेत । (स्थास्नुः) । "ग्लाजिस्थश्च" इति तच्छीलादौ क्स्नुः, "घुमास्था" इतीत्वं स्थाआ इत्याकारप्रश्लेषेणाकारान्तस्य विधानान्नेति भाष्ये स्थितम् ।

अन्ये तु गिदयं तेनेत्वस्य न प्रसङ्गः । (जिष्णुः) इत्यत्र गुणाभावस्तु "न धातुलोप आर्द्धधातुके" "क्ङिति च" इति संहितया सूत्रपाठात् कृतचर्त्वस्य गकारस्यापि तत्र निर्देशात् । तथा "श्र्युकः किति" इत्यत्रापि चर्त्वेन गकारस्यापि निर्देशात् (भूष्णुः) इत्यत्रेडभाव इत्याहुः । उक्तं च—

स्नोर्गित्वान्न स्थ ईकारः क्ङ्तिोरीत्वशासनात् ।
गुणभावस्त्रिपु स्मार्यः श्र्युकोऽनिट्त्वं कगोरितोः ॥

इति । (स्थायुकः) । "लषपत" इत्यादिनोकञ् । (स्थावरः) "स्थेश०" इति वरच् ।

प्रस्थास्यतइति प्रस्थायी। "प्रेस्थः"इति णिनिः। णित्त्वाद्युगागमः। गम्यादिषु पाठात् "भविष्यति गम्यादयः"इति भविष्यत्कालता (स्थित्वा। स्थितम्)। (उपस्थितो गुरुं शिष्यः। उपस्थितो गुरुः शिष्येण) "गत्यर्था" इत्यादिना कर्त्तृकर्मणोः क्तः। उपपूर्वोऽयं सकर्मकः। "द्युतिस्यतिमास्थाम्" इति "घुमास्था" इतीत्वापवाद ईकारः। (प्रस्थाय) इत्यत्र 'अन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब् बाधते' इति पूर्वमीत्वं न प्रवर्त्तते। पश्चात्तु निमित्ताभावान्नास्य प्रसङ्गः। प्रतिष्ठतेऽस्मिन्निति (प्रस्थः) 'घञर्थे कविधानम्' इति कः। माहकिप्रस्थो नाम उदीच्यग्रामः, तत्र भवो (माहकिप्रस्थः) "प्रस्थोत्तरपदपलद्यादिकोपधादण्" इति प्रस्थोत्तरपलक्षणोऽण् शैषिकः। "उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात्"इति अचोऽपवादः। अणचोः स्वरे विशेषः। इन्द्रप्रस्थे भवः (ऐन्द्रप्रस्थः) अनुदीच्यग्रामत्वात्प्राग्दीव्यतीयोऽण्। मालाप्रस्थे भवः (मालाप्रस्थकः)। "प्रस्थपुरवहान्ताच्च" इति प्रस्थाद्यन्ताद्देशवाचिनः शेषेऽर्थे वुञ्। छस्यापवादः। प्रतिष्ठत्यग्रे गच्छतीति (प्रष्ठः) "आतश्चोपसर्गे" इति कः। "प्रष्ठोऽग्रगामिनि" इति षत्वम्। अग्रगामिनोऽन्यत्र प्रस्थः। (प्रस्थितिः)। "स्थागापापचो भावे" इति क्तिन्। "आतश्चोपसर्गे" इत्यङोऽपवादः। "द्यतिस्यतिमास्थामिति कीति" इति इत्वम्। कथं तर्हि (आस्थेति)। "व्यवस्थायामसंज्ञायाम्"इति निर्देशात् ज्ञापकादुत्सर्गोऽपि भवति। आस्था शीलमस्य (आस्थः)। "छत्रादिभ्यो णः" इति शीलोपाधिकात्प्रथमान्ताच्छत्रादेरस्येत्यर्थे आस्थाशब्दादण् प्रत्ययः। यद्यपि छत्रादौ स्थाशब्दः पठ्यते, तथापि केवलस्याभावात् सोपसर्गादेव प्रत्ययः। छत्रादीनां तस्य कामंशब्दस्याण्निबन्धनप्रकृतिभावबाधनार्थात् "कार्मस्ताच्छील्ये" इति टिलोपनिपातनाल्लिङ्गात् छत्रादिभ्योणेऽण्कार्यं भवतीति ज्ञापनात् स्त्रियां ङीपि (आस्थीति) भवति। तिष्ठत्यस्मिन्निति (स्थानीयम्) बाहुलकादधिकरणेऽनीयः (उपस्थानीयः) इति "भव्यगेय०"इत्यादिना कर्तृकर्मणोः। भीरूणां स्थानं (भीरुष्ठानम्)। "भीरोः स्थानम्" इति समासे षत्वम्, असमासे तु "सात्पदाद्योः" इति निषेध एव भवति। प्राप्तिस्त्वस्त्येव "नुम्विसर्जनीयशर्व्यवायेऽपि" इति। गोः स्थाने जातः (गोस्थानः)। "स्थनान्त" इत्यादिनाणो लुक्। (स्थिरम्) अजिरशिशिरस्थिरेति किरचि निपातितः (स्थेष्ठः। स्थेयान्) "प्रियस्थिर०" इत्यादिना वा इष्ठेमेयस्सु स्थादेशे "प्रकृत्यैकाच्" इति प्रकृतिभावात् लोपाभावे "आद् गुणः"। स्थिरशब्दस्य पृथ्वादिषु अपाठादिमनिच् नास्त्येवेति वृत्तौ स्थितम्। तेन स्थेमशब्दश्चिन्त्यः। स्थिरं करोति (स्थापयति)। "णाविष्ठवत्"इति इष्ठवद्भावाण्णौ स्थादेशे वृद्धिपुकौ। (गविष्ठिरः। युधिष्ठिरः)। "गवियुधिभ्यां स्थिरः" इति षत्वम्। "हलदन्तात्सप्तम्याः" इति अलुक्। अम्बेव तिष्ठतीति अम्बष्ठः) "सुपि स्थः" इति कः। उपपदसमासे वृत्तिस्वभावात् इवार्थोऽन्तर्भूतः॥ न्यासे त्वम्बायां तिष्ठतीति उपा(१)पादि। "ङ्यापोः संज्ञाछन्दसोः" इति पूर्वपदस्य ह्रस्वः। *अम्बाम्बगोभूमि* इति अम्बादिभ्यः परस्य स्थः सकारस्य षत्वम्। एवमम्बष्ठादीन्युदाहार्याणि। तत्र रूढिषु यथाकथञ्चित् व्युत्पत्तिः, सर्वत्र "सुपि स्थः" इति कः। (गोष्ठः) इत्यत्र तु गावः तिष्ठन्त्यस्मिन्निति प्रथमान्ते गोशब्दे उपपदे घञर्थे क इत्यधिकरणे कः। भूतपूर्वम् गोष्ठम् (गौष्ठीनं) "गोष्ठात् खञ् भूतपूर्वे" इति भूतपूर्वत्वोपाधिकार्थात् गोष्ठात् स्वार्थे खञ्। (गोष्ठीति) गौरादित्वात् ङीषि। (सव्येष्ठः) इत्यत्र "हलदन्तात्" इत्यलुक्। एवं (परमेष्ठिविष्ठयोरपि)।

यद्वात्रैव सविभक्तिकनिर्देशसामर्थ्यात् अलुक्। (अपष्ठ) इति वृत्तिमुपादाय अपाष्ठ इति क्वचित् पाठः। तत्र "अन्येषामपि दृश्यते" इति दीर्घ इति न्यासे उक्तम्। (कुष्ठः) इत्यत्र यदा कुशब्दो निपात स्तदा प्रथमान्तेऽस्मिन्नुपपदे विधिः। अथानिपास्तदा

(१) व्युदपादीति २ पु० पा०।

सप्तम्यन्त इति च न्यासे (सव्येष्ठा । सव्येष्ठी । सव्येष्ठा सारथिः) [स्थास्थिन्स्थृणामिति वक्तव्यम्] इति अत्र स्थशब्दे विवदन्ते । "सव्येस्थच्छन्दसि" इति ऋन्नन्तस्य च "नयतेर्डिच्च" इत्यतः डिदित्यनुवर्तनाट्टिलोपे "ऋदुशन" इति अनङि सर्वनामस्थानदीर्घत्वमिति न्यासे । प्रदीपादौ तु स्थाशब्दः क्विबन्तः [ईत्वे वकारादौ प्रतिषेधः] इति घुमास्थादिनेत्वं न भवति । अनयोः क्विबन्तपक्षो न्याय्यः, ऋन्नन्तत्वे स्थाइत्येव स्थृशब्दस्यापि षत्वे सिद्धेस्तदुपादानमनर्थकं स्यात् । हर्म्येष्ठः रथेष्ठा इत्यादय प्रयोगा नोपपद्येरन् । तत्रेत्वे वकारप्रतिषेध इत्यस्य भाष्ये प्रत्याख्यानात् तत्रैव स्थेत्यस्य निर्देशात् ईत्वाभाव इति वाच्यम् । (परमेष्ठी) इत्यत्र "परमे स्थः किच्च"इतीन्प्रत्ययः कित्वादाकारलोपः । (सुष्ठु, दुष्ठु, अपष्ठु,) "अपदुःसुषु स्थः" इति कुप्रत्ययः । मृगय्वादित्वात् कुप्रत्यय इति न्यासकारवचनात् अयं योगरहितः प्रतीयते । "सुषामादिषु च"इति षत्वम् । "उपसर्गात्सुनोति"इत्येव सिद्धे सुषामादिष्वनयोः पाठोऽनुपसर्गार्थः, यदा सुशब्दः पूजार्थस्तदा "सुः पूजायाम्" इति कर्मप्रवचनीयत्वात् एकसंज्ञाधिकारात अनुपसर्गात् सूपसर्गप्रतिरूपकाच्च । (सौष्ठवं, दौष्ठवं,) युवादित्वात भावकर्मणोरण् । (अपष्ठः) अयमपि सुषामादिषु द्रष्टव्यः (स्थाणुः) स्थाणुरिति णुः (स्थविरः) अजिरशिशिरेत्यादिना किरचि अवादेशोऽन्त्यस्य निपात्यते, स्थविरस्य भावकर्मणी (स्थाविरम्) युवादित्वादण् । दधित्थः कपित्थः) "सुपि स्थः" इति कः । पृषोदरादित्वात् सकारस्य तकारः । (स्थाम्) बलम् । मनिन् । अश्वस्येव स्थामस्य (अश्वत्थामः) अययपि पृषोदरादिः । अश्वत्थाम्नोऽपत्यम् , (अश्वत्थामः) "स्थाम्नोऽकारः" इति "दित्यदित्यादित्य०" इत्यत्र पाठादकारप्रत्ययः । अत्र केवलस्य स्थाम्नोऽपत्येन सम्बन्धाभावात्तदन्तविज्ञानम् । (स्थलम्) "स्थापति"इत्यादिना लः (स्थाली) गौरादिपाठात ॥ ९११ ॥

म्ना अभ्यासे ॥ (मनति) । "पाघ्रा" इत्यादिना मनादेशः शिति । अन्यत्र ग्लैवत् । मम्नावित्यादि । (आम्नायः) घञि युक् (आम्नातः) आम्नातमनेनाम्नाती व्याकरणे । "इष्टादिभ्यश्च" इति प्रथमान्तादनेनेत्यर्थे इनिः, सप्तमीविधाने [क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्] इति कर्मणि सप्तमी । नीचभावमभ्यस्यतीति (निम्नम्) सुपीति योगविभागात् "आतोऽनुपसर्गे"इति वा कः । नेर्नीचभाववचनत्वेन मनत्यर्थस्याविशेषणान्न तं प्रतीहोपसर्गत्वं, दिने आम्नायत इति (द्युम्नम्) द्युशब्दो दिनवचनम् , दृश्यते च धारयेरत्र (द्यून्) सुतरामाम्नायत इति (सुम्नं) सुखम् । घञर्थे कः ॥ ९१२ ॥

दाण् दाने ॥ (यच्छति) "पाघ्रा" इति यच्छादेशः शिति । अत्रैव दाणिति विशेषणार्थो णकारः (प्रणियच्छति) घुत्वात् "नेर्गद०" इति णत्वम् (ददौ । दाता । दास्यति । यच्छतु अयच्छत् । यच्छेत्) आशिषि (देयात्) घुत्वात् "एर्लिङि"इति एकारः (अदात्) "गातिस्था" इति सिचो लुक् (प्रण्ययच्छत् । प्रण्यदात्)अड्व्यवायेऽपि नेर्गदादिषु णत्वमिति उक्तम् । (दित्सति) "सनि मीमा" इति इसभावः । " अत्र लोपः" इत्यभ्यासस्य लोपः । "सस्यार्द्धधातुके" इति तत्वम् । (देदीयते) घुमास्था" इतीत्वे द्विर्वचनम् (दादेति । दादाति । दात्तः) "श्नाभ्यस्तयोः" इत्यालोपे चर्त्वम् । "पूर्वत्रासिद्धम्" इति वा चर्त्वम् । चर्त्वविधिं प्रतीति चालोपस्य न स्थानिवत्त्वम् । लोटि हौ "घ्वसोरेद्धौ" इत्यन्त्यस्यैकारे अभ्यासलोपे च देहि, (दापयति । अदीदपत्) (दास्या मालां संप्रयच्छते) कामुकः सन् तां तस्यै ददातीत्यर्थः । *दाणश्च सा चेच्चतुर्थ्यर्थे* इति समुपसृष्टात्तृतीयायुक्तादस्मात्तङ् , सा चेत्तृतीया चतुर्थ्यर्थे, तृतीया "अशिष्टव्यवहारे" इति । पूर्वसूत्रे सम इति षष्ठ्यन्तमित्युक्तं तदेवात्रानुवर्तत इति प्रेण व्यवधानेऽपि तद्भवति (दास्या मालां सम्प्रयच्छते सम्प्रादित) "स्थाघ्वोरिच्च" इति सिचः कित्त्वे इत्वं च, "ह्रस्वादङ्गात्" इति सिचो लोपो झलि । दाण इति सानुबन्धकनिर्देशाद्यङ्लुकि नायं तङ्विधिरिति (दास्या मालां सम्प्रददातीति भवति) ।

(गां प्रयच्छतीति, गोप्रदः) *प्रे दाज्ञः* इति कर्मण्युपपदे प्रोपसृष्टादस्मादणोऽपवादः कः ।
ननु "आतश्चोपसर्गे" इति कप्रत्ययेन प्रदशब्दं कृत्वा गोशब्देन षष्ठीसमासे गोप्रद इति सिद्धं किं सूत्रेण ? उच्यते । गां प्रयच्छतीति विवक्षायामपि गोप्रदाय इति स्यात् । यथा प्रादन्येनोपसृष्टाद्गोसम्प्रदाय इति स मा भूदिति । (गोदः) "आतोऽनुपसर्गे" इति अनुपसृष्टत्वे कः ।

'तं रत्नदायं जितमृत्युलोकं रात्रिचरः कान्तिसुतोऽभ्यतिष्ठत्'

इति भट्टिप्रयोगोऽयं दय दाणित्यपि द्रष्टव्यः ।

यद्वा "श्याद्व्यध०" इत्याकारान्तलक्षणे णे दायशब्दं व्युत्पाद्य तेन रत्नस्य दायो रत्नदाय इति षष्ठीसमासे विधेयः । (दारुः) "दाधेट्सिशदसदो रुः" इति रुः । (दानीयो ब्राह्मणः) "कृत्यल्युटो बहुलम्" इति सम्प्रदानेऽनीयर् । उपदीयत इति (उपदा) "आतश्चोपसर्गे" इत्यङ् । (देयम्) "अचो यत्" इति यति "ईद्यति" इतीत्वे गुणः (दत्वा । दत्तः । दत्तवान् इति) *दो दद् घोः* इति तकारादौ किति दद्भावः । (प्रत्तम्) *अच उपसर्गात्तः* इति अजन्तादुपसर्गात्परस्य दा इत्यस्य योऽच् तस्य तकारादेशः । "खरि च" इति दकारस्य तकारः । अत्राच इति द्विरावर्त्तते, तत्रैकेनोपसर्गो विशेष्यते परेण स्थानिनिर्दिश्यते इत्याकारस्य स्थानित्वलाभः । अन्यथा "आदेः परस्य" इति दकारस्यैव तकारः स्यात् ।
अन्ये तु "उपसर्गात्तः" इति द्वितकारकोऽयमादेशो निर्दिश्यत इति अनेकाल्त्वात्सर्वादेशं कुर्वन्ति, तेषाम् "अपो भिः" इत्यत्रैकस्तकारोनुवर्त्यः । अन्यथाद्भिरित्यादावपि सर्वादेशत्वं स्यात् । (नीत्तम् । सूत्तम्) *दस्ति* दा इत्यस्य यस्तकारस्तदादावुत्तरपदे इगन्तस्योपसर्गस्य दीर्घ इति दीर्घः । चर्त्वस्याश्रयात्सिद्धत्वात्तकारादित्वमुत्तरपदस्य । येषाम् *अच उपसर्गात्तः* इति द्वितकारक आदेशस्तेषामाश्रयात् सिद्धिरनपेक्ष्या ।

'अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते' ॥

इति वचनादवदत्तादौ तो न भवति । अत्रैव वार्त्तिके चकारावदत्तादीनामबाधः, तत्रादिकर्मणीत्यर्थात्प्रदत्तविशेषणम् ।

अन्ये तु अवदत्तादाववादय उपसर्गप्रतिरूपका निपाता न तूपसर्गा इति तत्वस्य नास्ति प्रसङ्ग इति चाहुः । मरुद्भिर्दत्तो (मरुत्तः) [मरुच्छब्दस्योपसंख्यानम्" इति उपसर्गसंज्ञाविधानसामर्थ्यादनजन्तत्वेऽपि तत्त्वं भवतीति व्याख्यातारः । (प्रदाय) "न ल्यपि" इति "घुमास्था" इतीत्त्वं निषिध्यते । ल्यपः पूर्वम् "अच उपसर्गात्तः" इति तो न भवति । "अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधत" इति । (दानुः) । "दाभाभ्यां नुः" इति नुप्रत्ययः । (देष्णुः) । दानशीलः । गादाभ्यां चेष्णुः । दायतीति शोधने गतम् ॥ ९१३ ॥

ह्वृ कौटिल्ये ॥ (ह्वरति । जह्वार । जह्वरतुः । जह्वर्थ । जह्वरिव) क्रादिनियमादिट् । थलि तु "अचस्तास्वत्" इति निषिध्यते । "ऋतश्च संयोगादेर्गुणः" इति गुणः । अयं वृद्ध्या पूर्वविप्रतिषेधेन स्वविषये बाध्यते (ह्वर्त्ता । ह्वरिष्यति) "ऋद्धनोः स्ये" इति इट् । (ह्वरतु अह्वरत् । आशिषि ह्वर्यात् ।) *गुणोर्त्तिसंयोगाद्योः* इति अर्त्तेऋकारान्तस्य संयोगादेर्यकि यकारादावार्द्धधातुके लिङि च गुण इति गुणः । (अह्वार्षीम् । यकि ह्वर्यते (लिङीव गुणः । यदाशीर्लिङि यगात्मनेपदे च तदा "लिङ्सिचोरात्मनेपदे" इत्यधिकृत्य "ऋतश्च संयोगादेः" इति पक्षे इटि (व्यतिह्वरिषीष्ट । व्यात्यह्वर्तेत्यादि) । "लिङ्सिचावात्मनेपदेषु" इति अधिकृत्य "उश्च" इति कित्त्वविधानात् न गुणः । झलि सिज्लोपः (जुहूर्षति) "अज्झनगमां सनि" इति दीर्घे "उदोष्ठ्यपूर्वस्य" इत्युत्वे रत्वे च "हलि च" इति दीर्घः । (जाह्वयते) "गुणोर्त्तिसंयोगाद्योः" इत्यधिकृत्य "यङि च" इति गुणः । (जर्ह्वर्त्ति । जर्ह्वर्त इत्यादि) । लोटि हेर्ङित्वात् । (जर्ह्वृहि) । उत्तमे । (जर्ह्वराणि) । लङि (अजर्ह्वः) । (ह्वृतम्) ॥ ९१४ ॥

स्वृ शब्दोपतापयोः ॥ (स्वरति । सस्वार । सस्वरतुः । सस्वर्थ । सस्वरिथ । सस्वरिम) "स्वरतिसूति" इति वलादाविड्विकल्पः । अत एव तासौ नित्यानिट्त्वाभावात् "अचस्तास्वत्" इति निषेधो न भवति । नापि "ऋतो भारद्वाजस्य" इति निषेधः । यतोऽयम् "अचस्तास्वत्" "उपदेशेऽत्वतः"इति निषेधावृकारान्तैकविषयाविति नियमादर्थादकारान्तेषु पाक्षिकत्वमात्रफलौ । "श्र्युकः किति" इति निषेधेन पुरस्तात् प्रतिषेधकाण्डारम्भसामर्थ्यात् परस्यापि स्वरत्यादिविकल्पस्यापि बाधः । तेन वमयोः क्रादिनियमेन नित्यमिडेव, न च मन्तव्यं "श्र्युकः किति" इति निषेधस्य बाधकं क्रादिनियमं स्वरत्यादिविकल्पः परत्वात् बाधेतेति, तस्मिंस्तु प्रसक्ते पुनर्बाधकस्य निषेधस्यापि प्रसङ्गात् । अस्ति च लिङ्गं पुरस्तादारभ्यमाणेनापि प्रतिषेधेन स्वरत्यादिविकल्पस्य बाध्यतेति। यदयं स्वरतेः "सनीवन्त०" इत्यादिना विकल्पं शास्ति, इदं च "सनि ग्रहगुहोश्च" इति उगन्तानां सन्यारभ्यमाणेन निषेधेन परस्यापि स्वरत्यादिविकल्पस्य बाधनेऽर्थवत् । येषां तु दर्शनं यावान् कश्चनेडभावः प्रतिषेधनिबन्धनो विकल्पनिबन्धनो वा स सर्वः क्रादिसूत्रेण नियम्यत इति तेषामत्र थल्यपि नित्यमिटा भाव्यम् । (स्वर्ता । स्वरिष्यति) । "ऋद्धनोः स्ये" इति नित्यमिट् विप्रतिषेधेन (स्वरतु । अस्वरत् । आशिषि स्वर्यात्) । "गुणोर्त्तिसंयोगाद्योः" इति गुणः । (अस्वारीत् अस्वारिष्टाम् । अस्वार्षीत् अस्वार्ष्टाम् । सिस्वरिषति । सुस्वूर्षति) । "सनीवन्त०" इत्यादिना इड्विकल्पः । इडभावे "अज्झनगमाम्" इति दीर्घे "उदोष्ठ्यपूर्वस्य" इति उत्वे रपरे "हलि च" इति दीर्घः । (सास्वर्यते) । "गुणोर्त्तिसंयोगाद्योः" "यङि च" इति गुणः । (सस्वर्त्ति । सस्वृत) इत्यादि । (सस्वरिता) इत्यादौ स्वरत्यादिविकल्पस्य न प्रसङ्गः । स्वरतीति श्तिपा निर्देशात् । (स्वारयति । असिस्वरत् । संस्वरते) । *समो गमृच्छिप्रच्छिस्वरत्यर्त्तिस्रुविदिभ्यः* इतिसमुपसृष्टादकर्मकादस्मात्तङ् (संस्वरे । संस्वरिषे) किति लिटि स्वरत्यादिविकल्पो नेत्युक्तम् । तेन क्रादिनियमान्नित्यमिट् । (संस्वरिता । संस्वर्त्ता । संस्वरिष्यते) । "ऋद्धनोः स्ये" इति नित्यमिट् । (संस्वरताम् । संस्वरेत । आशिषि संस्वरिषीष्ट । संस्वृषीष्ट) । लुङि (समस्वरिष्ट । समस्वृत) । इडभावे (ह्वरतिवत्) । "उश्च" इति कित्वादगुणत्वं तङ्विधौ स्वरतीति तिपा निर्देशात् (सास्वरीति) इत्यादौ न तङ् । (स्वृत्वा स्वृतः) "श्र्युकः किति" इति नित्यमिड् न । (स्वरुः) । यूपे छिद्यमाने प्रथमपतितशकलो वज्रश्च । "स्तृस्वृस्निहि" इत्यादिनोप्रत्ययः ॥ ९१९ ॥

स्मृ चिन्तायाम् ॥ (मातुः स्मरति) इत्यादि ह्वरतिवत् । "अधीगर्थ" इति कर्मणि शेषे षष्ठी (सुस्मूर्षते) "ज्ञाश्रुस्मृ" इति तङ् । स्मरयतीत्याध्याने घटादिपाठात्, अन्यत्र (स्मारयति । असस्मरत्) "अत्स्मृदृत्वर०" इत्यभ्यासस्याकार इत्वापवादः । अयमनेकार्थत्वात् विस्मरणे चित्तादपक्रमणे वर्त्तते । अनन्तरं द्वृ इति क्वचित्पठ्यते । (द्वरतीत्यादि) स्मरतिवत् । द्वर्यते संह्रियते इति (द्वारम्,) द्वारे नियुक्तो (दौवारिकः) । "तत्र नियुक्तः" इति ठकि "द्वारादीनां च" इति वृद्धिप्रतिबन्ध एजागमश्च । द्वारादिषु तदादिविज्ञानात् द्वारपालस्येदं, (दौवारपालम्) इत्यत्रापि वृद्धिप्रतिबन्ध एजागमश्च भवति । (द्वाः) इति ण्यन्तात् क्विपि ॥ ९१६ ॥

सृ गतौ ॥ (सरति । ससार । सस्रतुः । सस्रुः । ससर्थ । सस्रिव) । अजादाववृद्धिविषये यण् । क्रादिपाठादनिट्त्वम् । (सर्त्ता । सरिष्यति) । "ऋद्धनोः स्ये" इति इट् । (असरत् । सरेत् । स्रियात्) । "रिङ् शयग्लिङ्क्षु" इति रिङादेशः । (असार्षीत् । असार्ष्टाम्) "सर्त्तिशास्ति" इत्यङ्विधौ अविद्यमानशपा शासिना साहचर्यात् सर्त्यर्त्योरप्यविद्यमानशपोर्जुहोत्यादिकयोर्ग्रहणमिति नास्याङस्ति । (सीसीर्षति) । "अज्झन" इति दीर्घे "ऋतः" इतीत्वे रपरे "हलि च" इति दीर्घे द्विर्वचने सेस्रियते । "रिङ् शय०" इति रिङ् । (सर्सर्त्ति । सर्सृतः) इत्यादि । (सारयति । असीसरत्) । यदायं सरतिर्वेगितगमने वर्त्तते तदा पाघ्रा-

दीनां शित्प्रत्यये धावादेशे (धावतीत्यादि)। उपसर्या गर्भग्रहणे प्राप्तकाला। "उपसर्या काल्या प्रजने" इति यति निपात्यते। प्रजनं गर्भग्रहणं तत्र प्राप्तकालेत्यर्थः। अन्यत्र ण्यति (उपसार्या सूर्यः) "राजसूयसूर्य" इति क्यपि उत्त्वं निपात्यते। सुवतेर्वा रुगागमे सूर्यशब्दात् प्रत्ययाः सुवतौ प्रदर्शयिष्यन्ते। (साधु सरतीति सरकः) "पृसृल्वः समभिहारे वुन्" इति समभिहारेणात्र साधुकारित्वमुच्यते। तथा च वार्त्तिकम्—[साधुकारिणि वुन्विधानमिति]। पुरः सरतीति (पुरः सरः)। "पुरोऽग्रतोऽग्रेषु सर्त्तेः" इति टः। (अग्रेसर इति) "तत्पुरुषे कृति" इति सप्तम्या अलुक्। अत्र न्यासे अग्रे इत्येकारान्तत्वं निपातनादित्युक्तम्। अग्रं सरति अग्रेण सरतीत्यादावपि एकारान्तत्वम्। एवं हि 'सवरुणावरुणाग्रसरो रुचा, 'आयोधनाग्रसरतां त्वयि वीर याते' इत्यादयः प्रयोगाश्चिन्त्याः स्युः। पूर्वः सरतीति (पूर्वसरः)। *पूर्वे कर्त्तरि* इति कर्तृवाचिनि पूर्व्वशब्दउपपदे सर्त्तेष्टः। कर्तुरन्यत्राणेव। पूर्व्वदेशं सरतीति (पूर्वसारः)। (उदासारी, प्रत्यासारी)। ['उत्प्रतिभ्यामाङि सर्त्तेरुपसंख्यानम्'] इति णिनिः। (परिसारी) "सम्पृच" इत्यादिना घिनुण्। सरणः। "जुचङ्क्रम्य" इत्यादिना युच्। (सृमरः)। "सृघस्यदः क्मरच्" इति क्मरच्। (सृत्वरः) "इण्नशजिसर्त्तिभ्यः क्वरप्" इति क्वरप्। (सृत्वरी) "टिड्ढाणञ्"इति ङीप्। (सस्रिः) "भाषायां धाञ्कृसृगमिजनिभ्यः" इति किकिनोरन्यतरः। लिड्वद्भावाद् द्विर्वचनम्। (सारः)। कालान्तरस्थायी। "सृ स्थिरे०" इति कर्त्तरि घञ्। स्थिरादन्यत्र भावादौ घञि (सारः)। अयमुत्कर्षे पुंल्लिङ्गः। न्यायादनपेते नपुंसकलिङ्गः। (अतिसारो व्याधिः)। विसारो मत्स्यः। सारो बलं) "व्याधिमत्स्यबलेषु" इति घञ्। अस्थिरार्थमिदं वचनम्। (अतीसारः) "उपसर्गस्य घञ्यमनुष्ये" इति दीर्घः। अतीसारोऽस्यास्तीति (अतीसारकी) "वातातीसाराभ्यां कुक्च" इति मत्वर्थे इनिः कुगागमश्च (प्रसारः। आसारः) भावे "अकर्त्तरि च कारके संज्ञायाम्" इति घञ्। 'रुद्धोरुदन्तमुसलप्रसरं निषेवे' इति माघे बाहुलकादप्। एवं (निसर) इत्यपीत्यात्रेयः। (उपसरो) गवांस्त्रीगवीषु पुंगवानां गर्भाधानाय प्रथममुपसरणमुच्यते। "प्रजने सर्त्तेः" इत्यप्। (परिसरः। अपसरः) *पुंसि संज्ञायाम्* इति करणाधिकरणयोर्घः। (परितः सरणं परिसर्या) "इच्छा" इत्यत्र ['परिचर्यापरिसर्यामृगया'] इति भावे शे यकि गुणः। (वैसारिणो मत्स्यः)। *विसारिणो मत्स्ये* इति विसारिन्शब्दान्मत्स्यवृत्तेः स्वार्थेऽण् प्रत्ययः। "इनण्यनपत्ये" इति प्रकृतिभावः। अस्मादेव विसारिण इति निर्देशादण्, तत्सन्नियोगेन णिनिः। ग्रहादित्वाण्णिनिरित्यात्रेयः। एवं हि पृथक्प्रयोगार्हः स्यात्। ग्रहादिषु न दृश्यते, प्रतिषिद्धश्च पदमञ्जर्यां पृथक्प्रयोगः। पृथक्प्रयोगमसहमानेनैव न्यासकारेणापि ग्रहादित्वाण्जिनिरित्युक्त्वा अत एव निपातनादित्युक्तम्। निपातनं च प्रत्ययसन्नियोगेनैव। (सृणिका)। "सर्त्तेर्नुट् च" इति इकन् प्रत्ययः, नुडागमः। (सार्थः)। "सर्त्तेर्णिच्च" इति थन्प्रत्ययः णित्त्वाद्वृद्धिः। (सर्वः) 'सर्वपृष्ठ" इत्यादिना वन्, अत्र वक्तव्यं तत् स्वतावुक्तम्। (सरयूः) "सर्त्तेरयूः" (इत्ययूः। सरय्वां भवं, सारवम्) "दाण्डिन' इत्यादिना अणप्रत्यये युशब्दलोपो निपात्यते। (सरणिः) "अर्तिसृधृनृति" इत्यादिना अनिप्रत्ययः। (सरित्) "हृसृरुहि" इत्यादिनेतिप्रत्ययः। (सृणिः)। "सृपृषिभ्यां क्किप् च" इति निप्रत्ययः। (सरः) असुन्। (सरसी)। "वर्तमाने पृषद्बृहन्महत्जगत्सरसां शतृवच्च" इति शतृवद्भावात् ङीप्। (सारङ्गः) "सृवृङोर्वृद्धिश्च" इति अङ्गप्रत्यये वृद्धिः। (अद्भ्यः सृते इति अप्सरा) "अङ्गिराअप्सराः" इत्यसुनि निपात्यन्ते। उणादिवृत्तौ त्वप इति सौत्रो धातुः, अस्मात् सरसुन् प्रत्यय इत्युक्तम्। बहुष्वप्सरस इति बहुवचनं प्रायिकम्। तदुक्तम्। अप्सरःसुमनस्सिकतावर्षाणामिति बहुत्वं प्रायिकम्। अप्सराइव आचरति (अप्सरायते)। "कर्त्तुः क्यङ् सलोपश्च" इति क्यङि सलोपश्चेति। तत्र विभाषाग्रहणे व्यवस्थितविभाषाश्रयत्वात् इह नित्यं सलोपः। उक्तं च"—ओजसोऽप्सरसो नित्यं, पयसस्तु विभाषया" इति। (सारथिः)। "सर्तेर्णित्" इति

आर्थिनृप्रत्यये णित्त्वात् वृद्धिः ॥ ९१७ ॥

ऋ गतिप्रापणयोः ॥ (ऋच्छति) । "पाघ्रा" इत्यादिना शिति ऋच्छादेशः । (आर । आरतुः । आरिथ आरिव) लिटीत्यधिकृत्य "ऋच्छत्यृताम्" इति गुणः । तत्र हि-ऋ इत्यपि सवर्णदीर्घेणार्त्तिर्ऋकारान्ताश्च निर्दिश्यन्ते । वृद्धिविषये पूर्वविप्रतिषेधेन वृद्धिः । तत्र गुणवृध्योः "द्विर्वचनेचि" इति स्थानिवत्त्वात् ऋशब्दस्य द्विवचने अभ्यासस्योरदत्वे हलादिशेषे च "अत आदेः" इति दीर्घे पुनरुत्तरखण्डस्य गुणवृध्योः सवर्णदीर्घः । वलादौ च क्रादिनियमादिट्, थलि तु "ऋतो भारद्वाजस्य" इति नियमं बाधित्वा "इडत्यर्तिव्ययतीनाम्" इति इट् । (अर्ता । अरिष्यति) । "ऋद्धनोः स्ये" इति इट् । (ऋच्छतु । आर्च्छत् । ऋच्छेत । आशिषि अर्यात्) । "गुणोर्त्तिसंयोगाद्योः" इति गुणः । सर्वत्रार्त्तिग्रहणेषु भौवादिकजुहोत्यादिकयोर्द्वयोरपि ग्रहणमिति स्थितं व्याख्यानेषु, अत एवार्तीत्यविकरणनिर्देशः कृतः । भौवादिकग्रहणे ऋच्छतीति वक्तव्यं, जौहोत्यादिकस्य तु शपः श्लौ इयर्त्तीति । "अर्त्तिपिपर्त्योश्च" इति अत्र "श्लौ" इत्यधिकारात् भौवादिकस्य न सम्भवः । "सर्त्तिशास्त्यर्तिभ्यश्च" इत्यङ्विधावपि शासिना अविद्यमानशपा साहचर्यात् सर्त्यर्ती अप्यविद्यमानशपौ गृह्येते इति ह्युक्तं, तेनास्य लुङि (आर्षीत् । आर्ष्टाम्) इत्यादि भवति । (अरिरिषति) "स्मिपूङ्रञ्ज्वशां सनि" इति इट् । अत्र ऋ इति भौवादिकजौहोत्यादिकयोरपि ग्रहणम् "ऋच्छत्यृताम्" इतिवत् । अत्र द्विर्वचनात् पूर्वं गुणे रपरत्वे "अजादेर्द्वितीयस्य" इति रिशब्दस्य द्विर्वचनं, "द्विर्वचनेऽचि" इति नात्र स्थानिवत्त्वम् । "सन्यङोः" इत्यस्य षष्ठ्यन्तत्वात् । न च कार्यो निमित्तत्वेनाश्रीयते । अत्र हरदत्तः । यत्र सप्तम्या निमित्तं श्रुतं तन्निमित्तं न तु तद्भावितामात्रमिति । (अरार्यते) "सूचिसूत्रि" इत्यादिना यङि "यङि च" इति "गुणे नन्द्रा" इति निषेधस्य यकारपररेफस्य प्रतिषेध इति बाधात् रेफादेर्द्विर्वचने "दीर्घोऽकितः" इति दीर्घः । (अरर्त्ति । अरियर्त्ति) ऋशब्दस्य द्विर्वचने अभ्यासस्योरदत्वे हलादिशेषे "ऋतश्च" इति रुग्रीगृरिकः । उत्तरखण्डस्य गुणः । अत्र रीग्रिकोर्न रूपभेदः । उभयत्रापि "अभ्यासस्यासवर्णे" इतीयङा भाव्यत्वात् । ईट्पक्षे (अरर्तीति) । तसादौ ङित्वादुत्तरखण्डस्य न गुण इति (अर्ऋतः । अरियृतः) इत्यादि । झौ ऋशब्दस्य द्विर्वचने अभ्यासस्य कार्ये रुकि च 'अदभ्यस्तात' इति झेरद्भावे परखण्डस्य यणि "रोरि" इति रेफस्य लोपे "ढ्रलोपे" इति दीर्घे आरतीति भवति । "पूर्वत्रासिद्धे न स्थानिवत्" इति निषेधात् "रोरि" इति लोपे "अचः परस्मिन्" इति न यणः स्थानिवद्भावः । रिग्रीकोर्ऋकारमाश्रित्य इयङि पश्चादद्भावमाश्रित्य तस्य यणि अरिय्रति इति भवति । न च "लोपो व्योर्वलि" इति इति यलोपप्रसङ्गः । "अचः परस्मिन्" इति यणः स्थानिवत्त्वात् । न चास्ति यलोपं प्रति न स्थानिवदिति, [स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत्] इति वचनात् । (अरर्षि । अरियर्षि । अरर्मि । अरियर्मि । अर्ऋवः । अर्ऋमः । अर्युवः । अर्युमः । अररांचकार । अरियरांचकार । अररिता । अरियरिता अररिष्यति । अरियरिष्यति । अरर्त्तु । अरियर्त्तु । अर्ऋहि । अरियृहि) ङित्वान्न गुणः । (अरराव । अरियराव) आटि पित्वात् गुणः । लङि अभ्यासस्य रुकि परस्य गुणे तिप्सिपोर्हल्ङ्यादिलोपे रेफस्य विसर्जनीये अङ्गस्याटि आटः रिग्रीकोरियङि (आरियः आर्ऋताम् । आरियृताम्) । बहुवचने "जुसि च" इति गुणे (आररुः । आरियरुः) । लिङि । अर्ऋयात् । अरियृयात् । आशिषि आरियात) "रिङ् शयग्लिङक्षु" इति रिङादेशे "रो रि" इति लोपे ढ्रलोपदीर्घः । रिग्रीकोरियङि परस्य रिङादेशे तस्य स्थानिवत्त्वात् यलोपाभावे (अरिय्रियात्) । यलोपविधिं प्रति न स्थानिवदिति तु न भवति तस्य लोपाजादेशविषयत्वात् । "गुणोर्ति" इति गुणः श्तिपा निर्देशात् न भवति । लुङि (आरारीत् । आरियारीत्) इत्यादि । (अर्पयति,) "अर्त्तिह्री" इति पुक् । "पुगन्तलघूपधस्य" इति गुणः । (मा भवानर्पिपत्) । "उर्ऋत्" इति पक्षे ऋकारो गुणापवादः । णिलोपस्य "द्विर्वचनेऽचि" इति स्थानिवत्त्वात् पिशब्दस्य द्विर्वचनम् । ऋकाराभावपक्षे गुणे

"न न्द्राः" इति रेफस्य द्विर्वचननिषेधात् पिशब्दद्विर्वचने (मा भवानर्पिपदिति भवति)। शितपा निर्देशाद्यङ्लुकि पुगभावात् (अरारयतीति भवति । रिक्कीक्पक्षे अरियारयतीति । उपाच्छेति)। "उपसर्गादृति धातौ" इति ऋवर्णान्तादुपसर्गात् ऋकारादौ धातौ परे पूर्वपरयोर्वृद्धिः । सा च ऋवर्णस्थानिका इति रपरत्वम् । अर्यः । "अर्यः स्वामिवैश्ययोः" इति यति निपात्यते । स्वामिवैश्याभ्यामन्यत्र "ऋहलोर्ण्यत्" इति ण्यत् । (आर्यः) स्त्रियाम् (आर्या । अर्याणी)। "आर्यक्षत्रियाभ्यां वा" इति ङीषानुकौ । पक्षे विना पुंयोगं स्वार्थे एवायं विधिरिति वृत्तिः, तेन पुंयोगेन नित्यं ङीष् भवति । आरी । अरित्रम्)। "अर्त्तिलू" इति करणे इत्रः । (आरा) प्रतोदः । (आरा) शस्त्रिकायामिति भिदादिपाठात् अङ् वृद्धिश्च । (अन्यत्रार्त्तिः)। "उपसर्गात्" इति वृद्धिः । (ऋणम्)। "ऋणमाधमर्ण्ये" इति निष्ठानत्वं निपात्यते । अधमऋणे (अधमर्णः) अत एव निर्देशात् सप्तम्यन्तेन समासः । अधमम्रृणमस्येति बहुव्रीहिर्वा, निष्ठान्तस्य परनिपातः । अत एव निर्देशात् ण्यभावआधमर्ण्यम् । इदं च कालान्तरदेयविनिमयोपलक्षणार्थं, तेन (उत्तमर्णः) इत्यपि भवतीति वृत्तिः । "धारेरुत्तमर्णे" इति निपातनात् वा पूर्ववत् समासः । प्रगतं द्रवृद्धं वा ऋणं (प्रार्णं) "प्रादयो गताद्यर्थे प्रथमया" इति समासः । प्रगतं प्रवृद्धं वा ऋणं (प्रार्णं) "प्रादयो गताद्यर्थे प्रथमया" इति समासः । "प्रवत्सतरकम्बलवसनार्णदशानामृणे" इति वृद्धिः । (ऋणार्णम्)। ऋणापाकरणार्थं यदुपादीयते तदुच्यते । षष्ठीसमासः । (दशार्णो) देशो नदी च । विशेषणसमासः । यथा कथञ्चित् व्युत्पाद्य ऋणदशभ्यां वृद्धिः । दशार्णमपहाय सर्वे बहुव्रीहयो वा, लिङ्गन्तु विशेषणायत्तं द्रष्टव्यम् । (वत्सतरार्णं कम्बलार्णम् ,) आधमर्ण्यादन्यत्र ऋतः । (सुखेन ऋतः सुखार्तः)। 'ऋते च तृतीयासमासे' इति वृद्धिः । अन्यत्र (परमर्त्तः, आर्त्तः) इत्यत्राङ्ग्युपपदे "उपसर्गादृति" इति वृद्धिः । आत्रेयस्तु सौत्राद्धतिरितचि प्रज्ञाद्यणि व्युत्पादयति । अन्यथापि सिद्धे कोऽयं यत्न इति न जानीमः । (अरुः)। अर्तीण्वपियजितनिधनितृपिभ्यो निदित्युसिप्रत्ययः । (अरुष्करोति)। "अरुर्मनः" इति च्विप्रत्यये सलोपः । "च्वौ च" इति दीर्घः । (अर्शः)। अर्तेर्गुणः "शुड् च" इत्यसुन्प्रत्ययः शुडागमश्च, अर्शोऽस्यास्तीति (अर्शसः)। "अर्शआदिभ्योऽच्" इति अच् मत्वर्थे । (अररुः) असुरविशेषः । अर्त्तेररुरित्यरुः । (अर्भो बालः)। "अर्त्तिहृभ्यां भन्" इति भन् । (अर्भकः) । स्वार्थे कन् । (अर्थः)। "उषिकुषिगर्त्तिभ्यस्थन्" इति थन् (ऊर्मिः)। "अर्त्तेरु च" इति मिन्प्रत्ययः उकारश्चान्तादेशः । (अर्वा)। "स्नामदिपद्यर्त्तिपृशकिभ्यो वनिप्" इति वनिप् । (अर्वन्तौ)। *अर्वणस्त्रसावनञः* इति असौ तृ इत्यादेशः, ऋदित्त्वात् "उगिदचाम्" इति नुम् । अर्वन्तीत्यत्र ङीब् भवति, अनञिति वचनात् अनर्वाणावित्यत्र नायमादेशः । (निरृथः साम)। अर्त्तेर्निरीति निर्युपपदे थन् प्रत्ययः । अरणिः । 'अर्त्तिसृधृसरि' इत्यादिना अनिप्रत्ययः । (अरुणः)। "अर्त्तेश्च" इति उनन्प्रत्ययः । (ऋतुः)। "अर्त्तेश्च" इति तुन्प्रत्ययः । किदिति तत्रानुवृत्तेर्न गुणः । ऋतुः प्राप्तोऽस्य (आर्त्तवं पुष्पम्)। "ऋतोरण्" इति "तदस्य प्राप्तम्" इत्यस्मिन् विषये अण् प्रत्ययः । ऋतुर्देवतास्य (ऋतव्यम्)। "वाय्वृतुपित्रुषसो यत्" इति "सास्य देवता"इति विषये यत्, "ओर्गुणः" "वान्तो यि प्रत्यये" इत्यवादेशः । (अररं कवाटम् । "अर्त्तिकमि" इत्यादिना अरप्रत्ययः । (इरिणम् उषरम्,) अर्त्तेः किदिनश्चेतीन् प्रत्ययः । किद्वचनान्न गुणः, धातोरिकारादेशश्च । अर्णः अर्तेर्नुडित्यसुन्प्रत्ययः नुडागमश्च । (अर्णवः)। "अर्णसो लोपश्च" इति मत्वर्थीये वप्रत्यये सलोपः ॥ ९१८ ॥

गॄ घृ सेचने ॥ (गरति । जगार । जरतुः । जगर्थ । जघ्रिव । गर्त्ता । गरिष्यति । गरतु । अगरत् । गरेत् । आशिषि घ्रियात्)। रिङ् । (अगार्षीत् । जिगीर्षति) "अज्झन०" इति दीर्घे ऋत इत्वे रपरे "हलि च" इति दीर्घः । (जेघ्रीयते)। "रिङ् ऋतः" इति रीङ् । (जर्गर्त्ति । गारयति । अजीगरत् । गर्त्तः)। "हसिमृग्रिण्वमि" इति तन् (घरति घृतं घृणा घर्मे)

इत्येव विषय इति "तृज्वत्क्रोष्टुः" इत्यत्रोक्तं भाष्ये । गॄ इति दीर्घान्तस्तुदादौ निगरणार्थः । क्र्यादौ शब्दार्थः । ज्ञानार्थश्चुरादौ । घृ क्षरणदीप्त्योरिति जुहोत्यादौ । घृ प्रस्रवण इति चुरादौ ॥ ९२० ॥

ध्वृ हूर्च्छने ॥ हूर्च्छनं कौटिल्यं भ्रातृव्यमेव तदपध्वरतीत्यादौ हिंसायामपि दृश्यते । (ध्वरतीत्यादि) स्मृवत ॥ ९२१ ॥

स्रु गतौ ॥ (स्रवति । सुस्राव । सुस्रुवतुः) उवङादेशोऽगुणवृद्धिविषये । (सुस्रोथ । सुस्रुव) क्र्यादिषु पाठादनिट्त्वं थल्यपि पुरस्तात् प्रतिषेधकाण्डारम्भसामर्थ्यात् भारद्वाजनियमं बाधित्वाऽयमेव निषेधः प्रवर्त्तते । द्रवतावयमर्थः प्रपञ्चयिष्यते (स्रोता । स्रोष्यति । स्रवतु । अस्रवत् । स्रवेत्) आशिषि (स्रूयात्) "अकृत्सार्वधातुकयोः" इति दीर्घः । असुस्रुवत् । "णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्" अत्र च लघूपधगुणादन्तरङ्गत्वादुवङ् । सुस्रूषति "इको झल्" इति सनः कित्वान्न गुणः । "अज्झन०" इति दीर्घः । (सोस्रूयते । सोस्रोति) "उतो वृद्धिर्लुकि हलि"इति न भवति 'नाभ्यस्तस्य'इत्यनुवृत्तेः (सोस्रुतः । सोस्रुवति । स्रावयति) "बुधयुध०" इत्यादिना नित्यं परस्मैपदम् । (असुस्रवत् । असिस्रवत्) "स्रवतिशृणोति" इत्यादिना अभ्यासस्येकारः । (आस्रावः संस्रावः) । "श्याद्व्यध०" इत्यादिना आभ्यासुपसृष्टाद् अस्मात् णः । (प्रस्रावी) "प्रे लप"इत्यादिना विनुण् । आत्रेयस्तु प्रे लपस्रु इति पाठं प्रतिपद्य सर्तेः प्रसारीत्युदाजहार । (प्रस्रावः) "प्रे द्रुस्तुस्रुवः" इति घञ् । स्रवत्यस्मात् घृतमिति स्रुक् । "स्रुवः कचकिचौ"इति कचकिचौ प्रत्ययौ, इकारककारावनुबन्धावेतौ भीमादित्वादपादाने । (स्रोतः) । "स्रुरीभ्यां तुट् च" इति असुन् तुडागमश्च । अत्र स्वामी तालव्यादिममुं पपाठ श्रु श्रवणइति । एतत्तु दन्त्यादिरिति न्यासकारादयः । सर्वे विरुद्धमेव पठन्ति । श्रोत्रं श्रुतिः श्रवणमित्यादौ च लोकप्रसिद्धोऽर्थो न सङ्गच्छत इति यत्किञ्चिदेतत् । अत्र मैत्रेयः । सु इत्यरेफमपि धातुं पठित्वा सवतीत्युदाजहार । बोपदेवोऽपि अमुमेव पाठमाश्रित्याह । गतौ तयोश्च सवतिर्द्विरुक्त्यैकस्य सोऽन्यस्य ष इति । अयमस्यार्थः । सु गतौ, षु प्रसवैश्वर्ययोश्चेति चकारेणैव गतवगतावपि सवतिः सिध्यति। सु गतौ षु प्रसवैश्वर्ययोरिति सवतेर्द्विः पाठो गत्यर्थस्याषोपदेशत्वार्थ इति । तत् षोपदेशलक्षणस्याव्यापकत्वप्रसङ्गात् अयुक्तमिति पुरुषकारेण दूषितम् ।

अपरे पुनः शु स्रु इति तालव्यादिमाद्यं पठन्ति । तद्युक्तम् । यदुणादौ 'शुवादीनां दीर्घश्च" इति शवतेः क्नि शूरशब्दो व्युत्पाद्यते । तथा शाकटायनेनापि शु प्रु द्रु स्रु गताविति पठ्यते ॥ ९२२ ॥

षु प्रसवैश्वर्ययोः॥ प्रसवोऽभ्यनुज्ञा इति पुरुषकारे । (सवति। सुषाव । सुषुवतुः । सुषोथ। सुषुविव । सुषुविम) क्रादिनियमादिट् । थलि तु भारद्वाजनियमाद्विकल्पः । गुणवृद्ध्योरविषये उवङ् । (सोता) इत्यादि पूर्ववत् "स्तुसुधूञ्भ्यः परस्मैपदेषु" इति सिच् । इड्विधौ स्तौतिना लुग्विकरणेन साहचर्यान्न सूतेर्ग्रहणं नाप्यलुग्विकरणेन धूञा परेण साहचर्यात् सवतिसुवत्योर्द्वयोरपि । किन्तु पूर्वपराभ्यां ङिद्भ्यां साहचर्यात् स्वादेर्ङितो ग्रहणमिति नास्येडागमः । अत एव तत्र न्यासे सु इति षु अभिषवे इत्युक्तं, तथात्रेयमैत्रेयावपि तमेव सेटमुदाहरतां नेतरौ । न च निरनुबन्धकपरिभाषया इड्विधौ सवतेरेव ग्रहणं युक्तमिति वाच्यम् । यतस्तदपेक्षया साहचर्यस्यैव प्राबल्यं, तथा "सत्सूद्विष०" इत्यत्र वृत्तौ सु इति द्विषा साहचर्यात् सूतेरादादिकस्य ग्रहणमिति दर्शितम् । वर्द्धमानस्तु साहचर्यनिरनुबन्धकपरिभाषयोरनित्यतामाश्रित्य लुग्विकरणत्वात् सौतिमपहाय सुवतिसुनोत्योर्द्वयोरपि ग्रहणमिति द्वयोरपीटमाह । तन्मते असावीदिति भाव्यम् । अन्येषां त्वसौषीदिति । (सुसूषति) "स्तौतिण्योरेव०" इत्यषत्वं, (सोषूयते । सोषोति) "उतो वृद्धिः" "नाभ्यस्तस्य"इत्यनुवृत्तेर्न भवति । कर्मणि (सूयते । असावि) असोषातामित्यादि, कर्मकर्त्तरि "अचः कर्मकर्त्तरि" इति तशब्देऽपि पक्षे

सिचो विधानादसोष्टेत्यपि भवति। स्वादिषु कर्मकर्त्तरि चिण्वत्पक्षे साविष्यतइत्याद्यपि द्रष्टव्यम्। (सव्यम्) "अचो यत्" इति यति गुणे "वान्तो यि" इत्यवादेशः। "आसुयु-वपि" इति ण्यद्विधौ सुनोतेर्ग्रहणमिति वृत्तिकारहरदत्तादयः। एवं "सुयजोर्ङ्वनिप्" इत्य-त्रापि (सुत्वा। सुतम्) ॥ ९२३ ॥

श्रु श्रवणे (शृणोति। शृणुतः। शृण्वन्ति। शृणोषि। शृणोमि। शृणुवः शृण्वः। शृणुमः शृण्मः)। "श्रुवः शृ च" इति श्नुप्रत्ययः। शृभावश्च धातोः। श्नोः शित्त्वात् सार्वधातुकत्वात् अपित्त्वात् ङित्त्वान्न गुणः प्रकृतेः। स्वस्य तु भवत्यकृङिति (शृण्वन्ति) इत्यत्रान्तादेशे *हुश्नुवोः सार्वधातुके* इति यणादेश उवङोऽपवादः। सूत्रार्थस्तु जुहोतेः श्नुप्रत्ययान्तस्या-नेकाचोऽङ्गस्यासंयोगपूर्वो य उकारः तस्याजादौ सार्वधातुके यणिति श्नोरुकारस्य च "लोप-श्चास्यान्यतरस्यां म्वोः" इति पक्षे लोपः। (शुश्राव। शुश्रुवतुः। शुश्रोथ। शुश्रुव। शुश्रुम) पित्सु वृद्धिगुणयोरचावौ, अन्यत्राजादावुवङ्। क्रादिषु पाठात् स्रवतिवत् थल्यप्यनिट् (श्रोता। श्रोष्यति। शृणोतु। शृणु) "उतश्च प्रत्ययादसंयोगपूर्वात्" इति हेर्लुक् (शृण-वानि) आटि गुणावौ, (अशृणोत्। अशृणुताम्। शृणुयात्। आशिषि श्रूयात्) "अकृत्सा-र्वधातुकयोर्दीर्घः"। अश्रौषीत्। शुश्रूषते) "ज्ञाश्रुस्मृदृशां सनः" इति तङ्। (प्रतिशुश्रूषति आशुश्रूषति) इत्यत्र "प्रत्याङ्भ्यां श्रुवः" इति सन्निमित्तस्य तङो निषेध इह प्रत्याङोरुप-सर्गयोर्ग्रहणात् (देवदत्तं प्रतिशुश्रूषते। भाष्यादाशुश्रूषते) इत्यत्र तङेव भवति। अत्र हि प्रत्याङौ कर्मप्रवचनीयौ *लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः* *आङ् मर्यादा-वचने* इत्येकसंज्ञाधिकारात् कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञा बाध्यते। लक्षणं चिह्नं कं चित् प्रकारं प्राप्त इत्थम्भूतस्तस्याख्यानमित्थम्भूताख्यानं, भागः स्वीक्रियमाणोंशः, उक्ता वीप्सा, विना तेनेति मर्यादा, सह तेनेत्यभिविधिः, वचनग्रहणादभिविधिरपि गृह्यते। तत्र प्र-तिशुश्रूषतइत्यस्य देवदत्तः शुश्रूषया लक्षणमित्यर्थः, देवदत्तसकाशात् शुश्रूषत इति यावत्, भाष्यादाशुश्रूषत इत्यस्य विना भाष्येण सह वा तेन शुश्रूषत इत्यर्थः। (शोश्रूयते। शोश्रवीति। शोश्रोति) "उतो वृद्धिः" "नाभ्यस्तस्य" इत्यनुवर्त्तनात् नेत्युक्तं, (श्रावयति। अशुश्रवत्। अशिश्रवत्) णौ कृतस्य स्थानिवत्त्वात् श्रुशब्दस्य द्विर्वचनं "स्रवतिशृणोति" इति पक्षे अभ्यासस्येत्वं, (संशृणुते। संशृण्वाते। संशृण्वते। संशृण्वे। संशृणुवहे। संशृण्वहे। संशु-श्रुवे। संश्रोता। संश्रोष्यते। संशृणुताम्। समशृणुत। संशृण्वीत। आशिषि। संश्रोषीष्ट। समश्रोष्ट) झलि सिज्लोपस्य पूर्वत्रासिद्धत्वात गुणे ह्रस्वाभावान्न सिज्लोपप्रसङ्गः। कर्मकर्तरि स्रवतिवत् (शुश्रुवान्) "भाषायां सदवसश्रुवः" इति लिट् क्वसुः। अयं च लिट् लुङ्विषयः पा-क्षिकः। क्वस्वादेशश्च नित्यः। तेनानेन लिटा मुक्ते यथायोगं लुङ्लङ्लिटो भवन्तीति। सर्वं चै-तत् सीदतावुपपादितम्। भसंज्ञायां सम्प्रसारणं सवर्णदीर्घं बाधित्वा धातुवर्णत्वादुवङि (शुश्रुवुष इत्यादि) पदत्वे "वसुस्रंसु" इत्यादिना दत्वे शुश्रुवद्भ्यामित्यादि (देवदत्ताय गां प्रतिशृणोत्या-शृणोति वा) याचितः सन् तस्मै ददामीति प्रतिजानीत इत्यर्थः। *प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता* प्रत्याङ्भ्यामुपसृष्टस्य शृणोतेः प्रयोगे प्रतिशृणोति आशृणोति क्रियापेक्षया पूर्वस्याः क्रियायाः कर्ता सम्प्रदानमिति देवदत्तस्य सम्प्रदानत्वाच्चतुर्थी। प्रत्याङ्भ्यामुपसृष्टः शृणो-तिः प्रतिश्रवणार्थ इति अर्थात् पूर्वा क्रियेह याचनं, (निश्रावी) रक्षश्रुवपशां नाविति ग्रहादिपा-ठाण्णिनिः। (विश्रावः) "वौ क्षुश्रुवः" इति घञ् श्रूयतेऽनया इति(श्रुतिः)। "श्रुयजिस्तुभ्यः करणे" इति क्तिन् स्त्रियां, ल्युटोऽपवादः। अस्त्रियां श्रूयते अनेनेति (श्रवणं श्रोत्रं) यदा नक्षत्रवच-नस्तदा श्रवणेन युक्ता रात्रिरिति विगृह्य "नक्षत्रेण युक्तः कालः" इति विहितस्याणः "संज्ञायां श्रवणाश्वत्थाभ्याम्" इति लुपि (श्रवणा रात्रिरिति) भवति। अत्र "लुपि युक्त-वद्व्यक्तिवचने" इति प्रकृत्यर्थलिङ्गं न भवति, *विभाषा फाल्गुनीश्रवणा* इति निर्देशात्। लुबिति लुप्संज्ञया लुप्तप्रत्ययार्थ उच्यते। तत्र युक्तवद्व्यक्तिवचने भवत इति सूत्रार्थः।

युक्तः प्रकृत्यर्थः प्रत्ययार्थेन सम्बद्ध इति कृत्वा, व्यक्तिर्लिङ्गं, वचनमेकत्वादि। यदा श्रवणाशब्दः पौर्णमासीवचनस्तदा श्रवणा पौर्णमासी अस्मिन्निति विगृह्य "विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः" इति अण्लुकोः कृतयोः (श्रावणः श्रावणिकः) इति भवति। (श्रवः) असुन्, विश्रवसोऽपत्यं (वैश्रवणः) रावणश्च। शिवादिषु विश्रवणं चेति पाठात् अपत्येऽणि तत्सन्नियोगेन विश्रवणरवणावादेशौ। श्रोत्रम्) ष्ट्रन्निति ष्ट्रन्। (श्रोणिः) "वहिश्रुश्रियुद्रुग्लाहात्वरिभ्यो नित्" इति नित् प्रत्ययः॥ ९२४॥

ध्रु स्थैर्ये॥ ध्रवति। दुध्राव। दुध्रुवतुः। दुध्रोथ। दुध्रविथ) क्रादिनियमादिट्, थलि भारद्वाजनियमादिड्विकल्पः। शेषं श्रवतिवत्। ध्रुव इति बाहुलकात्कः, यद्वा "ध्रुवमपाये" इति निर्देशात् साधुः, अयं तुदादौ गत्यर्थश्च। तस्मात् वा अचि (ध्रुवः) स हि कुटादिः॥९२५॥

दु द्रु गतौ (दवति। दुदाव। दुदुवतुः। दुदोथ। दुदविथ। दुदुविव। दोता) इत्यादि पूर्ववत्, लिटि क्रादिनियमादिट्, थलि भारद्वाजनियमादिड्विकल्पः। (दवः) पचाद्यच्। "दुन्योरनुपसर्गे" इति णविधौ दुनोतिरेव वृत्तौ गृहीतः। पदमञ्जर्यो नयतिना साहचर्यात् सानुबन्धकस्य दुनोतेरिह ग्रहणमिति। (संदावः) "समि युद्रुदुवः" इति घञ्। (दूनः) "ल्वादिभ्यः" इत्यत्र "दुग्वोर्दीर्घश्च" इति वचनान्निष्ठानत्वं दीर्घत्वं च (दूतः) "दुतनिभ्यां दीर्घश्च" इति तन् दीर्घश्च। दूतस्य भावकर्मणी (दूत्यम्) "दूतवणिग्भ्यां चेष्यत" इति यः। द्रुञ् उपताप इति स्वादौ (द्रवति। दुद्राव। दुद्रुवतुः। दुद्रोथ। दुद्रुव) क्रादिपाठादनिट्त्वम्। ननु "स्तुद्रुस्तुश्रुवां" निषेधस्य थलोऽन्यत्र चरितार्थत्वात् थलि भारद्वाजनियमाद्विकल्पः स्यात्। न चैवं शक्यते वक्तुं स्वादिव्यतिरिक्तानां ग्रहणं नियमार्थमिति, स्वादीनां तु भारद्वाजनियमप्राप्तस्यैवेटो निषेधार्थमिति। एवं हि क्रादिनियमात् थलोऽन्यत्र नित्यमिट् स्यात्। एवं तर्हि स्वादीनां ग्रहणं यः क्रादिनियमात् इट् प्राप्तो यश्चापि भारद्वाजनियमात् तयोर्द्वयोर्निषेधार्थं भविष्यति। न च मन्तव्यं येन नाप्राप्तिन्यायेन क्रादिनियमप्राप्तस्यैवेटो निषेधो युक्त इति। पुरस्तात् प्रतिषेधकाण्डारम्भादुभयोर्निषेध इति वृत्तावुक्तत्वात्। अथ वा सर्वेषां नियमार्थत्वेऽपि न दोषः। अनेन नियमेन यः क्रादिव्यतिरिक्तानां नित्यमिट् प्राप्तः सः "अचस्तास्वत्" इति निषिध्यते। यत्र चायं निषेधस्तत्रैव भारद्वाजनियम इत्यर्थादस्य नियमस्य क्राद्यष्टकव्यतिरिक्तविषयत्वलाभात् (द्रोता। द्रोष्यति) इत्यादि पूर्ववत्। लुङि "णिश्रिद्रुस्रुभ्यः" इति चङि (अदुद्रुवत्)। लघूपधगुणादन्तरङ्गत्वादुत्वादुवङित्युक्तं, (दुद्रूषति। दोद्रूयते। दोद्रोति। द्रावयति। अदुद्रवत्। अदिद्रवत्) "श्रवतिश्रृणोतिद्रवति" इत्यभ्यासस्येत्वम्। "बुधयुध" इत्यादिना नित्यं परस्मैपदम्। (सन्द्रावः) "समि युद्रुदुवः" इति घञ्। (उद्द्रावः) "उदि श्रयति" इत्यादिना घञ्। (प्रद्रावः) "प्रे द्रुस्तुस्रुवः" इति घञ् (हरिद्रुः। मितद्रुः। शतद्रुः) [द्रुप्रकरणे मितद्र्वादिभ्य उपसंख्यानम्] इति डुः। हरिद्रुणा प्रोक्तं छन्दोऽधीते (हारिद्रविणः)। "कलापिवैशम्पायनान्तेवासिभ्यश्च" इति प्रोक्तार्थे णिनिः। तदन्तात् "छन्दोब्राह्मणानि" इति नियमादध्येतृवेदितृप्रत्ययान्तमेवेत्युक्तं, तस्याणः "प्रोक्ताल्लुक्" इति लुक्। कलाप्यन्तेवासिनश्च।

हरिद्रुरेषां प्रथमस्ततश्छगलितुम्बुरू।
उलपेन चतुर्थेन कालापकमिहोच्यते॥

इत्युक्ताः। (द्रविणम्) "द्रुदक्षिभ्यामिनन्" इति इनन्। (द्रोणः) परिमाणादिः। "द्रुजुसिपण्यनि" इति नप्रत्ययः। स्त्रियां गौरादिपाठात् (द्रोणी। द्रोणस्य गोत्रापत्यं द्रौणायनः। द्रौणिः) "द्रौणपर्वतजीवन्तादन्यतरस्याम्" इति फक्। तदभावे "अत इञ्" (द्रोणं पचतीति द्रौणः, द्रौणिकः)। "तत् पचतीति द्रोणादण् च" इति अण्ठकौ (द्विद्रोणेन धान्यं क्रीणाति)। तृतीयाविधाने [प्रकृत्यादिभ्य उपसंख्यानम्] इति तृतीया॥ ९२६॥

जि ज्रि अभिभवे॥ अभिभवो न्यूनीकरणम्। (जयति। जिगाय) इत्यादि तिङन्ते

जि जयइतिवत्। पुनः पाठे फलं तत्रैवोक्तम् । (अध्ययनात्पराजयते) पराजिरत्र न्यूनीभावे वर्त्तते । अत्रायमकर्मकः। अध्येतुं ग्लायतीत्यर्थः । अत्र षष्ठ्यां प्राप्तायां *पराजेरसोढः* इति अध्ययनस्यापादानत्वात् पञ्चमी, परापूर्वस्य जयतेः प्रयोगे असोढः सोढुमशक्यो योऽर्थस्तत्कारकमपादानमिति सूत्रार्थः । (धनञ्जयः) "संज्ञायां भृतृवृजि" इति खचि मुमागमः पूर्वपदस्य । (शत्रुजित् । प्रजित्) "सत्सुद्विष" इत्यादिनोपसर्गेऽप्यनुपसर्गेऽपि सुबन्ते उपपदे क्विप् (जिष्णुः) "ग्लाजिस्थश्चग्स्नुः" इति ग्स्नुः (जयी) "जिदृक्षि" इति इनिप्रत्ययः (जित्वरः) "इण्नशजि" इति क्वरप् । त्रयोऽपि ताच्छीलिकाः (जैत्रम्) बाहुलकात् त्रण् प्रत्ययः । (जयति जिगाय । जिग्यतुः । जिगयिथ । जिगेथ । जिग्यिव । जेता । जेष्यति जयतु । अजयत् । जयेत् । आशिषि जीयात् । अजैषीत् । जिगीषति) "इको झल्" इति सनः कित्वान्न गुणः । "अज्झनगमाम्" इति दीर्घः (जेजीयते । जापयति । अजीजपत्) जु इति सौत्रो धातुः । (जवतीत्यादि) अयं गत्यर्थः । वेगवचन इत्यपरे । जवनम् । "जुचङ्क्रम्य" इत्यादिना युच् । (प्रजवशीलः, प्रजवी) "प्रजोरिनिः" इतीनिप्रत्ययः (जूः) "भ्राजभास" इत्यादिना क्विप् । तत्रैव जू इतिपाठात् क्विप्सन्नियोगेन दीर्घः (जवः । अप् । जूतिः) "ऊतियूतिजूति" इति निपातनात् क्तिनि दीर्घः । धयत्यादयोऽनुदात्ता उदात्तेतः । श्रयतिस्तूदात्तः । तथा ञित उभयपदिनः ॥ ९२८ ॥

ष्मिङ् ईषद्धसने ॥ एतदादयः स्वरन्त्यन्ता अनुदात्ता आत्मनेपदिनः (स्मयते । सिष्मिये । सिष्मियिढ्वे । सिष्मियिध्वे । सिष्मिये । सिष्मियिवहे) "अचि श्नुधातु" इत्यादिना इयङ् (स्मेता । स्मेष्यते। स्मयताम् । अस्मयत । स्मयेत । स्मेषीष्ट। अस्मेष्ट। सिष्मयिष्यते) "स्तौतिण्योरेव" इत्यषत्वम् । "स्मिपूङ्रञ्ज्वशां सनि" इतीट्, (सेष्मीयते । सेष्मेति) (मुण्डो विस्मापयते । असिष्मपत) "नित्यं स्मयतेः" इति हेत्वेककारके स्मयत्यर्थे आत्वं, तत्र पुक्, "भीस्म्योर्हेतुभये" इति हेत्वेककारयोर्नित्यं तङ् । अत्र भयग्रहणं चित्तविकारोपलक्षणं, तेन बिभेतेर्हेतुभये स्मयतेर्हेतुस्मय इत्यर्थो भवति । यदा तु हेतुत एव स्मयो न भवति तदात्वं न, नापि तङ्नियम इति (मुण्डो रूपेण विस्माययतीति भवति) । (स्मेरं) मुखम् । "नमिकम्पि" इति रः । स्मित्वा । स्मितम्) अयमनादरे चुरादिः ॥ ९२९ ॥

गुङ् अव्यक्ते शब्दे (गवते । जुगुवे । जुगुविषे । जुगुविवहे । गोता । गोष्यते । आशिषि गोषीष्ट । अगोष्ट । अगोष्यत । जुगूषते) "अज्झन" इति दीर्घः (जोगूयते) "अकृत्सार्वधातुकयोर्दीर्घः" (जोगोति गावयति । अजूगवत्) णौ कृतस्य स्थानिवत्त्वाद् गुशब्दस्य द्विर्वचनं, (गुत्वा । गुतः) "दुग्वोर्दीर्घश्च" इति अत्र निरनुबन्धस्य तौदादिकस्य गु पुरीषोत्सर्गइत्यस्य ग्रहणमिति नात्र निष्ठानत्वदीर्घत्वे भवतः । (गोत्रम्) "गुपचि" इत्यादिना त्रप्रत्ययः । (ब्राह्मणिगोत्रा) । "कुत्सितानि कुत्सनैः" इति समासः । वृत्तिविषये गोत्रशब्दः कुत्सनवचन इति चेलतावुक्तम् । "घरूप" इत्यादिना पूर्वपदस्य ह्रस्वः । (गवाक्षः) क्रमुकवचनः, पिनाकादिपाठादाकप्रत्ययः । (गवलं) माहिषं शृङ्गम् । बाहुलकादलप्रत्ययः । अनन्तरं धृञ् धारण इति पठ्यते । वर्धमानोऽमुं न सहते । यदाह केचित् धृञ् धारणइति पठन्ति । सोनार्षः (धरति । धरते) इति प्रयोगदर्शनात् तत्साहसमात्रमुपादीयते च "अनुपसर्गात् लिम्प" इत्यत्र न्यासपदमञ्जर्योर्धृञ् धारणइति । दैवेऽवधारणार्थः (धरति । धरते) इत्युभयमिति । अस्माभिस्तु मैत्रेयाद्यनुसारेण करणे प्रत्यये हरतेरनन्तरं पठित्वायमुदाहृतः ॥ ९३० ॥

गाङ् गतौ ॥ (गाते) त्रिष्वपि वचनेषु समानं, गा अ आतामिति स्थिते अत्रान्तरङ्गत्वाद्धातुशपोरेकादेशे सवर्णदीर्घे ङिद्वयत्र आकारोऽतः परो न भवतीति "आतो ङितः" इतीयादेशो न भवति । न च सवर्णदीर्घस्यादिवद्भावेनातः परत्वमकारस्य,[अन्तादिवद्भावो वर्णाश्रये न] इति स्थितत्वात् । न च मन्तव्यं 'वार्णादाङ्गं बलीय' इति सवर्णदीर्घात् प्रागेव

इयादेशः स्यादिति, यदयमङ्गात् परस्येत्यङ्गस्य न भवति । बहुवचने झस्य "आत्मनेपदेष्वनतः" इति अद्भावः, अत्राप्यनत इति पर्युदास आदिवद्भावेन न भवति, वर्णाश्रयत्वात् । न च मन्तव्यमित्यादि पूर्ववत् । (गासे । गाथे । गाध्वे) गै इति टेरत्वे वृद्धिः । धातुशपोरेकादेशस्यादिवद्भावात् "अतो गुणे" इति पररूपं वर्णाश्रयत्वादेव न भवति । "आतो लोप इटि च" इत्यत्र आर्द्धधातुकस्येटो ग्रहणात् नालोपप्रसङ्गः (जगे । जगाते । जगिषे । जगिध्वे । जगे । जगिवहे) "आतो लोप इटि च" इत्याल्लोपः (गाता । गास्यते) "गाङ्कुटादिभ्योऽञ्णिन्ङित्" इत्यत्र गाङिति इङादेशग्रहणात् अस्मात् परस्याञ्णितः प्रत्ययस्य ङित्वाभावात् न "घुमास्थागा" इतीत्वं, (गाताम् । गास्व । गै । गावहै । अगात । अगाताम् । अगात) झस्याद्भावः, (अगाथाः । अगे) । "आद्गुणः" (अगावहि । गेत । गेयाताम् । गेथाः । गेय) लिङः सलोपः, "आद्गुणः," यलोपः । आशिषि (गासीष्ट । अगास्त । अगासाताम् । अगासत । अगास्थाः । अगासि । जिगासते जेगीयते) "घुमास्थागा०" इतीत्वम् (गाययति । अजीगयत् । "गापोष्टक्" इत्यत्र न्यासपदमञ्जर्योरयं धातुरादादिक इति स्थितं, शपि पाठे चास्य प्रयोजनं नास्ति । अस्माभिस्तु क्वापि पठितव्य इति मैत्रेयाद्यनुसारेणेह पठितः । गायतीति गतं शब्दे शपि ॥ ९३१ ॥

कुङ् घुङ् उङ् ङुङ् शब्दे (कवते । चुकुवे । ववते । जुघुवे) इत्यादि गवतिवत् । (कोकूयत इत्यत्र) "न कवतेर्यङि" इति अभ्यासस्य चुत्वनिषेधः । यङीति वचनात् तल्लुकि (चोकोतीति) चुत्वं भवति । अयमव्यक्तशब्दइति न्यासे । तथा देवश्च अव्यक्तशब्दे कवतइति, अयमार्त्तशब्दे तुदादौ, शब्दमात्रे ऽदादौ, (अवते । अवसे । ऊवे । ऊविवहे) अत्रोवङि तस्य "द्विर्वचनेऽचि" इतिस्थानिवत्त्वात् उशब्दस्य द्विर्वचने वार्णादन्तरङ्गमपि सवर्णदीर्घात् पूर्वं बहिरङ्गोऽप्युवङि 'वार्णादाङ्गं बलीयः' इति पश्चात् सवर्णदीर्घः (ओता । ओष्यते । अवताम् । आवत । अवेत ।) आशिषि (ओषीष्ट मा भवानौष्ट । ऊषिषते) "इको झल्" इति सनः कित्वाच्च गुणः । "अज्झन०" इति दीर्घः, "सन्यङोः" इति षष्ठ्यन्तत्वात् षशब्दस्य द्विर्वचनम् । (आवयति । मा भवानवीवत्) वृद्ध्यावौ चङि णेर्लोपे "णौ चङि" इति ह्रस्वे "चङि" इति द्विर्वचनं, णिलोपस्य "द्विर्वचनेऽचि" इति स्थानिवत्त्वात् द्वितीयस्यैकाचो विशब्दस्य द्विर्वचनम् । (ङवते । जुङुवे) इत्यादि गवतिवत् ॥ ९३६ ॥

च्युङ् ज्युङ् प्रुङ् प्लुङ्गतौ ॥ (च्यवते । चुच्युवे । चुच्युविषे । चुच्युविध्वे । चुच्युवे) । "अचि श्नुधातु०" इति उवङ् । (च्योता । च्योष्यते । अच्यवत । च्यवेत । च्योषीष्ट । अच्योष्ट । चुच्यूषते) । "इको झल्" इतिकित्त्वे "अज्झन०" इति दीर्घः । (चोच्यूयते । चोच्योति । च्यावयति । अचुच्यवत् । अचिच्यवत्) । "स्रवतिशृणोति" इत्यादिना अभ्यासस्येत्वम् (च्यवनम्) चलनार्थत्वात् युच् (च्योत्रम्) बाहुलकात्त्रण् । (ज्यवत) इत्यादि च्यवतिवत् । अत्र नन्दी जु इत्युकारं पठति, तत् जु इति सौत्रो धातुरिति वृत्तिन्यासपदमञ्जर्यादिष्वभिधानादनार्षमिव प्रतीयते (प्रवते । पुप्रुवे । प्लवते । पुप्लुवे) इत्यादि गवतिवत् । अत्र मैत्रेयः । क्लुङ् इत्येके । (क्लवते) इत्यादि । (क्लुब इति विक्लुब इति च) बवयोरभेदात् द्रष्टव्यम् । क्रुङ् इति क्वचित्पठ्यते ॥ ९३९ ॥

रुङ् गतिरेष (१)णयोः ॥ (रवते । रुरुवे) इत्यादि, गवतिवत् । (रावयति । अरीरवत्) "ओः पुयण्जि" इति यणपरत्वादभ्यासस्येत्वे दीर्घः । रु शब्दे इत्यदादौ । अस्यैव निरनुबन्धकस्य "उपसर्गे रुवः" "विभाषाङि रुप्लुवोः" इत्यत्र ग्रहणं वृत्यादौ कृतम् ॥ ९४० ॥

धृङ् अवध्वंसने ॥ (धरते । दध्रे) इत्यादि धृञ्वत् ॥ ९४१ ॥

मेङ् प्रणिदाने प्रणिदानं विनिमयः । प्रत्यर्पणमित्यपरे (अपमयते । प्रणिमयते) "नेर्गद०" इति

(१) शोषणयोरिति २ पुस्त० पा० ।

णत्वं, तत्र माङ्मेङोर्ग्रहणमिति वृत्तिः। मेङआत्वाभावेऽपि णत्वमिति हरदत्तः (ममे। ममिषे) "आतो लोपः" इत्याल्लोपः (मातासे। मास्यते। मयताम्। अमयत। मयेत। मासीष्ट। प्रण्यमास्त) अड्व्यवायेऽपि णत्वमिष्यते। (मित्सते) "सनि मीमा०" इतीस् अभ्यासस्य लोपः। "सः स्यार्द्धधातुके" इति तत्त्वं, (मेमीयते)। "घुमास्था" इतीत्वम् (मामाति। मामीतः) "ई हल्यघोः" इतीत्वं हलादौ स्थितम्। अजादौ तु "श्नाभ्यस्तयोः" इत्याल्लोपः (मापयति। अमीमपत्। मितम्) "द्यतिस्यतिमेति" इत्वम्। अपमित्य याचते। अपमाय याचते। "न ल्यपि" इतीत्वनिषेधः। "मयतेरिदन्यतरस्याम्" इति पक्षे इकारः। "उदीचां माङो व्यतीहारे" इति व्यतिहारार्थादस्मात् क्त्वा। अपूर्वकालार्थं वचनम्। याचित्वा ह्यसावपमयते। अत्रोदीचां ग्रहणात् यथाप्राप्तमपि भवति। याचित्वापमयत इति, अन्यथा येन नाप्राप्तिन्यायेन अपूर्वकालात् क्त्वो बाधः स्यात्। अपमित्य निवृत्तमापमित्यकम्। "अपमित्ययाचिताभ्यां कक्कनौ" इति निर्वृत्ते यथासंख्यादस्मात् कक्, धान्यमायः। "ह्वावामश्च" इति कर्मण्युपपदे ऽणि युक्। अत्र वृत्तौ माङ् मानइत्युपादाय "गामादाग्रहणेष्वविशेष" इति मेङोऽप्युपलक्षणमिति हरदत्तः॥ ९४२॥

देङ् रक्षणे॥ दयते। दिग्ये। दिग्याते। दिग्यिषे। दिग्ये) "दयतेर्दिगि लिटि" इति दिग्यादेशे "एरनेकाचः" इति यण्। 'दिग्यादेशेन द्विर्वचनस्य बाधनमिष्यत'इति वृत्तिः। दातेत्यादि (अदित। अदिथ) "स्थाघ्वोरिच्च" इति सिचः कित्त्वमित्वं च (प्रदाय) "घुमास्था" इतीत्वं 'न ल्यपि" इति निषिध्यते। शेषं मयतिवत्॥ ९४३॥

श्यैङ् गतौ (श्यायते। शश्ये। शश्याते। शश्याषे। श्याता। श्यास्यते। श्यायताम्। अश्यायत। श्यायेत। आशिषि श्यासीष्ट। अश्यास्त। शिश्यासते। शाश्यायते। शाश्याति। श्यापयति। आशिश्यपत्। अवश्यायः। प्रतिश्यायः) "श्याद्व्यध०" इति णः। श्यैङो ऽवस्यतेश्चाकारान्तत्वादेव णे सिद्धे प्रतिपदोपादनं सोपसर्गार्थमिति स्थितम्। शीतं मेदः। शीतो वायुः। "द्रवमूर्त्तिस्पर्शयोः श्यः" इति द्रवस्य मूर्त्तौ काठिन्ये स्पर्शगुणे च वर्त्तमानस्य श्यायतेर्निष्ठायां परतः संप्रसारणे "हलः" इति दीर्घः। तत्रास्पर्शे "श्योस्पर्शे" इति निष्ठानत्वे द्रवमूर्त्तिस्पर्शाभ्यामन्यत्र श्यानो वृश्चिक इति संप्रसारणं न भवति, निष्ठानत्वं "संयोगादेरातः" इत्येव सिद्धं, प्रतिशीनं, "प्रतेश्च" इति श्यैङः प्रतेः परस्य निष्ठायां संप्रसारणं, "श्योस्पर्शे" इत्यत्र स्पर्शग्रहणेन गुणो निषिध्यते न तु रोग इत्यत्रापि निष्ठानत्वं भवति। (अभिशीनः। अभिश्यानः। अवशीनः। अवश्यानः) "विभाषाभ्यवपूर्वस्य" इति श्यैङो निष्ठायां वा संप्रसारणम्। अत्राभ्यवाभ्यामिति वक्तव्ये पूर्वग्रहणं व्यवहिते तथा स्यादिति अभिसंशीन इत्याद्यपि भवति, मूर्त्तिस्पर्शयोः परत्वादियमेव विभाषा भवति, सर्वत्र संप्रसारणपक्षे स्पर्शादन्यत्र "श्योऽस्पर्शे" इति निष्ठानत्वमन्यत्र "संयोगादेरातः" इति॥ ९४४॥

प्यैङ् वृद्धौ॥ प्यायते। पप्ये इत्यादि श्यैवत्॥ ९४५॥

त्रैङ् पालने॥ (चौरात् त्रायते) "भीत्रार्थानां भयहेतुः" इति भयहेतोश्चौरस्यापादानत्वम्। त्राणं, त्रातः। "नुदविद०" इत्यादिना निष्ठानत्वं वा, इदं च व्यवस्थितविभाषाविज्ञानादेव त्रातः इत्यादौ न भवति। स्मिङ्प्रभृतय एतदन्ता अनुदात्ता आत्मनेभाषाः॥ ९४६॥

पूङ् पवने॥ एतदादयो डीङन्ता उदात्ता आत्मनेपदिनः (पवते। पुपुवे। पविता। पविष्यते। पवताम्। अपवत। पवेत। पविषीष्ट। अपविष्ट। पिपविषते) "सनि ग्रहगुहोश्च" इति चकारेणोगन्तानां समुच्चयात् निषेधे प्राप्ते तदपवादः "स्मिपूङ्" इति इट्। "द्विर्वचनेऽचि" इति गुणावादेशयोः स्थानिवत्त्वात्पूशब्दस्य द्विर्वचनं, पुयण्ज्योत्यभ्यासस्येत्वं, (पोपूयते। पोपोति। पावयति। अपीपवत्। पूत्वा। पवित्वा। पूतवान्। पवितवान्। पूतं, पवितम्) "पूङश्च" इति क्त्वानिष्ठयोर्वेडागमः। "पूङः क्त्वा च" इति सेटोः क्त्वानिष्ठयोर्नित्यमकित्त्वं, पूङ इति सानुबन्धकनिर्देशात् यङ्लुकि निष्ठायां कित्त्वमेव। (पोपुवितम्।

पोपुवितवान्)इति । क्त्वायां तु "न क्त्वा सेट्"इति कित्त्वनिषेधात्(पोपुवित्वा)इति भवति । (पवमानः) "पूङ्यजोः शानन्"इति शानन्प्रत्ययः। (पोत्रं) हलस्य सूकरस्य वा मुखम् । "हलसूकरयोः पुवः"इति करणे ष्ट्रन्, तच्चेत् करणं हलसूकरयोरवयवो भवति । (पवित्रं) दर्भः । "पुवः सञ्ज्ञायाम्" इति करणइत्रः । पूयतेऽनेनेति पवित्रमृषिर्मन्त्रश्च । पवत इति पवित्रम्, अग्न्यादिः । "कर्त्तरि चर्षिदेवतयोः" इति ऋषौ करणे देवतायां कर्त्तरि पवतेरित्रः । यदायमित्रःकर्त्तरि तदा नपुंसकलिङ्ग एवोदाहृतः । पूङ् क्र्यादौ, तस्यापि ष्ट्रनित्रयोर्विधौ सामान्येन ग्रहणमित्युक्तानि रूपाणि तस्यापि ॥ ९४७ ॥

सूङ् बन्धने ॥ भवतइत्यादि पवतिवत् । (मुमूषते । मूत्वा) मूतः इत्यत्र "श्र्युकः किति" "सनि ग्रहगुहोश्च" इति इण्णिषेधः ॥ ९४८ ॥

डीङ् विहायसा गतौ ॥ विहायसा गताविति क्वचित्पठ्यते । तदाकाशगमनइतिपठद्भ्यां चन्द्रधनपालाभ्यां प्रत्युक्तम् । व्योमोरोभ्यां गमने डयते अंहते च इति पठन् केशवस्वाम्यत्रैवानुकूलः । अयमेव पाठो मैत्रेयादीनामपि (डयते । डिडये । डिड्यिषे) "एरनेकाचः" इति यण् । (डयिता । डयिष्यते । डयताम् । अडयत । डयेत । डयिषीष्ट । अडयिष्ट । डिडयिषते । डेडीयते । डेडेति । डाययति । अडीडयत् । डयित्वा) "निष्ठा शीङ्" इत्यत्र निष्ठेति योगविभागात् डयितमित्यपि भवतीति पारायणे । डीङ् शब्दे दैवादिकस्य । पूङादयस्त्रय एते उदात्ता आत्मनेपदिनः ॥ ९४९ ॥

तॄ प्लवनतरणयोः ॥ उदात्तः परस्मैभाषा । (तरति । ततार । तेरतुः । तेरुः । तेरिथ । तेरथुः । तेर । ततार । ततर । तेरिव) "ऋच्छत्यॄताम्" इति गुणः, वृद्ध्या तु स्वविषये पूर्वविप्रतिषेधेनायं बाध्यते । "तॄफलभजत्रपश्च"इति किति लिटि थलि च सेटि एत्वाभ्यासलोपौ। (तरिता । तरीता । तरिष्यति । तरीष्यति) *वॄतो वा* इति इटो वा दीर्घः । वृङ्वृञ्भ्यामॄदन्ताच्च परस्येटो वा दीर्घ इति सूत्रार्थः । अत्र अलिटीत्यनुवृत्तेर्न लिटि दीर्घः (अतरत् । तरेत् ।) आशिषि (तीर्यात्) । "ॠत इद्धातोः" इति इत्वरपरत्वयोः "हलि च" इति दीर्घः । 'इत्वोत्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेन'इत्युक्तत्वात् न तयोर्विषये इत्वम् (अतारीत् । अतारिष्टाम् । अतारीः । अतारिष्टम् । अतारिष्ट) "वॄतः" इतीटो दीर्घः "सिचि च परस्मैपदेषु" इति बाध्यते (तितीर्षति । तितरिषति । तितरीषति) "वॄतो वा" इत्यधिकृत्य "इट् सनि वा" इति इटो विकल्पनात् "सनिग्रहगुहोश्च" इति निषेधोऽत्र न भवति । इडभावे "इको झल्" इति सनः कित्त्वादगुणत्वे "ॠत" इति इत्वरपरत्वयोः "हलि च" इति दीर्घः । इट्पक्षे "वॄतः" इति दीर्घविकल्पनात् (तातर्त्ति) अभ्यासस्योरदत्वे हलादिशेषे "दीर्घोऽकितः" इति दीर्घः । "रुग्रिकौ च" इति रुग्रिग्रीको न भवन्ति, "ऋतश्च" इति तपरकरणेन ऋकारान्तस्याङ्गस्याभ्यासे तद्विधानात् (तातीर्त्तः । तातिरति । तातर्षि । तातीर्थः) अगुणविषये इत्वे रपरत्वं, हल्परत्वे तु दीर्घश्च । लोटि (तातर्तु । तातीर्त्तात् । तातीर्ताम् ! तातिरतु । तातीर्हि) तातराणि । तातङो ङित्त्वादगुणः, इत्वादि, लिङि तिप्सिपोर्हल्ङ्यादिलोपे (अतातः । अतातीर्त्ताम् । अतातरुः) अत्र "जुसि च" इति गुणेन परत्वादित्वं बाध्यते । (तातीर्यात् । तातीर्याताम्) आशिषि सलोपाभावो विशेषः । (तातीर्यास्ताम्) इत्यादि । (तारयति । अतीतरत् । व्यतितरते । व्यतितेरे । व्यतितरीता । व्यतितरिष्यते । व्यतितरीष्यते । व्यतितरताम् । व्यत्यतरत । व्यतितरेत । व्यतितरिषीष्ट । व्यतितीर्षीष्ट) "लिङ्सिचोरात्मनेपदेषु" इति ॠत इटो विकल्पनात् पक्षे इट् । तस्य च दीर्घत्वं "न लिङि" इति निषेधान्न भवति । इडभावे "उश्च" इति लिङ्सिचोः कित्त्वादगुण इत्यादि लुङ्यपि पूर्ववत् । सिच इडभावे कित्त्वेत्वयोर्व्यत्यतीर्ष्टेति, इट्पक्षे दीर्घविकल्पे (व्यत्यतरिष्ट, व्यत्यतरीष्ट)इत्यादि । अयं च दीर्घविकल्पः प्रकृतस्येट इति चिण्वदिटो न भवति, तेन (तारिता, तरिता, तरीता, तारिष्यते, तरिष्यते, तरीष्यते,) इति त्रीणि रूपाणि भवन्ति । लिङि शुद्धोऽपीट् पाक्षिकस्त-

स्य च न दीर्घ इति (तारिषीष्ट, तरिषीष्ट, तरीषीष्ट)इति त्रीणि रूपाणि । लुङिःत्वेकवचने (अतारि) अन्यत्र चिण्वदिट् । (अतारिषाताम्) शुद्धो पुनरिटि दीर्घविकल्पनात्, (अतरिषाताम् , अतरीषाताम्) अयं चेट् "लिङ्सिचोरात्मनेपदेषु"इति पक्षे न भवति तदा "उश्च" इति किर्त्वेत्त्रादौ अतीर्षातामित्यपीति चातूरूप्यं भवति । ध्वमि चिण्वदिटि शुद्धेटश्च दीर्घादीर्घयोः "विभाषेटः" इति मूर्द्धन्यविकल्पनात् (अतारिध्वम् , अतारिढ्वम्, अतरिध्वम् । अतरिढ्वम् , अतरीध्वम्, अतरीढ्वम्,) इति षड् रूपाणि । इडभावे नित्ये मूर्द्धन्ये अतीर्ढ्वमिति आहत्य सप्त रूपाणि । (रथन्तरम्) साम । "सञ्ज्ञायां भृतॄवृजि"इति खच् । (अवतारः) पक्षे, "अवे तॄस्त्रोर्घञ्" इति करणाधिकरणयोर्घञ् (तीर्त्वा । तीर्णः । तीर्णवान्) "श्र्युकः किति" इतीण्निषेधः । निष्ठायामित्वरपरत्वदीर्घत्वेषु "रदाभ्याम्" इति नत्वं तीर्णिः । ॠत इकारः । ॠल्वादिभ्यःक्तिन् निष्ठावत् भवति"इति नत्वम् (तरुणः) "ॠवृतॄजृदारिभ्य उनन्" इति उनन् प्रत्ययः । कवयः तरुणिमा इतीमनिचं प्रयुञ्जते । नास्य लक्षणमस्ति । तरुणी । "वयसि प्रथमे" इति ङीप् । तलुनी सुरा । कपिलकादीनां सञ्ज्ञाछन्दसोर्वा लत्वमापद्यतइति लत्वं, [नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्] इति ङीप् । नञ्स्नञ्ईकक्ः प्रत्यया इतरे प्रातिपदिकानि । तरुः । "भृमृतृशि"इत्यादिनो प्रत्ययः । तालु । "तरतेर्लश्च"इति उणप्रत्यये रेफस्य च लत्वम् । तीर्थम् । "पातॄतुदि" इत्यादिना थे ॠत इत्वादि । तर्ष उत्साहः । तूर्योऽभिलाषः । "वृतॄवदि" इत्यादिना सः । तरणिः । "अर्त्तिसृतॄ" इत्यादिना अनिप्रत्ययः ॥ ९५० ॥

गुप गोपने ॥
तिज निशाने ॥
मान पूजायाम् ॥
बन्ध बन्धने ॥

गुप गोपनकुत्सनयोरिति मैत्रेयः । एते च गुपादयः । "गुप्तिज्किद्भ्यः सन्" । "मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य" इति नित्यसन्नन्ताः । तथा च भाष्यं, नैतेभ्यः प्राक् सन आत्मनेपदं नापि परस्मैपदं पश्याम इति । तथा च "पूर्ववत्सनः" इत्यत्र वार्त्तिकं पूर्वस्यात्मनेपददर्शनात् सनन्तादात्मनेपदमिति चेत् गुपादिष्वप्रसिद्धिरिति । अयं च सन् गुपेर्निन्दायां, तिजेःक्षमायां, मानेर्जिज्ञासायां, बन्धेर्वैरूप्य, इति वृत्तावुक्तत्वात् । अत्रापठितेष्वर्थेषु न च सन् अस्ति, न चैषां केवलानां पठितेष्वर्थेषु प्रयोगः । पूर्वोक्तभाष्यवार्तिकविरोधात् । किं च भाष्ये ऽनुबन्धकरणसामर्थ्यात् 'अवयवे ऽकृतं लिङ्गं समुदायस्य विशेषकं भवति'इति सन्नन्तादात्मनेपदसमर्थनं च विरुध्येत, तथा निन्दादेरन्यत्र केवलानां गुपादीनां प्रयोगे तत्रैवानुबन्धासञ्जनस्यात्मनेपदार्थत्वेन चरितार्थत्वात् कथं सामर्थ्यं कथं वानुबन्धत्वम् , एवं च गोपते, तेजते, इति स्वाम्युक्तः केवलात् तिङः प्रयोगः प्रत्युक्तः । अत्र नन्दिमैत्रेयौ । नह्येतेभ्य इत्यादिना भाष्येण तिङामभावः प्रतीयतइति निन्दादेरन्यत्र कृतमुदाजह्रतुः । हरदत्तस्त्वेतन्नानुमन्यते, यदाह । "पूर्ववत्सनः" इत्यत्र कथं तर्हि जुगुप्सादेः समुदायस्यानुदात्तेत्त्वमत आह । अवयवइति । अवयवे ह्यचरितार्थं लिङ्गं सामर्थ्यादवयविनो विशेषकं भवति । यद्येवं गोपयति तेजयतीत्यादावपि प्रसङ्गः । अथ यं समुदायं योऽवयवो न व्यभिचरति तत्र कृतं लिङ्गं तस्य विशेषकं भवति णिजन्तं च व्यभिचरति विनापि तेन जुगुप्सत इति गुपेः प्रयोगादित्युच्येत, सन्नन्तादपि न स्यात्, विनापि तेन गोपयतीति गुपेः प्रयोगात्, वक्तव्योऽत्र विशेषः । अयमुच्यते । गुप गोपन इत्यस्य सन्विधौ ग्रहणन्तस्माच्च नित्यः सन्नेव भवति नापरः प्रत्ययः । गोपयतीत्यादिकस्तु प्रयोगो गुप रक्षणे इत्यस्य, स चान्य एव । अवश्यं चैतदेवं विज्ञेयम् । अन्य एव सन्प्रकृतिस्तस्माच्च सनेव भवतीति । अन्यथा निन्दाया अन्यत्र यथा णिज्भवति तथा लडादिरपि स्यात् । एवं तिजिप्रभृतयोऽपि क्षमाद्यर्थे यत्र सन्निष्यते तत्रानुदात्तेतो नित्यसन्नन्ताश्च, क्षमादिभ्योऽन्यत्र यत्र णिजिष्यते तत्राननुबन्धका एव चुरादौ पठितव्या इति ।

तत्रैवं सतें अवयवे ऽकृतं लिङ्गमिति भाष्योपपत्तिः । यदि हि कृतः स्युस्तर्हि अनुदात्तत्त्वं युजर्थं स्याद् इति अनुदात्तत्त्वस्य कथमचारितार्थ्यम् । अथोदाहरणानि (जुगुप्सते । जुगुप्साञ्चक्रे । जुगुप्सिता । जुगुप्सिष्यते जुगुप्सताम् । अजुगुप्सत । जुगुप्सेत । जुगुप्सिषीष्ट । अजुगुप्सिष्ट) अत्रास्य सनो धातुसंशब्दनेनाविधानादनार्धधातुकत्वान्नेड्गुणौ । एवं तितिक्षतइत्यादि । मीमांसतइत्यादौ–"मान्बन्ध"इत्युपधादीर्घः । अयं चाभ्यासविकारेष्वपवादा नोत्सर्गान्विधीन् बाधन्तइति अभ्यासस्य हलादिशेषह्रस्वादिषु कृतेष्वेव । एवं बीभत्सतइत्यादावपि । अत्र "एकाचो बशः" इति बकारस्य भकारः । धकारस्य "खरिच" इति चर्त्वं तकारः । गोपायतीति रक्षणे ।। गुपादयश्चत्वार एतेऽनुदात्तेतः ॥ ९५४ ॥

रभ राभस्ये ॥ राभस्यमुपक्रमः । एतदादयो हदेत्यन्ता अनुदात्ता अनुदात्तेतः (आरभते । आरेभे । आरेभिषे । आरेभिवहे) क्रादिनियमादिट् । एत्त्वाभ्यासलोपौ, (आरब्ध) "झषस्तथोः" इति धत्वे "झलां जश् झशि" इति जश्त्वं भकारस्य बकारः । (आरप्स्यते) "खरि च" इति चर्त्वम् । (आरभताम् । आरभत) (आशिषि । आरप्सीष्ट । आरब्ध) सिज्लोपधत्वजश्त्वे, (आरिप्सते) "सनि मीमा" इत्यादिना इस् । "स्कोः" इति सलोपः । (आरारभ्यते । आरारम्भीति । आरारब्धि) इट्पक्षे "रभेरशब्लिटोः" शब्लिड्भ्यामन्यत्राजादौ नुम्विधानान्नुमि अनुस्वारपरसवर्णौ (आरारब्धः । आरारभति) अत्राङ्भावे ऽजादित्वात् कृतस्य नुमः "अनिदिताम्" इति नलोपः । (आरारम्भाणि । आरारम्भामः) आट्यजादित्वान्नुम्, पित्त्वान्नलोपाभावः । लङि तिप्सिपोर्हल्ङ्यादिलोपे जश्त्वचर्त्वयोः (आरारप् । आरम्भयति । आररम्भत्) अत्र परामपि वृद्धिं नित्यत्वात् नुम् बाधते (आरम्भः । आरम्भणम्) अजादित्वान्नुम् । (रम्भा) पचाद्यचि टाप् (रभसः) सत्यमीत्यादिना ऽसच् । बाहुलकान्नुमभावः, राभस्येति निपातनात् वा ॥ ९५५ ॥

डुलभष् प्राप्तौ ॥ लभतइत्यादि सर्वं रभतिवत् । अस्यापि शब्लिड्वर्जिते ऽजादौ नुम् । आलम्भ्या गौः । "आङो यि" इति आङ्पूर्वाल्लभेर्यकारादौ नुम् । अत्र यीत्यस्य विषयसप्तमीत्वात् प्रागेव प्रत्ययोत्पत्तेः पूर्वं नुमि अदुपधत्वाभावात् "पोरदुपधात्" इति यन्नेति ण्यद् भवति । ण्यद्यतोश्च स्वरे विशेषः, ण्यति "गतिकारकोपपदात् कृत्" इति कृदन्तोत्तरपदप्रकृतिस्वरः "तित्स्वरितम्"इति स्वरितत्वं भवति । यदि तु उत्तरपदप्रकृतिस्वरत्वेन "यतोऽनावः"इति यदन्तं द्व्यच्कमाद्युदात्तं स्यात् । अत्र च विषयसप्तमीत्वमिति "इदितो नुम् धातोः" इत्यतः धातोरित्यनुवृत्त्या भाष्ये प्रतिपादितम् । उपलम्भ्या विद्या । "उपात् प्रशंसायाम्" इति लभेर्यकारादौ विषये नुम् । अत्र धात्वर्थस्य प्राप्तेः प्रशंसापादनद्वारेण प्राप्यमाणद्वारेण वा प्रशंसा । अन्यत्र नुम्भावात् "पोरदुपधात्" इति यति उपलभ्यमस्मात् वृषलात् न (१) किंचिद् भवति । अत्रापि ण्यद्यतोः स्वरे विशेषः (ईषत्प्रलम्भः । सुप्रलम्भः) "उपसर्गात्खल्घञोः" इति नुम् । "लभेश्च" इति सिद्धे वचनमिदं नियमार्थं खल्घञोरजाद्योर्यदि भवति उपसर्गात् परस्यैवेति, तेन इषल्लाभो लाभ इत्यत्र नुम् न भवति (सुलभः । दुर्लभः । सुलाभः । दुर्लाभः) इत्यत्र तु उपसर्गात् परत्वेन "सुदुर्भ्यां केवलाभ्याम्" इति नुम्निषेधः । अत्र केवलशब्द उपात्ताभ्यां सदुर्भ्यामन्यस्य सजातीयोपसर्गस्याभावमाह, तेन सुदुर्भ्यामन्योपसर्गरहितस्य लभेः खल्घञोर्नुम् न भवतीति सूत्रार्थः । उपसर्गान्तरयोगे तु अतिप्रसुलम्भ इति नुम् भवत्येव । (सुदुर्लभमतिदुर्लभं सुलभं, सुदुर्लाभः, अतिदुर्लाभः)इति प्रयोगास्तु "सुः पूजायाम्" "अतिरतिक्रमणे च" इति स्वत्योः कर्मप्रवचनीयत्वे द्रष्टव्याः । अतिक्रमणं फलप्राप्तावपि क्रियानुपरतिः । उक्तेषूदाहरणेषु खल्घञोर्न बाधः, विषयभेदात्, कर्मणि खल्, भावे च घञ् इति । यद्वा सुरत्र क्षेपे यथा सुषिक्तं किं तवात्रेति, दुर्निन्दायां यथा दुर्ब्राह्मण

(१) इति भवतीति २ पु० पाठः ।

इति । तेन कृच्छ्राकृच्छ्रार्थत्वाभावात् खलभावः (अलाभि, अलम्भि, लाभंलाभं, लम्भंलम्भं, "विभाषा चिण्णमुलोः"इति लभेर्नुम्विकल्पः, व्यवस्थितविभाषाविज्ञानात् सोपसर्गस्य नित्यं नुम् भवति । प्रालम्भि, प्रलम्भंप्रलम्भमिति । लाभेन निर्वृत्तं लब्धिमं, "ड्वितः क्त्रिः" "क्त्रेर्मब्नित्यम्" इति मप् । षित्वादङ् । लभा । लब्धिः । "क्तिन्नवादिभ्य" इति क्तिन् ॥ ९९६ ॥

ष्वञ्ज परिष्वङ्गे ॥ स्वजते । "दंशसञ्जस्वजां शपि" इति अनुनासिकलोपः (सस्वजे, सस्वञ्जे । सस्वजिषे । सस्वञ्जिषे । सस्वजिवहे) "इन्धिभवतिभ्याम्" इत्यत्र 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनां वा" इति वक्तव्यमिति लिटः कित्वविकल्पनात् पक्षेऽनुनासिकलोपः । तथा "सदिस्वञ्ज्योः" इत्यत्र वृत्तिव्याख्यानेषु स्वञ्जेः संयोगान्तादपि लिटो विभाषा कित्वमिच्छन्तीति (स्वङ्क्ता । स्वङ्क्ष्यते । स्वजताम् । अस्वजत । स्वजेत । स्वङ्क्षीष्ट । अस्वङ्क्त । सिस्वङ्क्षते) "स्तौतिण्योरेव" इत्यषत्वम् । (सास्वज्यते । सास्वङ्क्ति । सास्वञ्जीति । सास्वक्तः । सास्वजति) लोटि हौ (सास्वग्धि) लङि तिप्सिपोर्हल्ङ्यादिलोपे संयोगान्तलोपे (असास्वन् । स्वञ्जयति । असस्वञ्जत् । प्रतिष्वजते) "उपसर्गात् सुनोति" इत्यादिना षत्वं, (प्रत्यष्वङ्क्त) "प्राक् सितादड्व्यवायेऽपि"इति षत्वं (परिष्वजते । निष्वजते । विष्वजते) । "परिनिविभ्यः" इत्यादिना षत्वम् । "उपसर्गात् सुनोति" इत्यादिनैव सिद्धे स्तुस्वञ्ज्योरुपादानं "सिवादीनां वाड्व्यवायेऽपि" इति परिनिविभ्यः परत्वे अड्व्यवाये सिवादित्वादनयोः षत्वविकल्पोऽयं यथा स्यादिति । तेन पर्यष्वजत पर्यस्वजत । इत्याद्युभयं भवति । प्रतिसस्वजे इत्यादौ "स्थादिष्वभ्यासेन" इत्यभ्यासात् परस्य प्राप्तं षत्वं "सदिस्वञ्ज्योः परस्य लिटि" इति निवार्यते ॥ ९९७ ॥

हद पुरीषोत्सर्गे ॥ (हदते । जहदे । जहदिषे । हत्ता । हत्स्यते । हदताम् । अहदत । हदेत । हत्सीष्ट । अहत्त । जिहत्सते । जाहद्यते । जाहदीति । जाहत्ति । हादयति । अजीहदत् । हन्नः) "रदाभ्याम्" इति नत्वम् । रभादयश्चत्वारोऽनुदात्ता अनुदात्तेतः । नन्दी तु हदिं विभाषानुदात्तेतमाह ॥ ९९८ ॥

ञिक्ष्विदा अव्यक्ते शब्दे ॥ अयमुदात्त उदात्तेत् । (क्ष्वेदति । चिक्ष्वेद । चिक्ष्वेदिथ । चिक्ष्विदिव) तासौ नित्यानिट्त्वाभावान्न भारद्वाजनियम इत्युक्तम् । (क्ष्वेदिता । क्ष्वेदिष्यति । क्ष्वेदतु । अक्ष्वेदत् । क्ष्वेदेत् । क्ष्विद्यात् । अक्ष्वेदीत् । चिक्ष्विदिषति । चिक्ष्वेदिषति) "रलो व्युपधात्" इति कित्वविकल्पः (चेक्ष्वेत्ति । क्ष्वेदयति । अचिक्ष्विदत् । क्ष्विदित्वा । क्ष्वेदित्वा । क्ष्विण्णः) "ञीतः क्तः" इति वर्त्तमाने क्तः । "आदितश्च" इति इडभावः, "रदाभ्याम्"इति निष्ठानत्वम् । क्ष्विण्णमनेन, क्ष्वेदितमनेन (प्रक्ष्विण्णः । प्रक्ष्वेदितः) "विभाषा भावादिकर्मणोः" इतीड्विकल्पः । "निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः"इति सेटो निष्ठाया अकित्त्वात् गुणः । ञिक्ष्विदा स्नेहनमोहनयोरिति दिवादौ ॥ ९९९ ॥

स्कन्दिर् गतिशोषणयोः ॥ इतो मिहन्ता उदात्तेतोऽनुदात्तेतः (स्कन्दति । चस्कन्द । चस्कन्दिथ । चस्कन्थ । चस्कन्दिव) क्रादिनियमादिड् , थलि भारद्वाजनियमात् विकल्पः । (स्कन्ता । स्कन्त्स्यते ।स्कन्दतु।अस्कन्दत् । स्कन्देत् । स्कद्यात्) "किदाशिषि" इति कित्वात्" "अनिदिताम्" इति नलोपः । अस्कदत् । "इरितो वा" इति वाङिनलोपः । अङोभावे (अस्कान्त्सीत्। अस्कान्ताम् । अस्कान्त्सुः) "वदव्रज" इति वृद्धिः, झलादौ "झलो झलि" इति सिज्लोपः। चिस्कन्त्सति। चनीस्कद्यते । "नीग्वञ्चु" इत्यादिना नीक् (चनीस्कन्ति। चनीस्कत्तः। चनीस्कदति । स्कन्दयति। अचस्कन्दत्)गेहास्कन्दमास्ते । "विशिपति" इत्यादिना णमुल् । तृतीयाप्रभृतित्वाद्वा समासः । तेनैवोक्तत्वात् "नित्यवीप्सयोः" न द्विर्वचनम् । असमासे वीप्सायां द्रव्यवचनस्य द्विर्वचनं नित्यत्वे क्रियावचनस्येति गेहंगेहमवस्कन्दं, गेहमवस्कन्दमवस्कन्दमिति । क्रियाभेदे त्वापीष्यते इत्युक्तत्वात् गेहंगेहमवस्कद्येत्याद्यपि भवति ।

(विष्कन्ता विस्कन्ता) "वेः स्कन्देरनिष्ठायाम्" इति वा षत्वम् । अनिष्ठायामिति पर्युदासे नञिवयुक्तन्यायेन कृत्येवायं विकल्पः । तथा च वृत्तिकारेण पर्युदासो व्याख्यातः, कृतश्चोदाहृताः । निष्ठायां विस्कन्नः । "रदाभ्याम्" इति निष्ठानत्वम् (परिष्कन्ता, परिस्कन्ता) "परेश्च" इति वा षत्वम् । पृथग्योगकरणात् अनिष्ठायामिति नानुवर्त्ततइति वृत्तिः, तेन परिष्कण्णः परिस्कन्न इति भवति । अत एव पर्युदासाभावात् नञिवयुक्तन्यायो नास्तीति तिङ्यपि भवत्येव विकल्पः । (परिष्कन्दति, परिस्कन्दति) इति । (परिस्कन्दः) "परिस्कन्दः प्राच्यभरतेषु" इत्यषत्वम् । अस्य प्रयोगस्य प्राच्यभरतविषयत्वम् । स्कन्त्वा । प्रस्कन्द्य) "क्त्वि स्कन्दिस्यन्दोः" इति नलोपाभावः । उत्कन्दो नाम रोगः । "उदः स्थास्तम्भोः" इत्यत्र [रोगे चेति वक्तव्यम्] इति वचनात् स्कन्देः सकारस्य पूर्वसवर्णस्तकारो भवति ॥ ९६० ॥

यभ विपरीतमैथुने ॥ विपरीतानुष्ठानइत्यर्थ इति मैत्रेयः । पुरुषकारे तु यभ विपरीतमैथुने इति विपरीतयभनइत्यर्थ इति । क्वचित्पठ्यते यभ मैथुनइति (यभति । ययाभ । येभतुः । येभिथ । ययब्ध । येभिव) क्रादिनियमान्नित्यमिट् । थलि भारद्वाजनियमात् विकल्पः । (यब्धा । यप्स्यति । यभतु । अयभत् । यभेत् । यभ्यात । अयाप्सीत् । अयाब्धाम् । यियप्सति । यायभ्यते । यायब्धि । याभयति । अयीयभत् । यब्ध्वा । यभ्यम्) "पोरदुपधात्" इति यत् । जभेत्येक इति मैत्रेयः । जभ चेति धनपालशाकटायनौ । जप जभेति शाकटायनः । तत्र जभेः पाठो न्यासपदमञ्जरीकृतोरनभिमतः, सति ह्यस्मिन् "लुपसदचरजपजभदहदशभञ्जपर्शां च" "रधिभजोरचि" इत्यादौ जभजृम्भीतिवदमुमप्युपाददीयाताम् । किञ्च जभेः पाठेनाप्यलिटा भाव्यत्वात्, रभिश्च आन्तेष्वथ मैथुने यभिस्ततस्तृतीयो लभिरेव नेतरः" इति व्याघ्रभूतिवचनेनापि विरोधः स्यात् । तृतीयश्च यभिरेव, तत्र वृत्तौ यभेत्युदाहरणात् । जम्भत इति गात्रविनामे गतः ॥ ९६१ ॥

णम प्रह्वत्वे शब्दे ॥ नमति । (ननाम । नेमतुः । नेमिथ । ननन्थ । नन्ता । नंस्यति । नमतु । अनमत् । नमेत् । नम्यात । अनंसीत् । अनंसिष्टाम्) । "यमरमनमाताम्" इति सगिटौ, परस्मैपदे (निनंसति । नंनम्यते । नंनमीति । नंनन्ति । नंनन्तः । नंनमति । नंनन्वः, नन्नन्मः) । "म्वोश्च" इति नत्वम् । लङि अनंनन् । अनन्नताम् । "मो नो धातोः"इति पदान्ते नत्वम् (नमयति । नामयति) "ज्वलह्वलह्मलनमामनुपसर्गाद्वा" इति मित्त्वविकल्पः । सोपसर्गात्तु अमन्तत्वान्नित्यमित्त्वम् (प्रणमयति) "उपसर्गादसमासेऽपि"इति णत्वम् । (अनीनमत्) नमते दण्डः स्वयमेव । अनंस्त दण्डः स्वयमेव । "न दुहस्नुनमाम्" इति यक्चिणोर्निषेधः (नम्रः) "नमिकम्पि" इति रः (नेमिः) भाषायां "धाञ्कृसृगमिजनिनमिभ्यः" इति किकिनोरन्यतरः । तस्य लिड्वद्भावादेत्वाभ्यासलोपौ भवतः । "अनुदात्त" इत्यनुनासिकलोपः । (प्रणत्य । प्रणम्य) "वा ल्यपि"इत्यनुनासिकलोपविकल्पः । नृन् नमयति नृनमो नाम कश्चित् "क्षुभ्नादिषु च"इति पाठाण्णत्वाभावः । नमः । असुन् । नमस्यति देवान् । पूजयतीत्यर्थः । "नमोवरिवश्चित्रङः क्यच्"इति क्यच् । नमसः पूजायामिति तत्र वृत्तिः (नमस्कृत्य । नमस्कृत्वा) "साक्षात्प्रभृतीनि च" इति कृञो योगे पक्षे गतिसञ्ज्ञा, गतित्वे "कुगति" इति समासः । "नमस्पुरसोर्गत्योः" इति विसर्जनीयस्य सत्त्वं च । नमो देवेभ्यः । "नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च"इति नमो युक्ताच्चतुर्थी । नाकुर्वल्मीकः । "फलपाटिनमि" इत्यादिना उप्रत्ययो नाकादेशश्च (नप्ता) । "नप्तृनेष्टृ" इत्यादिना तृनि मकारस्य पकारो निपात्यते । नप्तारावित्यादौ असम्बुद्धौ सर्वनामस्थाने "अप्तृन्" इत्यादिना उपधादीर्घः ॥ ९६२ ॥

गम्लृ सृप्लृ गतौ ॥ गच्छति । "इषुगमियमां छः" इति छः । "छे च" इति तुक् । (जगाम । जग्मतुः । जगन्थ । जगमिथ । जग्मिव । जग्मिम) क्रादिनियमादिट् । थलि

भारद्वाजनियमात् विकल्पः। ङितोरजाद्योः "गमहन०" इत्युपधालोपे तस्य "द्विर्वचनेऽचि" इति स्थानिवत्त्वात् द्विर्वचनम् । (गन्ता । गमिष्यति)। "गमेरिट् परस्मैपदेषु" इति सकारादेरिट् (गच्छतु । अगच्छत् । गच्छेत् । आशिषि गम्यात् । अगमत्) लृदित्वात् अङ् । "गमहन" इत्यत्रानङिति पर्युदासात् नोपधालोपः। (जिगमिषति)। जिगमिष त्वमित्र हेर्लुका लुप्तत्वात् परस्मैपदाभावे भाष्यवार्त्तिकयोः सिद्धं तु गमेरात्मनेपदेन समानपदस्थस्येटः प्रतिषेधात् इति न्यासान्तरेण आत्मनेपदेन समानपदस्थस्य गमेः सकारादेरिण्निषेधात् इडभाव इति। एवं जिगमिषितेत्यादौ कृत्यपीट् भवति। इदं भाष्यवार्त्तिकं चेति आत्मनेपदेऽपीण्निषेधे सिद्ध एवारभ्यमाणसर्थादन्यत्रेटं बोधयति। अत एव भाष्यवार्त्तिकविरोधात् "गमेरिट्" इत्यत्र परस्मैपदग्रहणं गम्युपलक्षणार्थम् । परस्मैपदेषु यो निर्दिष्ट इति पुरुष(१)कारदर्शनमुपेक्ष्यं, वृत्तावयं पक्षः प्रतिक्षेपार्थमेव उपक्षिप्तः। यदाह तत्र हरदत्तः। न पुनरयं पक्षः स्थापितो भाष्यवार्त्तिकविरोधादिति। कः पुनरत्र फलभेदः। उच्यते। सम्पूर्वस्याकर्मकस्य गमेः "समो गमृच्छि" इत्यात्मनेपदित्वात् परस्मैपदेष्वदर्शनात् संजिगमिषिते इत्यादौ इण् न स्यात्, तथा जिगमिषां चक्र इत्यत्र भावकर्मविषयस्य गमेः परस्मैपदेष्वदर्शनात् इण्न स्यात्। अथ मतं परस्मैपदेषु दृष्ट एव गमिः उपसर्गादिवशेनात्रात्मनेपदेऽ(२)पीति इड्विषयतीति। तर्ह्यस्य गमेः सर्वत्रेट् स्यात्, गंस्यते स विशेष इति भाष्यप्रयोगश्च विरुद्ध्येत। कथं तर्ह्यात्मनेपदेन समानपदस्थस्येण्निषेधे जिगमिषितेवाचरति जिगमिषितीयत इति हरदत्तादयः। बहिरङ्गस्य आत्मनेपदस्य प्रतिषेधाभाव इति। अयं च प्रकारो ऽस्माभिः क्रमतावुपपादितः। (जङ्गम्यते) "नित्यं कौटिल्ये गतौ" इति गतिवचनत्वात् कौटिल्यएव यङ्, "नुगतः" इत्यभ्यासस्य नुक्यनुस्वारपरसवर्णौ (जङ्गमीति। जङ्गन्ति । जङ्गतः) "अनुदात्तोपदेश०" इत्यनुनासिकलोपः। (जङ्गमति) प्रकृतिग्रहणन्यायेन "गमहन" इत्युपधालोपः। (जङ्गन्मि। जङ्गन्वः) "म्वोश्च"इति नत्वम्। जङ्गहीत्यत्रानुनासिकलोपे तस्य "असिद्धवदत्रा" इत्यसिद्धत्वात् "अतो हेः" इति लुग् न भवति। अत्र सुधाकरः। अनुदात्तोपदेशा यस्यादय इति यस्यादेर्गणत्वेन निर्देशात् निर्दिष्टं यद्गणेन चेत्यनुनासिकलोपाभावमुक्त्वा यदा धातुपाठ एव गणस्तदा भवितव्यमेव लोपेनेत्याह। "हन्तेर्जः" इत्यत्र जहीत्युदाहरणे न्यासकारोऽपि व्याख्यातवान्। निर्देशेन गणनिर्देशं नानुमन्यते। अत एव न्यासकारसुधाकरविरोधात् श्तिपा शपेत्यत्र यत्रोपदेशग्रहणमिति क्वचित्पाठः स उपेक्ष्यः (अजङ्गन्) "मो नो धातोः" इति नत्वम् (गमयति । अजीगमत् ग्रामं देवदत्तं यज्ञदत्तः' ग्रामायेति वा) "गतिबुद्धि" इति प्रयोज्यस्य कर्मत्वम्, अत्र "गत्यर्थकर्मणि"इति ग्रामात् द्वितीयाचतुर्थ्यौ। ग्रामश्चात्र गमेरेव कर्म, यतो ग्रामकर्मिकायां गतौ प्रेष्यते ग्रामं गच्छतीति, प्रयोज्यस्तु ण्यन्तस्य कर्म न गमेरिति न तत्र चतुर्थी भवति। अत्र कर्मणि लादयो "ण्यन्ते कर्तुश्च कर्मण"इत्यभिधानात् प्रयोज्ये भवन्ति। गम्यते ग्रामं देवदत्तः। गमयितव्य इत्यादि, अत्र कृद्योगलक्षणा षष्ठी "गत्यर्थकर्मणि" इत्यत्र चतुर्थी चेति वक्तव्येति द्वितीयाग्रहणात् बाध्यते, यद्वा "कृत्यानाम्" इत्यत्र योगविभागेन उभयप्राप्तौ कृत्ये षष्ठी नेत्युक्तत्वात् कर्तृवत् कर्मण्यपि षष्ठ्या नैव प्रसङ्ग। ग्रामं गन्ता गमयितेत्यादौ तु पुनर्द्वितीयाग्रहणादेव षष्ठ्या बाधः। अत्रानध्वनीति पर्युदासात् अध्ववचनेभ्यो यथायोगं द्वितीयाषष्ठ्यावेव भवतः, अध्वानं गच्छति पन्थानं गच्छति अध्वनो गन्ता पथो गन्ता इति। अयं चानध्वनीति प्रतिषेध आस्थितप्रतिषेधश्चायं विज्ञेय इति वृत्तावुक्तत्वात् आस्थितिविषयः, आस्थितः प्रथममेव स्वीकृतः, तेन यदोत्पथेन पन्थानं गच्छति तदा ग्रामादिवत् द्वितीयाचतुर्थ्यौ द्वे अप्युदाहार्ये, द्वितीयया षष्ठ्या बाधेऽपि चेष्टाग्रहणं मनसा पाट-

(१) परिशेषकार इति २ पु० पाठः।

(२) पीड्भवतीति २ पु० पा०।

लिपुत्रं गच्छतीत्यादौ चतुर्थीनिवृत्त्यर्थम् । आगमयते माणवकः, कालं हरत न त्वरते इत्यर्थः । [आगमेः क्षमायामात्मनेपदं वक्तव्यम्] इति ण्यन्तात्तङ्, क्षमा उपेक्षा, कालहरणमिति वृत्तिः । ण्यन्त एवायमत्रार्थे च वर्त्तत इति तस्योदाहरणम्, (सङ्गच्छते,) "समो गम्यृच्छि"इत्यकर्मकात्तु सङ्गमेः तङ् । (सञ्जग्मे । सञ्जग्माते) "गमहन"इत्युपधालोपः (सङ्गन्ता । सङ्गंस्यते । सङ्गच्छताम् । समगच्छत । सङ्गच्छेत) आशिषि (संगंसीष्ट) लुङि (समगत समगंस्त । समगंसाताम्) "वा गम" इति झलाद्योर्लिङ्सिचोरात्मनेपदविषये वा कित्त्वं, तदा "अनुदात्तोपदेश" इत्यनुनासिकलोपः झलि, "ह्रस्वादङ्गात्" इति सिज्लोपः । न चास्मात् पूर्वम् "अतो लोपः"इत्यल्लोपस्य प्रसङ्गः, आर्द्धधातुकोपदेशे ऽनकारान्तत्वात् "असिद्धवदत्रा" इत्यनुनासिकलोपस्यासिद्धत्वाद्वा, सर्वत्र गमेरात्मनेपदेन समानपदस्थत्वात् सकारादेरिडभावः (सञ्जिगंसते) अत्र "अज्झन०"इति दीर्घो न भवति, आदेशस्य गमेर्ग्रहणात् । यत्तु तरङ्गिण्यां दीर्घप्रदर्शनं, तद्गमेर्दीर्घे इगिङ्ग्रहणमग्रहणे ह्वनादेशस्यापि दीर्घत्वप्रसङ्गात् इति वार्त्तिकविरोधादुपेक्ष्यं, (गम्यम्) 'पोरदुपधात्'इति यत् । सुतङ्गमो नाम कश्चित् । "गमश्च"इति सुप्युपपदे संज्ञायां खच् । "अरुर्द्विषदजन्तस्य" इति मुम् । सुतङ्गमेन निर्वृत्तः सौतङ्गमिः । "वुञ्छणकठजिलसेनिरढञण्ययफक्फिञिञ्यककठको ऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः" । इति यथासंख्यात् सुतङ्गमादेश्चातुरर्थिक इञ् । (अन्तगः) "अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः" इति अन्तादिषु गमेर्डः कर्मसूपपदेषु, डित्त्वसामर्थ्यादभत्वेऽपि टिलोपः । एवमत्यन्तग इत्युदाहार्यम् । (सर्वत्रगः । पन्नगः) । [सर्वत्रपन्नयोरुपसंख्यानम्] इति डः । उरसा गच्छतीत्युरगः । 'उरसो लोपश्च' इति डप्रत्ययः, उरसः सलोपश्च । (सुखेन गच्छतीति सुगः । दुर्गः) । "सुदुरोरधिकरणे" इति डः । अत्र न्यासे वासरूपविधिना ल्युडित्युक्तम् । तदयुक्तम् । [क्तल्युट्तुमुन्खलर्थेषु वासरूपविधेः प्रतिषेधः] इत्युक्तत्वात् । अधिकरणादन्यत्र सुगम इति खलेव भवति । निर्गच्छन्त्यत्रेति निर्गो देशः । "निर्गो देशे" इति डः, देशादन्यत्र निर्गमनमिति ल्युट् भवति । (ग्रामगः) । [डोऽन्यत्रापि दृश्यत] इति डः । मितं गच्छतीति मितङ्गमो हस्ती, खच्प्रकरणे [गमेः सुप्युपसंख्यानम्] इति खच् । (विहङ्गमः) । "विहायसो विहश्च" इति खचि विहायसश्च विहादेशे मुमागमः । (विहङ्गः) । [खश्च डिद्वा वक्तव्य] इति खचो डित्त्वाट्टिलोपः, (विहगः) । "डे च विहायसो विहादेशे" इति विहादेशः । अस्मादेवानुवादात् 'डोऽन्यत्रापि दृश्यत' इति वा डः । (गामुकः) । "लषपत०"इत्यादिना उकञ् । (गत्वरः) । "गत्वरश्च" इति क्वरपि अनुनासिकलोपो निपात्यते । (गत्वरी) । "टिड्ढाणञ्" इत्यादिना ङीप् । (जग्मिः) । "भाषायां धाञ्कृसृगमि" इति किकिनोरन्यतरस्मिन् उपधालोपः, लिड्वद्भावात् द्विर्वचनम् । (जगत्) । "द्युतिगमिजुहोतीनां द्वे च" इति क्वौ द्विर्वचनम् "गमः क्वौ" इत्यनुनासिकलोपः, स्त्रियां–"वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च" इति शतृवद्भावान्ङीप् । उत्सादिषु जगतीति पाठात् जगत्या अपत्यादिषु जागतम् । "उत्सादिभ्योऽञ्" इति प्राग्दीव्यतोऽञ् प्रत्ययः । जगत इदं जागतमित्यत्र अचामादिरचो वृद्ध्या उपधालक्षणा वृद्धिर्बाध्यते इति वृत्तिः । जगत्येव जागतं छन्दः । छन्दसः प्रत्ययविधाने [नपुंसके स्वार्थउपसंख्यानम्] इत्यञ् । (अध्वगत् । कलिङ्गत्) । "अन्येभ्योऽपि दृश्यते" इति क्विपि अनुनासिकलोपः । अग्रे गच्छत्यग्रेगूः । "ऊङ् गमादीनाम्" इति क्वौ अनुनासिकलोपे अकारस्योकारः, अयं च धातोरुकारइति अग्रेग्वावित्यादावुवङादेशे प्राप्ते "ओः सुपि" इति यण् । "तत्पुरुषे कृति" इत्यलुक् । (गमी) । "गमेरिनि" इति "भविष्यति गम्यादयः" इति भविष्यदर्थे च । (आगामी) । आङि च णिदिति णित्त्वात् वृद्धिः । अयमपि गम्यादिपाठात् भविष्यति, अयं बाहुलकात् केवलादपीति गामीत्यपि भवति । (ग्रामगमी । ग्रामगामी) । श्रितादिषु गमिगामीत्यादिना तत्पुरुषः । "अकेनोर्भविष्यदाधमर्ण्ययोः" इति कृद्योगलक्षणा षष्ठी

बाधित्वा एतयोर्योगे द्वितीया । (गमः) । "ग्रहवृदृनिश्चिगमश्च" इति भावे कर्त्तरि च कारके-अप्रत्ययः । एकाहेन गम्यतइत्येकाहगमः । "अश्वस्यैकाहगमः" इति निपातनादप् । अन्यथात्र "परिमाणाख्यायां सर्वेभ्यः" इति परिमाणस्य गम्यमानत्वात् घञ् स्यात् । अत्र सर्वग्रहणमजपोर्बाधनार्थमित्युक्तम् । (निगमः) "गोचर०" आदिना करणाधिकरणयोर्घः । (गत्वा) । "अनुदात्तोपदेश०" इत्यादिना अनुनासिकलोपः । (आगम्य । आगत्य) । "वा ल्यपि" इति अनुनासिकलोपविकल्पः । (गतम्) । "क्तोऽधिकरणे च" इति कर्त्तृकर्मभावाधिकरणेषु क्तः । (ग्रामगतः) । "द्वितीयाश्रित०" इति तत्पुरुषः । गतं च तत्प्रत्यागतञ्च गतप्रत्यागतम् । [कृतापकृतादीनामुपसंख्यानम्] इति तत्पुरुषः गतमेव तत्कालं गतप्रत्यागमनेन गतप्रत्यागतमुच्यते । (गन्तुः(१) । "तनिगमि" इत्यादिना तुन् । (गान्त्रम्) "अस्जिगमिनमिहनिविश्यशां वृद्धिश्च" इति ष्ट्रनि वृद्धिः । गन्त्री कम्बलिवाह्यं शकटम् । बाहुलकात् वृद्ध्यभावः । तृतृचावित्यादिना सञ्ज्ञायां तृतृचोरन्यतरो वा । कम्बलः सास्ना तद्योगान्मत्वर्थीयेनिना कम्बलिनो बलीवर्दा उच्यन्ते । तथा च रभसः–'प्रवारेऽप्युत्तरासङ्गे सास्नायामपि कम्बलः' इति । (गात्रम्) । "गमेरा च" इति ष्ट्रनि मकारस्याकारः, (सुगात्री । सुगात्रा) । "स्वाङ्गाच्चोपसर्जनात्" इत्यत्र अङ्गगात्रकण्ठेभ्य इति पक्षे ङीष् । (गौः) । "गमेर्डोः" इति डोप्रत्यये डित्त्वात् टिलोपः । "गोतो णित्" इति सर्वनामस्थानस्य णित्त्वात् वृद्धिः । अमूशसोस्तु "औतोऽम्शसोः" इति पूर्वपरयोराकारे गां गा इति, "तस्माच्छसो नः पुंसि" इत्यत्र तच्छब्देन प्रथमयोः पूर्वसवर्णदीर्घस्य परामर्शनादिह नत्वं न भवति । ङसिङसोस्तु "ङसिङसोश्च" इति ङसोरेङश्च पूर्वरूपे गोरिति, (गवां समूहो गव्या । गोत्रा) "खलगोरथात्" इति यः, "इनित्रकट्यचश्च" इति यथा संख्याभावस्यभावात्, स्त्रीलिङ्गौ, यकारादौ प्रत्यये "वान्तो यि" इत्यवादेशः । (गोत्रोऽस्यास्तीति गौत्रिकः,) "एकगोपूर्वाट्ठञ् नित्यम्" इति मत्वर्थे ठञ् । (गोमी) "ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः" इति मत्वर्थे मिनिप्रत्यये निपात्यते । गोर्विकारोऽवयवो वा गव्यम् । "गोपयसोर्यत्" इति षष्ठ्यन्तात् विकारावयवयोर्यत् । (गोः पुरीषं गोमयम्) । गोः पुरीषे मयट्, (गवे हितं गव्यम्) । *उगवादिभ्यो यत्* इति प्राक्क्रीतीयो यत् । गोर्निमित्तं संयोग उत्पातो वा गव्यः । प्राणिनां शुभस्य अशुभस्य वा सूचको महाभूतविकार उत्पातः । *गोद्व्यचोसंख्यापरिमाणाश्वादेर्यत्* इति यत् । गोशब्दात्संख्याश्वादिवर्जितात् द्व्यचश्च तस्य निमित्तं संयोग उत्पातो वेति विषये यदिति सूत्रार्थः । (गोरिदं गव्यम्) । ["सर्वत्र गोरजादिप्रत्यये यद्वक्तव्यः"] इति प्राग्दीव्यतीये वार्थे यत् । एवं च तत्र तत्रार्थे सूत्रेण यद्विधानं प्रपञ्चार्थम् । दाराश्च गावश्च दारगवम् । द्वन्द्वात् "अचतुर०" इत्यादावचि निपातितः । अनुगवं शकटम् । गौर्यथा आयतं तथायतमित्यर्थः । "अनुगवमायाम" इति अनुगुशब्दादचि निपात्यते । इह आयाम इति अर्शआद्यजन्तः, तद्वति वर्त्तते । अनुगुशब्दश्चायं *यस्य चायामः* इति अव्ययीभावः, अनुर्यस्यायामवाची तेनान्यस्यायामवतो लक्षणभूतेन समस्यतइति सूत्रार्थः । इह गोरायामः शाकटायामस्य लक्षणं भवति । (आगवीनः) । गवा भूतो य आगतः । यः प्रत्यर्पणात् कर्म करोति स एवमुच्यते । आगवीन इति आगुशब्दात् कारिणि खप्रत्यये निपात्यते । आगुशब्दश्च "आङ्मर्यादाभिविध्योः" इति आङो मर्यादावचनस्य पञ्चम्यन्तेन गोशब्देन गोप्रत्यर्पणे वर्त्तमानेनाव्ययीभावे पञ्चमी, "आङ् मर्यादावचने" इति आङः कर्मप्रवचनीयत्वे तद्युक्तत्वात् "पञ्चम्यपाङ्परिभिः" इति विधीयते, गोः पश्चात् अनुगु, "अव्ययं विभक्ति" इत्यादिना पश्चादर्थेऽव्ययीभावः । अनुगवलं पर्याप्तं गन्तुं शीलमस्य अनुगवीनो गोपालकः । "अनुगवलं गामि" इति क्रियाविशेषणाद् द्वितीयान्तादलङ्गामीत्यर्थे खः । तिष्ठन्ति गावो यस्मिन् काले दोहनाय स

---

(१) गन्तासीत्यधिकम् २ पु० ।

कालस्तिष्ठद्गु । वहन्ति आगच्छन्ति गावो दोहनाय यस्मिन् स कालः वहद्गु । श्रयन्ति यस्मिन्काले गोदोहनाय स कालः श्रयद्गु इति । आयन्ति यस्मिन् काले दोहनाय स कालः अयद्गु इति । "तिष्ठद्गुप्रभृतीनि च" इति अव्ययीभावे निपात्यते । (परमगवः) । "सन्महत्परम०" इति तत्पुरुषे "गोरतद्धितलुकि" इति टच् । टित्वात् स्त्रियां परमगवी । अतद्धितलुकीति वचनात् पञ्चभिर्गोभिः क्रीतः पञ्चगुरित्यत्र टच् न भवति । अत्र हि "आर्हादगोपुच्छसंख्यापरिणाट्ठक्" इति गोपुच्छादिव्यतिरिक्तात् प्रातिपदिकात् यथायथं समर्थयुक्तात् आर्हीयेष्वर्थेषु विहितस्य ठकः "अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायाम्" इति लुक् क्रियते, द्विगुत्वं च "तद्धितार्थोत्तरपद०" इति समासे "संख्यापूर्वो द्विगुः" इति द्विगोश्च "द्विगुश्च" इति तत्पुरुषत्वात् अस्ति टचः प्रसङ्गः, पञ्चगवधन इत्यत्र पञ्च गावो धनमस्येति त्रिपदे बहुव्रीहौ "तद्धितार्थोत्तरपद" इति पूर्वयोः समासे संख्यापूर्वत्वेन द्विगुत्वात् तत्पुरुषत्वे टच् । पञ्चानां गवां समाहारः पञ्चगवम् । "तद्धितार्थ" इति समासे पूर्ववत् द्विगुतत्पुरुषयोश्च टच् , अत्र समासार्थादुत्तरपदादकृत एव समासे समासान्ता इति अकारान्तोत्तरपदद्विगुत्वात् [आकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यत] इति प्राप्तस्य स्त्रीत्वस्य [पात्रादिभ्यः प्रतिषेध] इति निषेधः । (चित्रा गावो यस्य चित्रगुः) "गोस्त्रियोरुपसर्जनस्य" इति उपसर्जनगोशब्दान्तप्रातिपदिकत्वात् ह्रस्वः, अत्र "गोः पूर्वत्वणित्त्वात्वस्वरेषु" इति स्थानिवत्त्वनिषेधात् न गोतो णित्त्वम् । ननु तत्कालव्यावृत्त्यर्थाद् गोत इति तपरकरणादेव न भविष्यति, अस्त्वत्र परिहारः चित्रगो चित्रगव इत्यत्र सम्बुद्धौ "जसि च" इति गुणे विकृतं गोरूपमिति स्याण्णित्त्वं, नन्वेवमत्राप्यनेन निषेधेन स्थानिवत्त्वकृतमेव णित्त्वं निवार्यतां नतु स्वाश्रयमपीति गोरूपस्याव्याहतत्वात् तदाश्रयं णित्वं स्यादेव, नैष दोषः । यदत्र गोरूपस्य लाक्षणिकत्वाल्लक्षणप्रतिपदोक्तपरिभाषया तदपि न भविष्यति । वृत्तौ तु गोत इति षष्ठ्यन्तमाश्रित्य गोशब्दार्थसम्बन्धिसर्वनामस्थानं णिदिति व्याख्यातमत्र मते न कुत्रापि णित्त्वप्रसङ्गः । यदत्र सर्वनामस्थानं तदन्यपदार्थस्य, सम्बन्धिनो गोशब्दार्थस्य, तपरकरणं त्वोकारान्तोपलक्षणार्थं, वर्णनिर्देशेषु प्रसिद्धत्वात्, तेन द्योशब्दस्यापि णित्कार्यं भवति, अपरे तु ओत इति पठन्तीति चोक्तं वृत्तौ । (गोऽयम् गोअयम्) । "सर्वत्र विभाषा गोः" इति छन्दसि भाषायां चाति परे वा प्रकृतिभावः । अन्यदा "एङः पदान्तादति" इति पूर्वत्वम् । (गवाग्रम्) । "अवङ् स्फोटायनस्य" इति अवङादेशः, अयं च व्यवस्थितविभाषात्वात् गवाक्षमित्यत्र नित्यः, चित्रगवग्रमित्यत्र "गोः पूर्व" इति स्थानिवत्त्वनिषेधान्न प्रकृतिभावादि । (गवाक्षम् । गवाविकम् । गवैडकम्) । अत्र "गवाक्षप्रभृतीनि च" इति समाहार एव द्वन्द्वः, अयं च नियतो गवाक्षप्रभृतिषु यथोच्चारितं द्वन्द्वे वृत्तमिति वृत्तावुक्तत्वात् अवङभाव इति । "विभाषा वृ०" इत्यादिना पशुद्वन्द्वं विभाषैव तेन गोश्वं गोश्वा इत्यादि । (गङ्गा) "गन् गम्यादेः" इति गन् प्रत्ययः । (गङ्गाया अपत्यं गाङ्गेयः) । "शुभ्रादिभ्यश्च" इत्यत्र चकारेणाकृतिगणत्वद्योतनाठ्ठक् । तिकादिपाठादपत्येति फिञि गाङ्गायनिरित्यपि भवति । (सर्पति । ससर्प । ससृपतुः । ससर्पिथ । ससृपिव) क्रादिनियमादिट् । (स्रप्ता । सर्प्ता । सप्स्र्यति । स्रप्स्यति) । "अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्" इति झलदावकिति प्रत्यये पक्षे मित्त्वादन्त्यादचः परेऽमागमे यणादेशः । अन्यदा गुणः । (सर्पतु । असर्पत् । सर्पेत् । आशिषि सृप्यात् । असृपत् । असृपताम्) । लृदित्वादङ् । सिसृप्सति । "हलन्ताच्च" इति सनः कित्त्वान्न गुणो नाप्यमागमः । सरीसृप्यते । "रीगृत्वतः" इति रीक् । (सरीसृपीति । सरीसर्ति । सरीसृप्ति) । प्रकृतिग्रहणन्यायेन "अनुदात्त०" इति अमागमः' । (सरीसृपः) । पचाद्यचि "यङोचि च" इति यङो लुकि "न धातुलोपः" इति लघूपधगुणाभावः, यङ्लुगन्तात् इगुपधलक्षणः को वा । (सर्पयति । अससर्पत् । असीसृपत्) । "उर्ऋत्" वा । (सृप्यः) । "ऋदुपधाच्च" इति क्यप् । (सर्पः) । पचादित्वादच् । (स्रप्ता । स्रप्तः) । पीठेन स्रप्तुं शीलमस्येति पीठसर्पी, णिनिः "सुप्यजातौ"

इति (पीठसर्पिण इमे पैठसर्पा) "इनण्यनपत्ये" इति प्रकृतिभावं बाधित्वा "नान्तस्य टिलोपे पीठसर्पि" इत्यादिना टिलोपः। (सर्पिः)। "अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य इसि" इतीस्-प्रत्ययः। (प्रियसर्पिष्कः) उरःप्रभृतित्वात् नित्यं कप्। "इणः षः" इति अपदाद्योः कुप्वोर्विसर्जनीयस्य षत्वम्। (सृप्रः)। "ऋज्रेन्द्र०" इत्यादिना रक् ॥ ९६३ ॥

यम उपरमे ॥ अत्र मैत्रेयः–उदित्त्वमस्य केचिदिच्छन्तीति। यच्छति। "इषुगमियमाम्" इति छः शिति (ययाम। येमतुः। ययन्थ। येमिथ। यन्ता। यंस्यति। यच्छतु। अयच्छत्। यच्छेत्। आशिषि यम्यात्। अयंसीत्) "यमरम०" इति सगिटौ (यियंसति। यंयम्यते। यंयन्ति। यंयन्तः। यमयति। अयीयमत्) भोजयतीत्यर्थः। अमन्तत्वात् मित्त्वम्। अस्य च "यमोपरिवेषणे" इति परिवेषणादन्यत्र मित्त्वनिषेधात् आयामयते आयामयतीति भवति। "न पादम्या" इत्यत्रायामग्रहणेन "अणावकर्मकात्" इति कर्त्रभिप्रायप्राप्तस्य परस्मैपदस्य निषेध इति यथायोगमत्रात्मनेपदपरस्मैपदे भवतः (आयच्छते) दीर्घो भवति, व्याप्रियतइति वार्थः। आयच्छते स्वरूपाणि द्राघयति व्यापारयति वेत्यर्थः। "आङो यमहनः" इति अकर्मकात् [स्वाङ्गकर्मकाच्चेति वक्तव्यम्] इति अकर्मकात्स्वाङ्गकर्मकाच्चाङ्पूर्वादस्मात्तङ्। इह स्वमङ्गं स्वाङ्गं न तु अद्रवन्मूर्त्तिमदित्यादिना लक्षितं पारिभाषिकमिति देवदत्तस्य पाणिमायच्छतीत्यत्र न भवति। उपयच्छते कन्यां, परिणयतीत्यर्थः। *उपाद्यमः स्वकरणे* इति तङ्। अत्र भाष्यम्, इह कस्मान्न भवति स्वं शटकं तमुपयच्छति, अयं यदा स्वं करोति तदा भवितव्यमेव। अत्र वृत्तिकारशिवस्वामिभ्यामिदं भाष्योक्तमस्वस्य स्वत्वेन करणं प्रसिद्धिवशात्पाणिग्रहणविषयउपसंहृतम्(१)। कैयटे तु निष्पादनलक्षणोऽत्र करोत्यर्थो गृह्यते इति, सामान्येनापि वार्त्तिककारेण पाणिग्रहणविशिष्टं स्वकरणं शिवस्वामिजयादित्यावूचतुः। प्रसिद्धत्वादुपायंस्त नतीरित्यादिप्रयोगस्तु साधर्म्यात्। भाष्यकारस्तु स्वकरणमात्रे विशिष्टे स्थित इत्युक्तं, भट्टिकाव्ये च शास्त्राण्युपायंस्त जित्वराणीति सामान्येन प्रयुज्यते। संयच्छते व्रीहीन् उपयच्छते भारम्। आयच्छते वस्त्रम्। "समुदाङ्भ्यो यमो ग्रन्थ"इति समादिभ्यो यमेस्तङ्। यदा तु कर्त्रभिप्रायत्वमुपपदेन प्रतीयते तदा "विभाषोपपदेन प्रतीयमान" इति स्वान् व्रीहीन् संयच्छतीत्यपि। इहाङो ग्रहणमस्वाङ्गकर्मकार्थम्। स्वाङ्गकर्मकात् "आङो यमहनः" इत्येव सिद्धम्। अग्रन्थइति वचनात् उद्यच्छति चिकित्सां वैद्य इति अत्र परस्मैपदमेव, विचिकित्सामधिगन्तुमुद्यमं करोतीत्यर्थः। यदायं यमिर्गन्धने वर्तते गन्धनं सूचनं परेण प्रछाद्यमानस्य आविष्करणं तदा "यमो गन्धने" इत्यात्मनेपदम्। परस्मैपदस्य सिचः कित्वादनुनासिकलोपः। (उदायत। उदायसातामित्यादि।) झलि सिज्लोपः। उपयमनार्थत्वे तु "विभाषोपयमने" इति तङ्। तङ्परस्य यमेः सिचः कित्त्वविकल्पनात् उपायत कन्याम्, उपायंस्त कन्यामित्युभयं भवति। उपयमनमिह दारकर्म (यम्यम्) "गदमद" इत्यादिना यत्। उपसृष्टात्तु ण्यति विनियाम्यमिति। त्वया नियम्या इति प्रयोगः नियमशब्दात् करोतीति णौ यति द्रष्टव्यः। धातोर्णौ "यमोपरिवेषणे" इति मित्त्वनिषेधात् वृद्ध्या भाव्यम्। (वाचंयमः)। "वाचि यमो व्रते"इति खच्। "वाचंयमपुरन्दरौ च" इति निपातनादलुक्। (संयमः। संयामः) "यमस्समुपनिविषु च" पक्षेऽच्, तदभावे घञ्। एवं समुपनिविभ्योप्युदाहार्यम्। (संयत्) सम्पदादित्वात् "अन्येभ्योऽपि दृश्यते" इति वा क्विपि "गमः क्वौ" इत्यत्र [गमादीनामिति वक्तव्यम्] इति उक्तत्वात् अनुनासिकलोपे तुक्। (यच्छतीति यमः) अच् (याम्यम्) प्राग्दीव्यतीयेष्वर्थेषु [यमेश्चेति वक्तव्यम्] इति ण्यः (यमुना) "अर्जियमिशीङ्भ्यश्च" इति उनन् प्रत्ययः। यन्त्रम्। "गृधृजी" इत्यादीना त्रः प्रत्ययः ॥ ९६४ ॥

तप सन्तापे। (तपति। ततापः। तेपिथ। ततप्थ। तप्ता। तप्स्यति। तपतु। अतपत।

---

(१) संस्कृतमिति पाठः।

तपेत् । तप्यात् । अताप्सीत् । अताप्ताम्) "झलो झलि" इति सिज्लोपः । (तितप्सति । तातप्यते । तातप्ति । तापयति । अतीतपत्) । चौरं सन्तापयतीत्यत्र "रुजार्थानां भाववचनानामज्वरेः" इति कर्मणि षष्ठी न भवति तत्राज्वरिसन्ताप्योरिति निषेधात् । (उत्तपते, वितपते) । "उद्विभ्यां तपः" इत्यकर्मकात्स्वाङ्गकर्मकाच्च तङ् । अकर्मकत्वं भासनार्थत्वेन । यदाऽयमस्वाङ्गकर्मकस्तदोत्तपति सुवर्णमित्येव भवति । तप्यते तपस्तापसः । अतप्त तपस्तापसः। "तपस्तपःकर्मकस्यैव" इति तपःकर्मकस्य तपेः कर्तुः कर्मवद्भावादात्मनेपदम् । अत्र तपेरर्जनमर्थ इति तापसस्तत्र कर्त्ता, यत्रासौ कर्मोपवासादीनि तपांसि तापसं सन्तपन्तीति तत्र तपिर्दुःखानुभावनार्थ इति कर्मणस्तपसो व्यापारो दुःखजननमिति क्रियाभेदाद्विष्यर्थमेतत् । एवकारः सूत्रे च सर्ववाक्यानां सावधारणार्थत्वादर्थप्राप्तस्यैवावधारणस्यानुवादकः। अत्र "तपोऽनुतापे च०" इति चकारेण कर्मकर्त्तरि चिणो निषेधात्सिच् । अत्रानुतापग्रहणस्य कर्मकर्त्रर्थत्वादन्वतप्त पापेन कर्मणेत्यत्रापि चिण्न भवति, अनुतापादन्यत्रोदतापि सुवर्णं सुवर्णकारेणेति भवितव्यमेव चिणा (तप्यम्) "पोरदुपधात्" इति यत् । (ललाटन्तप आदित्यः) "असूर्यललाटयोर्दृशितपोः" इति यथासंख्यात् ललाटे कर्मण्युपपदे तपेः खशि मुम् (शत्रुन्तपः) "सञ्ज्ञायां भृतॄवृजि" इत्यादिना खचि पूर्वपदस्य मुमागमः (द्विषन्तपः । परन्तपः) "द्विषत्परयोस्तापे" इति खचि णिलोपे "खचि ह्रस्वः" इति ह्रस्वः । द्विषतस्तकारस्य मुमि संयोगान्तलोपः । अत्र द्विषत्परयोरिति द्वितकारनिर्देशात्तकारान्तएव द्विषच्छब्दउपपदेऽयं प्रत्ययः, न तु लिङ्गविशिष्टपरिभाषया द्विषतीशब्दउपपदइति कर्मण्यणि द्विषतीतापइति भवति । तथा तापेरिति ण्यन्तस्य ग्रहणात्केवलादण्यणेव भवति । असंज्ञायां द्विषत्ताप इति, संज्ञायां तु "सञ्ज्ञायां भृतॄवृजि" इत्यादिना खजुक्तः । तपः असुन् । तपश्चरति तपस्यति । *कर्मणो रोमन्थतपोभ्यां वर्तिचरोः* इति रोमन्थतपोभ्यां कर्मभ्यां यथासंख्यं वर्त्तिचरोरर्थयोः क्यङिति क्यङ् । कर्मण इति प्रत्येकसम्बन्धापेक्षमेकत्वम् । "तपसः परस्मैपदं च" इति परस्मैपदम् । (तपस्या) क्यङन्तत्वात् "अ प्रत्ययात्" इति स्त्रियामकारः । तपः शीलमस्य तापसः । "छत्रादिभ्यो णः" इति णः । अत्र णेऽण्कृतं कार्यं भवतीति प्रागेवोक्तं, तेन तापसीत्यत्र ङीप् भवति । (तपस्वी) । "तपः सहस्राभ्यां विनीनी" इति मत्वर्थे विनिः । अत्रैवार्थे "अण्च" इत्यणि तापसः, तपस्वीत्यत्र "तसौ मत्वर्थे" तकारान्तं सकारान्तं च मत्वर्थे प्रत्यये भमिति भसञ्ज्ञयाऽऽकडारीययाऽनवकाशया "स्वादिष्वसर्वनामस्थाने" इति पदसञ्ज्ञाया बाधात् "ससजुषोरुः" इति रुत्वं न भवति । (तापः) । घञ् । सन्तापाय प्रभवति सान्तापिको रोगः । "तस्मै प्रभवति सन्तापादिभ्यः" इति चतुर्थ्यन्तात्सन्तापशब्दात्प्रभवत्यर्थे ठञ् । (निष्टपति । निष्टप्तम्) "निसस्तपतावनासेवने" इति षत्वम्, आसेवनं पौनः पुन्यं ततोऽन्यदनासेवनम् । अयमैश्वर्ये दिवादौ दाहे चुरादौ॥ ९६९ ॥

त्यज हानौ ॥ (त्यजति । तत्याज । तत्यजतुः । तत्यजिथ । तत्यक्थ । तत्यजिव । त्यक्ता । त्यक्ष्यति । त्यजतु । अत्यजत् । त्यजेत् । त्यज्यात् । अत्याक्षीत् । अत्याक्ताम् । तित्यजिषति । तात्यज्यते । तात्यक्ति । त्याजयति । अतित्यजत्) त्यागशीलस्त्यागी । संपृचादित्वात् घिनुण् । "चजोः कु घिण्ण्यतोः" इति कुत्वम् । त्याज्यमित्यत्र ण्यति प्रतिषेधे [त्यजेरुपसंख्यानम्] इति कुत्वाभावः । (त्यद्) "त्यजियजितनिभ्यो डित्" इत्यदिप्रत्यये डित्त्वाट्टिलोपः । (स्यः) "त्यदादीनामः" इति त्यदाद्यर्थविभक्तिनिमित्तनिबन्धनेऽन्त्यस्यात्वे पररूपे च त्यदादीनामित्यधिकारे "तदोः सः सावनन्त्ययोः" इति तकारस्य सकारः । (त्यौ त्ये) इत्यादौ सर्वनामकार्यं पूर्ववत् । अत्वादिस्त्यदादिप्राधान्येपीष्यतइति परमस्य इत्यादि भवति, अप्राधान्ये तु अतित्यदित्यादि । त्यस्येदं त्यदीयम् । "त्यदादीनि च" इति वृद्धत्वात् "वृद्धाच्छः" इति छः । त्यस्यापत्यं त्यादायनिः । "उदीचां वृद्धादगोत्रात्" इति फिञ्, अगोत्रप्रत्ययान्ताद्वृद्धादपत्ये फिञुदीचां मतेनेति सूत्रार्थः । स्यश्च देवदत्तश्च त्यौ । "त्यदादीनि

सर्वैर्नित्यम्" इति त्यदः शेषः। स च स्यश्च तावित्यत्र त्यदादीनां यत्परं तच्छिष्यतइति वा परस्य तदः शेषः स्त्रियां "त्यदादीनामः" इति विभक्तावत्वे टापि "हल्ङ्याब्भ्यः" इति सुपो लोपे स्या इति भवति। सन्निपातपरिभाषा "न यासयोः" इति निर्देशाल्लिङ्गादनित्यत्वज्ञापनान्न भवति। अयं ण्यन्तो द्विकर्मक इति सुधाकरादिमतेन नाथतावुक्तं, दृश्यते च प्रयोगः, "त्याजितैः फलमुत्खातैः" "पूषोष्मणा त्याजितमात्रभावः" इत्यादि। "अकथितं च" इत्यत्र गौः।पयस्त्यजति गवा पयस्त्याजयतीति प्रयुञ्जानयोः कैयटहरदत्तयोः प्रयोज्यस्य कर्मत्वमनभिमतम्॥ ९६६॥

षञ्ज सङ्गे॥ (सजति) "दंशसञ्जस्वञ्ज" इत्यनुनासिकलोपः। (ससञ्ज। ससञ्जतुः। ससङ्क्थ। ससञ्जिथ। ससञ्जिव)। "असंयोगाल्लिट्कित्" इति कित्त्वनिषेधात् "अनिदिताम्" इत्युपधालोपो न भवति। (सङ्क्ता। सङ्क्ष्यति। सजतु। असजत्। सजेत्) आशिषि कित्वाद्रुपधालोपे (सज्यात्। असाङ्क्षीत्। असाङ्क्ताम्) "वदव्रज०" इति वृद्धिः। तत्र हल्ग्रहणं हल्समुदायप्रतिपत्त्यर्थं, (सिसङ्क्षति) "स्तौतिण्योरेव" इत्यषत्वम्। (अभिषजति)। "उपसर्गात्" इति षत्वम्। अभ्यषजदित्यादौ तु "प्राक् सितादड्व्यवायेऽपि" इति षत्वम्, अभिषिषङ्क्षतीत्यत्र "स्तौतिण्योरेव" इति नियमं बाधित्वा "स्थादिष्वभ्यासेन च" इत्यादीना परस्य षत्वं, पूर्वस्य तु "उपसर्गात्" इत्यनेनैव सिद्धम्। अङ्गुलौ संगोऽस्याः अङ्गुलिषङ्गा यवागूः। "समासेऽङ्गुलेः" इति षत्वम्। (अभिषजति) "उपसर्गात्" इति षत्वम् (प्रासङ्गं वहति, प्रासङ्ग्यः) "तद्वहति रथयुगप्रासङ्गम्" इति द्वितीयान्तात् वहतीत्यर्थे यत्। प्रासङ्गो युगाद्यासङ्गः। (निषङ्गः)। "नौ सञ्जेर्घञ्" इति घञ् प्रत्ययः। घित्त्वात् कुत्वम्। (सक्थि) "असिसञ्जिभ्यः क्थिन्" इति क्थिन्। अजादौ विभक्तौ "इकोऽचि" इति नुमि सक्थीनीत्यादि तृतीयाद्यजादौ तु "अस्थिदधिसक्थि" इत्यादिना ङित्त्वादन्त्यस्य अनङादेशे "अल्लोपोऽनः" इत्यल्लोपे सक्थ्नेत्यादि। सप्तम्येकवचने अल्लोपस्य "विभाषा ङिश्योः" इति विकल्पितत्त्वात् सक्थ्नि सक्थिनीत्युभयं भवति। अङ्गाधिकारे तदन्तविधेरभ्युपगमात् प्रियसक्थ्नेत्यादावप्यनङ् भवति। यदानङ्विधौ नपुंसकेत्यनुवृत्तं तदस्थ्यादीनां विशेषणं नाङ्गस्येति प्रियसक्थ्ना शुनेत्यादौ लिङ्गान्तरेऽपि भवति। नपुंसकानुवृत्तिस्तु यदृच्छाशब्दानां पुल्लिङ्गानामस्थ्यादीनामनङ् मा भूदिति अस्थिर्नाम कश्चिदित्यादि। नन्वत्र

'अभिव्यक्तपदार्था ये प्रसिद्धा लोकविश्रुताः।
शास्त्रार्थस्तेषु कर्त्तव्यः शब्देषु न तदुक्तिषु॥

इति नास्ति प्रसङ्ग इति चेत्तर्हि मन्दधियामनुग्रहायैवानुवृत्तिराश्रिता, अत्रोदाहरणे सक्थिशब्दोऽस्वाङ्गवाची द्रष्टव्यः। स्वाङ्गवाचिनस्तु "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इति षच् समासान्तः प्रियसक्थ इति, स्वमङ्गं चेह स्वाङ्गं न तु पारिभाषिकम्, उत्तरसक्थं, मृगसक्थं, पूर्वसक्थम्, "उत्तरमृगपूर्वाच्च सक्थ्नः" इति तत्पुरुषे टच् समासान्तः। अत्र चकारेणोपमानादित्यनुवृत्तौ फलकमिव सक्थि फलकसक्थमित्यत्रापि भवति। अस्मादेव ज्ञापकात् असामान्यवचनेनापि सक्थिशब्देन उपमानस्य समासः। न विद्यते सक्थि यस्य असक्थि, असक्थः। "नञ् दुस्सुभ्यो हलि सक्थ्योरन्यतरस्याम्" इति पक्षेऽच् समासान्तः। एवं सुदुरोरुदाहार्यम्। एवं सुसक्थः। गौर्याः सक्थीव सक्थि यस्य गौरिषक्थः, "बहुव्रीहौ सक्थ्यक्ष्णोः" इति षच्। यदा गौर्याः सक्थीति षष्ठीसमासस्तदा "अच् प्रत्य०" इत्यत्र अजिति योगविभागादजुभयत्र, सुषामादिषु गौरिसक्थः संज्ञायादिति पाठात् षत्वं पूर्वपदस्य ह्रस्वत्वं च॥९६७॥

दृशिर् प्रेक्षणे॥ (पश्यति) "पाघ्रा०" इत्यादिना पश्यादेश इत्संज्ञकाशकारादौ शपि (ददर्श। ददृशतुः। ददर्शिथ। दद्रष्ठ। ददृशिव) "विभाषा सृजिदृशोः" इति थलि इडभावपक्षे "सृजिदृशोर्झल्यमकिति" इति अकिति झलादौ अमागमविधानात् अमि यणि "व्रश्च" इत्यादिना षत्वं च। (द्रष्टा। द्रक्ष्यति)। षत्वं, "षढोः कः सि" इति कत्वं (पश्यतु।

पश्येत् । आशिषि दृश्यात् । अदर्शत्, अदर्शताम्) । "इरितो वा" इत्यङि "ऋदृशोऽङि गुणः" इति गुणः । अङभावे "न दृशः" इति क्सनिषेधात् सिच्यमि यणादेशे हलन्तलक्षणायां वृद्धौ (अद्राक्षीत् । दिदृक्षते) "ज्ञाश्रुस्मृदृशां सनः" इति सनन्तात्तङ् । "हलन्ताच्च" इति सनः कित्त्वात् न गुणः, नाप्यमागमः । (दरीदृश्यते) रीक् । (दर्द्रष्टि । दर्द्रष्टः) लोटि हेर्धित्वेऽमागमे षत्वष्टुत्वजश्त्वेन दर्हड्ढि । दर्दृशानि । आटि "नाभ्यस्तस्य" इति गुणनिषेधः । लङिः तिप्सिपोः अदर्द्रक् । *क्विन्प्रत्ययस्य कुः* इत्यत्र क्विन् कुरिति वक्तव्ये प्रत्ययग्रहणं यस्मात् क्विनस्ति तस्य सर्वत्र पदान्ते कुत्वार्थमिति षत्वं बाधित्वा शकारस्यान्तरतम्यात्कुत्वेन खकारे "वावसाने" चर्त्वं ककारः । दर्शयति रूपतर्कं कार्षापणम् । (अदीदृशत् । अददर्शत्) "उर्ऋत्" वा । दृशेः सर्वत्र प्रयोज्यस्य रूपतकस्य कर्मत्वं, यदायं दृशिश्चक्षुःसाधने ज्ञानविशेषे वर्त्तते तदेदमुपसंख्यानं, यदा तु ज्ञानमात्रवचनस्तदा बुद्ध्यर्थत्वादेव सिद्धम् । तत्र बुद्ध्यर्था ज्ञानसामान्यवचना न तु विशेषवचना इति स्थितं, यदा तु ण्यन्तादात्मनेपदं तदा [अभिवादिदृशोरात्मनेपदउपसंख्यानम्] इति प्रयोज्यस्य कर्मत्वविकल्पनात् दर्शयते रूपतर्केण कार्षापणं रूपतर्कमित्युभयं भवति, पश्यन्ति भृत्या राजानं, दर्शयते भृत्यान् राजा भृत्यैरिति वा । संपश्यते [दृशेश्चेति वक्तव्यम्] इति संपूर्वात् अकर्मकात् तङ् (संददृशे । संद्रक्ष्यते । संपश्यताम् । समपश्यत । संपश्येत । आशिषि संदृक्षीष्ट । समदृक्षत) लिङ्सिचोः कित्वात् न गुणः, नाप्यमागमः । झलि सिज्लोपे प्रत्ययलक्षणेन "षढोः कः सि" इति कत्वं न भवति सिज्लोपस्य प्रत्ययलक्षणेऽसिद्धत्वादिति तत्रोक्तम् । कर्मणि दृश्यते (अदर्शि) स्यादिषु पक्षे चिण्वदिटि (दर्शिष्यते । द्रक्ष्यते । अदर्शिषाताम् । अदृक्षाताम् । दर्शिषीष्ट । द्रक्षीष्ट । दर्शिता) द्रष्टेत्युभयं भवति (दृश्यम्) "ऋदुपधाच्च" इति क्यप् (उत्पश्यः) "पाघ्राध्माधेट्दृशःशः" इति उपसृष्टात् कर्त्तरि शे पश्यादेशः। दर्शनं पश्यः । अत्र "पश्यार्थैः" इति निपातनात् भावे शः । अदर्शनमित्यादिनिर्देशात् ल्युडपि भवति । असूर्यंपश्या राजदाराः । गुप्तिपरं चैतत् । एवं नाम गुप्ता यदपरिहार्यदर्शनं सूर्यमपि न पश्यन्ति इति "असूर्यललाटयोः" इति खश् । अत एवासूर्येति निर्देशात् दृशिना नञ्संबन्धेन असमर्थत्वेऽपि समासः । (उग्रंपश्यः) । "उग्रंपश्य" इत्यादिना क्रियाविशेषणे कर्मण्युग्रशब्दउपपदे खशि निपात्यते (तादृक्) "त्यदादिषु दृशोऽनालोचने कञ् च" इति त्यदादिषु कर्मसूपपदेषु आलोचनात् चक्षुर्विज्ञानात् अन्यत्र वर्त्तमानात् दृशेः कञ् प्रत्ययः । चकारात् क्विन्, कञः कित्वात न गुणः, (तादृशी) । "टिड्ढाणञ्"इत्यादिना ङीप्, (तादृक्षः), [क्सश्च वक्तव्यः]इति क्सश्च । "आ सर्वनाम्नः" इति दृग्दृशवतुषु परतः सर्वनाम्नोऽन्त्यस्याकारः । [दृक्षे चेति वक्तव्यः] इति चाकारः (सदृक् । सदृशः । सदृक्षः) दृग्दृशवतुषु इति समानस्य सभावे [दृक्षे चेति वक्तव्यम्] इति दृक्षे च सभावे, अत एव दृगादिषु सभाववचनात् समानान्ययोश्चेति व्यक्तव्याद्वा कञ् । क्विन् कः । समानान्ययोरपि उपपदयोर्भवति । सदृशीत्यत्र पूर्ववन्ङीब् भवति । (परलोकदृश्वा) । "दृशेःक्वनिप्" इति कर्मण्युपपदे भूते क्वनिप् । स्त्रियां "वनो र च"इति ङीप् । (,परलोकदृश्वरी । सुदर्शनः) [भाषायां शासियुधिदृशिभ्यो युज्वक्तव्यः] इति खलोऽपवादो युच् । कन्यादर्शं वरयति । यां यां कन्यां पश्यति तां तां वरयतीत्यर्थः । "कर्मणि दृशिविदोः साकल्ये" इति कर्मण्युपपदेऽस्मात् साकल्ये गम्ये णमुल् । (पशुः) । "अर्दिदृशि" इत्युप्रत्ययः पशादेशश्च । यदायमसत्त्ववचनस्तदा चादित्वान्निपातत्वं, यथा लोधं नयन्ति पशुमन्यमाना इति, पशु सम्यगिति ह्यत्रार्थः । (दर्शनः) । "भृदृशि" इत्यादिना ऽनच् । (दृक्) संपदादित्वात् क्विप् । क्तिनपीष्यत इति क्तिनि (दृष्टिः) ॥ ९६८ ॥

दंश दंशने ॥ दंशनं दंष्ट्राव्यापारः । अत एव निर्देशादनुनासिकलोप इति स्वामी (दशति) तत्रापि "दंशसञ्ज"इति अनुनासिकलोपः शपि । (ददंश ददंशतुः । ददंशिथ । ददंष्ठ । ददंशिव । दंष्टा । दङ्क्ष्यति । दशतु । अदशत् । दशेत् । दश्यात्) "किदाशिषि" इति यासुटः कित्त्वा-

दनुनासिकलोपः (अदाङ्क्षीत् । अदांष्टाम्) "वदव्रज" इति वृद्धिः । (दिदङ्क्षति । दन्दश्यते) "लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्" इति यङ् भावगर्हायाम् । "जपजभदहदश" इत्यभ्यासस्य नुक् (दन्दंशीति । दन्दंष्टि । दन्दष्टः) यङ्विधौ नुग्विधौ च दशेति कृतनलोपस्य निर्देशात् यङ्लुकि अकृङित्यपि लोपो नुक् च भवति (दंशयति । अददंशत् । दंदशूकः) । "यजजपदशां यङः" इति यङन्ताद्रूकप्रत्यये "अतो लोपः" "यस्य हलः" इत्यल्लोपयलोपौ । (दंष्ट्रा) "दाम्नी" इत्यादिना ष्ट्रन् । अजादिषु दर्शनात् टाप् , अत्रैव पाठात् नलोपाभावश्च ष्ट्रनि, दशेति नलोपनिर्देशस्तु करणे ल्युडर्थः, दशनइति, दंष्ट्री । "व्रीह्यादिभ्यश्च" इति मत्वर्थीय इनिः । मूलकोपदंशं भूङ्क्ते, मूलकेन उपदंशमिति वा । "उपदंशस्तृतीयायाम्" इति णमुल् । "तृतीयाप्रभृतीनि" इति समासविकल्पः । वासरूपविधिना क्त्वापि भवति । मूलकेनोपदश्यते । उक्तं च सर्वत्रैवात्र प्रकरणे क्रियाभेदे सति वासरूपविधिना त्क्वापि भवतीति' । मूलकोपदंशमित्यत्र मूलकस्य भुजिनैवान्वयो न दंशिना । न ह्यत्र मूलकेन करणेनान्य उपदश्य भुङ्क्ते इत्यर्थः । ननु तेन तृतीयान्तस्योपदशिना सामर्थ्याभावात् उपपदत्वं नेति कथं प्रत्ययः, वचनं दशनोपदंशं भुङ्क्ते इत्यत्र सावकाशमुच्यते । यद्यत्रैव स्यात् करणइत्येव ब्रूयात् । तृतीयायामिति वचनात्तु सर्वत्र भविष्यति । तद्धि तृतीयान्तस्योपदशिना आर्थेऽप्यन्वये यथा स्यादिति, अस्ति चात्रार्थोऽन्वयः, कर्मापेक्षस्योपदंशेः सन्निहितेन मूलकेन संबन्धात् ॥ ९६९ ॥

कृष विलेखने ॥ विलेखनमिहाकर्षणं, तथा च पुरुषकारे कर्षतिश्चाकर्षणे प्रसिद्ध इति द्विकर्मकोऽयं, कर्षति शाखां ग्रामम् । (चकर्ष । चकृषतुः । चकर्षिथ । चकृषिव । क्रष्टा । कर्ष्टा) "अनुदात्तस्य चर्दुपधस्य" इत्यत्राम्विकल्पः (कर्क्ष्यति । क्रक्ष्यति । कर्षतु । अकर्षत् । कर्षेत् । कृष्यात् । अकृक्षत् । अकृक्षताम्) "शल इगुपधा०" इति क्सः । यदा "स्पृशमृशकृषतृपदृपां सिज्वा" इति सिच् तदा पूर्वमेवामागमविकल्पे हलन्तलक्षणायां वृद्धौ (आकार्क्षीत् । आकार्ष्टाम् । अक्राक्षीत् । अक्राष्टामित्यादि । चिकृक्षति) । "हलन्ताच्च" इति सनः कित्वान्न गुणो नाप्यमागमः । (चरिकृष्यते । चरिकर्ष्टि । चरिक्रष्टि चरिकृषीति । चरीकृष्टः । चरिक्रष्ट इत्यादि) । लोटि हेर्धित्वष्टुत्वजश्त्वयोरमागमपक्षे (चरीक्रड्ढि) । लङि तिप्सिपोः हल्ङ्यादिलोपे च अचरीकर्ट् । अमागमपक्षे अचरीक्रट् । एवं वचनान्तरेषु सर्वेषु रिक्रीकोश्च उदाहार्यम् । कर्षयति शाखां ग्रामं देवदत्तं यज्ञदत्तः (अचीकृषत् । अचकर्षत्) "उत्कर्द्वा" । अत्र कृषेः प्रापणार्थत्वेऽपि अस्ति फलतया गतेः प्रतीतिरिति गत्यर्थत्वात् "गतिबुद्धि" इति प्रयोज्यस्य कर्मत्वम् , अत्र ग्रहणमुपसर्जनीभूतयापि गत्या तदर्थत्वे लिङ्गम् , अन्यथा ण्यन्तस्य गमनार्थ इति किं णिग्रहणेन । अत एव तत्र नीवह्योः प्रतिषेधः कृतः । कर्मणि लादयो नयत्यादिवज्ज्ञेयाः । (कृष्यम्) । "ऋदुपधाच्च" इति क्यप् । कर्षतीति कृषः । इगुपधलक्षणः कः । पाण्युपकर्षं पयः पिबति, पाणिना उपकृष्य, पाणावुपकृष्य वा पयः पिबतीत्यर्थः । "सप्तम्यां चोपपीडरुधकर्षः" इति सप्तम्यन्ते चशब्दात् तृतीयान्ते च उपपदे उपपूर्वात् अस्मात् णमुल् । तृतीयाप्रभृतित्वात् समासविकल्पनात् पाणावुपकर्षम् , पाणिनोपकर्षमित्यपि भवति । क्रियाभेदेन वासरूपेण क्त्वापि भवतीति प्रागेवोक्तम् । अत्र णमुल्विधावुपसर्गग्रहणं पीडैव विशेषणमिति भाववृत्तौ, भट्टिकारस्त्वतन्त्रं मन्यते । यदाह धनु ररिभिरसह्यमुष्टिपीडं दधान इति । इदं तावत् साहसमात्रं, यदाचार्येण प्रयुक्तस्यातन्त्रत्वाङ्गीकरणं, यदपि पीडिनैव संन्बधकथनं तदपि न न्याय्यं, बहूच्कस्यास्य पूर्वनिपातायोगात् , अत एव वृत्तिन्यासपदमञ्जर्यादिषु संबन्धोऽङ्गीकृतः । कर्ष्टा शाखां, क्रष्टा शाखाम् । अत्र तृनि "ञ्नित्यादिर्नित्यम्" इति प्रकृतेराद्युदात्तत्वेऽप्युपदेशावस्थायां कृषेरनुदात्तत्वात् असागमविधौ चोपदेशग्रहणानुवर्त्तनात् पक्षे ऽमागमो भवत्येव । अयं तुदादावपि ॥ ९७० ॥

दह भस्मीकरणे ॥ (दहति । ददाह । देहतुः । देहिथ । ददग्ध) थलि भारद्वाजनियमा-

दिड्विकल्पः । तत्रानिट्पक्षे "दादेर्धातोर्घः" "झषस्तथोर्धोऽधः," "झलां जश् झशि" इति घत्वधत्वजश्त्वानि (दग्धा । धक्ष्यति) हकारस्य घत्वे "एकाचः" इति भष्भावेन दकारस्य धकारे धकारस्य "खरि च" इति चर्त्वं (दहतु । अदहत् । दहेत् । दह्यात् । अधाक्षीत) घत्वादि पूर्ववत् । अदाग्धाम्, झलि सिज्लोपः (दंदह्यते) "लुपसद" इत्यादिना यङः "जप-जभ" इति नुक्, (दंदग्धि । दाहयति । अदीहत् । परिदाही) विनुण् । (निदावः । अव-दाघः । परिदाघः) संज्ञायां मघमेघनिदाघावदाघा इति न्यङ्क्वादिपाठात् कुत्वं, दहनः ॥९७१॥

मिह सेचने (मेहति । मिमेह । मिमेहिथ । मिमिहिव) क्रादिनियमादिट् (मेढा) ढत्व-धत्वष्टुत्वढलोपगुणाः (मेक्ष्यति) षत्वकत्वे, (मेहतु । अमेहत् । मेहेत् । मिह्यात् । अमि-क्षत्) शलइगुपधात्" इति क्सः । (मिमिक्षति) "हलन्ताच्च" इति सनः कित्त्वान्न गुणः । (मेमिह्यते । मेमेढि । मेमीढः) ढलोपौ, दीर्घः (मेहयति । अमीमिहत् । मेढ्रम्) "दाम्नी" इत्यादिना ष्ट्रन् । (मेघः) अचि, संज्ञायां मेघेति न्यङ्क्वादिषु पाठात् कुत्वं, (मीढ्वान्) सा-ह्वान्मीढ्वांश्चेति क्वसावद्वित्वानिट्त्वोपधादीर्घत्वढत्वानि निपात्यन्ते (मिहिरः) इषिमि-हीत्यादिना किरच् । स्कन्दादय एतदन्ता अनुदात्ता उदात्तेतः ॥ ९७२ ॥

कित निवासे रोगापनयने च ॥ अयमुदात्तेत् । गुपिवदयमपि नित्यसन्नन्तः (चिकि-त्सति) 'गुप्तिज्" सन् । अस्य सनो ऽनार्द्धधातुकत्वान्नेटःप्रसङ्गो नापि गुणस्य । अत्र वृत्तौ व्याधिप्रतीकारे सनिति यदुक्तं तदुपलक्षणं, यतः स्वयमेव "क्षेत्रियच् परक्षेत्रे चिकित्स्यः" इत्यत्र निग्रहापयननाशनाद्यर्थान् वक्ष्यति, तथा च य एवं विद्वान्विचिकित्सतीत्यादौ संशयेऽपि प्रयुज्यते, निघण्टुरपि–'विचिकित्सा तु संशयः' इति (चिकित्सिषति । इच्छासनन्तादेव सन्-प्रतिषेधः, केतयतीति चौरादिकस्य । अत्राभरणकारो गुपादिसूत्रे गुप्तिज्किद्भ्य इत्यनुक्रम्य गुपादिष्वनुबन्धकरणमात्मनेपदार्थमिति भाष्ये वार्त्तिके चोक्तत्वात्कित् परस्मैपदिषु पठितोऽपि आत्मनेपदी । न च गुपादिष्विति बहुवचनं वक्ष्यमाणमर्थापेक्षमिति वक्तुं युक्तं, यतस्तु खलु तत्र गुप्तिज्किदित्यनुक्रम्य गुपादिष्वित्युक्तमित्याह । कैयटे तु क्रमदर्शनाय कितिः पठितो न त्वयमनुदात्तेदिति । हरदत्तोऽपि गुपादिष्विति बहुवचनं मान्बधसूत्राभिप्रायं कितिस्तु परस्मै-पदीत्याह । इन्दुरपि गुप्तिजावनुदात्तेतौ न कितिः, तस्य चिकित्सतीत्येव प्रयोग इति, एवं स्वामिकाश्यपादयोऽपि । एवं बहुवचनं मान्बधसूत्राभिप्रायम्, एवं बहुभिर्महाग्रन्थैर्विरोधा-त्परस्मैपदिषु पाठाच्चाभरणाद्युक्तं यत्किंचित्(१) ॥ ९७३ ॥

दान खण्डने ॥

शान तेजने ॥ इमावपि नित्यसनन्तौ स्वरितेतौ (दीदांसति । दीदांसते । शीशांसति । शीशांसते) "मान्बध" इत्यादिना सनीत्वे च कृतेऽभ्यासस्य दीर्घः, अयं नार्द्धधातुक इति नेट्प्रसङ्ग इत्युक्तम् । दानेरार्जवे, शानेर्निशान, इति वृत्तावर्थविशेषे गायं सनुक्तः (दानयति । शानयतीत्यादि चौरादिकस्य ॥ ९७५ ॥

डुपचष् पाके ॥ इतो वहत्यन्ता अनुदात्ताः स्वरितेतः (पचति । पपाच । पेचतुः । पपक्थ । पेचिथ । पक्ता, पक्ष्यति । पचतु । अपचत् । पचेत् । पच्यात् । अपाक्षीत् । पचते । पेचे । पक्ता । पक्ष्यते । पचताम् । अपचत । पचेत । पक्षीष्ट । अपक्त । अपक्षाताम्,) झलि सिज्लोपः । स्वामिदासौ पचत इत्यत्र दासधर्मस्य स्वामिन्यारोपात् परस्मैपदम् । पचेते इत्यत्र स्वामिधर्मस्य दासे समारोपात्तङिति कैयटादौ (पिपक्षति । पिपक्षते । पापच्यते । पापक्ति । पापक्तः) कृष्टे स्वयमेव पच्यन्त इति कृष्टपच्याः । राजसूयादौ क्यपि निपात्यते, कर्मकर्त्तरि निपातनमिति वृत्तिः । (पचः) । अच् । श्वानं पचतीति श्वपचः । पचादिपा-ठसामर्थ्यात्कर्मोपपदादप्यच् । उक्तं च—

---

(१) चिन्त्यमिति २ पु० पा० ।

अज्विधिः सर्वधातुभ्यः पठ्यन्ते च पचादयः ।
अण्बाधनार्थमेव स्यात् सिध्यन्ति श्वपचादयः ॥

इति (श्वपाकः । मांसपाकः । पिण्डपाकः । कपोतपाकः) अत्र न्यङ्क्वादिपाठात्कर्मण्यणि कुत्वम् (दूरेपाकः । फलेपाकः) न्यङ्क्वादिपाठादचि वृद्धिकुत्वे । "तत्पुरुषे कृति" इत्यलुक् । न्यङ्क्वादिपाठादेव चेमौ कर्मकर्त्तरीति वृत्तौ । क्षणेपाकइति केचित्पठन्ति, दूरेपाका फलेपाकेति टाबन्तावन्ये । उकारान्तावपरे (दूरेपाकुः) फलेपाकुरिति उप्रत्ययो निपातनादिति वृत्तौ (प्रस्थंपचः । मितंपचः । नखंपचः) "परिमाणे पचः" इति "मितनखे च" इति परिमाणवाचिनि कर्मण्युपपदे मितनखयोश्च खच् । उत्पचिष्णुः । "अलंकृञ्" इत्यादिनेष्णुच् (पचेलिमाः शालयः) [केलिमर उपसंख्यानम्] इति केलिमर् । अयं कर्मकर्त्तरीति वृत्तिः । रेफ "उपोत्तमं रिति" इति स्वरे विशेषणार्थः । पक्त्रिमम् । "ड्वितः क्त्रिः" इति क्त्रिप्रत्यये "क्त्रेर्मम्नित्यम्" इति मप् (पाकेन निर्वृत्तं पाकिमम्) ['भावप्रत्ययान्तादिमप् वक्तव्यः'] इति इमप् (पक्तिः) "स्थागापापचः" इति क्तिन् । षित्वादङि पचा । (पक्वः । पक्ववान्) इति "पचो वः" इति निष्ठातकारस्य वकारः । तस्य पूर्वत्रासिद्धत्वाज् झल्परत्वात्" चोः कुः" इति कुत्वम् । प्रपक्वानि फलानीत्यत्र "कुमति च" इति कवर्गवत्युत्तरपदे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य प्राप्तं णत्वं [युवादीनां प्रतिषेधः] इति न भवति (पाकः । पचनम्) मांसस्य पाको मांस्पाकः । मांसपाकः । एवं मांसस्य पचनं (मांस्पचनम् । मांसपचनम् ।) मांसस्य पचि युड्घञोरिति पक्षेऽन्तलोपः । (पचनः) "भूशी"त्यादिना युच् । अयं द्विकर्म्मक इति नाथतावुक्तं, तेन तण्डुलानोदनं पचतीति भवति । अत्र कैयटकारः । अत्र विक्लेदनोपसर्जननिवर्तनार्थो धातुरिति तण्डुलानां विक्लेदनापेक्षं कर्मत्वम् । ओदनस्य तु प्रधानभूतनिवर्त्तनापेक्षमिति तण्डुलानोदनं पचतीतिप्रयोगः । प्रकृतिविकाराभावविवक्षायां तण्डुलैरोदनं पचतीति साधकतमत्वविवक्षायाम् । उदुम्बरः फलं पच्यते । [दुहिपच्योर्बहुलं सकर्म्मकयोः] इति कर्त्तुः कर्मवद्भावः । अत्र कैयटो वृक्षस्य कर्तृत्वविवक्षायामन्यतमप्राप्ते वचनम् । अन्ये त्वाहुः । पचिरत्र विषये द्विकर्म्मकः । वृक्षस्य पाकमन्तरेण फलपाकासम्भवात् वृक्षोऽकथितं कर्म्म । तस्यैव च यदा कर्तृत्वविवक्षा तदाऽयं कर्म्मवद्भावः । एवंविधे विषये कर्म्मवद्भाव इष्यते । न पुनरोदनं पचतीत्यादाविति । व्यक्तीकरणे पच्चत इत्यादि गतम् ॥ १७६ ॥

षच समवाये ॥ केचिदमुं न पठन्ति ते ब्रुविशासिगुणेन च यत्सचत इति भाष्यप्रयोगं नतुदरेण संख्या सचयइत्यादिप्रयोगं षच सेचनइत्यस्यानुदात्तेतो धातूनामनेकार्थत्वात्समवायार्थस्य सम्बध्यमानकर्तृके व्यापारे वर्त्तमानस्य समर्थयन्ते । अन्ये तु षच समवाये षच व्यक्तायां वाचीति परस्मैपदिषु गतस्य चकारान्तस्य स्थानेऽमुं पठन्ति । यदाह "अकथितं च" इत्यत्र हरदत्तः । सचतिः सर्वतः सम्बध्यतइति वृत्तिमुपादाय षच समवाये स्वरितेत् । केचित् परस्मैपदिषु धातुमेनं पठन्ति । षच समवाये रपलप व्यक्तायां वाचीति, तआहुः सच सेवनइत्यस्यानुदात्तेतोऽनेकार्थत्वाद्धातूनां समवाये वृत्तिरिति । पुरुषकारे तु हरदत्तोक्तमनुक्रम्य सचतइति भाष्यानौचित्यात्परस्मैपदिषु पाठोऽयुक्त इत्युक्तम् । एवं षच सेचनइत्यस्यानुदात्तेतोऽनेकार्थत्वाद्धातूनां समवाये वृत्तिरिति हरदत्तोक्तं प्रौढिवादमात्रम् । न्यासे तु सचतइत्यस्य समवायइत्येव धातुरुक्तः, एवञ्च षचेत्येव परस्मैपदिषु पाठः । चान्तकाण्डं चैवमनुसृतं भवति । एवमेव मैत्रेयरक्षितादयः । शाकटायनक्षीरस्वामिनौ तु सप्तसप्तीश्चोदाहृत्य सचेति कश्चित्पठतीत्याहतुः (सचति) सचतइत्यप्याहेत्युक्तम् । एवं च न्यासकारादीनां बहूनामभिमतत्वादयं धातुरस्माभिः पठितः । अयं च पचिं पचिमित्यादौ व्याघ्रभूतिकारिकायां चकारान्तानामनिटां परिगणनात्सेट् । अनिटां मध्ये पाठस्तु स्वरितेत्त्वसाम्यात् । (सचति । ससाच । सेचतुः । सेचिथ । सेचिव । सचिता । सचिष्यति । असचत् । सचेत् ।

आशिषि सच्यात् । असचीत् । असाचीत्) "अतो हलादेः" इति वा वृद्धिः । (सिसचिषति) "स्तौतिण्योरेव" इत्यषत्वम् (सासच्यते । सासक्ति । साचयति । असीषचत्) सिषाचयिषतीत्यत्र णेः सनि षत्वम् । सचतइत्यादि सेचनार्थवत् ॥ ९७८ ॥

भज सेवायाम् (भजति । बभाज । भेजतुः । भेजिथ । बभक्थ । भेजिव) "तॄफलभजत्रपश्च" इति किति लिटि सेटि थलि च परत्वादेत्वाभ्यासलोपौ (भक्ता । भक्ष्यति । भजतु । अभजत् । भजेत् । भज्यात् । अभाक्षीत् । बिभक्षति । बाभज्यते । बाभक्ति । भाजयति । अबीभजत् । भजते । भेजे । भक्तासे । भक्ष्यते । भजताम् । अभजत । भजेत । भक्षीष्ट । अभक्त । अभक्षाताम् । बिभक्षते) (विभक्तव्यो विभज्यः) "द्विवचनविभज्योपपदे" इति निपातनाद्यत् (जन्मभाक्) "भजो ण्विः" इति कर्म्मोपपदादस्माण्ण्विः (भागी) संपृचादित्वाद्घिनुण् । (भागः) "खनो घ च" इति चशब्दात् घञ् कुत्वम् । सुभगस्य भावकर्म्मणी सौभाग्यम् । ब्राह्मणादिपाठात् ष्यञ् । "हृद्भग" इत्युभयपदवृद्धिः । एवं दौर्भाग्यमपि । सुभगाया अपत्यं सौभागिनेयः । "कल्याण्यादीनामिनङ्" इतीनङादेशोऽन्त्यस्य पूर्ववदुभयपदवृद्धिः । एवं (दौर्भागिनेयः । भागः) घञ् । भागोऽस्मिन् वृद्धिरायो लाभः शुल्क उपदा वा दीयते भाग्यं शतम्, भागिकं शतम् । "भागाद्यच्च"इति दीयमानाद्वृद्ध्यायादीनामन्यतमोपाधिकात्प्रथमान्तादस्मिन्निति सप्तम्यर्थे यत् । चकाराट्ठन् । भाग एव भागधेयम् । "भागरूपनामभ्यो धेयः" इति स्वार्थे धेयः । (भ्राता) "नप्तृनेष्टृ" इत्यादिना तृनि भ्रादेशो निपात्यते, भ्रातरावित्यादौ सर्वनामस्थाने "अप्तृन्"इति दीर्घो न भवति, तृन्नन्तत्वादेव नप्त्रादीनां दीर्घे सिद्धे तेषां पुनर्ग्रहणादौणादिकानां संज्ञाशब्दानामेषामेवेति नियमार्थत्वात् । "भ्रातृपुत्रौ" इत्यत्र तु भाष्ये विभक्तीति भ्रातेति व्युदपादि (भ्रातुरपत्यं भ्रातृव्यः । भ्रात्रीयः) "भ्रातुर्व्यच्च" इति व्यच्छौ (भ्रातृव्यः सपत्नः) "व्यन्सपत्ने" इतिव्यन् (सौभ्रात्रम् । दौर्भ्रात्रम्) युवादिपाठाद्भावकर्म्मणोरण् । भ्राता च स्वसा च भ्रातरौ । "भ्रातृपुत्रौ स्वसृदुहितृभ्याम्" इति भ्रातुः शेषः । कल्याणी भक्तिरस्य कल्याणीभक्तिः । प्रियादिषु भक्तिशब्दस्य पाठात् "स्त्रियाः पुंवत्" इति पुंवद्भावो न भवति । दृढभक्तिरित्यत्र कुक्कुटाण्डादिवत्स्त्रीपूर्वपदस्याविवक्षितत्वात्सिद्धम् । प्रतिपादितं चैतद् भाष्यादौ । भञ्जो आमर्दनइति रुधादौ, भज विश्राणने, भाज पृथक्कर्मणीति द्वयं चुरादौ । तथात्रैव भजेति भाषार्थो दण्डके ॥ ९७७ ॥

रञ्ज रागे (रजति) "रञ्जेश्च" इति शप्यनुनासिकलोपः (ररञ्ज । ररञ्जतुः । ररङ्क्थ । ररञ्जिथ (क्रादिनियमादिट् । थलि भारद्वाजनियमादिड्विकल्पः (रङ्क्ता । रङ्क्ष्यति । रजतु । अरजत् । रजेत्) आशिषि रज्यात् "किदाशिषि"इति कित्त्वादनुनासिकलोपः (अराङ्क्षीत् । अराङ्क्ताम् । अराङ्क्षुः । रजते । ररञ्जे । ररञ्जिषे । रङ्क्तासे । रङ्क्ष्यते । रजताम् । अरजत । रजेत रङ्क्षीष्ट । अरङ्क्त । अरङ्क्षाताम् । रिरङ्क्षति । रिरङ्क्षते । रारज्यते । रारङ्क्ति । रारक्तः) तसौ ङित्त्वादनुनासिकलोपः । रजयति मृगान् । अरीरजत् । "रञ्जर्णौ मृगरमणे" इति नलोपः । "जनीजॄष्क्नसुरञ्जोऽमन्ताश्च" इति मित्त्वाद्ध्रस्वः । मृगादन्यत्र रञ्जयति पक्षिणः । तथा रमणादन्यत्रापि रञ्जयति मृगान् तृणादिदानेन वशयतीत्यर्थः । कर्मकर्त्तरि "कुषिरञ्जोः प्राचां श्यन्परस्मैपदं च"इति पक्षे श्यन्परस्मैपदयोः रज्यति वस्त्रं स्वयमेव (रज्यतु । अरज्यत्) रज्येदित्ति भवति, अन्यदा यगात्मनेपदयोः रज्यतइत्यादि । श्यनो ङित्त्वाद्यकः कित्त्वाच्च नलोपः, श्यन्विधौ रज्यन्तीत्यत्र "शप्श्यनोर्नित्यम्"इति नित्यनुमर्थः, एते च श्यन्परस्मैपदे प्राचांग्रहणस्य व्यवस्थितविभाषात्वाद्यग्विषये । तथा च वार्त्तिकम् । [कुषिरञ्जोःश्यन्विधाने लसार्वधातुकवचनमवचने हि लिङ्लिटोः प्रतिषेधः स्यादिविषये च] इति । अत्र लिङाशीर्विषयः, स हि सार्वधातुकप्रतियोगी, तेन रङ्क्षीष्ट वस्त्रं स्वयमेव (ररंसे । रङ्क्तासे । रङ्क्ष्यते । अरञ्जि) अरङ्क्षातामित्यत्र श्यन्परस्मैपदं न भवति (रजकः) । "शिल्पिनि ष्वुन्"

[रजकरजनरजः सूपसंख्यानम्] इति नलोपः । रजकस्य वस्त्रं ददातीति भाष्ये प्रयोगादिति । न्यासे त्वकृङ्क्त्यपि रञ्जेर्मित्त्वविधानाल्लिङ्गान्नलोप इति तरङ्गिणीपदमञ्जर्योः । इदं प्रौढिवादमात्रम्, यतो मित्त्वं रञ्जेर्णाविति नलोपे रजयति मृगानित्यत्र ह्रस्वार्थं स्यात् । तथा नलोपाभावे (अरञ्जि । अराञ्जि) रञ्जरञ्ज, राञ्जराञ्जमित्यत्र "चिण्णमुलोः"इति दीर्घविकल्पार्थं स्यात् । "दंशसञ्जस्वञ्जां शपि" इत्यत्र भाष्ये तु रजकरजनरजः सूपसंख्यानमिति नलोपं प्रेरयित्वा कित एवैते त्वौणादिका इति परिहृतम् । अत्र कैयटेन रजक इति "क्वुन् शिल्पिसंज्ञयोः"इति क्वुन्प्रत्ययः । रजकीति तु "पुंयोगादाख्यायाम्" इति ङीषि । अपुंयोगे तु ङीषा न भाव्यमिति भाष्यकाराभिप्रायः । रजनमित्यत्र "रञ्जेः क्युन्" इति क्युन्प्रत्ययः, स च बाहुलकादिति द्रष्टव्यः । तेन रजनीति ङीप् भवति । रज इत्यत्र "भूरञ्जिभ्यां कित्" इत्यसुन्प्रत्ययः किद्वतीत्युक्तम् । एवमेतत्पदमञ्जर्यामपि (रागी) संपृचादित्वात घिनुण् । अत्रैव रजेति निर्देशान्नलोपः (रजनं रागः) रज्यतेऽनेनेति वा । "घञि च भावकरणयोः" इति नलोपः (अन्यत्र स्वयमेव रज्यन्ति प्रेक्षकानां मनांसि यत्रेति रङ्गः । "हलश्च"इति घञ् । विरागमर्हति वैरागिकः । "छेदादिभ्यो नित्यम्" इति तदर्हतीति विषये ठक् । अत्र "विरागो विरङ्गं च" इति पाठाद्विरङ्गादेशः । (रजः । असुन्) विरजीकरोति । "अरुर्मनः" इत्यादिना च्विसलोपौ । "अस्यच्वौ" इत्यकारस्येकारः (सरजसम्) "अव्ययं विभक्ति" इत्यादिना साकल्येऽव्ययीभावः । "अव्ययीभावे चाकाले" इति सहस्य सः । "अचतुर" इत्यादिपाठादच् । अयमव्ययीभाव इति वृत्त्यादौ । तेनान्यत्र सरजस्कं पङ्कजमित्येव भवति । यस्तु बहुव्रीहौ सरजसमिति भारविप्रयोगः स वामनालङ्कारे दूषितः, सरजसमित्यव्ययीभाव इति । रजोऽस्यास्तीति रजस्वला । "रजः कृष्यासुती"इत्यादीना मत्वर्थे वलच् । "तसौ मत्वर्थे" इति भसंज्ञया पदसंज्ञाया बाधनात्सकारस्य न रुत्वम् (रजतम्) पृषीरञ्जिकिदित्यतच् । तस्य विकारो राजतम् । "प्राणिरजतादिभ्योऽञ्" इति षष्ठ्यन्ताद्विकारेऽञ्प्रत्ययः । अत्र"अनुदात्तादेः"इत्येवाञि सिद्धे पुनरञ्विधानं "मयड्वैतयोः" इति विकारमयटो बाधनार्थमयं द्विवादावपि ॥ ९७९ ॥

शप आक्रोशे ॥ इहाक्रोशो विरुद्धानुध्यानम् । (शपति । शशाप । शेपतुः । शशप्थ । शेपिथ) क्रादिनियमादिट् । थलि भारद्वाजनियमादिड्विकल्पः (शप्ता । शप्स्यति । अशपत् । शपेत् । शप्यात् । अशाप्सीत् । अशाप्ताम् । शपते । शेपे । शप्तासे । शपताम् । अशपत शपेत । शप्सीष्ट । अशप्त । अशप्साताम् । शिशप्सति । शाशप्यते । शाशप्ति । शापयति अशीशपत्) देवदत्ताय शपते । देवदत्तं शपथेन किं चित्प्रापयतीत्यर्थः । "शप उपालम्भने"इति अकर्त्रभिप्राये तङ्, "श्लाघह्नुङ्" इत्यादिना ज्ञीप्स्यमानस्य संप्रदानत्वाच्चतुर्थी, वाचा शरीरस्य स्पर्शनमुपलम्भनमिति वृत्तिः । अत्र हरदत्तः । त्वत्पादौ स्पृशामि नैतन्मयाकृतमित्येतद्रूपः शपथविशेष इति । भागवृत्तिकारस्य तूपलभनं प्रकाशनं, देवदत्ताय शपते किंचित्प्रकाशयतीत्यर्थः । त्वचा शरीरस्य स्पर्शनमित्यदः कस्य चित्काव्यमिति । कैयटे चोपलम्भनं प्रकाशनमिति । शाकटायनस्तूपलम्भनं प्रकाशनं देवदत्ताय शपतइत्येवंभूतोऽसाविति देवदत्तमाचष्ट इत्यर्थः । अथ वा स्वाभिप्रायस्य परत्राविष्करणमुपलम्भनं शपथः । देवदत्ताय शपते । वाचा मात्रादिशरीरस्पर्शनेन देवदत्ते स्वाभिप्रायं प्रकाशयतीत्यर्थ इति । चन्द्रभोजकौमारास्तु प्रोषितस्य भावयोरुपलब्धव्ययोः किं चिदासेवनमुपलम्भनम्, देवदत्ताय शपतइति प्रोषितस्य देवदत्तस्य भावाभावायोरुपलब्धयोः किं चिदासेवतइत्यर्थः । भोजादयस्तु शपः शपथइति । "शीङ्शपिगमिवञ्चिविजिप्राणिभ्योऽथः" इत्यथः प्रत्ययः (शबलः) "शपेर्बश्च"इति कलप्रत्यये बकारश्चान्तादेशः (शब्दः) "शाशपिभ्यान्ददनौ" इति दन्, "शब्दवैर०"इति निपातनात् बत्वं, शब्दं करोति शब्दायते । "शब्दवैर०" इति क्यङ् । शब्दं करोति शाब्दिकः । "शब्दर्दुरं करोति" इति द्वितीयान्तात्करोतीत्यर्थे ठक् ।

माशब्द इत्याह माशब्दिकः । [तदाहेति माशब्दादिभ्य उपसंख्यानम्] इति ठक् । एवं नैत्यशब्दिक इत्यादि । अयं दिवादावपि ॥ ९८० ॥

त्विष दीप्तौ ॥ (त्वेषति । तित्वेष । तित्विषतुः । तित्वेषिथ । तित्विषिव) क्रादिनियमादिट् । (त्वेष्टा । त्वेक्ष्यति । त्वेषतु । अत्वेषत् । आशिषि त्विष्यात् । अत्विक्षत् । अत्विक्षाताम्) "शल इगुपधादनिटः क्सः" । (त्वेषते । तित्विषे । त्वेष्टासे । त्वेक्ष्यते । त्वेषताम् । अत्वेषत । त्वेषेत । त्विक्षीष्ट । अत्विक्षत । अत्विक्षाताम्, अत्विक्षन्त) "क्सस्याचि" इत्यलारः (तित्विक्षति । तित्विक्षते । तेत्वेष्टि । तेत्विष्टः । (त्वेषयति) अतित्विषत् । त्वष्टा) "त्विषेर्देवतायामकारश्चोपधायाः" इति तृन् उपधाया अत्वं, त्वष्टारौ । "ऋतोऽङि" इति गुणे "अप्तृन्" इत्यादिना दीर्घोऽसंबुद्धौ सर्वनामस्थाने । तृन्नन्तत्वादेव सिद्धे नप्त्रादीनां ग्रहणं व्युत्पत्तिपक्षे नियमार्थं संज्ञाशब्दानामेषामेवेति वृत्तौ । त्वष्टुरिदं (त्वाष्ट्रम्) अचामादेरचो वृद्धिरन्त्यलक्षणां वृद्धिं बाधत इति वृत्तौ । (त्विट्) संपदादित्वात् क्विप् । अवपूर्वोऽयं दाननिरसनयोरिति मैत्रेयादयः ॥ ९८१ ॥

यज देवपूजासङ्गतिकरणदानेषु ॥ (यजति । इयाज । ईजतुः । इयजिथ । इयष्ठ । ईजिव) क्रादिनियमादिट् । थलि भारद्वाजनियमादिड्विकल्पः । इडभावे झल्परत्वात् "व्रश्च" इत्यादिना षत्वम् । किति "वचिस्वपियजादीनां किति" इति सम्प्रसारणे पुनः प्रसङ्गविज्ञानाद् द्विर्वचनमकिति *लिट्यभ्यासस्योभयेषाम्* इति वच्यादीनां ग्रह्यादीनां चाभ्यासस्य सम्प्रसारणम् । अत्राधिकारादेवोभयेषामिति सिद्धे पुनस्तत्करणम् विव्यत्यादौ परमपि हलादिशेषं बाधित्वा सम्प्रसारणं यथा स्यादिति । (यष्टा । यक्ष्यति । यजतु । अयजत् । यजेत्) आशिषि कित्त्वात्सम्प्रसारणे (इज्यात् । अयाक्षीत् अयाष्टाम् । यजते । ईजे । यष्टासे । यक्ष्यते । यजताम् । अयजत । यजेत । यक्षीष्ट । अयष्ट । अयक्षाताम् । यियक्षति। यियक्षते । यायज्यते । यायष्टि । याजयति। अयीयजत् । इज्यते) यकि संप्रसारणे ऐज्यतेत्यत्र लङ्गमङ्गं वापेक्षमाणादडागमादन्तरङ्गत्वात्पूर्वं लादेशः । कृते च लादेशे नित्यत्वादटः पूर्वं यगटारुभयोरपि । कृताकृतप्रसङ्गित्वाविशेषेण यकि कृते तदन्तस्याङ्गस्य अकृते तु केवलस्येति शब्दान्तरप्राप्त्या अटोऽनित्यत्वं, कृते च यकि नित्यत्वात्सम्प्रसारणे पश्चादजादित्वादाडागमः । नन्वत्राटः प्राप्तिराटा बाध्यते न तु संप्रसारणेनैवेति 'यस्य च लक्षणान्तरेण निमित्तं व्याहन्यते न तदनित्यम्'इति अट्कथमनित्यः । अत्र'हरदत्तः–'यस्य च लक्षणान्तरेण' इति न्यायोऽनित्यत्वादिह नाश्रीयत इति, यद्वा सम्प्रसारणं सम्प्रसारणाश्रयं च बलवदिति अटः पूर्वमेव सम्प्रसारणं भविष्यति, अथ वा 'परित्यज्यापवादविषयमुत्सर्गोऽभिनिविशत'इत्याट् पश्चाद्भविष्यतीत्यडागमो नैवात्र प्रसजति । (याज्यं) ण्यति "यजयाच"इति कुत्वनिषेधः । (यागः) ।घञि "चजोः कुघिण्ण्यतोः" इति कुत्वं, सोमेनेष्टवान् (सोमयाजी) "करणे यजः" इति करणवाचिन्युपपदे भूते णिनिः । (यज्वा)। "सुयजोर्ङ्वनिप्"इति भूते ङ्वनिप्, (यजमानः)। "पूङ्यजोः शानन्" इति शानन्, यजमानकर्म्म याजमानं, युवादित्वादण् (यायजूकः) "यजजपदशां यङः" इति यङन्तादूकः प्रत्ययः । अल्लोपयलोपौ च । (इष्टिः) । "श्रुयजिस्तुभ्यः करणे" इति क्तिन् । (इज्या) "व्रजयजोर्भावे क्यप्" इति क्यप् (यज्ञः) । "यजयाच०" इति नङ्प्रत्ययः, कुत्वनिषेधः। यज्ञविद्यामधीते वेद वा (याज्ञविद्यिकः)। "क्रतूक्थादिसूत्रान्ताट्ठक्" इति उक्थादिपाठाट्ठक् । याज्ञिकानां धर्म्मः आम्नायो वा (याज्ञिक्यम्)"छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः" इति षष्ठ्यन्ताद्धर्म्माम्नाययोर्ञ्यः । यज्ञमर्हति यज्ञियो (यजमानः)"यज्ञर्त्विग्भ्यां घखञौ" इति द्वितीयान्तादर्हतीत्यर्थे घः । यज्ञकर्माहति यज्ञिय ऋत्विक् । [यज्ञर्त्विग्भ्यां तत्कर्मार्हतीति चोपसंख्यानम्] इति घः। (ऋत्विक्) ऋतौ यजति ऋतुं यजति ऋतुप्रयुक्तो वा यजतीति "ऋत्विक्" आदिना क्विनि निपातितः ।। नवयज्ञोऽस्मिन्वर्त्तते (नावयज्ञिकः) [तदस्मिन्वर्त्तत इति नवयज्ञादिभ्य उपसंख्यानम्] इति ठक् । एवं पाकयज्ञिकः । इष्टम-

नेन (इष्टी) "इष्टादिभ्यश्च" इति प्रथमान्तात्तृतीयार्थे इनिः (यजुः) "अर्तिपृवपि"इत्यादिनोसिप्रत्ययः। (ऋग्यजुषम्) "अचतुर" इत्यादिना द्वन्द्वेऽजन्तो निपात्यते। (यद्)। "यजियमितनिभ्यो डित्" इत्यदिप्रत्यये डित्त्वाट्टिलोपः। त्यच्छब्दवत्सर्वनामकार्यं त्यदादिकार्यं च। यस्मिन्काले (यदा)। "सर्वैकान्य०" इत्यादिना दाप्रत्ययः। "प्राग्दिशो विभक्तिः"इति विभक्तित्वात्त्यदाद्यत्वम्। यस्मिन्काले (यर्हि) "अनद्यतने र्हिल्"। पूर्ववद्विभक्तित्वात्त्यदाद्यत्वम्। यत्परिमाणमस्य (यावान्)। "यत्तदेतेभ्यः परिमाणे वतुप्" इतिपरिमाणोपाधिकात्प्रथमान्तादस्येत्यर्थे वतुप्। अर्थादिह षष्ठ्यर्थः परिमाणी। "आ सर्वनाम्नः" इति दृग्दृशवतुपु परेष्वित्याकारः। सौ "अत्वसन्तस्य" इति दीर्घः। "उगिदचाम्" इति नुम्। हल्ङ्यादिसंयोगान्तलोपौ। "उगितश्च" इति ङीपि यावती। "बहुगणवतुडति संख्या" इति संख्यात्वात् यावतां पूरणइति विगृह्य "तस्य पूरणे डट्" इति षष्ठ्यन्तात्संख्याशब्दात्पूरणे डटि कृते "वतोरिथुक्" इति इथुगागमः। यावतिथः। यतरो भवतो देवदत्तः स समागच्छतु। "किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरच्" इति द्वयोर्मध्ये जातिक्रियासञ्ज्ञाभिरेकस्य निर्द्धारणे पृथक्करणे गम्यमाने स्वार्थे डतरच्। महाविभाषया विकल्पनाद्यो भवतोरित्यपि भवति। यतमो भवतां ब्राह्मणः स आगच्छतु। "वा बहूनां जातिपरिप्रश्ने डतमच्"। जातिश्च परिप्रश्नश्च जातिपरिप्रश्नं समाहारद्वन्द्वस्तद्विषयेभ्यः "किंयत्तद्भ्यो बहूनामेकस्य निर्द्धारणे वा डतमच्"इति डतमच्। अत्र जातिग्रहणं सर्वैरपि सम्बध्यते। परिप्रश्नग्रहणं तु यत्तदोरसम्भवात्किम एव। वाग्रहणमकजर्थम्। यको भवतां ब्राह्मण इति वाक्यं तु महाविभाषया भविष्यति। डतरडतमेति सर्वादौ पाठादेतदन्तयोस्सर्वनामकार्यं पूर्ववत्। नपुंसकाभ्यामनुपसर्जनाभ्यां डतरडतमाभ्यां परयोः स्वमोरमादेशापवादः "अड्डुतरादिभ्यः पञ्चभ्य"इत्यद्डादेशे डित्त्वाट्टिलोपे च यतरत्। यतमत् इति भवति, यद्ययं डिन्नस्यात्सोरदादेशे कृते"अतो गुणे"इति पररूपत्वं बाधित्वा प्रथमयोः पूर्वसवर्णदीर्घः स्यात्, अमादेशे तु स्थानिवद्भावेन"अमि पूर्वः"भविष्यतीति न दोषः। एवं तर्हि पूर्वसूत्रादममनुवर्त्त्य सोरप्यमं कृत्वा 'अड्डुततरादिभ्य' इति पञ्चम्याः षष्ठीं प्रकल्प्य द्वयोरमोः स्थानेऽदादेशः कार्यः किं डकारेण, किं चैवमकारेणापि नार्थः, दकार एव तु विधेयः, स च "आदेः परस्य"इत्यमोऽकारस्य भविष्यति। मकारस्य च संयोगान्तलोपे कतरत् कतमदितीष्टं सेत्स्यति। सत्यं सिध्यति। हे कतरदित्यादौ हे कुण्डेत्यादिवत् "एङ्ह्रस्वात्" इति सम्बुद्धिसम्बन्धिनो हलो विधीयमानो लोपः स्यात्तस्माड्डुकारोकारवांश्च कर्त्तव्यः (यका) "प्रत्ययस्थात्" इतीत्वं "न यासयोः"इति निषिध्यते। (यथा)। यः प्रकारः, "प्रकारवचने थाल्"इति थाल् प्रत्ययः यथायथम्। यो य आत्मा यत्तदात्मीयमिति वाक्यार्थः। "यथास्वे यथायथम्" इति यथाशब्दस्य द्विर्वचनं नपुंसकत्वं चोक्तेऽर्थे निपात्यते। (आयथातथ्यम्। अयाथातथ्यम्। आयथापुर्यम्। अयाथापुर्यम्) यथातथातथापुरयोः शब्दयोरव्ययीभावे नञा समासे ब्राह्मणादिपाठात् ष्यञि "यथातथयथापुरयोः पर्यायेण" इति पूर्वोत्तरपदयोः पर्यायेण वृद्धिः। भाष्ये तु अयथातथाभाव अयथापुराभाव इति विगृह्यते तत्र "सुप्सुपा"इति समासो द्रष्टव्यः॥९८२॥

टुवप् बीजसन्ताने॥ (वपति । उवाप । उवपथ । उवपिथ) उवपिवेत्यादि यजिवत्। प्रणिवपति। "नेर्गद०"इति णत्वम्। (प्रण्यवपत्) 'अड्व्यवायेऽपीष्यत' इति णत्वम्। (प्रवपाणि) "आनि लोट्" इति उपसर्गस्थान्निमित्तात्परस्य लोटसम्बन्धिन आनेर्नकारस्य णत्वम्। (वाप्यम्,) "आसुयुवपि" इति ण्यत्। (वापी) ऋदस्वपीनामिति ग्रहादिपाठादिनिः। (उप्त्रिमम्) "ड्वितः क्त्रिः" सम्प्रसारणं, "क्त्रेर्मम्नित्यम्" इति मप् (वापिः) इञ् "स्वपिवपिभ्य"इति इतीञ् (वापी) "कृदिकारादक्तिनः"इति ङष् (वप्रः) "वृधिवपिभ्यां च रन्"इति रन्प्रत्ययः। बीजसन्तानं क्षेत्रे बीजविकिरणम्, अयं गर्भाधानेऽपि दृश्यते, यथा मा वः क्षेत्रे परबीजान्यवाप्सुः। छेदनेऽपि दृश्यते केशान्वपतीति॥ ९८३॥

वह प्रापणे ॥ (वहति । उवाह । ऊहतुः । उवहिथ । उवोढ । ऊहिव) क्रादिनियमादिट्, थलि भारद्वाजनियमादिडभावे धत्वढत्वष्टुत्वढलोपेषु "सहिवहोरोदवर्णस्य" इत्योत्वे उवोढेति भवति । एवमन्यत्रापि तवर्गादौ ढत्वादि । यजिवत्सम्प्रसारणम् (वोढा । वक्ष्यति) "षढोः कः सि" इति कत्वे षत्वम् । (वहतु । अवहत् । वहेत) आशिषि कित्त्वात्संप्रसारणे (उह्यात् । अवाक्षीत् । अवोढाम्) अत्र ढत्वादीनामसिद्धत्वात्पूर्वमेव हलन्तलक्षणायां वृद्धौ पश्चाड्ढत्वादीति । अवोढामित्यत्राकारस्य "सहिवहोः" इत्योत्वे पुनर्वृद्धिः प्रागेव कृतत्वान्न भवति । (वहते । वोढा । वक्ष्यते । ऊहे । ऊहिषे । वहताम् । अवहत । वहेत । वक्षीष्ट । अवोढ । अवक्षाताम् । अवक्षत । अवोढाः । अवोढम् । अवक्षि । प्रवहति) "प्राद्वहः" इति कर्त्रभिप्राये क्रियाफलेऽपि परस्मैपदम् । केचित् 'परेर्मृषः" इत्यत्र वहिमनुवर्त्त्य परिपूर्वादपि नित्यं परस्मैपदमेवाहुः । (परिवहतीति । प्रणिवहति) । "नेर्गद" इत्यादिना णत्वम् । इदमड्व्यवायेऽपि प्रण्यवहदित्यत्रापि भवति । (प्रवहाणि) "आनि लोट्" इति णत्वम् । कर्मणि । (उह्यते । औह्यत,) अत्र यजिवह्यादेशे यकि संप्रसारणे आडागमः । (विवक्षते । वावह्यते । वावोढः । वावहतीत्यादि) वाहयति भारं देवदत्तेन । (अवीवहत्) अत्र प्रयोज्यस्य [नीवह्योः प्रतिषेध] इति कर्म्मत्वनिषेधः। गत्यादिसूत्रे तु फलतया प्रतीयमानगतयोऽपि गत्यर्थत्वेन गृह्यन्ते इत्ययं प्रतिषेधः। अयं च [वहेर्नियन्तृकर्तृकस्य]इति वचनान्नियन्तृकर्तृकस्य न भवतीति वाहयति यवान्बलीवर्दानित्यत्र प्रयोज्यः कर्म्मैव । नियन्ता सारथिः । वहत्यनेनेति वह्यं शकटादि । "वह्यं करणम्" इति यति निपात्यते, अन्यत्र ण्यति वाह्यः । (कूलमुद्वहः) । "उदि कूले रुजिवहोः" इत्युत्पूर्वाद्वहेः कूलशब्दउपपदे खः । वहत्यनेनेति (वहः) । "गोचर०" इत्यादिना करणे घः । (पुरुषवाहं वहति) पुरुषप्रेष्यो भूत्वा वहतीत्यर्थः । "कर्त्रोर्जीवपुरुषयोर्नशिवहोः" इति यथासंख्यात् कर्तृवाचिनि पुरुषउपपदे णमुल्, कषादित्वात्तस्यैवधातोरनुप्रयोगः । (ऊढः । ऊढिः) निष्ठाक्तिनोः संप्रसारणे ढत्वादि । कल्पनाया अपोढः (कल्पनापोढः) । "अपेतापोढमुक्तपतितापत्रस्तैरल्पशः" इत्यनेन पञ्चमीसमासः (प्रौढः, प्रौढिः) [प्रादूहोढोढ्येषैष्येषु वृद्धिर्वक्तव्या] इति वृद्धिः । (प्रवाहणः) ण्यन्तानां नन्द्यादिपाठाल्ल्युः । "कृत्यचः" । "णेर्विभाषा" इति णत्वं "पूर्वपदात् संज्ञायाम्" इति वा, प्रवाहणस्यापत्यम्, (प्रावाहणेयः । प्रवाहणेयः) "शुभ्रादिभ्यश्च" !इति ढकि "प्रवाहणस्य ढे" इति पूर्वपदस्य वा वृद्धिः । उत्तरपदस्य तु नित्या, स्वत एवोत्तरपदस्य वृद्धिमत्त्वेऽपि पुनर्वृद्धिविधानं पूर्वपदवृद्ध्यभावपक्षेऽपि प्रवाहणेयीभार्य इत्यत्र *वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे* इति पुंवद्भावनिषेधो यथा स्यादिति "स्त्रियाः पुंवत्" इति पुंवत्त्वं रक्तविकारव्यतिरिक्तार्थवृद्धिनिमित्ततद्धितान्तस्य स्त्रीप्रत्ययान्तस्य नेति सूत्रार्थः । ननु प्रवाहणेयीशब्दस्य गोत्राभिधायित्वाद् "गोत्रं च चरणैः सह" इति जातित्वात् "जातेश्च" इति पुंवद्भावनिषेधस्य सिद्धत्वात्किं तदर्थेन, वृद्धिविधानेन, एवं तर्हि "जातेश्च" इत्यस्यानित्यत्वमनेन ज्ञाप्यते, तेन हस्तिनीनां समूहो हास्तिकमित्यत्र लिङ्गविशिष्टपरिभाषया "अचित्तहस्तिधेनोष्ठक्" इति ठकि "भस्याढे तद्धिते" इति पुंवद्भावो भवति । प्रवाहणेयस्यापत्यं प्रावाहणेयः । "तत्प्रत्ययान्तस्य" इति ढान्तस्य प्रवाहणेयशब्दस्य ञिति णिति किति वा तद्धिते परतः पूर्वपदस्य वा वृद्धिरुत्तरपदस्य तु नित्या, अत्र बाह्यतद्धितनिमित्ता नित्या वृद्धिः पक्षे बाध्यते । (इक्षुवाहनम्) उपरिनिपतितेक्षुकं वाहनमित्यर्थः । इक्षुशब्द आहितेष्विक्षुषु वर्त्तते, *वाहनमाहितात्* इति णत्वं, वाहने यदारोपितं तदाहितमित्युच्यते, तादृक्पूर्वपदस्थान्निमित्तात् परस्य वाहनशब्दस्थनकारस्य णकार इति सूत्रार्थः । आहितादन्यत्र दाक्षिवाहनम् । (वह्निः) "वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्" इति निप्रत्ययः । नित्वादाद्युदात्तः । (वधूः) "वहेर्धश्च" इति ऊकारप्रत्ययो धश्चान्तादेशः । वध्वा भावकर्म्मणी वाधवम् । युवादित्वादण् । (अनड्वान्) अनसि वहो क्विप्, "डश्चा-

नसि" इति उणादिसूत्रेण अनस्युपपदे वहेः क्विप् अनसोऽन्त्यस्य डकारश्च संप्रसारणपूर्वत्वे सौ "सावनडुह" इति नुम्, अयं च आदित्यधिकारेणावर्णान्ताद् विधानात् "चतुरनडुहोः" इत्यामं न बाधते, अन्यथा सर्वनामस्थानान्तरे सावकाशमात्वं सौ विशेषविहिते नुम् बाधेत्, हकारस्य संयोगान्तलोपः, "वसुस्रंसु" इत्यादिना दत्वे पूर्वत्रासिद्धत्वात् न भवति। हे अनड्वन्नित्यत्र आमम्बाधित्वा "अम् सम्बुद्धौ" इति अमागमः। अनेनापि नुमो न बाधः। अदित्यधिकारादेव, अनडुद्भ्यामित्यादौ पदत्वे "वसुस्रंसु" इत्यादिना दत्वम्। (अनुड्ही। अनड्वाही) गौरादिपाठात् ङीष्यपि पक्षे आमागमः। प्रियोऽनड्वान् यस्य प्रियानडुत्कः। उरःप्रभृतिषु अनड्वानिति पाठात् कप्। अस्मिन् स्वादौ पदत्वात् दत्वम्। चत्वम्। अत्रैकवचनान्तस्य तस्य पाठात् वचनान्तरेण विग्रहे "शेषाद् विभाषा" इति कपो विकल्पनात् प्रियानड्वानित्यपि भवति। अङ्गाधिकारे तस्य तदन्तस्येत्युक्तत्वादत्रापि नुमादि भवति। धेनुश्च अनड्वांश्च धेन्वनडुहम्। "अचतुर" इत्यादिना द्वन्द्वेऽजन्तो निपातितः। पचादयोऽनुदात्ताः स्वरितेतः॥ ९८४॥

वस निवासे॥ अनुदात्त उदात्तेत् (वसति। ग्राममुपवसति)ग्रामे वसतीत्यर्थः, "उपान्वध्याड्वसः" इति उपाद्युपसृष्टात् वसेराधारस्य कर्मत्वात् द्वितीया। एवं ग्राममनुवसतीति, ग्रामे उपवसति। अशननिवृत्तिं करोतीत्यर्थः। अत्र [वसेरश्यर्थस्य प्रतिषेधः] इति कर्मत्वनिषेधः। अत्र अशिशब्देन अशननिवृत्तिरुच्यते, यद्वार्थशब्दो निवृत्तिवचनो यथा श्लेष्मणोऽर्थे कटुकौषधीः प्रयुञ्जीतेति, तेन निवृत्तेः सम्बन्धिनो वसेरित्यर्थो भवति (उवास, ऊषतुः, उवसिथ। उवकथ। ऊषिव। संप्रसारणं यजिवत् (वस्ता। वत्स्यति) "सः स्यार्द्धधातुके" इति सकारे तत्वम्। (वसतु। अवसत्। उष्यात्। अवात्सीत्। अवात्ताम्। अवात्सुः)। तकारादौ "झलो झलि" इति सिज्लोपस्य पूर्वत्रासिद्धत्वात् "सः स्यार्द्धधातुके" इति सकारे तत्वे पश्चात् सलोपः। क्व भवानुषितः, अहमत्रावात्सम्। वसेर्लुङ्, "रात्रिशेषे जागरणसंततौ" इति लुङ्। यदि कश्चित् केन चित् रात्रिशेषे तुर्ये यामे पृष्टो यामत्रयवासं प्रतिवक्ति तदा लुङित्यर्थः। यामत्रयस्याद्यतनत्वाल्लङि प्राप्ते वचनम्। भूतसामान्यविवक्षयैव लुङि सिद्धे वचनमिदं लङ्निवृत्त्यर्थं, जागरणसंतताविति वचनात् सुप्त्वा प्रतिबुद्ध्य प्रतिवचने नायं नियमः। (विवत्सति। वावस्यते। वावस्ति)। लङि "तिप्यनस्तेः" इति सकारस्य पदान्तत्वाद्दत्वे (अवावत्) सिपि तु "सिपि धातोरुर्वा" इति (अवावः) इत्यपि भवति। (वासयति। अवीवसत्)। अत्र "अणावकर्म्मकात्" इति परस्मैपदस्य "न पादमि" इत्यादिना निषेधात् वासयते इत्यपि भवति। (उषितवान्)। "भाषायां सदवस" इति भूतसामान्ये लिटो नित्यं क्वसुः। अस्मादेवादेशविधानात् भूतसामान्ये पक्षे लिडनुमीयते। परस्मादनुवृत्तेर्लुङ्विषयेऽप्ययं लिडिति सीदतावुपपादितम्। (वास्तव्यः)। "वसेस्तव्यत्कर्त्तरि णिच्च" इति वक्तव्यात् णिद्भावात् वृद्धिः। अमा सह वसतः सूर्याचन्द्रमसावत्रेत्यमावास्या, "अमावस्यदन्यतरस्याम्" इति ण्यति पक्षे वृद्ध्यभावो निपात्यते, अन्यदा वृद्धिः। अमावस्यायां जात (अमावस्यकम्। अमावस्यम्)। "अमावस्याया वा" "अच" इति सप्तम्यन्ताज्जातार्थे कनकारौ च, वाग्रहणात् "संधिवेला" इत्यादिना शैषिकेऽणि आमावस्यमिति भवति। एकदेशविकृतमिति न्यायेन त्रय एते प्रत्यया अमावस्याशब्दादपि, (अमावास्यकम्। अमावास्यम्। आमावास्यमिति। आवासी)। यावव्याहूसंव्याहूव्रजवदवसां प्रतिषिद्धानामिति ग्रहादिपाठाण्णिनिः। प्रतिषिद्धानां नञ्पूर्वाणामित्यर्थः। (प्रवासी)। "प्रे लप०" इत्यादिना घिनुण्। अनुषितो गुरुं शिष्यः। अनुषितो गुरुः शिष्येण। "गत्यर्थाकर्म्मक०" इत्यादिना कर्तृकर्म्मणोः क्तः। अत्र वसिग्रहणं सकर्मकार्थम्। अकर्म्मकत्वे तु "क्तोऽधिकरणे च" इति कर्तृभावाधिकरणेषु क्तो भवति) (उषितः। उषितमनेन, इदमेषामुषितमिति। (उषित्वा। उषितः। उषितवान्) "वसतिक्षुधोरिट्" इति क्त्वानिष्ठयोरिट्। "न क्त्वासेट्" इति नि-

षेधं बाधित्वा "मृडमृद०" इत्यादिना सेटः कित्त्वविधानात् सम्प्रसारणम्। उपवस्था प्राप्ता-ऽस्य औपवस्थ्यम्। [उपवस्थ्यादिभ्य उपसंख्यानम्] इति तदस्य प्राप्तमिति विषये ण्यप्रत्ययः। प्रवासाय प्रभवति प्रावासिकः। एवमौपवासिकः। "तस्मै प्रभवति सन्तापादिभ्य" इति चतुर्थ्यन्तात्प्रभवत्यर्थे ठक्। (वत्सरः। संवत्सरः। परिवत्सरः)। "वसेश्च" इति सम्प्रतिपूर्वात्सरप्रत्ययः। चकारादनुवत्सरादयः। संवत्सरे जातं फलं पर्व वा सांवत्सरम्। सन्धिवेलादिषु "संवत्सरात् फलपर्वणोः" इति पाठाच्छैषिकोऽणप्रत्ययः। कालाट्ठञोऽपवादः। संवत्सरे देयमृणं सांवत्सरिकम्। सांवत्सरकम् "संवत्सराग्रहायणीभ्यां ठञ् च" इति सप्तम्यन्ताद्देये ऋणे ठञ्वुञौ। अत्र संवत्सराग्रहायणीभ्यां चेत्युच्यमानेऽनुवृत्त्या ठञ् भविष्यति तद्विकल्पनात् कालाट्ठञपि, एवं सिद्धे ठञेति प्रतिपदमनयोर्विधानं यदा देयमृणं फलं भवति तदा "संवत्सरात् फलपर्वणोः" इति प्राप्तस्याणो बाधनार्थम्। (द्विसंवत्सरीणः। द्विसांवत्सरिकः)। "रात्र्यहः संवत्सराच्च" इति रात्राद्यन्तात् द्विगोः "तेन निर्वृत्तम्" "तमधीष्टो भृतो भूतो भावी" इति विषये खप्रत्ययः। "संख्यायाः संवत्सरसंख्यस्य च" इति उत्तरपदवृद्धिः। अधीष्टस्सत्कृत्य व्यापारितः। भृतो वेतनेन क्रीतः। भूतभाविनौ प्रसिद्धौ। अनुसंवत्सरं दीयते कार्यं वाऽऽनुसांवत्सरिकम्। "तत्र च दीयते कार्यं भववत्" इत्यतिदेशेन कार्यदीयमानयोर्भवलक्षणः कालाट्ठञ्। "अनुशतिकादीनां च" इति उभयपदवृद्धिः। (आवसथः)। उपसर्गे वसेरित्यर्थः। आवसथे वसति आवसथिकः। "आवसथात् छल्" इति छल्। षित्वात् स्त्रियामावसथिकी। (वसतिः)। "सहिवस्यर्तिभ्यः कित्" इत्यतिप्रत्ययः। वसतौ साधु वासतेयम्। "पथ्यतिथिवसति०" इति ठञ् वस्नं मूल्यम्। "सुमूल्यादायवस्यतिभ्यो नः" इति नः। वस्नं हरत्यावहति वा वस्निकः। "वस्नक्रयविक्रयाभ्यां कक्नौ" इति द्वितीयान्ताद्वस्नाद्धरत्यादिष्वर्थेषु यथासंख्यात् कन्। (वास्निकः)। "वस्नक्रयविक्रयाट्ठन्" इति तृतीयान्तात् जीवत्यर्थे ठन्, (वसन्तः)। "तॄभूवहिवसि" इति अन्तच्। वसन्तसहचरितोऽपि ग्रन्थो वसन्तः। तमधीते वेद वा वासन्तिकः। "वसन्तादिभ्यष्ठक्" इति अध्येतृवेदित्रोष्ठक्। वसन्ते पुष्यन्ति वासन्त्यः कुन्दलताः। "सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्" इति सप्तम्यन्ताच्छैषिकोऽण्। एवं साधुपच्यमानयोरपि। वसन्ते उप्तं (वासन्तम्। वासन्तकम्)। "ग्रीष्मवसन्तादन्यतरस्याम्" इति तत्रोप्तमित्येतस्मिन्विषये वुञणौ (वस्तिः)। "वसेस्तिः" इति तिः। (वस्तिरिव वास्तेयम्) "वस्तेर्ढञ्" इतीवार्थे ढञ्। वस्तौ भवमपि वास्तेयमिति। "दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्" इति सप्तम्यन्ताद् भवार्थे ढञ्। "वसेस्तुन्" इति तुनि (वास्तु)। "अगारे णिच्च" इति णित्त्वाद्वृद्धिः। (वस्त्रम्) ष्ट्रन्। वस्त्रैः समाच्छादयति संवस्त्रयति। "मुण्डमिश्र" इत्यादिना णिच्। वस्त्रात्समाच्छादनइति वृत्तिः। (वासिः)। "वशिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ्" इतीञ् प्रत्ययः (वसु) "शॄस्वृस्निहि" इत्यादिना उप्रत्ययः। वसुमत्तमो वसिष्ठः। वसुमत्तरो वसीयान्। मतुबन्तादिष्ठन्नीयसुनोः "विन्मतोर्लुक्" इति मतुपो लुगिष्ठेमेयःस्विति वर्त्तमाने "टेः" इति टिलोपः। अस्मादेव लुग्विधानाद् गुणवचनादपि मत्वन्तादिष्ठन्नीयसुनावनुमीयेते। (वासिष्ठः। वासिष्ठौ। वसिष्ठाः)। "ऋष्यन्धकवृष्णिकुरुभ्यश्च" इत्यपत्यार्थेऽण्। तस्य "अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च" इति बहुषु लुक्। (श्वोवसीयः। श्वोवसीयसम्)। "श्वसो वसीयः श्रेयसः" इति समासान्तोऽच्। आच्छादनेऽयमदादिः। स्तम्भने दिवादिः। स्नेहनादौ कथादिश्चुरादिश्च। वस उपसेवायामाच्छादन इति च कथादिः ॥९८९॥

वेञ् तन्तुसन्ताने॥ (वयति। वयते। उवाय। ऊयतुः। ऊयुः। उवयिथ। ऊयथुः। ऊय। उवाय। उवय। ऊयिव। ऊयिम) "वेञो वयिः" इति वा वयादेशः। तस्य "ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च" इति संप्रसारणम्। चकारात् किदनुकृष्यते। अकिति तु "लिट्यभ्यासस्योभयेषाम्" इति अभ्यासस्य संप्रसारणम्। सर्वस्य यकारस्य "लिटि वयो यः" इति निषेधान्न संप्रसारणम्। सर्वत्र क्रादिनियमादिट्। थलि "अचस्ता-

स्वत्” इति निषेधो न भवति। वयेस्तासावसत्त्वात्। अत एव भारद्वाजविकल्पोऽपि न भवति। किति लिटि “वश्चास्यान्यतरस्यां किति” इति पक्षे यकारस्य वकारे (ऊवतुः। ऊवुरित्यादि)। वयादेशस्य स्थानिवद्भावेन ञित्त्वात्तङि (ऊये। ऊयाते। ऊयिढ्वे। ऊयिध्वे। ऊयिवहे) ध्वमि “विभाषेटः” इति मूर्द्धन्यविकल्पः। अत्रापि वकारादेशपक्षे (ऊवे। ऊवाते) इत्यादि। वयादेशाभावपक्षे “आदेचः” इत्यात्वे (ववौ। ववतुः। ववाथ। वविथ। ववथुः। वव। ववौ। वविव। क्रादिनियमादिट्। थलि भारद्वाजनियमाद्विकल्पः। “आत औ णलः” इति णल औत्वमन्यत्र “आतो लोप इटि च” इत्याल्लोपः। “वचिस्वपियजादीनां किति” इति “लिट्यभ्यासस्योभयेषाम्” इति च प्राप्ते सम्प्रसारणं ‘वेञ’ इति लिटि निषिध्यते। (ववे। ववाते) इत्यादि। (वाता। वास्यति। वास्यते। वयतु। वयताम्। अवयत्। अवयत। वयेत्। वयेत) आशिषि (ऊयात। वासीष्ट)। यासुटि “किदाशिषि” इति कित्त्वे सम्प्रसारणे परपूर्वत्वे वा “अकृत्सार्वधातुकयोः” इति दीर्घः। (अवासीत्। अवासिष्टाम्। अवास्त। अवासातामित्यादि)। परस्मैपदे “यमरमनमाताम्” इति सगिटौ। (विवासति। विवासते। वावायते। वावाति। वावेति। वावीतः) “ई हल्यघोः” इतीत्वम्। (वावति)। “श्नाभ्यस्तयोः” इत्याल्लोपः। लोटि हावीत्वे (वावीहि। वाययति। अवीवयत्)। “शाच्छा०” इति युक्। (प्रवाय)। “न ल्यपि” इति वेञः सम्प्रसारणनिषेधः। (तन्तुवायः)। “ह्वावामश्च” इति कर्म्मण्युपपदेऽण् “आतोऽनुपसर्गे कः” इति कस्यापवादः। (उता) उतः सम्प्रसारणपूर्वत्वे। (निष्प्रवाणिः)। नवं वासः प्रोयतेऽस्यामिति प्रवाणी तन्तुवायशलाका भण्यते। निर्गताः प्रवाण्यो यस्मादिति बहुव्रीहौ “निष्प्रवाणिश्च” इति निपातनात्कबभावः। “गोस्त्रियोरुपसर्जनस्य” इति ह्रस्वः॥ ९८६॥

व्येञ् संवरणे। (व्ययति। व्ययते। विव्याय। विव्यतुः। विव्युः। विव्ययिथ। विव्याय) “न व्यो लिटि” इत्यात्वनिषेधः। णिति वृद्धावायादेशे तस्य “द्विर्वचनेऽचि” इति स्थानिवत्त्वाद् व्येशब्दस्य द्विर्वचने “लिट्यभ्यासस्योभयेषाम्” इत्याभ्यासयकारस्य सम्प्रसारणे पररूपत्वम्। सम्प्रसारणे चोभयेषांग्रहणाद्धलादिशेषं बाधित्वा भवति, “न सम्प्रसारणे सम्प्रसारणम्” इति वकारस्य सम्प्रसारणं न भवति, किति “वचिस्वपि” इत्यादिना सम्प्रसारणे पूर्वरूपत्वे द्विर्वचने “एरनेकाचः” इति यण्। थलि “इडत्त्यर्त्तिव्ययतीनाम्” इतीट् नित्यमन्यत्र क्रादिनियमादिट्। (विव्ये। विव्याते। विव्यिषे। विव्यिध्वे। विव्यिढ्वे। विव्यिवहे)। सर्वत्र “वचिस्वपि” इत्यादिना सम्प्रसारणे पररूपत्वे द्वित्वम्। (व्याता। व्यास्यति। व्यास्यते। व्ययतु। व्ययताम्। अव्ययत्। अव्ययत। व्ययेत्। व्ययेत। आशिषि। वीयात्। व्यासीष्ट)। यासुटः कित्त्वात्संप्रसारणपूर्वरूपयोः “हलः” इति दीर्घः। (अव्यासीत्। अव्यास्ताम्)। परस्मैपदे सगिटौ। (विव्यासति। विव्यासते। वेवीयते)। “स्वपिस्यमिव्येञां यङि” इति संप्रसारणे परपूर्वत्वे “हलः” इति दीर्घः। द्विर्वचनम्। (वाव्येति। वाव्याति। वाव्यीतः। वाव्यति)। ङ्क्तोः “श्नाभ्यस्तयोः” इत्याकारलोपः। हलादौ “ई हल्यघोः” इतीत्वम्। (व्याययति)। “शाच्छासः” इत्यादिना युक्। (संव्याय)। “व्यश्च” इति ल्यपि संप्रसारणनिषेधः, परिपूर्वत्वे तु “विभाषा परेः” इति प्रसारणविकल्पनात्परिवीय परिव्यायेत्युभयं भवति। (नीविः)। नौ व्यो यलोपः पूर्वपदस्य च दीर्घ इति इकारप्रत्यये डित्वाट्टिलोपयलोपयोः पूर्वपददीर्घः। (नीवी)। “कृदिकारादक्तिनः” इति वा ङीष्॥ ९८७॥

ह्वेञ् स्पर्धायां शब्दे च। (ह्वयति। ह्वयते। जुहाव। जुहुवतुः। जुहुविथ। जुहोथ)। अत्र च “अभ्यस्तस्य च” इत्यभ्यस्तीभविष्यतो ह्वेञः प्रागेव द्विर्वचनात्संप्रसारणेऽन्तरङ्गत्वात्परपूर्वत्वे पश्चाद् द्विर्वचनम्। पूर्वं तु द्विर्वचने “न संप्रसारणे संप्रसारणम्” इत्यभ्यासस्य संप्रसारणं न स्यात्। व्यवधानान्नायं निषेधः स्यादिति न वाच्यम्। तत्र समानाङ्गग्रहणस्य चोदितत्वात्। तत्र णलि वृद्ध्यवादेशयोः स्थानिवत्त्वाद्धुशब्दस्य द्विर्वचनम्, अत्र परपूर्व-

त्वाभावे "आत औ णलः" इति स्यात्। जुहुवतुरित्यादौ "अचि श्नुधातु" इत्यादिनेयङा-देशः । तत्रापि संप्रसारणेऽन्तरङ्गत्वात्परपूर्वत्वमवश्यमेष्टव्यम् । अन्यथा "अतो लोपः" इत्या-ल्लोपे तस्य स्थानिवत्त्वाद् द्विर्वचने "असिद्धवदत्र" इत्यसिद्धत्वाद्व्यवधानादुवङ् न स्यात् । थलि गुणः। भारद्वाजनियमादिड्विकल्पः। उत्तमे णलि णित्त्वाभावपक्षे गुणेऽवादेशः । (जुहुवे । जुहुवाते । जुहुविषे । जुहुविध्वे । जुहुविद्वे । ह्वाता । ह्वातासे । ह्वास्यति । ह्वास्यते । ह्वय-तु । ह्वयताम् । अह्वयत् । ह्वयेत् । आशिषि हूयात् । ह्वासीष्ट) । यासुटि कित्त्वात्संप्रसारणे "हलः" इति दीर्घः । (अह्वत् । अह्वताम्) । "लिपिसिचिह्वश्च" इति परस्मैपदे सिजपवा-दोऽङ् । "आत्मनेपदेष्वन्यतरस्याम्" इत्यङो विकल्पनात् । (अह्वत। अह्वताम् । अह्वत। अह्वा-स्त । अह्वासाताम्। अह्वासत) इत्युभयं भवति, अङि सर्वत्र "आतो लोप इटि च" इत्याल्लो-पः । इदमङ्विकल्पनं कर्त्तरीति कर्म्मणि (अह्वायि। अह्वासाताम्) इत्यादौ चिण्सिचावेव भव-तः। चिण्वदिटि अह्वायिषातामित्यादि । एवं स्यसिच्सीयुट्तासिषु (ह्वायिष्यते। ह्वायिषीष्ट । ह्वायित) इत्यादि द्रष्टव्यम्। कर्मकर्त्तरि तु शब्दे "अचः कर्म्मकर्त्तरि" इति चिणो विकल्पनात्त-दभावे "आत्मनेपदेष्वन्यतरस्याम्" इति पक्षेऽङ्। तदभावे सिच्। तस्य च पक्षे चिण्वदिटि (अह्वायि । अह्वत । अह्वास्त) । अह्वायिष्टेति चातूरूप्यम्भवति । (निह्वयते । संह्वयते । उपह्वयते । विह्वयते । आह्वयते) "निसमुपविभ्यो ह्वः" "स्पर्द्धायामाङः" इत्यत्र कर्त्रभिप्राये तङ् । अत्र स्पर्द्धा धात्वर्थस्य शब्दनस्य हेतुतया विषय इति वृत्त्यादौ स्थितम् । स्पर्द्धमान आह्वानं करोतीत्यर्थः । अत्र च ह्व इति न प्रयोगस्थस्याकारान्तस्या-नुकरणं किन्तु धातोरेजन्तस्य, आत्वन्तु लक्षणवशादिति निह्वयतइत्यादौ तङ् भवति । एकदेशविकृतस्यानन्यत्वान्निह्वास्यतइत्यादिष्वपि (जुहूषति । जुहूषते) "अभ्य-स्तस्य च" इति संप्रसारणे परपूर्वत्वे "हलः" इति दीर्घे धातोरिगन्तत्वात् "इको झल्" इति सनः कित्त्वाद्गुणो न भवति । (जोहूयते । जोहोति । जोहूतः । जोहुवति) "हुश्नुवोः सार्वधातुके" इति यण् हुशब्दस्य लाक्षणिकत्वादनर्थकत्वाच्च न भवति । (ह्वाययति । जुहा-वयिषति । अजूहवत् । अजूहवताम् । अजूहवन्) । अत्र "ह्वः संप्रसारणम्" इति सन्परे चङ्परे णौ संप्रसारणे परपूर्वत्वे वृद्ध्यावादेशयोर्णौ कृतं स्थानिवदिति स्थानिवत्त्वाद्धशब्दस्य हौशब्दस्य वा द्विर्वचनं "णौ चङ्युपधाया ह्रस्वः" इदं च 'सम्प्रसारणं तदाश्रयं च कार्यं बलवत्' इति वा "णौ च संश्चङोः" इति विषयसप्तमीत्वात् "आतो युक्" इति युकः प्राक् प्रवर्त्तते । कृते चान्तरङ्गत्वात्परपूर्वत्वमिति युग्न भवति । नन्वत्र "अभ्यस्तस्य च" इति अभ्यस्तका-रणस्य ह्वयतेः संप्रसारणविधानात्सिद्धमेव तदिति किं "ह्वःसंप्रसारणम्" इत्यनेनेति ज्ञापनार्थ-मभ्यासनिमित्तप्रत्ययेन व्यवधाने यदि भवति णावेवेति। तेन ह्वायकमिच्छति जिह्वायकिषति, ह्वायकीयतेः सन् जिह्वायकीयिषतीत्यादौ संप्रसारणं न भवति । एवञ्च सन्परे चङ्परे णौ "अ-भ्यस्तस्य च" इत्येव संप्रसारणं तच्चाभ्यस्तीभविष्यत इति जुहावयिषति, अजूहवदित्यत्रापि णिजुत्पत्तेः प्रागेव प्रसारणेऽन्तरङ्गत्वात्परपूर्वत्वे च नैव युक्तः प्रसङ्गः । (आह्वः) "आतोनुपसर्गे कः" इत्यत्र भाष्ये सर्वत्र प्रसारणिभ्यो डो वक्तव्य इति डप्रत्यये टिलोपमुक्त्वा "आतोनुप-सर्गे कः" इति कप्रत्यये वा परत्वादाल्लोपे संप्रसारणे यणि आह्व इति सिद्धमित्युक्तम् । उवङ् तु आल्लोपस्य "असिद्धवदत्रा" इत्यसिद्धत्वाद्व्यवधानान्न भवति । (निहवः । अभिह-वः । उपहवः । विहवः) । "ह्वः संप्रसारणं च न्यभ्युपविषु" "आङि युद्धे" "भावेऽनुपसर्गस्य" इत्यप्प्रत्यये (१)प्रसारणम् । (आहावः) । "निपानमाहावः" इति प्रसारणे वृद्धौ निपात्यते । निपानमुपकूपं जलाशये । यत्र गावः पानार्थमाहूयन्ते । (आह्वा) । "आतश्चोपसर्गे" इति

(१) मूलपुस्तकानुरोधेन प्रसारणं इति पाठः स्थापितः । तत्र तत्र सम्प्रसारणं इति पाठेन भाव्यमिति प्रतिभाति ।

ध्रियामङ्ग्याल्लोपः। (आहूतिः संहूतिः) इति बाहुलकात् क्तिन्। वेञादयस्त्रयोऽनुदात्ता उभयतो भाषाः॥ ९८८॥

वद व्यक्तायां वाचि॥ (वदति। उवाद। ऊदतुः। ऊदुः। उवदिथ। उवाद। उवद। ऊदिव) यजादित्वात्किति संप्रसारणम्। पिति "लिट्यभ्यासस्य" इत्यभ्यासस्य (वदिता। वदिष्यति। वदतु। अवदत्। वदेत्) अशिषि। (उद्यात्। अवादीत्) "वदव्रज०" इति वृद्धिः (विवदिषति। वावद्यते। वावदीति। वावत्ति। वादयति। अवीवदत्। वाद्यते। अवीवदत)। वदेः कर्म्माविवक्षायाम् "अणावकर्मकात्" इति प्राप्तं परस्मैपदं "न पादमि" इत्यादिना निषिध्यते। अभिवदति गुरुं देवदत्तः। अभिवादयते गुरुं देवदत्तं देवदत्तेन वा, [अभिवादिदृशोरात्मनेपदे उपसंख्यानम्] इति पक्षे प्रयोज्यस्य कर्म्मत्वं परस्मैपदे तु कर्तृत्वात्तृतीयैव। वदते व्याकरणे यज्ञनारायणः। भासमानस्तत्र सूत्रार्थं वक्तीत्यर्थः। कर्म्मकरानुपवदते। उपसान्त्वयतीत्यर्थः। वदते यज्ञनारायणाचार्यः। जानाति वदितुमित्यर्थः। गेहे वदते, तद्विषयमुत्साहमाविष्करोतीत्यर्थः। (गेहे विवदन्ते)। विमतिपतिता विचित्रं भाषन्तइत्यर्थः। कुलभार्यामुपवदते। उपच्छन्दयतीत्यर्थः। "भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः" इति तङ्। भासनं दीप्तिः, उपसम्भाषणमुपसान्त्वनं, ज्ञानं सम्यगवबोधः। यत्न उत्साहः, विमतिर्नानामतिः। उपमन्त्रणं रहस्युपच्छन्दनम्। उपसान्त्वनमुपच्छन्दनं च धातोरर्थतया विशेषणम्, अन्यत्र धात्वर्थस्य, संप्रवदन्ते राजानः। सम्भूयाचारयन्तीत्यर्थः। *व्यक्तवाचां समुच्चारणे* इति तङ्। व्यक्तवाचो मनुष्याः। समुच्चारणं सम्भूयोच्चारणम्, अर्थस्वभावादुपसर्गयोगः। अव्यक्तवाक्षु पर्यायोच्चारणे च परस्मैपदमेव। संप्रवदन्ति कुक्कुटाः। ब्राह्मणो वदति, क्षत्रियो वदति। अनुवदते कठः कलापकस्य अनुः सादृश्ये, यथा कालापोऽधीयानो वदति तथा कठ इत्यर्थः। "अनोरकर्म्मकात्" इति अनुवदतेस्तङ्। अत्रानुः सादृश्ये इति सादृश्यप्रतिपादनपरत्वादकर्म्मकत्वम्। अयमपि योगो व्यक्तवाग्विषये एव। अनुवदति वीणा गायकस्येत्यत्र न तङ्, अकर्म्मकादित्युक्तेः पूर्वोक्तमनुवदतीत्यत्र च न भवती। विप्रवदन्ते मौहूर्त्तिकाः। युगपद्विरुद्धं भाषन्त इत्यर्थः। "विभाषा विप्रलापे" इति तङ्विकल्पः। विप्रलापो विरुद्धभाषणम्। "व्यक्तवाचां समुच्चारणे" इति प्राप्ते इयं विभाषेत्यव्यक्तवाक्कर्तृके विरुद्धभाषणे तङ् न भवति। विप्रवदन्ति शकुनीयाः। तथा व्यक्तवाक्कर्तृके विरुद्धभाषणे क्रमिकेऽपि न तङ्, मौहूर्त्तिकाः क्रमेण विप्रवदन्तीति। धनकामो न्यायमपवदते। धनार्थी न्यायं नाद्रियतइत्यर्थः। "अपाद्वदः" इति कर्त्रभिप्राये तङ्। अवद्यं पापम्। "अवद्यपण्य०" इत्यादिना यति गर्ह्ये निपात्यते। ब्रह्मोद्यं, ब्रह्मणो वदनमित्यर्थः। "वदः सुपि क्यप् च०" इत्यनुपसर्गे सुप्युपपदे क्यपि प्रसारणं चकाराद्यति ब्रह्मवद्यम्। अनुपसर्गादुपसृष्टाच्च णे यति वाद्यं प्रवाद्यमिति। (मृषोद्यम्)। "राजसूय०" इत्यादिना भावकर्मणोः क्यपि निपात्यते। (अवादी) ग्रहादिषु "यावव्याहू" इत्यादिसूत्रेण नञ्पूर्वाण्णिनिः। (वदः। वदावदः)। पचाद्यचि "चलिपतिवदि" इत्यादिना द्विर्वचनमभ्यासस्य त्वागागमः। (प्रियंवदः। वशंवदः)। "प्रियवशे वदः खच्" इति खच्। (परिवादी) सम्पृचादित्वाद् घिनुण्। (प्रवादी) "प्रे लप" इत्यादिना घिनुण्। (परिवादकः) "निन्दहिंस" इत्यादिना ण्यन्तादवुञ्। वावदूकस्यापत्यं वावदूक्यः। "कुर्व्वादिभ्यो ण्यः" इति ण्यः। कुर्वादिपाठादेव यङन्ताद्वदेरूकप्रत्ययः। प्रवादूकादयः प्रयोगाश्चिन्त्याः, उदित्त्वात् "मृडमृद०" इत्यादिना सेटः क्त्वः कित्त्वात्प्रसारणम्। (अच्छोद्य)। "अच्छ गत्यर्थवदेषु" इति अच्छशब्दस्य गतित्वात्समासे सत्यपि प्रसारणम् (वादिः)। "वदिवपि" इत्यादिना इञ्प्रत्ययः। (वत्सः)। "वृतृवदि" इत्यादिना सप्रत्ययः। (वत्सलः कामवान्)। "वत्सांसाभ्यां कामबले" इति लच्प्रत्ययो मत्वर्थीयः। कामबलशब्दावर्शआद्यजन्तौ तद्वति वर्तते वृत्तौ कामबलार्थौ। (वत्सतरः) प्रथमवयोऽतिक्रान्त इत्यर्थः। "वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे" इति प्रवृत्तिनिमित्ततनुत्वोपाधिकार्थादस्माद्वत्सादेः स्वार्थे ष्टरच्। वत्सशब्दस्य

प्रवृत्तिनिमित्तं प्रथमवयः संम्बन्धः । षित्वात् ङीष् स्त्रियां वत्सतरी । वत्सानां समूहो वात्सकम् । "गोत्रोक्ष" इत्यादिना वुञ् । (वादित्रम्) "अशित्रादिभ्य इत्रोत्रौ" इति ण्यन्तादित्रः। अण्यन्ताद्वाहुलकाद्वृद्धिः। (वदान्यः)। "वदेरान्य" इत्यान्यप्रत्ययः। अयमाधृषीयश्च ॥९८९॥

टुओश्वि गतिवृद्ध्योः ॥ अयं वदतिश्च परस्मैभाषावुदात्तेतौ । (श्वयति । शुशाव । शुशुवतुः । शुशुवुः । शुशविथ । शुशुवथुः । शुशुव । शुशाव । शुशुविव । शुशुविम) "विभाषा श्वेः" इति लिड्यङोः संप्रसारणविकल्पः। अत्र 'संप्रसारणं संप्रसारणाश्रयकार्यं च बलीय' इति "लिड्यङोश्च" इति विषयसप्तमीत्वाद्वा संप्रसारणमुभयेषांग्रहणाद् हलादिशेषं बाधित्वाऽत्र भवति । किति "वचिस्वपि" इत्यादिना संप्रसारणे पररूपत्वे द्विर्वचने (शुशुवतुः, शुशुवुः) । पिद्वचनेषु गुणवृद्धिभ्यामन्यत्र यणश्च पूर्वं संप्रसारणेऽन्तरङ्गत्वात् पररूपत्वे च यथायोगं वृद्धिगुणयोराववादेशौ । किन्तु तूवङादेशः । "द्विर्वचनेऽचि"इति स्थानिवत्त्वाच्छुशब्दस्य द्विर्वचनं, प्रसारणाभावे (शिश्वाय । शिश्वियतुः । शिश्वियुः । शिश्वयिथ । शिश्वियथुः । शिश्वाय । शिश्वय । शिश्वयिव । शिश्वयिम) यथायोगं वृद्धिगुणयोरायवौ । कितीयङ् पूर्ववत्, स्थानिवत्त्वाच्छ्विशब्दस्य द्विर्वचनं, पिति "लिट्यभ्यासस्योभयेषाम्" इत्यभ्यासस्य संप्रसारणं, [श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेधः] इति निषेधान्न भवति (श्वयिता । श्वयिष्यति । श्वयतु । अश्वयत् । श्वयेत् । आशिषि । शूयात्) कित्वात् "वचिस्वपि" इत्यादिना प्रसारणे "हलः" इति दीर्घः । (अश्वत् ।) "जृस्तम्भु" इत्यङ्, वा तत्र परे "श्वयतेरः" इतीकारस्याकारे अतो लोपः । पररूपं च अङोऽभावे "विभाषा धेट्श्व्योः" इति पक्षे चङि द्विर्वचने इयङि (अशिश्वियत्, अशिश्वियताम्, अशिश्वियन् । अशिश्वियः । अशिश्वियम्। अशिश्विय । अशिश्वियाव) चङोरभावे सिचि । (अश्वयीत् । अश्वयिष्टामित्यादि) "ह्म्यन्तक्षण" इति वृद्धिनिषेधः । (शिश्वयिषति । शेश्वीयते । शोशूयते) "लिड्यङोः" इति वा संप्रसारणं, (शेश्वयांति । शेश्वेति । शेश्वितः । शेश्वियति) लुङि प्रकृतिग्रहणादङ्चङौ । अशिश्वियदित्यादि । अङि "श्वयतेरः" इत्यत्वं श्तिपा निर्देशान्न भवति इति तदेव रूपम् । यङ्लुकि "लिड्यङोः" इति संप्रसारणं लुका विषयत्वापहारान्न भवति, सिच्पक्षे ।(अशिश्वायीत् । श्वापयति । अशिश्वपत् । अशूशवत् । शिश्वापयिषति । शुशावयिषति) अत्र "विभाषा श्वेः" "णौ च संश्चङोः" इति सन्परे चङ्परे णौ भाविनि पक्षे संप्रसारणे अन्तरङ्गत्वात्परपूर्वत्वे वृद्ध्यावौ । तयोः स्थानिवत्त्वात् शुशब्दस्य श्विशब्दस्य वा द्विर्वचनम् । (श्वयथुः) "ट्वितोऽथुच्" । (शूनवान् । शूनः) "श्वीदितो निष्ठायाम्" इत्यनिट्त्वम् । अत्र पदमञ्जर्यां "ओदितश्च" इति ओदितोनन्तरस्य निष्ठातकारस्य नत्वविधानादेवेडभावस्य सिद्धेः श्वयतिग्रहणं शक्यमकर्त्तुम् इति । उदकेन श्वयतइति उदश्वित् । "क्विप् च" इति क्विप् । उदश्वित इति निर्देशात् प्रसारणाभावः । "उदकस्योदः संज्ञायाम्" इति उदकस्योदभावः । उदश्विति संस्कृतमौदश्वित्कम् । "उदश्वितोऽन्यतरस्याम्" इति सप्तम्यन्तात् संस्कृतमित्यर्थे ठक् । ठस्य "इसुसुक्तान्तात्कः" इति कादेशः। ठगभावे प्राग्दीव्यतीयेऽणि औदश्वितम् । (श्वा) "श्वन्नुक्षन्"इति निपात्यते । शुनः पश्येत्यादौ "श्वयुवमघोनामतद्धिते" इति तद्धितवर्जिते भसंज्ञानिमित्ते प्रत्यये प्रसारणे परपूर्वत्वम् । अतद्धित इति वचनात् "प्राणिरजतादिभ्योऽञ्" इति विकारावयवयोः प्राणिलक्षणेऽणि "नस्तद्धिते" इति टिलोपे "द्वारादीनां च" इत्यैजागमे शौवं मांसमिति भवति । (शौवः सङ्कोचः) । अत्र प्राग्दीव्यतीयेऽणि [शुनः सङ्कोचे उपसंख्यानम्] इति "अन्"इति प्रकृतिभावं बाधित्वा टिलोपः । सङ्कोचादन्यत्र शौवनम् । शुने हितं शून्यम् । 'शुनः सम्प्रसारणं वा च दीर्घत्वम्'इति गवादिपाठाद्यति प्रसारणे वा दीर्घः । अत्र "नस्तद्धिते" इति टिलोपः कस्मान्न भवति । न च प्रसारणस्य सामर्थ्यादिति वाच्यम्। यतः कृते परपूर्वत्वे टिलोपार्थमेव तत् स्याद्, अन्यथा "ये चाभावकर्म्मणोः" इति प्रकृतिभावः स्यात् । दीर्घविधानसामर्थ्यान्न भवति। अस्तु चैवम्, अदीर्घपक्षे कस्मान्न भवति । तदुच्यते, द्वौ चकारौ क्रियेते वा च

दीर्घत्वं चेति, तत्रान्त्यः संनियोगार्थः, आद्यो भिन्नक्रमः सम्प्रसारणमित्यनेन सम्बध्यते प्रसारणं चेति । तत्रान्यस्य समुच्चयितव्यस्याभावात् पुनरपि प्रसारणं समुच्चीयते । तच्चावस्थापनार्थं सट्टिलोपं बाधिष्यते । (शुनी) गौरादिपाठान् ङीष् । शुन इव शेपमस्य शुनःशेपः। एवं (शुनःपुच्छः । शुनोलाङ्गूलः) [शेपपुच्छलाङ्गूलेषु शुन उपसंख्यानम्]इति अलुक् । अकारान्तोऽप्यस्ति शेपशब्दो न केवलं सकारान्त इति कैयटपदमञ्जर्यादिषु ।(शुनोदन्तः श्वादन्तः) । "शुनो दन्तदंष्ट्राकर्णवराहपुच्छपदेषु" इति पूर्वपदस्य दीर्घः । एवं दंष्ट्रादिष्वुदाहार्यम् । श्वादंष्ट्रस्यापत्यं श्वादंष्ट्रिः । श्वभस्त्रस्यापत्यं श्वाभस्त्रिः । अत्र "श्वादेरिञि" इति द्वारादिलक्षण ऐजागमो वृद्धिप्रतिषेधाश्च निषिध्यते । अयमेव निषेधो द्वारादौ तदादिविधिज्ञापकः । श्वन्शब्दोऽपि तत्र पठ्यते"श्वादे रिञि"इत्यत्र वार्त्तिके इकारादिग्रहणं च गणिकाद्यर्थमिति।श्वगणेन चरति (श्वागणिकः) "श्वगणाट्ठञ् च०" इति चरत्यर्थं तृतीयान्ताट्ठक्ठञौ। आदिशब्देन श्वायूथिकादिर्गृह्यते ।अत्र च"प्राग्वतेः" इति ठक् इञाद्यन्ताद्यदान्यस्तद्धित उत्पद्यते तदापि "श्वादेरिञि"इति प्रतिषेधो भवत्येव । तथाच तत्र वृत्तिः। तदन्तस्य चान्यत्रापि तद्धिते प्रतिषेध इष्यतइति। तेन श्वाभस्त्रेरिदमिति विगृह्य "इञश्च" इत्यणि कृते ऐजागमवृद्धिनिषेधयोरभावात् श्वाभस्त्रमिति भवति । यदा पुनरिकारादेरन्यस्तद्धितो भवति तदा श्वदंष्ट्रायां भवो मणिः शौवादंष्ट्र इति वृद्धिप्रतिषेध ऐजागमश्च भवति । श्वापदे भवः (शौवापदः। श्वापदः)"पदान्तस्यान्यतरस्याम्" इति श्वादेः पदशब्दान्तस्य द्वारादिलक्षण एजागमो वृद्धिप्रतिषेधश्च पक्षे निषिध्यते । शुनः समीपमुपशुनम् । "अव्ययं विभक्तिसमीप०" इत्यव्ययीभावेऽचतुरादिषु निपातनादच् टिलोपाभावश्च संप्रसारणं च, गोष्ठे श्वेव गोष्ठश्वः, अयमप्यचतुरादिषु निपातितः। श्वानमतिक्रान्तोतिश्वः । "अतेः शुनः" इति टच् अतेरितिवचनान्निश्वा लोष्ट इत्यादौ न भवति । श्वेव पाषाणः पाषाणश्वः । "उपमितं व्याघ्रादिभिः" इति समासः । *उपमानादप्राणिषु* उपमानवाची यः श्वन्शब्दोऽप्राणिषु वर्त्तते तदन्तादटजिति टचि "नस्तद्धिते" इति टिलोपः । अत्र श्वशब्दः सादृश्यात्पाषाणवृत्तिरित्यप्राणिवचनः, अप्राणिष्विति वचनात् श्वेव वानरः वानरश्वेत्यादौ टज् न भवति । मातरि सर्वस्य परिच्छेत्तर्याकाशे वर्द्धतइति मातरिश्वा वायुः । "श्वन्नुक्षन्" इत्यादिना मातरि पूर्वपदे श्वयतेः कनिनि इकारलोपो लुक्च निपात्यते, "तत्पुरुषे कृति बहुलम्" इति चालुक्सिद्धिः ॥ ९९० ॥

वृत् ॥ यजादयो वृत्ता इत्यर्थः । भूवादिस्त्ववशिष्यतइति व्याख्यातारः । तेन चुलुम्पतीत्येवमादीनामाप्तप्रयोगसिद्धानां संग्रहः सिद्धो भवति ॥

इति पूर्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसंगमराजमहामन्त्रिणा सायणपुत्रेण माधवसहोदरेण सायणेन विरचितायां माधवीयायां धातुवृत्तौ शब्विकरणा भ्वादयः ॥

शुभं भूयात् ॥

~~~~~~~~
~~~~~~~~

माधवीयधातुवृत्तौ–

अदादिः ।

अद भक्षणे (अत्ति । अत्तः । अदन्ति । अत्सि । अत्थः । अत्थ। अद्मि । अद्वः । अद्मः) "अदिप्रभृतिभ्यः शपः" इति शपो लुक् । "खरि च" इति चर्त्वं,(जघास । जक्षतुः । जक्षुः । जघसिथ । जक्षथुः। जक्ष । जघास । जघस । जक्षिव, जक्षिम) "लिट्यन्यतरस्याम्" इत्यदेः पक्षे घस्लादेशः । णिति वृद्धिः । उत्तमे तु णिद्विकल्पः । अपित्सु "असंयोगाल्लिट् कित्" इति कित्त्वे "गमहन०" इत्युपधालोपः, तस्य "द्विर्वचनेऽचि" इति स्थानिवत्त्वाद् द्विर्वचनं, "शासिवसिघसीनां (१)च" इति षत्वम् , अत्रोपधालोपस्य पूर्व्वस्मादपि विधाविति स्थानिवत्त्वं षत्वविधानवैयर्थ्यप्रसङ्गात् [पूर्वत्रासिद्धे न स्थानिवत्] इति वा न भवति। घकारस्य "खरि च" इति चर्त्वात्ककारः, अ(२)त्राप्युपधालोपस्य न स्थानिवत्त्वं "न पदान्त" इत्यादिना वा [पूर्वत्रासिद्धे न स्थानिवत्] (३)इत्येव वा तन्निषेधात्, "अचःस्तास्वत्"इति थल् इण्निषेधस्तासौ सत इत्युक्तं,तेन घस्लादेशस्य तासावसत्त्वान्नात्र(४)स निषेधः।अत एव तद्विषयो भारद्वाजनियमोऽपि न भवति, यद्वा स्थानिवद्भावात् "इडत्त्यर्ति०" इति नित्यमिड् भविष्यति नन्वस्ति प्रकृत्यन्तरघसिस्तसौ नित्यानिट् च.तस्मात्थलि(५) जघस्थेति दुर्वारम् ,मैवम्। प्रकृत्यन्तरस्य घसेर्यत्र लिङ्गं वचनं वास्ति तत्रैव प्रयोजनं न सर्वत्रेति तत्रैव धातावुपपादितत्त्वात् , अतो नास्ति लिटि प्रयोगः । घस्लादेशाभावे, (आद, आदतुः । आदुः । आदिथ । आदिव) क्रादिनियमादिट् । थलि भारद्वाजनियम "इडत्त्यर्त्तिव्ययतीनाम्" इति बाध्यते । "अत आदेः"इत्यभ्यासादेर्दीर्घः (अत्ता, अत्तासि, अत्तास्मि,अत्स्यति, अत्स्यसि,अत्स्यामि, अत्तु,अत्तात् । अद्धि । अदानि। आदत् । आदः । आदम्) "अदः सर्वषाम्" इत्यदाऽङ्गात्परस्य सार्वधातुकापृक्तस्याडागमः (अद्यात् । अद्याः । अद्याम्)। आशिषि(६) (अद्यात्) अन्यत्र तु सलोपाभावो विशेषः। अद्यास्तामित्यादि । (अघसत् । अघसताम्। अघसन् ,अघसः। अघसतम् , अघसत, अघसम् । अघसाव । अघसाम) "लुङ्सनोर्घस्लृ" इति घस्लादेशे लृदित्त्वादङ्, (जिघत्सति)। घस्लादेशे "सस्यार्द्धधातुके"इति तत्वम्। आदयते ऽन्नं देवदत्तेनादयतीति वा (आदिदत । आदिदत्) णिलोपस्य स्थानिवत्त्वादिशब्दस्य द्विर्वचनं,"निगरणचलन०" इति कर्त्रभिप्राये प्रतपस्यः परस्मैपदस्य [अदेः प्रतिषेधः]इति निषेधः। [आदिखाद्योः प्रतिषेधः] इति प्रयोज्यस्य कर्तुः(७)कर्मत्त्वनिषेधः। (व्यत्यत्ते। व्यत्यदाते । व्यत्यदते)"कर्त्तरि कर्म्मव्यतिहारे" इति तङ्, "आत्मनेपदेष्वनत"इति झस्यादादेशो ऽनकारान्तादङ्गात्परत्वात्, व्यत्यदन्ति वृका मेषानिति हिंसायां द्रष्टव्यं, तत्र हि "न गतिहिंसा०" इतितङ् निषिध्यते (व्यतिजक्षे । व्यत्यादे । व्यत्यत्ता । व्यत्यत्स्यते, व्यत्यत्ताम् , व्यत्यात्त । व्यत्यदीत । आशिषि

---

(१) इण्कोः परत्वे इति ३।४। पुस्तकेऽधिकम् ।

(२) इहापीति २ पु. पाठः ।

(३) इत्येवेति नास्ति २ पु. ।

(४) न भवतीति ४ पु० नात्र प्रतिषेधः इति २ पु० । नास्ति निषेधः इति ३ पु० पाठः।

(५) थलीति नास्ति २ पु० ।

(६) आशिषि सलोपाभावो विशेष इति ४ पु० पाठः ।

(७) कर्तुरिति ४ पु० नास्ति ।

व्यत्यत्सीष्ट । व्यत्यघत्त । व्यत्यात्त) "सस्यार्द्धधातुके" इति तत्त्वे "झलो झलि" इति सिचो लोपः (कर्म्मण्यद्यते अदती) शत्रन्तात् "उगितश्च" इति ङीप् । नित्यत्वादन्तरङ्गत्वाच्च नुमः पूर्वं शपो लुगिति "शप्श्यनो॰" इति नुमत्र न भवति । न च प्रत्ययलक्षणमस्ति । तन्नादित्यधिकाराद्वर्णाश्रये च तन्निषेधात् (जग्धः । प्रजग्ध्य) "अदो जग्धिर्ल्यप्ति किति" इति जग्ध्यादेशः । पुत्रो जग्धो यया सा पुत्रजग्धी, "राजदन्तादिषु परम्" इति निष्ठान्तस्य परनिपातः । "अस्वाङ्गपूर्वपदाद्वा" इत्यस्वाङ्गवाविपूर्वपदन्तोदातात् क्तान्तादन्तादात्ताद्बहुव्रीहेर्वा ङीप्,[वा हतजग्धपर] इति पुत्रतकारस्य वा द्वित्वम्, अन्नं लब्धा आन्नः, "अन्नाण्णः" इति द्वितायान्ताद्(१)लब्धेत्यर्थे णप्रत्ययः। अत एवान्नादिति निर्देशात्संज्ञायां न जग्ध्यादेशः(२), सर्वप्रकारमन्नं भक्षयति सर्वान्नीना भिक्षुः। "अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु" इति द्वितीयान्तादस्माद्यथासंख्याद् भक्षयतीत्यर्थे खः (काकादनी,। गवादनी,) ल्युटि गौरादित्वान् ङीष् प्रातीति (प्रघसः) अप् [अच्युपसंख्यानम्]इति घस्लादेशः । सस्यमत्तीति (सस्यात्) "अदोऽनन्ने" इत्यद्यादन्यस्मिन्कर्म्मण्युपपदे विट् । अन्ने तूपपदे कर्म्मण्यणिन्नादः, (सस्याद) इति वासरूपेण (क्रव्यात) "क्रव्ये च" इति विट् । "अदोनन्ने" इत्येव सिद्धे पुनर्विधानं वासरूपबाधनार्थमिति भाष्यादौ स्थितम् । क्रव्यादशब्दस्तु कृत्तविकृत्तपक्वमांसशब्दे उपपदेऽणि पृषादरादित्वादुपपदस्य क्रव्यभावइति वृत्यादौ, "व्यासं गुहाशयैः क्रूरैः क्रव्यादैः सनिशाचरैरित्यसमांसभक्ष्ये व्याघ्रादौ भट्टिप्रयोगश्चिन्त्यः । राक्षसः कौणपः क्रव्यात् क्रव्याद इत्यादौ कृत्तविकृत्तपक्वमांसस्यापि भक्षणं सम्भवतीति क्रव्यादव्यवहारः (पुत्रादिनी) "सुप्यजातौ" इति णिनिः। अत्र पुत्रतकारस्य प्राप्तं "अनचि च" इति द्वित्वं "नादिन्याक्रोशे पुत्रस्य" इत्यादिनीशब्दे उत्तरपदे आक्रोशे गम्यमाने नेति निषिध्यते । [तत्परे च] इतिवचनात्पुत्रपुत्रादिनीत्यत्रापि द्वित्वं न भवति । (अद्मरः) "सृघस्यदः क्मरच्" इति क्मरच् " (घासः) "अकर्तरि च कारके॰" इति घञि "घञपोश्च" इत्यदेर्घस्लादेशः । महत्या घासो महाघासः [महदात्वे घासकरविशिष्टेषूपख्यानम्] इति पुंवद्भाव आत्त्वञ्च, (विघसः) "उपसर्गेऽदः" इत्यप् नौ तूपपदे "नौ ण च" इत्यबणौ भवतः । (न्यादो निघसः)। "घञपोश्च" इत्यपि घस्लादेशः । (अन्धोऽन्नम्) "अदेर्नुम् धश्च" इत्यसुनि नुमागमो दकारस्य धकारः, अत्री अत्ता राक्षसादिरुच्यते । अत्रिर्ऋषिः,(३)"अदेस्त्रिनि च"इति त्रिनिप्रत्ययः चकारात् त्रिप् च। त्रिनेरिकारो नकारपरित्राणार्थः। अत्रेरपत्यमात्रेयः । "इतश्चानिञः" इति ढक् । अस्य बहुत्वे "अत्रिभृगुकुत्स॰" इति लुकि (अत्रय) इति भवति। अद्यते फलमूलादिकमस्येति(अद्रिः)। "अदिसधिभूशुषिभ्यः क्रिन्"इति क्रिन् प्रत्ययः । (अध्वा) "अदेर्ध्व च" इति क्वनिप् । दकारस्य च धकारः, अध्वानमलङ्गच्छतीति (अध्वन्यः । अध्वनीनः)। *अध्वनो यत्खौ* इति द्वितीयान्तादलङ्गामीत्यर्थे यत्खौ, यति "ये चाभावकर्म्मणोः" इति खे तु "आत्माध्वानौ खे" इति प्रकृतिभावः । विहीनो ध्वा व्यध्वः, एवं दुरध्वः "उपसर्गादध्वनः" इत्यच् समासान्तः । उपसर्गग्रहणं प्राद्युपलक्षणम् । प्राध्वंशब्दो मान्तो ऽव्ययमानुकूल्ये वर्तते ॥ १ ॥

हन हिंसागत्योः (हन्ति । हतः, घ्नन्ति । हंसि । हथः । हथ । हन्मि, हन्वः । हन्मः) झलादौ क्ङित्यनुदात्तोपदेशेत्यनुनासिकलोपः । झावन्तरङ्गत्वादन्तादेशेऽजादित्वात् "गमहन" इत्युपधालोपे "हो हन्तेर्ञ्णिन्नेषु" इति ञिति णिति ,प्रत्यये नकारे च परे कुत्वविधानात्सोष्मणो घोषवतो नादवतो महाप्राणस्य हकारस्य तादृशो घकारः । अत्रोपधालोपस्य स्थानिवत्त्वं नकारे परतः कुत्वविधानसामर्थ्यान्न भवति, सत्यपि वा स्थानिवत्त्वे वचनसामर्थ्यादीदृशं

(१) द्वितीयासमर्थादिति ३ पु॰ पाठः ।

(२) जग्ध्यादेशाभाव इति ३ पु॰ पाठः ।

(३) त्रिबित्यनुवर्तमाने अदेस्त्रिनि चेति त्रिनित्रिपौ प्रत्ययौ ।

व्यवधानसाक्षि

आदरणीय जीजी,

सादर चरण स्पर्श

आशा है स्वस्थ व प्रसन्न होंगी।
मैं ठीक से चल रहा हूँ।

कृपया नोट करलें-

आपने (हमारे अतुल अग्रवाल) 25-5-92 को
18000) रु. नगद लिए थे
अपने घर निर्माण कार्य वास्ते।
और 10 मार्च 1993 को लौटा
दिए।

अभी कोई ब्याज नहीं दिया
है॥ हम देना चाहते हैं लेकिन
ये मना कर रहे हैं।
शेष बातें फिर-समय-देंगे।

व्यवधानमाश्रयिष्यते (जघान, जघ्नतुः । जघ्निथ । जघन्थ । जघ्न, जघान, जघन । जघ्निव) क्रादिनियमादिट् । थलि भारद्वाजनियमाद्विकल्पः, यत्रापधालोपस्तत्र "द्विर्वचनेऽचि" इति स्थानिवत्त्वाद् द्विर्वचनं, (जघ्निवान्, जघन्वान्) "विभाषा गमहनविदविशाम्" इति क्वसोरिड्विकल्पः, इटि "गमहन०" इत्युपधालोपे "हो हन्ते०" इति कुत्वम्, अनिटि तु "अभ्यासाच्च" इत्यभ्यासादुत्तरस्य हन्तिहकारस्य कुत्वम् । चान्द्रास्तु भाषायामस्य प्रयोगमिच्छन्ति, (हन्ता, हनिष्यति) "ऋद्धनोः स्ये" इतीट् (हन्तु हतात् । हताम्, घ्नन्तु । जहि, हतं, हनानि) तातङि तस्य ङित्त्वादनुनासिकलोपः । हौ "हन्तेर्जः" इति जादेशः । अस्य "असिद्धवदत्राभात्" इत्यसिद्धत्वात् "अतो हेः" इति लुङ् न भवति । हतात्त्वमित्यत्र जादेशात्परत्वात्तातङि तस्य स्थानिवद्भावेन हित्वात्प्राप्तो(१) जादेशः सकृद्गतिपरिभाषया न भवति । (अहन् । अहताम् । अघ्नन्, अहन् । अहतम् । अहत । अहनम् । अहन्व) हल्ङ्यादिना तिस्यालोपः (हन्यात् । हन्याताम् । हन्युः । हन्याम् । हन्याव । आशिषि वध्यात् । वध्यास्ताम् । वध्यासुः वध्यासम्) "हनो वध लिङि" "आर्द्धधातुके" इति वधादेशे "प्यल्लोप" इत्यादिना "अकृत्सार्वधातुकयोः" इति दीर्घ(२)मतो लोपो बाधते (अवधीत् । अवधिष्टाम् । अवधिषुः । अवधीः । अवधिषम् । अवधिष्ट । "लुङि च" इति वधादेशः । अल्लोपस्य स्थानिवत्त्वाद्धलन्तलक्षणा वृद्धिर्न भवति, वधादेशस्यानेकाच्त्वादुदात्तत्वनिपातनादनुदात्तत्वाभावात्सिचा वलादिलक्षण इड् भवति । यङ्लुगन्तस्यापि हन्तेर्लिङ्लुङोः प्रकृतिग्रहणन्यायेन वधादेशे वध्यादवधीदित्येव रूपम् । अत्रादेशस्य स्थानिवत्त्वेन यङन्तत्वाद् द्विर्वचनं स्यादिति न वाच्यम् । एवं हि प्रकृतिगतं साभ्यासत्वमप्यातिदिश्येत, ततश्चानभ्यासस्येति निषेधः स्यात् (आहते । आघ्नाते, आघ्नते । आहसे । आघ्नाथे । अहध्वे । आघ्ने । आहन्वहे आहन्महे ।) पूर्ववज्झलादा(३)वनुनासिकलोपः । अजादौ तूपधालोपः । "आङो यमहनः" इत्यकर्म्मकात् [स्वाङ्गकर्म्मकाच्च] इति तङ् (आजघ्ने । आजघ्नाते । आजघ्निषे, आहन्तासे, आहनिष्यते । आहताम् । आघ्नाताम् । आहन्व । आहनै)। आटि पित्वान्नोपधालोपः (आहत, आघ्नाताम्, आहथाः आघ्नि । आहन्वहि । आघ्नीत । आघ्नीयाताम् । आघ्नीथाः । आघ्नीय) लिङस्सलोपः । आशिषि (आवधिषीष्ट, आवधिषीयास्ताम् ।) "हनो वध लिङि" इति वधादेश इडागमः ॥ (आवधिष्ट, । आवधिषाताम् । आवधिष्ठाः । आवधिढ्वम् । आवधिषि) "आत्मनेपदेष्वन्यतरस्याम्" इति पक्षे वधादेशः (अन्यदा आहत । आहसाताम् । आहसत । आहथाः आहध्वम् । आहसि । आहन्वहि ।) अत्र "हनः सिच्" इति झलादेरात्मनेपदपरस्य 'सिचः' कित्वादनुनासिकलोपे "ह्रस्वादङ्गात" इति झलि सिचो लोपः । "आङो यमहनः" इति तङ् अकर्म्मकात्स्वाङ्गकर्म्मकाच्चेत्युक्तम् । अथ कथमाजघ्ने विषमविलोचनस्य वक्ष इति । अत्र के चिदाज इति पदं छित्त्वा घ्न इति भावे क्विपि चतुर्थ्येकवचनान्तमुक्त्वा घ्ने हन्तुमाज आजगामेत्यर्थ इति समर्थयन्ते । तदयुक्तम् । "अजेर्व्यघञपोः" इति लिङ्यार्द्धधातुके वीभावेन (४)भाव्यत्वात् । अन्येतु विषमविलोचनस्य समीपमेत्य स्वं वक्ष आस्फालितवानित्यर्थ इति । मल्लो ह्युत्साहाविष्करणाय स्वं वक्ष आस्फालयतीति । भागवृत्तौ तु नैवायं साधुरित्या(५)योध इति पाठान्तरमुक्तम्, एवं च आहध्वं मा रघूत्तममिति भट्टिप्रयोगोऽपि चिन्त्यः । तथा मदर्थेऽरीन् विजघ्निथेति च । अत्र सिपः पित्त्वात् "असंयोगाल्लिट् कित्" इत्यत्र चापिदित्यधिकारात् कित्त्वाभावादुपधालोपोऽपि दुर्लभः । अपिदधिकारश्च

(१) पुनरिति पुस्तकान्तरे पाठः । (२) दीर्घोऽतो लोपेन बाध्यते इति पुस्तकान्तरे पाठः ।
(३) क्ङित्यधिकं क्वचित् । (४) भवितव्यमिति कुत्रचित् ।
(५) आयोध युद्ध, आपदे इति पुस्तकान्तरे पाठः ।

"इन्धिभवतिभ्यां च" इत्यत्र भवतिग्रहणाज्ज्ञायते। तथाच तत्र वार्त्तिकमिन्धेः संयोगार्थं वचनं भवतेः पिदर्थमिति। "आङो यमहनः" इति तङ् प्रकृतिग्रहणन्यायेन यङ्लुगन्तादपि भवति (आजङ्घते। आजङ्घांचक्रे इत्यादि) भवति। अत्रापि लिङ्लुङोर्वधादेशे प्रकृतिवदेव रूपम् (आवधिषीष्ट। आवधिष्ट) इति लुङि वधादेशाभावे आ-जङ्घनिष्टेत्यादि, "हनः सिच्" इत्यत्र झलीत्यधिकारा(१)दिडागमे कित्त्वाभावादुपधालोपाभावः। (जिघांसति)। "अज्झनगमा०" इति दीर्घः। "अभ्यासाच्च" इति कुत्वं, (जङ्घन्यते)। "नुगतोऽनुनासिकान्तस्य" इति नुक्। इदं चानुस्वारोपलक्षणार्थं पदान्तवदिति च प्रागेवोक्तम्। तेन "वा पदान्तस्य" इति परसवर्णो विकल्पेनोदाहार्यः॥ [यङि हन्तेर्हिंसायां घ्नीभावो वक्तव्यः] इति घ्नीभावविधानाद् हिंसायां (जेघ्नीयत) इति भवति। (जङ्घनीति, जङ्घन्ति। जङ्घतः। जङ्घ्नति।) अत्र सुधाकरः। के पुनरनुदात्तोपदेशा यम्यादय इति व्याख्यातृभिर्गणत्वेन निर्देशान्निर्दिष्टं यद्गणेन चेति यङ्लुकि अनुनासिकलोपाभावादनुनासिकस्येति दीर्घे जङ्घात इत्युक्त्वा न क्वचिदाचार्येणानुदात्तोपदेशानां गणेन निर्देशः कृत इति भवितव्यमेवानुनासिकलोपेनेत्याह। "हन्तेर्जः" इत्यत्र च न्यासे हन्तेरिति तिपा निर्देशाद् यङ्लुकि जभावाभावाज्जङ्घहीति भवतीति कृतानुनासिकलोपः प्रत्युदाहृतः, अत्र "असिद्धवदत्र०" इत्यनुनासिकलोपस्यासिद्धत्वाद्धि लुङ् न भवति। अत्रात्रेयः–न्यासे प्रत्युदाहरणं जङ्घनीहि इति पठन् भाषायां हेरपित्त्वार्दीडभावाच्छान्दसमुदाहरणमित्याह (घातयति)। (अजीघतत्) "हनस्तो चिण्णलोः" इति हन्तेर्ञिति णिति प्रत्यये चिण्णल्वर्जिते परे नकारस्य तकारः। प्रकृतिग्रहणन्यायेन यङ्लुगन्तेऽपि तत्त्वे (जङ्घातयति।) कर्म्मणि (हन्यते जघ्ने, हन्ता। घानिता। हनिष्यते। घनिष्यते। हन्यताम्। अहन्यत। हन्येत।) आशिषि (घानिषीष्ट, वधिषीष्ट। अवधि। अघानि। अवधिषाताम्। अहसाताम्। अघानिषातामित्यादि) स्यादिषु चिण्वद्भावपक्षे वृद्धिकुत्वे। नन्ववधीत्यत्र चिणि वधभावो दृश्यतइति चिण्वद्भावेन स कस्मान्नातिदिश्यते। उच्यते। नात्र चिणि दृष्टमात्रमतिदिश्यते किन्त्वाङ्गं चिणि दृष्टमिति वधादेशो न भवति। लिङ्लुङोः कर्तृवद्वधादेशतद्विकल्पौ, लिङि चिण्वत्पक्षे वधादेशो न भवति, यतश्चिण्वदिट्परत्वेन पूर्वं वधादेशं बाधते, कृते तु सकृद्गतिपरिभाषया न भवति, ननु द्वितीयाध्याये "आर्द्धधातुके" इति विषयसप्तमी, तेन प्रागेव प्रत्ययोत्पत्तेर्वधभावेन भाव्यं, चिण्वद्भावस्तु भावकर्म्मविषयेषु स्यादिषु परतो विधियत इति कथमन्तरङ्गबहिरङ्गयोर्विप्रतिषेधः। नैष दोषः। यत्रार्द्धधातुकसामान्यं निमित्तत्वेनोपादीयते "अस्तेर्भूः" इत्यादौ तत्रैव विषयसप्तम्याश्रयणात्, न पुनर्यत्र विशेष उपादीयते "हनो वध लिङि" इत्यादौ तत्रापीति। उक्तं चैवं चिण्वत्सूत्रे व्याख्यातृभिः। वार्त्तिकं च [वधभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेन] इति। कैयटेन तु विषयसप्तम्याश्रयणेनापि परिहार उक्तः। यथा "एकाच उपदेशेऽनुदात्तात्" इत्यत्र वक्ष्यति भाष्यकारः। वधिषीष्टेत्यत्र निपातनस्वरं प्रत्ययस्वरो बाधिष्यते आर्धधातुकीयाः सामान्येन भवन्त्यनव(२)स्थितेषु प्रत्ययेष्वित्येवं ब्रुवता लिङीति विषयसप्तम्येवाभ्युपगता, ततश्चान्तरङ्गत्वाद्वधभावः प्राप्नोति, प्रतिपदविधेर्बलीयस्त्वाच्चिण्वद्भावो भवतीति, कर्म्मकर्त्तरि आहते माणवकः स्वयमेव, आवधिष्ट माणवकः स्वयमेवेत्यत्र (यक्चिणोः प्रतिषेध) इत्यादिना यक्चिणोर्निषेधात् शप्सिचौ भवतः। अत्र हरदत्तेनात्मनेपदविधावकर्मका ये धातवो निर्दिष्टास्ते यदान्तर्भावितण्यर्थाः सकर्म्मका भवन्ति त आत्मनेपदाकर्म्मका आहन्ति माणवकमिति तदा सकर्म्मकत्वादनुदाहरणमिति केचित्। अन्ये त्वात्मनेपदाकर्म्मकेति धातूपलक्षणत्वात्कर्म्माविवक्षा-

(१) इडादेरकित्त्वादिति पुस्तकान्तरे।
(२) अनवस्थितेषु प्रत्ययेष्विति बहुषु पुस्तकेषु नास्ति।

यामात्मनेपदस्य निमित्तत्वात्सकर्म्मकेऽप्यविरुद्धमुदाहरणमित्याहुः। इत्ये(१)तन्नाविगोतमुदाहरणम् । "वेः शब्दकर्म्मणः" "अकर्म्मकाच्च" विकुर्व्वते सैन्धवाः, वल्गन्तीत्यर्थः, तान्यदाऽन्या वल्गयति तदा तेषां कर्म्मकत्वं, पुनः सौकार्यातिशयाय कर्तृत्वविवक्षायां विकुर्वते सैन्धवाः स्वयमेव वल्गतीत्युक्तं, चोरस्य निप्रहन्ति, चोरस्य निहन्ति, चोरस्य प्रहन्ति, चोरस्य प्रणिहन्ति, अत्र "नेर्गद०" इति णत्वं, "जासिनिप्रहण०" इति । कर्म्मणि शेषषष्ठी, तत्र निप्रग्रहणं संघातविगृहीतविपर्यस्तार्थमित्युक्तं, (प्रहण्मि । प्रहन्मि । प्रहन्वः । प्रहण्वः । प्रहन्मः, प्रहण्मः) अत्र "हन्तेरत्पूर्वस्य" इत्युपसर्गस्थान्निमित्तात्परस्यात्पूर्वस्य हन्तिनकारस्य विधीयमानं णत्वं प्रहण्यते प्रहणानीत्यादाविव नित्यप्राप्तं "वमोर्वा" इति नकारवकारयोः परयोर्विकल्प्यते । प्राघानीत्यत्र "अत्पूर्वस्य" इति तपरकरणाण्णत्वस्य न प्रसङ्गः, प्राहन्नित्यत्र तु "पदान्तस्य" इति निषेधः, प्रहन्तीत्यत्रानुस्वारे कर्त्तव्ये णत्वं पूर्वत्रासिद्धमिति न भवति, कृते तु परसवर्णे तस्यासिद्धत्वात्पुनर्णत्वं न भवति, [अन्तः शब्दस्याङ्किविधिणत्वेषूपसंख्यानम्] इत्युपसर्गसंज्ञोपसंख्यानात्तत्पूर्वस्यापि सर्वमिदं णत्वं द्रष्टव्यम्, अन्तर्णिहन्तीत्यादि, एवं च "अन्तरदेशे" इति हनो नकारस्य णत्ववचनमर्थादेशे णत्वनिषेधार्थं भवति अन्तर्हननो नाम वाहीकेषु ग्रामेषु देशविशेषः, अन्यत्रान्तर्हणनमिति णत्वं भवति, मध्ये हननमित्यर्थः सर्वमिदं णत्वं तिपा निर्द्देशाद्यङ्लुकि न भवति प्रणिजङ्घतीत्यादि, "जासिनिप्रहण०" इति षष्ठी तु भवत्येव । चोरस्य प्रणिजंघतीत्यादि । अन्तर्हत्य मध्ये हत्वेत्यर्थः, "अन्तरपरिग्रह" इत्यन्तरो गतित्वात् "कुगतिप्रादयः" इति तत्पुरुषे ल्यपि "वा ल्यपि" इत्यनुनासिकलोपे तुक् । वाग्रहणस्य व्यवस्थितविभाषात्वान्मान्तेषु विकल्पितो ऽनुनासिकलोपो ऽन्यत्र नित्यमित्युक्तम् । परिग्रहेऽगतित्वादन्तर्हत्वा मूषिकां श्येनो गत इति भवति, परिगृह्येत्यर्थः । अत्र न्यासोद्योते अन्तश्शब्दो धातोः परिग्रहे वृत्तिं करोतीति, एवं चान्तरपि परिग्रहस्यैव द्योतक इत्युक्तं भवति, कणेहत्य पयः पिबति, मनोहत्य पयः पिबति । *कणेमनसी श्रद्धाप्रतीघाते* इति कणेमनःशब्दयोर्गतित्वे समासादिपूर्ववत्, अत्र कणेशब्दः सप्तमीप्रतिरूपको निपातो ऽभिलाषातिशये वर्तते, मनश्शब्दोऽपि साहचर्यादभिलाषा वृत्तिरेवेति न्यासपदमञ्जर्याः, हन्तिरत्रावधीकरणाङ्गे निवृत्तौ वर्त्तते, सा च सन्निधानात्कणेमनश्शब्दार्थयोस्तौ च निवर्त्यमानतया ऽवधीति तयोश्च प्रतिघातो विषयतया विशेषणं, तदयमर्थः । अभिलाषनिवृत्ति(२)पर्यन्तं पयः पिबतीति । उक्तञ्च न्यासोद्योते, प्रतीघाते हन्तिरवधिकरणाङ्गे निवृत्तौ वर्त्तत इति । अभिलाषनिवृत्तिमवधीकृत्य पयः पिबतीति, हरदत्तोऽपि अतिशयेन अभिलष्य तन्निवृत्तिपर्यन्तं पयः पिबतीत्यर्थः । एवं चात्राभिलाषनिवृत्तेरवधीकरणस्य पयः पानात्पूर्वत्वात् क्त्वोपपत्तिः, श्रद्धाप्रतीघातादन्यत्र कणे हत्वा मनो हत्वा, कणशब्दः सूक्ष्मे तन्दुलावयवे वर्त्तते, मनःशब्दस्तु चेतसि, योगद्वयमिदं (३)स्वभावाद्धन्तिविषयं, (वध्यः ।) "हनो वध च" इति कर्म्मणि यत्, तत्संनियोगेन वधादेशश्च, घात्य इति ण्यति । (ब्रह्महत्या,) "हनस्त च" इत्यनुपसर्गे उपपदे क्यप् तत्संनियोगेन नकारस्य तकारः । सोपसर्गादनुपपदाच्च नायं विधिरिति (४)घात इति घञ् भवति । तयोरेवेति भावलक्षणो ण्यदत्रानभिधानान्न भवतीत्यात्रेयः । असिहत्यायां भवमासिहात्यम्, "अनुशतिकादीनां च" इत्युभयपदवृद्धिः । अत्र केचिदश्वहत्येति पठन्ति । ततो विमुक्तादित्वादश्वहत्याशब्दो ऽस्मिन्नध्यायेस्तीत्यण्याश्वहात्यमिति भवति, हत्याशतं पानसहस्रमित्यादाव-

---

(१) इदमत्राविगीतमुदाहरणमिति पुस्तकान्तरे पाठः ।
(२) मवधीकृत्येति क्वचित् । (३) अर्थस्वभावादिति क्वचित् ।
(४) संघात इति अधिकम् ।

नुपपदे क्यबार्षः । घनाघनः [हन्तेर्घत्वं च] इत्यचि द्विर्वचनमभ्यासस्यागमो हकारस्य घकारः, परस्य "अभ्यासाच्च" इति कुत्वम्, आको दीर्घोच्चारणसामर्थ्यान्न हलादिशेषः, यदि स्यादकमात्रं विदध्यात्सवर्णदीर्घेणाकारो भविष्यति, परस्तु त्वगिच्छान(१)वेत्यर्थान्न भविष्यति । शत्रुहः शत्रुं वध्यादित्यर्थः । "आशिषि हन" इत्याशिषि गम्यमानायां कर्म्मण्युपपदे डप्रत्ययः । डित्वसामर्थ्याट्टिलोपः । दाराहन्तीति दारावाटः, [दारावाहनो ण्यन्तस्य च टः संज्ञायाम्] इत्याङ्पूर्वाद्धन्तेः कर्त्तर्यण, नकारस्य च टकारः चारावाहन्तीति चारावाटः चारावाघातो वा । [चारौ वा] चारौ कर्म्मण्युपपदेऽण्प्रत्यये नकारस्य वा टकारः । तदभावे "हनस्तोऽचिण्णलोः" इति तत्वं, क्रियाविशेषणत्वाच्चारोः कर्म्मत्वं, वर्णान्संहन्तीति वर्णसंघाटो वर्णसंघातो वा, [कर्म्मणि समि च] इति कर्म्मणि समि चोपपदेऽण् वा ऽन्त्यस्य च टकारः । क्लेशापहः, तमोपहः । "अपेः क्लेशतमसोः" इति क्लेशतमसोः कर्म्मणोरुपपदयोरपपूर्वाद्धन्तेडः, 'स्वागयं यदि जीवितापहा' इति प्रयोगस्तु "क्विप् च" इति सार्व्वकालिके क्विपि, "ऋन्नेभ्य०" इति ङीब् न भवति, बह्वादिषु ङीब्विकल्पार्थं हन्निति पाठात् । यदि हि ङीषभावे ङीप्स्याद् गौरादिष्वेव हन्निति पठित्वा नित्यं ङीषमेव विदध्यात्, अथवा तदपि न कुर्यात्, ङीपैव सिद्धत्वात् । नात्र ङीषङीपो रूपे विशेषोऽस्ति, नापि स्वरे जीवितापहशब्दस्य "गतिकारकोपपदात् कृत्" इत्युत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वेऽन्तोदात्तस्य ङीपो "अल्लोपोऽनः" इत्युदात्तलोपनिमित्तस्य "अनुदात्तस्य च यत्रोदात्तलोपः" इत्युदात्तत्वात्, तस्माद्बह्वादिषु हन्निति ङीब्विकल्पसामर्थ्यात्तदभावे ङीब् न भवति, ज्वरापहादिवत् "अन्येष्वपि दृश्यते" इति डो वा । कुमारघाती शीर्षघाती, "कुमारशीर्षयोर्णिनिः" इत्यनयोः कर्म्मणोरुपपदयोर्हन्तेः कर्त्तरि णिनिः । अस्मादेव निर्द्देशात्प्रत्ययसंनियोगे शिरसः शीर्षभावः । जायाघ्नो ब्राह्मणो, जायाहननहेतुलक्षणयुक्त इत्यर्थः । एवं पतिघ्नी वृषली । "लक्षणे जायापत्योष्टक्" इत्यनयोः कर्म्मणोरुपपदयोर्हन्तेर्हननलक्षणवति कर्त्तरि टक्, लक्षणमात्रे उत्तरसूत्रेण सिद्धत्वात्तद्वान्निहलक्षणशब्देनोच्यते । कित्वात् "गमहन०" इत्युपधालोपः, टित्वान्ङीप् (जायघ्नः) तिलकालकः । पतिघ्नी पाणिरेखा । श्लेष्मघ्नं मधु । "अमनुष्यकर्तृके च" इति कर्म्मण्युपपदे मनुष्यादन्यकर्तृके हन्त्यर्थे टक् । मनुष्ये त्वणेव, आखुघातः शूद्रः । कृतघ्नो ब्राह्मणो गोघ्नो(२) ब्राह्मण इत्यादिषु "कृत्यल्युटो बहुलम्" इति बहुलवचनाट्टक्, मूलविभुजादित्वात्क इत्येके । अनयोः स्त्रियां विशेषो ङीप्टाभ्यां चोरघाती हस्त्यत्रामनुष्ये कर्त्तर्यप्यस्मादेव बहुलवचनादण् भवति, हस्तिघ्ना भटः, हस्तिहनने शक्त इत्यर्थः । एवं कपाटघ्नश्चोरः "शक्तौ हस्तिकपाटयोः" इत्यनयोः कर्म्मणोरुपपदयोरशक्तौ गम्यमानायां हन्तेष्टक् । अशक्तौ विषेण हस्तिनं हन्ति हस्तिघात इत्यण् भवति, पाणिघस्ताडघः, शिल्पिविशेषौ । "पाणिघताडघौ शिल्पिनि" इति पाणिताडयोः कर्म्मणोरुपपदयोर्हन्तेष्टकि टिलोपघत्वे च निपात्येते, शिल्पिनोऽन्यत्र पाणिघातः । सूत्रद्वयमिदं मनुष्यकर्त्रर्थं(३), राजानं हन्तीति राजघ्नस्तीक्ष्ण उच्यते । [राजघ उपसंख्यानम्] इति पूर्व्ववन्निपात्यते । पितृव्यं हतवान् पितृव्यघाती । "कर्म्मणि हन" इति कर्म्मण्युपपदे कुत्सिते कर्त्तरि भूते णिनिः । अकुत्सिते चौरघात इत्यणेव, ब्रह्माणं हतवान् ब्रह्महा, एवं भ्रूणहा वृत्रहा, ब्रह्मभ्रूणवृत्रेषु क्विप्" इति हन्तेर्ब्रह्मादिषूपपदेषु भूते क्विप् । "क्विप् च" इति सामान्येन

(१) सामर्थ्यादिति पुस्तकान्तरे पाठः ।

(२) शत्रुघ्न इत्यधिकं कुत्रचित् ब्रह्मघ्न इति पुस्तकान्तरे अधिकं ब्राह्मण इति च नास्ति ।

(३) कर्तृकार्यमिति क्वचित् पाठः ।

क्विपि सिद्धे नियमार्थं सूत्रं, चतुर्विधश्चात्र नियमः। धातूपपदप्रत्ययकालविषयः, तेन हिमहेत्यादौ 'क्विब् च" इति क्विप् सार्वकालिकः। "सौ च" इति दीर्घः। ब्रह्महणावित्यादिषु "इन्हन्पूषार्यम्णां शौ" इति शावेव प्रत्ययउपधालक्षणमात्रो दीर्घो नान्यत्रेति नियमात्सर्व्वनामस्थाने दीर्घो न भवति, नापि क्विपमाश्रित्यानुनासिकस्य क्विप्झलारिति। ननु सर्वनामस्थानदीर्घनिषेधसामर्थ्यादेव क्विबाश्रयोऽपि दीर्घो न भविष्यति, सत्यमिह वृत्रहणी ब्राह्मणकुले इति वृत्रहणि ब्राह्मणइति नपुंसकद्विवचनसप्तम्येकवचनान्तयोश्च "अल्लोपोऽनः" इत्यनन्तस्य भस्य विधीयमाने लोपे "विभाषा ङिश्योः" इति विकल्पिते क्विपमाश्रित्यानुनासिकस्य क्वि०" इति दीर्घः स्यात्। अयं दीर्घनियम उपधालक्षणस्यैव नान्यस्येति वृत्रहेवाचरति वृत्रहायत इत्यत्र "अकृत सार्वधातुकयो०" इति दीर्घो भवति, वृत्रहणावित्यादौ *एकाजुत्तरपदे णः* इति णत्वम्, एकाजुत्तरपदं यस्य तत्र समासे उत्तरपदप्रातिपदिकान्तनुम्विभक्तिस्थनकारस्य पूर्व्वपदस्थान्निमित्तात्परस्य नित्यं ण इति सूत्रार्थः। भसंज्ञायामल्लोपउत्तरपदस्यानचकत्वात् स्थानिवद्भावश्चाल्विधित्वान्नेत्येकाजुत्तरपदत्वाभावादिति "प्रातिपदिकान्तनुम्विभक्तिषु च" इति विकल्पो भवति वृत्रहणो वृत्रघ्न इति। अत्राधिकृतस्य पूर्व्वपदस्य सम्बन्धिशब्दत्वात्तेनाक्षिप्तेनोत्तरपदेन प्रातिपदिकस्य विशेषणादुत्तरपदप्रातिपदिकान्ते नुमि विभक्तौ च स्थितस्य नकारस्य पूर्वपदस्थान्निमित्तादुत्तरस्य वा ण इति सूत्रार्थः। तेन गर्गाणां भगिनी गर्गभगिनीत्यत्र यदुत्तरपदं भगिनीशब्दो न तत्प्रातिपदिकं नापि नान्तम्। यन्नान्तं भगिन्निति प्रातिपदिकं न तदुत्तरपदमिति णत्वं न भवति। गर्गभगिणीशब्दस्तु गर्गाणां भगो गर्गभगः सोऽस्यास्तीतीनिप्रत्यये "रषाभ्याम्०" इति णत्वे। नन्वस्य, पूर्व्वपदात्संज्ञायामगः" इति पूर्व्वपदस्थान्निमित्तादुत्तर यदि भवति संज्ञायामेवेति नियमात्कुतो णत्वप्रसङ्गः। नैष दोषो, यतोऽत्र पूर्वपदग्रहणेन,सम्बन्धिन उत्तरपदस्याक्षेपात्तत्स्थस्यैवायं नियम इति अत्र च नकारो नोत्तरपदस्थः किन्तु समासप्रातिपदिकाद्विहितेनिप्रत्ययस्थः, एवं च मातभोगीण इत्यादौ भोगोत्तरपदलक्षणे खे नित्यं णत्वं भवति। माषानभीक्ष्णं वपति माषवापिणी माषवापिनीत्यत्र "बहुलमाभीक्ष्ण्ये"इति सुप्युपपदे आभीक्ष्ण्ये गम्यमाने णिनौ "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इति कृदन्तावस्थायामेव समासे पश्चात्ततो ङीबिति णिनेर्नकार उत्तरपदप्रातिपदिकान्तस्थ इति णत्वविकल्पः। (अभ्याघाती) "सम्पृच" आदिना घिणुन्। (घातुकः)। "लषपत०" इत्यादिनोकञ्। (विघ्नः) [घञर्थे कविधानम्] इति कः। (वधः।) *हनश्च वधः* इत्यनुवृत्तेर्हन्तेर्भावेऽप्प्रत्ययस्तत्सन्नियोगेन वधादेशश्च, "हनश्च" इति चकारो भिन्नक्रमानुवृत्तस्याप्पोऽनन्तर इति घञपि भवति घात इति, भावादन्यत्रोत्सृष्टात् भावे च घञेव, हन्यत इति घातः आहन्यते आहननमिति वा अघातः,ननु वधिः प्रकृत्यन्तरमस्ति तस्मात्सिद्धं घञि "जनिवध्योश्च" इति ञिति णिति कृति यदुक्तं तन्नेति वृद्धिनिषेधाद्वध इति भविष्यति हन्तेश्च घात इति किं "हनश्च वधः" इत्यनेन, उक्तं च जनिवध्योरित्यत्र वृत्तौ, वधिः प्रकृत्यन्तरं व्यञ्जनान्तमप्यस्ति तस्यायं प्रतिषेधो विधीयतइति, तथा च हरदत्तोऽपि वध हिंसायामिति भ्वादौ पाठादिति, सत्यमेवं, वध इति रूपं सिध्यति स्वरस्तु न(१) सिध्यति। अयं ह्यादेशोऽकारान्तोदात्तः, तत्राप्पमाश्रित्याऽतो लोपउदात्तनिवृत्तिस्वरेणाप उदात्तत्वादन्तोदात्तो वधशब्दः, घञि त्वाद्युदात्तः, एवं च कर्म्मण्युपसर्गेऽपि हनो वधादेशाभावस्य प्रयोजनमन्तोदात्तवधशब्दनिवृत्तिर्भवति। प्रकृत्यन्तरेणाद्युदात्तो भवत्येव।(अभ्रघनः) अभ्रस्य काठिन्यमित्यर्थः "मूर्त्तौ घनः" इति हनोऽप्प्रत्ययेऽपि घनादेशः, मूर्त्तिरिह काठिन्यं, घनं दधीत्यादौ धर्म्मशब्देन धर्मी भण्यते। अन्तर्घणो वाहीकदेशविशेषः। "अन्तर्घनो देशे" इत्यन्तःपूर्वस्य हनोऽपि घनादेशो निपात्यते, केचिदन्तर्घणइति

---

(१) भिद्यते इति पुस्तकान्तरे पाठः।

णकारं पठन्ति तदपि ग्राह्यमेवेति वृत्तितद्व्याख्यानेषु। देशादन्यत्रान्तर्घातः, प्रघणः प्रघाणः *अगारैकदेशे प्रघणप्रघाणश्चः* इति प्रपूर्व्वस्य हनोऽपि घनादेशो वा वृद्धिश्च निपात्यते। अत्रा-गारैकदेशशब्दो निपातनस्य रूढ्यर्थत्वाद्बाह्ये द्वारप्रकोष्ठके वर्त्तते, प्रघाण इत्यत्र णत्वमपि निपा-त्यते, "हन्तेरत्पूर्व्वस्य" इति तपरकरणान्न प्राप्नोति। अगारैकदेशादन्यत्र प्रघातः। (उद्घनः) *उद्घनोत्याधानम्* इति निपात्यते। तदुपरि यस्य निधायान्यत्काष्टं तक्ष्यते तदिहात्याधा-नम्, अपघनः पाणिः पादश्च,* अपघनोऽङ्गम्* इत्यपपूर्व्वस्य हनोपि घनादेशो निपात्यते। अयो हन्यते येन सोऽयोघनः। विहन्यते येन स विघनः समीकरणसाधनम्। द्रुर्हन्यते येन स द्रुघनः, *करणेयोविद्रुषु* इत्ययोविद्रुषूपपदेषु हनोऽपि घनादेशः अत्र वृत्तौ द्रुघण इति केचिदुदाहरन्ति तत्र कथं णत्वमरीहणादिपाठात् "पूर्व्वपदात्सञ्ज्ञायाम्०" इति वेति। अन्यत्रायोघात इत्यादि भवति, स्तम्बघ्नः स्तम्बघनः। दात्रादिः *स्तम्बे कच* इति स्तम्बशब्दउपपदे करणे हनः कः प्रत्ययः, चकारादप्, तत्संनियोगेन घनादेशश्च। अत्र स्त्रियां विप्रतिषेधेन क्तिन् प्राप्नोति तं बाधित्त्वा "करणाधिकरणयोः" इति ल्युड् भवति, अत्र भाष्यम्, अथ यया इषीकया स्तम्बो हन्यते कथं तत्र भवितव्यं, के चिदाहुः। स्तम्बघ्नेति भवितव्यम्। अपरे आहुः। स्तम्बहेतिरिति, "ऊतियूतिजूतिसातिहेतिकीर्तयश्च" इति निपातनादिति। अपर आहुः। स्त-म्बहननीति भवितव्यं वक्ष्यत्येतत् "अजब्भ्यां स्त्रीखलनाः स्त्रियाः खलनौ विप्रतिषेधेन" इति, अत्र कैयटे स्तम्बघ्नेति कप्रत्यये रूपं, तस्य सर्वापवादत्त्वादिति भावः, स्तम्बहेतिरिति निपा-तनस्य सर्व्वापवादत्त्वादिति भाव इति, अत्र हरदत्तः कापोः सर्वापवादत्वात "कृत्यल्युटो बहु-लम्" इति बहुलवचनाद्वेति स्त्रियां स्तम्बघ्ना स्तम्बहनेति भवत इति। (परिघः) *परौ घः* इति परावुपपदे करणे हनोप्प्रत्ययो घश्चादेशः। *परेश्च घाङ्कयोः* इति परे रेफस्य वा लत्वं, (पलिघः। प्रतिघः) इति बाहुलकादित्यात्रेयः। उपघ्नः प्रत्यासन्नः *उपघ्न आश्रये* इत्युपपू-र्वाद्धनोऽप्युपधालोपो निपात्यते, इहाश्रयशब्दः प्रत्यासन्नवचनः, संघः प्राणिसमुदायः, उद्घः प्रशस्तः,* संघोद्घौ गणप्रशंसयोः *इति समुद्भ्यां हनोपि टिलोपो घत्त्वं च गणेऽभिधेये प्रशं-सायां च गम्यमानायां, हनो गत्यर्थत्त्वाद्गत्यर्था बुद्ध्यर्था इत्युक्तम्, उद्धन्यते(१) उत्कर्षेण ज्ञायते इति व्युत्पत्या प्रशंसावगतिः, इह गणशब्देन प्राणिनां गण उच्यते। संघशब्दस्य तत्रैव प्रसिद्धत्वात्तेनान्यत्र समूहे सङ्घात इति भवति। ब्राह्मणसङ्घात इत्यादौ प्राणिविषयत्वं पदान्तरकृतं न तु स्वाभाविकमित्यदोषः। आत्रेयस्तु हन्त्यर्थाश्चेति चुरादिपाठाद् णावेव सङ्घा-तशब्दमाह। सङ्घस्य पूरणः सङ्घतिथः "तस्य पूरणे" इति डटि 'बहुपूगगणसंघस्य तिथुक्' इति तिथुगागमः। (निघः) समारोहपरिणाहः, आरोह उच्छ्रायः, परिणाहो विस्तरः। "नि-घो निमित्तम्" इत्यपि निपात्यते, निमित्तं समन्तान्मितम् आरोहपरिणाहाभ्यां तुल्यत्वेन ज्ञातमिति व्युत्पत्तिः, पूर्व्ववद्धनो ज्ञानार्थत्वं, हेतिः, "ऊतियूति" इत्यादिना क्तिनि नलोप एत्वं च निपात्यते, "हिनोतेर्वा" गुण एतन्निपातनं, केचिदनुशतिकादिष्वस्य हेतिरिति पठन्ति, ततः प्रयोजनमिति ठकि आस्यहैतिक इति भवति। अत्रैव पाठाद्वाक्यादपि प्रत्ययः। समूलघातं हन्ति "समूलाकृतजीवेषु हन्कृञ्ग्रहः", इति समूलादिषु कर्म्मसूपपदेषु यथासङ्ख्यं हनादिभ्यो णमुल् प्रत्ययो भवति कषादित्वाद्यथाविध्यनुप्रयोगः। पाणिघातं वेदिं हन्ति पाणिना हन्ती-त्यर्थः, *करणे हनः* इति णमुल्, पूर्व्ववदनुप्रयोगः, अहिंसार्थोऽयमारम्भो हिंसायां तु पाण्यु-पघातः। अत्रापि हिंसार्थानामिति णमुलं बाधित्वा पूर्व्वविप्रतिषेधेनानेनैव णमुलिष्यते। अन्यथाऽसिघातं हन्तीत्यादौ "तृतीयाप्रभृतीन्यन्यतरस्याम्" इति समासविकल्पः स्यात्, कथं तर्हि हिंसार्थानामित्यत्र वृत्तौ दण्डोपघातं गाः शात(२)यति, दण्डेनोपघातमिति चेत्युदा-

(१) उत्कटमिति कुत्रचित् पाठः। (२) कालयतीति कुत्रचित् पाठः।

हतम् । उच्यते, हिंसार्थानां चेति चकारेण पुनर्विधानाथन पूर्व्वविप्रतिषेधेन प्राप्तस्य "करणे हनः" इति णमुलो बाधात्, एवं च पूर्वविप्रतिषेधवचनं तस्यैवानुप्रयोगे नित्यसमासार्थं भवति, गौर्यस्मै दातुं हन्यते स गोघ्नो अतिथिः "दाशगोघ्नौ सम्प्रदाने" इत्युपधालोपो निपात्यते, केचित् टकि निपातयन्ति तन्मते स्त्रियां गोघ्नीत्यात्रेयः, (जङ्घा) यङ्लुगन्तात्पचाद्यचि "नासिकोदरौष्ठज०" इति निपातनाट्टिलोप इत्यात्रेयः । कण्ठपृष्ठकटिग्रीवेत्यत्र न्यासे तु यङ्लुगन्तादेवाचि टिलोपमुक्त्वा "हन्तेर्जङ्घ च" इत्यचि जङ्घादेशे व्युत्पादितं, जङ्घाभ्यां स्वाहेत्यादावाद्युदात्तत्वं व्यत्ययेनात एवाद्युदात्तत्वदर्शनात् घञि निपातनमस्त्विति न वाच्यं, कण्ठपृष्ठग्रीवाजङ्घं चेति बहुव्रीहौ संज्ञायां जङ्घाशब्दस्योत्तरपदाद्युदात्तत्ववचनात् । घञि ह्युत्तरपदप्रकृतिस्वरमेव विदध्यात्, विस्तीर्णजङ्घा विस्तीर्णजङ्घी । "नासिकोदरौष्ठ" इत्यादिना वा ङीष् । वधमर्हति (वध्यः) "दण्डादिभ्य" इति यत्, अत्र केचित् य इत्यतकारान्तं पठन्ति । तत् 'अचो यत्' इत्यत्र [हनो वध च तद्धितो वा] इति वार्त्तिकविरोधादुपेक्ष्यं, तदिदं(१) किमर्थं "कर्तृकरणे कृता बहुलम्" इति समासेऽसिवध्य इति यथा स्यादिति । दण्डादियता तु न सिध्यति । तत्र केवलस्य वधशब्दस्य पाठात्तदन्तविध्यभावाच्च, अयं तर्हि किमर्थः, न वध्यः अवध्य इत्यत्र "ययतोश्चातदर्थे" इति नञः परस्यातदर्थयत्तद्धितान्तस्योत्तरपदस्य विधीयमानमाद्युदात्तत्वं यथा स्यादिति, कृदन्तेन तु समासे "तत्पुरुषे तुल्य" इति पूर्व्वपदाद्युदात्तत्वं स्यात् । (पुत्रहतः) वा हतजन्धपरेष्विति पुत्रतकारस्य वा द्वित्वं, कुमारिहता, "कुत्सितानि कुत्सनैः" इति कर्म्मधारये "घरूप" इत्यादिना ह्रस्वः । कुमार्या हतेत्यत्र तु वैयधिकरण्यान्न ह्रस्वः । तेन कुमारीहतेति भवति, (स्त्रीहता स्त्रिहता, ब्रह्मबन्धूहता ब्रह्मबन्धुहता) "नद्याश्शेषस्य" इति वा ह्रस्वः । लक्ष्मीहतेत्यत्र तु [कृन्नद्याः प्रतिषेधः] इति प्रतिषेधान्न ह्रस्वः । (विदुषीहता विदुषिहता, श्रेयसीहता श्रेयसिहता,) "उगितश्च" इति वा ह्रस्वः, विद्वच्छ्रेयसोः पुंवद्भावश्च वृत्तावुक्तं (विद्वद्धता, श्रेयोहता) । आत्रेये तु महच्छब्दस्य पुंवद्भाव उच्यते महद्धतेति । पादाभ्यां हन्यते इति (पद्धतिः), "हिमकाषिहतिषु च" इति पादस्य पद्भावः । (पद्धती) बाह्वादित्वाद्वाङीष् (वार्त्रघ्नः) "तस्येदम्" इत्यादिनाणि "षपूर्वहन्धृतराज्ञामणि" इत्यल्लोपः 'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्' "हनस्त" इति तत्त्वं न भवति, (भ्रौणहत्यं) "दाण्डिनायनहास्तिनायनाथर्व्वणिक जैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि" इति नकारस्य तत्वं ष्यञि निपात्यते । (हथो) विषण्णः । "हनिकुषि" इत्यादिना क्थनि "अनुदात्तोपदेश" इत्यनुनासिकलोपः । (हिमम्) । "हन्तेर्हि च" इति मकि हि भावः, हिमं न सहते (हिमेलुः) [हिमाच्चेलुर्वक्तव्यः] इति तन्न सहते इति विषये चेलुः । (महद्धिमं हिमानी) "इन्द्रवरुण" इत्यादिना ङीषानुकौ । तत्र [हिमारण्ययोर्महत्त्वे] इति पठ्यते । (हेमन्तः) "हन्तेर्मुट् हि च" इति झच्प्रत्यये मुडागमः, धातोर्हिभावे गुणः, झस्य चान्तादेशः । हेमन्ते भवं (हैमन्तिकं) "हेमन्ताच्च" इति शैषिकस्ठञ् । यद्यप्यत्र सूत्रे छन्दोग्रहणमनुवर्त्तितं वृत्तौ तथाप्युत्तरसूत्रे सर्वत्र ग्रहणादयं भाषाविषयोऽपीति वृत्तावेवोक्तं, (हैमनं) "सर्वत्राण् च तलोपश्च" इत्यणि तलोपः, अत्र चकारेण ऋत्वणोभ्यनुज्ञानाद्धैमन्तमित्यपि भवति, तलोपोऽत्र न भवति, सर्वत्राणिति विधीयमानाण्संनियोगशिष्टत्वात्तस्य, (हनुः) "श्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च" इत्युप्रत्ययः । (परिहनुभवं पारिहनव्यम्) । "अव्ययीभावाच्च" इति भवार्थं ञ्यः । तत्र [परिमुखादिभ्य उपसंख्यानम्] इति परिमुखादिरेवाव्ययीभावः परिगण्यते । (हनुलः) "सिध्मादिभ्यश्च" इति मत्वर्थं लच् । (हनूमान्) "शरादीनाञ्च" इति संज्ञायां मतौ दीर्घः । अत्रव पाठान्मतुपः "संज्ञायाम्" इति वत्वं यवादेराकृतिगणत्वान्न भवति । (हंसः)

(१) तदिदानीमिति क्वचित् ।

ब्रूतृवादि" इत्यादिना सः । आगत्य हन्तीति (अहिः) "आङि श्रिहनिभ्यां ह्रस्वश्च" इतीण् प्रत्ययः । स च डित् पूर्वपदस्य च ह्रस्वः, डित्त्वाट्टिलोपः, आङो ह्रस्वः । अहौ भवमाहेयं, "दृतिकुक्षि" इत्यादिना ठञ् । (अहीवती) शरादित्वाद्दीर्घः, "संज्ञायाम्" इति वत्वम् । (उपहत्नुः) "कृहनिभ्यां क्त्नुः" इति क्त्नुः । कित्त्वादनुनासिकलोपः, (अनेहा अनेहसौ) "नञि हन एह च" इति नञ्युपपदे असुन् एहादेशश्च । हनः, "नलोपो नञः" इति उत्तरपदे नञो नलोपः, "तस्मान्नुडचि" इति लुप्तनकारान्नञः परस्याजादेरुत्तरपदस्य नुडागमः। "ऋदुशनस्" इत्यादिनाऽनङादेशः, सावसम्बुद्धौ "सर्वनामस्थाने च" इति दीर्घः, सम्बुद्धौ तु हे अनेहः, (जघनं) "हन्तेर्द्वेच"(१) इत्यलचोरन्यतरस्मिन् द्वित्वम्, "अभ्यासाच्च" इति कुत्वं, जघने भवं, तस्मै हितं वा जघन्यं,"दिगादिभ्यो यत्" "शरीरावयवाच्च" इति योगाभ्यां यत् । दिगादावस्य पाठोऽशरीरावयवार्थः। (प्लीहा) "श्वन्नुक्षन्" इत्यादिना कनिनन्तो निपातितः । 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' इति व्युत्पत्तिकार्याभावात् "इन्हन्पूषा" इति नियमाभावात्सर्व्वत्र सर्व्वनामस्थाने दीर्घो भवति । (प्लीहा प्लीहानौ) इत्यादि । अदिहनी अनुदात्तावुदात्तेत्तौ ॥ २ ॥

द्विष अप्रीतौ ॥ लिङ्न्ता अनुदात्ताः स्वरितेतः ॥ (द्वेष्टि, द्विष्टः, द्विषन्ति । द्वेक्षि, द्विष्ठः, द्विष्ठ, द्वेष्मि, द्विष्वः द्विष्मः । द्विष्टे । द्विषाते । द्विषते,द्विक्षे, द्विड्ढ्वे । द्विषे । द्विष्वहे ।) ष्टुत्वं तवर्गादौ, सकारादौ ष्टुत्वस्य पूर्व्वत्रासिद्धत्वात् "षढोः कः सि" इति कत्वे षत्वं, (दिद्वेष, दिद्विषतुः । दिद्वेषिथ । दिद्विष । दिद्वेष । दिद्विषिव । दिद्विषे । दिद्विषिषे, दिद्विषिवहे । क्रादिनियमादिट् । द्वेष्टा । द्वेष्टासे । द्वेक्ष्यति । द्वेक्ष्यते । द्वेष्टु, द्विष्टात् । द्विष्टाम् । द्विषन्तु । द्विड्ढि । द्वेषाणि । द्वेषाव । द्विष्टाम् । द्विक्ष्व । द्विड्ढ्वम् । द्वेषै) "द्विषश्च" इति लङि विधीयमाना जुस्भावो "लोटो लङ्वत्" इत्यतिदेशान्न भवति, "लङः शाकटायनस्यैव" इत्यत्र लङ्ग्रहणं मुख्यलङ्ग्रहणार्थमिति स्थितत्वात्, हौ ढेधित्वे ष्टुत्वे च षकारस्य जश्त्वेन डकारः । उत्तमआट पित्त्वादङित्त्वाद्गुणः, (अद्वेट्, अद्विष्टाम् । अद्विषुः । अद्विषन् । अद्वेट् । अद्वेषम्, अद्विष्व । अद्विष्ट । अद्विषाताम् । अद्विषत्, अद्विष्ठाः । अद्विषि) तिप्सिपोर्हल्ङ्यादिलोपे गुणे जश्त्वचर्त्वे "द्विषश्च" इति झेर्वा जुस्भावः । (द्विष्यात् । द्विष्याताम्, द्विष्याः, द्विष्याम् । द्विषीत । द्विषीथाः । द्विषीय । द्विषीवहि) अपित्सार्वधातुकत्वान्न गुणः । आशिषि सलोपाभावो विशेषः, द्विक्षीष्ट, गुणाभावो "लिङ्सिचौ" इति कित्त्वात् (अद्विक्षत् । अद्विक्षताम् । अद्विक्षन् । अद्विक्षुः अद्विक्षम् । अद्विक्षाव । अद्विक्षत । अद्विक्षाताम् । अद्विक्षन्त । अद्विक्षथाः, अद्विक्षि । अद्विक्षावहि ।) "शल इगुपधादनिटः क्सः" अचि "क्सस्याचि" इत्यल्लोपः, (दिद्विक्षति । दिद्विक्षते) "हलन्ताच्च" इति सनः कित्त्वान्न गुणः, देद्विष्यते। देद्विषीति । देद्वेष्टि । ईटि "नाभ्यस्तस्याचि पिति" इति गुणाभावः । लङि "सिजभ्यस्त" इति नित्यं झेर्जुस्भावे परत्वात् प्रकृतिग्रहणन्यायेन "द्विषश्च" इति विकल्पे अदेद्विषुः, अदेद्विषन्नित्युभयं भवति, यङ्लुगन्तस्य सेट्त्वाल्लुङि क्साभावाददेद्वेषीदिति सिजेव । तथा क्त्वासनोरपि सेट्त्वे "रलो व्युपधात्" इति कित्त्वविकल्पनाद् (देद्वेषिषति, देद्विषिषति, देद्वेषित्वा, देद्विषित्वा) इति भवति, (द्वेषयति । अदिद्विषत् ।) कर्म्मणि द्विष्यत इत्यादि । विप्रद्विट्, प्रद्विट्, । "सत्सूद्विष" इति सोपपदात्सोपसर्गाच्च क्विप् । द्विट्शब्दस्तु "अन्येभ्योऽपि दृश्यते" इति ताच्छीलिके क्विपि । द्वेषी, संपृचादिना घिनुण । शत्रुं द्विषन् शत्रोर्वा द्विषन् । "द्विषोऽमित्रे" इति शता । अयमलादेशः । "द्विषः शतुर्वा" इति कर्मणि षष्ठी विकल्पः, द्वेषण इति बाहुलकात्कर्तरि ल्युडित्यात्रेयः, (द्विष्ट्वा, द्विष्टः, द्विष्टवान्) ॥ ३ ॥

दुह प्रपूरणे ॥ (दोग्धि । दुग्धः ॥ दुहन्ति । धोक्षि । दुग्धः । दुग्ध, दोह्मि । दुह्वः

(१) हन्तेर्द्विर्वचनं क्वाचत्पाठः ।

दुह्मः(१) । दुग्धे । दुहाते । दुहते । धुक्षे । धुग्ध्वे । दुहे । दुह्वहे ।) झलि पदान्ते च "दादेः" इति हकारस्य घकारः, "झषस्तथोः" इति तकारथकारयोर्धकारः । "झलां जश् झशि" इति घकारस्य गकारः सकारादौ ध्वे पदान्ते च "एकाचो बशो भष्" इति भष्भावेन दकारस्य धकारः, तत्र सकारादौ "इण्कोः" इति षत्वे "खरि च" इति चर्त्वम्, दुहन्ति दुहते इत्यत्र पूर्व्वत्रासिद्धत्वादन्तरङ्गत्वाद्वा प्रागेवान्त्यदादेशयोर्झल्परत्वाभावान्न घत्वप्रसङ्गः (दुदोह । दुदुहतुः । दुदोहिथ । दुदुहथुः । दुदुह । दुदोह । (दुदुहिव । दुदुहे । दुदुहिषे, दुदुहिढ्वे । दुदुहिध्वे । दुदुहिवहे,) क्रादिनियमादिट । ध्वमि "विभाषेट" इति मूर्द्धन्यविकल्पः । (दोग्धा । दोग्धासे, धोक्ष्यति, धोक्ष्यते । दोग्धु, दुग्धात्, दुग्धाम् । दुग्धि । दोहानि, दोहाव, दुग्धां, दुहातां, धुक्ष्व । धुग्ध्वं, दोहै) हेरपित्त्वान्न गुणः । आटि तु पित्त्वाद्गुणः । (अधोक् । अदुग्धाम् । अदुहन् । अधोक् । अदुग्धम् । अदुग्ध । अदोहम्, अदुह्व, अदुग्ध । अदुहाताम् । अदुग्धाः, अदुग्ध्वम् । अदुहि । अदुह्वहि,) तिप्सिपोर्हल्ङ्यादिलोपः(२) । पदान्तत्वात् "दादेः" इति हकारस्य घकारः, "एकाचो बशः" इति दकारस्य धकारः, जश्त्वचर्त्वे, प्रत्ययलक्षणेन लघूपधगुणः (दुह्यात् । दुह्याताम् । दुह्यासुः । दुहीत । दुहीथाः । दुहीय ।) अपित्सार्व्वधातुकत्वान्न गुणः । आशिषि सलोपाभावो विशेषः, (दुह्यात्, दुह्यास्ताम्, धुक्षीष्ट) इत्यादि । तङि "लिङ्सिचौ" इति कित्त्वान्न गुणः । घत्वभष्भावौ । धुक्षीध्वमित्यत्र *इणः षीध्वम्* इति मूर्द्धन्या न भवति, । षत्वे (३)षत्वस्य पूर्वत्रासिद्धत्वात्सीध्वमोऽभावात्, कृते तु षत्वादौ षीध्वमिणः परो न भवति । (अधुक्षत् । अधुक्षताम् । अधुक्षन् । अधुक्षः । अधुक्षम् । अधुक्षाव । अधुक्षत । अधुक्षाताम् । अधुक्षन्त, अधुक्षथाः । अधुक्षि । अधुक्षावहि ।) "शल इगुपधादनिटः(४) क्सः" *क्सस्याचि* इत्यल्लोपः । अत्र केचित् क्सस्य भाविनीमनकारान्ततामाश्रित्य झस्याद्भावे "क्सस्याचि" इत्यल्लोपेऽधुक्षतेतीच्छन्ति । तदसत् । तत्राचीत्यस्य परसप्तमीत्वात् । तत्र दन्त्यादौ तङि "लुग्वा दुहदिह" इत्यादिना क्सस्य वा लुक्, (अदुग्ध, अदुग्धत्, अदुह्वहि) इति भवति । अत्रात्मनेपदे तावितिवक्तव्ये दन्त्यग्रहणाद्दन्त्योष्ठ्योऽपि वकारो दन्त्यग्रहणेन गृह्यते । दुधुक्षति, दुधुक्षते । दोदुह्यते । दोदुहीति, दोदोग्धि) इत्यादि द्विषिवत् । (दोहयति । अदूदुहत् ।) अयं द्विकर्म्मकः, गां दोग्धि पय इति । तत्र पुरुषप्रवृत्तेः पयोर्थत्वात्पयः प्रधानं कर्म्मान्यदप्रधानम् । तत्राप्रधाने दुहादीनामिति वचनात् कर्म्मणि नादयोऽप्रधाने भवन्ति । दुह्यते गौः पयो देवदत्तेन, अदोहि गौः, दोग्धव्या, सुदोहा, दुग्धेति कृद्योगलक्षणषष्ठी द्वितीयावदुभयोरपि कर्म्मणोर्भवति दोग्धा गोः पयस इति । "उभयथापि गोणिकापुत्र" इति भाष्ये उक्तत्वादप्रधाने द्वितीयापि भवति । दोग्धा गां पयस इति । दोग्धव्या गौः पयो देवदत्तेनेत्यत्राभिहिते कर्म्मणि कर्त्तरि च "कर्तृकर्म्मणोः" इति षष्ठी न भवति, उभयप्राप्तौ कृत्ये षष्ठीनिषेधस्योक्तत्वात् । उपपादितं चैतद्द्वरतौ, कर्म्मकर्तरि "न दुहस्नुनमाम्" इति निषेधाद्यगस्य न भवति । दुग्धे गौः पयः स्वयमेव । (अदुग्धम् । अदुग्ध, दुहीत) इति, पयो मुञ्चतीत्यर्थः । चिण् तु "दुहश्च" इति विकल्पनात्पक्षे भवत्येव, अदोहीति । अन्यदा कर्तृवत् । क्से तस्य च वा लुकि अधुक्षत, अदुग्धेति भवति । एवं च "न दुह" इति चिण्निषेधो दुहिव्यतिरिक्तार्थो भवति । अस्ति च दुहेः सकर्मकस्यापि कर्म्मवद्भावो [दुहिपच्योर्बहुलं सकर्मकयोः] इति, "न दुह" इति निषेधो "दुहश्च" इति चिण्विकल्पश्च प्रकृतिग्रहणन्यायेन यङ्लुगन्तेऽपि भवति । (दोदुग्धे गौः पयः । अदोदोहि । अदोदोहिष्ट) इति । यङ्लुगन्तस्य सेट्कत्वाद् न क्सोऽस्तीति "च्लेः सिच्"

---

(१) इति क्वचिन्नास्ति । (२) लोपे इति क्वचित् पाठः ।
(३) षित्वस्येति पाठः । (४) इति क्स इति पाठः ।

इति सिजेव (दुह्यं, दोह्यम्) [शसिदुहिगुहिभ्यो वा] इति वक्तव्यमिति क्यबण्यतौ, (गोधुक्, प्रधुक्) "सत्सूद्विष" इत्यादिना सोपपदात्सोपसर्गाच्च क्विप्। (कामदुघा) "दुहः कब् घश्च" इति कप्प्रत्ययो हस्य च घः। दोही, "संपृच" इत्यादिना घिनुण्, (दुहिता) "नप्तृनेष्टृ" इत्यादिना तृचीटि गुणाभावो निपात्यते। "ऋन्नेभ्य" इति ङीप् स्वस्रादिपाठान्न भवति, दुहितरावित्यादौ सर्वनामस्थाने "अप्तृन्" इति दीर्घो न भवति तत्र नप्त्रादीनां ग्रहणं।संज्ञाशब्दानामौणादिकानामेषामेव दीर्घ इति नियमार्थमित्युक्तत्वात्। सौ तु "ऋदुशन" इत्यनङि नान्तत्वात् "सर्वनामस्थाने च" इति दीर्घः। दुहितुरपत्यं दौहित्रः। बिदादित्वादञ्। स्त्रियां दौहित्री, "शार्ङ्गरवाद्यञो०" इति ङीन्। सूतपुत्री सूतदुहिता। [सूतोग्रभोजराजमेरुभ्यो दुहितुः पुत्रड्वा वक्तव्यः] इति पुत्रडादेशः, टित्त्वान् ङीप्। एवमुग्रपुत्रीत्याद्यपि भवति, वाचंयम इत्यत्र वृत्तौ पुत्रडादेशमुक्त्वा'के चित्तु शार्ङ्गरवादिषु पुत्रशब्दं पठन्ति तस्य पुत्रीति भवति, अन्यत्रापि हि दृश्यते शैलपुत्रीत्युक्तम्। कथं तर्हि "वा सूतकापुत्रिकावृन्दारकाणाम्" इतीत्वविकल्प उक्तः। अत्र हरदत्तः, पुत्रिके शार्ङ्गरवादिपाठान् ङीनि स्वार्थे कन्, "केऽणः" इति ह्रस्वः इकारस्तस्य पक्षेऽत्वं विधीयतइति। इरिदयमर्द्दनार्थः शपि गतः ॥ ४ ॥

दिह उपचये ॥ (देग्धि। दिग्धः) इत्यादि पूर्ववत्। प्रणिदेग्धि, "नेर्गद" इति णत्वम्, अत्र देग्धीति श्तिपा निर्देशात् प्रनिदेदेग्धीत्यत्र णत्वन्न भवति। (देहः) "अकर्तरि च कारके" इति कर्म्मणि घञ्, देहोस्यास्तीति देही। *अत इनिठनौ* इतीनिः, यद्यपि 'एकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ' इतीनिठनौ कृदन्तान्निषिध्येते तथापि "तदस्यास्त्यस्मिन्" इत्यत इतिकरणस्यानुवर्त्तनात् तस्य च विषयनियमार्थत्वात्कार्योत्पादिवदत्रेनिर्न्नविष्यति। उक्तं च—वृत्तौ इतिकरणो विषयनियमार्थः सर्वत्र सम्बध्यत इति। दिह्यते उपलिप्यते इति देहनी। बाहुलकात् कर्म्मणि ल्युट्, गौरादित्वान् ङीष् ॥ ५ ॥

लिह आस्वादने ॥ (लेढि, लीढः, लिहन्ति। लेक्षि, लीढः, लेह्मि। लीढे। लिहाते। लिहते। लिक्षे, लिहाथे। लीढे। लिहे, लिह्वहे।) झलि "हो ढः" "झषस्तथोः" इति तथोर्द्धत्वे "ष्टुना ष्टुः" इति ष्टुत्वे तस्य चाश्रयासिद्धत्वाड् ढो ढेलोपे "ढ्रलोपे पूर्वस्य दीर्घ" इति दीर्घः। सकारादौ "षढोः" इति कत्वं, तिपि ढत्वस्य पूर्वत्रासिद्धत्वात्पूर्वमेव गुणे ढत्वादि। (लिहन्ति) लिहतइत्यत्राप्यसिद्धत्वादिना पूर्वमेवान्त्यदादेशयोर्झल्परत्वाभावाड् ढत्वं न भवति। (लिलेह। लिलिहतुः लिलिहुः,(१) लिलेहिथ। लिलिहिव। लिलिहे, लिलिहिषे। लिलिहिढ्वे, लिलिहिध्वे, लिलिहिवहे।) क्रादिनियमादिट्। (लेढा। लेढासे(२)। लेक्ष्यति, लेक्ष्यते। लेढु, लीढात्, लीढाम्, लिहन्तु, लीढि,। लेहानि। लीढां, लिहाताम्। लिक्ष्व, लीढ्वं, लेहै) हौ धित्वे ष्टुत्वादि। (अलेट् अलीढाम्, अलिहन्, अलेट्, अलीढम्, अलीढ। अलेहम्, अलिह्व, अलीढ, अलीहत, अलीढाः अलीढ्वम्, अलिहि, अलिह्वहि। लिह्यात्। लिह्याः, लिह्यां, लिहीत। लिहीथाः। लिहीय) अत्र अपित्सार्वधातुकत्वान्न गुणः, आशिषि (लिह्यात्, लिह्यास्तां, लिक्षीष्ट) इत्यादि। "लिङ् सिचौ" इति तङि कित्वान्न गुणः, लिक्षीध्वमित्यत्र ढत्वे षत्वस्यासिद्धत्वान्न षीध्वमस्ति, कृते ढत्वे कत्वषत्वयोश्च नेणः परः षीध्वमिति नास्ति मूर्द्धन्यप्रसङ्गः। (अलिक्षत्। अलिक्षताम्। अलिक्षन्। अलिक्षः अलिक्षम्। अलिक्षाव। अलिक्षत। अलिक्षाताम्। अलिक्षथाः, अलिक्षि,) "लुग्वा दुह" इत्यादिना दुहिवत् क्सस्य वा लुकि (अलीढ, अलीढाः, अलीढ्वम्, अलिह्वहि) इत्यपि भवति। (लिलिक्षति, लिलिक्षते, लेलिहीति, लेलेढि। लेलिहान) इति चानशि, (लेहयति। अलीलिहत्। लेहः) "श्याद्व्यध" इतीगुपधलक्षणस्य कस्यापवादो णः। (वर्हलिहः। अभ्रंलिहः।) "वहाभ्रे लिह" इति वहाभ्रयोः कर्म्मणोरुपपदयोः खश्। "अरुर्द्विषदजन्तस्य"

(१) कुत्रचिन्नास्ति।

(२) क्वचिन्नास्ति।

इति पूर्व्वपदस्य मुम्, खशः शित्त्वे नापित्सार्व्वधातुकत्वेन न गुणः । शपस्तु लुका लुप्तत्वान्न तदपेक्षोऽपि । अत्रात्रेयः । गणकार्य्यस्यानित्यत्वात् लुक्ङिण्योर्लिहति जिह्वया कदाचिदिति 'संज्ञापूर्वको विधिरनित्य' इति गुणाभावोऽपि, एवं वैद्यके अलिहदित्यादय इति, श्वलिड्ढौकत इत्यत्र हो ढे पदान्तरनिरपेक्षत्वेनान्तरङ्गत्वाजश्त्वमिति ढलोपो न भवति, (लिक्षा) बाहुलकात् क्सः । यूकालिक्षं "क्षुद्रजन्तवः" इति नित्यं समाहारद्वन्द्वे नपुंसकत्वम् । द्विषादयोऽनुदात्ताः स्वरितेतः ॥ ६ ॥

अथात्मनेपदिनः ॥ चक्षिङ् व्यक्तायां वाचि ॥ अनुदात्तोनुदात्तेत् । अयं दर्शनकर्म्मा च, यथा-'विश्वारूपाभिचष्टे शचीभिः' इति । प्रायेणायमाङ्पूर्वः । (चष्टे) "स्कोः" इति कलोपः । (आचक्षाते । आचक्षते) कलोपे "षढोः कः सि" इति कत्वं, चड्ढ्वे । कलोपष्टुत्वयोर्जश्त्वं, (षोढः) (चचक्षे चचक्षाते । चचक्षिरे, चचक्षिषे चचक्षिध्वे । चचक्षे, चचक्षिवहे । चख्ये । चख्याते, चख्यिरे । चख्यिषे । चक्षिध्वे, चख्ये । चख्यिवहे । चख्यिमहे) "वा लिटि" इति ख्याञादेशो वा, उभयत्र क्रादिनियमादिट् । "आतो लोप इटि च" इत्याल्लोपोऽजादौ क्ङिति इटि च, ध्वस्याल्लोपे इणन्तादङ्गात्परइडिति "विभाषेटः" इति मूर्द्धन्यविकल्पाभावः परस्तादुपपादयिष्यते । ख्याञो ञित्त्वात्पक्षे परस्मैपदमपि भवति, (चख्यौ) "आत औ णलः," (चख्यतुः । चख्युः, चख्यिथ चख्याथ । चख्यथुः । चख्य । चख्यौ । चख्यिव) थलि "अचस्तास्वत, ऋतो भारद्वाजस्य" इतीड्विकल्पः, क्शादिरप्ययादेश इष्यते इति वृत्तौ, तेन (चक्शे । चक्शाते । चक्शिध्वे । चक्शिवहे । चक्शतुः चक्शुः, चक्शिथ । चक्शाथ, चक्श । चक्शौ । चक्शिव) इति भवति । भाष्ये तु ख्याञ्क्साञावुक्त्वोभयाः संग्राहकमादेशान्तरमुक्तं, यथा, क्सादिर्वा अथ ख्शादिर्भविष्यति । केनेदानीं क्शादिर्भविष्यति चर्त्वेन, अथ ख्यादिः कथम्, [असिद्धे शस्य यवचनं विभाषा] इति असिद्धे शस्येत्यस्य कैयटः, "पूर्वत्रासिद्धम्"इत्यधिकारे णत्वविधानानन्तरं [शस्य यत्वं विभाषा वक्तव्यम्]इति, हरदत्तोऽप्येवम् । सुधाकरस्तु वाशब्दोपजीवनाय "यरोऽनुनासिकेऽनुनासिको वा" इत्यस्यानन्तरमिति । अस्याश्च कल्पनायाः प्रयोजनानि सुप्रख्यस्य भावः सौप्रख्यमित्यत्र "योपधाद्गुरूपोत्तमाद्वुञ्" इति योपधलक्षणे वुञि, यत्वस्य पूर्वत्रासिद्धत्वेनायोपधत्वाद्वुञभावात् "गुणवचनब्राह्मणादिभ्यः कर्मणि च" इति ष्यञ्, तथा सुप्रख्येन निर्वृत्तो देशस्सौप्रख्यस्तत्र भवः सौप्रख्यीय इत्यत्र "धन्वयोपधाद्वुञ्" इति वुञ् न भवति, यत्वस्यासिद्धत्वात्तदभावाद्वृद्धाच्छः । पुंसः ख्यानं पुंख्यानमित्यत्र च संयोगान्तत्वेन सलोपे [सम्पुंकानां सो वक्तव्य] इत्यम्परे खयि मकारस्य विधीयमानः सकारो यत्वस्यासिद्धत्वादम्परत्वाभावान्न भवति, (चख्यिध्वे) इत्यत्र ध्वमि इट्याल्लोप "इणः षीध्वं" "विभाषेटः" इति मुर्द्धन्यो यत्वस्यासिद्धत्वाद् न भवति, [नमःख्यात्र] इत्यत्रापि यत्वस्य "शर्परे खरि विसर्जनीय"इति विसर्जनीये कर्त्तव्येऽसिद्धत्वादस्ति शर्परतेति विसर्जनीयः, अन्यथा "कुप्वोः ≍क≍पौ च" इति विसर्जनीयजिह्वामूलीयौ द्वौ स्यातां, किं च ख्यातमित्यत्र "संयोगादेरातो धातोर्यण्वत" इति निष्ठानत्वे कर्त्तव्ये यत्वस्यासिद्धत्वान्नत्वाभावः, तथा पर्याख्यानमित्यत्र "कृत्यचः" इति नत्वे यत्वस्यासिद्धत्वादनटा शकारेण व्यवधानाद् णत्वाभावः । ननु ख्यात इत्यत्र "न ध्याख्या"इति नत्वप्रतिषेधस्य सिद्धत्वात्कथमिदं भाष्ये प्रयोजनमुक्तम् । अत्र कैयटः-"न ध्याख्या" इति तु प्रतिषेधः ख्या प्रकथन इत्यस्यैव प्रतिपदोक्तत्वादस्य तु शस्य यत्वेन लाक्षणिकत्वादिति मन्यत इति । ननु [नमः ख्यात्रे] इत्यत्र जिह्वामूलीयस्याभावः कथं प्रयोजनमुक्तं, यस्मात्स दुर्वारः । तथाहि "ख्या प्रकथन" इत्यस्मादपि तृचि ख्यातृशब्दस्य सद्भावात्तत्स्थस्य यकारस्यानादेशत्वादसिद्धत्वाभावात् "शर्परे खरि विसर्जनीय" इत्यस्याप्रसङ्गात् "कुप्वोः" इति प्राप्तस्य जीह्वामूलीयस्य बाधकाभावात् । नैष दोषः । ख्यातिरप्यार्द्धधातुके ख्शादिः, असिद्धे शस्य यवचनं विभाषेत्येतदपि तस्यापि साधारणमिति । अत्र च प्रमाणं

[सत्थानत्वं नमः ख्यात्रे] इत्यत्र सस्थानत्वं न भवतीति भाष्यवार्त्तिकयोः सस्थानाभावस्य प्रयोजनकत्वेन कथनं, सस्थानमिति जिह्वामूलीयस्य संज्ञा, तथा चाह पदमञ्जर्यां हरदत्तः, ख्या प्रकथने इति वक्ष्यते सोऽपि ख्शादिः । असिद्धे शस्य यवचनं विभाषेत्यादि तस्यापि साधारणं द्रष्टव्यमिति आत्रेयोऽपि सर्वत्रार्द्धधातुके चक्षिङ इवास्य रूपमिति । एवं चक्षिङित्र ख्यातिरपि निष्ठायां ख्शादिः । शकारस्य चासिद्धे शस्य यवचनं विभाषेति वा यत्वं, तच्च "संयोगादेरात" इति निष्ठानत्वेऽसिद्धमिति यण्वत्त्वाभावान्नत्वस्य नैव प्रसङ्ग इति । 'न ध्याख्या' इति प्रतिषेधः ख्यात्यर्थोऽपि न कर्त्तव्यो भवति । अत्रेदं विचार्यते । आचक्शावित्यादौ यत्वाभावे चर्त्वं (खयो द्वितीयाः शरि पौष्करसादेः) इति खकारो भवति वा नेति, नेत्याह। अस्मिन्कर्त्तव्ये चर्त्वस्य पूर्वत्रासिद्धत्वाद् द्वितीयभाविनः खयोऽभावात्। खयो द्वितीया इत्येतत् "नादिन्याक्रोशे पुत्रस्य" इत्यत्र हि पठ्यते । न चैवं भ्रमितव्यं क्शादिरप्ययमादेश इष्यते इति वृत्तौ ककारादिरयमादेश उच्यत इति द्वितीयभाविनः खयः सम्भवादस्ति 'खयो द्वितीया' इत्यस्य प्राप्तिरिति, यतो वृत्तिकारनिर्देशो भाविचर्त्वापेक्षः अन्यथाऽथ वा ख्शादिर्भविष्यति केनेदानीं क्शादिर्भविष्यति चर्त्वेनेत्यादि भाष्यविरोधप्रसङ्गः । (ख्याता, ख्याताहे, ख्याताहे, क्शाता, क्शाताहे, ख्याता, ख्यातासि, ख्यातास्मि। क्शाता, क्शातासि, क्शातास्मि,) "चक्षिङः ख्याञ्" इत्यार्द्धधातुके ख्याञादेशः, लिङ्वत् क्शादित्वमनुसन्धेयं, (ख्यास्यते । ख्यास्यसे, ख्यास्ये, ख्यास्यतीत्यादि क्शादिपक्ष उदाहार्यः ।) चष्टां, चक्षातां, चक्षताम् , चक्ष्व, चक्षाथाम् , चड्ढ्वं,) कलापादि लड्वत् । (चक्षै, अचष्ट अचक्षाताम् । अचक्षत । अचष्ठाः, अचड्ढ्वम् । अचक्षि, अचक्ष्वहि । चक्षीत, चक्षीयातां, चक्षीरन् , चक्षीथाः, चक्षीयाथां, चक्षीध्वं, चक्षीय) आशिषि (ख्यासीष्ट, ख्यासीयास्तां, ख्यासीष्ठाः, ख्यासीध्वं, ख्यासीय, ख्येयात् । ख्येयास्तां, ख्येयासुः, ख्येयाः, ख्येयास्तं, ख्येयासम्) "एलिङि" "वान्यस्य संयोगादेः" इति वा लिङ्यार्द्धधातुके एत्वम् । एत्वाभावे (ख्यायात् , ख्यायास्तां, ख्यायाः, ख्यायासं, क्शासीष्ट, क्शायात् क्शेयात्) इत्यादि चोदाहार्यम् , (अख्यत । अख्येताम् । अख्यन्त । अख्यथाः । अख्यध्वम् , अख्ये । अख्यावहि ।

अख्यत् । अख्यताम् , अख्यन् , अख्यः, अख्यम् , अख्याव,) "अस्यतिवक्तिख्यातिभ्योऽङ्" इति च्लेरङादेशः कर्त्तरि, ख्या इति प्रकथनार्थस्य चादेशस्य च ग्रहणमिति वृत्तिः । "आतो लोप इटि च" इत्याल्लोपो ऽङि अख्येतामित्यादौ "आतो ङित" इतीयादेशः । यत्रादावतो दीर्घः, अङ्विधौ ख्यातीति कृतयत्वायाः विकृतेर्निर्देशादकृतयत्वायाः प्रकृतेर्नग्रह इति यदा क्शादित्वं तदा सिजेव (अक्शास्त, अक्शासाताम् , अक्शासत । अक्शास्थाः, अक्शासि । अक्शास्वहि । अक्शासीत् । अक्शासिष्टाम् , अक्शासिषुः । अक्शासीः । अक्शासिषम्) "यमरमनमाताम्" इति सगिटौ । ननु "निसमुपविभ्यो ह्वः" इति कृतात्वस्यानुकरणेन विधीयमानस्तङ् निह्वास्यते इत्यादावाकारान्ते एव स्यान्न तु प्रकृतेरेदन्तस्य ह्वेइत्यस्य । (निह्वयते) इत्यादि सिद्ध्यर्थं विकृतिरपि प्रकृतिं गृह्णात्येव, कथं विज्ञायते यदयं "नव्यो लिटि" इत्यात्वभूतस्य व्येञो निर्देशेनात्वप्रतिषेधं शास्ति ततो ज्ञायत इत्युक्तं न्यासे । तद्वदिहापि विकृत्या प्रकृतेर्ग्रहणादङ् स्यात् । मैवम् । न तत्र विकृत्या प्रकृतिग्रहणात्तङ् किं तु एजन्तत्व प्रकृतिरनुक्रियते इत्यनुकरणस्यात्वं तु लक्षणवशात् । "न व्यो लिटि" इत्यत्राप्यनुकार्यमेजन्तमेव लक्षणवशादनुकरणमात्वभूतमिति न विकृत्या प्रकृतिग्रहणस्येदं ज्ञापकं, सर्वमेतत्प्रपञ्चितं ह्वयतौ, [अख्यास्यत, अख्यास्यत् । अक्शास्यत । अक्शास्यत्) कर्मणि ख्यायते क्शायते इत्यादि । स्यादिषु वा चिण्वदिटि ख्यायिष्यते, अख्यायिष्यत, अख्यायिषीष्ट, ख्यायितेत्यादि । इडभावे (ख्यास्यते । अख्यास्यत, ख्यासीष्ट, ख्याता) इत्यादि, क्शादिरप्युदाहार्यः, एवं कर्म्मकर्त्तर्यपि । लुङि त शब्दे कर्म्मणि नित्यश्चिण्, कर्म्मकर्त्तरि तु 'अचः कर्म्मकर्त्तरि' इति पाक्षिकः । तदभावे द्विवचनादौ च "अस्यतिवक्तिख्याति-

भ्योऽङ्" इत्यङ्। (अख्यायि । अख्यत । अख्येताम्) इत्यादि । क्शादित्वे त्वङ् नास्तीत्युक्तं, तेन (अक्शायि) इति चिणि तदभावे सिचि चिण्वदिटो भावाभावाभ्याम् (अक्शायिष्ट अक्शास्त । अक्शायिषाताम् अक्शासाताम्) इत्यादि, तदेवं क्शादि पक्षे तशब्दे त्रैरूप्यम् । सनि (चिख्यासते, चिख्यासति, चिक्शासते, चिक्शासति । चाख्यायते । चाक्शायते) यङ्लुकि न लुमता(१) तस्मिन्निति लुमता लुप्तप्रत्ययनिमित्ते आङ्गे चानाङ्गे च कार्ये प्रत्ययलक्षणनिषेधाद्यङ्परत्वाभावान्न ख्याञादेशः । नन्वार्धधातुक इति विषयसप्तमीति प्रागेव तदुत्पत्तेः ख्याञादेशेन भाव्यं, मैवं, लुका तद्विषयत्वमेवापह्रियते तथा च *न लुमताङ्गस्य* इत्यत्र कैयटे न लुमता तस्मिन्निति चेद्धनि णिङादेशा न सिद्ध्यन्तीति भाष्यवार्त्तिकयोरुक्तेः "लुङि च" इत्यादौ विषयसप्तम्याश्रयणेनादेशाः सेत्स्यन्तीत्याशङ्क्य लुका लुङो विषयापहारात् विषयसप्तम्याश्रयणेऽप्यसिद्धिरित्युक्तम्, एवं चाङ्विधौ ख्यातीति श्तिपानिर्देशः प्रकथनार्थस्य यङ्लुक्यङ्निवृत्त्यर्थो भवति, यदुक्तं वर्द्धमानेन, ख्यातीति श्तिपा निर्देशाद् यङ्लुकि अचाख्यासीदिति तदपि प्रकथनार्थपरं व्याख्येयं, (ख्यापयति, क्शापयति, अचिख्यपत्, अचिक्शपत्, आख्येयम्, आक्शेयम्) आर्द्धधातुके इत्यस्य विषयसप्तमीत्वात् प्रागेव प्रत्ययोत्पत्तेः ख्याञादेश इति अजन्तलक्षणो यद्भवति "ईद्यति" इतीत्वे गुणः, (संचक्ष्यः) वर्ज्जनीय इत्यर्थः । [वर्जने प्रतिषेधः] इति ख्याञभावे हलन्तलक्षणो ण्यत्, शोभनं प्रचष्टे सुप्रख्यः, उपसृष्टादकर्म्मोपपदात् "आतश्चोपसर्गे" इति कः । उपसृष्टात्कर्म्मोपपदात्तु कर्म्मण्यणि युकि गोप्रख्याय इति । गां संचष्टे गोसंख्य इत्यत्र तु "समि ख्य" इति कर्म्मणि समि चोपपदेऽणोपवादः कः । तथा स्त्रियमाचष्टे स्त्र्याख्य इत्यत्र "मूलविभुजादिभ्य" इति कोऽपि भवति । तथानुपसृष्टात् कर्म्मोपपदात् "आतोऽनुपसर्गे कः" इति के गोख्यः, अनुपसृष्टादनुपपदात्तु "श्याद्व्यध" इत्याकारान्तलक्षणे णे युकि ख्याय इति, (गोख्यायो व्रजति गोसंख्यायो व्रजति प्रिया(२)ख्येयो व्रजति) इत्यत्र "अण् कर्म्मणि च" इति कर्म्मणि क्रियायां चोपपदे विधीयमानोऽण् "आतोनुपसर्गे कः" "समि ख्यः" [मूलविभुजादिभ्य उपसंख्यानम्] इति च विधीयमानं कं परत्वाद् बाधते । तथाच वृत्तिः, कर्म्मणि सामान्यविहितोऽपि वासरूपविधेरभावाद् ण्वुला बाधितः पुनरण् विधीयते सोपवादत्वाद् ण्वुलं बाधते परत्वाच्च कादीन्, तेनापवादविषयेऽपि भवत्येवेति, वासरूपाभावश्च [क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिप्रतिषेध] इति । (ईषदाख्यानम्) *आतो युच्* इति युच् ईषदादिषु कृच्छ्राकृच्छ्रार्थेषु उपपदेषु, (आख्या) "आतश्चोपसर्गे" इत्यङ्, सर्वेष्वपि कृत्सु क्शादिरप्युदाहार्यः। अत्रेकारे विप्रतिपद्यन्ते। अयमनुदात्तः, प्रयोजनं विचक्षण इत्यत्र "अनुदात्तेतश्च" इति युजिति कैयटपदमञ्जरीकारादयः । अत्र [आसनयोः प्रतिषेधः] इति ख्याञभावः। "इदितो नुम्" इति नुमिह न भवति अन्तग्रहणानुवृत्तेरन्तेदित एव तद्विधानात्, अयं चासनयोश्चेति ख्याञ्प्रतिषेधः संज्ञायां, यदाह भाष्यकारः,-"बहुलं तणीति वक्तव्यम् अन्नवधकगात्रविचक्षणाजिराद्यर्थं, किमिदं तणीति संज्ञाच्छन्दसोर्ग्रहणमिति, तेनासंज्ञायां भावादौ ल्युड्व्याख्यानमिति भवति, अत्रानुदात्तत्वादेव तङि सिद्धे ङकारोऽन्तेदित्वविघातायेति के चित्। एवं हि चक्ष इत्यकारमेवानुदात्तमितमासजेत्। तस्मादन्तेदित्वाभावार्थः सन्ननुदात्तेत्त्वप्रयुक्तमात्मनेपदमनित्यमिति ज्ञापनार्थोऽयं ङकारः, तेन 'तालैः शिञ्जद्वलयसुभगैः' 'तृष्णे जृम्भसि, 'प्रार्थयन्ति शयनोत्थितं प्रिया' इत्यादयः प्रयोगा उपपद्यन्ते । ननु शिञ्जइति शिञ्जः जृम्भतइति जृम्भः, तद्वदाचरतीति क्वौ शतरि सिपि च शिञ्जन् जृम्भसीति सिध्यतः । तथा प्रार्थनं प्रार्थः, तत्करोतीति णौ प्रार्थयन्तीति, तन् किमनेन ज्ञापनेन, सत्यं, शब्दाः सिद्ध्यन्ति अर्थास्तु सहृदयहृदयङ्गमा न भवन्ति । अत्रात्रेयः, ङित्करणमेकानुबन्धस्यात्मनेपदस्यानित्यत्वज्ञापनार्थ-

---

(१) अङ्गस्येत्येवेति पुस्तकान्तरेऽधिकम् ।　　　　(२) क्वचिन्नास्ति ।

मिति नेहार्जवं पश्यामः। यस्मादवश्यं युजर्थमनुदात्तेत्त्वं कर्त्तव्यन्तेनैव च तङि सिद्धे पुनस्तङर्थः क्रियमाणो ङकारोऽनुदात्तेत्त्वप्रयुक्तस्य तङो ऽनित्यत्वज्ञापनायैव भवति, तथा 'गणकृतमात्मनेपदमनित्यम्, इति ज्ञापनार्थमिति तरङ्गिणीग्रन्थोऽप्येतेनैव प्रत्युक्तः, संमताकारस्त्विकार उच्चारणार्थ इति तन्मते विचक्षण इत्यत्र युज् न स्यात्। ल्युट्येव ख्याञभावोऽस्त्विति न शक्यते वक्तुं, 'सूर्या उभा चन्द्रमासा विचक्षण' इत्यन्तोदात्तावेक्षणात्, ल्युटि हि मध्योदात्तेन भाव्यं, न चान्नवधकगात्रविचक्षणेति निर्देशो युचमपि कल्पयेत्, यस्मादयमार्द्धधातुके ख्याञभावमात्रपर इति ल्युट्येव ख्याञभावेऽपि चरितार्थः। 'अन्नवधक' इत्यत्र विचक्षण इति ल्युटीति वदन् न्यासकारोऽपि स्वरविरोधेनैव प्रत्युक्तः। (नृचक्षाः राक्षसः,) असुन्नित्यसुन्प्रत्ययः, "असनयोश्च" इति ख्याञभावः। (चक्षुः। चक्षेः) "शिच्च" इत्युस्प्रत्ययः, तस्य शित्त्वात्सार्व्वधातुकत्वात् ख्याञभावः। (अचक्षुः चक्षुः करोति चक्षूकरोति)। "अरुर्म्मन" इत्यादिना च्वौ सलोपे "च्वौ च" इति दीर्घः, ॥

शब्दतन्त्रस्वतन्त्रेण प्रक्रियेयं प्रपञ्चिता।
तस्या निःशेषतो मन्ये बोद्धारो भाष्यपारगाः ॥ ७ ॥

ईर गतौ कम्पने च ॥ इतः पृचिपर्यन्ता उदात्ता अनुदात्तेतः ॥ (ईर्ते, ईराते, ईरते, । ईर्षे, ईराथे। ईरे, ईरांचक्रे) "इजादेश्च गुरुमत" इत्याम्। अत्र के चित् "इन्धिभवतिभ्यां च" इति इन्धेः परस्य लिटः कित्त्वविधानाज्ज्ञापकादामः पाक्षिकत्वं ज्ञापयन्तो 'रथचरणादिभिरीरिरे नु वीरा' इति प्रयोगं समर्थयन्ते, न च 'समीधे दस्यु हन्तमम्' इत्यादौ मन्त्रे तदामो निषेधे श्रूयमाणस्य लिटः कित्त्वार्थं सूत्रं स्यात्, यस्मादत्र "छन्दस्युभयथा" इति सार्व्वधातुकत्वात् "सार्व्वधातुकमपित्" इति ङित्त्वादेव कित्कार्यमनिदितामित्युपधालोपः सिद्ध्यति, तस्माज् ज्ञापकमेवेति। सत्यमेवं शक्यते कल्पयितुं भाष्यकारवार्त्तिककारयोस्तु नेष्टं, यत्सूत्रमेवैतत्प्रत्याचख्यतुः। इन्धेश्छन्दोविषयत्वाद्भुवो वुको नित्यत्वात्ताभ्यां लिटः किद्वचनानर्थक्यमिति। (ईरिता। ईरितासे। ईरिताहे। ईरिष्यते। ईरिष्यसे। ईरिषे। ईर्त्ताम्। ईर्ष्व। ईर्ध्वम्। ईरै। ऐर्त। ऐराताम्। ऐरत। ऐर्थाः। ऐरि, ऐर्वहि। ईरीत। ईरीयाताम्। ईरीथाः। ईरीय। आशिषि ईरिषीष्ट। ईरिषीष्ठाः। ईरिषीध्वम्। ईरिषिड्ढ्वं) 'विभाषेटः'। ऐरिष्ट। ऐरिषाताम्। ऐरिष्ठाः। ऐरिध्वम्। ऐरिढ्वम्,) "धि च" इति सलोपे "विभाषेटः," (ऐरिषि। ऐरिष्वहि।) कर्म्मणि (ईर्यत) इत्यादि। (ईरिरिषते, ईरयति, मा भवानीरिरत्, समीरणः) "अनुदात्तेत" इति युच्, ण्यन्तान्नन्द्यादित्वेन ल्युरित्यात्रेयः, निम्नमीर्तइति (नीरं,) निःशब्दोऽयं वृत्तिविषये निम्नवचनः, तस्मिन्नुपपदे "कर्मण्यण्" इत्यण्, इगुपधलक्षणः क इत्यात्रेयः, अकारादनुपपदात् कर्म्मोपपदो विप्रतिषेधेनेत्युक्तत्वात्तच्चित्यं, स्वेनाभिप्रायेणेरितुं शीलमस्येति स्वैरी, ताच्छील्ये णिनिः, ईरणमीरः, स्वेनाभिप्रायेणेरोऽस्मिन्निति स्वैरं, स्वभावादयं क्रियाविशेषणं, नपुंसकलिङ्गश्च, उभयत्र [स्वादीरेरिणोर्वृद्धिर्वक्तव्या'] इति वृद्धिः, (ईर्म्मं) बाहुलकान्मः, दक्षिणमीर्ममस्य (दक्षिणेर्मा) मृगः, व्याधेन दक्षिणे पार्श्वे वृणित इत्यर्थः, ईर्मशब्दो वृत्तौ धर्म्मिणि वर्त्तते "दक्षिणेर्मा लुब्धयोगे" इत्यनिजन्तो बहुव्रीहौ निपात्यते, अन्यत्र लुब्धयोगाद्दक्षिणेर्म्मं शकटमिति भवति। ईर क्षेप इत्याद्यपीयः ॥ ८ ॥

ईड स्तुतौ। (ईट्टे।) ष्टुत्वचर्त्वे (ईडाते। ईडिषे, ईडिष्वे। ईडे, ईड्वहे,) *ईडजनोर्ध्वे च* अत्र ईश इति वर्त्तते से इति च, ईशीडिजनीभ्यः सेध्वेशब्दयोः सार्व्वधातुकयोरितीट्। (ईडांचक्रे। ईडिता, ईडितासे। ईडिताहे। ईडिष्यते, ईट्टाम्। ईडाताम्। ईडिष्व। ईडिध्वम्। ईडै।) "सवाभ्यां वामौ" इति वामयोः कृतयोरप्येकदेशविकृतस्यानन्यत्वात् सेध्वेशब्दावेवेतीट्। (ऐट्ट। ऐडाताम्। ऐट्टाः। ऐड्ढ्वं,) विकृतिग्रहणे प्रकृतिग्रहणाभावान्नेट्। (ऐडि ऐड्वहि। ईडीत। ईडीथाः। ईडिध्वम्, ईडिय) आशिषि ईडिषीष्ट। ईडिषीष्ठाः

ईडिषीध्वम्, ईडिषीय । ऐडिष्ट। ऐडिध्वम् । ऐडिषि,) कर्म्मणि (ईड्यते) इत्यादि । (ईडिडिषते । ईडयति । माभवानीडिडत् । ईडा) "गुरोश्च हल" इत्यकारः । "ईडाया वा" इति निर्द्देशाद्ध्रस्वः । (ईड्यः) स्तुत्यः, ण्यत् "ईडवन्दवृशंसदुहां ण्यतः" इत्याद्युदात्तत्वम्, (इडेन्यः) औणादिक एन्यप्रत्ययो बाहुलकात् । अयं चुरादौ च ॥ ९ ॥

ईश ऐश्वर्ये ॥ (धनस्येष्टे, ईशिषे । ईशिध्वे ।) व्रश्चादिना षत्वे ष्टुत्वं झलि पदान्ते च, "अधीगर्थदयेशां कर्म्मणि" इति कर्म्मणि शेषे षष्ठी, अशेषत्वविवक्षायां (धनमीष्टे, ईशांचक्रे) इत्यादि पूर्व्ववत् । (ईशानः,) लटः शानच् ताच्छीलिकश्चानश्वा । वाचामीशो (वागीशः) इगुपधलक्षणः कः, ननु कर्म्मणि शेषत्वेन विवक्षिते षष्ठ्यां सिद्धायां पुनस्तद्विधानं समासनिवृत्त्यर्थमिति कथमधीगर्थषष्ठ्याः समासः । सत्यं, नायमधीगर्थषष्ठ्याः (१)किंतु "कर्त्तृकर्म्मणोः कृति" इत्यशेषषष्ठ्याः । तदुक्तं [कृद्योगा च षष्ठी समस्यत] इति, (ईश्वरः) "स्थेशभास"। इति वरच्, "नेड्वशि कृति" इतीडभावः । (ईश्वरा ।) टाप्, (ईश्वरीति) औणादिके वरटि टित्वान्ङीबित्यात्रेयादयः । धनेष्वीश्वरो धनानामीश्वरः । "स्वामीश्वर" इति षष्ठीसप्तम्यौ शेषे । कथं धनेश्वर इति यावता [प्रतिपदविधाना षष्ठी न समस्यत] इत्युक्तं, सत्यं, नात्र चकारेण षष्ठी पुनर्विधीयते । किन्त्वनया सप्तम्या मा बाधीत्यभ्यनुज्ञायते । यद्वा पूर्व्ववत् "कर्तृकर्म्मणोः कृति" इति षष्ठ्याः समासः । त्रैरूप्यं चेह साध्यं, न ईश्वरः, अनीश्वरः न विद्यते वा ईश्वरो यस्य सोऽनीश्वरः । तस्य भावोऽनैश्वर्यमानैश्वर्यं, ब्राह्मणादित्वात् ष्यञ्, "नञः शुचीश्वरक्षेत्रज्ञ" इत्यादिनोत्तरपदस्य नित्यं वृद्धिः पूर्वपदस्य तु वा। तत्पुरुषादपि "न नञ्पूर्वात्"इति निषेधं बाधित्वा ब्राह्मणादित्वात् ष्यञ्, बहुव्रीहेः सामान्येनैव सिद्धत्वात्तत्पुरुषार्थः स पाठः ॥ १० ॥

आस उपवेशने ॥ (आस्ते) अत्र "अनचि च" इति द्वित्वपक्षे द्वौ सकारौ, अन्यदा त्वेकः । न च द्वित्वे "स्कोः" इति सलोपप्रसङ्गः । द्वित्वस्यास्मिन्नसिद्धत्वात् । (आस्से) इत्यत्र द्वित्वपक्षे त्रयः सकाराः, न च "झरो झरि" इति लोपाद् द्वावेवेति मन्तव्यं, तस्यापि विकल्पितत्वात् । (आध्वे ।) "धि च" इति सलोपे धकारस्य द्वित्वे जश्त्वम्, (आसे, आसांचक्रे "दयायासश्च" इत्याम् । (आसिता । आसितासे । आसिताहे । आसिष्यते । आस्ताम्, आस्स्व, आध्वम् । आसै । आस्त । आसाताम् । आस्थाः । आध्वम् । आसि । आस्वहि । आसीत् । असीथाः । आसीय ।) आशिषि (आसिषीष्ट । आसीषीष्ठाः । आसीषीय । आसिष्ट, आसिषाताम् । आसिष्ठाः, आसिड्ढ्वम् ।) "धि च" इति सिचो लोपे "इणः षीध्वम्" इति मूर्द्धन्यः, (आसिषि) सनि (आसिसिषते । आसयति, मा भवानासिसत्, ग्राममध्यास्ते ।) "अधिशीङ्स्थासां कर्म्म" इति आधारस्य कर्म्मत्वं, (मासमास्ते) मासमासनेन व्याप्नोतीत्यर्थः। सकर्म्मकव्यापनरूपधात्वर्थाङ्कासने धातोर्वृत्त्या व्यापनापेक्षं मासस्य कर्म्मत्वं, एवमस्य मासादिना सकर्म्मकत्वेऽपि तत्र तत्राकर्म्मकग्रहणेषु कालभावाध्वगन्तव्यदेशव्यतिरिक्तेन कर्म्मणा ऽकर्म्मकाणां ग्रहणमिति आसयति मासं देवदत्तमिति प्रयोज्यस्य "गतिबुद्धि" इति कर्म्मत्वं भवति । तथा "अणावकर्म्मकात्" इति नित्यं परस्मैपदं च, एवं "लः कर्म्मणि च" इत्यादिना विधीयमाना लादयोऽप्यस्य वस्तुतो मासादिना सकर्म्मकत्वादकर्म्मकग्रहणेन ग्रहणाच्च भावकर्म्मणोरुभयोरपि भवन्ति आस्यते मासं देवदत्तेन आस्यते मासो देवदत्तेन, मासस्यासितव्यमासितव्यो मासः, स्वासं मासं स्वासो मास इति , क्खलेन "न लोकाव्यय" इति कर्म्मणि षष्ठ्या निषेधः । अयं च प्रकारो "अकथितं च" "कालाध्वनोः" इत्यादौ भाष्यकैयटपदमञ्जर्यादिषु सहस्रशः प्रपञ्चितः । अस्माभिरपि भवतौ प्रपञ्चितः । ननु कटे आस्ते इत्यादौ मासादिवत् व्याप्त्यपेक्षया कटादे-

(१) समास इत्यधिकं पुस्तकान्तरे ।

रपि कर्म्मत्वेन भाव्यम्, अत्र कैयटः । नियतत्वाच्च प्रयोगस्य कट आस्त इत्यादौ त्वासनमात्रेऽनङ्गीकृतक्रियान्तरे आसिर्वर्त्तत इत्यतिप्रसङ्गो नोद्भावनीय इति । (आसीनः) "ईदासः" इति आसेः परस्यानस्यादेरीकारः । (आसना) "ण्यासश्रन्थो युच्" इति युच्, (आस्या), वासरूपविधिना ण्यत्, अस्त्रियामिति निषेध उभयोरपि स्त्र्यधिकारविहितत्वे, बाहुलकात् क्तिन्नपि भवति उपास्तिरिति, । उपासितो गुरुं शिष्यो वा, उपासितो गुरुः शिष्येण "गत्यर्थाकर्म्मक" इत्यादिना कर्त्तृकर्म्मणोः क्तः । उपसर्गवशात् कालादिव्यतिरिक्तेनापि सकर्म्मकत्वं, (कैलासः,) केलिः प्रयोजनमस्य कैलः, [चूडादिभ्य उपसंख्यानम्] इत्यण्, आस्यतेऽस्मिन्निति-(आसः), "हलश्च" इत्यधिकरणे घञ् । कैलश्चासावासश्चेति "विशेषणं विशेष्येण" इति सञ्ज्ञात्वाल्लोहितशाल्यादिवत् समासो नित्यम् ॥ ११ ॥

आङः शासु इच्छायाम् ॥ (आशास्ते । आशासाते । आशास्से । आशाध्वे, आशासे) "शास इदङ् हलोः" इत्यङि हलादौ च ङ्किति विधीयमानमुपधाया इत्वमस्य न भवति संयोगस्य विशेषस्मृतिहेतुत्वाद् अङ्सम्बन्धिन एव शास्तेस्तत्र ग्रहणाद् अस्य च नास्त्यङ्सम्बन्धः "सर्तिशास्ति" इत्यत्र सर्त्यर्तिभ्यां परस्मैपदिभ्यां साहचर्यात्तादृश एव परस्मैपदिनः(१)शासेर्ग्रहणमिति । (आशशासे । आशशासाते । आशशासिरे । आशशासिषे । आशशासिध्वे । आशशासे, आशशासिवहे ।) आसिवदन्ये लकाराः । (आशशासिषते । आशाशास्यते । आशाशासीति । आशाशास्ति । आशाशयति । आशीः । आशासः) "क्वौ" इतीत्वम्, सकारस्य रुत्वे "र्वोरुपधाया" इति दीर्घः, क्षियाशीरिति निर्देशाद्वेत्वं, आशिषावित्यादौ "शासिवसिघसि" इत्यादिना षत्वं, तत्र हि न केवलं शासनार्थस्य ग्रहणं किं त्वस्यापि, तथा च "आशिषि लिङ्लोटौ" इति निर्दिश्यते । (आशिषा ।) आपं चैक हलन्तानामित्यात्रेयः। (अन्या आशीः अन्यदाशीः ।) *"अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु"* । षष्ठीतृतीयाव्यतिरिक्तविभक्त्यन्तस्यान्यशब्दस्याशीरादिपूत्तरपदेषु छे च प्रत्यये दुगिति दुगागमः, षष्ठीतृतीयान्तत्वे तु अन्याशीः । अत्र "अषष्ठ्यतृतीयास्थ" इति निषेधः कारकच्छव्यतिरिक्तविषयः । उक्तं च ।

दुगागमोऽविशेषेण कर्त्तव्यः कारकच्छयोः ।
षष्ठीतृतीययोर्नेष्टं आशीरादिषु सप्तसु ॥

इति । आशिषं करोति आशिषयतीत्यत्र सोपसर्गात् संग्रामयतेरेवेति नियमाच्छिष् शब्दादेव णिजुत्पत्तौ "प्रकृत्यैकाच्" इति प्रकृतिभावाण्णाविष्ठवदिति टिलोपो न भवति । अत्रात्रेयमैत्रेयस्वामिकाश्यपा असुमुदितं पठित्वा "नाग्लोपिशास्वृदिताम्" इत्यत्रास्यापि सामान्येन ग्रहणात् आशशासदित्युपधाह्रस्वनिषेधो भवतीति । आत्रेयमैत्रेयौ तु प्रयोजनान्तरं चाहतुः । "क्त्वापि छन्दसि" इति ल्यपोपवादे क्त्वादेशे आशास्त्वा आशासित्वेतीड्विकल्पः, निष्ठायां "यस्य विभाषा" इति निषेधादिड् न भवति । (आशास्त । आशास्तवान्) इति भवतीति, वर्द्धमानसंमताकारादयस्त्वनुदितं पठित्वा "नाग्लोपि" इत्यत्रोदितोऽनुशासनार्थस्यैव ग्रहणादस्य ह्रस्वनिषेधाभावादशीशसदिति ह्रस्वेन भाव्यमित्याहुः । वर्द्धमानोदितमते निष्ठायामाशासित इति च भवितव्यम्, अत्र हरदत्तेन ।

शक्यः शासिग्रहो कर्त्तुमृदिदेवैष पठ्यते ।
ऋशासु अनुशिष्टावित्येवमेके प्रचक्षते ॥

इत्यनुशासनार्थस्य शासेर्मतान्तरसिद्धमृदित्पाठमाश्रित्य ऋदित्त्वादेवोपधाह्रस्वनिषेधसिद्धेः शासिग्रहणं न कर्तव्यमित्यभिधानात् तन्मतेऽप्यस्य शासेरुदित्त्वमनभिप्रेतं प्रतीयते । उदित्त्वे शास्वित्युकारानुबन्धकरणमेतदर्थं स्यादिति कथं प्रत्याख्यायेत, एवमृदित्त्ववादिनां

(१) परस्मैपदिन इति नास्ति पुस्तकान्तरे ।

शासिग्रहणे निरर्थके यन्मतान्तरेण फलमुक्तं हरदत्तेनैव ।

वदन्त्यन्ये तु सूत्रेऽस्मिन् शासिं निरनुबन्धकम् ।

पठन्तः प्रतिषेधोऽस्य यङ्लुक्यपि भवेदिति ॥

इति, तदयुक्तं, प्रकृतौ निरर्थकत्वे विकृत्यर्थं शासिग्रहणं स्यात्, इह त्वाशासेर्मुक्तानुबन्धकस्यानुवादत्वेन प्रकृत्यर्थत्वं शक्यते वक्तुम्। प्रायेणाङ्पूर्व्व इति 'नमो वाकं प्रशास्महे'इति भवभूतिप्रयोगोपपत्तिरित्यात्रेयः । "एतिस्तुशासास्वृ" इत्यत्रोदितो निर्देशान्नास्मात् क्यपः प्रसङ्ग इत्याशास्यमिति ण्यदेव, येषामस्याप्युदित्त्वेन तत्र ग्रह इष्टस्तेषामप्याशास्यमित्येवं रूपं, यस्मात् "शास इदङ्हलोः" इतीत्वमस्य नास्तीति प्रागेवोक्तम् । (आशासा,) "गुरोश्च हल" इत्यकारः । आशंसतइतीच्छायां शंसतीतिस्तुतौ, शंसतीति हिंसायां शपि, शास्तीत्यनुशासने ॥ १२ ॥

वस आच्छादने ॥ निवासे वसतीति गतं शपि । (वस्ते । वस्से । वध्वे, वसे । ववसे । ववसिषे ववसिवहे) "न शसददवादि" इत्येत्वाभ्यासलोपनिषेधः । वसितेत्याद्यासिवदुदाहार्यम् । (विवसिषते, वावस्यते । वावसीति, वावस्ति ।) वासयति वस्त्रं देवदत्तेन वासयते इति वा । यदा तु व्यापारान्तरनिवृत्तिपरायां चोदनायामविवक्षितकर्मकोऽयमकर्मकस्तदा "अणावकर्म्मकात्"इति परस्मैपदमेव, "गतिबुद्धि" इत्यादिना प्रयोज्यस्य कर्म्मत्वं (१)देवदत्तमिति, "न पादम्" इत्यत्र लुग्विकरणत्वान्नास्य ग्रह इत्युक्तम्, अत एव "प्रे लपसुद्रुमथवदवस" इत्यादावपि नास्य ग्रहः। (वसित्वा, वसितं, वसित) इत्यत्र "वचिस्वपि" इति सम्प्रसारणस्य नात्र प्रसङ्गोऽयजादित्वात्, वस्यते आच्छाद्यतेऽनेनेति वसनम्, करणे ल्युट्, यद्वा वस्ते आच्छादयतीत्यनुदात्तेत इति कर्त्तरि युच्, (वस्त्रम्,) त्रन्, वस्त्रेण समाच्छादयति (संवस्त्रयति) "मुण्डमिश्र"इत्यादिना णिच्। 'वस्त्रात्समाच्छादन'इति वृत्तिः, (वासः, वाससी) "वसेर्णिच्च" इत्यसुनि णित्वाद् वृद्धिः। कृत्तिर्वासोऽस्येति (कृत्तिवासाः) । "अत्वसन्तस्य" इत्यत्वन्तस्यासम्बुद्धौ सौ दीर्घः । अकारान्तस्तु कृत्तिं वस्त इति कर्म्मण्यणि, चर्मव इत्यादिप्रयोगश्चर्म वस्त इति "क्विप् च" इति क्विपि 'क्विबन्ता धातुत्वं न जहति' इति अधातोरिति निषेधात् "अत्वसन्तस्य" इति न दीर्घः, अयमेवाधातोरिति निषेधः क्विबन्ता धातुत्वं न जहतीत्यस्य मूलं, (वसा,) शरीरान्तर्गतस्नेहद्रव्यं, पचाद्यचि टाप्, तद्धि व्याप्य तिष्ठति॥१३॥

कसि गतिशासनयोः । (कंस्ते । कंसाते । कंसते । कंसे । कन्ध्वे) "धि च" इति सलोपः, अत्रायोगवाहानामट्सु णत्वमविशेषेण संयोगोपधासंज्ञाऽलोन्त्यद्विर्वचनस्थानिवत्प्रतिषेधा इति यत्र प्रयोजनं तत्र तत्रायोगवाहानामुपदेशस्य चोदितत्वादनुस्वारस्याच्त्वाश्रयणे धकारस्य "अनचि च" इति वा द्विर्वचने पूर्वस्य जश्त्वेऽनुस्वारस्य च परसवर्णे नकारदकारधकारवकाराः संयुज्यन्ते, द्विर्वचनाभावे तु दकारस्याभावादन्ये त्रयः। ननु द्वित्वपक्षेऽपि "झरो झरि सवर्णे" इति दकारस्य लोपात्त्रयाणामेव संयोगः स्यात्। मैवम्। अस्य विभाषितत्वात्। एवं कंस्तइत्यादावपि सकारस्य झल्परत्वे पक्षे द्विर्वचनं द्रष्टव्यं, न च "स्कोः" इति सलोपस्य विद्यमानत्वाद् द्विर्वचनमकृतसममिति मन्तव्यम्, अस्मिन् द्विर्वचनस्यासिद्धत्वात्। कंस्वहीत्यादौ झल्परत्वाभावाच्च न सलोपप्रसङ्गो नापि "झरो झरि" इति सलोपेन वैयर्थ्यमाशङ्कनीयं तस्य विकल्पितत्वात्। एवमुदाहरणेषु द्वौ सकारावेको वा मध्यमैकवचने द्वित्वे त्रयः सकाराः, अद्वित्वे "झरो झरि" इति यदा लोपस्तदैकः, अन्यदा तु द्वौ, (चकंसे । चकंसिषे चकंसिवहे कंसिता, कंसिष्यते । कंस्तां, कंस्व, कन्ध्वं, कंसै । अकंस्त, अकंस्थाः, अकंसि । कंसीत, कंसीथाः । कंसीय । आशिषि–कंसिषीष्ट । अकंसिष्ट, अकंसिष्ठाः । अकंसिषि । चिकंसिषते । चाकंस्ति, चाकंस्यते । चाकंसीति ।) लङि अटि तिप्सिपोर्हल्ङ्यादिलोपे संयोगा-

---

(१) प्रयोज्यः कर्म देवदत्तमिति क्वचित्पाठः ।

न्तलोपे (अचाकन्, कंसयति । अचकंसत,) सर्वत्रेदित्त्वान्नुम् । अत एव चाकंस्यतइत्यादौ लोपाभावः, अयं पाठो मैत्रेयादीनाम् । अन्ये तु व्याख्यान्तरेऽमुं तालव्यान्तमनिदितं मन्यन्ते । तथा च "प्रतिष्कशश्च कशेः" इत्यत्र वृत्तिः, "कश गतिशासनयोः" इति सूत्रे सुधाकरश्च, पारायणिकैरयमिदिदन्त्यान्त्य उदाहारि । अन्यैस्तु "प्रतिष्कशश्च कशेः" इति दर्शनात्तालव्यान्तः समाम्नायि,'घृतस्य धारा अभिचाकशीमि'इत्यत्र भट्टभास्करश्च कशेर्गतिकर्मणो यङ्लुकि रूपमिति । तथा "नाभ्यस्तस्य" इत्यत्र वृत्तौ पस्पशाते चाकशीति वावसीतीत्युदाहृत्य छान्दसं ह्रस्वत्वं द्रष्टव्यम्, पस्पशातइत्यभ्यासह्रस्वत्वं च, प्रकृत्यन्तराणां वा स्पशिवशिकशीनामेतानि रूपाणीत्युक्तम् । अत्र हरदत्तादयः । स्पाशिर्वार्त्तिककारवचनादपठितोऽपि धातुरस्ति, काश्ट दीप्तौ वाश्ट अदने इत्याद्युक्त्वा प्रकृत्यन्तराणामिति विवृण्वाना आहुः कश गतिशासनयोरिति । कैयटे च स्पशिवशिकशयः प्रकृत्यन्तराणीति भाष्यमुपादाय स्पश बाधनस्पर्शनयोः कश गतिशासनयोरिति केचित्पठन्ति, अन्ये तु कस गतिशासनयोरिति तन्मते कशिः सौत्रो धातुर्द्रष्टव्य इत्युक्तम् । अत्र धातौ क्षीरस्वामी कसेत्येक इति दन्त्यान्तमनिदितमपि पपाठ । प्रदेशान्तरे चाह कशि गतिशानयोरितीकारान्तः शकारान्तश्च पठ्यते इति । (कष्टे,) "व्रश्चादिना" षत्वं ष्टुत्वम् । (कशाते । कक्षे,) षत्वकत्वे । (कड्ढ्वे,) षत्वे षकारस्य ष्टुत्वे षकारस्य जश्त्वं डकारः । (कशे, कश्वहे, चकशे, चकशिषे चकशिवहे । कशिता । कशिष्यते, कष्टाम्, कक्ष्व, कशै । अकष्ट अकक्षाः, कशीत । कशीथाः, कशीय,) आशिषि (कशिषीष्ट, अकशिष्ट, अकशिष्ठाः । अकशिषि । चिकशिषते । चाकश्यते । चाकशीति, चाकष्टि, काशयति, अचीकशत् । कशा ।) पचाद्यचि टाप् । कशामर्हतीति (कश्यम्) अश्वानां मध्यं, दण्डादित्वाद्यत्, (प्रतिष्कशः,) वार्त्तापुरुषः सहायः पुरोयायीति वा । "प्रतिष्कशश्च कशेः" इति प्रतिपूर्व्वस्य कशेरचि सुट् सस्य षत्वञ्च निपात्यते । 'प्रतिष्कश' इत्येतावत्येव सूत्रयितव्ये कशेरिति वचनं प्रतेः कशिसम्बन्धित्वे निपातनं यथा स्यादिति, तेन कशां प्रति गतः प्रतिकशोऽश्व इत्यत्र न भवति, अत्र हि प्रतिर्गमिसम्बन्धः । अनिदित्सान्तपक्षे कस्तइत्यादि द्रष्टव्यम् ॥ १४ ॥

णिसि चुम्बने । इदिद्दन्त्यान्तः । (निंस्ते) इत्यादि कसिवत् । अत्रात्रेयादयः प्रणिंस्ते प्रनिंस्त इत्युदाहृत्य "वा निंस" इति णत्वविकल्पमाहुः । अस्माभिस्तु तत्कृतिपर इति निन्दतावुपपादितम् । आभरणकारस्तु तालव्यान्तं पठित्वा "वा निंश" इति सूत्रमपि स्वपाठानुगुणं पपाठ तत्तु "नुम्विसर्जनीयशर्व्यवायेऽपि" इत्यत्र वृत्तिन्यासपदमञ्जर्याद्यपर्यालोचनविजृम्भितं, तत्र हि नुमादिभिः प्रत्येकं व्यवाये षत्वमिष्यते तेन निंस्से निंस्वेत्यत्र न भवतीत्युक्तम्, अस्य तालव्यान्तत्वे व्रश्चादिषत्वे "षढोः" इति कत्वे कवर्गात्परत्वेन षत्वं दुर्वारमिति कथं प्रत्युदाह्रियेत ॥ १५ ॥

णिजि शुद्धौ ॥ (निङ्क्ते ।) कुत्वे चर्त्वं, (निञ्जाते । निञ्जते । निङ्क्षे) कुत्व(१)चर्त्वयोः षत्वम् । (निनिञ्जे । निनिञ्जिषे । निञ्जिता । निञ्जिष्यते । निङ्क्ताम् । अनिङ्क्, निञ्जीत) आशिषि । (निञ्जिषीष्ट । अनिञ्जिष्ट, निनिञ्जिषते । नेनिज्ज्यते ।) इदित्त्वान्नुम् सर्व्वत्रात एव किङति नलोपाभावः । (नेनिञ्जीति, नेनिङ्क्ति । निञ्जयति । अनिनिञ्जत्) ।

पचिं वचिं विचिरिचिरञ्जिपृच्छतीन् ।
निजिं सिचिं मुचिभजिभञ्जिभृज्जतीन् ॥

इत्यत्र निरनुषङ्गपाठाद् णिजिर् शौचपोषणयोरिति जौहोत्यादिकस्यैव ग्रह(२)णादयं सेडेवोदाहृतः ॥ १६ ॥

---

(१) इत्यत्र कुत्वषत्वचर्वानुस्वारपरसवर्णा इत्येकस्मिन्पुस्तके ।

(२) ग्रहः, अयं सेडुदाहृत इति कुत्रचित् पाठः ।

शिजि अव्यक्ते शब्दे ॥ (शिङ्क्ते) इत्यादि पूर्व्ववत् । तालैः शिञ्जदित्यात्मनेपदानित्यत्वज्ञापनादिति चक्षावुक्तम्, (शिञ्जा,) पचाद्यचि टाप् "गुरोश्च हल" इत्यकारो वा । (शिञ्जिनी) आवश्यणिन्यन्तान् ङीप् ॥ १७ ॥

पिजि वर्णे ॥ सम्पर्चने इति शाकटायनः । उभयत्रेति संमता । अवयवे इति काश्यपः । अयं शिञ्जिश्च द्वावव्यक्ते शब्द इति काश्यपः । (पिङ्क्ते) इत्यादि पूर्व्ववत् । (पिङ्गः) । घञ् । (पिञ्जरः, पिङ्गलः,) बाहुलकादरालौ (पुरुषपिङ्गलः । पिङ्गलपुरुषः) "कडाराः कर्म्मधारये" इति विशेषणस्य वा परनिपातः, कडारादिपाठादेव जकारस्य गकारः, पिङ्गली पिङ्गलिका गौरादिपाठान् ङीष्, (पिङ्गलिमा । पैङ्गल्यम्) । "वर्णदृढादिभ्यः ष्यञ् च" इतीमनिच्ष्यञौ, (पिञ्जूलः) शूलं सङ्घातश्च,, "खर्जपिञ्जादिभ्य उरोलचौ" इत्यूलच् । पृजीत्येके, (पृङ्क्ते) इति मैत्रेयः, एवमात्रेयश्च, पिजि भाषार्थः ॥ तुजि पिजि हिंसाबलादाननिकेतनेष्विति । चुरादौ ॥ १७ ॥

वृजी वर्जने ॥ दन्त्योष्ठ्यादिः ॥ इदिदित्यात्रेयादयो दौर्गाश्च । (वृक्ते । वृजाते । वृक्षे । वृग्ध्वे । ववृजे । ववृजिषे । ववृजिवहे । वर्जिता । वर्जिष्यते । वृक्तां, । वृक्ष्व । वर्जै । वर्जावहै) आटि गुणः । (अवृक्त । अवृक्थाः । अवृजि । वृजीत । वृजीथाः । वृजीय,) आशिषि (वर्जिषीष्ट,) अत्र "लिङ्सिचौ" इत्यत्र झलीत्यनुवर्त्तनान्न कित्त्वम् । अवर्जिष्ट, अवर्जिष्ठाः । अवर्जिषि, विवर्जिषते, वरीवृज्यते) रीगभ्यासस्य, (वर्वर्क्ति) रुगागमः । रीग्रिकोरप्युदाहार्यम् । (वर्जयति । अवीवृजत्, अववर्जत्) । "उर्ऋत्" इत्यृकारो वा गुणापवादः । (वर्जित्वा । वृक्तम्) । निष्ठायां "श्वीदितो निष्ठायाम्" इत्यनिट्त्वम्, । (वृज्यः,) "ऋदुपधाच्च" इति क्यप् । (वृजयो) जनपदाः । "इगुपधात्किच्च" इतीन् प्रत्ययः, कित्त्वान्न गुणः । वृजिषु भवो (वृजिकः) । "मद्रवृज्योः कन्" इति कन् शैषिकः । (वर्गः) । घञि कुत्वम्, वर्गे भवो (वर्ग्यः) । दिगादित्वाद्यत् । (कवर्गीयः ।) "वर्गान्ताच्च" इति भवार्थे छः, वासुदेववर्गे भवो वासुदेववर्ग्यः । वासुदेववर्गीणः, "अशब्दे यत्खावन्यतरस्याम्" इति यत्खौ, अन्यतरस्यां ग्रहणाच्छश्च, वासुदेववर्गीय इति । वृजिनं पापं, "वृजेः किच्च" इतीनच् प्रत्ययः । कित्त्वान्न गुणः । (वृजनम् ।) "कृपृवृजिमन्दिनिधाञ्भ्यः क्युन्" इति क्युन्यनादेशः । अयं रुधादौ युजादौ च अयमिदिदिति मैत्रेयः । तथा चाधीयते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते इति । तथा च शाबरभाष्ये प्रवृञ्जनमिति प्रयुज्यते । तथा च स्वामी वृज इति दौर्गाः, तेषां वृक्ते वर्जितेति, शाकटायनस्यापीदित्वमेवेष्टं, यदाह पिजु वृजु पृचै सम्पर्चन इति, तेन ह्युदिदिदित्स्थाने क्रियते एदिदीदित् स्थाने, तन्मते पूर्वोऽयं वक्ष्यमाण(१)श्च सम्पर्चनार्थः । (वृञ्जाते वृञ्जते । वृङ्क्ते । वृञ्जे, ववृञ्जे । वृञ्जिता । वृञ्जिष्यते । वृङ्क्ताम् । अवृङ्क्त । वृञ्जीत) । आशिषि-(वृञ्जिषीष्ट, अवृञ्जिष्ट, विवृञ्जिषते, वरीवृञ्ज्यते, वरीवृङ्क्ति, वृञ्जयति । अववृञ्जत्) ॥ १९ ॥

पृची सम्पर्चने ॥ ओष्ठ्यादिरीदित्, (पृक्ते) इत्यादि वृजीवत् । इदिदिति दुर्गकाश्यपनन्दिधनपालादयः । इदित्तृतीयान्त इति कौशिकः । ईदिदित्यपरे । तत्र वृत्तौ सम्पृचादिसूत्रे पृची सम्पर्क इति रुधादिर्गृह्यते न त्वादादिरित्यभिधानात् प्रथमान्त ईदिदेव युक्तः, उणादिवृत्तौ पर्जन्यशब्दव्युत्पादने अर्जेः पर्ज वेत्यन्यप्रत्यये पर्जादेशविधानाच्चायुक्तस्तृतीयान्तपाठः, पिजु वृजु पृचै सम्पर्चने इति पठन् शाकटायनोऽप्यत्रैवानुकूलः, तेन ह्युदिदिदित्स्थाने क्रियते । ईदित्स्थाने चैदिदित्युक्तम् । अयं रुधादौ, युज पृच संयमनइति युजादौ । ईरादय उदात्ता अनुदात्तेतः ॥ २० ॥

पूङ् प्राणिगर्भविमोचने ॥ (सूते । सुवाते, सुवते, । सूषे, सूध्वे । सुवे, सूवहे, सूमहे ।)

(१) वक्ष्यमाणाश्चय इति क्वाचित्कोऽपपाठः ।

अजादावुवङ्, (सुपुवे । सुपुवाते । सुपुविषे । सुपुविढ्वे । सुपुविध्वे) "विभाषेटः" (सुपुविवहे ।) "आदेशप्रत्यययोः" इतीणः परस्य सस्य षत्वम् ॥

"श्र्युकः किति" निषेधोऽत्र स्वरत्यादिविकल्पनात् ।
पूर्वं निषेधकाण्डस्य प्रारम्भाद्बलवत्तरः ।
तथापि क्रादिसूत्रेण बाध्यते तत्र वृग्रहात् ॥

तेन इण् नित्यः, एतच्च स्वरतावेवोपपादितम् । (सोता । सविता । सोष्यते । सविष्यते) स्वरत्यादिनेड्विकल्पः, (सूताम् । सुवातां, सूष्व, सुवै,) आटि पित्वादङित्त्वेऽपि "भूसुवोस्तिङि" इति निषेधान्न गुणः । (असूत । असुवाताम् । असूथाः । असूध्वम् । असुवि, असूवहि । सुवीत । सुवीयाताम्, सुवीथाः, सुवीय,) आशिषि—(सविषीष्ट, सविषीयास्ताम् । सविषीरन्, सविषीष्ठाः, सविषीढ्वम्, सविषीध्वम् । सविषीय, सोषीष्ट, सोषीयास्तां, सोषीरन्, सोषीष्ठाः । सोषीढ्वं, सोषीय,) आर्धधातुकत्वात्स्वरत्यादिनेड्विकल्पः । अत एव "भूसुवोस्तिङि" इति गुणनिषेधोऽपि न भवति । स हि सार्वधातुकविषयः, "इणः षीध्वम्" इति नित्यो मूर्द्धन्योऽनिट्पक्षे, इट् पक्षे तु गुणावादेशयोर्विकल्पः, एवं लुङ्यपि । (असविष्ट, असविषाताम् । असविष्ठाः । असविध्वम् । असविढ्वम् असविषि, असविष्वहि । असोष्ट, असोषाताम् । असोष्ठाः । असोढ्वम् । असोषि, सुसूषते,) । "स्तौतिण्योरेव" इति नियमान्न षत्वं, "सनि ग्रहगुहोश्च" इति चशब्देनोकोऽनुकर्षणादिण्निषेधः "श्र्युकः किति" इतिवददोपि स्वरत्यादिविकल्पं बाधते । उक्तं च न्यासे । "श्र्युकः किति" "सनि ग्रहगुहोश्च" इति पूर्वं विधेरिट्प्रतिषेधसामर्थ्यात् तु बलीयस्त्वं प्रतिषेधनियमस्येति । (सोषूयते सोषुवीति, सोषूति,) [प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्] इति "भूसुवोस्तिङि" इति गुणप्रतिषेधः (सावयति । असूषवत् ।) णौ कृतस्य स्थानिवद्भावात्सूशब्दस्य द्विर्वचनम् । कर्म्मणि (सूयते, असावित्यादि,) स्यादिषु तु वा चिण्वद्भावादिटि साविष्यते इत्यादि, अन्यदा कर्तृवदिड्विकल्पे द्वैरूप्यम्, तदेवं त्रीणि रूपाणि भवन्ति । लुङ्लिङोर्ध्वमि तु शुद्धइटि वा चिण्वदिट्यपि "विभाषेटः" इति मूर्धन्यविकल्पनात्पञ्च रूपाण्युदाहार्याणि, एवं कर्मकर्तर्यपि लुङ्येकवचने "अचः कर्मकर्तरि" इति चिण्सिचौ द्वौ भवतः, सिचश्च वा चिण्वदिट्, तदभावे शुद्धेड्विकल्पश्चेति चातूरूप्यम् । (असावि, असविष्ट, असाविष्ट असोष्ट, इति । गोषु प्रसूतः, गवां प्रसूतः, "स्वामीश्वर" इत्यादिना शेषे षष्ठीसप्तम्यौ भवतः । तत्र षष्ठी सप्तम्या सा बाधीति पक्षे केवलमभ्यनुज्ञायते न पुनर्विधीयतइति प्रतिपदविधानाभावाद्गोप्रसूत इति समासोऽपि भवति । ईशतावयमर्थः प्रपञ्चितः । (पुत्रसूः प्रसूः ।) "सत्सूद्विष" इत्यादिना कर्म्मण्युपसर्गेऽपि उपपदे क्विप्, तत्र यद्यपि सुपीति चानुवर्त्तते तथापि तस्याकर्मकैरेव सम्बन्ध इति गृहे सूत इत्यत्र क्विब् न भवति, अयं च क्विब्विधिर्द्विषा साहचर्यात् लुग्विकरणत्वेऽप्यस्यैव भवति न तु पूङ् प्राणिप्रसवइति दैवादिकस्य, नापि पू प्रेरणे इति तौदादिकस्य । (सूत्वा) "श्र्युकः किति" इतीण्निषेधः । (सूतः, सूतवान्) इत्यत्रानेन वा "यस्य विभाषा" इति वा इडभावः । (सूतका । सूतिका ।) स्वार्थे कः । "केऽण" इति टापो ह्रस्वः । [वा सूतकापुत्रिकावृन्दारकाणाम्) इत्यत इत्वविकल्पः । (प्रसवः,) "ऋदोरप्" वणोऽपवादः । (सुषूतिः । निःषूतिः । विषूतिः । दुःषूतिः) "सुविनिर्दुर्भ्यः सुपिसूतिसमाः" इति स्वादिभ्यः परस्य सुप्यादेः सकारस्य षत्वम् । सुपीति कृतसम्प्रसारणस्य स्वपेनिर्देशः । इतरत्र स्वरूपग्रहणमिति अतिसूत इत्यत्र "सात्पदाद्योः" इति षत्वनिषेध एव भवति । (सूरिः) । "सूङः क्रिः" इति क्रिः । स्त्रीविवक्षायां "कृदिकाराद्वा ङीष्" इत्यात्रेयः । (सूरीः) "सुसूधागृधिभ्यः क्रन्" इति क्रन्, (सूनुः,) "सुवः कित्" इति नुप्रत्ययः, कित्त्वान्न गुणः, अलुग्विकरणत्वाद्वा व्युत्पाद्यः, (पुमान्) अस्माद्धातोर्डुमसुन्प्रत्ययः, सकारस्य षकारः । डकारष्टिलोपार्थः । अकार उच्चारणार्थः, अन्त्य उकार उगित्कार्यार्थः, नकारः स्वरार्थः । "पुं-

सोऽसुङ्" इति सर्वनामस्थानेऽसुङादेशो ङित्त्वादन्त्यस्य, उकार उच्चारणार्थः । प्रत्ययस्योदित्त्वात्सर्वनामस्थाने नुम् सिद्धः "सान्तमहतः संयोगस्य" इति संयोगात्पूर्वस्यासम्बुद्धौ सर्वनामस्थाने दीर्घः, सम्बुद्धौ तु असुङि नुमि संयोगान्तलोपे हे पुमनिति, पुमांसावित्यादौ "नश्चापदान्तस्य झलि" इत्यनुस्वारः । अजादावसर्वनामस्थाने पुंस इत्यादि । हलादौ तु पूर्वस्य पदत्वात्संयोगान्तलोपे "मोऽनुस्वारे" तस्य च "वा पदान्तस्य" इति यथि वा परसवर्णं पुंभ्यां पुम्भ्यामित्यादि । पुंस्वित्यत्र "नुम् विसर्जनीयशर्व्यवायेऽपि" इति षत्वं न भवति । नुमो योऽनुस्वारस्तस्यैव नुम्ग्रहणेन तत्र ग्रहणात् । अयमसुङादेशोऽङ्गाधिकारविहितत्वात्तदन्तस्यापि भवतीति परमपुमानित्यादावपि भवति । बहवः पुमांसो यस्यामिति बहुव्रीहौ बहुपुंसीत्यत्र अन्तर्वर्त्तिनः सर्वनामस्थानस्य लुका लुप्तत्वात्प्रत्ययलक्षणाभावान्न सर्वनामस्थानपरतेत्यसुङ् न भवति । डुमसुन्प्रत्ययस्योदित्त्वात् ङीप् । उरःप्रभृतिषु पुमानित्येकवचनान्तपाठात्तेनैव समासे नित्यः कप् । अन्यत्र "शेषाद्विभाषा" इतिविकल्प इतीह कबभावः, यदा कप् तदा प्रातिपदिकस्य कबन्तत्वेनोगिदन्तत्वाभावादाब् भवति । बहुपुंस्केत्यत्र सकारस्य संयोगान्तलोपे नकारस्य [सम्पुंकानां स] इति सः, "पुमः खय्यम्परे" इति रुत्वापवादः सकारः । "अत्रानुनासिकः पूर्वस्य तु वा" इत्युकारस्य वानुनासिकादेशः । नन्वत्रग्रहणस्य रुणा सह सन्नियोगप्रतिपत्त्यर्थत्वात्कथमत्रानुनासिकः । नैष दोषः । रुप्रकरणे यद्विधीयते तदुपलक्षणार्थत्वादत्रग्रहणस्य, यदा नानुनासिकस्तदा "अनुनासिकात्परोऽनुस्वारः" इत्युकारात्परोनुस्वारः, अत्रान्यशब्दस्याध्याहारेणानुनासिकादन्यो वर्णस्ततः परोऽनुस्वार इति सूत्रार्थः । एवं नपुंसकेऽप्यन्तर्वर्तिनः सर्वनामस्थानस्य लुप्तत्वादसुङ् न भवति, बहुपुमन् नगरमिति, सकारस्य संयोगान्तलोपः । बहुपुंसी इत्यत्रान्तर्वर्तिनीं लुप्तां विभक्तिमाश्रित्य प्रत्ययलक्षणेन तदन्तत्वेन पदत्वात्सकारस्य संयोगान्तलोपो न शङ्क्यः, "उत्तरपदत्वे चापदादिविधौ" इत्युत्तरखण्डस्य प्रत्ययलक्षणेन पदत्वनिषेधात् । यद्वात्र भसंज्ञया पदसंज्ञाबाधेनैव सलोपप्रसङ्गः । बहुपुमांसीत्यत्र शेः सर्वनामस्थानत्वेनासुङ् । तृतीयादिषु पुंलिङ्गवत् । (पौंस्नम् ।) अपत्यादौ "स्त्रीपुंसाभ्याम्" इति स्नञ् , (पुंस्त्वं, पुंस्ता,) नञ्स्नञौ त्वतलोर्न बाधकाविति स्त्यायतावुक्तम् । पुंवदिति निपातनाद्वतिः, स्त्री च पुमांश्च (स्त्रीपुंसौ) "अचतुरादौ" इतरेतरयोगे द्वन्द्वेऽजन्तो निपातितः, तत्पुरुषे तु स्त्रियाः पुमान् स्त्रीपुमानित्येव । न स्त्रीपुंसौ नपुंसकः, "नभ्राड्" इत्यादौ निपातनान्नञः प्रकृतिभावः । स्त्रीपुंसशब्दस्य च पुंसकादेशः ॥ २१ ॥

शीङ् स्वप्ने । (शेते । शयाते । शेरते, शेषे, शेध्वे । शये, शेवहे ।) "शीङः सार्वधातुके" इति गुणः, *शीङो रुट्* इति झादेशस्थाच्छब्दस्य रुट् , अस्य परत्वादिगन्तत्वमविहितमिति "शीङः सार्वधातुके" इति गुणः सिद्धः, (शिश्ये, शिश्याते, शिश्यिषे । शिश्यिढ्वे । शिश्यिध्वे । शिश्ये, शिश्यिवहे ।) "एरनेकाचः" इति यणादेशः । अत्र यद्वक्तव्यं तदीर गतावित्यत्रोक्तम् । ध्वमि "विभाषेटः" । (शयिता, शयिष्यते । शेताम् । शयाताम् । शेरताम् । शेष्व, शेध्वम् । शयै । शयावहै । अशेत । अशयाताम् । अशेरत, अशेथाः । अशयि । अशेवहि । शयीत । शयीथाः, शयीय) आशिषि (शयिषीष्ट । शयिषीष्ठाः, शयिषीढ्वम् । शयिषीध्वम् । शयिषीय । अशयिष्ट, अशयिष्ठाः । अशयिध्वम् । अशयिढ्वम् , । अशयिषि । शिशयिषते, शाशय्यते,) "अयङ्यिक्ङिति" इति शीङो यकारादौ क्ङित्ययङ् , स च ङित्त्वादन्त्यस्य, परत्वादस्मिन् कृते द्वित्वम् । (शेशयीति, शेशेति । शेशीतः, शेश्यति ।) शीङ इति सानुबन्धकनिर्देशान्न गुणो नापि रुट् , व्यतिशेश्यतइति । पिद्वचने तु "सार्वधातुकार्द्धधातुकयोः" इति गुणः । शेशीयते भवतेत्यत्र भावे लकारे यकि शीङ इति सानुबन्धनिर्देशादयङ् न भवति । (शाययति देवदत्तम् , अशीशयत् ।) "अणावकर्मकात्" इति चित्तवत्कर्तृकत्वे नित्यं परस्मैपदम् । अन्यदा तूभयम् । अकर्मकत्वात्प्रयोज्यस्य कर्मत्वं, ग्रामोऽधि-

शय्यते। "अधिशीङ्स्थासाम्" इत्याधारस्य कर्मत्वात्कर्मणि लादयो भवन्ति, यकारादित्वादयङादेशः, भावे शय्यते देवदत्तेन कालभावाध्वगन्तव्यदेशेषु कर्मसंज्ञासिवद्भावे कर्मणि च लादयो भवन्ति शय्यते मासं देवदत्तेन शय्यते मासो देवदत्तेनेत्यादि। अस्योपादानं भवतावनुगन्तव्यं, स्यादिषु चिण्वदिटि शायिष्यतइत्याद्युदाहार्यं, तदभावे कर्तृवदेव रूपं, कर्मकर्त्तर्य्येवम्। लुङ्येकवचने "अचः कर्मकर्त्तरि" इति चिण्सिचौ, सिचः पक्षे चिण्वदिट्चेति त्रैरूप्यम्। (अत्यशायि, अत्यशायिष्ट, अत्यशयिष्ट) इति। (विशयो) देशविशेषः "विशयी देश" इति ग्रहादिपाठाण्णिनिः वृद्ध्यभावश्च। खे शयः (खशयः।) "अधिकरणे शेतेः" इत्यच्। "शयवासवासिष्वकालात्" इत्यकालवाचिनः पूर्वपदात्सप्तम्या वाऽलुक्, कालवाचित्वे तु पूर्वाह्णशय इति लुगेव,। पार्श्वाभ्यां शेते इति (पार्श्वशयः)। उरसा शेते (उरःशयः,) (पार्श्वादिषूपसंख्यानम्] इत्यच्, उत्तानश्शेते (उत्तानशयः) एवमूर्ध्वशयः। "उत्तानादिषु कर्तृषु" इत्यच्। दिग्धेन सह शेते इति (दिग्धसहशयः) "दिग्धसहपूर्वाच्च" इत्यच्। दिग्धसहशब्दस्यमयूरव्यंसकादित्वादस्मादेव निर्देशाद्वा तत्पुरुषः। तेन शयशब्दस्योपपदसमासः। सप्तमीनिर्देशाभावेऽप्युपपदाधिकारे विधानात्सुपीत्यनुवर्तनाद्वा उपपदत्वं दिग्धसहशब्दस्याविरुद्धम्। न्यासेऽप्युक्तमुपपदसमास इति। (गिरिशः) "गिरौ डश्छन्दसि" इति डे टिलोपः, संज्ञाशब्दत्वाद्भाषायामप्ययं प्रयुज्यते तुराषाडिति चेत्यात्रेयः। हरदत्तस्तु लोमादिलक्षणेनशप्रत्ययेन भाषायामपि भवति गिरिश इति, भाष्येऽप्येतद्वचनं प्रत्याख्यातं तद्धितो वेति। (शयालुः।) [आलुचि शीङो ग्रहणम्] इत्यालुच्। (शयितः।) "मतिबुद्धि" इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वाद्वर्तमाने क्तः, अतिशयितो गुरुं शिष्यः अतिशयितो गुरुः शिष्येण। "गत्यर्थाकर्मक" इति कर्तृकर्मणोः क्तः। उपसर्गवशात्सकर्मकोऽयं, तदर्थ एव हि पाठः, सेटो निष्ठायां "निष्ठाशीङ्" इति कित्त्वनिषेधाद्गुणः। सानुबन्धकनिर्देशाद्यङ्लुकि कित्त्वमेवेति (शेश्यित) इति "एरनेकाच" इति यणेव भवति। तव विशायस्तवोपशायः, शयनं तव प्राप्तावसरमित्यर्थः, "व्युपयोः शेतेः पर्याये" इति घञ्। पर्यायादन्यत्रोपशय इत्यच्। पूर्वसूत्रादनुपात्ययइत्यनुवृत्त्यैव पर्यायत्वे सिद्धे पुनः पर्यायग्रहणात् "अभिविधौ भावे इनुण्"इतीनुणं परमपि बाधित्वाऽभिविधावपि घञेव भवति उपशायो वर्ततइति। अभिविधिरभिव्याप्तिः, पर्यायशयनं सार्वत्रिकमित्यर्थः। शेरतेऽस्मिन्नङ्गुलय इति शयः, "पुंसि संज्ञायाम्" इति घः। (शय्या) "संज्ञायां समजनिषद" इत्यादिनाऽधिकरणे स्त्रियां क्यप्। (शयनीयम्।) बाहुलकादधिकरणेऽनीयर्। सुखशयनं पृच्छति (सौखशायनिकः,) "पृच्छतौ सुस्नातादिभ्यः" इति ठक्। अतिशये भवमित्यातिशायिकम्। अध्यात्मादित्वाट्ठञ्, अनुशतिकादित्वादुभयोरुदाहरणयोरुभयपदवृद्धिः। व्यासमातिशयिकेन रसेनेति माघप्रयोगश्चिन्त्यः। (अतिशायनं) ल्युट्, "अतिशायन" इति निपातनाद्दीर्घः। 'अबाधकान्यपि निपातनानि' इत्यतिशयनमित्यपि भवति। संशयमापन्नः सांशयिकोऽर्थः। "संशयमापन्ने" इति ठक्, अत्र यद्यपि कर्मवत् कर्तुरपि संशयापन्नत्वमस्ति तथापि संशयादिति पञ्चम्या निर्देष्टव्ये प्रकरणसिद्धाया अपि द्वितीयायाः संशयमिति शब्देन पुनरुपादानं कर्मणोऽत्र प्राधान्यख्यापनार्थमिति तत्रैवायं प्रत्ययः। 'पूज्यः प्रतीक्ष्यःसांशयिकः संशयापन्नमानसः' इति वदन्निघण्टुकारस्तु सूत्रं साधारणं मन्यते, एतदात्रेयन्यासकारपदमञ्जरीकारादयो न सहन्ते। शोभनः शयोऽस्याः (सुशयिका) कपि ह्रस्वे "प्रत्ययस्थात्कात्" इतीत्वम्, "उदीचामातः स्थाने" इति निषेधस्तु न भवति, [यकपूर्वत्वे धात्वन्तयकोः प्रतिषेध] इति। (शयुरजगरः)। "भृमृशि" इत्युप्रत्ययः। (शयानकः) स एव, आनकन् "शीङ्भियः" इत्यानकन्। (शेवा लिङ्गाकृतिः,) शेवायह्वेतिवन्नन्तो निपात्यते। शेवं सुखम्, "इणशीभ्यां वन्" इति वन्। (शीधुः) शीलं शैवालं, शैवलं, "शीङो धुग्लग्वालञ्वलञ" इति धुग्लग्वालञ्वलञः प्रत्ययाः। अपरे शीङः स्थुगिति पठन्तः प्रत्ययं द्वितीयादिं मन्यन्ते।

"शीङो धुक्" इत्येव सूत्रम् । अन्ये तूहिताः सह पठ्यन्ते । यदाहुरात्रेयादयः । बाहुलकाद्वालज्वलनाविति । शीलशब्दः शीलतेर्वा । शेवलमिति बाहुलकाद्वलन् (शेपः, शेपसी,) "वृञ्शीङ्भ्यां रूपस्वाङ्गयोः पुट् च" इत्यसुन् पुडागमश्च यथासंख्यं रूपे स्वाङ्गे च । अकारान्तस्तु शेपशब्दः पप्रत्यये । उक्तं च कैयटपदमञ्जर्योरकारान्तोऽपि शेपशब्दोऽस्ति । यथा च वार्त्तिकमपि पठ्यते [शुनः शेपपुच्छलाङ्गूलेषु] इति । (शिखा) । "शीङो निद्भ्रस्वश्च" इति खप्रत्ययो निद्भ्रस्वश्च धातोः, (शिखावलो) मयूरः । "दन्तशिखात्संज्ञायाम्" इति मत्वर्थीयो वलच् । (शिखी) "व्रीह्यादिभ्यश्च" इतीनिः । (शिखावलं नगरं,) "शिखाया वलच्" इति चातुरर्थिको वलच् , (शिनिः) क्षत्रियविशेषः, निप्रत्ययो ह्रस्व इति कार्तकौजप इत्यत्र न्यासे व्युत्पादितम् ॥ २२ ॥ आत्मनेभाषावुदात्तौ ॥

यु मिश्रणे ॥ एतदादयस्तौत्यन्ता उदात्ता उदात्तेतः । (यौति, युतः, युवन्ति । यौषि । यौमि) *उतो वृद्धिर्लुकि हलि* इति हलादौ पिति सार्वधातुके वृद्धिः । अजादौ क्ङित्युवङ् , (युयाव, युयुवतुः । युयविथ । युयुवथुः । युयुव । युयाव । युयव । युयुविव ।) "श्र्युकः किति" इतीण्निषेधः क्रादिनियमेन बाध्यतइत्युक्तं, (यविता । यविष्यति । यौतु । युतात् । युताम् , युवन्तु । युहि ।) हेरपित्त्वान्न गुणो नापि वृद्धिः, (यवानि । यवाव ।) आटि पित्त्वेऽप्यहलादित्वान्न वृद्धिः । (अयौत् । अयुताम् । अयुवन् । अयौः । अयवम् । युयात् । युयातां, युयुः । युयाः, युयातं, युयात, युयां, युयाव ।) पिद्वचनेषु यासुटो ङित्त्वेन "पिच्च ङिन्न भवति" इति पित्त्वाभावान्न वृद्धिर्नापि गुणः । आशिषि (यूयात् । यूयास्ताम् ।) "अकृत्सार्वधातुकयोः" इति दीर्घः, (अयावीत् । अयाविष्टाम् । अयावीः । अयाविषम् ,) सिचि वृद्धिः । (यियविषति) "सनीवन्तर्द्ध" इत्यादिना सनो वेडागमः । गुणावादेशौ । अनयोः "द्विर्वचनेऽचि" इति स्थानिवत्त्वाद्युशब्दो द्विरुच्यते । "ओः पुयण्जि" इतीत्वम् । इडभावे (युयूषति) "इको झल्" इति सनः कित्त्वान्न गुणः । "अज्झन" इति दीर्घः (योयूयते । योयवीति । योयोति ।) "उतो वृद्धिः" इत्यत्र "नाभ्यस्तस्य" इत्यनुवृत्तेर्न वृद्धिः । (यावयति । अयीयवत् ।) णौ कृतस्य स्थानिवत्त्वाद्युशब्दस्य द्विर्वचने "ओः पुयण्जि" इतीत्वे "दीर्घो लघोः" इति दीर्घः । कर्म्मणि । (यूयते, यूयताम् । अयूयत । यूयेत) यकि "अकृत्सार्वधातुकयोः" इति दीर्घः । स्यादिषु चिण्वदिट्पक्षे (याविष्यते । अयाविषाताम् । याविषीष्ट, याविता) अन्यदा (यविष्यते । अयविषाताम् । यविषीष्ट । यविता) इत्यादि, लुङ्लिङोर्ध्वमि मूर्द्धन्यविकल्पाच्चातूरूप्यं,लुङ्येकवचने "अचः कर्मकर्त्तरि" इति पक्षे सिच् तस्य च वा चिण्वदिट् । (अयावि । अयाविष्ट । अयविष्ट) इति त्रैरूप्यम् । (याव्यम् ।) "आसुयुवपि" इत्यादिना ण्यत् । वृद्धौ "धातोस्तन्निमित्तस्यैव" इत्यावादेशः । (यव्यम्) इति युनातेर्यति । सानुबन्धकत्वादिह नायं गृह्यत इति न्यासे, (योत्रम्,) "दाम्नी" इत्यादिना ष्ट्रन् (संयावः) "समि युद्रुदुव" इति घञ् । समोऽन्यत्र प्रयवः । "ऋदोरप्" । (उद्यावः) "उदिश्रयतियौति" इति घञ् । यौतीतिनिर्देशाद् युनातेरुद्यव इति । (उद्यावो) भक्ष्यविशेषः । "अध्यायन्यायोद्याव" इति संज्ञायां करणाधिकरणयोर्घञि निपात्यते । (यूतिः) "ऊतियूति" इति क्तिनि दीर्घत्वमन्तोदात्तत्वं च निपात्यते । ग्रहयुतिरित्येतत्तु युनातेः । यूतिरितिनिपातनं यौतेरेवेति वृत्तिन्यासयोः । यौत्यत्र रसादिकमिति (यवः) "पुंसि संज्ञायाम्" इति घः, (यवनः) नंद्यादित्वाल्ल्युः । दुष्टो यवो यवानी । यवनानां लिपिर्यवनानी) "इन्द्रवरुण" इत्यादिना ङीषानुकौ । तत्र [यवाद्दोषे] [यवनाल्लिप्याम्] इत्युक्तम् । यवनीमुखपद्मानामितिप्रयोगः पुंयोगलक्षणे ङीषि । यवानां भवनं क्षेत्रं (यव्यं, यवक्यं) "यवयवकषष्टिकाद्यत्" इति यत् । यव एव (यवकः) यवस्य विकारो (यावः) स एव (यावकः) "यावादिभ्यः कन्" इति कन् । रञ्जनद्रव्ये यावकमिति संज्ञायां ण्वुलि । (यवमान् ।) "मादुपधायाश्च" इति वत्वमयवादिभ्य इति निषेधान्न भवति । (युत्वा युतः ।)

"श्रयुकः किति" इतीण्निषेधः। युतमित्यत्र "यस्य विभाषा" इति वा नेट्। (यूपः।) "कुयुभ्यां च" इति पप्रत्ययो दीर्घश्च। (यूका)। "अजियुधूनीभ्यो दीर्घश्च" इति कनि दीर्घः, (यवसम्।) "ऋतन्यञ्जि" इत्यादिना सप्रत्ययः, (यवासः।) "अन्येषामपि दृश्यत" इति दीर्घः। (युवा।) "कनिन्युवृषि" इत्यादिना कनिन्। भसंज्ञायां "श्वयुवमघोनामतद्धिते" इति सम्प्रसारणे (यून) इत्यादि, "न सम्प्रसारणे सम्प्रसारणम्" इति सम्प्रसारणनिषेधः पूर्वस्य। यूनो भावकर्मणी (यौवनं यौवनिका,) "हायनान्तयुवादिभ्योऽण्" "द्वन्द्वमनोज्ञादिभ्यश्च" इत्यणवुञौ, स्वभावाद्वुञ् स्त्रियां, "श्वयुव" इति सम्प्रसारणमतद्धितइतिनिषेधान्न भवति। "नस्तद्धित" इति टिलोपोऽपि न भवति, "अन्" "प्रकृत्याके राजन्यमनुष्ययुवान" इति चाणवुञोः प्रकृतिभावात्। (यविष्ठः, यवीयान्,) "स्थूलदूर" इत्यादिनेष्ठेमसुनोर्यणादिपरलोपे पूर्वस्य च गुणः। (कनिष्ठः, कनीयान्,) "युवाल्पयोः कनन्यतरस्याम्" इति वा कनादेशे "प्रकृत्यकाच्" इति प्रकृतिभावः। (यवयति। कनयति।) णाविष्ठवदिति यणादिलोपगुणौ, "युवाल्पयोः" इति कनादेशश्च पक्षे, भाष्यकारप्रयोगाद्वृद्ध्यभावः। स्त्रियां "यूनस्तिः" इति तिप्रत्यये (युवतिः,) "सर्वतो ऽक्तिन्नर्थात्" इति वा ङीपि युवतीति। युवतीः पश्येत्यादौ लिङ्गविशिष्टपरिभाषया "श्वयुव" इति सम्प्रसारणं न भवति, श्वादीनां 'प्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थम्' इत्युक्तत्वात्। तिप्रत्यये यूनः पदत्वान्नलोपः। युवतीनां समूहो (यौवनम्) "भिक्षादिभ्योऽण्" इत्यण्। युवत्या भावकर्मणी (यौवनं, यौवनिका,) लिङ्गविशिष्टपरिभाषया "हायनान्त" इत्यण् मनोज्ञादित्वाद् वुञ् च। "भस्याढे तद्धिते" इति पुंवद्भावः सर्वत्र, भिक्षादिषु युवतिशब्दस्य पाठसामर्थ्यात्पुंवद्भावो नेति वृत्तौ, सामर्थ्यं च यदि स्यात्पुंवद्भावः "भस्याढे तद्धिते" पुंवद्भावः "सिद्धश्च प्रत्ययविधौ" इति प्रत्यये भाविनि पूर्वमेव पुंवद्भावविधानाद्युवशब्दस्य च कनिनन्तत्वेनाद्युदात्तत्वात् "तस्य समूह" इत्येवाणि सिद्धे पुनः पाठो ऽनर्थकः, पुंवत्त्वाभावे तु युवतिशब्दस्य प्रत्ययस्वरेणान्तोदात्तत्वात् "अनुदात्तादेः" इत्यञो बाधनार्थः पाठो युज्यते। यथा तु वार्त्तिकं तथा पुंवद्भाव इष्यते। यदाह-'भिक्षादिषु युवतिग्रहणानर्थक्यं पुंवद्भावस्य सिद्धत्वात्प्रत्ययविधौ'इति (युवखलतिः,) युवा खलतिः, युवतिः खलतिः। "युवा खलतिपलितवलिनजरतीभिः" इति विशेषण समासः लिङ्गविशिष्टपरिभाषया युवतिशब्दस्य ग्रहणं, तस्य "पुंवत्कर्मधारय" इति पुंवत्वम्, एवं यवपलितेत्यादि। जरतीशब्देन स्त्रीलिङ्गेन युवशब्दस्य सामानाधिकरण्यानौचित्याद्युवतिशब्दस्य समासः, युवजरन्नित्येतत्तु जरद्भिरिति पाठादिति व्याख्यातारः। स्त्रीलिङ्गपाठस्तु लिङ्गविशिष्टपरिभाषाया ज्ञापनार्थः। (इभयुवतिः,) "पोटायुवति" इत्यादिना विशेषणसमासः। (आर्ययुवा। आर्ययुवानौ) इति "प्रातिपदिकान्त" इति णत्वं [युवादीनां प्रतिषेधः] इति प्रतिषिध्यते। (आर्ययून) इत्यादौ च "एकाजुत्तरपद" इति "प्रातिपदिकान्त" इति च णत्वं [युवादीनां प्रतिषेधः] इत्येव निषिध्यते, अयममिश्रणार्थोऽपि। तथा च दृश्यते अयुतसिद्धानामाधार्याधारभूतानामिति। युञ् बन्धनइति क्रयादौ, यु जुगुप्सायामित्याकुस्मीयः॥ २३॥

रु शब्दे॥ रौतीत्यादि यौतीत्यादिवत्॥ विशेषस्तु "तुरुस्तुशम्यमः सार्वधातुके" इति हलादौ सार्वधातुके पक्षे ईडागमः शब्विषये, (रवीति रुवीत) इत्यादि। अशब्विषये तु विकरणेन सार्वधातुकस्य व्यवधानादीटो ऽप्रसङ्गः (रुरूषति।) "सनि ग्रहगुहोश्च" इत्यनिट्त्वं, (रोरूयते। रोरवीति, रोरोति। रोरुवीतः। रोरुतः।) प्रकृतिग्रहणन्यायेन "तुरुस्तु" इतीड्विकल्पः। (रवणः।) चलनशब्दार्थादिति युच्। (संरावः।) "उपसर्गे रुवः" इति घञ्। प्राणा उपरवा इति प्रयोगः पुंसि सञ्ज्ञायां घे द्रष्टव्यः। उपसर्ग इतिवचनादनुपसृष्टादपि रवः। बाहुलकाद् घञपीत्यात्रेयः, राव इति। (आराव आरवः) "विभाषाङि रुप्लुवोः" इति पक्षे घञ्, तदभावे ऽप्। (रविः।) "अच इः" इतीप्रत्ययः। "तुरुस्तुशम्यम" इत्यत्र

वृद्धौ तुरिति सौत्रो धातुरिति । अत्र न्यासे वृद्ध्यर्थ इत्येके । हिंसार्थ इत्यपरे, तस्य च लुग्विकरणत्वं स्मर्यते इति । वर्द्धमानश्च तु वृद्धिहिंसयोरदादौ स्मर्यत इति । हरदत्तस्तु वृद्ध्यर्थत्वमभिधाय गत्यर्थ इत्येके, हिंसार्थ इत्यपरे इति, त्रिष्वपीति बोधिन्यासे, (उत्तरी-ति)इति "बहुलं छन्दसि"इति शपो लुगिति पदमञ्जर्यां यद् दृश्यते तद्दुर्विन्यस्तकाकुपदज-नितभ्रान्तिभिर्लेखकैरिहापि शम्यमोर्वक्ष्यमाणं लिखितमिति बोद्धव्यं न तु तत्प्रामाण्यादयं न्याय्यविकरण इति । न्याय्यविकरणत्वे हि न्यासादिविरोधप्रसङ्गः स्यात् । किं च शम्य-मोश्छन्दसि विकरणस्य लुकि कृते हलादिसार्वधातुकमनन्तरं संभवतीति वृत्तिविरोधः स्यात् । (तौति) इत्यादि रौतीत्यादिवदुदाहार्यम् । "उतां च रुस्नुवौ क्षुवं तथोर्णोतिस्तथो युणुक्ष्णुव" इति सेट् स्वस्यापाठादनिट्त्वम् (तोता, तोष्यति) इत्यादि। थलि क्रादिनियमा-दिड्विकल्पः (तुतोथ तुतविथ) इति । (तुतावयिषति । अतूतवत्) इत्यत्राभ्यासस्य पुयण्जपरत्वाभावादित्वं न भवति । आपिशलास्तु 'तुरुस्तुशम्यमः सार्वधातुके छन्दसि' इति पठन्तः सर्वत्रेदं छान्दसमाहुः । रवत इति गतिरेषणयोः शपि ॥ २४ ॥

णु स्तुतौ ॥ नौतीत्यादि यौतिवत् (नुनावयिषति । अनूनवत्) इत्यत्र पुयण्जपरत्वाभावा-दभ्यासस्य नेत्वं, (नुनूषति,) "सनि ग्रहगुहोश्च" इत्यनिट्त्वे "इको झल्" इति सनः कित्त्वे "अज्झनगमां सनि" इति दीर्घः । (प्रणौति ।) "उपसर्गादसमासेऽपि" इति णत्वम् । (प्रणुनाव) इत्यादौ "उभौ साभ्यासस्य" इति साभ्यासस्यानितेर्णत्वविधानाज्ज्ञापकात्ततः पूर्वमेव द्विर्वचनमिति परस्य णत्वं न भवति, व्यवधानात् । न च णत्वस्य द्विर्वचने पूर्वत्रासि-द्धत्वेन णत्वं न भविष्यतीति वाच्यम् । [पूर्वत्रासिद्धीयमद्विर्वचने] इत्युक्तत्वादित्यात्रेयः । हरदत्तस्तु "उभौ साभ्यासस्य" इत्यनेन [पूर्वत्रासिद्धीयमद्विर्वचन] इत्यस्यानित्यत्वं ज्ञाप्य-त इति णत्वस्यासिद्धत्वाद् नुशब्दस्य द्विर्वचने परस्य व्यवधानादणत्वमाह । (आनुते सृगालः ।) [आङि नुप्रच्छ्योरुपसङ्ख्यानम्] इति तङ्, आङ्पूर्वोऽयं स्वभावादुत्कण्ठापूर्वके शब्दने वर्तते, तदुक्तं न्यासे, अयं धातुरुत्कण्ठापूर्वके शब्दने आङोत्तरः प्रवर्त्ततइति । कैयट-पदमञ्जर्योरुदाहरणस्य सोत्कण्ठं शब्दं करोतीत्यर्थ उक्तः । (आनुवाते, आनुवते, आनुषे, आनुवे, आनुवहे, आनुनुवे, आनुनुविषे, आनुनुविध्वे, आनुनुविढ्वे, आनुनुवहे, आनविता, आनविष्यते,,आनुताम्, आनुष्व, आनवै, आनुत, आनुथाः, आनुवि । आनुवीत । आनु-वीथाः । आनुवीय) आशिषि (आनविषीष्ट । आनविष्ट । आनविष्ठाः, आनविषि । आनु-नूषते) यङ्लुक्यप्ययन्तङ् भवति । आनोनुते) दीर्घान्तोऽयं तुदादौ ॥ २५ ॥

टुक्षु शब्दे । (क्षौति । चुक्षाव । क्षविता) इत्यादि यौतिवत्, (विक्षावः ।) "वौ क्षुश्रुव" इति घञ्, (क्षवथुः) "ट्वितो ऽथुच्" । (क्षुमा) अतसी । "अर्त्तिस्तु" इत्यादिना मनिन् । बाहुलकान्न गुणः । (क्षुरम्) "ऋज्रे" इत्यादिना रन् ॥ २६ ॥

क्ष्णु तेजने ॥ (क्ष्णौति । चुक्ष्णाव । चुक्ष्णुवतुः, चुक्ष्णुवुः, क्ष्णविता) इत्यादि यौतिवत् (संक्ष्णुते शस्त्रं, संचुक्ष्णुवे । संक्ष्णविता, संक्ष्णविष्यते, संक्ष्णुतां, समक्ष्णुत, संक्ष्णुवीत । संक्ष्णुविषीष्ट । समक्ष्णविष्ट, संचुक्ष्णुषत) इति । "समः क्ष्णुवः" इति तङ् ॥ २६ ॥

ष्णु प्रस्रवणे । (स्नौति । सुष्णाव । स्नविष्यति । स्नौतु । अस्नौत् । स्नुयात् । स्नूयात् । अस्नावीत् । सुस्नूषति ।) "स्तौतिण्योरेव" इति न षत्वं, (सोष्णूयते । सोष्णवीति । सोष्णोति । स्नावयति । असुष्णुवत् ।) कर्मणि (स्नूयते । सुष्णुवे, सुष्णुषे, सुष्णुध्वे । सुष्णुवहे । स्नोता । स्नोतासे । स्नोष्यते । स्नूयताम् । अस्नूयत । स्नूयेत । स्नो-षीष्ट । अस्नावि । अस्नोषाताम्) इत्यादि । "स्नुक्रमोरनात्मनेपदनिमित्ते" इत्यात्मनेपदेन समानपदस्थस्य स्नुक्रमभ्यां परस्य वलादेरार्द्धधातुकस्येण्निषेधः। प्रस्नवितेवाचरति (प्रस्न-वित्रीयत) इत्यत्रात्मनेपदेन समानपदस्थत्वेऽपि निषेधात्प्रागेवान्तरङ्गत्वादिडागमः प्रवर्त्तत-इति पदमञ्जर्यादौ व्यवस्थापितम् । अस्माभिरपि क्रामतावेवं प्रतिपादितम् । स्यादिषु पक्षे

माघ० २१

चिण्वदिटि (स्नाविष्यत) इत्याद्युदाहार्यम् । कर्मकर्त्तरि तु "न दुहस्नुनमां यक्चिणौ" इति यक्चिणौ न भवतः । प्रस्नुते गौः स्वयमेव । प्रस्नुता गौः स्वयमेव । प्रास्नुत गौः स्वयमेव । प्रस्नुवीत गौः स्वयमेव । प्रास्नोष्ट गौः स्वयमेवेति । ननु कर्मवदित्यतिदेशेन प्राप्ते "चिण्भावकर्मणोः" इति चिणि "न दुहस्नुनमाम्" इतिप्रतिषिद्धेऽपि "अचः कर्मकर्त्तरि" इति वैकल्पिकश्चिण् पक्षे कस्मान्न भवति । न चैवं सति स्नुग्रहणमनर्थकं स्यादिति वाच्यम् । तस्य यङ्निषेधार्थत्वेनाप्युपपत्तेः । नैष दोषः । कर्मवदित्यतिदेशेन नित्यं प्राप्तस्य चिणः स विकल्पः, अस्य तु "न दुहस्नुनमाम्" इति चिणोऽतिदेश एव निषिध्यते । तथा च वृत्तिः, प्राप्तविभाषेयमिति । न चोभयत्रविभाषाश्रयणेन चिणः प्रसङ्गः । आश्रीयमाणेऽप्युभयत्रविभाषात्वे यतः परत्वात् " न दुहस्नुनमाम्" इति प्रतिषेध एव भविष्यति । अत्रात्रेयो "न दुहस्नुनमाम्"इति चिण्वद्भावस्यापि निषेध इत्याह, सूत्रवृत्तौ च यक्चिणोरेव निषेध इति, तस्याभिप्रायो मृग्यः । (स्नुषा) "स्नुव्रश्चिकृत्यृषिभ्यः क्स" इति क्सः । युप्रभृतय उदात्ता उदात्तेतः । तौतिस्त्वनुदात्तः ॥ २७ ॥

ऊर्णुञ् आच्छादने ॥ उदात्त उभयतोभाषः । (ऊर्णुते, ऊर्णुवाते ऊर्णुषे । ऊर्णुवे ऊर्णुवहे । ऊर्णुनुवे । ऊर्णुनुविषे । ऊर्णुनुविध्वे, ऊर्णुनुविढ्वे । ऊर्णुनुवे । ऊर्णुनुविवहे) "असंयोगाल्लिट्" इति लिटः कित्त्वान्न गुणः । "अजादेर्द्वितीयस्य" इति नुशब्दस्य द्विर्वचनम् , रेफस्य तु "न न्द्राः" इति न भवति । नोपधोऽयं णत्वं तु सांहितिकं, तच्च द्विर्वचने ऽसिद्धमिति कृते द्विर्वचने पूर्वस्य णत्वं परस्य तु व्यवधानान्न भवति। [पूर्वत्रासिद्धीयमद्विर्वचने] इत्येतत् "उभौ साभ्यासस्य" इति लिङ्गान्न प्रवर्त्तत इति नौतावुक्तम् । "सूचिसूत्रि" इत्यत्र हरदत्तेनाप्ययमर्थः स्फोरितः । [ऊर्णोतेश्चोपसंख्यानम्] इत्याम्प्रतिषेधः । (ऊर्णविता । ऊर्णुविता । ऊर्णुविष्यते । ऊर्णविष्यते) । "विभाषोर्णोः" इतीडादेः प्रत्ययस्य पक्षे ङित्त्वान्न गुणः । (ऊर्णुताम्) ऊर्णुष्व । ऊर्णवै ।) आटि गुणावौ । (और्णुत । और्णुथाः । और्णुवि । और्णुवहि । ऊर्णुवीत । ऊर्णुवीयाताम् । ऊर्णुवीथाः, ऊर्णुवीय । ऊर्णुविवहि) आशिषि । (ऊर्णुविषीष्ट, र्णुऊविषीढ्वम् । ऊर्णुविषीध्वम् । ऊर्णुविषीय,) ङित्त्वपक्षे उवङ् । अन्यदा तु गुणः (ऊर्णविषीष्ट) इत्यादि, (और्णविष्ट । और्णविष्ठाः। और्णविषि) ङित्त्वपक्षे उवङुदाहार्यः (और्णुविष्ट)(१) इत्यादि । (ऊर्णौति । ऊर्णोति । ऊर्णुतः । ऊर्णुवन्ति । ऊर्णौषि, ऊर्णोषि । ऊर्णौमि । ऊर्णोमि) "ऊर्णोतेर्विभाषा" इति हलादौ पिति सार्वधातुके पक्षे वृद्धिः, अन्यदा(२)गुणः । (ऊर्णुनाव । ऊर्णुनुवतुः। ऊर्णुनुविथ । ऊर्णुनविथ । ऊर्णुनुविव । ऊर्णुनविव) "विभाषोर्णोः" इति ङित्त्वविकल्पनात् पक्षे उवङ् । अन्यदा गुणः अन्यत्र "असंयोगाल्लिट् कित्" इति नित्यं कित्त्वादुवङेव । (ऊर्णुविता । ऊर्णविता । ऊर्णुविष्यति, ऊर्णविष्यति । ऊर्णौतु, ऊर्णोतु । और्णोत् । और्णुताम् । और्णोः । और्णवम् ।) ऊर्णोतेरित्यधिकृत्य "गुणोऽपृक्ते" इति वृद्ध्यपवादो गुणः। (ऊर्णुयात् । ऊर्णुयाः। उर्णुयाम् ।)'ङिच्च पिन्न भवति'इति पित्वाभावान्न वृद्धिर्नापि गुणः आशिषि (ऊर्णुयात्) इत्यादि, (और्णावीत् । और्णावीः। और्णाविषम्) "ऊर्णोतेर्विभाषा" इतीडादौ परस्मैपदपरे सिचि वा वृद्धिः, अन्यदा गुणो ऽङित्त्वपक्षे, ङित्त्वपक्षे तूवङ् । (और्णवीत् । और्णुवीत्) इत्यादि । (ऊर्णुनूषति । ऊर्णुनविषति । ऊर्णुनुविषति) "सनीवन्त" इतीडभावपक्षे "इको झल्" इति कित्त्वम् , इटि तु पूर्ववद्वा ङित्त्वम्, (ऊर्णोनूयते) "सूचिसूत्रि" इत्यादिना यङ् । (ऊर्णोनौति) "उतो वृद्धिर्लुकि हलि" इति वृद्धिः "नाभ्यस्तस्य" इति निषेधो ऽभ्यस्तस्येहानङ्गत्वान्न भवति । "ऊर्णोतेर्विभाषा" इति वृद्धिविकल्पस्तु श्तिपा निर्देशान्नाशङ्क्यः । अत एव "गुणोऽपृक्त" इति गुण-

---

(१) और्णुविष्ठाः और्णुविषि इति पुस्तकान्तरेऽधिकम् ।

(२) वृद्ध्यभावः । अन्यत्राजादावुवङ् , इति पुस्तकान्तरेऽधिकः ।

श्चापृक्ते, ऊर्णोनुवन्तीत्यत्र "अदभ्यस्तात्" इत्यद्भावो न भवति, अभ्यस्तस्यानङ्गत्वात् । पारायणिकास्त्वङ्गस्येत्यनाश्रित्याद्भावमिच्छन्ति । अङ्गाधिकारः कथं बाध्येतेति तच्चिन्त्यम् । लुङि ऊर्णोतेरिति स्तिपा निर्देशाद्वृद्धिविकल्पो नेति नित्या सिचिवृद्धिर्भवति । (और्णोनावीत्) इत्यादि । "विभाषोर्णोः" इति ङित्त्वपक्षे उवङ् (और्णोनुवीत्) इत्यादि । (ऊर्णावयति । और्णुनवत्,) अत्र णौ कृतं स्थानिवदिति नुशब्दस्य द्विर्वचने उपधाह्रस्वत्वे *दीर्घो लघोः* इत्यभ्यासस्य दीर्घो न भवति, चङ्परे णौ यदङ्गं तस्य योऽभ्यास इति सूत्रार्थव्यवस्थापनात्, अत्र त्वङ्गावयवस्याभ्यासो न त्वङ्गस्य । (ऊर्णुत्वा ।) "श्र्युकः किति" इत्यनिट्त्वम्, यद्यप्येकाच इत्यनुवर्त्तते तथापि न दोषोऽस्य नुवद्भावात् । उक्तं च-

वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनम् ।
आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात् ॥

इति । (ऊरुः) "ऊर्णोतेर्नुलोपश्च" इत्युप्रत्यये नुशब्दलोपः । (उरुः ।) "महति ह्रस्वश्च" इति ह्रस्वश्च धातोः । रम्भेवोरू यस्याः सा (रम्भोरू) "ऊरूत्तरपदादौपम्ये" इत्यूङ्प्रत्ययः । (संहितोरूः। शफोरूः । वामोरूः। लक्षणोरूः) "संहितशफलक्षणवामादेश्च"इत्यूर्वन्ताद्बहुव्रीहेरूङ् प्रत्ययः, शफशब्दः संहितपर्यायः, (सहितोरूः) हितेन सहितं सहितं, (सहोरूः) सहशब्दस्सहितवचनः । "सहितसहाभ्यां च" इत्यूङ् । अतिशयेनोरुः (वरिष्ठः। वरीयान्) उरोर्भावकर्मणी (वरिमा) "पृथ्वादिभ्य इमनिच्" "प्रियस्थिर" इत्यादिना वरादेशः। उरुमाचष्टे (वारयति) इत्यत्र "णाविष्ठवत्" इति वरादेशे वृद्धिः । टिलोपस्तु "प्रकृत्यैकाच्" इति प्रकृतिभावान्न भवति । (ऊर्णा ।) "ऊर्णोतेर्डः" इति डप्रत्ययः। (ऊर्णायुः) "ऊर्णायायुस्" इति मत्वर्थो युस्, सित्वात् 'सिति च" इति पदत्वाद्भत्वाभावात् "यस्य" इति लोपो न भवति। ऊर्णा नाभौ यस्य स (ऊर्णनाभः) "अच्प्रत्यन्वव" इत्यत्राजिति योगविभागात्समासान्तः । "ङ्यापोः संज्ञाछन्दसोः" इति ह्रस्वः ॥ २८ ॥

द्यु अभिगमने ॥ अनुदात्त उदात्तेत् । (द्यौति, दुद्याव । दुद्युवतुः । दुद्यविथ । दुद्योथ । दुद्युव । दुद्याव । दुद्यव,दुद्युविव,) क्रादिनियमादिट् । थलि भारद्वाजनियमाद्विकल्पः (द्योता । द्योष्यति । द्यौतु । द्युतात् । द्युहि, द्यवानि । अद्यौत् । अद्युताम् । अद्यौः। अद्यवम् । द्युयात् । द्युयाताम् । द्युयाः। द्युयाम्) आशिषि (द्यूयात्) इत्यादि । (अद्यौषीत् । अद्यौष्टाम् । अद्यौषीः । अद्यौषम् । दुद्यूषति । दोद्यूयते । दोद्योति । दोद्यवीति । द्यावयति । अदुद्यवत् । द्युत्वा । द्युतः) केचिदस्य सेट्त्वमिच्छन्तीति धातुपारायणे । तत् "उतां च रुस्नवौ क्षुवन्तथोर्णोतिमथोयुणुक्ष्णुव" इत्युकारान्तसेट्परिगणने पाठाभावादिच्छामात्रम् ॥ २९ ॥

षु प्रसवैश्वर्ययोः ॥ अनुदात्त उदात्तेत् ॥ प्रसवोऽभ्यनुज्ञानमिति । ॐमिति ब्रह्मा प्रसौति । (सुषाव । सोता) इत्यादि द्युवत्, (असौषीत्) इत्यत्र "स्तुसुधूञ्भ्यः" इतीड्विक(१)ल्पो न भवति यतस्तत्रोभयतो ञितो स्तुञ्धूञोः साहचर्यात् ञितः सुनोतेरेव ग्रहणं न पुनरस्याञितो लुग्विकरणस्यापि। (सुषवी) प्रसवशीला, पचाद्यचि सुषामादित्वात्षत्वंगौरादित्वान्ङीष् धात्वन्तराद्वा ॥ ३० ॥

कु शब्दे ॥ अयमप्यनुदात्त उदात्तेतः (कौति । चुकाव । चुकविथ । चुकोथ । चुकुविव । कोता) इत्यादिपूर्ववत् । (चोकूयते । चोकोति । चोकवीति) इत्यत्र "न कवतेर्यङि" इत्यभ्यासस्य कुत्वनिषेधः शपा निर्देशान्न भवति । (कविः) "अच इः" इतीप्रत्ययः । कवेः कर्म काव्यं, ब्राह्मणादिषु दर्शनात्ष्यञ् । अव्यक्ते शब्दे कवते इति गतं शपि । अयमनिट् चेति रौतेरनन्तरं नोक्तः ॥ ३१ ॥

ष्टुञ् स्तुतौ ॥ अनुदात्त उभयतोभाषः । (स्तुते । स्तुवाते, स्तुवते । स्तुषे । स्तुध्वे,

---

(१) विकल्प इति पुस्तकान्तरे नास्ति ।

स्तुवे । स्तुवहे । तुष्टुवे । तुष्टुवाते, तुष्टुविरे । तुष्टुषे । तुष्टुध्वे । तुष्टुवहे) अभ्यासे खयः शेषः । क्रादिषु पाठादिडभावः । (स्तोता । स्तोष्यते । स्तुताम्, स्तुवाताम्, स्तुष्व । स्तुध्वम् । स्तवै । अस्तुत । अस्तुवाताम्, अस्तुथाः, अस्तुवि, स्तुवीत । स्तुवीयाताम् । स्तुवीथाः । स्तुवीय ।) आशिषि (स्तोषीष्ट) इत्यादि । (अस्तोष्ट, अस्तोषाताम् । अस्तोष्ठाः । अस्तोढ्वम् । अस्तोषि) हलादौ सार्वधातुके शब्विषये यदा "तुरुस्तुशम्यम" इतीट् तदा (स्तुवीते । स्तुवीषे । स्तुवीध्वे । स्तुवीवहे, स्तुवीताम् । स्तुवीष्व । स्तुवीध्वम्, अस्तुवीत । अस्तुवीथाः, अस्तुवीध्वम् । अस्तुवीवहि ।) इति लिङि सलोपे ऽहलादित्वान्नेट् प्रसङ्गः । अन्यत्र सार्वधातुके विकरणेन व्यवधानान्नैवास्तीटः प्राप्तिः । (स्तौति । स्तुवीति । स्तुतः, स्तुवीतः, स्तौषि । स्तवीषि । स्तौमि । स्तवीमि । स्तुवः । स्तुवीवः) तिप्सिपोरिट्पक्षे गुणः । अन्यदा वृद्धिः । अन्यत्रेटि सर्वत्रोवङ्, (तुष्टाव । तुष्टोथ, तुष्टव) । थलि भारद्वाजनियमं बाधित्वा पुरस्तात्प्रतिषेधारम्भसामर्थ्यात् क्रादिप्रतिषेध एव भवति । (स्तोता । स्तोष्यति । स्तौतु । स्तवीतु । स्तुतात् । स्तुवीतात् । स्तुतां, स्तुवीतां, स्तुवन्तु । स्तुहि । स्तुवीहि) । हेरपित्त्वान् ङित्त्वाच्च गुणो नापि वृद्धिः, (स्तवानि । अस्तौत् । अस्तवीत् । अस्तुताम् । अस्तवीताम् । अस्तुवन् । अस्तौः । अस्तवीः । अस्तवम् । अस्तुव । अस्तुवीव । स्तुयात् । स्तुवीयात् । स्तुयाताम्, स्तुवीयाम्, स्तुयुः, स्तवीयुः, स्तुयाः, । स्तुवीयाः । स्तुयाताम् । स्तुवीयाताम् । स्तुयाम् । स्तुवीयाम् ।) अत्र यासुटि पिद्वचनेषु "उतो वृद्धिर्लुकि हलि"इति वृद्धिः "ङिच्च पिन्न"इति पित्त्वनिषेधान्न भवति । आशिषि (स्तूयात्) इत्यादि । (अस्तावीत्, अस्ताविष्टाम् । अस्तावीः । अस्ताविषम्) "स्तुसुधूञ्भ्यः परस्मैपदेषु" इतीटि शिचि वृद्धिः । (अभिष्टौति । अभ्यष्टौत्) । "उपसर्गात्सुनोति" इति "प्राक्सितादड्व्यवायेऽपि" इति, षत्वं (पर्यस्तौत्) "सिवादीनां वाड्व्यवायेऽपि" इति परिनिविभ्यः परस्याड्व्यवाये वा षत्वम् । (अग्निष्टुत्) । "क्विप् च" इत्यग्नावुपपदे क्विप् । (अग्निष्टोमः । ज्योतिष्टोमः ।।आयुष्टोमः) । "अर्तिस्तु" इत्यादिना मन्प्रत्ययान्तस्तोमशब्दः, एते यज्ञविशेषाः । "अग्नेस्तुत्स्तोमसोमाः" "ज्योतिरायुषः स्तोम" इति षत्वं, (परिस्तोमः) इत्यत्र "उपसर्गात्" इत्यादिना षत्वम् 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' इति न भवति । (स्तुत्यः) । "एतिस्तु" इत्यादिना क्यप् । क्यबित्यनुवर्त्तमाने पुनःक्यब्ग्रहणात् (अवश्यस्तुत्यः) इत्यत्राप्यावश्यके ण्यतं बाधित्वा क्यबेव । मयूरव्यंदिसकारत्वात्समासः । 'लुम्पेदवश्यमः कृत्य'इत्यवस्यमो मलोपः । (ग्रावस्तुत्) । "भ्राजभास" इत्यादिना ताच्छीलिकः क्विप् । (आयतस्तूः ।) "क्विब् वचि" इत्यादिना क्विपदीर्घौ । (स्तोत्रम्) "दाम्नी" इत्यादिना ष्ट्रन् । (प्रस्तावः) "प्रे द्रुस्तुस्रुवः" इति घञ् । यज्ञकर्मणि छन्दोगा यत्र देशे समेत्य स्तुवन्ति स (संस्तावः) । "यज्ञे समि स्तुवः" इति घञ् । अन्यत्र (संस्तवः ।) स्तूयतेऽनयेति (स्तुतिः ।) "यजिदृशिस्तुभ्यः (१)करणे" इति क्तिन् । स्तवमर्हति स्तव्यः । दण्डादेराकृतिगणत्वाद्यदित्यात्रेयः । (संस्तवानः) । "सम्यानच् स्तुवः" इत्यानच् । अयं बहुलवचनात्केवलादपि भवति निच भवति। 'मृडाजरित्रे रुद्रस्तवान' इति३२

ब्रूञ् व्यक्तायां वाचि ॥ अनुदात्त उभयतोभाषः । (ब्रूते ब्रुवाते । ब्रुवते । ब्रूषे, ब्रुवे, ब्रुवाते । ऊचे । ऊचाते, ऊचिषे, ऊचिध्वे । ऊचे । ऊचिवहे ।) "ब्रुवो वचिः" इत्यार्द्धधातुकविषये वच्यादेशः । "वचिस्वपि" इति सम्प्रसारणे द्विर्वचनम् । (वक्ता । वक्तासे । वक्ताहे । वक्ष्यते ।) 'पचि वचिम्' इति व्याघ्रभूतिवचनादनिट्त्वं, (ब्रूतां, ब्रुवातां, ब्रूध्वं, ब्रवै । ब्रवावहै । अब्रूत, अब्रूथाः, अब्रुवि । ब्रुवीत । ब्रुवीयातां, ब्रुवीथाः । ब्रुवीय, ब्रुवीवहि) आशिषि (वक्षीष्ट । वक्षीष्ठाः । वक्षीय ।) आर्द्धधातुकत्वाद्वच्यादेशः । (अवोचत । अवोचे-

(१) श्रुयजीषिस्तुभ्यः करणे इति साम्प्रदायिकः पाठोऽत्र ज्ञेयः ।

ताम् । अवोचन्त । अवोचथाः । अवोचे । अवोचावहि) "अस्यतिवक्ति" इतिच्लेरङ् कर्त्तरि । "वच उम्" इत्युमागमो मित्त्वादन्त्यादचः परः, "आद्गुणः" । (अवक्ष्यत) सर्वेष्वेषु वचिग्रहणेष्वादेशस्यापि ग्रहणमुक्तं वृत्त्यादौ । (ब्रवीति । ब्रूतः । ब्रुवन्ति । ब्रवीषि । ब्रूथः । ब्रूथ । ब्रवीमि । ब्रूवः,) "ब्रुव ईट्" इति हलादौ पितीडागमः । (आह । आहतुः । आहुः । आत्थ । आहथुः) "ब्रुवः पञ्चानामादित आहो ब्रुव" इति ब्रुवो लटः परस्मैपदानामादितः पञ्च णलादयो हि यथासंख्यं वा भवन्ति धातोश्चाहादेशः । अकार उच्चारणार्थः । थल्याः 'हत्थ' इति हकारस्य थकारे "खरि च" इति चर्त्वम् । आत्थेत्यत्र स्थानिवद्भावेन ब्रुव ईड् न भवति [आहिभुवोरिट्प्रतिषेध] इति प्रतिषेधात् । (उवाच । ऊचतुः, ऊचुः, उवचिथ । उवक्थ । ऊच, उवाच । उवच । ऊचिव,) पिति "लिट्यभ्यासस्य" इत्यभ्यासस्य सम्प्रसारणम् , अन्यत्र तु "वचिस्वपि" इति सम्प्रसारणं, तच्च परत्वाद् द्विर्वचनात्पूर्वमेव भवति । वलादौ क्रादिनियमादिट् , थलि "उपदेशेत्वत" इतीण्निषेधो न भवति । तत्रोपदेशग्रहणस्य धातूपदेशेऽत्वत इति व्याख्यानात्, अयं चादेशोत्तरकालं धातुर्नोपदेशे । (वक्ता । वक्ष्यति । ब्रवीतु । ब्रूतात् । ब्रूतां, ब्रूहि । ब्रूतं, ब्रवाणि,) हि तातङोर्ङित्त्वात् ङिच्च पिन्नभवतीत्यपित्त्वादीण् न भवति । (अब्रवीत् । अब्रूताम् । अब्रवीः । अब्रवम् । अब्रूव । ब्रूयात् । ब्रूयातां, ब्रूयां, ब्रूयाव) पिद्वचनेषु यासुटि ङित्वातपित्त्वाभावादीडागमाभावः । आशिषि (उच्यात् । उच्यास्ताम्) इत्यादि । "किदाशिषि" इति कित्त्वात्संप्रसारणम् । (अवोचत् । अवोचताम् । अवोचः। अवोचम् ।) अङ्युमागमो "वच उम्" इति । कर्मण्युच्यते । (अवाचि) इत्यादि । कमकर्त्तरि यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूजिति यक्चिणोः प्रतिषेधाच्छब्लुकौ भवतः । ब्रूते कथा स्वयमेव । अवोचत कथा स्वयमेवेति, (विवक्षति । विवक्षते । वावच्यते ।) यङ्लुक्ययं न वच्यादेशः । यङ आर्द्धधातुकस्य लुका विषयत्वापहारात् । अस्य चोपपादनं चष्टौ कृतम् । (अनूचानः) "उपेयिवाननाश्वाननूचानश्च" इति भूते लिटः कर्त्तरि कानचि निपात्यते । अनेनैव निपातनेन भूते वा लिडनुमीयते । तस्य च नित्यं कानजिति न तिङः श्रवणप्रसङ्गः । विकल्पेनानुमानाच्चेणादिधातुविशेषविषयेणानेन लिटा सामान्यविषयस्य लुङो न बाधः । "अनद्यतने लङ्" "परोक्षे लिट्" इत्यत्राप्यस्य योगस्यानुवर्त्तनादिणादौ भूतसामान्ये सावकाशस्यास्य लिटो भूतविशेषविषयाभ्यां पराभ्यामपि लङ्लिड्भ्यां न बाध इति भाष्यादौ स्थितम् । (प्रवचनीयो) ब्राह्मणः । (प्रवचनीयो) अनुवाकः,"भव्यगेय" इत्यादिना कर्तृकर्मणेरनीयर् । गुणमुक्तवान् (गुणवचनः)। "कृत्यल्युटो बहुलम्" इति ल्युट् कर्तरि । (वाच्यम्) । आर्द्धधातुक इति विषयसप्तमीत्वात्प्रागेव प्रत्ययोत्पत्तेर्वच्यादेशे हलन्तलक्षणो ण्यद् भवति । "चजोः कुघिण्ण्यतोः" इति कुत्वस्य "वचोऽशब्दसंज्ञायाम्"इति निषेधः शब्दसंज्ञायां तु कुत्वमेव (वाक्यम्) इति । प्रकर्षेणोच्यतइति (प्रवाच्यो) नाम पाठविशेषोपलक्षितो ग्रन्थविशेषः । तत्र शब्दसंज्ञात्वेऽपि "यजयाचरुचप्रवचर्चश्च" इति कुत्वं निषिध्यते, तत्र प्रवचिग्रहणं शब्दसंज्ञार्थम् । अपरे पुनराहुः । प्रपूर्वो वचिरशब्दसंज्ञायामेव वर्त्तते प्रवाच्य इति, ग्रन्थविशेषप्रतीतिस्तु प्रकरणादिनेत्यत्राप्यशब्दसंज्ञायामित्येव कुत्वनिषेधस्य सिद्धत्वात्प्रवचिग्रहणं नियमार्थम्, अशब्दसंज्ञायामिति निषेधः सोपसर्गत्वे प्रपूर्वस्यैवेति, उपसर्गान्तरयोगेऽपि वाक्यमिति कुत्वं भवतीति, एतच्च भाष्ये दूषितं, यत इदं कुत्त्वमहर्विशेष एवेष्यते, अन्यत्र त्वविवाच्यमित्येव भवितव्यमिति, अहर्विशेषश्च द्वादशाहे अभितो रात्रे मध्ये दशरात्रस्तस्य दशममहः । तथा चाश्वलायनेनास्मिन्नहनि केन चित्कस्य चिद्विवाच्यमविवाक्यमित्याचक्षतइति । अहर्विशेषे कुत्वं तु पृषोदरादित्वात् , न्यङ्क्वादित्वाद्वा द्रष्टव्यं, (वाक् ।) "क्विब्वचिप्रच्छि" इत्यादिना कावसम्प्रसारणं दीर्घत्वं च । (वाचा) 'आपं चैव हलन्तानाम्'इति टाप् । वागस्यास्तीति (वाग्मी,) इति "वाचो ग्मिनिः" इति ग्मिनिः । पदत्वात्कुत्वे जश्त्वं, कुत्सिता वागस्यास्तीति (वाचा-

लो, वाचाटः ।) "आलजाटचौ बहुभाषिणि" इत्यालजाटचौ, बहुभाषिग्रहणं कुत्सितोपलक्षणार्थम् । सन्दिश्यमानासन्दिश्यमानस्य वाक् वा (वाचिकम्) "वाचो व्याहृतार्थायाम्" इति व्याहृतार्थत्वोपाधिकाद्वाचः स्वार्थे ठक्, वाचिकञ्च पूर्वमेव दूतम्प्रति स्वामिनोक्तार्थमिति व्याहृतार्थं भवति, अपर आह, लेख्यादिना ऽवधारितेऽर्थे प्रवर्त्तमाना वाग्वाचिकमिति । तथा च माघे 'निर्द्धारितेऽर्थे लेख्येन खलूक्त्वा खलु वाचिकम्' इति। [स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्त] इति वाचिकशब्दस्य नपुंसकत्वम् । (वाचोयुक्तिः) "वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु" इतिषष्ठ्या अलुक् । (ब्राह्मणिब्रुवा) "कुत्सितानि कुत्सनैः" इति कर्मधारयः । चेलादयो वृत्तिविषये कुत्सनवचना इति प्रागेवोक्तं "घरूप" इति ह्रस्वः । अत्रैव सूत्रे ब्रुवेतिनिर्देशात्पचाद्यचि, (विदुषिब्रुवा, विदुषीब्रुवा, श्रेयसिब्रुवा, श्रेयसीब्रुवा) "उगितश्च" इति ह्रस्वविकल्पः। अनयोः पुंवद्भावोऽपीष्यते । (विद्वद्ब्रुवा । श्रेयोब्रुवा) इति । (उक्त्वा । उक्तम्। पौनरुक्तम् । नैरुक्तम् ।) "अणृगयनादिभ्यः" इति भवव्याख्यानयोरण् । पौनरुक्तमधीते वेद वा (पौनरुक्तिकः) । "क्रतूक्थादिसूत्रान्ताठ्ठक्" इति ठक् । अयं द्विकर्मकस्तत्र प्रधाने लादय उक्ताः । अप्राधान्यं च विवक्षाधीनमिति माणवको धर्ममुच्यते धर्मो माणकमुच्यतइत्युभयोरपि कर्मणोः पर्यायेण लादयो भवन्ति, कृद्योगलक्षणा तु षष्ठी द्वितीयावद्युगपदुभयत्रापि भवति । माणवकस्य धर्मस्य वक्तेति । तत्र यस्याप्राधान्यविवक्षा तत्र पक्षे द्वितीयापीष्यते । इह वक्तव्यो माणवको धर्मं देवदत्तेनेत्यादि, न चैकस्मिन्कर्मणि कृत्येनाभिहिते ऽन्यस्मिन्कर्मणि कर्त्तरि च "कर्तृकर्मणोः कृति" इति षष्ठी भवति । [उभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेध] इत्यस्य नाथत्यादौ प्रागेवोपपादितत्वात्॥३३॥

इण् गतौ ॥ एतदादयो वच्यन्ताः परस्मैपदिनो ऽनुदात्ताः । इङ्त्वामनेपदी । "इणो गा लुङि" इत्यादौ विशेषणार्थो णकारः । (एति । इतः, यन्ति । एषि । एमि । इवः,) "इणो यण्" इत्यजादौ किति यणादेशः । (उपैति) "एत्येधत्यूठ्सु" इत्येजादावेतौ वृद्धिः । एवं च 'ऐति स्म रामं पथि जामदग्न्य' इति भट्टिप्रयोगवद् 'न पुनरेति गतं चतुरं वय'इत्यत्राप्यैतीति वृद्धिरेव पठनीया, 'स चिन्तयत्येव भियस्त्वदेष्यति'इति, 'हरत्यघं सम्प्रति हेतुरेष्यत' इत्यादयस्तु प्रयोगा भौवादिकस्यायतीत्यस्येङि पररूपे द्रष्टव्याः। आ इतः (एतः। उपेतः) इत्यत्र गुणस्यादिवद्भावेन प्राप्तामेत्येधतीति वृद्धिमन्तवद्भावेन प्राप्तम् "ओमाङोश्च" इतिपररूपं परत्वाद्बाधते । (इयाय । ईयतुः। ईयुः। इययिथ । इयेथ, इय, इयाय । इयय । ईयिव) किति परत्वाद् द्विर्वचनात्पूर्वम् "इणो यण्" । अकिति तूभाभ्यां परत्वाद्गुणवृद्ध्योरयायौ । एतयोः स्थानिवद्भावाद्यथायोगमेदैतोरिशब्दस्य वा द्विर्वचने किति "दीर्घ इणः किति" इत्यभ्यासस्य दीर्घः । तत्सामर्थ्यादुत्तरखण्डस्य पुनः प्रवर्त्तनाद्यणोऽन्तरङ्गत्वान्न सवर्णदीर्घो नाप्यभ्यासह्रस्वः। अन्यत्रैचोऽभ्यासह्रस्वत्वे "अभ्यासस्यासवर्णे" इतीयङ्,यकारस्य विधानसामर्थ्यान्न हलादिशेषः । क्रादिनियमादिट् । थलि भारद्वाजनियमाद्विकल्पः (एता, एष्यति, एतु, इतात्, । इताम् । यन्तु । इहि, अयानि) 'अवैहि मां किङ्करम्' इत्यत्रानेजादित्वादेतेरेत्येधतीत्यस्याप्रसङ्गाद्वृद्धिरवद्या, न चाङा श्लेषेणैजादित्वाद्वृद्धिः, यतस्तामन्तवद्भावेन "ओमाङोश्च" इति पररूपं बाधत इत्युक्तम् (ऐत् । ऐताम्) "आटश्च" इत्यान्तरतम्यादैकारो वृद्धिः (आयन्) अत्रान्तरङ्गत्वाल्लादेशे ऽन्तिभावे ऽच्परत्वात् "इणो यण्" इत्यस्य "असिद्धवदत्र" इत्यसिद्धत्वात्पश्चादजादित्वेनाडागमः । (ऐहि, आयम्) अत्रापि परत्वाद्गुणायादेशयोराट्याकारो वृद्धिः । (इयात् । इयाताम् । इयाः, इयाम् । इयाव) आशिषि (ईयात्, ईयास्ताम्) "अकृत्सार्वधातुकयोः" इति दीर्घः । (समियात्, समियास्ताम्) इत्यादौ "एतेर्लिङि" इत्युपसर्गात्परस्यैतेरार्द्धधातुके लिङि ह्रस्वत्वम् । (अभायात् प्रेयात्) इत्यादावेकादेशस्य ह्रस्वो न भवति, उपसर्गाभावात्, उपसर्गात्परस्यतिदीर्घस्याभावात् । अन्तादिवद्भावश्चनास्त्युभयाश्रितत्वात् । आ ईयात्, (एयात् । समेयात्) इत्यत्रादिवद्भावा-

देकारस्यैतेर्दीर्घत्वे सम उपसर्गात्परत्वेऽप्यण इति तत्रानुवर्त्तनान्न ह्रस्वः । अण्चेह सामर्थ्यात्पूर्वः, समीयादित्यादिप्रयोगस्तु ई गताविति भौवादिकस्य । (अगात् । अगाताम् । अगुः । अगाः, अगाम् । अगाव) "इणो गा लुङि" इति गादेशः । "गातिस्था" इति सिचो लुक् । "आत" इति "झेर्जुस्" "उस्यपदान्तात्" इति पररूपत्वम् । अत्रात्रेयः-"न माङ्योगे" इत्यत्र ङित्तु माङ्पात्तस्तेनाङित्यपि माशब्दे सार्वकालिको लुङनुमीयत इति 'मा वालिपथमन्वगा' इति, 'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समा' इत्यादावागम उपपन्न इत्याह । तदयुक्तम् । "माङि लुङ्" इति सार्वकालिकलुङो विधावपि ङितो ग्रहणादङिति तस्याभावादनर्थकं स्यात्, तथा च तत्र वृत्तिः । मा भवतु मा भविष्यतीत्यङितो माशब्दस्य प्रयोग इति, किं च "न माङ्योग" इति सानुबन्धकनिर्देशो भूतसामान्ये लुङि लङ्लृङोश्च माशब्दयोगे ऽडागमार्थः स्यादिति नैवापूर्वस्य लुङः कल्पकः स्यात् । 'अथ वा न धर्ममसुबोधसमयमवगात बालिशा' इति माघप्रयोगो "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" इत्यवशब्दान्तलोपे द्रष्टव्यः । कर्मणि । (ईयते । अगायि) इत्यादि, स्यादिषु वा चिण्वद्भावे (आयिष्यते, आयिषाताम् । आयिषीष्ट । आयिता) अन्यदा (एष्यते, अगासाताम्, एषीष्ट, एता) लुङि चिण्वत्पक्षे चिण्वदिटा परेण बाधाद् न गादेशः, सकृद्गतपरिभाषया च न पुनः प्रवर्तते इति केचित्, आत्रेयादयस्तु [वधभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेन] इति वार्त्तिके तद्व्याख्याने भाष्यादौ च वधभावमेवाधिकृत्य विप्रतिषेधकथनाद्गादेशमाहुः । (अगायिषाताम्) इत्यादि, स्यादिषु चिण्वद्भावेन चिणि दृष्टो गादेशो न भवति चिणि दृष्टस्याङ्गाधिकारविहितस्यैव सोऽतिदेश इति, गादेशश्च केवलं चिणि दृष्टो न त्वङ्गाधिकारविहितः । (जिगमिषति,) 'सनि च' इत्यबोधनार्थस्य गम्यादेशः । "गमेरिट् परस्मैपदेषु" इत्यत्रास्यापि ग्रह इति सनः सकारादिप्रत्ययत्वादिडागमः । अयं चेडागम आत्मनेपदेन समानपदस्य नेष्यते, अन्यत्र सर्वत्रेष्यत इति गच्छतावुक्तं, तेन कृत्यामि परस्मपदलुकि च भवति । (जिगमिषिता, जिगमिषांचकार, जिगमिषत्वम्) इति । भावकर्मणोर्लिट्यामि चात्मनेपदाभावादिडेव । (जिगमिषां बभूवे । जिगमिषां चक्रे) देवदत्तेनेति । यत्तु पदशेषकारदर्शनं गम्युपलक्षणार्थं परस्मैपदग्रहणम्, तेन परस्मैपदेषु दृष्टस्य गमेरभावादात्मनेपदे गमिष्यतइतीड्भवतीति तदपि गच्छतावेवं दूषितमितीटात्र न भवितव्यम् । तथा च "अज्झनगमांसनि" इत्यत्र कैयटपदमञ्जर्योः [गमेरिङादेशस्य ग्रहणम्] इति वार्तिके इङ्ग्रहणमिणिकोरप्युपलक्षणं, तेनेणिगादेशस्यापि भावकर्मणोरात्मनेपदइडभावे जिगांस्यत इति दीर्घो भवत्येवेति, अन्ये तु तत्रेङ्ग्रहणं नोपलक्षणमिति दीर्घत्वं नेच्छन्ति, जिगंस्यतइति । यदायं गमिरादेशो ऽकर्मकः संपूर्वश्च (संजिगमिषति) वत्सो मात्रेति तदा "पूर्ववत्सन" इत्यतिदेशेन "समोगम्यृच्छि" इत्यात्मनेपदं स्यादिति न मन्तव्यं, यतः प्रकृतौ दृष्टस्य सनन्तेतिदेशः, इह च सनमन्तरेण नैवास्य प्रयोग, जगुप्सतइत्यादौ तु सनमन्तरेण प्रकृतेरप्रयोगे "अवयवे कृतं लिङ्गं सामर्थ्यात्समुदायस्य विशेषकम्" इत्यात्मनेपदमिति प्रागेवोक्तम् । (गमयति) "णौ गमिरबोधन" इति गमिरादेशः । अमन्तत्वान्मित्त्वे "मितां ह्रस्व" इति ह्रस्वः, बोधने तु नायमादेश इति (प्रत्याययति,प्रतीषिषति)इति भवतः। अजादित्वाद् द्वितीयस्यैकाचः सनो द्विर्वचने अभ्यासस्येत्वे उभयोरपि सकारयोरिण उत्तरत्वेन षत्वं प्रतीषिषन्तीत्यत्र सनूशपोकारयोरेकादेशस्यान्तवद्भावेन पूर्ववत्त्वेन ग्रहणेऽपि "अदभ्यस्तात्" इति नादादेशः । अभ्यस्तादङ्गादुत्तरस्य तद्विधानात् । अत्र हि इकारादिः समुदायो ऽङ्गमिकारवर्जं चाभ्यस्तम् । (उपेयिवान्) "उपेयिवाननाश्वाननूचानश्च" इति लुङ्लङ्लिड्विषयस्य पाक्षिकस्य लिटो नित्यं क्वसुरिट् च निपात्यते । अत्र हि क्रादिनियमात्प्राप्तादिटःपूर्वं नित्यत्वाद् द्विर्वचनमिति हरदत्तादयः । कृतेऽपीटि द्विर्वचनं प्राप्नोत्यकृतेपीति नित्यत्वम् । द्विर्वचने तु नेटः प्राप्तिः "वस्वेकाजात्" इति कृतद्विर्वचनानामेकाचामेव क्रादिनियमादिट् क्वसाविति नियमादस्य च द्विर्व-

त्वनोत्तरकालमनकाचूत्वात्। न च सवर्णदावतत्वनकाचत्त्वं शङ्क्यम्। यत इह वसिति स्थिते सवर्णदीर्घात्परत्वाद्विशेषविहितत्वाच्च "दीर्घ इणः किति" इत्यभ्यासस्य दीर्घेण भाव्यं, तद्विधानसामर्थ्याच्च पुनः सवर्णदीर्घो नैव प्रसजतीत्यनेन च निपातनेन क्रादिनियमात्प्राप्तो "वस्वेकाजात्" इति नियमादप्राप्त इट् प्रतिप्रसूयतइति। (उपेयुष) इत्यादौ भसंज्ञायां "वसोः सम्प्रसारणम्" इति सम्प्रसारणे वलाद्यभावादिण् न भवति। उपोपसर्गग्रहणमतन्त्रं,तेन ईयिवान् समीयिवानित्याद्यपि भवतीति वृत्तिकारादयः, पारायणिकास्तूपसर्गग्रहणस्य प्रयोजनमजन्तस्यान्यस्योपसर्गस्य निवृत्तिरित्याहुः (इत्यः। उपेत्यः) "एतिस्तु" इत्यादिना क्यपि तुक्। उपेत्येत्यत्र "षत्वतुकोरसिद्ध" इत्येकादेशस्यासिद्धत्वाद् ह्रस्वाश्रयस्तुग् भवति। उपेयमिति प्रयोगो भौवादिकस्य दैवादिकस्य वा ऽचो यत्प्रत्ययेन। न अभ्याशो अनभ्याशः, स गन्तव्यो यस्य सो (अनभ्याशमित्यः।) "इत्ये वा नभ्याशस्य" इति मुम्। अत्येतीत्यत्यायः। "श्याद्व्यध" इत्यादिना णः। (अत्ययी,) "जिदृक्षिविश्री" इत्यादिनेनिः। (इत्वरः)। "इण्नशि" इति क्वरप्, (इत्वरी) स्त्रियां "टिड्ढाणञ्" इति ङीप्। (न्यायः,) "परिन्योर्नीणोर्द्यूताभ्रेषयोः" इति घञ्। अभ्रेषः पदार्थानामनपचारः, यथाप्राप्तकरणं, पर्यायः। "परावनुपात्ययइणः" इति घञ्। (अनुपात्ययः) क्रमप्राप्तस्यानतिपातः परिपाटी, अन्यत्र कालपर्यायः, "एरच्," (इत्या)।।"संज्ञायां समज" इत्यादिना स्त्रियां क्यप्। (इति) बाहुलकात् क्तिन्नित्यात्रेयः, (अयनम्, अन्तरयणम्) "अतरदेश" इत्यधिकृत्य "अयनं च" इति णत्वम्, अन्तरउपसर्गत्वात् "कृत्यचः" इति णत्वे सिद्धे वचनमिदं देशप्रतिषेधार्थम्। नीयतेऽनेनेति (न्यायः) "अध्यायन्याय" इति घञ् निपात्यते, "पुंसि संज्ञायां" घापवादः। न्यायादनपेतं (न्याय्यं) "धर्मपथ्यर्थन्यायादनपेते" इति यत्, न्याये भवमपि (न्याय्यं,) दिगादित्वाद्यत्। न्याये भवन्तस्य व्याख्यानं वा (नयायम् ।) ऋगयनादिपाठादणि "नय्वाभ्याम्"इत्यैजागमः। न्यायमधीते वेत्ति वा (नैयायिकः)। उक्थादित्वाठ्ठक् "नय्वाभ्याम्" इत्यैजागमः। (आत्ययिकः, औपयिकः।) अत्ययोपायशब्दाभ्यां "विनयादिभ्यश्च" इति स्वार्थे ठक्। उपायशब्दस्य तु "उपायाद्ध्रस्वत्वं च" इति ह्रस्वत्वमपि। औपयिकशब्दः स्वभावादौचित्ये वर्तते, यथाकथञ्चिदियं व्युत्पत्तिरित्यात्रेयः। 'शिवमौपयिकं गरीयसीम्' इत्यपायमात्रेऽपि प्रयोगो दृश्यते। (प्रातरित्वा) "अन्येभ्योऽपि दृश्यत" इति क्वनिप्। स्त्रियां (प्रातरित्वरी) "वनो र च" इति ङीब्रेफौ। कान्तारमतीतः (कान्तारातीतः)। "द्वितीयाश्रित" इति तत्पुरुषः। दुःखादपेतः (दुःखापेतः) "अपेतापोढ" इति पञ्चमीतत्पुरुषः। (एवम्) "इण्शीभ्यां वन्" इति वन्प्रत्ययः। चादित्वादसत्त्ववचनत्वान्निपातोऽव्ययम्। (क्वेव भोक्ष्यसे)। एवशब्दोऽसम्भावने, न क्वापि भोक्ष्यस इत्यर्थः। [एवे चानियोगे पररूपं वक्तव्यम्] इति पररूपम्। नियोगोऽवधारणम्, अनियोगस्ततोऽन्यः। (समिथोऽग्निः) सङ्ग्रामश्च। "समीण" इति थक्। (आयुः, आयुषी) "एतेर्णिच्च" इत्युसिप्रत्ययः, णित्त्वाद्वृद्धिः। (पुरुषायुषम्, द्व्यायुषम्, त्र्यायुषम्) "अचतुर" इत्यादिना आद्यस्य षष्ठीतत्पुरुषे, इतरयोः समाहारद्वन्द्वेऽच् निपात्यते। तेन समासान्तरे न भवति। पुरुषश्च आयुश्च पुरुषायुषी, द्वयोरायुः, त्रयाणामायुः, द्व्यायुस्त्र्यायुरिति। (आगः) "इण आगोऽपराधे" इत्यसुन्यागादेशोऽपराधे। (एतशः,) चन्द्रादिः, (एतशाः) ब्राह्मणः। "इणस्तशन्तशसुनौ" इति तशन्तशसुनौ। (इभः) "इणः कित्" इति भन्प्रत्ययः। कित्त्वान्न गुणः। इभमर्हति (इभ्यः)। दण्डादित्वाद्यत्। (एकः) "इण्भी" इत्यादिना कन्। सङ्ख्यायामेकवचनान्तः। मुख्याद्यौ त्वभिधेयवचनः, अयं सर्वनामा। तत्कार्याणि जसि विभाषां वर्जयित्वा पूर्वशब्दवदिहाप्युन्नेयानि, त्यच्छब्दवत्त्यदादिकार्याणि च। 'भवन्त्यनेके जलधेरिवोर्मयः' इत्यत्र तत्पुरुषस्योत्तरपदार्थप्रधानत्वात् उत्तरपदस्य च तत्सङ्ख्यावाचित्वेन एकवचनान्तत्वाद्बहुवचनमनुपपन्नमिति 'सेव्यतेऽनेकया सन्नतापाङ्गया' इतिवदेकवचनेन भाव्यम्। अथैक-

शब्दस्य "द्व्येकयोः", इत्यादिवत् वृत्तौ भावप्रधानत्वाद् न विद्यते एकत्वमेषामिति बहुव्रीहिणा 'उद्यतैर्निभृतमेकमनेकैः' इतिवद्बहुवचनोपपत्तिः। सिध्यति बहुवचनम्, "न बहुव्रीहौ" इति निषेधात्सर्वनामकार्यं शीभावो न सिध्यति। अथ वा एवं समर्थनीयः, एकशब्दोऽसहायवचनः, अनेके सहाया इत्यर्थः। तथा च योगपातञ्जले। 'एकं चित्तमनेकेषाम्' इति प्रयुज्यते। (ऐक्यम्) ब्राह्मणादिपाठात् ष्यञ्। (एकतरः, एकतमः) सर्वनामनी, "एकाच्च प्राचाम्" इति द्वयोर्बहूनां च एकस्य निर्धारणे क्रमेण डतरज्डतमचौ विकल्पेन। नपुंसके स्वमोः "अद्ड्डतरादिभ्यः पञ्चभ्यः" इत्यदडादेशे अमोऽपवादे डित्त्वाट्टिलोपे एकतमदिति भवति। 'एकतरशब्दात्त्वदडादेशो नेष्यते' इति भाष्यउक्तम्। (एकाकी, एककः, एकः) "एकादाकिनिच्चासहाये" इत्यसहायार्थादेकशब्दात् स्वार्थे कनाकिनिचौ आकिनिचश्च पक्षे लुक्। (सकृद्भुङ्क्ते।) "एकस्य सकृच्च" इति क्रियागणने सकृदादेशः, सुच्प्रत्ययश्च, चकारस्स्वरार्थः, उकार उच्चारणार्थः, सकारस्य संयोगान्तलोपः। स्वरादित्वादव्ययत्वात्सुपो लुक्। (एकधा) भुङ्क्ते। *सङ्ख्याया विधार्थे धाप्रत्ययः* विधा प्रकारः, सामान्यस्य भेदको विशेषः। अनिर्धारितसङ्ख्यस्य भोजनादेः एकत्वादिलक्षणे प्रकारे वर्त्तमानादेकादेशशब्दात्स्वार्थे धेति सूत्रार्थः। अनेकमेकधा करोति। "अधिकरणविचाले च" इति धा स्वार्थे। अधिकरणं द्रव्यं, तस्य सङ्ख्यान्तरापादनमधिकरणविचालः, स चैकस्यानेकीकरणम्, अनेकस्यैकीकरणम्। (ऐकध्यं) भुङ्क्ते करोति वा। "एकाद्धो ध्यमुञन्यतरस्याम्" इति ध्यमुञादेशः। (एकशो) ददाति, एकैकं एकैस्मै वा ददातीत्यर्थः। *"सङ्ख्यैकवचनाच्च वीप्सायाम्"* इति शस्। अत्रैकवचनग्रहणं नियतपरिमाणानां प्रस्थादीनां ग्रहणार्थम्। कारकरूपार्थाभिधायिनः सङ्ख्यैकवचनाद् वीप्सायां गम्यमानायां वा शसिति सूत्रार्थः। कारकग्रहणाद् एकैकस्य स्वमिति विवक्षायां शस् न भवति। "नित्यवीप्सयोः" इति द्विर्वचनं शसि न भवति, वीप्सायाः शसैवोक्तत्वादिति "सर्वस्य द्वे" इत्यत्र भाष्यादौ स्थितम्। (ऐकस्यम्) शसन्ताद् ब्राह्मणादित्वाद् ष्यञ्। [अव्ययानां भमात्रे] इति टिलोपः। 'एकैकशः पितृसंयुक्तानि' इत्यत्र शसः प्रायश इत्यादिवद् अत्यन्तस्वार्थिकत्वाद् वीप्साया अनभिधानाद् द्विर्वचनम्। तथा च "सर्वस्य द्वे" इत्यत्र भाष्यम्। 'यत्र च तद्धितेनानुक्ता वीप्सा भवति तत्र द्विर्वचनम्, तद्यथा एकैकशो ददाति' इति। इदमेव भाष्यमत्यन्तस्य स्वार्थिकस्य शसो मूलम्। यत्र द्विर्वचनं तत्र "एकम्बहुव्रीहिवत्" इति बहुव्रीहिवद्भावात्सुपो लुक्। एकान्नविंशतिः। एकेन न विंशतिरिति "तृतीया" इति योगविभागात्समासः। "एकादिश्चैकस्य चादुक्" इत्येकशब्दात्परस्य नञः प्रकृतिभावः, एकस्य चादुगागमः। एकस्या भावः एकत्वम्, एकस्याः क्षीरं एकक्षीरम्। "एकतद्धिते च" इति तद्धिते उत्तरपदे च परे ह्रस्वः स्त्रीप्रत्ययस्य। 'लिङ्गविशिष्टग्रहणं एकशब्दस्य ह्रस्वत्वं प्रयोजयति' इति वृत्तिः। (एकैकं भोजयति) "नित्यवीप्सयोः" इति द्विर्वचने "एकं बहुव्रीहिवत्" इति बहुव्रीहिवद्भावात्सुपो लुकि चित्रगुरित्यादिवत् पुनस्समासात्सुबुत्पत्तिः। "न बहुव्रीहौ" इति सर्वनामसंज्ञानिषेधोऽस्य न भवति, तत्र बहुव्रीहाविति वर्तमाने पुनर्बहुव्रीहिग्रहणं मुख्यबहुव्रीहिपरिग्रहार्थमित्युक्तत्वात्, अयं चातिदेशिको गौणो बहुव्रीहिः। बहुव्रीहिवद्भावाद् 'एकैकामाहुतिं जुहोति' इत्यत्र "स्त्रियाः पुंवद्" इत्युत्तरपदनिबन्धनः पुंवद्भावो भवति। ननु सत्यसति वा पुंवद्भावे को विशेषः, यस्मादुभयथापि वृद्धिर्भविष्यति। सत्यम्, अवग्रहे त्वस्ति विशेषः। (एकदा) "सर्वैक" इति दाप्रत्ययः। (एकपुरुषः)। "पूर्वकाल" इति समासः। पञ्चाम्राः, पूर्वेषुकामशमी, इत्यादौ "विशेषणं विशेष्येण" इति समासे सिद्धे "दिक्सङ्ख्ये संज्ञायाम्" इति पुनर्विधानात् संज्ञया अन्यत्र दिक्सङ्ख्योः विशेषणसमासाभावाद् एकशब्दस्य समासवचनम्। अत एव एकवीर इत्यत्र "पूर्वकाल" इत्यस्मात्परत्वात् "पूर्वापरप्रथम" इत्यनेन समासेन भाव्यम्; ततश्च वीरशब्दस्य प्रथमानिर्दिष्टत्वादुपसर्जनत्वात्पूर्वनिपातः स्यादिति चोद्यमपि

निराकृतम् । तस्य त्ववकाशो वीरपुरुषादिः । (एतत्) "एतेस्तुट् च" इत्यदिप्रत्ययस्तुडागमश्च । एष करोतीति, "त्यदादीनाम" इति विभक्तावत्वे "तदोस्ससौ" इति सौ तकारस्य सत्वे तस्य च षत्वे सोः "एतत्तदोस्सुलोपो ऽकोरनञ्समासे हलि" इति लोपः । अकोरिति वचनाद् एषकः करोतीति साकच्के सुलोपो न भवति । अनञिति वचनाद् अनेषः करोतीत्यत्रापि न सुलोपः । अत्र अनञ्समासे इति प्रतिषेधादेव तदन्तस्यापि ग्रह इति परमैष करोतीत्यत्रापि सुलोपः । त्यदाद्यत्वे "तदोस्सस्सावनन्त्ययोः" इति सत्वे च, त्यदादिप्राधान्ये तदन्तेपीष्येते; यदा त्वप्राधान्यं तदा न भवतः, अत्येतद्देवदत्त इति । नपुंसके सोर्लुका लुप्तत्वादपि न भवतः । अमो लुका लुप्तत्वादपि नात्वम् । एषेत्यादौ विभक्तिनैरन्तर्येण भवदप्यत्वं "भस्त्रैषा" इत्यादिनिर्देशात्तद्विघातस्य टापो निमित्तं भवति । (एषका, एषिका) अकच्पक्षे "भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि" इति कात्पूर्वस्याकारस्य "प्रत्ययस्थाद्" इति प्राप्तमित्वं पक्षे निषिध्यते । यद्यप्यत्र नञ्पूर्वाणामपीत्यपिशब्देन केवलानामन्यपूर्वाणां चार्य निषेध उक्तः । तथाप्येषाद्वे समस्ते न प्रेजयतः यतस्समासार्थायां विभक्तौ न त्यदाद्यत्वम्, 'अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते' इति । तेन समासाद्विभक्तावत्वे टापा भाव्यम् । स चान्तर्वर्तिन्या विभक्त्या प्रत्ययलक्षणेन सुबन्तात्पर इति "प्रत्ययस्थात्" इतीत्वस्यासुप इति निषेधादप्रसङ्गात् किं तन्निषेधेन । त्यदादिकार्यं त्यच्छब्दवत् । एतत्परिमाणमस्य (एतावान्,) "यत्तदेतेभ्यः परिमाणे वतुप्" इति परिमाणिनि वतुप् "आ सर्वनाम्नः" इत्यात्वम् । "अत्वसन्तस्य" इत्यसम्बुद्धौ सावुपधादीर्घत्वे नुमि हल्ङ्यादिसंयोगान्तलोपौ । (अतः, अत्र) "एतदोश्" इति प्राग्दिशीयेऽशादेशः । अत्र एतद इति योगविभागः, तत्र "एतेतौ रथोः" इत्यनुवृत्त्या रेफथकाराद्योः प्रत्यययोः,यथासङ्ख्यमेत इत इत्येतावादेशौ भवतः, (एतर्हि इत्थमिति) तत्र र्हिल् "अनद्यतने र्हिलन्यतरस्याम्" इति सिद्धस्थादिस् पसङ्ख्येयः । अत्र भुङ्क्ष्व, अथोऽत्राधीष्व, इत्यादौ अन्वादेशेऽपि "एतदोश्" इति सामान्येनवाशादेशे सिद्धे "एतदस्त्रतसोस्त्रतसौ चानुदात्तौ" इति वचनं त्रतसोरनुदात्तत्वार्थम् । (एनम्, एनौ, एनान्, एनेन, एनयोः) "द्वितीयाटौस्स्वेनः" इतीदमेतदोरन्वादेशविषययोरेनादेशः । नपुंसकैकवचने त्वेनादितीष्यते । (एतः) वर्णः । "हसिमृग्रिण्वामि" इति तन्प्रत्ययः (एनी) "वर्णादनुदात्तात्तोपधातो न" इत्यनुदात्तान्ततोपधवर्णवाचित्वात् स्त्रियां ङीप्, तकारस्य च नः । (इनः) "इण्सी" इत्यादिना नक् । (दूरं,) "दुरीणो लोपश्च" इति दुर्युपपदे रक्, इणश्च लोपे, "रोरि" लोपे "ढ्रलोपे" इति दीर्घः (दविष्ठः, दवीयान्, दवयति,) "स्थूलदूर" इत्यादिना णाविष्ठवदिति च यणादिपरस्य लोपो गुणश्च । 'दूरयत्यवनते विवस्वती' इति प्रयोगस्तु चिन्त्यः ॥ ३६ ॥

इङ् अध्ययने ॥ नित्यमधिपूर्वः । (अधीते, अधीयाते, अधीयते, अधीषे, अधीये, । अधीवहे,) क्ङित्यजादावियङ् । 'रामादधीतसंदेश' इति भट्टिप्रयोगे पञ्चमी चिन्त्या, "आख्यातोपयोगे" इत्याख्यातुः प्रतिपादयितुरपादानत्वं ,यस्मादुपयोग एव, उपयोगश्च नियमपूर्वकं विद्याग्रहणम्, तच्च उपाध्यायादधीते इत्यादावेव सम्भवति । (अधिजगे, अधिजगाते, अधिजगिषे, अधिजगे, अधिजगिवहे,) "गाङ् लिटि" इति गाङादेशः । क्रादिनियमादिट् । "आतो लोप इटि च" इत्याल्लोपः । तस्य स्थानिवद्भावाद द्विर्वचनम् । गाशब्दस्य तु न स्थानिवत्त्वम्, "गाङ् लिटि" इति द्विलकारकनिर्देशाद् लावस्थायामेव तद्विर्वचननिमित्ताज्निमित्तत्वाभावात् । (अध्येता । अध्येष्यते । अधीताम्, अधीयाताम्, अधीष्व, अध्यै, अध्यावहै) आटि गुणाययोरुपसर्गस्य यणादेशः । पूर्वं धातोरुपसर्गेण योगेऽपि गुणात्पूर्वमन्तरङ्गत्वेन सवर्णदीर्घो न भवति, 'वार्णादाङ्गं बलीय' इति गुणस्य बलीयस्त्वात् । अथ वा "प्रत्ययः" "णेरध्ययने वृत्तम्" इत्यादिनिर्देशान्न भविष्यति । (अध्यैत, अध्यैयाताम्, अध्यैयत) ह्रस्यादादेशः । (अध्यैथाः, अध्यैयि, अध्यैवहि,) अजादौ परत्वादियङि

पश्चादाटि वृद्धौ उपसर्गस्य यणादेशः । ज्ञापितं च "घुमास्था" इत्यत्र हल्ग्रहणेन विप्रतिषेधे प्राप्ते "असिद्धवदत्र" इत्यसिद्धत्वं नेति । (अधीयीत, अधीयाताम्, अधीयीथाः, अधीयीध्वम्, अधीयीय, अधीयावहि,) धातोरियङ्युपसर्गेण सवर्णदीर्घः । आशिषि (अध्येषीष्ट, अध्येषीयास्ताम्, अध्येषीष्ठाः, अध्येषीढ्वम्,) इणः परत्वान्मूर्धन्यः । (अध्येषीय,) धातोर्गुणः, उपसर्गस्य यण्। (अध्यगीष्ट, अध्यगीषाताम्, अध्यगीष्ठाः, अध्यगीढ्वम्, अध्यगीषि) "विभाषा लुङ्लृङोः" इति पक्षे गाङादेशः। "गाङ्कुटादिभ्योऽञ्णिन्ङित्" इत्यञ्णितः प्रत्ययस्य ङित्वातिदेशाद् "घुमास्था" इतीत्वम् । गाङभावे, (अध्यैष्ट, अध्यैषाताम्, अध्यैष्ठाः, अध्यैढ्वम्, अध्यैषि, अध्यैष्वहि,) आटि वृद्धौ उपसर्गस्य यणादेशः। (अध्यगीष्यत, अध्यगीष्येताम्, अध्यगीष्यन्त अध्यगीष्यथाः, अध्यगीष्यध्वम्, अध्यगीष्ये, अध्यगीष्यावहि) पूर्ववद्गाङ्विकल्पः। गाङभावे (अध्यैष्यत) इत्यादयः। (अधिजिगांसते) "इङश्च"इति सनि गमिरादेशः। "अज्झनगमां सनि" इति दीर्घः। "पूर्ववत्सन" इति तङ् । नायमादिष्टो गमिः सनः प्रकृतिः पृथगात्मनेपदी दृष्ट इति कथं "पूर्ववद्" इत्यतिदेशेन तङिति न भ्रमितव्यम्; यस्मात्प्रत्ययविशेषोपादाने "आर्धधातुके" इतीयं परसप्तमीत्युक्तम् । तेनेङः सनि परे पश्चाद्गमिरादेश इतीङेव सनः प्रकृतिः,स च पृथगात्मनेपदी दृष्टः स एव तङ्निमित्तमिति तङ्सिद्धेः । "गमेरिट् परस्मैपदेषु" इतीण्निषेधः । अयं च निषेध आत्मनेपदेन समानपदस्थस्येति कृति चेड्भवत्येव (अधिजिगमिषांचक्रे, अधिजिगमिषिता, अधिजिगमिषा,) इति । (अध्यापयति) "क्रीङ्जीनांणौ" इत्यात्वे पुक् । "बुधयुध" इत्यादिना क्रियाफलस्य कर्तृगामित्वेऽपि परस्मैपदम् । (अध्यजीगपत्) "णौ च संश्चङोः" इति सन्परे चङ्परे णौ गाङादेशविकल्पः । किं णौ चङि ह्रस्वे द्वित्वे ऽभ्यासस्य सन्वदित्वे "दीर्घो लघोः" इति दीर्घः, आदेशाभावे, (अध्यापिपत्) पूर्ववदात्वतुकोश्चङि ह्रस्वे णिलोपे "द्विर्वचनेऽचि" इति तस्य स्थानिवत्त्वाद् "अजादेर्द्वितीयस्य"इति पिशब्दस्य द्विर्वचनम् । एवं सन्परेऽपि (अधिजिगापयिषति, अध्यापिपयिषति) सनस्सेट्त्वात् न णिलोप इति गुणायौ । (अध्याप्य) इत्यत्र "विभाषाऽऽपः" इत्यापः परस्य ल्यपि विधीयमानोऽयादेशो न भवति । अस्याप्रूपस्य लाक्षणिकत्वात् । (अधीत्य) सवर्णदीर्घस्य षत्वतुकोरसिद्धत्वाद् ह्रस्वनिबन्धनस्तुक् । अधीतमनेन (अधीती व्याकरणे,) व्याकरणमधीतवानित्यर्थः । "इष्टादिभ्यश्च" इति प्रथमासमर्थाद् अनेनेति कर्त्रर्थे इनिः । "क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानम्" इति कर्मणि सप्तमी । रात्रिरधीता अहरधीतमित्यत्र कालाध्वनोः कर्मवद्भावार्थमिति काले कर्मणि निष्ठा इति "कालाध्वनोः" इत्यत्र भाष्यम् । (अधीयन्) पारायणम् । अक्लेशेनाधीयान इत्यर्थः । "इङ्धार्योः शत्रकृच्छ्रिणि" इति कर्तरि शता । "न लोकाव्यय" इत्यत्र तृन् इति प्रत्याहारग्रहणात् कर्मणि कृद्योगलक्षणा षष्ठी न भवति। उगित्त्वात् स्त्रियाम् (अधीयती) (अधीयान) इत्यत्र लट्स्थानिकस्य शानचो ऽकृच्छ्रविषयेणानेन शत्रा भिन्नविषयत्वान्न बाधः । (अध्यायः) "इङश्च" इत्यकर्तरि कारके भावे च घञ् । उपेत्यास्मादधीयतइत्युपाध्यायः, पूर्ववद्घञ् । (उपाध्याया, उपाध्यायी) अत्र स्त्रियां क्तिनाऽस्य घञो न बाधः, [अपादाने स्त्रियामुपसङ्ख्यानं तदन्ताच्च वा ङीष्] इति वचनात् । पुंयोगङीषि तु "उपाध्यायमातुलाभ्यां वा" इति पक्षे आनुगपि भवति, (उपाध्यायी, उपाध्यायानी) इति अधीयते ऽत्रेति (अत्यध्यायः) पुंसि संज्ञायां घम्बाधित्वा "ध्यायन्याय" इति घञ् निपात्यते। (सौवाध्यायिकः) "प्रयोजनम्" इति ठक्। "नय्वाभ्याम्" इत्यैच्, वृद्ध्यभावश्च । के चिदत्र ऐजागमार्थं द्वारादौ स्वाध्यायशब्दं पठन्ति, तदनर्थकम् । यद्यत्र शोभनो ऽध्यायः स्वाध्याय इति व्युत्पत्तिस्तदा "नय्वाभ्याम्" इत्यैच् सिद्धः, अथ स्वशब्देन समासः, तदापि द्वारादिषु स्वशब्दस्य पाठात् तदादेरपि तत्र ग्रहणात् सौवग्रामिकादिवदैचस्सिद्धिः । कठश्चासावध्यापकश्च कठाध्यापकः, "पोटायुवति" इत्यादिना समासः । आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैस्सह ॥

इति चरणस्य जातित्वम् । चरणशब्दश्च शाखाध्यायिषु रूढः । ब्राह्मणस्याऽध्यापको (ब्राह्मणाध्यापकः)। ण्यन्ताद् ण्वुल्, याजकादित्वाद् अकेनापि षष्ठीसमासः। "एतिस्तु" इति क्यब्विधौ नित्यमधिपूर्वत्वादस्यैतिग्रहणेन न ग्रहः। तथा च भाष्ये 'अध्येयं व्याकरणम्' इति यदन्तो निर्दिश्यते ॥ ३६ ॥

इक् स्मरणे ॥ अयमप्यधिपूर्वः। मातुरध्येति मातरमध्येति, "अधीगर्थ" इति कर्मणश्शेषत्वेन षष्ठी। धातोः ककारो ऽन्त्रेगिति विशेषणार्थः। (अधीतः, अधीयन्ति) इत्यादि सर्वमिण्वत्। "इण्वदिक" इति वचनाद् "इणो यण्" "इणो गा लुङि" इत्यस्यापि भवति। आत्रेयस्तु यणमुक्त्वा के चित्तु "इणो गा लुङि" इत्यतिदेशकार्या(१)र्थमेव, "इण्वदिक" इत्यतिदेशमिच्छन्ति, तन्मते इयङि अधीयन्तीति पक्षान्तरमप्याह। "इणो यण्" इत्यत्र न्यासे च पक्षद्वयं दर्शितम्। "गकारोच्चारणं इङिकोर्निवृत्त्यर्थम्। ये तु "इण्वदिकः" इति सामान्येनातिदेशमिच्छन्ति तेषामिङ एव निवृत्त्यर्थम्। इकस्तु भवितव्यमेव यणा इति। मैत्रेयस्तु इयङमेवोदाहृत्य, केचित्तु यणादेशमिच्छन्ति' इत्याह। हरदत्तस्तु इयङादेशं न सहते। "इण्वदिकः" इत्युपादाय यदाह। 'यद्यस्यैवायं प्रकरणस्य शेषः स्यात्, "इणिकोर्गा लुङि" इति सूत्रन्यासः कर्तव्य इत्येवावक्ष्यत्। एतश्च खलु पृथगिण्वदिक इत्याह, ततो मन्यामहे सर्वशास्त्रस्य शेषोऽयम्' इति। एवं च 'ससीतयो राघवयोरधीयन्' इति भट्टिप्रयोगश्चिन्त्यः। "णौ गमिरबोधने" "सनि च" इत्यबोधने विधीयमानो गम्यादेशोऽस्यापि भवति, यतस्तत्र बोधनशब्देनानुभवरूपं ज्ञानं गृह्यते, न च स्मृतिरनुभवः, अत एव वृत्तौ अधिगमयति, अधिजिगमिषति, इति गम्यादेश उदाहृतः ॥ ३७ ॥

वी गतिप्रजनकान्त्यसनखादनेषु ॥ जनो जन्म,(२) प्रजनो जन्मन उपक्रमो गर्भग्रहणम्। (वेति, वीतः, वियन्ति, वेषि, वेमि, वीवः,) अजादावगुणवृद्धिविषये इयङ्। (विवाय, विव्यतुः, विव्युः, विवयिथ, विवेथ, विव्यथुः, विव्य, विवाय, विवय) पिद्वचनेषु वृद्धिगुणायायां स्थानिवत्त्वे वीशब्दस्य द्विर्वचनम् आययोरेव वा स्थानिवत्त्वे वैशब्दस्य वेशब्दस्य वा। अपिद्वचनेषु इयङः स्थानिवत्त्वात् विशब्दस्य द्विवचने पुनरुक्तखण्डस्य प्रवर्तमानमियङं बाधित्वा ऽनेकाच्त्वाद् यणादेशः। 'कटि गतौ' इत्यत्रायमर्थः प्रपञ्चितः। (वेता। वेष्यति। वेतु, वीतां, वियन्तु, वीहि) हेरपित्त्वात् ङित्त्वान्न गुणः। (वयानि, वयाव,) इयङं बाधित्वा परत्वाद्गुणः। (अवेत्, अवीताम्, अवियन्, अवेः, अवयम्, अवीव,) अडागमात्प्रागपि वर्तमानं प्रकृत्यनेकाच्त्वमाश्रित्य अजादौ क्ङिति "एरनेकाच" इति यणादेश इत्यात्रेयः। अन्ये तु परत्वादियङमेवाहुः। "असिद्धवदत्र" इति 'असिद्धत्वं विप्रतिषेधविषयेन' इति "घुमास्था" इत्यत्र हल्ग्रहणेन ज्ञापितम्। (वीयात्, वीयातां, वीयुः) आशिषि (वीयात्, वीयास्ताम्। अवैषीत्। अवैष्टाम्, अवैषीः, अवैषम्। विवीषति) "इको झल्" इति किस्त्वान्न गुणः। (वेवीयते, वेवेति, वेवयीति, वेवीतः, वेव्यति) णिचि (वाययति, अवीवयत्)। प्रजनार्थत्वे तु "प्रजने वीयतेः" इति णौ विभाषया आत्वे पुकि, पुरो वातो गाः (प्रवापयति) इति॥ पुरोवातो गर्भं ग्राहयतीत्यर्थः। कर्मणि वीयते इत्यादि। (वीत्वा वीतः। वेत्रम्।) "गुध्वी" इत्यादिना त्रप्रत्ययः (वेत्रकीयम्) "नडादीनां कुक्च" इति चातुरर्थिकश्छः, कुगागमश्च। अत्र प्रश्लिष्टनिर्देशाद् 'ई' इत्यपि धातुमाहुः,(३) (एति ईतः, इयन्ति। ईयात्, ईयाताम्। ऐषित्) इत्यादिसिद्ध्यर्थम् ॥ ३८ ॥

---

(१) अधिकारकार्यार्थमिति बहुषु पुस्तकेषु पाठः।

(२) जननं जन इति पाठो बहुषु पुस्तकेषु।

(३) ई गतिव्याप्तिप्रजनकान्त्यसनखादने तु वर्तते इत्यर्थ इत्यधिकं पुस्तकान्तरे।

या प्रापणे ॥ प्रापणमिह गतिः । (याति । प्रणियाति) । "नेर्गद" इति णत्वम् । (यातः, यान्ति, यासि, यामि । ययौ, ययतुः, ययुः, ययाथ ययिथ, यय, ययौ, ययिव,) क्रादिनियमादिट् । थलि भारद्वाजनियमादिड्विकल्पः । (याता । यास्यति । यातु, यातात्, यातां, यान्तु, याहि, यानि,) *लङश्शाकटायनस्यैव* इत्याकारान्ताल्लङः शाकटायनमतेन विधीयमानो जुस्भावो लोटो लङ्वद्भावेन न भवति, तत्रानुवर्तमानेन ङित इत्यनेनैव आकारान्तात्परस्य लङोऽन्यस्य झेरसम्भवाद् लङ्विषयत्वे सिद्धे पुनर्लङ्ग्रहणस्य मुख्यलङ्ग्रहणार्थत्वात् । (अयात्, अयाताम्, अयुः, अयान्, अयाः, अयातम्, अयाम्,) "लङश्शाकटायनस्यैव"इति या झेर्जुस्भावः । (यायात्, यायाताम्) इत्यादि । यायुरित्यस्यानभिधानादप्रयोग इति केचिदित्यात्रेयः । आशिषि, (यायात्, यायास्तां, यायासुः । अयासीत्, अयासीः, अयासिषम्,) "यमरमनमाताम्" इति सगिटौ । (यान्ती । याती,) शत्रन्तात् शीनद्योः परयोः "आच्छीनद्योर्नुम्" इति नुम्विकल्पः । (यियासति) । "नित्यं कौटिल्ये गतौ" इति यङ्, (यायेति, यायाति, यायीतः, यायति) हलादौ ङ्किति सार्वधातुके "ई हल्यघोः" इतीत्वम् । अजादौ "श्नाभ्यस्तयोः" इत्याल्लोपः । (यापयति । अयीयपत् । यायावरः ।) "यश्च यङः" इति यङन्ताद्यातेर्वरच् । अत्र चकारः पुनर्वरज्विधानार्थं इत्यकौटिल्येऽपि यङनुमीयते । एवं हि पुनर्विधानमुपपद्यते । अत्र वरच्यतो लोपे यलोपे च "अचः परस्मिन्पूर्वविधौ" इत्यल्लोपस्य स्थानिवत्त्वम् "न पदान्त" इत्यादिना निषिध्यत इति "आतो लोप इटि च" इत्याल्लोपो न भवति । शुभं यातीति (शुभंयाः) । क्विप् । (शुभंयौ) । "नादिचि" "दीर्घाज्जसि च" इति पूर्वसवर्णदीर्घनिषेधाद् "वृद्धिरेचि" इति वृद्धिः । (शुभंयाः) । शसादौ भसंज्ञायाम् "आतो धातोः" इत्याल्लोपे (शुभंयः) इत्यादि । नपुंसके तु ह्रस्वत्वे (शुभंयम्) इत्यादि। चतुर्थ्येकवचने तु "ङेर्यः" इति यकारे "सुपि च" इति दीर्घे तस्य च धात्वाकारत्वाद् "आतो धातोः" इत्याल्लोपे "हलो यमाम्" इति पूर्वयकारस्य वा लोपे शुभंय इति भवति । न चाल्लोपस्य स्थानिवत्त्वम्, पूर्वत्रासिद्धीयत्वात्, यलोपविधित्वाद्वा । यदा तु "हलो यमाम्" इति लोपो न भवति; तदा द्वियकारक उच्चार्यः । (शुभंयिका) । कप्रत्यये "केऽण" इति ह्रस्वे "प्रत्ययस्थाद्" इतीत्वम् । "उदीचामातःस्थाने यकपूर्वायाः" इति यकारककारपूर्वस्याकारस्थानिकस्याकारस्य विधीयमानः पाक्षिक इत्त्वनिषेधोऽत्र न भवति । यकपूर्वाया इति स्त्रीलिङ्गनिर्देशेन स्त्रीप्रत्ययस्य, अतस्तत्र ग्रहणात् । (ययातिः) । क्तिनि बाहुलकाद् द्विर्वचनमित्यात्रेयः । "ई हल्यघोः" इतीत्वमपि बहुलवचनादेव नेति तदभिप्रायः । यङ्लुगन्ताद्वा क्तिचि 'संज्ञापूर्वको विधिरनित्य'इति "दीर्घोऽकित" इत्यभ्यासस्य दीर्घत्वम् "ई हल्यघोः" इत्यभ्यस्तेत्त्वं च न भवति । (यात्रा,) "हुयामाश्रुवसिभसिभ्यस्त्रन्" इति त्रन् स्वभावात्स्त्रीविषयः । 'ष्ट्रन्' इति ष्ट्रनैव सिद्धे त्रन्विधानं ङीब्निवृत्त्यर्थम् । (ययुः) । "यो द्वे च" इत्युप्रत्ययो द्वित्वं च किद्वद्भावादाल्लोपः । (मृगयुः) व्याधः, (देवयुः) धार्मिकः, (केवलयुः) मानी, (ग्रहयुः) ग्रहपतिः, (मित्रयुः) मित्रवत्सलः, ऋषिश्च, (मन्त्रयुः) मन्त्री, (अध्वर्युः,) ऋत्विग्विशेषः । "मृगय्वादयश्च" इति मृगादिषूपपदेषु कुप्रत्यये निपात्यन्ते । अध्वरशब्दस्य अन्तलोपश्च । अध्वर्योर्भावकर्मणी (आध्वर्यवम्) । उद्गात्रादित्वादञ् । (यातुः) । रक्षःपर्यायः तुनि पारायणे व्युत्पादितः । (यामः) । "अर्तिस्तु" इत्यादिना मन् ॥ ३९ ॥

वा गतिगन्धनयोः ॥ (वाति) इत्यादि यातिवत् । (वाजयति) । "वो विधूनने जुक्"इति णौ जुक् । विधूननं कम्पनम्; अन्यत्र पुगेव, (वापयति) इति । (निर्वाणः) । "निर्वाणोऽवाते" इति धात्वर्थस्य अवाताधिकरणत्वे निष्ठानत्वं निपात्यते । वाते तु निर्वातो वातः, निर्वातं वातेन इति नत्वं न भवति । आद्युदात्तो वातशब्दो "हसिमृग्रिण्वाम्" इति तनि द्रष्टव्यः । वातानां समूहो (वात्या) । "पाशादिभ्यो य" इति यः । (वातूलः) "वाता-

तसमूहे च" इत्यूलच् । च शब्दादयं न सहत इत्यर्थोऽपि । (वातवान् , वातूलः,) सिध्मादिषु 'वातदन्तबललललाटानामूङ् च' इति पाठाल्लचि ऊङ् चागमः । "यस्य" इति लोपः। वातरोगी, (वातकी) "वातातिसाराभ्यां कुक्च" इति मत्वर्थे इनिः, कुगागमश्च । वातस्य शमनं कोपनं वा वातिकं, तस्य निमित्तप्रकरणे [वातपित्तश्लेष्मभ्यश्शमनकोपनयोरुपसङ्ख्यानम्] इति ठक् । (वायुः) "कृपावाजी" इत्युणि युगागमः । वायुर्देवताऽस्य (वायव्यम्)। "वाय्वृतुपित्रुषसो यत्" इति यत् । ओर्गुणे "वान्तो यि" इत्यवादेशः । "ह्वावामश्च" इत्यत्र अकर्मकत्वात् अस्याग्रह इति न्यासे; तत्पाशादौ 'वाता वान्ति दिशो दश' इति भाष्ये सकर्मकस्य दर्शनादयुक्तम् । तथा च भट्टभास्करोऽपि 'असन्मृष्टो जायसे मातृवोः, इत्यत्र मातृवोः मातापितृभावं वान्त्योरिति सकर्मकत्वमाह । एवं च "ह्वावामश्च" इत्यत्र 'ह्वयतिना सानुबन्धकेन साहचर्याद् अकर्मकत्वाच्च वा गतिगन्धनयोः मा माने इत्येतयोरग्रहणम् , इति हरदत्तेन अकर्मकत्वस्य हेतोः कथनमन्यमताभिप्रायं द्रष्टव्यम् । शोषणे वायति । तन्तुसन्ताने वयतीति शपि गतम् ॥ ४० ॥

भा दीप्तौ । (भाति) इत्यादि यातिवत् । (व्यतिभाते) । त्रिष्वपि वचनेषु समानं रूपम् , झस्यादादेशः । (व्यतिभासे, व्यतिभै) । इट एत्वे वृद्धिः । केचित्तु "आतो लोप इटि च" इत्यत्रास्यापीटो ग्रहणमिति आल्लोपमिच्छन्ति तन्न, तत्रार्धधातुकाधिकारादागमस्यैवेटो ग्रहणमिति स्थितेः । आगमश्च इडार्धधातुकभक्तत्वादार्धधातुकः । (भा) "डोऽन्यत्रापि दृश्यते" इति डः । (भाः) "सम्पृचादि" इत्यादिना क्विप् । भसंज्ञायाम् "आतो धातोः"इत्याल्लोपे (भ) इत्यादि । 'करकमलैः पुनरुक्तरक्तभाभिः'इति प्रयोगः सान्तस्य भाश्शब्दस्य रुत्वे "भोभगो" इति यत्वे "हलि सर्वेषाम्" इति लोपे द्रष्टव्यः । (प्रतिभा, प्रभा) । "आतश्चोपसर्गे" इत्यङ् स्त्रियां भावे । प्रतिभैव (प्रातिभम्) । प्रज्ञादित्वात्स्वार्थेऽण् । (निभः) स्तुल्यः । "आतश्चोपसर्गे" इति कर्तरि कः । (प्रभानम् , प्रभापनम्) । "न भाभूपूकमिगमि" इत्यादिना "ण्यन्तानां च भादीनामुपसङ्ख्यानम्" इति च णत्वनिषेधः । अयं च निषेधः "कृत्यचः" इति प्राप्तस्येति लोटि प्रभाणि प्रभावयाणि इत्यत्र "आनि लोट्" इति णत्वं भवत्येव । (भानुः) । "दाभाभ्यां नुः" इति नुः ॥ ४१ ॥

ष्णा शौचे ॥ (स्नाति । सस्नौ, सस्नाथ, सस्निथ, सस्निव । स्नाता । स्नास्यति । स्नातु, स्नाहि, स्नानि । अस्नात् , अस्नाताम् , अस्नुः, अस्नाः । स्नायात् , स्नायाताम्) । आशिषि, (स्नायात्, स्नेयात् ,) "वान्यस्य संयोगादेः" इत्येत्वविकल्पः । (अस्नासीत् । सिष्णासति । सास्नायते । सास्नाति । स्नापयति, स्नपयति, प्रस्नापयति) । "ग्लास्नावनुवमां च" इत्यनुपसृष्टस्य वा मित्त्वम् । "प्रतिष्णातम्" इति सूत्रे षत्वम् । सूत्रादन्यत्र (प्रतिस्नातः) । (निष्णातः, नदीष्णः) । "सुपि स्थः" इत्यत्र "सुपि" इति योगविभागात्कः, निनदीभ्यां स्नातेः कौशले" इति षत्वम् । कौशलादन्यत्र (निस्नातः, नदीस्नातः) । सुस्नातं पृच्छति (सौस्नातिकः) । [पृच्छतौ सुस्नातादिभ्य उपसङ्ख्यानम्] इति ठक् । (प्रस्नः) "घञर्थे कविधानम्" इति कः । (स्नानीयं) चूर्णम् । बाहुलकात्करणेऽनीयर् । (स्नात्वाकालिकः) मयूरव्यंसकादित्वात्तत्पुरुषः । "समासेऽनञ्पूर्वे" इति क्त्वो ल्यब्न भवति । अनञ् इत्यस्य पर्युदासत्वाद् नञ्सदृशेनाव्ययेन क्त्वान्तस्य समासे स विधिरिति । मयूरव्यंसकादिषु पाठादेव वात्र ल्यपो नैव प्रसङ्गः । (ब्राह्मणस्नापकः) । ण्यन्ताण्ण्वुल् । याजकादित्वात् षष्ठीसमासः । स्नायतीति भौवादिकस्य ॥ ४२ ॥

श्रा पाके। इह पाको विक्लित्तिरिति कैयटादौ। (श्राति) इत्यादि स्नातिवत् । पाके घटादिपाठात् श्रपयति । अन्यत्र श्रापयति स्वेदयतीत्यर्थः । (श्रृतं) क्षीरं हविर्वा । ण्यन्तस्य चाण्यन्तस्य च क्ते "श्रृतं पाके" इति श्रृभावो निपातितः । क्षीरहविषोरन्यत्र (श्राणा) यवागूः, (श्रपिता) यवागूरिति । "संयोगादेरात" इति निष्ठानत्वम् । 'अण्यन्तत्वे पाके' इति वच-

नाद् यदा स्वेदनवचनो वा ण्यन्तािणचि पाचनवचनो वा तदापि न श्रभावः । सर्वमेतत् 'श्रै पाकं' इत्यत्र प्रपञ्चितम् ॥ ४३ ॥

द्रा कुत्सायां गतौ ॥ कुत्सितगतिः पलायनं स्वापश्चेति स्वामी । तत्र प्रायो निपूर्वोऽयं स्वापवचनः । (द्राति, निद्राति, प्रणिद्राति,) इत्यादि यातिवत् । (निद्रालुः, तन्द्रालुः) "स्पृहिगृहिपतिदयिनिद्रातन्द्रा" इति निपूर्वात्तत्पूर्वाच्चालुच् । अस्मादेव निर्देशात्तदो द-कारस्य च नकारः । (निद्रः) "आतश्चोपसर्गे" इति कः । (निद्रा) । स्त्रियाम् "आतश्चो-पसर्गे" इत्यङ् । (तन्द्रा) । "घञर्थे कविधानम्" इति कप्रत्यये टाप् । (तन्द्रिः) । "अत्र इः" इतीप्रत्ययः, बाहुलकात्क्त्विवादाल्लोपः । (तन्द्री) । "कृदिकारादक्तिन" इति वा ङीष् । सर्वत्रात्र तदो दकारस्य नकारः, "निद्रातन्द्रा" इति निपातनस्य सामान्यापेक्षत्वाद् द्रष्टव्यः । (द्राणः, द्राणवान्) "संयोगादेरात" इति निष्ठानत्वम् । (निद्रित) इति निद्राशब्दात् तारकादित्वादितचि । द्रायतीति स्वप्ने शपि ॥ ४४ ॥

प्सा भक्षणे ॥ (प्साति, प्रणिप्साति) इत्यादि स्नातिवत् । द्रवणेन प्सानीयो (द्रप्सः) घञर्थे कः । पृषोदरादित्वाद् द्रादेशः । (विश्वप्सा) । "श्वन्नुक्षन्" इत्यादिना कनिन् ॥ ४५ ॥

पा रक्षणे ॥ (पाति) इत्यादि यातिवत् । (पायते, अपासीत्) । ईत्वे सिचो लुकि च लुग्वि-करणत्वान्नास्य ग्रहः । (पालयति) "पातेर्लुग्वक्तव्यः" इति णिचि लुगागमः (गोपालकः) "नित्यं क्रीडाजीविकयोः" इति अकेन समासः । गोपालकस्य स्त्री (गोपालिका ।) [गो-पालिकादीनां प्रतिषेधः] इति पुंयोगलक्षणस्य ङीषोऽभावः । न पातीति (नपात्) नञ्-त्यर्थः। "नभ्राण्णपाद्" इति निपातनात् नञः प्रकृतिभावः क्विपि तुक्च । शत्रन्त इतिवृत्तिः । तत्र हरदत्तः—"अपान्नपातम्" इत्यादावनपुंसके नुमदर्शनाद् "उभे वनस्पत्यादिषु" इत्यत्र पातेः क्विपि पाद् इत्यभिधानाच्च अपपाठोऽयमिति । (तनूनपाद्) अग्निः, इन्धनं विना तनून्न पातीति व्युत्पत्तिः । (अपोनप्त्रियम् । अपान्नप्त्रियम् । अपोनप्त्रीयम् । अपान्नप्त्रीयम् ।) "अपोनप्त्रपान्नप्तृभ्यां घः" "छ च" इत्यपोनपादपान्नपाच्छब्दाभ्यां घच्छौ । "सास्य देव-ता" इत्यस्मिन्विषये प्रत्ययसन्नियोगेन आपोनप्त्रपांनप्तृभावश्च । उभे अपि देवतानामनी । (पतिः) । "पातेर्डतिः" "पतिस्समास एव" इति घिसंज्ञानियमात् पत्येत्यत्र "आङो ना-स्त्रियाम्" इति नादेशो न भवति । (पत्ये) इत्यादौ ङिद्वचने "घेर्ङिति" इति गुणश्च न भव-ति । (पत्युः,) ङसिङसोरकारस्य "ख्यत्यात्परस्य" इत्युकारे यणादेशः । ख्यत्येति खिशब्दखीशब्दयोः कृतयणोर्निर्देशः। तथा पत्यावित्यत्र "अच्च घेः" इत्यत्वं न भवति । ङेरौ-कारस्तु "औत्" इति भवति । समासे तु घिसंज्ञायां वनस्पतिनेत्यादौ नाभावादीनि घिका-र्याणि भवन्ति । "पारस्करप्रभृतीनि च" इति सुट् । (बृहस्पतिः) । "तद्बृहतोः करपत्यो-श्चोरदेवतयोः सुट् तलोपश्च" इति सुट्तलोपौ । (वाचस्पतिः, दिवस्पतिः) । एतावपि पार-स्करप्रभृती । बृहस्पतेरपत्यादिः (बार्हस्पत्यम्) । "दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः" इति प्राग्दीव्यतीयेष्वर्थेषु ण्यः । वनस्पतीनां समूहो (वानस्पत्यम्) इत्यत्र "अचित्तहस्ति-धेनोष्ठक्" इत्यचित्तलक्षणं प्राग्दीव्यतीयं परमपि ठकं [ण्यादयोऽर्थविशेषणलक्षणादपवादा-त्पूर्वविप्रतिषेधेन] इति बाधित्वा ण्य एव भवति । अर्थविशेषलक्षणादित्यभिधानाद् , उ-ष्ट्रपतिर्नाम पत्रम् (औष्ट्रपतम्) इत्यत्र "तस्येदम्" इत्यर्थसामान्ये विधीयमानं "पत्त्राध्व-र्युपरिषदश्च" इत्यञ् परत्वाण्ण्यं बाधते । पत्रं वाहनमुच्यते, अश्वपतेरपत्यादि (आश्वपतम्) "अश्वपत्यादिभ्यश्च" इति ण्यापवादोऽण् प्राग्दीव्यतीयः । एवं धनपत्यादयो गणपठिता उदाहार्याः वास्तोष्पतिर्देवतास्य (वास्तोष्पत्यं, वास्तोष्पतीयम्) । "द्यावापृथिवीशुनासीर" इत्यादिना यच्छौ । अत्रैव निपातनात् षष्ठ्या अलुक्षत्वे । गृहपतिना संयुक्तोऽग्निः (गार्हपत्यः) । "गृहप-तिना संयुक्ते ञ्यः" इति संज्ञायां ञ्यः, निर्देशादेव तृतीया समर्थविभक्तिः। गृहपतेः भावः कर्म वा (गार्हपत्यम्) । "पत्यन्तपुरोहितादिभ्यो यक्" इति यक् । अधिपतिगणपत्योस्तु ब्राह्मणादि-

त्वात् ष्यञ् । (अधिपत्यं, गणपत्यम्) । यक्ष्यञोरुस्वरे विशेषः । स्वपतौ साधु (स्वापतेयम्) । "पत्यतिथि" इत्यादिना ढञ् । कौमुदगन्ध्यायाः पतिः (कौमुदगन्धीपतिः) । "ष्यङस्सम्प्रसारणम्" इति सम्प्रसारणे परपूर्वत्वे च "हलः" इति दीर्घः । दुहितुः पतिः (दुहितृपतिः) । "विभाषा स्वसृपत्योः" इति विद्यायोनिसम्बन्धवाचिनः पूर्वपदस्य षष्ठ्या विभाषा अलुक् । (अहर्पतिः) । [अहरादीनां पत्यादिषूपसङ्ख्यानम्] इति रेफस्य वा रेफो विसर्जनीयापवादः । विसर्जनीयपक्षे "कुप्वोः" इति पक्षे उपध्मानीयोऽपि । उभयत्राप्यादिशब्दः प्रकारे इति हरदत्तः । जाया च पतिश्च (जायापती, दम्पती, जम्पती,) राजदन्तादित्वाद् घ्यन्तस्यापि परनिपातः । जायाशब्दस्य वा दम्भावजम्भावौ च भवतः । वासवदत्तायां 'सखेदमेव' इति केवलस्य स्त्रीवचनस्य दंशब्दस्य प्रयोगश्चिन्त्यः । ब्रह्मा च प्रजापतिश्च (ब्रह्मप्रजापती) "न दधिपयआदीनि" इति । समाहारद्वन्द्वनिषेधात् इतरेतर एव द्वन्द्वः, (पत्नी) "पत्युर्नो यज्ञसंयोगे" इति ङीप् । ईकारस्य च नकारः । यज्ञसंयोगादन्यत्र पतिरियं ब्राह्मणी ग्रामस्येति । वृषलस्य पत्नीत्याद्यौपचारिकः प्रयोगः । वृद्धपतिः वृद्धपत्नी तत्पुरुषो बहुव्रीहिर्वा । "विभाषा सपूर्वस्य" इति विद्यमान पूर्वपदस्य पत्यन्तस्य प्रातिपदिकस्य वा ङीब्नकारौ । अत्रानुवर्तमानमुपसर्जनग्रहणं पत्यन्तप्रातिपदिकविशेषणमिति बहुव्रीहावपि ङीप्नकारौ भवतः । समानः पतिरस्याः सपत्नी । "नित्यं सपत्न्यादिषु" इति नित्यं ङीब्नकारौ अस्मादेव निर्देशात्समानस्य सभावः । आदिशब्देन गणपठितैकादिपूर्वपदादपि । सपत्न्या अपत्यं (सापत्नः) । "शिवादिभ्योऽण्" इत्यण् । सपत्न्या भावः कर्म वा सापत्न्यं, लिङ्गविशिष्टपरिभाषया "पत्यन्त" इति यक् । "भस्याढे तद्धिते" इति पुंवद्भावस्तु न भवति, सपत्नीशब्दस्याभाषितपुंस्कत्वात् । सपत्नीव (सपत्नः) "व्यन् सपत्ने" इत्यनुवादादिवार्थेऽकारः । (पतिवत्नी) "अन्तर्वत्पतिवतोर्नुक्" इति जीवपत्यां ङीब् नुगागमश्च, तत्सन्नियोगेन मतुपो वत्वं च । अन्यत्र (पतिमान् पतिमती) इति। (पितापितरौ) "नप्तृनेष्टृ"–इत्यादिना तृचि इत्वं गुणाभावश्च निपात्यते । "अप्तृन्" इति सर्वनामस्थानदीर्घोऽस्य न भवति, तृन्नन्तानां नप्त्रादीनां पुनरुपादानस्य संज्ञाशब्दानामौणादिकानामेषामेवेति नियमार्थत्वात् । सौ "ऋदुशन" इत्यनङि नान्तत्वात् "सर्वनामस्थाने" इति दीर्घः । माता च पिता च (पितरौ) "पिता मात्रा" इति पितुर्वा शेषः, अन्यथा (मातापितरौ) । "आनङ् ऋतो द्वन्द्वे" इति विद्यायोनिसम्बन्धवाचिनो द्वन्द्वपूर्वपदस्य आनङादेशः । अयमनृकारान्ते पुत्रशब्देऽपि भवतीति वृत्तिः, (पितापुत्रौ) इति, "मातरपितरावुदीचाम्" इत्यनङ्निपातनान् (मातरपितरौ) इत्यपि भवति । पितरो देवताऽस्य (पित्र्यम्) "वाय्वृतुपित्रुषसो यत्" इति यत् । *रीङृतः* इति ऋदन्तस्याङ्गस्य कृत्सार्वधातुकादन्यस्मिन् यकारादौ च्वौ च रीङ्, "यस्येति च" इतीकारलोपः । (पितृव्यः, पितामहः) । "पितृव्यमातुलमातामहपितामहा" इति पितृभ्रातरि व्यन्प्रत्ययः, पितुः पितरि मातरि च डामहच् प्रत्ययः । "मातरि षिच्च" इति वा गौरादिपाठाद्वा ङीष्, (पितामही) पितुरागतं (पित्र्यं, पैतृकम्) "पितुर्यच्च" इति "तत आगत" इति विषये यट्ठञौ । "इसुसुक्तान्तात्कः" इत्युगन्तत्वात् ठस्य कादेशः ॥ ४६॥

रा दाने ॥ (राति) इत्यादि । (रातिः) मित्रम् । संज्ञायां क्तिच् । (राः, रायौ) "रातेर्डैः" इति डैः । "चिरव्ययम्" इतिनियमाद् "कृन्मेजन्त" इति नाव्ययत्वम् । "रायो हलि" इति हलादौ विभक्तावात्वम् । अजादौ विभक्तावायादेशः । इदमात्वं तदन्तेऽपीष्यते, (सुरा अतिरा) इति। (अतिरि) ब्राह्मणकुलमित्यत्र सोर्लुका लुप्तत्वाद् हलादिविभक्तिपरत्वाभावान्नात्वम् । अन्यत्र तु भवत्येव अतिराभ्यामित्यादि । "सम्बुद्धौ च" इति गुणस्तु विकल्पेन भवतीति स्वपतावुपपादितम् । अजादौ "इकोऽचि" इति नुम्, (अतिरिणी) इत्यादि । तृतीयादावजादौ "तृतीयादिषु भाषितपुंस्कं पुंवद्" इति पक्षे पुंवद्भावाद् नुमभावो नाश-

ङ्कुयः, इगन्तस्याङ्गस्य भाषितपुंस्कत्वाभावाद् पुंवद्भावस्य नैव प्रसङ्ग इति। आमि तु [नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन] इति नुड्वात्वे च (अतिराणाम्) इति भवति। (राका) "कृदाधारार्चिकलिभ्यः कन्" इति कन् । (रात्रिः) "राशदिभ्यां त्रिप्" इति त्रिप् । (रात्री) कृदिकारत्वान् ङीष् । "रात्रेश्चाजसौ" इति संज्ञाछन्दसोर्ङीब्विधानमाद्युदात्तार्थम् । (अहोरात्रः, अहोरात्रौ) द्वन्द्वौ । [अह्नो रुविधौ रूपरात्रिरथन्तरेषूपसङ्ख्यानम्] । इति रुः । (सर्वरात्रः) । "पूर्वकालैक" इति समासः । रात्रेः पूर्वभागः (पूर्वरात्रः) । "पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे" इति तत्पुरुषः । (सङ्ख्यातरात्रः, पुण्यरात्रः) । विशेषणसमासौ । (अतिरात्रः) । प्रादिसमासः । (द्विरात्रः) द्विगुः । "अहस्सर्वैकदेशसङ्ख्यातपुण्याच्च रात्रेः" इत्यहरादेरव्ययात् सङ्ख्यायाश्च परस्य रात्रिशब्दस्याच्समासान्तस्तत्पुरुषे । अहर्ग्रहणं तु द्वन्द्वार्थम् । 'कतिपयरात्रम्' इति मुरारिप्रयोगे कतिपयशब्दस्यासङ्ख्यात्वात् समासान्तश्चिन्त्यः । उक्तं हि "षट्कतिकतिपयचतुरां थुक्" इत्यत्र वृत्तावस्यासङ्ख्यात्वम् । "रात्राह्नाहाः पुंसि" इति कृतसमासान्तस्य रात्रशब्दस्य पुंस्त्वम् । इदं पुंस्त्वमसङ्ख्यादेरित्यमरसिंहः, यथाह 'रात्रादेः प्रागसङ्ख्यकाद्' इति । वृत्तिकारशाक्यमुनिप्रभृतयस्तु पुंस्त्वमेवाहुः । रात्र्यामटति (रात्रिमटः(१)) "रात्रेः कृति विभाषा" इति वा मुमागमः । (रात्रिंदिवम्) अचतुरादिनाचि मान्तत्वं निपात्यते । (द्वैरात्रिकः, द्विरात्रीणः) "रात्र्यहस्संवत्सराच्च" इति अधीष्टादिषु ठञ्खौ । रायतीति शपि ॥४७॥

ला आदाने॥ (लाति) इत्यादि। (विलालयति विलापयति घृतम्) "लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने" इति पक्षे लुगागमः। स्नेहविपातनादन्यत्र पुगेव । कृपामादत्त इति (कृपालुः) । मितद्र्वादित्वाड्डुरित्यात्रेयः । (व्यालः) । "आतश्चोपसर्गे" इति कः । बहूनर्थान् लातीति (बहुलम्) । "आतोऽनुपसर्गे कः" इति कः । (बाहुलकम्) । मनोज्ञादित्वाद् भावकर्मणोर्वुञ् । अतिशयेन बहुलो (बंहिष्ठः, बंहीयान्) । बहुलस्य भावकर्मणी (बंहिमा) । पृथ्वादित्वादिमनिच् । "प्रियस्थिर" इत्यादिना इष्ठेमेयस्सु बहुलस्य बंह्यादेशः । बहुलमाचष्टे (बंहयति) । णाविष्ठवद् इति बंह्यादेशः । रातिलाती द्वावपि दानार्थाविति चान्द्राः ॥४८॥

दाप् लवने ॥ (दाति) इत्यादि पूर्ववत् । पकारो घुसञ्ज्ञायामादाविति निषेधार्थः । तेन (प्रणिदाति प्रनिदाति) इत्यत्र "शेषे विभाषा" इति णत्वविकल्पो भवति। तथा (दायते, अदासीत्, व्यत्यदास्त, दातम्, दिदाति) इत्यादौ यथासङ्ख्यम् "घुमास्था" इतीत्वम्, "गातिस्था" इति सिचो लुक्, "स्थाघ्वोरिच्च" इति प्रकृतेरित्वं सिचश्च कित्वं, "दोदद्घोः" इति दद्भावः, "सनिमीमा" इतीस्भावो न भवति । (दावम्) "दाम्नी" इत्यादिना करणे ष्ट्रन् । रक्षणे दयते, शोधने दायतीति शपि गतम् ॥ ४९ ॥

ख्या प्रकथने ॥ (ख्याति) इत्यादि यातिवत् । लुङि "अस्यतिवक्ति" इत्यङि (अख्यद्) इति भवति । तिपा निर्देशाच्चङ्लुकि अङभावात् सिचि (अचाख्यासीद्) इति भवति । अस्यापि चक्षिङादेशवत् क्शादित्वं द्रष्टव्यम् । इदमार्धधातुकविषयमिति आत्रेयादयः । अन्ये तु सामान्येन मन्यन्ते। (सखा) । "समाने ख्यस्य चोदात्त" इति समानशब्दउपपदे इन् प्रत्ययः, समानस्य सभावः, उदात्तश्च । चशब्दाद्धातोर्यलोपः, प्रत्ययस्य ङित्त्वं च । "अनङ् सौ" इत्यसम्बुद्धौ सौ अनङादेशो ङित्त्वादन्त्यस्य । सम्बुद्धौ तु "ह्रस्वस्य गुणः" इति गुणः । अन्यत्र सर्वनामस्थाने "सख्युरसम्बुद्धौ" इति णिद्भावाद् वृद्ध्यावायादेशः । (सखायौ) इत्यादि । सखीन् इत्यादि पतिशब्दवत् । घिसंज्ञाऽसखीति पर्युदासान्न भवति । स्त्रियां (सखी) । "सख्यशिश्वीति भाषायाम्" इति निपातनाद् ङीष् । (सख्या) इत्यत्र "ख्यत्यात्परस्य" इत्युत्वात्परत्वाद् नित्यत्वाच्च ङसिङसोर् "आण्नद्याः" इत्यादि कृतेऽका-

(१) रात्र्यट इत्यधिकं पुस्तकान्तरे ॥

रस्य खीशब्दानन्तरत्वाभावाद् उत्वं न भवति। (परमसखः)। "राजाहस्सखिभ्यष्टच्" इति टच्। बहुव्रीहौ तु (बहुसखा, बहुसखायौ) इति। "बहुव्रीहौ सङ्ख्येये" इति डज् न भवति, अनङ्णिद्वद्भावौ "अङ्गाधिकारे तस्य तदुत्तरपदस्य(१) च" इति सख्यन्तस्यापि भवतः। असखीति पर्युदासः केवलस्यैवेति तदन्तस्य विसंज्ञायां बहुसखिनेत्यादौ नाभावादि भवति। (सुसखा, अतिसखा, किंसखा, असखा) इत्यत्र "न पूजनात्" "किमः क्षेपे" "नञस्तत्पुरुषात्" इति समासान्ताभावः। लिङ्गविशिष्टपरिभाषया सखीशब्दान्तादस्मिन् समासान्ते कृते चाकृते च न विशेषः, यतः कृतेऽपि "भस्याढे तद्धिते" इति पुंवद्भावे टित्त्वान्ङीपि (परमसखी) इत्येव रूपम्। सख्युर्भावकर्मणी (सख्यम्)। "सख्युर्यः" इति यः। लिङ्गविशिष्टात्प्रत्ययेऽपीदमेव रूपम्, यतः पूर्ववत्पुंवद्भावेन भाव्यम्। सम्पूर्वस्य सख्युः प्रयोगो नेति "समि ख्यः" इत्यत्र न्यासादावुक्तम् ॥ ६० ॥

प्रा पूरणे ॥ (प्राति) इत्यादि। (प्राणः, प्राणवान्)। "संयोगादेरात" इति निष्ठानत्वम्। (प्रायः)। "श्याद्व्यध" इति णः ॥ ६१ ॥

मा माने ॥ मानमिहान्तभा(२)वः। अत्रायमकर्मकः। उक्तं च "ह्वावामश्च" इत्यत्रेन्दु(३)हरदत्तन्यासकारादिभिः, 'अकर्मकत्वादस्याग्रहणम्'इति। तेन हि "आतोनुपसर्गे क"इति कं बाधित्वा कर्मण्युपपदेऽणिवधीयते। (मुखमुपमाति, अग्निमनुमाति, गृहं निर्माति, भवान् प्रमाति, तण्डुलान् परिमाति) इत्यादौ सकर्मकत्वमुपसर्गवशेनार्थान्तरवृत्त्या। न चैवं सकर्मकादस्मादणर्थम् "ह्वावामश्च" इत्यत्र ग्रहणं स्यादिति वाच्यम्, यतस्तत्र "आतोऽनुपसर्गे क" इत्यस्यापवादस्याप्रसङ्गात् सामान्यः कर्मण्यण् सिद्धः। (माति) इत्यादि यातिवत्। (मीयते, मेमीयते) "घुमास्था" इतीत्वम्। (मित्सति)। "सनिमीमा" इतीस्भावे "अत्र लोपोऽभ्यासस्य" इत्यभ्यासस्य लोपः। "सस्यार्धधातुके" इति तत्वम्। (४मितम्) "द्यतिस्यतिमा" इतीत्वम्। सर्वेष्वेषु माग्रहणेषु मामेङ्माङ्ग्रहणम्; 'गामादाग्रहणेष्वविशेष' इति वचनात्। "नेर्गद" आदिसूत्रे तु नास्य ग्रहणम्। तथा च तत्र वृत्तिः, 'मा इति माङ्मेङोर्ग्रहणम्' इति। उक्तं चैतत्सर्वमिदमिन्दुसीरदेवन्यासकारहरदत्तादिभिरपि। तेन (प्रनिमाति, प्रणिमाति) इत्यत्र "शेषे विभाषा कखादावषान्त उपदेशे" इति णत्वविकल्पो भवति। चान्द्रास्तु णत्वविधावपि त्रयाणां ग्रहणमिच्छन्तीति वर्धमानः। स्वामिकाश्यपौ तु माग्रहणेष्वलुग्विकरणस्य ग्रहणं णत्ववर्ज्यमिति। उभयमिदं वृत्त्यादिमहाग्रन्थविरोधादुपेक्ष्यम्। मातीति (मायः)। "श्याद्व्यध" इति णे युक्। (माया)। स्त्रियां टाप्। (मायावी)। "अस्मायामेधास्रजो विनिः"। (मायी, मायिकः)। व्रीह्यादित्वादिनिठनौ। प्रमातीति (प्रमः)। "आतश्चोपसर्गे" इति कः। (प्रमा)। "आतश्चोपसर्गे" इति स्त्रियामङ्। (प्रमितिः) इति बाहुलकात् क्तिन्। मयत इति प्रणिदाने शपि गतम् ॥ ६२ ॥

वच परिभाषणे ॥ अत्र पुरुषकारे "अस्यतिवक्ति" इत्यत्र वृत्तौ परिभाषणे पठ्यते; तदपि परेरनधिकारार्थत्वाद् भाषणमेवार्थ इति। एतच्च क्वचिद्वृत्तावेवं पाठदर्शनादुक्तम्। (वक्ति, वक्तः, वक्षि, वक्थः, वक्थ, वच्मि, वच्वः, वच्मः)। वचन्तीत्यस्याप्रयोगोऽनभिधानादिति स्वामिसम्मताकारौ। तथा च भोजः। 'न वचन्ति प्रयुञ्जते' इति। आत्रेयस्तु एकवचनान्युदाहृत्य अन्यत्रानभिधानमित्येके। झिमात्रएवानभिधानमिति केचित् इति। (उवाच,

---

(१) तदन्तस्य इति पाठो बहुषु पुस्तकेषु वर्तते।

(२) ह्रान्तर्भाव इति पाठान्तरम्।

(३) त्रेन्द्रेति पुस्तकान्तरे।

(४) मितः, मितवान् इति बहुषु पुस्तकेषु।

ऊचतुः, ऊचुः, उवक्थ, उवचिथ, ऊच, उवाच, उवच, ऊचिव,) थलि भारद्वाजनियमादिड्विकल्पः । (वक्ता । वक्ष्यति । वक्तु, वक्तात्, वक्तां, वचन्तु, वग्धि) । हेर्धित्वे कुत्वजश्त्वे । (वचानि । अवग्, अवग्, अवक्ताम्, अवचन्, अवक्, अवचम् । वच्यात्, वच्यातां, वच्युः, वच्याः, वच्यां, वच्याव) । आशिषि (उच्यात्, उच्यास्तां,) कित्वात् "वचिस्वपि" इति सम्प्रसारणम् । (अवोचत्, अवोचताम्, अवोचन्) । "अस्यतिवक्ति" इत्यङि "वच उम्" इत्युम् । (उक्थम्) । यज्ञायज्ञियात्परं साम । "पातॄतुदिवचि" इति थक् । उक्थमधीते वेद वा (औक्थिकः) । "क्रतूक्थादि" इति ठक्, अयं च प्रत्ययो न सामवचनादिष्यते, किन्तु तल्लक्षणऔक्थिक्यनाम्नि वर्तमानादिति वृत्त्यादौ स्थितम् । (वक्त्रम्) । "गुधृवीपचिवचि" इति त्रः । इन्दुवक्त्रो नाम देशः, (ऐन्दुवक्त्रकः) । "कच्छाग्निवक्त्रगर्तोत्तरपदात्" इति शैषिको वुञ् । शेषमपि ब्रूञादेशवत् । पारायणिकैरयं धातुर्नापाठीत्येतावतानार्षता नाशङ्क्या, "अस्यतिवक्ति" इत्यत्र वृत्त्यादौ, 'वच परिभाषणे ब्रूञादेशो वा' इत्युक्तत्वात् । तथा वच्यादिसूत्रे न्यासपदमञ्जर्योश्च अस्यास्तित्वं स्पष्टम् । किञ्चान्तिपरस्यास्य प्रयोगं प्रतिषेधन्तो भोजात्रेयादयोऽप्यत्रैवानुकूलाः । अयमाधृषीयश्च । इण्प्रभृतयोऽनुदात्ताः परस्मैपदिनः । इङ् त्वात्मनेपदी ॥ ५३ ॥

विद ज्ञाने ॥ एतदादयो रुदिपर्यन्ता उदात्ता उदात्तेतः । (वेत्ति, वित्तः, विदन्ति, वेत्सि, वित्थः, वित्थ, वेद्मि, । विद्वः । विद्मः, वेद, विदतुः, विदुः, वेत्थ, विदथुः, विद, वेद, विद्व, विद्म) "विदो लटो वा" इति लटः परस्मैपदानां पक्षे णलादयः। (विवेद, विविदतुः, विवेदिथ, विवेद, विविदिव । विदांचकार,) "उषविद" इत्याम्प्रत्ययो वा । विदेत्यकारस्य विवक्षितत्वान्न लघूपधगुणः । (वेदिता । वेदिष्यति । वेत्तु, वित्तात्, वित्तां, विद्धि, वेदानि । विदाङ्करोतु, विदाङ्कुरुतात्, विदाङ्कुर्वन्तु, विदाङ्कुरु, विदाङ्करवाणि,) "विदाङ्कुर्वन्त्वित्यन्यतरस्याम्" इति लोट्यास्यगुणत्वम्, लोटो लुक्, लोट्परकरोतेरनुप्रयोगश्च पक्षे निपात्यते । कुर्वन्त्विति बहुवचनमितिकरणान्न विवक्ष्यते । (अवेत्, अवित्ताम्, अविदुः, अवेत्, अवेः, अवित्तम्, अवेदम्, अविद्व,) हल्ङ्यादिना तिस्योर्लोपः । सिपि "दश्च" इति दकारस्य वा रुत्वम् । "सिजभ्यस्तविदिभ्यश्च" इति झेर्जुस् । (विद्यात्, विद्यातां, विद्युः, विद्याः, विद्याम्) । आशिषि (विद्यात्, विद्यास्ताम्) इत्यादि (अवेदीत्, अवेदिष्टाम्, अवेदीः, अवेदिषम्)। "नेटि" इति हलन्तलक्षणाया वृद्धेर्निषेधः । (संवित्ते, संविदाते, संविदते, संविद्रते, संवित्से, संविदे,) "समो गम्यृच्छि" इत्यकर्मकात्तङ् । "वेत्तेर्विभाषा" इति झादेशस्यातो वा रुडागमः । (संविविदे, संविविदिषे, संविविदे, संविविदिवहे । संविदाञ्चक्रे । संवेदिता । संवेदितासे । संवेदिष्यते । संवित्तां, संविदातां, संविदतां, संविद्रतां, संवित्स्व, संवेदै । समवित्त, समविदातां, समविदत, समविद्रत, समवित्थाः, समविदि । संविदीत, संविदीयाताम्) । आशिषि (संवेदिषीष्ट, संवेदिषीयास्ताम्) । लघूपधगुणः । "लिङ्सिचौ" इति कित्त्वमझलादित्वान्न भवति । (समवेदिष्ट, समवेदिषातां,) पूर्ववदकित्त्वम् । (विविदिषति, विदित्वा) । "रुदविद" इति क्त्वासनोः कित्त्वम् । (वेविद्यते । वेवेत्ति, वेविदीति । संवेवित्ते, संवेविदाते, संवेविदते) । "समो गम्यृच्छि" इति तङ् । प्रकृतिग्रहणेन रुट् तु न भवति, वेत्तेरिति तिपा निर्देशात् । (वेदयति । अवीविदत् । विदन्, विद्वान्) । "विदेश्शतुर्वसुः" इति शतुर्वा वसुरादेशः । संयोगान्तलोपे "वसुस्रंसु" इति दत्वं नकारस्य न भवति, तत्र स इत्यनुवर्तनादित्युक्तम् । विदन्नेव (वैदनः) । "प्रज्ञादिभ्यश्च" इति स्वार्थेऽण् । विद्वांसोऽस्यां सन्तीति (विदुष्मती) परिषत् । "तसौ मत्वर्थे" इति मतुपोऽपि मत्वर्थत्वात्तस्मिन् परे सान्तत्वेन भत्वात् वसोस्सम्प्रसारणपरपूर्वत्वयोः षत्वम् । विद्वांसमाचष्टे इति णौ णाविष्ठवदिति टिलोपे (विद्वयति) इति दौर्गाः । तदयुक्तम्, 'इष्ठवद्भावादेव षत्वे नित्यत्वात्पूर्वं प्रसारणे पश्चाट्टिलोपे (विदयति) इति भाव्यमिति । टिलोपस्तु शब्दान्तर-

प्राप्त्या ऽनित्यः । (विदितः) । वेदयतीति (वेदयः) । "अनुपसर्गाल्लिम्प" इत्यादिना ण्य-न्ताच्छप्रत्यये शपि गुणायौ । (शास्त्रवित्, प्रवित्) । "सत्सूद्विष" इत्यादिना क्विप् । (विदुरः) । "विदिभिदिच्छिदेः कुरच्" इति कर्तरि कुरच् । वेदनशीलो (विन्दुः) । "वि-न्दुरिच्छुः" इत्युप्रत्यये नुमि निपात्यते । (वेदः) । "हलश्च" इति घञ् । (वैदिकः) । अध्यात्मादित्वात् शैषिकष्ठञ् । वेदमाचष्टे (वेदापयति) । [अर्थवेदसत्यानामापुग्व-क्तव्यः] इत्यापुक् । आयुर्वेदमधीते वेद वा (आयुर्वैदिकः) । उक्थादित्वात् ठक् । सर्वे वेदाः (सर्ववेदाः,) "पूर्वकालैक" इति समासः, तान् अधीते वेद वा स (सर्ववेदः,) प्रा-ग्दीव्यतीयस्याणः "सर्वसादेर्द्विगोश्च लः" इत्युक्थादिपाठाल्लुक् । अत्र द्विगुग्रहणं तद्धितार्थ-मित्यस्यैव स्मरणार्थमिति हरदत्तादयः । सर्ववेद एव (सार्ववेद्यः) । [सर्ववेदादिभ्यस्स्वा-र्थउपसङ्ख्यानम्] इति सार्थे ष्यञ् । चतुरो वेदानधीते वेद वा (चतुर्वेदः) । तद्धितार्थे द्विगौ प्राग्दीव्यतीयस्याणो "द्विगोर्लुक्" इति लुक् । चतुर्वेद एव (चातुर्वैद्यः) । [चतुर्वे-दस्योभयपदवृद्धिश्च] इति ष्यञुभयपदवृद्धिः । (वित्तिः) । "मन्त्रे वृष" इत्यादिना स्त्रियां क्तिन् । (विद्या)। "संज्ञायां समज" इति क्यप् । चतस्रो विद्याः (चातुर्वैद्यम्) । [चतुर्वर्णा-दिभ्य उपसङ्ख्यानम्] इति स्वार्थे ष्यञ् । अनुशतिकादित्वादुभयपदवृद्धिः । स्वार्थस्यापि तद्धितार्थत्वात् "तद्धितार्थ"इति द्विगुः । विद्यामधीते वेद वा (वैद्यः) । "प्राग्दीव्यतीयोऽण्" वायसविद्यामधीते वेद वा (वायसविद्यिकः) । विद्यालक्षणकल्पसूत्रान्तात्" इति उक्था-दिपाठाट्ठक् । यदायं विद्यान्तस्सर्वसादिर्द्विगुर्वा तदा "सर्वसादेर्द्विगोश्च लः" इति प्रत्ययस्य लुकि (सर्वविद्यः) इत्यादि भवति । अत्र हरदत्तः। 'चतुर्विद्यशब्दस्य ब्राह्मणादिपाठात्स्वार्थे ष्यञ्, मतान्तरेणापि (चातुर्वैद्यः) इति । उक्थादौ 'विद्या चानङ्गक्षत्रधर्मसंसर्गात्रिपूर्वा" इतिपाठादङ्गादिपूर्वपदात् प्राग्दीव्यतीयोऽणेव, (अङ्गविद्यः) इत्यादि । (त्रैविद्यः) इत्यत्र त्र्यवयवा विद्या (त्रिविद्या) इति [शाकपार्थिवादीनामुपसङ्ख्यानमुत्तरपदलोपश्च] इति तत्पुरुष-त्वेन अद्विगुत्वादणो लुङ्न भवति । यदा तु द्विगुस्तदा त्रिविद्य इत्येव । (विदा) । भिदा-दित्वादङ् । (वेदना) । "घट्टिवन्दिविदिभ्यश्च" इति युच् । (ब्राह्मणवेदं भोजयति) यं यं ब्राह्मणं वेद तं तं भोजयतीत्यर्थः । "कर्मणि दृशिविदोः" इति णमुल् । न वेत्तीति (नवेदाः) । विदेरसुन् । "नभ्राण्णपात्" इत्यादिना नञः प्रकृतिभावः । तत्र नवेदा इत्येकवचनान्तपाठा-द्द्विवचनान्तपरे न प्रकृतिभाव इत्यात्रेयादयः । अयं सत्तायां दिवादौ, विचारणे रुधा(१)दौ चेतनाख्याननिवासेषु चुरादौ । विद्लृ लाभे तुदादौ ॥ ९४ ॥

अस भुवि । (अस्ति, स्तः, सन्ति, असि, स्थः, स्थ, अस्मि, स्वः, स्मः) "श्नसोर-ल्लोपः" क्ङिति सार्वधातुके इत्यपिद्वचनेषु अल्लोपः । "तासस्त्योः" इति सलोपः सका-रादौ । (बिदामास, आसतुः, आसुः, आसिथ, आसथुः, आस, आसिव) । "अस्तेर्भूः" "आर्धधातुके" इति भूभावोऽनुप्रयोगे नेत्युक्तम् । अन्यत्र भूभावे, (बभूव) इत्यादि भव-तिवत् । चान्द्रैरनुप्रयोगादन्यत्रापि क्वचिद्भूभावो नेष्यत इति 'प्रादुरास बहुलक्षपाच्छवि" इत्यादि समाहितम् । अत्र युक्तिर्न दृश्यते । धातुप्रदीपे तु 'असतेरास' इत्युक्तम् । विस्तरे तु आसेति बभूवार्थे, आहेत्युवाचार्थे इति विभक्तिप्रतिरूपकत्वेन समाहितम् । (भविता । भविष्यति । अस्तु, स्तात्, स्ताम्, सन्तु, एधि, स्तात् स्तं, स्त, असानि असाव) । श्नाव-ल्लोपे "घ्वसोरेद्धौ" इति सकारस्यैत्वम् । तस्य "असिद्धवदत्राभात्" इत्यसिद्धत्वात्, "हुझल्भ्यो हेर्धिः" इति धिभावः । तातङ्पक्षे एत्वं न भवति, परेण तेन बाधात् । कृते तु तातङि स्थानिवत्त्वेनापि न भवति 'सकृद्गतौ विप्रतिषेधेन' इति । (आसीत्, आस्ताम्, आसन्, आसीः आसम्, आस्व,) "अस्तिसिचोऽपृक्ते" इतीडागमः । श्नसोरल्लोपस्य

(१) रुधादाविति बहुषु पुस्तकेषु पाठो दृश्यते ।

"असिद्धवदत्र" इत्यसिद्धत्वादाडागमो द्विवचनादौ । (स्यात्, स्यातां, स्युः, स्याः, स्यां, स्याव,) पिद्वचनेष्वपि यासुटो ङित्वाद्ल्लोपः । आशिषि (भूयाद्) इत्यादि । (अभूत्) । "गातिस्था" इति सिचो लुक् । [आहिभुवोरीट्प्रतिषेधे] इति स्थानिवत्त्वनिषेधाद् अस्त्याश्रय ईण्णभवति । प्रत्ययलक्षणेन सिजाश्रयो न भवति, अत एव स्थानिवत्त्वनिषेधसामर्थ्यात् । यद्वा "अस्तिसिच" इत्यस्य विद्यमानसिच इत्यर्थस्य भवतौ प्रतिपादितत्वाद् नैव सिजाश्रयस्येटः प्रसङ्गः । सिचि वृद्धिर्लुका लुप्तत्वान्न भवति । (अभूवन्) "भुवो वुग्लुङ्लिटोः" इति वुक् । "आत" इति नियमात् जुस्भावो न भवति । (अभूः) । "भूसुवोस्तिङि" इति पिति गुणनिषेधः । शेषं भवतिवद् आर्धधातुके नेयम् । "श्रीणीभुवोऽनुपसर्गे" इति वञ् अस्य लुग्विकरणत्वान्न भवति। तेन आपादाने भव इति "ऋदोरप्" इति रक्षितः । (विषन्ति प्रादुष्यन्ति, विष्यात्, प्रादुष्यात्) *उपसर्गप्रादुर्भ्यामस्तिर्यच्परः* आभ्यां परस्यास्तिसकारस्य यकारस्य यकारपरस्याच्परस्य च ष इति षत्वम् । (व्यतिस्ते, व्यतिषाते, व्यतिषते, व्यतिसे, व्यतिषाथे, व्यतिध्वे, व्यतिहे । व्यतिस्वहे । व्यतिस्त) इत्यतोऽन्यत्र "उपसर्गप्रादुर्भ्याम्" इति षत्वं द्रष्टव्यम् । (व्यतिसे) इत्यत्र श्नसोरल्लोपे "तासस्त्योः" सलोपे प्रत्ययसकारस्यानस्तिसकारत्वात् पदादित्वाच्च षत्वाभावः । (व्यतिध्वे) इत्यत्र पूर्ववदल्लोपे, "धि च" इति सलोपः । एवं च सेध्वेशब्दयोः प्रत्ययमात्रमेवावशिष्यते । लोटि (व्यत्यसै) इत्यत्र नित्यत्वात् "एत ऐ" इत्यैकारादेशे "ह एति" इत्येत्वं निमित्ताभावान्न भवति । अस्ति क्षीरं यस्यास्सा (अस्तिक्षीरा) ब्राह्मणी । नास्ति बाधको येषां ते (नास्तिबाधकाः) । 'सुबधिकारे अस्तिक्षीरादिवचनम्' इति बहुव्रीहिः । नास्तिबाधका इत्यत्र उत्तरपदपरत्वाभावात् "नलोपो नञः" इति न भवति । उत्तरपदशब्दश्च समासचरमावयवे रूढः । परलोकोऽस्तीति मतिर्यस्य (आस्तिकः,) परलोको नास्तीति मतिर्यस्य (नास्तिकः) । "अस्तिनास्ति दिष्टं मतिः"इति मत्युपाधिकार्थेऽभ्योऽस्येति षष्ठ्यर्थे ठक् । वचनसामर्थ्यात्तिङन्ताद्वाक्याच्चायं प्रत्ययो भवति । निपातौ वास्तिनास्ती । अत एव अस्तिमानित्याद्यकि भवति ॥ ५९ ॥

मृजू शुद्धौ ॥ ऊदित्त्वमिड्विकल्पार्थम् । अस्यानुदात्तत्वमनार्षम् । उक्तं च 'सृजिं मृजिं विद्धनिट्स्वरान्' इति कारिकायां वृत्तौ । मृजेरूदित्त्वादिटो विकल्पेन भाव्यम् । आगमश्च न दृश्यते । तदिहास्य पाठे प्रयोजनं चिन्त्यम् । के चित्त्वस्य स्थाने विजिं पठन्ति इति ॥ (मार्ष्टि, मृष्टः, मृजन्ति, मार्जन्ति। मार्क्षि, मार्ज्मि, मृज्वः) व्रश्चादिना षत्वे तवर्गस्य ष्टुत्वम् । सकारे तु "षढोः कस्सि" इति कत्वे सकारस्य षत्वम् । क्ङितोऽन्यत्र "मृजेर्वृद्धिः" इत्यचो वृद्धिः अजादौ क्ङिति 'मृजेरजादौ सङ्क्रमे विभाषा वृद्धिः' इतीष्ट्या वा वृद्धिः । सङ्क्रमो नाम गुणवृद्धिप्रतिषेधविषयः। अत्र हरदत्तः । 'अचीत्युच्यमानेऽपि 'यस्मिन् विधिस्तदादौ' इत्यजादाविति सिद्धे आदिग्रहणं मुख्याजादिपरिग्रहार्थम् । तेन व्यपदेशिवद्भावेनाजादौ यूयं ममृज त्वया ममार्ज इत्यादौ न भवति' इति, अत्रेयस्तु । 'अत्रापि भवति' इति । तस्यादिग्रहणं 'यस्मिन्विधिः' इति सिद्धस्यैवानुवाद इति मतम् । यदाह । 'मृजेति भिदादिपाठादङ् । गणपाठादेव वृद्ध्यभावश्च' इति । तथा च "इको गुणवृद्धी" इत्यत्र भाष्ये । 'मृजेर्वृद्धिरचस्ततो ऽचि, क्ङित्यजादौ क्ङिति मृजेर्वृद्धिर्भवति ; (परिमृजन्ति परिमार्जन्ति,) । किमर्थमिदं, नियमार्थम्, अजादावेव क्ङिति नान्यत्र । क्व माभूद् मृष्टः, मृष्टवानिति । ततो वा । वाचि क्ङिति मृजेर्वृद्धिर्भवति" इति ॥ (ममार्ज, ममार्जतुः, ममृजतुः, ममार्जुः, ममृजुः, ममार्जिथ, ममार्ष्ठ, ममार्जिव, ममृजिव, ममृज्व) । ऊदित्वादिड्विकल्पः । पूर्ववदजादौ वृद्धिविकल्पः (मार्जिता, मार्ष्टा । मार्जिष्यति, मार्क्ष्यति) अनुदात्तोपदेशत्वस्यानार्षत्वाद् अमागमो नेत्युक्तम् । (मार्ष्टु, मृष्टात्, मृष्टां, मृजन्तु, मार्जन्तु, मृड्ढि, मार्जानि, मार्जाव,

मार्जाम) "आद्युत्तमस्य पिच्च"इति पित्वात्सङ्क्रमत्वाभावाद् नित्या वृद्धिः। (अमार्ट, अमृष्टाम्, अमृजन्, अमार्जन्, अमार्ट, अमार्जम्, अमृज्व,) तिप्सिपोर्हल्ङ्यादिलोपे षत्वजश्त्वचर्त्वेषु च "रात्सस्य" इति नियमात् न संयोगान्तलोपः। (मृज्यात्, मृज्यातां, मृज्युः मृज्यां,) मृजेर्वृद्धिर्गुणविषये' इति सा न भवति। आशिषि, (मृज्यात्, मृज्यास्ताम्) इत्यादि। (अमार्जीत्)। "इट ईटि" इति सिचो लोपः। (अमार्जिष्टाम्, अमार्जिषुः,अमार्जीः, अमार्जिषम्)। अनिट्पक्षे, (अमार्क्षीत्, अमार्ष्टाम्, अमार्क्षुः, अमार्क्षीः, अमार्क्षम्)। झलादौ "झलो झलि" इति सिज्लोपः। अन्यत्र प्रकृतेः पूर्ववत् षत्वकत्वयोः, "आदेशप्रत्यययोः" इति षत्वम्। एवं (व्यतिमृष्टे, व्यतिमृजाते, व्यतिमृजते) इत्यादावात्मनेपदेऽपि यथायोगं वृद्धिस्तदभावश्च ग्राह्यः। (मिमृक्षति, मिमार्जिषति। मरीमृज्यते। मरीमार्जीति। मरीमार्ष्टि)। एवं रुपीकोरपि। (मार्जयति। अमीमृजत् अममार्जत्)। "ऊदृत्" । (मार्जित्वा, मृष्ट्वा) इट्पक्षे "न क्त्वा सेट्"इति कित्त्वनिषेधान्नित्यं वृद्धिः। (मृष्टः। मृष्टवान्)। "यस्य विभाषा" इतीण्णिषेधः। (सिक्तसम्मृष्टम्)। राजदन्तादित्वात्पूर्वकालस्य परनिपातः। (मृज्यः)। "मृजेर्विभाषा" इति वा क्यप्। तदभावे ण्यति कुत्वे वृद्धौ च (मार्ग्यः)। (तुन्दपरिमृजः) "तुन्दशोकयोः परिमृजापनुदोः" इत्यलसे कः, अन्यत्र (तुन्दपरिमार्गः), कर्मण्यण्। (मृजा)। भिदादिपाठादङ् वृद्ध्यभावश्च। मार्ष्टिशब्दश्चुरादौ वक्ष्यते। (अपामार्गः)। "हलश्च" संज्ञायां घञि "उपसर्गस्य घञ्यमनुष्ये बहुलम्" इत्युपसर्गस्य दीर्घः। (कंसपरिमृड्) इत्यादौ क्विबन्तस्य सुबपेक्षया मृजेर्वृद्धिर्न भवति, 'धातोस्स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्' इति। कंसपरिमृजमिच्छतीति विगृह्य "सुप आत्मनः क्यच्" इषिकर्मण एषितुरेवात्मसम्बन्धिनः सुबन्तादिच्छायां वा क्यजिति क्यचि सनाद्यन्तत्वेन धातोः कंसपरिमृज्यशब्दात्तृचि "क्यस्य विभाषा" इत्यार्धधातुके परतः विधीयमाने क्यस्यादेर्लोपे "अतो लोप" इत्यल्लोपे (कंसपरिमृजिता) इत्यत्र मृजेर्वृद्धिर्न भवति, अल्लोपस्य स्थानिवत्त्वात्। "क्यस्य विभाषा" इति ससुदायलोपेऽपि "न धातुलोप" इति वृद्ध्यभावः। (मार्जारः)। "कञ्जिमृजिभ्यां चित्" इत्यारप्रत्ययः॥ (मार्जालीयः) सोमपात्रप्रक्षालनप्रदेशः। "स्थाचतिमृज" इत्यादिनालीयर्प्रत्ययः। अयं शौचालङ्कारयोर्युजादिः। मार्ज शब्दार्थ इति चुरादौ॥ ९६॥

रुदिर् अश्रुविमोचने॥ (रोदिति, रुदितः, रुदन्ति, रोदिषि, रुदिथः, रोदिमि, रुदिवः,) "रुदादिभ्यस्सार्वधातुके" इति वलादाविट्। एतदादयः पञ्च रुदादयः। (रुरोद, रुरुदतुः, रुरोदिथ, रुरुद, रुरोद, रुरुदिव। रोदिता। रोदिष्यति। रोदितु रुदितात्, रुदितां, रुदन्तु, रुदिहि, रोदानि,) हौ परत्वादिटि सकृद्गतपरिभाषया धिभावो न भवति। यद्वा तत्र हलग्रहणानुवृत्तेरिटि कृते नैव धिभावप्रसङ्गः। (अरोदीत्, अरोदत्, अरुदिताम्, अरुदन्, अरोदीः, अरोदः अरोदम्, अरुदिव,) "रुदश्च पञ्चभ्यः" *"अड्गार्ग्यगालवयोः"* इति हलादेः पितस्सार्वधातुकस्य अपृक्तस्य पर्यायेणेडडागमौ। (रुद्यात्, रुद्यातां, रुद्युः, रुद्याः, रुद्याम्,) अत्र रुदादिं प्रकृतिं प्रत्ययविशेषं चापेक्षमाणाभ्यामिडड्भ्यां लिङ्मात्रापेक्षत्वेनान्तरङ्गत्वात्पूर्वमेव यासुटि अपृक्तस्याभावान्न तौ। स्वामी तु 'ईडटौ पूर्वविप्रतिषेधेन बाधित्वा यासुट्' इति। आशिषि (रुद्यात्, रुद्यास्ताम्। अरुदत् अरुदताम्, अरुदन्, अरुदः अरुदम्, अरुदाव,) "इरितो वा" इत्यङ्। तदभावे सिच्, (अरोदीत्, अरोदिष्टाम्) इत्यादि। (रुरुदिषति। रुदित्वा)। "रुदविद" इति क्त्वासनोः कित्वम्। (रोरुद्यते। रोरुदीति, रोरोत्ति, रोरुत्तः)। "रुदादिभ्यस्सार्वधातुके" इतीडागमो गणनिर्देशान्न भवतः। तथा लङि (अरोरोत्, अरोरोः) इति इडडागमावपि गणनिर्देशान्न भवतः। (अरोरुदीत्, अरोरुदीः) इति "यङो वा" इति पाक्षिके ईटि द्रष्टव्यौ। "रुदविद" इति कित्वं यङ्लुगन्तादपि भवतीति (रोरुदिषति, रोरुदित्वा) इति भवति। (रोदयति। अरूरुदत्। रोदसी)। "असुन्" इत्यसुन्प्रत्ययः। पुष्पवदादिवत् नित्यं द्विवचनान्तः। रोदयतीति

(रुद्रः) । "रोदेर्णिलुक्च" इति रकि णिलुक् । (रुद्राणी) । "इन्द्रवरुण" इति पुंयोगे ङीषानुकौ । शतं रुद्रा देवता अस्य (शतरुद्रियं, शतरुद्रीयम्) । "शतरुद्राद्धश्च" इति घच्छौ । विधानसामर्थ्यादनयोः "द्विगोर्लुक्" इति लुङ्न भवति । यदि हि स्यादण एवास्तु लुक् । विदादय उदात्ता उदात्तेतः ॥ ६० ॥

जिष्वप् शये ॥ उदात्तेदनुदात्तः । (स्वपिति, स्वपन्ति, स्वपितः, स्वपिषि, स्वपिमि, स्वपिवः) "रुदादिभ्य" इतीट् । (सुप्यते) । भावे यकि "वचिस्वपि" इति संप्रसारणम् । (सुषुप्यते) "सुविनिर्दुर्भ्यस्सुपिसूतिसमा" इति कृतसम्प्रसारणस्य सुपेष्षत्वम् । एवं ण्यादेरप्युदहार्यम् । (सुष्वाप, सुषुपतुः, सुषुपुः, सुष्वप्थ, सुष्वपिथ, सुषुपथुः,सुष्वाप, सुषुपिव,) किति "वचिस्वपि" इति सम्प्रसारणे द्विर्वचनम् । अन्यत्र द्विर्वचने लिटि "लिट्यभ्यासस्यो-भयेषाम्" इत्यभ्यासस्य सम्प्रसारणम् । अत्र ह्युभयेषां ग्रहणस्य प्रयोजनं हलादिशेषात्पूर्वं सम्प्रसारणमित्युक्तम् । सर्वत्र क्रादिनियमादिट् । थलि भारद्वाजनियमाद्विकल्पः । अभ्या-सात्परस्य आदेशसकारत्वात् षत्वम् । विसुष्वापेत्यादावकिद्वचनेऽभ्यासस्य सम्प्रसारणे "पूर्वत्रासिद्धम्" इति षत्वस्यासिद्धत्वात् पूर्वं हलादिशेषे पश्चात्सुपिरूपस्याभावात् "सुवि-निर्दुर्भ्यः" इति न षत्वम् । किपि तु परत्वात्सम्प्रसारणे षत्वे च पश्चाद् द्विर्वचनमिति (विषुषुपतुः) इत्यादि भवति । न च द्विर्वचने षत्वस्यासिद्धत्वम्, (पूर्वत्रासिद्धीयमद्वि-र्वचने) इति तन्निषेधात् । (स्वप्ता । स्वप्स्यति । स्वपितु, स्वपिहि, स्वपानि । अस्वपीत , अस्वपत्, अस्वपिताम्, अस्वपीः, अस्वपः । अस्वपम्, अस्वपिव,) रुदादित्वात् पूर्ववदि-ड्टौ । (स्वप्यात्, स्वप्यातम्) । आशिषि (सुप्यात्, सुप्यास्तां,) "किदाशिषि" इति कित्वात्सम्प्रसारणम् । (अस्वाप्सीत्, अस्वाप्ताम्, अस्वाप्सुः, अस्वाप्सीः, अस्वाप्सम्,) "वदव्रज" इति वृद्धिः । (सुषुप्सति) । "रुदविद" इत्यादिना कित्वे सम्प्रसारणे द्विर्वच-नम् । (सोषुप्यते) । "स्वपिस्यमिव्येञां यङि" इति प्रसारणे द्विर्वचनम् । (विषुषुप्सति, विपोषुप्यते) इत्यादौ लिटीव सम्प्रसारणषत्वयोः द्विर्वचने हलादिशेष इति "सुविनिर्दुर्भ्यः" इति षत्वं भवति । (सास्वपीति, सास्वप्ता) इत्यादौ यङ्लुकि इडाद्यभावो रुदित्त्वात् । "स्वपिस्यमि" इति सम्प्रसारणं यङो लुका लुप्तत्वाद् न भवति । (स्वापयति । असूषुपत्,) अत्र "स्वापेश्चङि" इति सम्प्रसारणे परपूर्वत्वे लघूपधगुणे णौ चङ्युपधाया ह्रस्वत्वे द्विर्वचने "दीर्घो लघोः" इति दीर्घः । स्वापशब्दाद् घञन्ताण्णौ चङ्यपि स्वापशब्दस्याविशिष्टत्वात् "स्वापेः" इति सम्प्रसारणे असूषुपत् इति भवति' इत्यात्रेयः । णावल्लोपेन अग्लोपित्वात् "दीर्घो लघोः" इति दीर्घो न भवति । (सुष्वापयिषति) णौ सनि "द्युतिस्वाप्योस्सम्प्रसार-णम्" इत्यभ्यासस्य प्रसारणम् । "स्तौतिण्योरेव" इत्युत्तरस्य षत्वम् । (सुषुष्वापयिषति) इत्यत्राकिल्लिड्वत् हलादिशेषेणाभ्यासस्य सुपिरूपत्वाभावात् "सुविनिर्दुर्भ्यः" इति न षत्वम् । (सुस्वापकीषति) इत्यत्र स्वापेण्वुंल् स्वापकः, तमिच्छतीति "सुप आत्मनः क्यच्" इति क्यचि "क्यचि च" इतीत्वे स्वापकीयशब्दात्सनि द्विर्वचने स्वापेरभ्यासस्यापि "द्युतिस्वाप्योः" इति प्रसारणं न भवति । तस्याभ्यासनिमित्तप्रत्ययेनानन्तर्य एवेष्टत्वात्, (स्वप्नक्, स्वप्नजौ) । "स्वपितृषोर्नजिङ्" इति ताच्छीलिकः कर्तरि नजिङ् । (सुप्तो देवदत्तः, सुप्तं देवदत्तस्य) । "ञितः क्त" इति कर्तृभावयोर्वर्तमाने क्तः । "क्तस्य च वर्तमाने" इत्यनभिहिते कर्तरि षष्ठी । यत्तु वृत्तौ "मतिबुद्धि" इत्यत्र 'चकारस्यानुक्तसमुच्चयार्थत्वात् सुप्त इत्युक्तं तत् ताच्छीलिकेन नजिङा बाधो मा विघातीति । (स्वप्नः) । "स्वपो नन्" इति भावे नन् । अनुदात्तोऽप्ययं रुदादिकार्यानुरोधादुदात्तमध्ये पठितः ॥ ६८ ॥

श्वस प्राणने ॥ इतःप्रभृति शास्यन्ता उदात्ता उदात्तेतः । (श्वसिति, श्वसितः, श्वसन्ति, श्वसिषि, श्वसिमि) "रुदादिभ्य" इतीडागमः। (शश्वास, शश्वसतुः, शश्वसिथ, शश्वस, शश्वास, शश्वसिव । श्वसिता । श्वसिष्यति । श्वसितु, श्वसिहि, श्वसानि । अश्वसीत्, अश्वसत्, अश्व-

सिताम्, अश्वसीः, अश्वसः, अश्वसम्, अश्वसिव,) "रुदश्च पञ्चभ्यः" "अड्गार्ग्य" इतीडटाव-पृक्तस्य। (श्वसेत्, श्वसेतां, श्वसेयुः, श्वसेः, श्वसेयम्,) अत्र गणकार्यस्यानित्यत्वज्ञापनात् शपो लुङ् न भवति। अनित्यत्वं च क्षमूषो घटादिपाठात् 'घटादयष्षित' इत्येव षित्वे सिद्धे पुनष्षित्करणात् ज्ञायते, एवं च। 'न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्' न विश्वसेत्पूर्वविरोधितस्य' 'आश्वसेयुर्निशाचराः' 'प्रत्ययादाश्वसन्त्य' इत्यादयः प्रयोगा उपपद्यन्ते। (अश्वस्यात्) इत्याद्यपि भवति। आशिषि, (श्वस्यात्, श्वस्यास्ताम्) इत्यादि। (अश्वसत्, अश्वसिष्टाम्, अश्वसीः, अश्वसिषम्)। "ह्मयन्तक्षणश्वस" इति "अतो हलादेः" इति वृद्धि-निषेधः। (शिश्वसिषति। शाश्वस्यते। शाश्वसीति,) इत्यादि रुदिवत्। (श्वासयति। अशिश्वसत्। श्वसनः)। नन्द्यादित्वाल्ल्युः। (श्वासः) 'श्याद्व्यध" इत्यादिना णः कर्तरि। (आश्वस्तः)। निष्ठायामिटं नेच्छन्ति काशकृत्स्ना इति स्वामिकाश्यपौ। "आदितश्च" इत्यत्र वृत्तिकारश्च 'चकारस्यानुक्तसमुच्चयार्थत्वाद् अनिट्त्वम्' इति। आत्रेयमैत्रेयौ तु आश्वसित इतीटं चाहतुः॥ ५९॥

अन च॥ (अनिति, अनितः, अनन्ति, अनिषि, अनिमि। प्राणिति)। "अनितेः" इत्युपसर्गस्थान्निमित्तात्परस्य अनितेर्नकारस्य णत्वम्। अत्र केचित्। "अन्त" इति वक्ष्य-माणमत्राप्यपकृष्य सम्बद्धसमीपवचनत्वं चाश्रित्य उपसर्गस्थनिमित्तसमीपभूतस्य अनि-तिनकारस्य णत्वमिति सूत्रार्थं वर्णयन्तो 'येन नाव्यवधानम्' इति न्यायेन प्राणितीत्यादावेव णत्वमिच्छन्ति, न तु पर्यनिति इत्यनेकवर्णव्यवधाने। (प्राण, प्राणतुः प्राणिथ, प्राणिव। प्राणिता। प्राणिष्यति। प्राणितु। प्राणितात्, प्राणत्। प्राण्यात्)। आशिषि, (प्राण्यात् प्राण्यास्तां, प्राणीत् प्राणिष्टाम्, प्राणीः)) इडीडडागमाः पूर्ववत्। (प्राणिणिषति। प्राणयति। प्राणिणत्)। "उभौ साभ्यासस्य" इत्युपसर्गस्थान्निमित्तात्परस्याभ्याससहितस्यानितेर्नकारयोर्णत्वमित्युभयत्र णत्वम्। एतच्च सूत्रं (पूर्वत्रासिद्धीयमद्विर्वचने) इत्यनाश्रित्योक्तम्। आश्रिते हि परत्वाण्णत्वे पश्चाद् द्विर्वचनं स्यादिति किं सूत्रेण। (प्राणः)। "हलश्च" इति करणे घञ्। (प्रा, प्राणौ, प्राणः, प्राणं, प्राणौ, प्राभ्यां) क्वौ पदसंज्ञायां नलोपः। (हे प्राण्) इत्यत्र "न ङिसम्बुध्योः" इति नलोपे निषिद्धे तस्य 'पदान्तस्य" इति णत्वनिषेधं बाधित्वा "अन्तः"इति णत्वम्। उपसर्गस्थान्निमित्तात्परस्य अनितेरन्तो नकारो णकारमापद्यत इति सूत्रार्थः॥ ६०॥

जक्ष भक्षहसनयोः। (जक्षिति, जक्षितः, जक्षति, जक्षिषि, जक्षिमि,) "जक्षित्यादयष्षट्" इतिरिदमर्थं, जक्षिरिदमादयश्चान्ये षड् धातवोऽभ्यस्ता इत्यभ्यस्तत्वात् "अदभ्यस्तात्" इति झेरदूभावः। (जजक्ष, जजक्षिथ, जजक्षिव। जक्षिता। जक्षिष्यति। जक्षितु, जक्षितां, जक्षतु, जक्षिहि, जक्षाणि। अजक्षीत्, अजक्षत्, अजक्षिताम्, अजक्षुः)। "सिजभ्यस्त" इति झेर्जुस्। (जक्ष्यात, जक्ष्याताम्,) अत्रापि चान्द्राः शपो लुकमनिच्छन्तो जक्षेदित्याहुः। आशिषि, (जक्ष्यात्, जक्ष्यास्ताम्। अजक्षीत, अजक्षिष्टाम्, अजक्षीः, अजक्षिषं,) रुदिवदिडादयः। (जिजक्षिषति। जाजक्ष्यते। जाजक्षीति, जाजष्टि)। "स्कोः" इति कलोपः। (जक्षयति। अजिजक्षत्। जक्षत्, जक्षतौ,) "उगिदचाम्" इति नुम् "नाभ्यस्ताच्छतुः" इति निषिध्यते। (जक्षति कुलानि, जक्षन्ति कुलानि)इत्यत्र जश्शसोः परयोः "वा नपुंसकस्य" इति नुम्। अत्रात्रेयः। के चिद्रामायणे यक्षशब्दस्य भक्षणार्थत्वेन व्युत्पादनादन्तस्थादिमाहुः, तच्चिन्त्यम् इत्युक्तम्। रामायणोक्तिस्तु यक्ष पूजायामित्यस्यानेकार्थत्वाश्रयेण निर्वाह्या॥ रुदादयः पञ्च गताः॥ ६१॥

जागृ निद्राक्षये॥ (जागर्ति, जागृतः, जाग्रति, जागर्षि, जागर्मि, जागृवः। जागराञ्चकार)। "उषविदजागृभ्योऽन्यतरस्याम्" इति पक्षे आम्प्रत्ययः। आमभावे, (जजागार, जजागरतुः, जजागरुः, जजागरिथ, जजागरथुः, जजागर। जजागर, जजागार, जजागरिव।)

"जाग्रोऽविचिण्णल्ङित्सु" इति विचिण्णल्ङिभ्योऽन्यस्मिन् वृद्धिविषये वृद्धिनिषेधविषये च गुणः । 'अविचिण्णल्ङित्सु' इत्यस्य पर्युदासत्वात् उत्तमे णलि णित्त्वाभावपक्षे "सार्वधातुकार्धधातुकयोः" इति गुणो भवत्येव । प्रसज्यप्रतिषेधेऽपि 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति "जाग्र" इति प्राप्तस्य गुणस्यैवायं निषेध इत्यदोषः । एवं च लङ्यपि (अजागरुः) इति "जुसि च" इति गुणो भवति । लडादीनां तसादेरपित्सार्वधातुकत्वेन ङित्त्वात् तत्र च पर्युदासात् "जाग्र" इति गुणो न भवति । (जागरिता । जागरिष्यति । जागर्तु, जागरितात्, जागृतां, जाग्रतु । जागृहि, जागराणि । अजागः, अजागृताम्, अजागरुः अजागः, अजागरम् , अजागृव,) तिप्सिपोर्गुणरपरत्वयोः हल्ङ्यादिलोपः (जागृयात् , जागृयातां, जागृयुः, जागृयाः, जागृयां, जागृयाव) । आशिषि (जागर्यात् , जागर्यास्ताम्) इत्यादि । क्त्त्वादगुणः । अयं पूर्वविप्रतिषेधेन रिङं बाधते । एवं जागर्यत इत्यादौ यक्यपि रिङं बाधित्वा गुणो भवति । तथा च कातन्त्रसूत्राणि । जागर्तेः कारिते । यणाशिषोर्ये । परोक्षायामगुणे' इति, कारितो हेतुमण्णिच् । यणिति यगुच्यते, आशीरित्याशीर्लिङ्, अनयोर्यकारादौ, परोक्षा लिट् । तत्रापिद्वचने गुण इत्यर्थः । (अजागरीत् , अजागरिष्टाम् , अजागरिषुः, अजागरीः, अजागरिषम् ,) "ह्म्यन्तक्षण" इत्यादिना सिचि वृद्धेर्निषेधः । (जिजागरिषति) । "सनि ग्रहगुहोश्च" इतीण्णिषेधस्तत्रैकाच इत्यनुवर्तनादिह न भवति । (जागरयति) । अत्र गुणे कृते "अत उपधायाः" इति वृद्धिः 'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य' इति न भवति । यद्वा गुणविधानसामर्थ्यादेव न भविष्यति । एवं च चिण्णलोः प्रतिषेधोऽर्थवान् । अन्यथा (अजागारि, जजागार) इत्यत्र गुणे कृते पुनर्वृद्धिर्भविष्यतीति किं गुणनिषेधेन । णौ चङि (अजजागरत्) । "सन्वल्लघुनि" इतीत्वं येन नाव्यवधानन्यायेन एकवर्णेन व्यवधान एव भवति, न पुनरनेकेनेति इह न भवति । यत्तु "अत्स्मृद्दृत्वर" इतीत्वापवादेनात्ववचनेनानेकव्यवधानेऽपीत्वं भवतीति ज्ञापनं तत् तुल्यजातीयस्य ज्ञापनमिति नीत्यासंयुक्तविषयमेवेति अचिक्षणत् इत्यादावेव प्रवर्तते । यत्तु कातन्त्रे मतान्तरेणोक्तम् इत्वदीर्घयोः अजीजागरत् इति भवतीति, तदप्येवं प्रत्युक्तम् । वृत्तिकारात्रेयवर्धमानादिभिरप्येतद्दूषितम् । (जागरूकः) । "जागरूकः" इत्यूकप्रत्ययः । आत्रेयस्तु "जागरूक" इति सूत्रं पठित्वा निपातमाह । (जागरितः । जागरितवान् । जागरित्वा) । "श्र्युकः किति" इत्यत्र "एकाच" इत्यनुवृत्तेरिण्णिषेधो न भवति (जागरः) । घञ् । (जागर्या, जागरा) "जागर्तेरकारो वा" इति भावे पक्षे शप्रत्यये यकि गुणः । अन्यथा त्वकारे गुणः । (जागृविः) । । "जॄशॄस्तॄजागृभ्यः क्विन्" इति क्विन्प्रत्ययः । "जाग्र" इति गुणोऽवीति पर्युदासान्न भवति । "जाग्रोऽवि" इत्यत्र वृत्तौ । केचिदिकारमुच्चारणार्थं वर्णयन्ति । तेन क्वसावपि वकारादौ गुणो न भवति । 'जागृवांसो अनुग्मन्' इत्युक्तम् । आत्रेयस्तु । 'तथा च सति शसि जजागरुष इति स्यात्' इतिवृत्त्युक्तमिदं मतं दूषयित्वा "असंयोगाल्लिट्कित्" इति क्वसोः कित्त्वे सिद्धे पुनस्तत्करणात् प्रतिषेधविषयारब्धस्यापि गुणस्य निषेध इति जजागृुष इति भवितव्यम्" इत्याह । कैयटेऽपि क्वसो भाषाविषयत्ववादिनां कित्त्वसामर्थ्यादगुणत्वमुक्तम् । अत्र वर्धमानः 'क्वसावगुणत्वमेवाहुः जजागृवानिति' इत्याह । "जाग्रोऽवि" इतीकारस्योच्चारणार्थत्वेऽपि क्वौ वकारलोपे वर्णाश्रये प्रत्ययलक्षणनिषेधात् वकारादेरभावादवीति पर्युदासाभावात् "जाग्र" इति गुणे जागरिति भवतीत्येके । अन्ये तु वर्णस्य प्राधान्याश्रयणेऽयं प्रत्ययलक्षणाभावो न तु गुणाभाव इति, यथा अतृणेडित्यत्र हलादौ पिति सार्वधातुके विधीयमानेमागमः प्रत्ययलक्षणेन भवति, तथाऽत्राप्यवीति पर्युदासेन भवितव्यमिति अगुणत्वे तुकि जागृदिति भवतीत्याहुः ॥ ६२ ॥

दरिद्रा दुर्गतौ ॥ (दरिद्राति, दरिद्रितः, दरिद्रति, दरिद्रासि, दरिद्रिथः, दरिद्रिथ, दरिद्रामि, दरिद्रिवः) । "इद्दरिद्रस्य" इति हलादौ क्ङिति सार्वधातुके इत्त्वम् । अजादौ तु "श्ना-

भ्यस्तयोरात" इत्याल्लोपः, (दरिद्रांचकार) । [कास्यनेकाच इति वक्तव्यं चुलुम्पाद्यर्थम्] इत्याम्प्रत्ययः । अत्र काश्यपः, आमो विकल्पमुक्त्वा 'ददरिद्रौ ददरिद्रवान्' इत्युदाजहार । एवं तरङ्गिणीकारोऽपि । अत्र मूलं पारायणिकेनोक्तम् । "आत औ णलः" इत्यत्र प्रथमातिक्रमे कारणाभावादोकारवचनेनापि पपावित्यादिसिद्धौ औकारवचनं [दरिद्रातेरार्धधातुके लोपो वक्तव्यः] इत्याल्लोपे ददारिद्राविंत्याद्यर्थमेवार्थवत्" इति । "वस्वेकाच्" इत्यत्र वृत्तिकारेण दरिद्रातेस्तु [कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थम्] इत्यामा भवितव्यं, (दरिद्रांचकार) इति । अथाप्याम्न क्रियते तथापि 'दरिद्रातेरार्धधातुके लोपस्सिद्धश्च प्रत्ययविधौ' इति प्रागेव प्रत्ययोत्पत्तेराकारलोपे कृते इडागमस्य निमित्तं विहितमिति नेडागमो भवति, ददरिद्रवान् इति भवितव्यम्" इत्यभ्युपगम्यवादेनामभाव उक्तः । अभ्युपगमस्य मूलम् "आत औ णल" इत्यौकारवचनमाह हरदत्तः । आत्रेयस्त्वाम्नित्य इत्युक्त्वा वृत्तिकारोक्तमभ्युपगम्यवाद इत्याह । (दरिद्रिता । दरिद्रिष्यति । दरिद्रातु, दरिद्रितात्, दरिद्रितां, दरिद्रिहि, दरिद्राणि । अदरिद्रात्, अदरिद्रिताम्, अदरिद्रुः) । "सिजभ्यस्त" इति जुसि "श्नाभ्यस्तयोरात" इत्याकारलोपः । "लङश्शाकटायनस्यैव" इति जुस्विकल्पो झावस्थायामेव । "ई हल्यघोः" इतीत्वं च यथा न भवति तथा जहातौ वक्ष्यते। (अदरिद्राः, अदरिद्राम् । दरिद्रियात्, दरिद्रियाताम्) । आशिषि, (दरिद्र्यात्, दरिद्र्यास्ताम्) । आर्धधातुकत्वादातो लोपः, (अदरिद्रीत्, अदरिद्रिष्टाम्, अदरिद्रिषुः, अदरिद्रीः, अदरिद्रिषम्) 'अद्यतन्यां वा' इति 'दरिद्रातेरार्धधातुके' इत्याल्लोपस्य विकल्पनात्तदभावे सगिटोः (अदरिद्रासीत्) इत्यादि । चिणि (अदरिद्रि) । आलोपाभावे युकि (अदरिद्रायि । दिदरिद्रासति, दिदरिद्रिषति) । "तपिपतिदरिद्राणाम्" इति इड्विकल्पः । इडभावे

न दरिद्रायके लोपो दरिद्राणे च नेष्यते ।
दिदरिद्रासतीत्येके, दिदरिद्रिषतीति वा ॥

इत्युक्तत्वादाल्लोपाभावः । (दरिद्रायकः) ण्वुल् । (दरिद्राणः) । ल्युट् । निष्ठायां (दरिद्रितः) इटि । "यस्य विभाषा" इतीण्णिषेधस्तु कृतिप्रभृतीनामीदित्त्वेन तस्यानित्यत्वज्ञापनान्न भवति । दरिद्रातीति (दरिद्रः) पचाद्यच् । "श्याद्व्यध" इत्याकारान्तलक्षणस्तु णो न भवति, "दरिद्रातेरार्धधातुके" इत्यस्य विषयसप्तमीत्वात् प्रागेव प्रत्ययोत्पत्तेराल्लोपात् । (दद्रूः) । 'दरिद्रायालोपश्च' इतीकाराकारयोर्लोपः, ऊकारप्रत्ययश्च । या इति इकाराकारयोर्निर्देशः । (दद्रुणः) । पामादिषु 'दद्वां ह्रस्वत्वं च' इति पाठान्नप्रत्ययो ह्रस्वत्वं च ६३

चकासृ दीप्तौ ॥ (चकास्ति, चकास्तः, चकासति, चकास्सि, चकास्मि, चकास्वः । चकासांचकार) । "कास्यनेकाच" इत्याम् । (चकासिता । चकासिष्यति । चकास्तु, चकास्तां, चकासतु, चकाधि,) "धि च" इति सलोपः । केचित्तु "धि च" इति सिचो लोपमिच्छन्तः चकाद्धि इति सकारस्य दत्वमुदाहरन्ति । तत् 'यथा तु भाष्यं तथा चकाधीत्येव भवितव्यम्' इति वदता वृत्तिकारेणैव प्रत्युक्तम् । (अचकात्) । "तिप्यनस्तेः" इति सकारस्य दत्वम् । (अचकास्ताम्, अचकासुः) । "सिजभ्यस्त" इति जुस् । (अचकात्, अचकाः) । "सिपि धातो रुर्वा" इति रुत्वदत्वे । (अचकासम् । चकास्यात्, चकास्याताम् ।) आशिषि (चकास्यात्, चकास्यास्ताम् । अचकासीत्, अचकासिष्टाम्, अचकासीः, अचकासिषम् । चिचकासिषति । चकासयति । अचीचकासत्,) ऋदित्त्वात् "णौ चङि" इति न ह्रस्वः ॥ ६४ ॥

शासु अनुशिष्टौ ॥ अनुशिष्टिर्विविच्य ज्ञापनम् । अयं द्विकर्मकः । माणवकं धर्मं शास्तीति । कर्मणि लादिकार्यं सर्वं ब्रवीतिवन्नेयम् । (शास्ति, शिष्टः।शासति, शास्सि, शिष्ठः, शिष्ठ, शास्मि, शिष्वः, शिष्मः,) "शास इदङ्हलोः" इत्यङि हलादौ क्ङिति चेत्त्वम् । "शासिवसि" इतीणः परत्वे षत्वे ष्टुत्वं तवर्गस्य । (शशास, शशासतुः, शशासिथ, शशास,

शशासिव । शासिता । शासिष्यति । शास्तु, शिष्टात्, शिष्टां, शासतु, शाधि, शिष्टं, शिष्ट, शासानि, शासाव) हौ "शा हौ" इति शाभावे, तस्य च "असिद्धवदत्र" इत्यसिद्धत्वात् "हुझल्भ्यो हेर्धिः" इति धित्वम् । (अशात्, अशिष्टाम्, अशासुः, अशाः, अशात्, अशिष्टम्, अशासम्, अशिष्व,) तिप्सिपोः पूर्ववत् दत्वरुत्वे । (शिष्यात्, शिष्याताम्) आशिषि (शिष्यात्, शिष्यास्ताम् । अशिषत्, अशिषताम्, अशिषन्, अशिषः, अशिषम्, अशिषाव,) "सर्तिशास्ति" इत्यङ् । अत्र 'चकारेण परस्मैपदानुकर्षणमुत्तरार्थम् । अयं तु योगविभागसामर्थ्यादात्मनेपदेऽपि भवति' इति वृत्तितद्व्याख्यानेष्वभिधानाद् (व्यत्यशिषत् व्यत्यशिषाताम्) इत्यङेव भवति । कर्मणि तेशब्दपरत्वात "चिण्भावकर्मणोः" इति चिण् भवति । (अशासीति । शिशासिषति । शेशिष्यते) । परत्वाद् द्वित्वे कृते द्विर्वचनम् । (शाशासीति, शाशास्ति, शाशिष्टः,) प्रकृतिग्रहणन्यायेन "शास" इत्त्वम् । "सर्तिशास्ति" इति तिपा निर्देशात् (अशाशासीत्) इत्यत्राङ् न भवति । (शासयति । अशशासत्) । "नाग्लोपि शासु" इत्युपधाह्रस्वनिषेधः । (शिष्यः) "एतिस्तुशासु" इति क्यप् । शास्यस्तु शसु हिंसायामिति भौवादिकस्य 'हन्त्यर्थाश्च' इति चुरादिपाठात्स्वार्थे णिचीत्युक्तमात्रेण । शास्तेर्हेतुमण्णावपि शक्यते व्युत्पादयितुम् । (दुश्शासनः) । [भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वक्तव्यः] इति खलर्थे युच् । (आशीः) । क्विपो लोपे प्रत्ययलक्षणेन हलादिकित्परत्वादित्वे पदत्वेन सकारस्य रुत्वे "र्वोरुपधायाः" इति दीर्घः । न चास्ति 'वर्णाश्रये नास्ति प्रत्ययलक्षणम्' इति, यत्र वर्णस्य प्राधान्येनाश्रयणं तत्र तदित्युक्तत्वात् । (शिष्ट्वा, शासित्वा) । "उदितो वा" इतीड्विकल्पः । (शिष्टः) । "यस्य विभाषा" इत्यनिट्त्वम् । (शिष्टिः) । "तितुत्र" इतीण्णिषेधः । शास्तिशब्दस्तु अस्माद्वा हिंसार्थाद्वा णिचि क्तिनि व्युत्पाद्यः । बाहुलकाद् युचा न बाधः । तथा च "अचः परस्मिन्" इत्यत्र भाष्यम् । 'पाचयतेः पाक्तिः याजयतेर्याष्टिः' इति । औणादिक इति मैत्रेयः । हिंसार्थस्य औणादिक इत्यात्रयः (शास्ता) बुद्धः, (प्रशास्ता) ऋत्विग्विशेषः । "तृन्तृचौ शंसिक्षदादिभ्यस्संज्ञायां चानिटौ" इति तृच्यनिट्त्वम् । "अप्तृन्" इत्यादिना सर्वनामस्थानेऽसम्बुद्धौ प्रशास्तृशब्दस्य उपधाया दीर्घः । अत्र 'प्रोपसर्गस्यातन्त्रत्वात् शास्तुरप्ययं दीर्घो भवति' इत्यात्रेयः । प्रशास्तुर्भावकर्मणी (प्राशास्त्रम्) उद्गात्रादित्वादञ् । षसादय उदात्ता उदात्तेतः ॥ ६५ ॥

दीधीङ् दीप्तिदेवनयोः ॥ (दीधीते, दीध्याते, दीध्यते, दीधीषे, दीधीध्वे, दीध्ये, दीधीवहे) अजादौ "एरनेकाच" इति यण् । "यीवर्णयोर्दीधीवेव्योः" इति यकारादाविकारादौ च विधीयमानयीकारलोप इटि न भवति । नित्यत्वेन टेरेत्वे इवर्णाभावात् । (दीध्यांचक्रे,) "दीधीवेवीटाम्" इति गुणे निषिद्धे यणादेशः। (दीधिता । दीधिष्यते) । इटि "यीवर्णयोः" इतीकारलोपः। (दीधीतां, दीध्यातां, दीधीष्व, दीध्यै, दीध्यावहै,) आटि वा ऽगुणत्वम् । (अदीधीत, अदीध्याताम्, अदीधीथाः, अदीधि,) "यीवर्णयोः" इति लोपः । (दीधीत, दीधीयातां) लिङस्सलोपे "यीवर्णयोः" इति लोपः । आशिषि, (दीधीषीष्ट, अदीधिष्ट, अदीधिष्ठाः, अदीधिषि, दिदीधिषते । दीधयति,) "दीधीवेव्योः" इति वृद्धिनिषेधे, "यीवर्णयोः" इति लोपे शपि णेर्गुणायौ । (दीधितिः) । संज्ञायां क्तिचि "तितुत्र" इतीण्णिषेधो न भवति, "अग्रहादीनाम्" इति तत्रोक्तत्वात् ॥ ६६ ॥

वेवीङ् वेतिना तुल्ये ॥ वी गतीत्यनेन तुल्येऽर्थे वर्तत इत्यर्थः । पूर्ववदुदाहरणादीनि । "सेटावात्मनेभाषौ इमौ छान्दसौ" इति भाष्यवार्तिकयोः स्थितम् । दृष्टानुविधिश्छन्दसि । अस्माभिस्तु कलापमतानुसारेण उदाहरणप्रदर्शनं कृतम् । जक्षित्यादयो गताः ॥ ६७ ॥

षस षस्ति स्वप्ने ॥ अयं पाठो मैत्रेयात्रेयादीनाम् । अत्र केचित् । षस्तीति न पृथग्धातुः, किन्तु षसेरेव श्तिपा निर्देशोऽर्थभेदात्पुनः कृत इति । स्वामी तु 'षस षसने' इत्या-

घमेव पपाठ । षसनं च स्वप्नः । (सस्ति, सस्तः, ससन्ति, सस्सि सस्मि, । ससास, सेसतुः, सेसुः, सेसिथ, सेस, ससास, ससस, सेसिव) एत्वाभ्यासलोपौ । (ससिता । ससिष्यति । सस्तु, सधि) "धि च" इति सलोपः । "अतो हेः" इति स्थानिवद्भावेन हेर्लोपो ।न भवतिः सलोपस्य पूर्वत्रासिद्धत्वात् । (ससानि । असत्, असस्ताम्, असः, असत्,) "तिप्यनस्तेः" इति दत्वम् । सिपि तु "सिपि धातोर्रुर्वा" इति रुत्वं च । हल्ङ्यादिलोप उभयत्र । (सस्यात्, सस्याताम्) आशिषि सलोपभावो विशेषः । (असासीत्, अससीत्) "अतो हलादेः" इति वा वृद्धिः (सिससिषति । सास्यते । सासस्ति । सासयति । असीषसत् । सस्यम्) "माच्छाससिसूभ्यो य" इति यः । (सस्यको) मणिः । "सस्येन परिजात" इति कन् । अत्र सस्यशब्दो गुणवाचीति हरदत्तः । गुणैः परिगतो जात आकारशुद्ध इत्यर्थः । (सास्ना,) गवां कण्ठकम्बलः । "रास्नासास्नास्थूणावीणा" इति निपात्यते । (संस्ति, संस्तः, संस्तन्ति,) "स्कोः" इति सलोपोऽत्र न भवति, बहूनां समवाये द्वयोस्संयोगसंज्ञाभावादित्यात्रेयमैत्रेयौ । छान्दसत्वाच्चेहास्माभिरयमर्थः प्रपञ्च्यते । तथा च "जक्षित्यादयष्षट्" इत्यत्र हरदत्तः । 'षसषस्ती छान्दसौ; वशिरपि । तस्यापि भाषायां न प्रयोगस्साधुः, भाष्यवार्तिककारौ चेत्प्रमाणम्' इति । तथा च भाष्यमपि "षसिवशी छान्दसौ" इति । अत्र कैयटः 'षसिवशी' इति । षस षस्ति स्वप्ने इति ये न पठन्ति केवलं 'षस स्वप्ने' 'वश कान्तौ' इति तन्मतेनैतदुक्तम् । अन्ये त्वाहुः । षस्तीति धातुपाठ एव श्तिपा निर्देशः कृतः । अर्थभेदात्तु द्विः पठितः । अन्ये तु षस स्वप्ने इति न पठन्तीति । अत्र सुधाकरः । 'षस षसने' 'वश कान्तौ' छान्दसौ "जक्षित्यादयष्षट्" इत्यत्र भाष्यादेवावधृतौ 'वष्टि भागुरिरल्लोपम्' इति दुर्लभः प्रयोग" इति ॥ ६९ ॥

वश कान्तौ ॥ (वष्टि, उष्टः, उशन्ति,व क्षि, उष्ठः, उष्ठ, वश्मि, उश्वः,) व्रश्चादिना झलि पदान्ते च षत्वम् । ग्रहिज्यादिना क्ङिवोः प्रसारणम् । (उवाश, ऊशतुः, उवशिथ, उवशिव,) क्ङिति ग्रहिज्यादिना कृते प्रसारणे द्विर्वचनम् । अन्यत्र तु कृते द्विर्वचने "लिट्यभ्यासस्य" इति प्रसारणम् । (वशिता । वशिष्यति । वष्टु, उष्टात्, उष्टाम्, उड्ढि, वशानि, (हेर्धित्वष्टुत्वजश्त्वानि ॥ (अवट्, औष्टाम्, औशन्, अवट्, औष्टम्, औष्ट, अवशम्, औश्व) क्ङिति प्रसारणे आडागमः । अन्यत्र तु हल्ङ्यादिना तिस्योर्लोपः । (उश्यात्, उश्याताम्) आशिषि (उश्यास्ताम् । अवशीत्, अवाशीत्,) "अतो हलादेः" इति वा वृद्धिः ॥ (विवशिषति । वावश्यते) "न वशः" इति यङि प्रसारणनिषेधः (वावष्टि, वावष्ट) इत्यादौ श्तिपा निर्देशात् ग्रहिज्यादिना प्रसारणं न भवति । (वाशयति । अवीवशत् । वशित्वा) "न क्त्वा सेट्" इत्यकित्त्वम् । (वशा,) करिण्यादिः । पचाद्यचि टाप् । (गोवशा) । "पोटायुवती" इत्यादिना समासः । वन्ध्या गौरित्यर्थः । (वशः) । "वशिरण्योरुपसङ्ख्यानम्" इति भावेऽप् । वशं गतो (वश्यः) । "वशं गतः" इति द्वितीयान्तात्(१) गत इत्यर्थे यत् । (उशिक्) अग्न्यादिः । "वशः किच्च" इतीजिप्रत्ययः । कित्त्वात्प्रसारणम् । उशिगेव (औशिजः) । प्रज्ञादिः । (उशीरम्) । "वशेः कित्" इतीरन्नौणादिकः । (उशना) । "वशेः कनसिः" इति कनसिः "ऋदुशनस्पुरुदंसोऽनेहसां च" इत्यसम्बुद्धौ सावनङादेशः । सम्बुद्धावपि पक्षे अनङिष्यते "न ङिसम्बुद्ध्योः" इति नलोपनिषेधस्य पाक्षिकत्वं च । तेन त्रीणि रूपाणि भवन्ति (उशनः, उशनन्, उशन) इति । तथा च श्लोकवार्तिकम् ।

'सम्बोधने तूशनसः त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम्' ॥

इति ॥ षसादय उदात्ता उदात्तेतः ॥ ७० ॥

चर्करीतं च ॥ यङ्लुगन्तमप्यदादिकं परस्मैपदि चेत्यर्थः । तत्र तत्रोदाहरणेषु तथैवोदाहृतम् ॥ ७१ ॥

(१) द्वितीयाश्रमर्थादिति पुस्तकान्तरे पाठः ।

ह्नुङ् अपनयने ॥ (देवदत्ताय निह्नुते, निह्नुवाते, निह्नुवते, निह्नुषे, निह्नुवे) । अजादावुवङ्। "श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः" इति ज्ञीप्स्यमानस्य सम्प्रदानत्वम्॥ (निजुह्नुवे, निजुह्नुव निजुह्नुविषे, निजुह्नुविध्वे, निजुह्नुविद्वे,) उवङि "विभाषेटः" इति मूर्धन्यविकल्पः ।(निह्नोता । निह्नोष्यते । निह्नुताम् , निह्नुष्व, निह्नुवै,) आटि गुणः । (न्यह्नुत, न्यह्नुवाताम् , न्यह्नुथाः, न्यह्नुहि, न्यह्नुवहि । निह्नुवीत, निह्नुवीयाताम्)। आशिषि (निह्नोषीष्ट)। आर्धधातुकत्वेनाङित्त्वाद्गुणः । (न्यह्नोष्ट, न्यह्नोष्ठाः, न्यह्नोध्वम्, न्यह्नोषि । निजुह्नूषते) "इको झल्" इति कित्त्वे "अज्झनगमां सनि" इति दीर्घः । (निजोह्नूयते, निजोह्नूवीति, निजोह्नोति । निह्नावयति । न्यजुह्नवत्)। अनुदात्त आत्मनेभाषः ॥ ७२ ॥

इति श्रीपूर्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसङ्गमहाराजमहामन्त्रिणा
मायणसुतेन माधवसहोदरेण श्रीसायणार्येण विरचितायां माधवी-
यायां धातुवृत्तौ अदादयः सम्पूर्णाः ॥

अथ जुहोत्यादिः ।

हु दानादनयोः ॥ दानादानयोरित्यन्ये । आत्रेयस्तु हु दाने इति पठित्वा, आदानेत्येके इति । एतदादयो ह्रीपर्यन्ता अनुदात्ताः परस्मैपदिनः । इह दानं चोदिताधारे त्यक्तहविःप्रक्षेप इति हविषोऽनिजीवत्यादौ प्राणादिवत् धात्वर्थेऽन्तर्भावात् अकर्मकत्वमेके मन्यन्ते । वयं तु धात्वर्थः प्रक्षेपमात्रम्, स च स्वभावाचोदिताधारहविषि नियमेनापेक्षतइति । तथा च "तृतीया च होश्छन्दसि" इत्यत्र भाष्ये जुहोतिः ।प्रक्षेपे वर्ततइत्युक्तम् । एवं च यवागूं जुहोतीत्यादयस्सकर्मकाः प्रयोगा उपपद्यन्ते। उक्तं चात्रैव भाष्ये 'कथं द्वितीया सिद्धा, कर्मणीत्येव' इति । एवं च "तृतीया च होश्छन्दसि" इति कर्मणि तृतीयाविधानमप्युपपद्यते । (जुहोति, जुहुतः, जुह्वति, जुहोषि, जुहोमि,) "जुहोत्यादिभ्यश्श्लुः" इति शपः श्लौ, "श्लौ" इति धातोर्द्विर्वचने "कुहोश्चुः" इत्यभ्यासस्य चुत्वं झकारः। तस्य "अभ्यासे-चर्च" इति जश्त्वं जकारः । पिति गुणः । "उभेऽभ्यस्तम्" इत्यभ्यस्तत्वात् "अदभ्यस्तात्" इति झस्याद्भावे "हुश्नुवोस्सार्वधातुके" इत्यजादौ क्ङिति सार्वधातुके विधीयमानो यण् भवति । (जुहाव, जुहुवतुः, जुहविथ, जुहोथ, जुहुवथुः, जुहुव, जुहाव, जुहव, जुहुविव,) क्रादिनियमादिट् । थलि भारद्वाजनियमाद्विकल्पः । अजादौ क्ङित्युवङ् । अन्यत्र गुणवृद्धी । (जुहवांचकार)। "भीह्रीभृहुवां श्लुवच्च" इति पक्षे आम्प्रत्ययः श्लुवद्भावाद् द्विर्वचनं च । (होता । होष्यति । जुहोतु, जुहुतां, जुह्वतु, जुहुधि,) "हुझल्भ्यो हेर्धिः" इति धित्वम् । (जुहवानि) आटि पित्त्वाद्गुणः । (अजुहोत्, अजुहुताम् , अजुहवुः,) "हुश्नुवोः" इति यणं परत्वाद्बाधित्वा "जुसि च" इति गुणः, (अजुहोः, अजुहुतम् , अजुहवम् । जुहुयात्, जुहुयाताम् , जुहुयुः)। आशिषि, (हूयात् , हूयास्ताम् ,) "अकृत्सार्वधातुकयोः" इति दीर्घः । (अहौषीत् , अहौष्टाम् , अहौषुः, अहौषीः, अहौष्टम् , अहौषम् , अहौष्व,) सिचि वृद्धिः । (जुहूषति)। "इको झल्" इति कित्त्वात् , "अज्झन" इति दीर्घः । (जोहूयते । जोहोति)। अत्र विस्तरे "हुश्नुवोः" इति सूत्रं "जुहोतेस्सार्वधातुके" इति पठित्वा श्तिपा निर्देशात् जोहुवति इत्यत्र यण् नेत्युक्तम् । तन्मुनित्रयेणानादृतम् । (हावयति । अजूहवत्)॥ (जुह्वत् ब्राह्मणः) "नाभ्यस्ताच्छतुः" इति नुम्निषेधः । (जुह्वति) ब्राह्मणकुलानि (जुह्वन्ति) वा ब्राह्मणकुलानीत्यत्र "वा नपुंसकस्य" इति जश्शसोर्नुम्विकल्पः। (जौह्वतः) कृष्णमृगः, "जुह्वत्कृष्णमृग" इति प्रज्ञादिपाठादण् ।(होता, होतारौ,) तृन्विधौ "ऋत्विक्षु

चानुपसर्गस्य" इति तृन् औणादिको वा, "अप्तृन्" इत्यादिना सर्वनामस्थाने दीर्घः। होतु र्भावकर्मणी (हौत्रम्) उद्गात्रादित्वात् यवादित्वाच्च अञणौ। (क्षीरहोता)। याजकादित्वात्समासः। (हाव्यम्,)। "ओरावश्यके" इति ण्यत्। (जुहूः)। "जुहोतेर्दीर्घश्च" इति क्विपि दीर्घो द्वित्वं च। (जुह्वौ) इत्यादौ "ओःसुपि" इति यण्। (होमः)। "अर्तिस्तु" इत्यादिना मन्। (होत्रम्)। ष्ट्रन्॥ (हविः)। "अर्तिशुचि" इत्यादिना इसिः। हविषि हितं (हविष्यम्)। "उगवादिभ्य" इति यत्। (होत्रा,) ऋत्विजां वाचकः। "हुयामा" इति त्रन्। स्वभावतोऽयं ऋत्विक्ष्वपि स्त्रीलिङ्ग इति "होत्राभ्यश्च" इत्यत्र हरदत्तः। अयं प्रीणनार्थेऽपीति भाष्ये। तथा च 'अग्निहूयमानेषु' इति प्रयोगो दृश्यते। तर्प्यमाणेष्विति सूत्रार्थः॥ १॥

ञिभी भये॥ (बोभाद्बिभेति, बिभितः बिभीतः बिभ्यति, बिभेषि, बिभीथः, बिभिथः, बिभीथ, बिभिथ, बिभेमि, बिभीवः, बिभिवः,) "भीत्रार्थानां भयहेतुः" इति भयहेतोः कारकस्य अपादानत्वम्। "भियोऽन्यतरस्याम्" इति हलादौ क्ङिति सार्वधातुके वा इकारः। (व्यतिबिभीत) इत्यादावात्मनेपदेऽप्ययमित्वविकल्प उदाहार्यः। (व्यतिबिभ्यत) इत्यत्र "आत्मनेपदेष्वनतः" इत्यद्भावे 'परिहृत्यापवादविषयमुत्सर्गोऽभिनिविशते' इति न्यायेन द्विर्वचनोत्तरकालमनेकाच्त्वात् "एरनेकाच" इत्यपवादस्य यणो भावित्वात् पूर्वमियङ् न प्रवर्तते। यद्वात्रान्तरङ्गत्वात् "श्लौ" इति द्विर्वचने पश्चादद्भाव इति नैव इयङः प्रसङ्गः। (बिभाय, बिभ्यतुः बिभयिथ, बिभेथ, बिभ्यिव,) क्रादिनियमादिट्। थलि भारद्वाजनियमाद्विकल्पः। (बिभयांचकार। "भीह्री" इत्यादिना पक्षे आम्प्रत्ययः श्लुवद्भावश्च। (भेता। भेष्यति। बिभेतु, बिभीतात्, बिभीताम्, बिभ्यतु, बिभीहि, बिभिहि, बिभितात्, बिभीतम्, बिभयानि,) हेरपित्वात् ङित्वात् पक्षे इत्वम्। एवं तातङ्यन्येषु ङित्सु चोक्तम्। उत्तमआटि गुणायौ। (अबिभेत्, अबिभीताम्, अबिभयुः,) यणं बाधित्वा परत्वात् जुसि गुणः। (अबिभेः, अबिभीतम्, अबिभितम् अबिभयम्, अबिभीव, अबिभिव। बिभीयात्, बिभीयाताम्, बिभियाताम्, बिभीयाः, बिभियाः, बिभीयां,) पिद्वचनेष्वपि यासुटो ङित्वादित्वे (बिभियात्) इत्याद्युदाहार्यम्। आशिषि, (भीयात्, भीयास्ताम्) इत्यादि। आर्धधातुकत्वान्नात्रेत्वपक्षः॥ (अभैषीत्, अभैष्टाम्, अभैषीः अभैषम्,) सिचि वृद्धिः। (बिभीषति,) "इको झल्" इति सनः कित्वात् न गुणः। (बेभीयते। बेभेति, बेभीतः, बेभितः,) प्रकृतिग्रहणन्यायेन "भियोऽन्यतरस्याम्" इति वेत्वम्। (भापयते अबीभपत। भीषयते, अभीषयत, अबीभषत) मुण्डः। "बिभेतेर्हेतुभये" इति णावात्वे पुक्। अन्यदा "भियो हेतुभये पुक्" अत्र हि ई इतीकारप्रश्लेषणेन ईकारान्तस्य पुको विधानात् आत्वपक्षे स न भवति। "भीस्म्योर्हेतुभये" इत्युभयत्र तङ्। हेतुभयार्थः स्मयतावुक्तः। अहेतुभये तु कुञ्चिकयैनं भाययति अबीभयद् इति वृद्ध्यायौ। (बिभ्यत्। भीषणः।) नन्द्यादित्वात् ण्यन्ताल्ल्युः। (भीतः)। "ञितः क्तः" इति वर्तमाने क्तः। (भयम्)। [अज्विधौ भयादीनामुपसङ्ख्यानं नपुंसके क्तादिनिवृत्त्यर्थम्] इति क्तल्युटौ बाधित्वा अजेव भवति। पारायणे तु वासरूपेण क्तो दर्शितः। तदसत्, क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिप्रतिषेधात्। (भीः, भियौ)। सम्पदादित्वात्क्विप्। क्तिन्नपीष्यते (भीतिः)। वृकेभ्यो भयं (वृकभयम्)। "पञ्चमी भयेन" इति तत्पुरुषः। [भयभीतभीतिभीभिरिति वक्तव्यम्] इति भीतादिभिरपि समासो नेयः। (भीरुः, भीलुकः)। "भियः क्रुक्लुकनौ" इति क्रुक्लुकनौ। (भीरुकः)। [क्रुकन्नपि वक्तव्यम्] इति क्रुकन्। (भीमः, भीष्मः)। "भियष्षुक्च" इति मक्प्रत्यये पक्षे षुगागमः। "भीमादयोऽपादाने" इत्यपादाने ऽयं प्रत्ययः। (भयानकः)। आनकन्। "शीङ्भियः" इत्यानकन्। अयमपि भीमादिः। (भेकः) "इण्भी" इति कन्॥ २॥

ह्री लज्जायाम्॥ (जिहेति) इत्यादि बिभेतिवत्। जिह्रियतीत्यादौ अजादौ संयोगपूर्व-

त्वाद्यभावात् इयङ्विशेषः । (ह्रेपयति) । "अर्तिह्री" इत्यादिना पुगागमः "पुगन्त" इति गुणः । (अजिह्रिपत् । ह्रीः) सम्पदादित्वात्क्विप् (ह्रीतः ह्रीणः, ह्रीतवान्, ह्रीणवान्) "नुद-विद" इत्यादिना वो निष्ठानत्वे णत्वम् । (ह्रीकः, ह्लीकः) । "ह्रियः कन्नश्च लो वा" इति कनि रेफस्य वा लत्वम् । (ह्रीणियते) रुष्यतीत्यर्थः । "ह्रीणीङ्" इति कण्ड्वादिपाठात् स्वार्थे यक् ॥ जुहोत्यादयोऽनुदात्ताः परस्मैपदिनः ॥ ३ ॥

पॄ पालनपूरणयोः ॥ उदात्तः परस्मैभाषः । (पिपर्ति, पिपूर्तः, पिपुरति, पिपर्षि, पिपर्मि,) "अर्तिपिपर्त्योश्च" इति श्लावभ्यतस्येत्वम् । "उदोष्ठ्यपूर्वस्य" इत्युत्वं रपरमॄकारस्यागुणवृद्धिविषये, हलादौ "हलि च" इति दीर्घः । गुणवृद्ध्योर्विषयेषु तु विप्रतिषेधेन ते भवतः । (पपार, पप्रतुः, पप्रुः, पपरिथ, पप्रथुः, पप्र, पपार, पपर, पप्रिव) । "ऋच्छत्यॄताम्" इति किति लिटि गुणापवादे "शॄदॄप्रां ह्रस्वो वा" इति वा ह्रस्वे यणादेशः । अन्यदा गुणे (पपरतुः, पपरुः, पपरिथ, पपर, पपरिव,) इति । (परिता, परीता । परिष्यति, परीष्यति,) "वॄतो वा" इत्यलिटीटो वा दीर्घः । (पिपर्तु, पिपूर्तात्, पिपूर्ता, पिपुरतु, पिपूर्हि) ह्रेरपित्त्वान् ङित्वान्न गुणः । (पिपराणि, पिपराव) आटि गुणः । (अपिपः, अपिपूर्ताम्, अपिपरुः,) अत्रोत्वात्परत्वात् "जुसि च" इति गुणः । (अपिपः, अपिपूर्तम्, अपिपरम्, अपिपूर्व) गुणे हल्ङ्यादिना तिस्योर्लोपः । (पिपूर्यात्, पिपूर्याताां, पिपूर्याः, पिपूर्याम्) । आशिषि, (पूर्यात्, पूर्यास्तां,) यासुटः कित्त्वाद्गुणाभावः । उत्वम् । (अपारीत्, अपारिष्टाम्, अपारीः, अपारिषम्,) सिचि वृद्धिः । "वॄतो वा" इतीटो दीर्घस्य "सिचि परस्मैपदेषु" इति निषेधः । (पिपूर्षति) । "इट् सनि वा" इति पक्षे इडागमः । इडभावे "इको झल्" इति सनः कित्त्वे उत्वम् । इटि तु तस्य पूर्ववद्दीर्घविकल्पे प्रकृतेश्च गुणे (पिपरिषति पिपरीषति) इति । (पोपूर्यते । पापर्ति, पापरीति, पापूर्तः) इत्यादि । अभ्यासस्योरदत्वहलादिशेषयोः "दीर्घोऽकितः" इति दीर्घः । रुग्रिग्रीकामभावस्तरतिवत् । (पिपुरत्, पिपुरतौ,) शता । (पारयति । अपीपरत् । निपूर्तः, निपूर्तवान्) "न ध्याख्यापॄमूर्छिमदाम्" इति निष्ठानत्वनिषेधः । (पूर्त्वा) । "श्र्युकः किति" इत्यनिट्त्वम् । (पूः, पुरौ, पुरः) "भ्राजभास" इति क्विप् । "उदोष्ठ्यपूर्वस्य" इत्युत्वम् । "र्वोः" इत्यादिना उपधादीर्घः । अत्र वक्तव्यं पूर्वत्राप्युक्तम् । (पुरुषः) "पुरः कुषन्" इति कुषन् । (पौरुषेयः) वधो विकारसमूहः कृते ग्रन्थादिर्वा । "सर्वपुरुषाभ्यां णढञौ" इति ढञ् । तथा च तत्र वार्तिकम् । "पुरुषाद्वधविकारसमूहतेनकृतेषु" इति कृते तृतीया समर्थविभक्तिः, अन्यत्र तु षष्ठी । पुरुषः प्रमाणमस्य (पौरुषम्, पुरुषद्वयसम् पुरुषदघ्नम्, पुरुषमात्रम्,) "पुरुषहस्तिभ्यामण्च" इत्यण्, द्वयसजादयश्च चशब्दात् । द्वौ पुरुषौ प्रमाणमस्याः (द्विपुरुषी, द्विपुरुषा) । अत्र प्रमाणे विहितस्य द्वयसजादेः "प्रमाणे लः" "द्विगोर्नित्यम्" इति लुक् । "तद्धितार्थ" इति द्विगुः "पुरुषात्प्रमाणेऽन्यतरस्याम्" इति प्रमाणवाचिपुरुषशब्दान्तात् द्विगोस्तद्धितलुकि पक्षे ङीब्निषेधात् टाप् । राजपुरुषस्य भावकर्मणी (राजपौरुष्यम्) । राजपुरुषात् ष्यञ्, अनुशतिकादित्वादुभयपदवृद्धिः । पुरुषान् गच्छति पुरुषेषु वसति वा (पुरुषत्रा) । "देवमनु(१)ष्यपुरुषपुरुषमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्" इति द्वितीयान्तात् सप्तम्यन्ताच्च स्वार्थे त्राप्रत्ययः । (पुरुः) । "पॄभीधीव्यधिगृधिधृषिदृशिभ्यश्च" इति कुप्रत्ययः । "उदोष्ठ्यपूर्वस्य" इत्युत्वम् । (पुरुत्रा) । पूर्ववत् त्राप्रत्ययः । (पूर्णम्) । "धापॄवशी" इत्यादिना नप्रत्ययः । (पुरीषः) "शॄपॄभ्यां किच्च" इति षन्प्रत्ययः । (पर्व) ग्रन्थिः । "स्यामदी" इत्यादिना ननिन् । (परुः, परुषी) "अर्तिपॄवपी" इत्यादिना उसिः । (परुषः) । "(२)नहिकलिहनिपॄवस्यर्तिभ्य उषच्" इत्युषच् । ह्रस्वान्तोऽयं धातुरिति वर्धमानकाश्यपाभरणपुरुषकाराः । स्वामी तु दी-

---

(१) गुरु इति कुत्रचित् । (२) सह्रीति पाठान्तरम् ।

र्घान्तं पठित्वा ह्रस्वान्तः केचिदिति। आत्रेयमैत्रेयौ तु ह्रस्वान्तं पठित्वा दीर्घान्तकमेके इति अत्रोदाहरणानि। (पिपर्ति, पिपृतः, पिप्रति, पिपर्षि, पिपर्मि। पपार, पप्रतुः, पपर्थ,) "ऋतो भारद्वाजस्य" इति नेट्। (पिप्रिव)। क्रादिनियमादिट्। (पर्ता। परिष्यति)। "ऋद्धनोः स्ये" इतीट्। (पिपर्तु, पिपृहि, पिपराणि। अपिपः, अपिपृताम्, अपिपरुः)। जुसि गुणः। (अपिपः, अपिपरम्, अपिपृव। पिप्रियात्, पिप्रियाताम्)। आशिषि, (प्रियात्, प्रियास्ताम्,) "रिङ् शयग्लिङ्क्षु" इति रिङादेशः। (अपार्षीत, अपृष्टाम्) इत्यादि। वृत्तिकारस्य तु दीर्घान्त एवेष्टः। यदाह। "शृद्रप्रां ह्रस्वो वा" इत्यत्र केचिदेतत्सूत्रं प्रत्याचक्षते। श्रा पाके, द्रा कुत्सायां गतौ प्रा पूरणे, इत्येषामनेकार्था धातव इति शृद्रप्रासर्थे वर्तमानानां विशश्रतुरित्यादीनि रूपाणि साधयन्ति। तथा सति विशश्रवान् इति क्वसावेतद्रूपं न स्यादिति। यदि ह्रस्वान्तस्स्यात्प्रतिना प्रत्याख्यानं पिपृवानिति प्रयोजनकथनं चानुपपन्नं स्यात्। तथा वृत्तिन्यासपदमञ्जरीप्रदीपकारादयोऽपि। किञ्च अपाणिनीयश्च ह्रस्वान्तः, यदि हि स्यात् किं ह्रस्वविकल्पनेन, यत्कैय्यादिकादीर्घान्तरूपाणि अस्माच्च ह्रस्वान्तरूपाणि भविष्यन्ति। एवं च 'तं पिपृतं रोदसि' 'पाहि माग्ने पिपृहि' इत्यादयश्छान्दसा द्रष्टव्याः। अ(१)दन्तमृदन्तमिति सेडप्यर्थं दीर्घान्तः परस्मैपद्यनुरोधेन पठितः। अयं क्र्यादावपि। पृ गताविति स्वामी। 'पृञ् व्यायामे' तुदादौ। पृ पूरणे इति चुरादौ ॥ ४ ॥

डुभृञ् धारणपोषणयोः ॥ अनुदात्त उभयतोभाषः। (बिभर्ति, बिभृतः, बिभ्रति, बिभर्षि, बिभर्मि,) "भृञामित्" इति श्लावभ्यासस्येत्त्वम्। (बभार, बभ्रतुः, बभ्रुः, बभर्थ,) क्रादिनियमादनिट्त्वम्। (बिभृव। बिभराञ्चकार, "भीह्रीभृहुवाम्" इत्याम्प्रत्ययः, श्लुवद्भावाद् द्विर्वचनमित्त्वं च। (भर्ता, भरिष्यति, बिभर्तु, बिभृतात्, बिभृतां, बिभ्रतु, बिभृहि, बिभराणि। अबिभः, अबिभृताम्, अबिभरुः)। "जुसि च" इति गुणः। (अबिभः, अबिभृतम्, अबिभरम्। बिभृयात्, बिभृयाताम्)। आशिषि (भ्रियात्, भ्रियास्तां, भ्रियासुः। अभार्षीत्, अभार्ष्टाम्, अभार्षीः, अभार्षम्, अभार्ष्व, बिभृते, बिभ्राते, बिभ्रते। बिभृषे, बिभृध्वे, बिभ्रे, बिभृवहे। बिभरांचक्रे। भर्ता। भरिष्यते। बिभृतां, बिभृष्व, बिभरै। अबिभृत, अबिभ्राताम्, अबिभ्रत। अबिभृथाः, अबिभ्रि, अबिभृवहि। बिभ्रीत, बिभ्रीयाताम्, बिभ्रीथाः, बिभ्रीय। बिभ्रिवहि)। आशिषि (भृषीष्ट, भृषीयास्ताम्) "उश्च" इत्यात्मनेपदे लिङ्सिचोर्झलाद्योः कित्त्वादगुणत्वम्। (अभृत, अभृषाताम्, अभृथाः, अभृढ्वम्, अभृषि,) "ह्रस्वादङ्गात्" इति झलि सिचो लोपः। (बिभ्रत्। बिभ्राणः। बुभूर्षति, बुभूर्षते,) "इको झल्" इति सनः कित्त्वात् "अज्झन" इति दीर्घः, "उदोष्ठ्य" इत्युत्वम्। "सनीवन्त" इतीड्विकल्पोऽस्य न भवति, तत्र भरेति शपा निर्देशाद्। (भृत्रिमम्,) "ड्वितः क्त्रिः," "क्त्रेर्मम्नित्यम्"। द्रविडास्तु ट्वितं पठित्वा "ट्वितोऽथुच्" इति अथुचमुदाहरन्ति (भरथुः) इति। शेषं भरतिवत् ॥ ५ ॥

माङ् माने शब्दे च ॥ अनुदात्त आत्मनेपदी, (मिमीते, मिमाते, मिमते, मिमीषे, मिमाथे, मिमीध्वे, मिमे, मिमीवहे) भृञादित्वाच्छ्लावभ्यासस्येत्त्वम्। हलादौ क्ङिति सार्वधातुके "ई हल्यघोः" इतीत्वमभ्यस्तस्य। अजादौ तु "श्नाभ्यस्तयोः" इत्याल्लोपः। (प्रणिमिमीते) "नेर्गद" इत्यादिना णत्वम्। (ममे, ममाते, ममिरे, ममिषे, ममाथे, ममिध्वे, ममे, ममिवहे,) क्रादिनियमादिट्। "आतो लोप इटि च" इत्याकारलोपः। (माता। मास्यते। मिमीताम्, मिमाताम्, मिमताम्, मिमीष्व, मिमै। अमिमीत, अमिमाताम्, अमिमत, अमिमीथाः, अमिमाथाम्, अमिमीध्वम्, अमिमि, अमिमीवहि। मिमीत, मिमीयातां, मिमीथाः, मिमीय)। आशिषि, (मासीष्ट, मासीयास्ताम्, अमास्त, अमासा-

(१) ऊदन्तमृदन्तमिति क्वचित् दृश्यते।

तास्, अमासत, अमास्थाः, अमाध्वम्, अमासि, अमास्वहि । मित्सते) "सनिमीमा" इत्यच इस् । "सस्यार्धधातुके" इति तत्वम् । "अत्र लोप" इत्यभ्यासलोपः । (मेमीयते) । "घुमास्था" इतीत्वे द्विर्वचनेऽभ्यासस्य गुणः । (मामाति, मामेति, मामीतः, मामति । मापयति । अमीमपत् । मित्वा । मितः । मितवान् । मितिः) । "द्यतिस्यतिमा" इतीत्वम् । (प्रमाय) । "न ल्यपि" इति "घुमास्था" इतीत्वस्य निषेधः । (मेयम्) । "अचो यत्," "ईद्यति" इतीत्वे गुणः । मीयतेऽनेनेति (पाय्यम्) "पाय्यसान्नाय्य" इत्यादिना मानेऽभिधेये ण्यदादित्वं च निपात्यते । "आतो युक्" इति युक् । मिमीतइति (मायः) । "श्याव्यध" इत्यादिना णे युक् । (माया) टाप् । (मायी, मायिकः, मायावी, मातौ) मत्वर्थे व्युत्पादितम् । (धान्यमायः) । "ह्वावामश्च" इति (१)कर्मण्यण् कस्यापवादः । प्रमिमीतइति (प्रमः) । "आतश्चोपसर्गे" इति कः (प्रमा) । स्त्रियाम् "आतश्चोपसर्गे" इत्यङ् । (प्रमितिः) । बाहुलकात् क्तिन् । (वातप्रमीः) वातमृगः । "वातप्रमीः" इति वातोपपदात्प्रपूर्वादस्मादीकारप्रत्ययआल्लोपे च निपात्यते । अजादौ यणादेशे वातप्रम्यावित्यादि । सप्तम्येकवचने तु यणः परत्वात्सवर्णदीर्घे वातप्रमी इति भवति । अन्ये तु "अन्येभ्योऽपि दृश्यते" इति क्विपि "घुमास्था" इतीत्वे व्युत्पादयन्ति । "ईत्वमकारादौ" इति च भाष्ये न स्थितम् । तन्मते अजादौ "एरनेकाच" इति यण् । तत्र त्वयं विशेषः, सप्तम्येकवचने यण् परत्वात्सवर्णदीर्घं बाधत इति वातप्रम्यीति भवति । उणादिवृत्तौ तु मिनोतेरीकारप्रत्यये व्युत्पाद्यते । (मेरुः,) "मापोरुरी च" इति रुप्रत्यये ईकारे चान्तादेशे गुणः ॥ ६ ॥

ओहाङ् गतौ ॥ अनुदात्त आत्मनेभाषः । (जिहीते, जिहाते, जिहते, जिहीषे, जिहीध्वे, जिहे, जिहिवहे । जहे । हाता । हास्यते । जिहीतां, जिहाताम् । अजिहीत, अजिहाताम्, अजिहत । जिहीत, जिहीयाताम्) । आशिषि (हासीष्ट, हासीयास्ताम् । अहास्त, अहासाताम्) इत्यादि माङ्वत् । (जिहासते, जाहायते) "घुमास्था" इतीत्वे जहातीति निर्देशादस्याग्रहः । अत एव "जहातेश्च क्त्विः" इति हिभावोऽपि नेति हात्वेति भवति । (हापयति । अजीहपत् । हानः, हानवान्) । "ओदितश्च" इति निष्ठानत्वम् । जिहीते भावानिति (हायनः संवत्सरः,) "हश्च व्रीहिकालयोः" इति ण्युट् । एको हायनोऽस्या (एकहायनी, त्रिहायणी, चतुर्हायणी) । "दामहायनान्ताच्च" इति सङ्ख्यादेर्दामहायनान्ताच्च बहुव्रीहेः स्त्रियां ङीप्, "त्रिचतुर्भ्यां हायनस्य" इति णत्वम् । असंज्ञात्वाद् न "पूर्वपदात्संज्ञायाम्" इति णत्वप्राप्तिः । एते च ङीब्णत्वे वयस्येव स्मर्यते । तेनेह न भवतः, एकहायना शाला त्रिहायना चतुर्हायना इति । (हानिः) । "ग्लास्नाज्याहाभ्यो निः" इति निप्रत्ययः । भृञादयस्त्रयो गताः ॥ ७ ॥

ओहाक् त्यागे ॥ अनुदात्तः परस्मैपदी । ककारो "हश्च व्रीही" इत्यत्र पूर्वस्यास्य च सामान्यग्रहणार्थः । अन्यथा एकानुबन्धकत्वाद् अस्यैव ग्रहस्स्यात् । (जहाति, जहितः, जहीतः, जहति, जहासि, जहिथः, जहीथः, जहिथ, जहीथ, जहामि, जहिवः, जहीवः, जहिमः, जहीमः,) "जहातेश्च" इति हलादौ क्ङिति सार्वधातुके इत्वमीत्वं च । अजादौ "श्नाभ्यस्तयोः" इत्याल्लोपः । (जहौ, जहतुः, जहुः, जहाथ, जहिथ, जह, जहौ, जहिव,) क्रादिनियमादिट् । थलि भारद्वाजनियमाद्विकल्पः । "आत औ णलः" "आतो लोप इटि च" । (हाता । हास्यति, जहातु, जहितात्, जहिताम्, जहीताम्, जहतु, जहिहि, जहीहि, जहाहि, जहानि, जहाव) । पूर्ववदित्वमीत्वं च । अजादावाल्लोपश्च । हौ "आ च हौ" इत्यात्वं च । (अजहात्, अजहिताम्, अजहीताम्, अजहुः, अजहाः, अजहाम्) "सिजभ्यस्त" इति नित्यं झेर्जुस् । "लङश्शाकटायनस्य" इत्याकारान्तलक्षणो जुस्विकल्पस्तु न भवति, परत्वात्

(१) कर्मण्युपपदेऽण्प्रत्यय इति पुस्तकान्तरे दृश्यते ।

"श्नाभ्यस्तयोरातः" इत्याल्लोपे आकारान्तत्वस्यैवाभावात्, "ईहल्यघोः" इतीत्वं तु जुस्भावे कृते हलादित्वं पर्यवपत्स्यतइति न भवति। एवमदरिद्रुरित्यत्रापि। (जह्यात्, जह्याताम्, जह्युः, जह्याः, जह्याम्, जह्याव,) "लोपो यि" इति यकारादौ सार्वधातुके जहातेराल्लोपः। आशिषि (हेयात्, हेयास्ताम्) "एर्लिङि" इत्येकारो "घुमास्था" इतीत्वापवादः। (अहासीत्, अहासिष्टाम्, अहासीः, अहासिष्टम्, अहासिषम्) सगिटौ॥ (जिहासति। जेहीयते) परत्वात् "घुमास्था" इतीत्वे द्विर्वचनम्। (जाहीति, जाहेति, जाहीतः,) "ई हल्यघोः" इति नित्यमीत्वम्। "जहातेश्च" इति श्तिपा निर्देशाद् इत्वं तु न भवति। अत एव "आ च हौ" इत्यात्त्वमीत्वम् "लोपो यि" इत्यालोपश्च न भवति। तेन "ई हल्यघोः" इतीत्वे (जाहीहि जाहीयात्) इति भवतः। आशीर्लिङस्तु आर्धधातुकत्वादपि "जहातेश्च" इतीत्वमीत्वं च न भवति। अत एव "ई हल्यघोः" इति नित्यमीत्वं, "लोपो यि" इत्याल्लोपश्च न भवति। "घुमास्था" इतीत्वम्, "एर्लिङि" इत्येत्वं च श्तिपा निर्देशान्न भवति, तेन जाहायादिति भवति। अत्र धातोः क्त्विमाश्रित्य "दीर्घोऽकितः" इत्यभ्यासस्य दीर्घनिषेधो न भवति तत्राकित इत्यनेनाभ्यासस्य विशेषणात्। स्पष्टं चैतद्वृत्तिन्यासपदमञ्जर्यादिषु। (हापयति। अजीहपत्। हित्वा) "जहातेश्च क्त्वः" इति हिभावः। (हीनः, हीनवान्।) ओदित्वान्निष्ठानत्त्वम्। (विहाय)। "न ल्यपि" इतीत्वनिषेधः। जहात्युदकमिति कृत्वा (हायनाः) व्रीहयः। "हश्च व्रीहिकालयोः" इति ण्युट्। (हानिः)। "ग्लाश्च" इत्यादिना स्त्रियां पूर्ववन्निः। (शर्धंजहा) माषाः। शर्धोऽपानशब्दः। [वातशुनीतिलशर्धेष्वजधेट्तुदजहातिभ्य उपसङ्ख्यानम्] इति खशि शपि श्लौ द्विर्वचने "श्नाभ्यस्तयोः" इत्यालोप उपपदस्य मुमागमः। (पूर्वापहाणा, अपरापहाणा)। पूर्वानपरांश्च जहातीत्यर्थः। अजादिपाठाट्टाप्, कर्तरि ल्युट्, णत्वं च। सम्प्रहाणेत्यपि क्वचित्पठन्तीत्यात्रेयः। (जहकः) कालपुरुषस्त्यागी च, "जहातेर्द्वे च" इति क्वुनि द्वित्वम्। (अहरत्र)। "नञि जहातेः" इति कनिन्याकारलोपः, अहन्नित्यधिकृत्य "रोऽसुपि" इति नकारस्य रेफादेशः। अत्र "स्वमोर्नपुंसकात्" इति सोर्लुका लुप्तत्वात् प्रत्ययलक्षणेन न सुप्परत्वम्। (अहोभ्याम्)इत्यादौ "अहन्" इत्यह्नः परस्य रुत्वे तस्य "हशि च" इत्युत्वम्। "रत्वस्य "असुपि" इति निषेधात्, "अहन्" इत्येतदर्थात्सुप्परविषयं भवति। ननु रत्वरुत्वयोः पूर्वत्रासिद्धत्वाद् नलोपस्स्यात्। न चानयोरनवकाशत्वम्, कृतेऽपि नलोपे एकदेशविकृतन्यायेन अवशिष्टस्यावकाशत्वात्। किञ्च हे अहरित्यत्र "वा नपुंसकानाम्" इति नलोपाभावपक्षे रत्वं सावकाशम्; तथा रुत्वमपि हे दीर्घाहो निदाघेत्यत्र, अत्र हि पुंलिङ्गत्वाद्धल्ङ्यादिना सोर्लोपे प्रत्ययलक्षणेन अस्ति सुप्परत्वम्। "न ङिसम्बुद्ध्योः" इति नलोपश्च निषेध्यते। सत्यम्। रुविधौ षष्ठ्या निर्दिष्टव्ये प्रथमान्तस्य निर्देशाद् अहन्नित्यावर्तते; तत्रैकं नलोपाभावार्थं तदेव रूपमन्वाख्यायते, अपरेण तु रुरिति वृत्तौ समाधिरुक्तः। अह्नां समूहः क्रतुः (अहीनः)। अत्राहश्शब्दोऽहर्मितकर्मवचनः, "अह्नः खः क्रतौ" इति खः। "अह्नष्टखोरेव" इति टिलोपः। अक्रतौ (आह्न) इति सामान्योऽणेव। द्वाभ्यामहोभ्यां निर्वृत्तः (द्व्यहीनः, द्वैयह्निकः) "रात्र्यहः संवत्सराच्च" इति द्विगोर्वा खः, अन्यदा प्राग्दीव्यतीयष्ठञ्। "अह्नष्टखोरेव" इति नियमाट्टिलोपाभावे "अल्लोपो नः" इत्यल्लोपः। (अहर्पतिः)। "अहरादीनां पत्यादिषु" इति रेफस्य वा रेफः। अन्यदा विसर्जनीयोपध्मानीयौ) अह्नो रूपम् (अहोरूपम्) अहश्च रात्रिश्च (अहोरात्रम्, अहोरथन्तरम्)। "अह्नो रुविधौ रूपरात्रिरथन्तरेषूपसङ्ख्यानम्" इति रेफापवादो रुः। "हशि च" इत्युत्वम्। इदं च समासे चासमासे चेति हरदत्तः। एवं हि रात्रीतीकारान्तपाठोऽर्थवान्। तेन 'गतमहोरूपं पश्य रात्रिरागता रथन्तरं गाय' इति वाक्येऽपि रुर्भवति। (परमाहः,) "सन्महत्" इति समासः। "राजाह" इति टचि टिलोपः। द्वयोरह्नोर्भवो (द्व्यह्नः)। "तद्धितार्थ" इति द्विगुः, "कालात्" इति विहितस्य ठञो "द्विगोर्लुगनपत्ये" इति लुक्। द्वे

अह्नो जातस्य (द्व्यह्नजातः)। "कालाः परिमाणिना" इति समासः। स च त्रिपादिस्थस्यापी- ष्यते। तथा च "तद्धितार्थ" इत्यत्र वार्तिकम्। [उत्तरपदेन परिमाणिना द्विगोस्समासवच- नम्] इति। द्विगोर्निष्पत्तयइत्यर्थः। त्रयाणां समासे हि "तद्धितार्थ" इत्युत्तरपदे पूर्वयोस्स- मासे "सङ्ख्यापूर्व" इति द्विगुत्वे "द्विगुश्च" इति तत्पुरुषो भवति। अह्नो निर्गतः (निरह्नः)। प्रादिसमासः अह्नः पूर्वभागः (पूर्वाह्णः)। "पूर्वापर" इत्येकदेशिसमासः। (सङ्ख्याताह्नः)। विशेषणसमासः, "अह्नोह्न एतेभ्य" इति टचि परभूतेऽह्नोह्नादेशः। एतेभ्य इति सङ्ख्याव्ययाह- रादिसूत्रोपात्ताः परामृश्यन्ते। तत्राहश्शब्दात्परोऽहश्शब्दो न सम्भवति। एकपुण्याभ्यां त्वह्न "उत्तमैकाभ्याम्" इत्यह्नादेशनिषेधाद् (एकाहः पुण्याहम्) इति टजेव। उत्तमशब्दोऽहरा- दिसूत्रोपात्तान्त्यवचनः। तत्र पुण्यशब्दएवोच्चार्यउत्तमशब्दोच्चारणमुपोत्तमस्यापि ग्रहणार्थमिति सङ्ख्यातशब्दात्परस्य अहश्शब्दस्याह्नादेशो नेति केचिद्वर्णयन्तीति वृत्तावुक्तम्। द्वयोरह्नोस्स- माहारो (द्व्यहः) इत्यत्र "न सङ्ख्यादेस्समाहारे" इत्यह्नादेशाभावः। एवं च द्व्यह्नो जात- स्येति व्युत्पत्त्या (द्व्यहजातः) इत्यपि भवति। अयमह्नादेशष्टचि परभूतइति वृत्तावुक्तत्वात् यत्र बहुव्रीह्यादौ स नास्ति तत्राह्नादेशोऽपि नास्ति सङ्ख्यातमहोऽस्य (सङ्ख्याताहः) पुरुष इति। कथं सायाह्न इति, यतः पूर्वादिषु सायशब्दस्यापाठाद् एकदेशिसमास एव नास्ति। नैष दोषः "सङ्ख्याविसायपूर्वस्याहस्यान्यतरस्यां ङौ" इत्येभ्यः परस्याह्नस्य सप्तम्येकवचनेऽहनादे- शविकल्पविधानात् सर्वैणैकदेशेनाह्नः समासविज्ञानात्। एवं च मध्याह्न इत्यपि भवति। इदं च ज्ञापनं रात्रेरप्युपलक्षणमिति व्याख्यातारः। "अह्नोऽदन्तात्" इत्यकारान्तपूर्वपदस्थान्निमि- त्तात्परत्वेऽह्नो नकारस्य णत्वम्। अह्नान्ता "रात्राह्नाहाः पुंसि" इति पुंलिङ्गाः। (पुण्याहं सुदिनाहम्) इत्यत्र तु "पुण्यसुदिनाभ्यामह्न" इति नपुंसकत्वम्। सुदिनशब्दः प्रशस्तवचनः। (प्राह्णः)। अह्नः प्रगतत्वम्। "तिष्ठद्गुप्रभृतीनि च" इत्यव्ययीभावत्वादव्ययत्वं नपुंसकत्वं च। अत्रैव पाठादह्नादेशोऽपि। दीर्घमहो यस्यां शरदि (दीर्घाह्नी) शरत्। "बह्वादिभ्यश्च" इति ङीष्। युवादित्वात् "प्रातिपदिकान्त" इति णत्वनिषेधः, यद्यपि बह्वादिष्वहन्निति पठ्यते, तथापि केवलस्य क्लीबत्वायोगात्तदन्तस्य ग्रहणम्। ङीषभावे "अनो बहुव्रीहेः" "डाबुभाभ्याम- न्यतरस्याम्" इति डाप्ङीपौ तत्प्रतिषेधश्च भवति। (दीर्घाह्ना, दीर्घाह्नी, दीर्घाहा,) इति। ङीप्ङीपोस्स्वरे विशेषः। (सार्थाद्धीनः)। "अपादाने चाहीयरुहोः" इति तसि निषेधः। हीयेति विकृतिनिर्देशो जहातेर्निवृत्त्यर्थः, न तु हीयेतिरूपस्य विवक्षणार्थः। 'मन्त्रो हीनस्स्वरतो वर्णतो वा' इत्यत्र तु "हीयमानपापयोगाच्च" इति हीयमानेन पापेन च युक्तादकर्तृतृतीयान्ताद्वा त- सिविधानात्तसिः। अत्र विवक्षितार्थाद्धीयमानेन मन्त्रेण स्वरवर्णौ हेतुतया युज्येते। कैयटे तु पस्पशायां "आद्यादित्वात्तसिः" इति। सार्थाद्धीयते देवदत्तः, हीन इत्यादौ लकारादौ विवदन्ते। तत्र "अपादाने चाहीयरुहोः" इत्यत्र न्यासे देवदत्तस्य कर्तुरीप्सिततमत्वाभावेऽपि कर्मसंज्ञायां कर्तृग्रहणस्य स्वातन्त्र्योपलक्षणार्थत्वाद् हानक्रियायां स्वतन्त्रस्य अपादानस्ये- प्सिततमत्वात् कर्मणि लकारादय इति प्रपञ्चेन समर्थितम्। सम्प्रदानसूत्रे कैयटेऽप्येवमुक्तम्। इन्दुरपि स्वयमेव हीयत इति प्रतीतेः कर्मकर्तरि लकारोऽस्त्वित्याशङ्क्य जहातेः कर्तृस्थक्रिय- त्वात् कर्मण्येव लकार इति। हरदत्तस्तु न्यासमतमुक्त्वा, 'यद्येवं माषेष्वश्वं बध्नातीत्यत्र कर्मणोऽप्यश्वस्य वस्तुतो यद्वक्षणे स्वातन्त्र्यं तदाश्रया कर्मसंज्ञा प्राप्नोति तस्मात्कर्मकर्तर्यत्र लकार' इति। उपपादितं च 'इह जहातिरपगमनार्थः, सा च क्षुदुपघातादिना देवदत्तस्यापमे तत्समर्थाचरणम्। यदा तु क्षुधादिना स्वयमेवापगच्छति तदा कर्मकर्तृत्वम्' इति। पुनः कुत- इत्यपेक्षायां पश्चात्स्वार्थे सम्बन्ध' इति चोक्तम् ॥ ८ ॥

डुदाञ् दाने ॥ उभयतोभाषोनुदात्तः ॥ प्रणिददाति, दत्तः, ददति, ददासि, दत्थः, दत्थ, ददाम, दद्वः,) "श्नाभ्यस्तयोः" इत्याल्लोपः। क्ङिति सार्वधातुके "ई हल्यघोः" इत्यभ्य-

स्ताकारस्य विधीयमानमीत्वं तत्रैव अघोरिति प्रतिषेधान्न प्रसजति । (१)"नेर्गद" इति णत्वम् । (ददौ, ददतुः, ददुः, ददाथ, ददिथ, दद, ददौ, ददिव) क्रादिनियमादिट् । थलि भाद्वाजनियमाद्विकल्पः । "आत औ णलः" । "आतो लोप इटि च" (दाता । दास्यति । ददातु, दत्तात्, दत्तां, ददतु, देहि, ददानि, दत्तात्) इत्यत्र "घ्वसोरेद्धौ" इत्यस्मात्परत्वात् तातङि पुनर्न तस्य प्रवृत्तिः सकृद्गतपरिभाषया। (अददात्, अदत्ताम् अददुः)। "सिजभ्यस्त" इति नित्यं जुस्। (अददाः अददाम्, अदद्व । दद्यात्, दद्यातां, दद्याः दद्यास्, दद्यात्) आशिषि (देयात्, देयास्ताम्) घुत्वाद् "एर्लिङि" इत्येत्वम् । (अदात् अदाताम्, अदुः) "आत" इति झेर्जुसि पररूपम् । (अदाः, अदाम्, अदाव) । "गातिस्था" इति सिचो लुक् । (दत्ते, ददाते, ददते, दत्से, दद्ध्वे, ददे, दद्वहे । ददे, ददाते, ददिषे । दाता । दास्यते । दत्तां, ददातां दत्स्व, दद्ध्वम्, ददै, ददावहै । अदत्त, अददाताम्, अददत, अदत्थाः, अददि, अदद्वहि । ददीत, ददीयातां, ददीथाः, ददीय) आशिषि (दासीष्ट) । आर्धधातुकत्वेऽपि अकित्त्वादेत्वं न भवति । "श्नाभ्यस्तयोः" इत्याल्लोपस्तु अनभ्यस्तत्वादपि न भवति । (अदित, अदिषाताम्, अदिथाः, अदिषि) "स्थाघ्वोरिच्च" इत्यात्मनेपदपरस्य सिचः कित्त्वं धातोश्चेत्वम् । झलि "ह्रस्वादङ्गात्" इति सिज्लोपः । सन्निपातपरिभाषाभावः प्रागेवोक्तः । (आदत्ते) "आङो दोनास्यविहरणे" इत्यकर्त्रभिप्रायेऽपि तङ् । "आङ" इति निर्देशाद् अङितो वाक्यस्मरणविस्मयात्परस्य न तङिति के चित्। "अनास्यविहरणे" इति पर्युदासः "स्वाङ्गकर्मकाच्च" इति वक्तव्यात्स्वाङ्गकर्मकविषय इति (व्याददते पिपीलिका पतङ्गस्य मुखम्) इत्यत्रापि तङेव । स्वाङ्गकर्मकत्वे तु स्वमुखं व्याददाति व्यादत्ते इत्युभयमपि यथायोगं भवति । सुधाकरस्तु "आङो दो" इति योगविभागादनास्यविहरणइत्यनेन व्यवहितापि प्राप्तिः परानुद्यते । एवमेव चन्द्राः प्रतिपेदिरइति ङित्त्वनिमित्तमपि तङमत्र नेच्छति । आत्रेयस्तु कर्त्रभिप्राये तङेवेति । अयं च योगविभागो भाष्ये न दृश्यते । किञ्च "आङो दोऽनास्य" इत्येवास्ये धातोर्वृत्त्सम्भवात् तत्समवायिन्यां विहरणक्रियायां वर्तमानात्तङ्निषेधे सिद्धे पुनर्विहरणग्रहणं विपादिकां ।(२)व्याददातीत्यादावास्यविहरणसमानक्रियादपि प्रतिषेधार्थं इति भाष्ये उक्तम् । तत्रैव कैयटपदमञ्जर्योरास्यइत्युच्यमाने तत्समवायिक्रियामात्रं लभ्यते न विहरणमेवेति स्वं मुखमादत्तइत्यत्रापि ग्रहणस्य मुखसमवायित्वात् प्रतिषेधस्स्यादिति दोषमुद्भाव्य 'अनास्य' इत्यास्यपर्युदासत्वाद्ग्रहणस्य च ग्राह्यग्रहीतृविषयत्वादनास्यक्रियत्वान्न दोष इति परिहृतम् । प्रसज्यप्रतिषेधे ह्यास्यसमवायित्वाश्रयेण प्रतिषेधेन भाव्यत्वाद् दोष एव स्यादिति भाष्यकृतोऽप्ययमनभिमतः प्रतीयते । किञ्च स्वं मुखमादत्तइति तङ्नस्यादिति दोषा(३)पादानमप्ययुक्तं स्यात्। (दित्सति, दित्सते,) "सनि मीमा" इतीस्भावे "अत्र लोप" इत्यभ्यासलोपः । "सस्यार्धधातुके" इति तत्वम् । (देदीयते,) ईत्वे द्विर्वचनम् । दादेति, दादाति, दत्तः,) क्ङिति "श्नाभ्यस्तयोः" इत्याल्लोपः । (दापयति । अदीदपत् । ददः) । "ददातिदधात्योर्विभाषा" इति कर्तरि शे शपः श्लुः । शाभावे "श्याद्व्यध" इति णे युकि (दायः)। "तदर्हम्" इति निर्देशात् क्वचित्क्तयोगे द्वितीया भवतीति 'दायै रामोदमुत्तमम्' इति भट्टिप्रयोगं निर्वहन्ति । दीयतइति (दायः,) घञ्, तमादत्तइति (दायादः) । मूलविभुजादित्वात् कः । (गवां दायादः गोषु दायादः) । "स्वामीश्वर" इति षष्ठीसप्तम्यौ । दायादेनादीयमानं (दायाद्यम्) । ब्राह्मणादित्वात् ष्यञ् । तत्र हि कर्मग्रहणेन साधनकर्मापि गृह्यते । (आदिः) । "उपसर्गे घोः किः" इति किः । आदौ भवम् (आदिमम्) । [आदेश्च] इत्युपसङ्ख्यानाद् मप्रत्ययः । (आद्यः) । दिगादित्वाद्यत् । (आदितः) । [आद्या-

---

(१) प्रणिददातीत्यधिकं पुस्तकान्तरे ।

(२) कुलं व्याददातीत्यधिकं बहुषु पुस्तकेषु । (३) अनिष्टापादनमिति क्वचित् ।

दिभ्य उपसङ्ख्यानम्] इति सार्वविभक्तिकस्तसिः । (दत्रिमम्) । "ड्वितः क्त्रिः" । "क्त्रेर्मन्नित्यम्" । अन्येषु साधारणेषु कृत्सु दाण इव रूपं नेयम् । तथा घुसंज्ञाकार्यमपि । दाण् दाने, देङ् रक्षणे, दैप् शोधने, त्रयं भ्वादौ, दाप लवने इत्यदादौ ॥९॥

डुधाञ् धारणपोषणयोः ॥ अनुदात्त उभयपदी । दानेऽप्येके । (दधाति, धत्तः दधति, दधासि, धत्थः, दधामि, दध्वः) । "श्नाभ्यस्तयोः" इत्याल्लोपे "दधस्तथोश्च" इति तकारथकारसकारेषु ध्वे च परेषु बशस्स्थाने भष्विधानाद् दकारस्य धकारः । अत एव भष्भाववचनसामर्थ्याद् आल्लोपस्य न स्थानिवत्त्वम् । परस्य "खरि च" इति चर्त्वम् । अत्रापि "पूर्वत्रासिद्धीयमद्विर्वचने" इति वा 'चर्त्वविधिं प्रति' इति वाल्लोपस्य न स्थानिवत्त्वम् । 'सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्' इत्यत्र 'प्रतिषेधे हसादीनाम्' इति कर्मव्यतीहारनिमित्तः तङ्नेति केचित् । तदयुक्तम् । तत्रादिशब्देन शब्दनक्रियाणामेव ग्रहणात् । इह तु सम्पदो विनिमयो न धात्वर्थस्येति तस्य व्यतीहाराभावात्तङो नैव प्रसङ्गः । (दधातु, धत्तात्, धत्तां, धेहि, दधानि । अदधात्, अधत्ताम्, अदधुः, अदधाः, अदधाम्, अदध्व । दध्यात्, दध्याः, दध्याम्,) आशिषि (धेयात्, धेयास्ताम्) । "एर्लिङि" इत्येत्वम् । (अधात्, अधाः, अधां,) "गातिस्था" इति, सिचो लुक् । (धत्ते, दधाते, दधते, धत्से धद्ध्वे, दधे, दध्वहे, दधे दधाते, दधिषे, दधे । धाता । धास्यते । धत्तां, धत्स्व, दध्वम्) । एकदेशविकृतत्वादयमपि ध्वेशब्दः । (दधै, दधावहै, अधत्त, अधत्थाः, अदधि, अदध्वहि । दधीत) । आशिषि (धासीष्ट, अधित, अधिषाताम्, अधिषत, अधिथाः, अधिषि,) "स्थाघ्वोरिच्च" इति सिचः कित्त्वमित्वं च । (धित्सति, धित्सते । देधीयते । दाधेति, दाधाति, धात्तः,) ददातिवत्प्रक्रिया । (धापयते, धापयति) (प्रणिदधाति,) "नेर्गद" इति णत्वम् । धीयतइति (धाय्या) । "पाय्यसान्नाय्य" इत्यादिना ण्यति सामिधेन्यां निपात्यते । अन्यत्र यतीत्वे (धेयम्) । (प्रधः) । "आतश्चोपसर्गे" इति कः । दधातीति (दधः) । "ददातिदधात्योर्विभाषा" इति शे शप् । अन्यदा "श्याद्व्यध" इति णः, (धायः । हित्वा, हितः, हितवान्, हित्रिमम्,) । "ड्वितः क्त्रिः" "क्त्रेर्मम्नित्यम्" "दधातेर्हिः" इति तकारादौ किति ह्यादेशः । प्रधायेत्यत्र 'अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधते' इति पूर्वमेव ल्यपि पश्चात्तादिकितोऽभावाद् न हिरादेशः । "न ल्यपि" इतीत्वं निषिध्यते । दधातेरिति तिपा निर्देशाद् दाधीत्वेत्यत्र ह्यादेशो न भवति । यद्वा तकारादिकित्परत्वाभावान्नैव हेः प्रसङ्गः । किंकिं दधातीति (किष्किन्धा) । "आतोऽनुपसर्गे कः" इति कः, पारस्करादित्वात्सुट् किमो मलोपष्षत्वं च । धीयते धार्यते शिरसीति (धात्री) आमलकी । "धः कर्मणि ष्ट्रन्" । षित्वान्ङीष् । (भूतधात्री) इत्यत्र भूतानि धत्तइत्यौणादिकः कर्तरि ष्ट्रन् । (उपधिः, अन्तर्धिः,) "उपसर्गे घोः किः" इति किः । अन्तश्शब्दस्याङ्किविधिणत्वेषूपसर्गसंज्ञोक्ता । उपधिरेव (औपधेयम्,) "छदिरुपधिबलेर्ढञ्" इति स्वार्थे ढञ् । (सुषन्धिः, दुष्षन्धिः,) सुषामादित्वात् षत्वमिति धयतावेवावोचाम । (विधिः) । बाहुलकात्कर्तरि किः । उदकं धीयतेऽस्मिन्निति (उदधिः) । "कर्मण्यधिकरणे च" इति कर्मण्युपपदेऽधिकरणार्थे किः । "पेषंवासवाहनधिषु च" इत्युदकस्योदभावः । असंज्ञार्थमिदं वचनम् । संज्ञायां तु "उदकस्योदस्संज्ञायाम्" इत्येव सिद्धम् । शिरो धत्तइति (शिरोधिः) ग्रीवा । बाहुलकात्कर्तरि किः । एवं 'विधाता विश्वसृड्विधिः' इत्यादावपि । यद्वा शिरोधिशब्दे शिरो धीयतेऽस्यामिति "कर्मण्यधिकरणे च" इति किप्रत्ययेऽस्तु व्युत्पत्तिः । (अन्तर्धा, श्रद्धा) । अन्तश्शब्दस्याङ्किविधिणत्वेषूपसर्गसंज्ञोक्ता । श्रच्छब्दस्यापि [श्रच्छब्दस्योपसङ्ख्यानम्] इति । (श्रद्धालुः) । "स्पृहिगृही" इत्यादिना आलुच् । (दधि) "भाषायां धाञ्कृसृगमिजनिनमिभ्य" इति किकिनोरन्यतरस्मिन् लिड्वद्भावाद् द्विर्वचनम् । (धीवा) । "अन्येभ्योऽपि दृश्यते" इति क्वनिपि "घुमास्था" इतीत्वम् । (धीवरी) । "वनो र च" इति ङीब्रेफौ । बहवो धीवानोऽस्यां

(बहुधीवरी, बहुधीवा । बहुधीवे, बहुधीवानौ)। "डाबुभाभ्यामन्यतरस्याम्" इति पक्षे ङीब्रेफौ डाप्च, "अनो बहुव्रीहेः" इति निषेधाद् ङीपोऽभावश्च । (धीवरः) । "छित्वरच्छत्वर" इत्यादिना ष्वरचि निपात्यते । (धातुः) । "सितनिगमी" इत्यादिना तुन् (धानाः)। "धापॄवस्यज्यतिभ्यो न" इति नः । (धामा,) मनिन् । (कर्कन्धूः) । "अन्धूदृन्भूकर्कन्धूदिधिषूः" इति निपातनात् कर्कशब्दे उपपदे कूप्रत्ययः, अल्लोप उपपदस्य मुमागमश्च । (दिधिषूः) । पूर्वेण सूत्रेणैव निपातनात्कूप्रत्यय आकारस्येकारो द्विर्वचनं पुगागमश्च । (निधानम्) "कृपॄवृजिमन्दिनिधाञ्भ्यः" इति क्युन्, अयं बाहुलकात्केवलादपीति (धनम्) इत्यपि भवति । (धनायति) धनं गृध्यतीत्यर्थः । "अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु" इति क्यचि धनशब्दस्य यथासङ्ख्याद्गर्धे आकारः । सर्वधनमस्यास्तीति (सर्वधनी) । "कर्मधारयान्मत्वर्थीयस्सर्वधनाद्यर्थं" इतीनिः 'न कर्मधारयान्मत्वर्थीय' इत्यस्यापवादः । (अपिदधाति, पिदधाति) । 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' इति पक्षे ऽल्लोपः ॥ धयतीति पाने शपि । अत्रानुक्तं साधारणं तत्र द्रष्टव्यम् ॥ १० ॥

णिजिर् शौचपोषणयोः ॥ एतदादयो विष्लृपर्यन्तास्त्रयोऽनुदात्तास्स्वरितेतः । (नेनेक्ति, नेनिक्तः, नेनिजति, नेनेक्षि, नेनेज्मि, नेनिज्वः,) "निजां त्रयाणां गुणश्श्लौ" इत्यभ्यासस्य गुणः । झलि पदान्ते च "चोः कुः" इति कुत्वे "खरि च" इति चर्त्वम् । (निनेज, निनिजतुः, निनेजिथ, निनिज, निनिजिव) । क्रादिनियमादिट्, (नेक्ता । नेक्ष्यति, नेनेक्तु, नेनिक्तात्, नेनिक्ताम्, नेनेग्धि,) हेरपित्त्वान्ङित्त्वान्न गुणः । (नेनिजानि,) "नाभ्यस्तस्य" इति गुणनिषेधः । (अनेनेक्, अनेनिक्ताम्, अनेनिजुः, अनेनेक्, अनेनिजम्) अन्तरङ्गत्वान्मिपोमि "नाभ्यस्तस्याचि पिति" इति गुणनिषेधः । (नेनिज्यात्, नेनिज्याताम्, नेनिज्याः, नेनिज्याम्) । आशिषि (निज्यात् । अनिजत्, अनिजताम्, अनिजद्, अनिजः,) "इरितो वा" इति च्लेर्वाङ् परस्मैपदे । अन्यदा (अनैक्षीत्, अनैक्ताम्, अनैक्षुः, अनैक्षीः, अनैक्षम्, अनैक्ष्व,) "वदव्रज" इति वृद्धिः । झलि सिज्लोपः । (नेनिक्ते, नेनिजाते, नेनिजते, नेनिक्षे, नेनिजे, नेनिज्वहे, निनिजे, निनिजिवहे । नेक्ता । नेक्ष्यते । नेनिक्तां, नेनिक्ष्व, नेनिजै । अनेनिक्त, अनेनिक्थाः, अनेनिजि । नेनिजीत, नेनिजीयाताम्) । आशिषि (निक्षीष्ट । अनिक्त, अनिक्षातां) "लिङ्सिचावात्मनेपदेषु" इति लिङ्सिचोः कित्त्वान्न गुणः । (निनिक्षति, निनिक्षते) "हलन्ताच्च" इति सनः कित्त्वम् । (नेनिज्यते, नेनिजीति, नेनेक्ति । नेजयति, अनीनिजत् । निक्त्वा, निक्तः, निक्तवान् । निजः) । इगुपधलक्षणः कः । (निर्णेजकः) । ण्वुल् । (प्रणेनेक्ति) । "उपसर्गादसमासेऽपि" इति णत्वम् "उभौ साभ्यासस्य" इति लिङ्गात् कृते द्विर्वचने प्रवर्तते ॥ ११ ॥

विजिर् पृथग्भावे ॥ (वेवेक्ति) इत्यादि निजिवत् । "विज इट्" इति इडादेः प्रत्ययस्य ङित्त्वे "ओविजी" इत्यस्यैव ग्रहणं नास्य यदसौ 'स्रुजिविजिविद्ध्यनिट्स्वरान्' इत्यनिट् । अत्र च कारिकायां इरित्वसामर्थ्यात् स न गृह्यते । अनयैव कारिकया विचिरिति स्वामिनः प्रथमान्तस्य पाठः प्रत्युक्तः ॥ निजिविजी द्वौ रुधादौ च । ओविजी भयचलनयोरिति तुदादौ ॥ १२ ॥

विष्लृ व्याप्तौ ॥ (वेवेष्टि, वेविष्टः) इत्यादि निजिवत् । "ष्टुना ष्टुः" । (वेक्ष्यति) "षढोः कस्सि" । (वेविड्ढि) ष्टुत्वे जश्त्वं डकारः । (अवेवेट्) । "झलां जशोऽन्ते" इति जश्त्वे चर्त्वं । (अविषद्) इत्यादावतङि लृदित्त्वान्नित्यमङ् । तङि तु "शल इगुपधादनिटः क्सः," अजादौ "क्सस्याचि" इत्यल्लोपः, (अविक्षत, अविक्षाताम् अविक्षत) इत्यादि । विष्यन्ते व्याप्यन्तेऽनेन प्रेक्षकाणां मनांसीति (वेषः) । "हलश्च" इति संज्ञायां घञ् । वेषेण सम्पादी (वेष्यो) नटः, (वेष्या वेश्या) । "कर्मवेषाद्यत्" इति सम्पादिनि यत् । सम्पत्तिः-शोभातिशयः । (परिवेषः) परिधिः । वेषवद्धम् । वेवेष्टीति (विषम्,) इगुपधलक्षणः

कः, विषमर्हतीति (विष्यः)। दण्डादित्वाद्यत् । (विष्णुः)। "विषेः किच" इति णुप्रत्ययः ॥ १३ ॥

वृत् ॥ वृत्ता निजादयः । अत्र वृत्करणं प्रपञ्चार्थं त्रयागामित्येव तत्फलस्य सिद्धत्वात् । निजादयस्स्वरितेतोऽनुदात्ताः । 'विषिरुदिदित्येके' इति स्वामी । धनपालोऽपि आर्याणामुदित्, द्रविडानां लृदित्' इति । एवमेव पुषादिसूत्रे सुधाकरोऽपि ॥

घृ क्षरणदीप्त्योः ॥ गणान्ते छन्दसीति वक्ष्यते । तदेतदादीनां सर्वेषां शेषः । यदाह न्यासकारः । 'ये निजादिभ्यः परे पठ्यन्ते ते सर्वे छान्दसाः, तथा हि तान्पठित्वा छन्दसीत्युक्तम्' इति । स्वामिकाश्यपाभ्यामपि छान्दसत्वमेवोक्तम् । अर्तेश्छान्दसत्वादियर्तीत्यादौ "बहुलं छन्दसि" इतीत्वे सिद्धे पुनः "अर्तिपिपर्त्योश्च" इति इत्वविधानं भाषायामप्यस्य प्रयोगोऽस्तीति ज्ञापनार्थमिति वदता भाष्यकारेणाप्ययमर्थः स्फोरितः । अत एव भाष्यविरोधात्कातन्त्रोक्तमेषां भाषाविषयत्वमुपेक्ष्यम् । अत एव पुरुषकारेऽपि 'घृप्रभृतयोऽपि छान्दसा इति केचिदिति मैत्रेयग्रन्थमुपादाय केचिच्छब्दो भाष्यानुसारिण इति व्याख्येयम्' इत्युक्तम् । (जिघर्ति) 'जिघर्म्यग्निं मनसा घृतेन' इत्यादि भृञ्वत् । "बहुलं छन्दसि" इतीत्वम् ॥ घरतीति सेचने शपि ॥ १४ ॥

हृ प्रसह्यकरणे ॥ 'अयं स्त्रुवो अभिजिहर्ति होमान्' इत्यादि । हरतीति शपि ॥ १५ ॥

ऋ सृ गतौ ॥ इयर्ति, इयृतः इय्रति, इयर्षि, इयर्मि, इयृवः) "अर्तिपिपर्त्योश्च" इति श्लावभ्यासस्येत्वे "अभ्यासस्यासवर्णे" इती यङि पिति गुणः । अन्यत्राजादौ यणादेशः । (आर, आरतुः, अरिथ, आरिव) णिति वृद्धिः, अन्यत्र "ऋच्छत्यृताम्" इति गुणः । उभयोः स्थानिवत्त्वात् ऋशब्दस्य द्विर्वचनोरदत्वहलादिशेषेषु "अत आदेः" इत्यभ्यासस्य दीर्घे सवर्णदीर्घः । थलि "इडत्यर्तिव्ययतीनाम्" इति भारद्वाजनियमं बाधित्वा नित्यमिट् (इयर्तु, इयृतात्, इयृताम्, इय्रतु, इयृहि, इयृतात्, इयराणि । ऐयः, ऐयृताम्, ऐयरुः, ऐयः, ऐयरम्, ऐयृव,) पूर्ववदाभ्यासस्येत्वेयङोराटि वृद्धिः । हल्ङ्यादिना तिस्योर्लोपः । जुसि गुणः । (इयृयात्, इयृयाताम्, इयृयुः, इयृयाः, इयृयाम्) । आशिषि (अर्यात्, अर्यास्ताम्,) "गुणोर्तिसंयोगाद्योः" इति गुणः । (आरत्, आरताम्, । आरः, आरम्, आराव,) "सर्तिशास्त्यर्तिभ्यश्च" इत्यङ् । "ऋदृशोऽङि" इति गुणः (समियृते, समिय्राते, समियृषे, समिय्रे । समारे, समारिषे, समारिवहे । समर्ता । समरिष्यते । समियृतां, समिय्रातां, समियृष्व, समियरै,) आटि गुणः । (समैयृत, समैय्रातां, समैयृथाः, समय्रि, समैयृवहि । समिय्रीत, समिय्रीयातां, समिय्रीथाः, समिय्रीय) । आशिषि (समृषीष्ट, समृषीयास्ताम् । समारत, समारन्त, समारथाः, समारे, समारावहि) । "सर्तिशास्ति"इत्यत्र परस्मैपदानुवृत्तिरुत्तरार्थेत्यात्मनेपदेऽपि वृत्तावङुक्तः । तथा च भट्टिः । 'समारन्त ममाभीष्टा' इति। "समो गमृच्छि"इत्यादिनाऽकर्मकात्सर्वत्र तङ् । यस्त्वत्र भाष्ये मासमृत मासमृषातामिति सिचः प्रयोगः स भौवादिकस्य। अङ्विधौ तस्य ग्रहणं नेति तत्रैवोक्तम् । (इयृति) इत्यादौ "अचः परस्मिन्" इति यणः स्थानिवत्त्वान्न वलि लोपः । 'यलोपविधिं प्रति न स्थानिवत्' इतत्येतत्तु लोपाजादेशविषयम् । शेषं भौवादिकवत् । ससर्तीत्यादि यथादर्शनं छन्दसि ॥ ऋच्छति सतीति शपि ॥ घृप्रभृतय उदात्तेतोऽनुदात्ताः ॥१६॥१७॥

भस भर्त्सनदीप्त्योः ॥ 'कपिर्बभस्ति ते जनम्' । (बब्धः) । "घसिभसोर्हलि च" इत्युपधालोपे "झषस्तथोर्धो धः" । "झलां जश् झशि" इति जश्त्वम् । (बप्सति) । उपधालोपे "खरि च" इति चर्त्वम् । "न पदान्त"इत्यादिना जश्त्वचर्त्वयोरुपधालोपस्य न स्थानिवत्त्वम् ।अन्यदपि यथादर्शनम् । (भस्म) । "अन्येभ्योऽपि दृश्यते" इति भाषायामपि मनिन् । (भस्त्रा) । "हुयामा" इत्यादिना त्रन् । स्वभावात् स्त्रियाम् । (भस्त्रिका, भस्त्रका, अभस्त्रिका, अभस्त्रका, परमभस्त्रिका, परमभस्त्रका) । "भस्त्रैषा" इत्यादिना केवलस्य

नञ्पूर्वस्य अन्यपूर्वस्य चास्यककारात्पूर्वस्यात्स्थानिकस्याकारस्य वेत्वम् । भस्त्रया हरति (भस्त्रिकः भस्त्रिकी) । "भस्त्रादिभ्यष्ठन्" इति हरत्यर्थे ष्ठन् । षित्त्वाङीष् स्त्रियाम् । न बभस्तीति (नभः) । क्विबित्यात्रेयः ॥ १८ ॥

कि ज्ञाने ॥ अनुदात्तः । (चिकेति, चिकितः, चिक्यति) इत्यादि । "एरनेकाच" इति यण् ॥ १९ ॥

तुर त्वरणे ॥ (तुतोर्ति, तुतूर्तः, तुतुरति) इत्यादि । तसि "हलि च" इति दीर्घः । (तुरः) । इगुपधात्कः ॥ २० ॥

धिष शब्दे ॥ (दिधेष्टि, दिधिष्टः,) इत्यादि ॥ २१ ॥

धन धान्ये ॥ (दधन्ति, दधन्तः, दधनति,) इत्यादि ॥ २२ ॥

जन जनने ॥ (जजन्ति) इत्यादि । क्यादय उदात्ता उदात्तेतः ॥ २३ ॥

गा स्तुतौ ॥ अनुदात्त उदात्तेत् । देवान् (जिगाति, जिगीतः,जिगति) इत्यादि । हलादौ क्ङिति सार्वधातुके "ई हल्यघोः" इतीत्वम् । अजादौ तु "स्नाभ्यस्तयोः" इत्यालोपः । (गायति गाते) इति द्वयं शपि । इह छन्दसीति पठ्यते । तच्च घृप्रभृतीनां शेष इति प्रागेवोक्तम् ॥ २४ ॥

वृत् ॥ जुहोत्यादयो वृत्ता इत्यर्थः ॥

इति पूर्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसङ्गमहाराजमहामन्त्रिणा मायणसुतेन माधवसहोदरेण सायणाचार्येण विरचितायां माधवीयायां धातुवृत्तौ जुहोत्यादयः ॥

अथ दिवादिः ।

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु ॥ एतदादयो दीङ्पर्यन्ता उदात्ता उदात्तेतः । क्षिपिस्त्वनिट् । (अक्षैर्दीव्यति, अक्षान् दीव्यति, दीव्यतः दीव्यन्ति । दीव्यामि) "दिवादिभ्यश्श्यन्" इति श्यन् शपो ऽपवादः। "हलि च" इतीको दीर्घः। "दिवः कर्म च" इति दिवस्साधकतमस्य करणस्य सतः कर्मसंज्ञाविधानाद् अक्षशब्दात् तृतीयाद्वितीये पर्यायेण भवतः । संज्ञासमावेशस्य प्रयोजनं मनसा दीव्यति मनसादेवो नाम कश्चिदित्यत्र मनसः कर्मत्वात्तस्मिन्नुपपदे अण्प्रत्ययः, करणत्वात्तृतीया च । अत्र तृतीयाया । "मनसः संज्ञायाम्" इत्यलुक्। तथाक्षैर्देवयते देवदत्तेनेत्यत्र संज्ञासमावेशेन करणानामेवाक्षाणां कर्मत्वाद् "अणावकर्मकात्" इति परस्मैपदनियमो न भवति । किञ्च "गतिबुद्धि" इति प्रयोज्यस्य कर्मत्वमपि न भवति । (दिदेव, दिदिवतुः, दिदिवुः, दिदिविथ, दिदिविव, दिदिविम । देविता । देविष्यति । दीव्यतु, दीव्यतां, दीव्य, दीव्यानि,) "अतो हेः" इति हेर्लुक् । (अदीव्यत्, अदीव्यताम्, अदीव्यः, अदीव्यम् । दीव्येत्, दीव्येतां, दीव्येयुः, दीव्येः, दीव्येयम्) यासुटि "अतो येयः"। आद्गुणः । यलोपो वलि, आशिषि, (दीव्यात्, दीव्यास्ताम्, अदेवीत्, अदेविष्टाम्, अदेवीः, अदेविषम्,) "नेटि" इति न वृद्धिः । (दीव्यत् । दीव्यन्ती कुले । दीव्यन्ती ब्राह्मणी) "नपुंसकाच्च" इत्यौङश्शीभावः । ङीप् । उभयत्र "शप्श्यनोर्नित्यम्" इति शीनद्योः परतो नित्यं नुम् । (दिदेविषति) । "सनीवन्त" इति वेट् । अन्यदा "हलन्ताच्च" इति सनः कित्त्वे "च्छ्वोश्शूठ्" इत्यूठि यणादेशे (दुद्यूषति । देदीव्यते) । ऊठ्भाविनां वकारान्तानां यङ्लुङ्नास्तीति भूवादौ प्रतिपादितम् । (देवयति । अदीदिवत् । देवः, देवी ।) पचादिषु देवडिति पाठाद् इगुपधलक्षणं कं बाधित्वाऽचि टित्वान्ङीप् । देवस्यापत्यादि (दैव्यं, दैवं) "दित्यदित्यादित्यु०" इत्यत्र "देवस्य यञञौ" इति प्राग्दीव्यतीयेष्वर्थेषु यञञौ । देवस्येदं (देवकीयम्) । "गहादिभ्यश्च" इत्यत्र [देव-

स्य चेति वक्तव्यम्] इति कुगागमच्छप्रत्ययश्च शैषिकः । 'नूनमस्य दैवानुग्रह' इति भाष्य-प्रयोगादञपि भवति । देव एव (देवता) । "देवात्तल्" इति स्वार्थे तल् । स्वभावात्स्त्री-त्वम् । दैवतैव (दैवतम्) । प्रज्ञादित्वाद् अण् । [स्वार्थिकाः प्रकृतितो लिङ्गव-चनान्यतिवर्तन्ते] इति पुंनपुंसकत्वम् । पितृदेवतायै इदं (पितृदेवत्यम्) । "देवतान्तात्ता-दर्थ्ये यत्" इति यत् । (दैविकम्) । अध्यात्मादित्वाट्ठञ् । (आधिदैविकम्) पूर्ववट्ठञ् । "अनुशतिकादीनां च" इत्युभयपदवृद्धिः । देवेषु वसति देवान् गच्छति (देवत्रा) "देवम-नुष्य" इत्यादिना त्राप्रत्ययः । (देविका) । देवीशब्दात्संज्ञायां कनि "केऽणः" इति ह्रस्वः । देविकायां भवं (दाविकम्) । देविकाकूले भवाश्शालयः (दाविकाकूलाः)। पूर्वदेविका नाम प्राचां ग्रामः । तत्र भवः (पूर्वदाविकः) । "देविकाशिंशपा" इत्यादिना देविकाया अचामादेरच आकारः । अयं चाकार अद्योरुदाहरणयोः "तद्धितेष्वचामादेः" इति वृद्धि-प्रसङ्गे । इतरस्य तु "प्राचां ग्रामनगराणाम्" इत्युत्तरपदवृद्धिप्रसङ्गे । सुदेविकायां भवं (सौदेविकम्) इत्यत्र देविकाया अनङ्गादित्वात् समुदायस्याप्राग्ग्रामवाचित्वाच्च नास्ति देविकायां वृद्धेः प्राप्तिरिति वृद्धिप्रसङ्गे विधीयमानोऽयमाकारोऽपि नैव प्रसजति । यस्तु ण्वुलन्तः क्रियाशब्दो देविकाशब्दो, न तस्येह ग्रहः, रूढ्या योगस्यापहारात् । तेन तत्र दैविकमिति वृद्धिरेव भवति । अत्रात्रेयः । 'देवको नाम क्षत्रियः, संज्ञायां ण्वुल्' । तस्यापत्यं (दैवकिः) । अत इञि आदिवृद्धिः । "इतो मनुष्यजातेः" इति ङीष्, देवकीनन्दनः शौरिः । अवृद्धस्त्वयमसाधुः इति । (आदेवकः) । "दैविक्रुशोः" इति ण्यन्तात् ताच्छील्यादौ वुञि (देवित्वा, द्यूत्वा,) "उदितो वा" इतीड्विकल्पः । इटि "न क्त्वा सेट्" इत्यकित्त्वादूगुणः, अन्यदा "च्छ्वोश्शूठ्" इत्यूठि यणादेशः । न च वर्णमात्रा-श्रयत्वेनान्तर्भूताश्रयत्वेन वा ऽन्तरङ्गे यणि बाह्यप्रकृतिप्रत्ययापेक्षस्य बहिरङ्गस्योठः "असिद्धं बहिरङ्गमन्तरङ्गे" इत्यसिद्धत्वम् ; 'नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः' इति निषेधात्, अचोरान-न्तर्यं यत्रान्तरङ्गे बहिरङ्गे वा विधावाश्रीयते न तत्र 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषा प्रवर्तत इत्यर्थः । (आद्यूनः) । "दिवोऽविजिगीषायाम्" इति निष्ठानत्वम् , विजिगीषायां तु (द्यूतम्) । "यस्य विभाषा" इत्यनिट्त्वम् । अक्षद्यूतेन निर्वृत्तम् (आक्षद्यूतिकम्) "निर्वृत्तेऽ-क्षद्यूतादिभ्यः" इति ठक् । (शतस्य दीव्यति) । "दिवस्तदर्थस्य" इति कर्मणि षष्ठी । तच्छब्देन व्यवहृपणौ परामृश्येते । तदर्थत्वं च द्यूते क्रयविक्रययोश्च । (शतस्य प्रतिदीव्यति, शतं प्रतिदीव्यति) "विभाषोपसर्गे" इति पूर्वेण नित्यं प्राप्तायां षष्ठ्यां तद्विकल्पः । किकीति-दीव्यतीति (किकीदिविः) चाषः, दीर्घद्वितीयः । तथा च निघण्टुः । 'अथ चाषः किकीदिविः' इति । "कृविघृष्टिच्छविस्थविकिकीदिविः" इति किकीशब्दउपपदे क्विनि निपात्यते । रत्नको-शानुसारिणस्तु । दीर्घतृतीयं पठन्ति । तैत्तिरीयकेऽपि दृश्यते । "श्येनेन किकिदीविना" 'छगलं कल्माषं किकिदीविम्' इति दीर्घतृतीयान्त एव । (द्यौः) । "दिवेर्डिविः" इति न्या-न्यासऊहितसूत्रेण व्युत्पादितम् , "दिव औत्" इति सौ औत् , यणादेशः । (द्युभ्याम्) इत्यादौ "दिव उत्" इति दिवः पदस्योत्वम् । शूड्विधौ क्ङिद्ग्रहणाननुवृत्तिवादिनः परो-ऽप्यूठ् इहाहर्विमलद्यु इत्यत्र सावकाशेनाप्युत्वेन तपरकरणसामर्थ्याद्बाध्यत इति परिहरन्ति । दिव्ग्रहणे च धातोस्सानुबन्धकत्वेन न ग्रह इति अक्षद्यूः, अक्षद्युभ्यामित्यत्र क्विबन्ते औत्वोत्व-योर्नैव प्रसङ्गः । (दिव्यम् ।) "द्युप्राक्" इति यत् शैषिकः, "न भकुर्छुराम्" इति दीर्घ-निषेधः । (द्यावाभूमी) । "दिवो द्यावा" इत्युत्तरपदे द्यावादेशः । (द्यावापृथिव्यौ, दिव-स्पृथिव्यौ) । "दिवसश्च पृथिव्याम्" इत्युत्तरपदे दिवस्भावो द्यावादेशश्च । द्यावापृथिव्यौ देवता अस्य (द्यावापृथिव्यम् , द्यावापृथिवीयम्) । "द्यावापृथिवीशुनाशीर" इत्यादिना यच्छौ । ण्यन्ताद्देवयतेः क्वौ णिलोपे [क्वौ लुप्तं न स्थानिवत्] इति स्थानिवत्त्वनिषेधाद् ऊठ्य-च्यादेशे दयूरिति भवति । (दय्वौ) इत्यादौ "ओस्सुपि" इति यणादेशः । द्यौरोको येषां ते

(दिवौकसः)। अत्र विवदन्ते । "दिव उत्"इत्यत्र रक्षितः। 'उत्त्वे कृते शब्दपरविप्रतिषेधात्तस्य यणि दिवोकस इत्यवृद्धिः' इति। चान्द्रास्तु पूर्ववद्यणि ओकारस्य पृषोदरादित्वाद्वृद्धिमाहुः। अन्ये तु दीव्यन्त्यस्मिन्निति (दिवम्) [घञर्थे कविधानम्] इति कः, तत्र "वृद्धिरेचि" इति वृद्धिरिति। अस्य वृद्धिविषय एव प्रयोग इति केचित्। अपरे तु सर्वत्रेति। तथा च सुभूतिचन्द्राभ्यां प्रयोगो दर्शितः। 'मरुत्वता वृत्रवधे यथादिवम्' इति। त्रिदशा दीव्यन्त्यत्रेति (त्रिदिवः)। पृषोदरादित्वाद् दशशब्दस्य लोपः, पूर्ववत्कः। यद्वा ब्रह्मविष्णुमहेश्वराख्यो दीव्यन्त्यत्रेति व्युत्पत्तिः। देवते इति देवने शपि गतम् ॥ १ ॥

षिवु तन्तुसन्ताने॥ (परिषीव्यति, निषीव्यति, विषीव्यति,) "परिनिविभ्यः" इत्यादिना षत्वम् , "सात्पदाद्योः" इति निषेधापवादः। (परिषिषेव) इत्यादौ "स्थादिष्वभ्यासेन चाभ्यासस्य" इत्यत्राभ्यासस्येति योगविभागेन स्थादीनामेवाभ्यासस्य "उपसर्गात्" इत्यादिना षत्वमिति क्रियमाणो नियमस्तत्र प्राक्सितादित्यनुवर्तनाद् इहाप्राक्सितीयेनेत्यभ्यासस्य षत्वं भवत्येव। परस्यापि "इण्कोः" "आदेशप्रत्यययोः" इति षत्वम्। उपपादितं चैतदेवं सहतौ। स्थादिसूत्रार्थः सेधतौ व्यक्तमुक्तः। अत्रात्रेयोऽभ्यासस्य षत्वं नेत्याह। तत्सहतावेव दूषितम्। (सेविता सेविष्यति। सीव्यतु। पर्यषीव्यत्, पर्यसीव्यत्,) "सिवादीनां वाड्व्यवायेऽपि" इति वा षत्वम्। एवं निविभ्यामपि। (सीव्येत्, सीव्येतात्) आशिषि, (सीव्यात्। पर्यषेवीत्, पर्यसेवीत्। पर्यषेविष्यत्, पर्यसेविष्यत्,)। पूर्ववत् षत्वविकल्पः। (परिषिसेविषति, परिषिस्यूषति,) "सनीवन्त" इतीड्विकल्पः, इडभावे "हलन्ताच्च" इति सनः कित्त्वादूठ्। पूर्ववत् "स्थादिषु"इति नियमाभावादभ्यासस्य षत्वम्। एवं निविभ्यां परस्य तु न भवति "स्तौतिण्योरेव" इति नियमात्। (सेषीव्यते। सेवयति। पर्यसीषिवत्) इत्यादौ "स्तम्भुसिवुसहां चङि" इत्यभ्यासस्य "परिनिविभ्यः" इति प्राप्तस्य षत्वस्य निषेधः। (स्यूत्वा, सेवित्वा,)। उदित्त्वादिड्विकल्पः। (स्यूतः।) "यस्य विभाषा"। (स्यूतिः) "तितुत्र" इतीण्निषेधः। (सेवनं, सीवनं)। पृषोदरादित्वाद्वा दीर्घः। तथा च चान्द्राः "ष्ठिवुसिवोर्दीर्घश्च" इति। प्रसीव्यन्ति तमिति (प्रसेवकः,) "अकर्तरि च कारके" इति घञन्तात्संज्ञायां कन्। वीणाप्रान्ते वक्रकाष्ठमुच्यते। "हलश्च" इति वा घञन्तात्कन् द्रष्टव्यः। (सूनः)। "सिवेष्टेरूच" इति नप्रत्यये टेरूकारः। दीर्घोच्चारणसामर्थ्यान्न गुणः। स्योनशब्दस्तु बाहुलकान्नप्रत्यये ऊठि यणि गुणे (सूत्रम्) "सिविमुच्योष्टेरू च" इति ष्ट्रन्, टेरूकारश्च। टित्त्वात् स्त्रियां (सूत्री)। अभ्यासार्थं तन्तुः ॥ २ ॥

स्रिवु गतिशोषणयोः॥ (स्रीव्यति) इत्यादि दीव्यतिवत्। (सिस्रेविषति। सुस्रूषति)। इवन्तत्वादिड्विकल्पः। इडभावे "हलन्ताच्च" इति कित्त्वे "ज्वरत्वर" इत्यादिना वकारोपधयोरूठि द्विर्वचनम्। (सेस्रीव्यते। सेस्रोति, सेस्रूतः, सेस्रिवति, सेस्रोषि, सेस्रोमि, सेस्रीवः, सेस्रूमः) झलादावनुनासिकादौ क्वौ च उपधावकारयोः "ज्वरत्वर" इत्यादिना ऊठ्। (स्रेवित्वा, स्रूत्वा)। उदित्त्वादिड्विकल्पः। (स्रूतः) "यस्य विभाषा" इत्यनिटत्वम्। (स्रूतिः)। "तितुत्र" इत्यनिट्त्वम्। (स्रूः, स्रुवौ,) क्वौ पूर्ववदूठ्, अजादावुवङ्। "ओः सुपि" इति यण् संयोगपूर्वत्वान्न भवति ॥ ३ ॥

ष्ठिवु निरसने॥ (ष्ठीव्यति) इत्यादि सीव्यतिवत्॥ (तिष्ठेव) इत्यादौ अभ्यासे खयश्शेषः। अत्र वक्तव्यं भूवादौ ष्ठेवतावुक्तम्। "सुब्धातुष्ठिवुष्वष्कतीनाम्" इति षः सकारनिषेधः। अमुं धातुमात्रेयादयः पठन्ति। अन्ये तु न पठन्ति। यदाह "धात्वादेष्षस्स" इत्यत्र न्यासकारः। ष्ठिवुं दिवादिष्वपि के चिदधीयते' इति ॥ ४ ॥

ष्णुसु अदने॥ आदान इत्येके। अदर्शन इत्यपरे। "धात्वादेष्षस्सः" (स्नुस्यति। सुष्णोस, सुष्णुसतुः सुष्णोसिथ, [illegible]) "आदेशप्रत्यययोः" इत्यभ्या-

सात्परस्य षत्वे ष्टुत्वं, "रषाभ्याम्" इति णत्वं वा। (स्नोसिता। स्नोसिष्यति। स्नुस्यतु। अस्नुस्यत्। अस्नुस्यः। स्नुस्येत्) आशिषि (स्नुस्यात्। अस्नौसीत्, अस्नौसिष्टाम्, अस्नौषीः, अस्नोषिष्ट,) "नेटि" इति सिचि वृद्धेरभावः। (सुस्नुसिषति, सुस्नोसिषति, स्नुसित्वा स्नोसित्वा) "रलोव्युपधात्" इति वा कित्वम्। "स्तौतिण्योः" इत्यभ्यासात्परस्य न षत्वम्। (सोष्णुस्यते। सोष्णुसीति, सोष्णोस्ति, सोष्णुस्तः। स्नोसयति। असुष्णुसत्। स्नुषा) इगुपधलक्षणे के टाप् सुषामादित्वात् षत्वम्। औणादिक इत्यात्रेयः। ष्णुस निरसनइत्येके। सिच्चेत्यात्रेयमैत्रेयौ उदुपधं चाहतुः। स्वामिकाश्यपौ तु अदुपधमसुमेव पठित्वा ष्णुस अदर्शनइति द्रमिडा इत्युकारोपधं पक्षान्तरमाहतुः। तत्र मित्त्वं "जनीजृष्क्नसु" इतिपाठाश्रयेण। (स्नस्यति, सस्नास) इत्यादि, षोपदेशस्य प्रयोजनं णौ (स्नसयति, असिष्णसत्, सिष्णसयिषति) इति॥६॥

क्नसु ह्वरणदीप्त्योः॥ ह्वरणं कौटिल्यम्, (क्नस्यति, चक्नास, क्नसिता, क्नसिष्यति, क्नस्यतु। अक्नस्यत्। क्नस्येत्।) आशिषि (क्नस्यात्। अक्नसीत्, अक्नासीत्,) "अतो हलादेः" इति वा वृद्धिः। (चिक्नसिषति। चाक्नस्यते। चाक्नस्ति। क्नसयति। अचिक्नसत्) "जनीजृष्क्नसु" इति मित्त्वम्। (क्नसित्वा क्नस्त्वा) "उदितो वा" इतीड्विकल्पः, (क्नस्तः)। "यस्य विभाषा" इतीण्णिषेधः। (चक्नसः)। घञर्थे कः। "कृञादीनां के द्वे भवतः" इति द्वित्वम्॥६॥

व्युष दाहे॥ दन्त्योष्ठ्यादिः मूर्धन्यान्तश्च। तथा च वैद्यके त्रिकटुकपर्याये व्योषशब्दः पठ्यते। अयमग्रे पुषादौ विभागे पठिष्यते, तत्फलं तत्रैवाङ्सिद्धिः। क्वचिदुभयत्र विभागार्थो दन्त्यान्त ओष्ठ्यादिश्च पठ्यते। तत्र पुनः पाठे फलमेकत्रैवार्थे रूपद्वयसिद्धिः। (व्युष्यति। वुव्योष, वुव्योषिथ, वुव्युषिव। व्योषिता। व्योषिष्यति। व्युष्यतु। अव्युष्यत्। व्युष्येत्।) आशिषि, (व्युष्यात्। अव्योषीत्, अव्योषिष्टाम्। वुव्युषिषति, वुव्योषिषति, व्युषित्वा, व्योषित्वा,) पूर्ववत्कित्त्वविकल्पः। (वोव्युष्यते। व्योव्युषीति, वोव्योष्टि। व्योषयति। अवुव्युषत्। व्युषितः)॥७॥

प्लुष च। (प्लुष्यति) इत्यादि पूर्ववत्। अयं पुषादावपि पठ्यते। फलमङोऽपि सिद्धिरिति स्वामी॥८॥

नृती गात्रविक्षेपे॥ (नृत्यति। ननत, ननृततुः, ननर्तिथ, ननृतिव। नर्तिता। नर्तिष्यति, नर्त्स्यति,) "सेऽसिचि" इति सिज्वर्ज्यस्य सकारादेरिड्विकल्पः (नृत्यतु। अनृत्यत्। नृत्येत्।) आशिषि, (नृत्यात्। अनर्तीत्, अनर्तिष्टाम्। निनर्तिषति, निनृत्सति,) "हलन्ताच्च" इत्यनिटि कित्त्वम्। (नरीनृत्यते) क्षुभ्नादिषु 'नृत्यतेर्यङि' इति पाठाण्णत्वनिषेधः। (नर्नर्ति, नरिनर्ति, नरीनर्ति) इत्यादि। ऋग्रिग्रीकः (नर्तयति, नर्तयते। अनीनृतत्, अननर्तत्,) "उर्रृद्वा"। अस्य चलनार्थत्वाद् अणावकर्मकत्वाच्च "निगरणचलने" इत्यादिना योगद्वयेन कर्त्रभिप्राये क्रियाफले यत्र परस्मैपदं प्राप्तं तत्र "न पादम्" इत्यादिना निषिध्यते। (नृत्यम्)। "ऋदुपधात्" इति क्यप्। (नर्तकः, नर्तकी।) "शिल्पिनि ष्वुन्" इति ष्वुन्, तत्र नृतिखनिरञ्जिभ्यः परिगणनम्। (नृत्तः, नृत्तवान्,) ईदित्करणम् "यस्य विभाषा" इत्यस्यानित्यत्वज्ञापनार्थम्। तेन धावित इत्यादि सिद्ध्यतीति आत्रेयमैत्रेयौ। स्वामिकाश्यपौ तु "अवयवेचरितार्थत्वाद् यङ्लुङिनवृत्त्यर्थम्" इति। अत्र यस्य विभाषा नास्ति, "सेऽसिचि" इत्यत्र एकाच इत्यनुवृत्तेरिड्विकल्पस्यैवाभावादिति तयोरभिप्रायः। (नृतूः) दीर्घाकृतिः "नृतिश्च्योः कूः" इतिकूप्रत्ययः॥९॥

त्रसी उद्वेगे॥ (त्रस्यति, त्रसति,) "वा भ्राश" इति श्यन्विषये पक्षे शप्। (तत्रास, तत्रसतुः, त्रेसतुः, तत्रसिथ,) "वा जृभ्रमुत्रसाम्" इति किति लिटि थलि च सेटि एत्वाभ्यासलोपविकल्पः। (त्रसिता। त्रसिष्यति। त्रस्यतु, त्रसतु,। अत्रस्यत्, अत्रसत्। त्रस्येत्,

त्रसेत्) आशिषि (त्रस्यात् । अत्रासीत्, अत्रसीत् । तित्रसिषति । तत्रास्यते । तात्रस्ति । तात्रसीति । त्रासयति । अतित्रसत् । त्रस्नुः) "त्रसिगृधि" इत्यादिना क्नुः। (त्रस्तः, त्रस्तवान्) ईदित्त्वादनिट्त्वम् । (तरङ्गापत्रस्तः) "अपेतापोढ" इति पञ्चमीसमासः । (त्रासः) घञ् । स्तनदोषो भयं च । त्रस धारणे चुरादौ ॥ १० ॥

कुथ पूतीभावे ॥ पूतीभावो दुर्गन्धः (कुथ्यति । चुकोथ, चुकोथिथ । कोथिता । कोथिष्यति । कुथ्यतु । अकुथ्यत् । कुथ्येत्) आशिषि, (कुथ्यात् । अकोथीत् । चुकुथिषति, चुकोथिषति,) "रलो व्युपधात्" इति कित्त्वविकल्पः । अयं क्त्वायां न, "नोपधात्थफान्ताद्वा" इत्यत्र नोपधग्रहणसामर्थ्यात् । तेन "न क्त्वा सेट्" इत्यकित्त्वात् (कोथित्वा) इति भवति । तत्र हि नोपधग्रहणस्य एवमादिरनोपधः प्रत्युदाहरणम् । यद्यत्र "रलः" इति विकल्पस्यात्किं नोपधग्रहणेन, न च ऋफ ऋफि हिंसायामित्यनोपध फान्त ऋफतिः प्रत्युदारणम् अर्फित्वा इति । अत्र हि "न क्त्वा सेट्" इति नित्यं कित्त्वनिषेधः । नैतदस्ति, त्रैशब्द्यं हि नस्साध्यम्, अर्फित्वा ऋफित्वा ऋम्फित्वा इति, तच्च असत्यपि नोपधग्रहणे सामान्येन विकल्पः प्रवृत्तावपि भविष्यति (चोकुथ्यते । चोकोत्ति । कोथयति । अचूकुथत् । कुथः) इगुपधलक्षणः कः । कुथितमनेन (प्रकुथितः) "उदुपधात्" इति कित्त्वविकल्पोऽत्र न भवति, तत्र अन्यतरस्यां ग्रहणस्य व्यवस्थितविकल्पत्वात् शब्विकरणानामेव ग्रह इति । तथा च भाष्ये "उदुपधाच्छप" इति । कुन्थतीति हिंसायां शपि गतम् ॥ ११ ॥

पुथ हिंसायाम् (पुथ्यति) इत्यादि कुथ्यतिवत् । पुन्थतीति शपि गतम् ॥ १२ ॥

गुध परिवेष्टने ॥ अयं चतुर्थान्तः (गुध्यति) इत्यादि । (गुधित्वा ।) "मृडमृद" इत्यादिना सेटः क्त्वः कित्त्वम् । (गोधा) भिदादिपाठाद् अङि गुणः (गोधिका) । संज्ञायां कनि "केऽणः" इति ह्रस्वे "प्रत्ययस्थात्" इतीत्वम् । गोधाया अपत्यं (गौधेरः) । "गोधाया ढ्रक्" इति ढ्रक् । (गौधारः) । "आरगुदीचाम्" इत्यारक् । उदीचां ग्रहणात्पक्षे "स्त्रीभ्यो ढक्" इति ढकि (गोधेयः) (गोधूमः) "गुधेरूम" इत्यूमः । रोषेऽयं क्र्यादिः ॥ १३ ॥

क्षिप प्रेरणे ॥ (क्षिप्यति । चिक्षेप, क्षिप्ता । क्षिप्स्यति । क्षिप्यतु । अक्षिप्यत् । क्षिप्येत्) आशिषि (क्षिप्यात् । अक्षैप्सीत्, अक्षैप्साम् । चिक्षिप्सते, चेक्षिप्यते । चेक्षेप्ति । क्षेपयति । अचिक्षिपत् । क्षिप्त्वा । क्षिप्तः । क्षिपः) 'इगुपधलक्षणः कः (क्षिपका) । अज्ञातादौ कः । "प्रत्ययस्थात्" इतीत्वस्य [क्षिपकादीनां चोपसङ्ख्यानम्] इति निषेधः (क्षिप्नुः) "त्रसिगृधिधृषि" इत्यादिना क्नुः । (परिक्षेपी) । सम्पृचादिना घिनुण् । (परिक्षेपकः) "निन्दहिंस" इत्यादिना वुञ् । (क्षिपा) । भिदादिपाठादङ् । (क्षिप्रम्) "ऋजेन्द्र" इत्यादिना रक् । (क्षेपिष्ठः, क्षेपीयान् । क्षिपयति ।) "स्थूलदूर" इत्यादिना "णाविष्ठवत्" इतियणादेर्लोपः, पूर्वस्य च गुणः । सम्पृचादिसूत्रे वृत्तिकारेण 'क्षिपिर्दिवादिस्तुदादिश्च गृह्यते' इत्युक्तत्वात् । 'द्वाविमावम्भसि क्षिप्य गले बध्वा महाशिलाम्' इति, 'संक्षिप्य संरम्भमसह्विपक्षम्' इति, भारते भट्टिकाव्ये च दर्शनात्, पारायणिकैः क्षिपेरिह पाठो ऽयुक्त इति भूसूत्रे सुधाकरेण प्रतिपादितम् । कृतस्तौदादिकस्यापि समानाः । 'स्वरेण नीचेन शपिं छुपिं क्षपिम्' इति पाठादयमनिट् । अयं चुरादावदन्त इत्यात्रेयः ॥ १४ ॥

पुष्प विकसने (पुष्प्यति । पुपुष्प, पुपुष्पिथ, पुपुष्पिव । पुष्पिता । पुष्पिष्यति । पुष्प्यतु । अपुष्प्यत् । पुष्प्येत् । पुष्प्यात् । अपुष्पीत् । पुपुष्पिषति । पोपुष्प्यते । पोपुष्प्ति । पुष्पयति । अपुपुष्पत् । पुष्पम्) अच् । (पुष्पकम्) संज्ञायां कन् । (शणपुष्पी) "पाककर्णपर्णपुष्प" इत्यादिना ङीप् । (सत्पुष्पा, प्राक्पुष्पा, प्रत्यक्पुष्पा, काण्डपुष्पा, प्रान्तपुष्पा, शतपुष्पा, एकपुष्पा) "सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्" इत्यजादिपाठात् पुष्पोत्तरपदलक्षणं ङीषं बाधित्वा टाप् । अगिति क्विबन्तोऽञ्चतीत्युच्यते । (पुष्पित्वा । पुष्पितः) "निष्ठा," तारकादित्वादितज्वा ॥ १५ ॥

तिम स्तिम ष्टीम आर्द्रीभावे ॥ तिम्यति । तितेम । तेमिता । तेमिष्यति । तिम्यतु । अतिम्यत् । तिम्येत्) आशिषि, (तिम्यात् । अतेमीत् । तितेमिषति, तितिमिषति । तेतिम्यते । तेतेम्ति । तेमयति । अतीतिमत् । स्तिम्यति । तिष्टेम) इत्यादि । अभ्यासे खयश्शेषः । स्तीम्यति) इत्यादि । अत्र केचिदसंयोगादि तीम इति दीर्घान्तं चतुर्थमपि धातुं पठन्तीत्यात्रेयः । (तिमिः,) "इगुपधात् किच" इतीन्प्रत्ययः । (तिमिरम्) "इषिमदि" इत्यादिना किरच् ॥ १६ ॥ १७ ॥ १८ ॥

व्रीड चोदने ॥ चोदनं लज्जेति स्वामी । लज्जायामप्यधीयतइतिमैत्रेयः । आत्रेयस्तु व्रीड चोदने लज्जायामिति । (व्रीडयति । विव्रीड, विव्रीडिथ, विव्रीडिव । व्रीडिता । व्रीडिष्यति । व्रीडयतु । अव्रीडयत् । व्रीडयेत् । व्रीडयात् । अव्रीडीत् । विव्रीडिषति । वेव्रीडयते वेव्रीष्टि । व्रीडयति । अविव्रीडत् । व्रीडित्वा । व्रीडितः । व्रीडः) घञ् । (व्रीडा) "गुरोश्च" इत्यकारः ॥ १९ ॥

इष गतौ ॥ (इष्यति) "इषुगमियमाम्" इत्यत्र "क्सस्याचि" इत्यतो ऽचीत्यनुवर्तते, "ष्ठिवुक्लमु" इत्यतः शितीति च, तत्र शितोऽचो विशेषणादित्संज्ञकशकारादावचि छत्वविधिरितीह न भवति । ये तु तौदादिकमुदितं पठित्वा छत्वविधावपि तथा पठन्ति तेषां न कश्चित्क्लेशः (इयेष, ईषतुः, इयेषिथ, ईषिव,) पित्सु गुणे द्विर्वचनम् । "अभ्यासस्यासवर्णे" इतीयङ् । अन्यत्र सवर्णदीर्घः (प्रेषिता । प्रेषिष्यति) गुणे "वृद्धिरेचि" इति वृद्धिं बाधित्वा, "एङि पररूपम्" (इष्यतु । इष्य । इष्याणि । ऐष्यत् । इष्येत्) आशिषि, (इष्यात् । ऐषीत् । इषिषिषति । एषयति । मा भवानिषिषत्) ओणेर्ऋदित्करणाद् द्विर्वचनात्पूर्वं ह्रस्व इत्युक्तम् । (एषित्वा । एषितः) "तीषसह" इति तादौ विधीयमान इड्विकल्पः [इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः] इत्युक्तत्वादिह न भवति । (प्रैषः, प्रैष्यः) घञ्ण्यतौ । [प्रादूहोढोढ्येषैष्येषु वृद्धिर्वक्तव्या] इति एङि पररूपापवादो वृद्धिः । (अन्वेषणा) । [इषेरनिच्छार्थस्य युज्वक्तव्यः] इति युच् । (पर्येषणा, परीष्टिः) "परेर्वा" इति युच्क्तिचौ । (एषणी) "एषण करणे" इति गौरादिपाठान्ङीष् । (इषीका) । "इषेः किच्च" इतीकन्प्रत्ययः । (इष्टका) "इष्य शिभ्यां तकन्" इति तकन् । किदित्यनुवर्तनान्न गुणः । (इषीकतूलम् , इष्टकचितम्)"इष्टकेषीका" इति चिततूलयोरुत्तरपदयोर्ह्रस्वः । अत एवेष्टकेति निर्देशात् "प्रत्ययस्थात्" इति इत्वं न भवति । तदन्तविधिना (पक्केष्टकचितम्) इत्यपि भवति । अयं चुरादावपीति स्वामी । इष इच्छायां तुदादिः । इष आभीक्ष्ण्ये क्र्यादिः ॥२०॥

षुह चक्यर्थे ॥ चक्यर्थस्तृप्तिरिति स्वामिधनपालशाकटायनाः । आत्रेयमैत्रेयदुर्गाः षह षुह इति द्वौ धातू पेठुः । सहेरिह पाठो न्यासकारहरदत्तरामदेवादीनामप्यनभिमतः, यत्तत्र तत्र सहिग्रहणे भौवादिकमेवाहुः, नामुम्, न चास्याग्रहणे कारणम् । 'दाश्वान्साह्वान्' इत्यत्र "साह्वानिति 'षह मर्षणे' इत्यस्मात्परस्मैपदं निपात्यते' इति वृत्तिमुपादाय 'षह मर्षणे" इत्यात्मनेपदित्वात् चौरादिकस्य तु "आधृषाद्वा" इति णिजभावपक्षे दीर्घत्वमद्वित्वमनिट्त्वं च निपात्यत इत्यन्ये" इति वदता च हरदत्तेनेह सहेरपाठः स्फोरितः । "साह्वानिति निपातनं आधृषीयाद्विभाषितणिच" इति वदन् कैयटकारोऽप्यत्रैवानुकूलः । सहिपठतां सह्यतीत्याद्युदाहार्यम् । षत्वादिसहितवन्नेयम् । अत्र परिषह्यतीत्याद्युदाहृत्य "परिनिविभ्यः" इति षत्वमिति वदता आत्रेयेण यदुक्तं, 'यत्तु तत्र षह मर्षणइत्यस्य ग्रहणं न्यासे प्रतिपादितं नैतस्यापीति तदनागममिति नादरणीयम्' इति अस्यैव धातोरभावाद् न तस्यायं दोषः । स्वव्याघातकं चात्रेयवचनं यद्वक्ष्यति "तीषसह" इतीड्विकल्पः सहेति शबन्तस्य सूत्रे निर्देशात् नास्य" इति । तच्च यस्मात् षत्वविधावपि तुल्यम् । (सुह्यति । सुषोह । सोहिता । सोहिष्यति । सुह्यतु । असुह्यत् । सुह्येत् । सुह्यात्) लिङौ । (असोहीत् । सुसुहिषति । सुसो-

हिषति । सुहित्वा, सोहित्वा, । सोषुह्यते । सोपुहीति, सोषोढि । सोहयति । असूषुहत् । फलानां सुहितः) । "पूरणगुण" इति षष्ठीसमासनिषेधः ॥ २१ ॥

सेट्परस्मैपदप्रसङ्गात् अजन्तावपि तादृशावाह ।

जृष् झृष् वयोहानौ । (जीर्यति, जीर्यतः) "ऋत इद्धातोः" इतीत्वे रपरत्वे "हलि च" इति दीर्घः । (जजार, जजरतुः, जजरुः, जजरिथ, जजरथुः, जजार, जजर, जजरिव,) "ऋच्छत्यृताम्" इति किति गुणः । अकिति तु यथायोगं पूर्वविप्रतिषेधेन गुणवृद्धी । अस्तु वा तत्रापि "ऋच्छति" इति गुणः । कृते तस्मिन् वृद्धिस्तु "अत उपधायाः" इति भविष्यति । गुणे तु तेन वा सत्यनेन वापि न विशेषः । "वा जॄभ्रमुत्रसाम्" इत्येत्वाभ्यासलोपपक्षे (जेरतुः, जेरुः, जेरिथ, जेरथुः, जेर, जेरिव । जरिता, जरीता । जरिष्यति, जरीष्यति) । "वृतो वा" इत्यलिटो वा दीर्घः । (जीर्यतु । अजीर्यत् , जीर्येत् , जीर्यात्) लिङौ । (अजारीत्, अजारिष्टां,) "वृत" इत्यस्य "सिचि परस्मैपदेषु" इति निषेधः । (अजरत्, अजरतां,) "जृस्तम्भव" इति पक्षे च्लेर्वाऽङ् । "ऋदृशोऽङि" इति गुणः । (जिजीर्षति, जिजरिषति, जिजरीषति,) "इट् सनि वा" इति वेट् । तस्य "वृत" इति वा दीर्घः । अनिटि मनः किंत्वादित्वदीर्घयोर्द्विर्वचनम्, अन्यथा यङि जेजीर्यत इति न स्यात् । (जरयति, अजीजरत्,) "जनिजृष्" इति मित्वाद् ह्रस्वः । (जीर्यन् । जीर्यन्ती,) "शप्श्यनोः" इति नित्यं नुम् । (जरन् , जरती) इत्येतत् ।"जीर्यतेरतृन्" इति जीर्यतेरतृनि । (जरद्गवः) । "पूर्वकाल" इति समासः । "गोरतद्धितलुकि" इति टच् , (युवजरती) "युवा खलती" इत्यत्र लिङ्गविशिष्टग्रहणाद् युवतिशब्देन समासे पुंवद्भावः ॥ (अजर्यम्) "अजर्यं सङ्गतम्" इति कर्तरि सङ्गते यद् निपात्यते, असङ्गते तु (अजरिता) कम्बलः । (जरा) षित्वादङि "ऋदृश" इति गुणः । (जरे, जरसौ,) "जराया जरसन्यतरस्याम्" इत्यादौ सुपि वा जरसादेशः । जरामतिक्रान्तं ब्राह्मणकुलं अतिक्रान्तैः कुलैरिति विगृह्य "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति समस्य नपुंसकह्रस्वत्वे सोरम्भावे भिसश्चैसि सन्निपातपरिभाषाया अनित्यत्वाश्रयेणास्याजादित्वमाश्रित्य जरसादेशे ऽतिजरसमतिजरसैरिति भाव्यम् । तथा टाङस्योरपि जरसादेशात्पूर्वं इनादादेशयोः पश्चाज्जरसादेशे ऽतिजरसिना ऽतिजरसादिति केचित् । तेषामतिजरसं ब्राह्मणकुलं पश्येत्यत्र अमो लुकं बाधित्वा ऽम्भावे प्राप्ते, ततः परत्वाज्जरसादेशे तदाश्रयस्य लुको न प्रवृत्तिः, सन्निपातपरिभाषाया अनित्यत्वादिति वाच्यम् । गोनर्दीयस्तु सर्वत्र परिभाषाप्रवृत्तेस्सोरमि भिसश्चैसि टाङस्योरिनादादेशयोश्च जरसादेशाभावाद् (अतिजरमतिजरैः, अतिजरेण, अतिजराद्) इत्याह। (अतिजरांसि) इत्यत्र जश्शसोश्शीभावे नुमः परत्वाज्जरसादेशे पश्चाज्झलन्तादेशाश्रयो नुम् , अन्यथा ऽङ्गभक्तो नुम् तदवयवस्य जरशब्दस्य विभक्तेश्च आनन्तर्यं व्यवदध्यात् । अनुजीर्णा वृषलीं देवदत्तः, अनुजीर्णा वृषली देवदत्तेन । "गत्यर्थाकर्मक" इत्यादिना कर्तृकर्मणोः क्तः "श्र्युकः किति" इति "यस्य विभाषा" इति वा ऽनिट्त्वम् । जरयतीति (जारः) "दारजारौ कर्तरि णिलुक्च" इति कर्तरि घञि णिलुक् । यद्यत्र णेर्घञि "णेरनिटि" इति लोपस्स्यात् , तर्हि तस्य स्थानिवत्त्वाद् अनुपधात्वादकारस्य घञाश्रया वृद्धिर्न स्यात् । मित्वाणिजपेक्षायास्तु वृद्धेर्ह्रस्वः स्यात् । लुकि तु लुका लुप्तत्वात् [लुका लुप्तं न स्थानिवत्] इति स्थानिवत्त्वनिषेधः । अयमषित् क्र्यादौ युजादौ चेति मैत्रेयादयः। अत्रात्रेयः किञ्चिदाह। "जॄव्रश्च्योः क्त्वः" इतीड्विधौ सानुबन्धकत्वादस्याग्रहणात् "श्र्युकः किति" इति निषेधे जीर्त्वेति भवितव्यमिति स्वयमेव सानुबन्धकत्वेऽपि "जॄस्तम्भु" इत्यङि ग्रहणं चाह । एवं नियमे कारणं स प्रष्टव्यः । योऽसौ निरनुबन्धकस्स वृत्तितव्याख्यानकृतामनभिमतः । यदि हि स्यादङादिविधौ निरनुबन्धकमेवोपाददीरन् अग्रहणे कारणं वा ब्रूयुः । किञ्च "दारजारौ कर्तरि णिलुक्च" इति णिलुग्वचनं चानर्थकं स्यात् । यतः षित्त्वेनामितोऽस्माण्णौ कर्तरि घञि णेश्च लोपे प्रत्ययलक्षणेन वृद्धिर्भविष्यति । तथा च क्र्या-

दौ मैत्रेयो वक्ष्यति जृणाति पठित्वा 'धृ इत्येके' इति । (जरन्तः) । "जृविशिभ्यां झच्" इति झच् । "झोऽन्तः" (झीर्यति) इत्यादि जीर्यतिवत् ।। चलेरङेत्वाभ्यासलोपमित्वाद्यस्य न भवति । (झरः, निर्झरः,) अप् , (झर्झरः) औणादिक इत्यात्रेयः । वाद्यविशेषः । झर्झरवादनं शिल्पमस्य (झार्झरः झार्झरिकः) "मड्डुकझर्झरादणन्यतरस्याम्" इत्यण्ठकौ । दिवादयः परस्मैभाषा उदात्ताः क्षिपिवर्जम् ॥ २२ ॥ २३ ॥

षूङ् प्राणिप्रसवे ॥ (सूयते, सूयेते, सूयसे, सूये, सूयावहे । सुषुवे, सुषुविषे, सुषुविवहे । सोता, सविता । सोष्यते, सविष्यते,) "स्वरतिसूतिसूयति" इतिवलादाविड्विकल्पः । लिट्यमुं विकल्पं बाधित्वा पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यात् "श्र्युकः किति" इति प्रतिषेधे प्राप्ते क्रादिनियमान्नित्यमिट् । (सूयतां, सूयेतां, सूयस्व, सूयै । असूयत, असूयेताम्, असूयथाः, असूये, असूयावहि । सूयेत, सूयेयातां, सूयेथाः सूयेय, सूयेवहि) । आशिषि, (सोषीष्ट, सविषीष्ट, सोषीयास्तां, सविषीयास्ताम्। असोष्ट, असोषाताम्, असोष्ठाः, असोषि। असविष्ट) इत्यादि, पूर्ववदिड्विकल्पः । (सुसूषते) । "सनि ग्रहगुहोश्च" इति निषेधे कित्वाद्गुणत्वम्, अयमपि निषेधः पुरस्तादारम्भात् स्वरत्यादिविकल्पं बाधते। "स्तौतिण्योरेव" इत्यषत्वम् । (सूत्वा, सूनः, सूनवान्) "स्वादय ओदितः" इत्योदित्वाद् "ओदितश्च" इति निष्ठानत्वम् । अयमसूयार्थोऽपि । तेन देव दत्ताय सूयत इति "क्रुधद्रुह" इति चतुर्थी भवतीत्यात्रेयः । अत्र प्राणिग्रहणमतन्त्रम् । तेन प्रसूनास्तरव इति भवति । अन्ये तु 'सर्वे भावास्सचेतना' इत्यत्र प्राणित्वमाहुः । तथा च 'प्रसूनं कुसुमं समम्' इत्यत्र सुभूतिचन्द्रः, षूङ् प्राणिप्रसवे, क्षपणकमतेन वृक्षस्यापि प्राणित्वमिति । अनुक्तं सूतिवत् ॥ ३४ ॥

दूङ् परितापे ॥ परितापः खेदः । (दूयते) इत्यादि सूयतिवत् । इट्त्वस्य नित्यः । आत्मनेभाषावुदात्तौ ॥ २९ ॥

दीङ् क्षये ॥ एतदादयोऽनुदात्ता आत्मनेपदिनः पीङ्पर्यन्तः। दीङ् तु सेट् (दीयते, दीयेते। दिदीये, दिदीयाते, दिदीयिरे, दिदीयिषे, दिदीयिढ्वे, दिदीये, दिदीयिवहे) । क्रादिनियमादिट् । "दीङो युडचि क्ङिति" इत्यजादावार्धधातुके क्ङिति युडागमः । स च "एरनेकाच" इति यणि कर्तव्ये "असिद्धवदत्र" इति नासिद्धः, [वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ] इत्युक्तत्वादत्र ध्वमि "विभाषेटः" इति मूर्धन्यविकल्पो न भवति। कृते युटि प्रत्ययभक्तेनानेन इणन्तादङ्गात्परत्वमिटो विहितमिति "इणष्षीध्वम्" इति नित्यमेव भवतीत्येके। अपरे तु अङ्गादिति नानुवर्तते इति युट एव यणः परत्वान्मूर्धन्यविकल्पमाहुः । उक्तं चैतत्पक्षद्वयं वृत्तौ । (दाता । दास्यते) । "मीनातिमिनोतिदीङां ल्यपि च" इति एज्विषये ल्यपि च आत्वम् । (दीयताम्, दीयेतां, दीयस्व, दीयै । अदीयत, अदीयेताम्, अदयिथाः, अदीये। दीयेत, दीयेथाः, दीयेय) आशिषि, (दासीष्ट) इत्यादि । एज्विषयत्वादात्वम् । (अदास्त, अदासाताम्, अदास्थाः, अदासि) अत्रात्वे कृते दारूपत्वेऽपि [दीङः प्रतिषेधः स्थाघ्वोरित्वे] इति इत्वकित्त्वयोर्घुसंज्ञा निषिध्यते । अत एव विषयविशेषे घुत्वनिषेधादन्यत्र कृतात्वस्य घुसंज्ञायां प्रणिदातेत्यादि भवतीत्येके । अन्ये तु यावतामुपदेशस्थानामनुकरणं दाधारूपं भवति, तेषामेव घुत्वम्। दोदेङ्धेटामप्यनुकरणवशेन दारूपमेव, दीङस्तु नेति नैवैतस्य क्वापि घुसंज्ञाप्रसङ्ग इति। उक्तमिदं पक्षद्वयं कैयटपदमञ्जरीवाक्यमञ्जर्यादिष्वपि । (उपदिदीषते) । "इको झल्" इति सनः कित्त्वादेज्विषयत्वाभावान्नात्वम् । कातन्त्रे (दिदासते) इत्यात्वमुक्तम् । अत्र शाकटायनः, आत्वप्रकरणे "अम्यपगुरो वा दीङस्सनि" इत्यात्वविकल्पमाह । अमिति णमुलुच्यते । स्वामी तु (उपदिदीषते उपदिदासते) इत्यपीष्यते इति । काश्यपस्तु आत्वपक्षे दिदासते इत्येकइत्युक्त्वा संग्रह इत्वव्यतिरिक्तस्य घुकार्यस्योक्तत्वाद् इस्भावे उपदित्सतइत्याह । इदमात्वं सूत्रवार्तिकभाष्येषु न दृश्यते । (देदीयते, देदेति, देदीतः, देद्यति । दापयति) ।

एज्विषयत्वाभावादात्वे पुक् ।) दीत्वा, दीनः, दीनवान्) "स्वादय ओदित" इति निष्ठानत्वम् । (उपदाय) । "मीनातिमिनोतिदीङां ल्यपि च" इत्यात्वम् ॥ २६ ॥

डीङ् विहायसा गतौ ॥ (डीयते । डिड्ये, डिड्यिषे) "एरनेकाच" इति यण् । (डयिता । डयिष्यते । डीयताम् । अडीयत । डीयेत, डयिषीष्ट) लिङौ । (अडयिष्ट । डिडयिषते । डेडयते । डेडेति । डाययति । अडीडयत् । डयित्वा, डीनः, डीनवान्) । स्वादिषु पाठसामर्थ्यादनिट्त्वम्, निष्ठायाम् इटि हि व्यवधानम् "ओदितश्च" इति नत्वस्याप्रसङ्गः । डयितशब्दस्तु भौवादिकस्य । तत्र 'निष्ठाशीङ्' इत्यत्र "निष्ठा" इति योगविभागादकित्वमिति सीरदेवादयः ॥ २७ ॥

धीङ् आदाने ॥ (धीयते । दिध्ये । धेता । धेष्यते । धीयताम् । अधीयत । धीयेत । धेषीष्ट । अधेष्ट । दिधीषते । धीत्वा, धीनः, धीनवान् । न धीनः, अधीनः) यस्तु 'अस्मास्वधीनं किमु निस्पृहाणाम्' इत्यादावधीनशब्दः सोऽव्युत्पन्नः परतन्त्रवचनः यथाह कैयटः । वाक्यं वक्त्रधीनं हि' इत्युपादाय 'अध्युतरपदात्खविधानाद् अव्युत्पन्न आयत्तार्थवृत्तिरधीनशब्दे इति ॥ २८ ॥

मीङ् हिंसायाम् । अत्र हिंसाशब्देन हिंसाफलं प्राणविश्लेषोऽभिधीयते । (मीयते) इत्यादि धीङ्वत् । (मिमीषत) इत्यत्र "सनिमीम." इति नेस्भावः । तत्र 'मीनातिमिनोत्योर्द्वयोर्ग्रहणम्' इति हि वृत्तिकारः । काश्यपस्वामिवर्धमानास्तु लाक्षणिकमीरूपस्य मिनोतेरग्रहणशङ्कापनोदनपरावृत्तिः, न त्वस्याग्रहणपरेति मित्सते इतीच्छन्ति । एषाम् "इको झल्" इत्यत्र 'मीनातिमिनोत्योः' इति भाष्यमप्युपलक्षणव्याख्येयम् । मीनातीति क्र्यादौ । डुमिञिति ह्रस्वान्तस्स्वादौ । मी गताविति चुरादौ ॥ २९ ॥

रीङ् श्रवणे (रीयते । रिये । रिरियिषे) "एरनेकाच" इति यणः (असिद्धं बहिरङ्गमन्तरंगे) इत्यसिद्धत्वात् "उपधायां च" इति दीर्घो न भवति । (रेता । रेष्यते । रीयताम् । अरीयत । रीयेत, रेषीष्ट,) लिङौ । (अरेष्ट । रिरीषते। रेरीयते। रेरेति। रेपयति। अरीरिपत्,) "अर्तिह्रि" इत्यादिना पुक् (रीणः, रीणवान्, रीतिः, रेतः ।) "स्रुरीभ्यां तुट् च" इत्यसुनि तुडागमः । अत्रात्रेयः । 'अर्थनिर्देशे स्रुणोतिरयं प्रयोग इति केचित् । तथा च रीणशब्दः कर्णपर्यायः कथितः । भट्टिकाव्ये च वृन्दयमके । 'नारीणामपनुनुदुर्न देहखेदान्नारीणामलससलिलाहिरण्यधाप्यः' इत्यत्र अरीणम् अश्रुतम् अमलं सलिलमिति श्रवणे व्युत्पादितम् री गतिरेषणयोरिति क्र्यादौ ॥ ३० ॥

लीङ् श्लेषणे ॥ (लीयते । लिल्ये । लिल्यिषे । लाता, लेता । लास्यते, लेष्यते । लीयतां लीयस्व, लीयै, अलीयत । लीयेत) आशिषि, (लासीष्ट । लेषीष्ट । अलास्त, अलेष्ट) "विभाषा लीयतेः" इति विभाषाऽऽत्वमेज्विषये ल्यपि च । लिङि त्वयं विकल्पो न भवति, तस्य क्त्वेनानेज्विषयत्वात् (लिलीषते) "इको झल्" इति कित्त्वान्न गुणात्वविकल्पौ । (लेलीयते । लेलेति) "लीयतेः" इति श्तिपा निर्देशाद् आत्वविकल्पो न भवति । (विलापयति घृतं, विलीनयति, विलाययति वा) पूर्ववदात्वविकल्पः । तत्रात्वपक्षे "लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने" इति वा लुगागमः । तदभावे पुक् । तत्र हि ला इति लाक्षणिकमपि गृह्यते । अनात्वे तु नुक् । तदभावे वृद्ध्यायौ । एकदेशविकृतन्यायेन कृतात्वस्य नुङ् न भवति, ली ई इति ईकारप्रश्लेषेण ईकारान्तस्य तद्विधानात् । स्नेहविपातनादन्यत्र नुक्लुकौ न भवत इत्यात्वे पुक्, अन्यदा वृद्ध्यायौ (विलापयति । विलाययति) इति स्यादिषु चिण्वदिटि आत्वपक्षे णेर्लोपे (विलालिष्यते) इत्यादि। अनात्वे (विलीनिष्यते विलायिष्यते) इत्यादीति । शुद्धेऽटि तु (विलालयिष्यते, विलापयिष्यते, विलीनयिष्यते विलाययिष्यते) इत्यादि । तदेवमष्ट रूपाणि । लुङ्येकवचने तु "चिण्भावकर्मणोः" इति चिण्यात्वे नुकि तदभावे च वृद्धौ (अलालि अलापि अलीनि अलायि) इति चातूरूप्यम् ।

द्विवचनादौ सिचि पूर्ववदष्ट रूपाणि । कर्मकर्तरि "णिश्रन्थिग्रन्थि" इति चिणो निषेधाच्चङि द्विर्वचनादावात्वपक्षे (अलीलयत, अलीलपत) । अन्यदा (अलीलनत, अलीलयत) इति चातूरूप्यम् । एवं द्विवचनादावपि । (जटाभिरालापयते, अलाययत) इति वा, पूजामधिगच्छतीत्यर्थः। (श्येनो वर्तिकामुल्लापयते) न्यक्करोतीत्यर्थः। "लियः सम्माननशालिनीकरणयोश्च" इत्यनयोश्चकारात् प्रलम्भने चाकर्त्रभिप्रायेऽपि तङ् । तत्र सम्माननं पूजनम् । तच्च धात्वर्थस्य कर्मतया विषयः। तस्य चात्मनेपदसहितेन धातुनोपात्तत्वात् अस्मिन्विषयेऽकर्मकोऽयं पुत्रीयतिवदित्याहुः । शालिनीकरणं न्यक्करणम् । प्रलम्भनं मिथ्याफलाख्यानमित्युक्तम् । "विभाषा लीयतेः" इत्यात्वं व्यवस्थितविभाषाविधानात्सम्मानने विकल्पितम् ; अन्यत्र नित्यम् । (विलाय, विलीय) "विभाषा लीयतेः" इति वाऽऽत्वम् । (विलयः) अच् । (ईषद्विलयः,) खल् । [निमिमीलियां खलचोरात्वप्रतिषेधः] इति वा व्यवस्थितविभाषात्वेन वाऽऽत्वाभावः। (लीनः) । ली श्लेषण इति क्र्यादौ। ली द्रवीकरणे इति चुरादौ ॥३१॥

व्रीङ् वृणोत्यर्थे ॥ दन्त्योष्ठ्यादिः । (व्रीयते विव्रीये) संयोगपूर्वत्वाद्यण् न भवति (व्रेता) इत्यादि रीवत् । 'स्वादय ओदितः' 'षूङ् प्राणिप्रसवे' इत्यारभ्य एतदन्ता ओदितः । तत्फलम् "ओदितश्च" इति निष्ठानत्वम् । व्री वरणे इति क्र्यादौ ॥ ३२ ॥

पीङ् पाने (पीयते, पिप्ये) इत्यादि रीवत् । (पाययति) "निगरण" इति नित्यं परस्मैपदम् । (पाययते) इति पिबतेः, "न पाद" इति परस्मैपदनिषेधात्तङ् । (पीत्वा, पीतः, पीतवान् । आपीय, आपाययति) पिबतेः ॥ ३३ ॥

माङ् माने । अयं कैश्चिदेव पठ्यते । यदाह स्वामी । "माङ् मान" इति दुर्ग इति । तथा "घुमास्था" आदिसूत्रे न्यासेऽपि 'मा' इति कस्येदं ग्रहणम्, किं मेङ् प्रणिदान इति भौवादिकस्य, उत माङ् माने इति जौहोत्यादिकस्य, आहोस्विद् मा माने इत्यादादिकस्य । 'गामादाग्रहणेष्वविशेषः' इति त्रयाणामपि ग्रहणमिति । तथा "द्यतिस्यति" इत्यत्र "सनिमीमा" इत्यत्राप्युक्तानामेव त्रयाणां ग्रहणमित्युच्यते। पठतामीकारान्तमध्ये पाठः पवर्गीयाद्यात्मनेपदप्रसङ्गात् । (मायते । ममे । माता । मास्यते । मायताम् । अमायत । मायेत । मासीष्ट) लिङौ । (अमास्त) इत्यादि । अन्यस्मिन् मातिवत् ॥ ३४ ॥

इङ् गतौ । (ईयते । अयांचक्रे,) व्यपदेशिवद्भावाद् इजादित्वगुरुमत्त्वयोराम् । (एता । एष्यते । इयताम् । ऐयत । ईयेत । ऐषीष्ट) लिङौ । (ऐष्ट । ईषिषते । आययति । आयियत । प्रेय, प्रतीय,) ल्यप् (उपेयम्,) "अचो यत्" । क्यब्विधावेतीति निर्देशान्नास्य ग्रहः। अयते इति शपि । एति अध्येति अधीयत इति लुकि ॥ ३५ ॥

प्रीङ् प्रीतौ । अकर्मकः । (प्रीयते, पिप्रिये,) इत्यादि व्रीवत् । (प्राययति) [धूञ्प्रीञोर्नुग्वक्तव्यः] इति नुग्विधौ ञित उपादानादस्य स न भवतीति धातुवृत्तिकारः । हरदत्तस्तु 'श्नान्तानुकरणे दैवादिकस्य न भवति' इति । 'दैवादिकस्य ग्रहणेन च चौरादिकेऽप्युपलक्षयितव्य' इति पुरुषकारे । कौमारास्तु व्यक्तमेव 'धूञ् प्रीणात्योः' इति पठन्ति । (प्रियः) । "इगुपधज्ञाप्रीकिरः कः" इत्यात्रेयः । वृत्तौ तु प्रीणातीति (प्रियः) इति क्र्यादिक एव उदाहियते । (प्रेष्ठः, प्रेयान्, प्रेमा) "प्रियस्थिर" इत्यादिना प्रादेशः । प्रियमाचष्टे (प्रापयति) । "णाविष्ठवत्" इति प्रादेशे वृद्धिपुकौ । प्रीञ् तर्पण इति क्र्यादौ चुरादौ च । दीङादय आत्मनेपदिनो दीङ्वर्जमनुदात्ताः । स तु 'श्विडीङिवर्णेषु' इति वचनात्सेट् ॥ ३६ ॥

अथ अजन्तानिट्प्रकरणात्तादृशः परस्मैपदिनः पठन्ति ।

शो तनूकरणे । एतदादयो द्यतिपर्यन्ता अनुदात्ता उदात्तेतः । (श्यति, श्यतः, श्यन्ति, श्यसि, श्यामि,) "ओतश्श्यनि" इत्योकारलोपः । (शशौ, शशतुः, शशाथ, शशिथ, शश, शशिव) आत्वे द्विर्वचनम् । "आत औ णलः" । क्रादिनियमादिट् । भारद्वाजनियमात्थलीड्विकल्पः । इडागमवर्जाद्वार्धधातुके च ङिति "आतो लोप इटि च" इत्याकारलोपः ।

(शाता । शास्यति । श्यतु, श्यतात्, श्यतां, श्यन्तु, श्यानि । अश्यत्, अश्यः, अश्यम् । श्येत्, श्येतां, श्येः, श्येयम्) आशिषि (शायात्, शायास्ताम् । अशात्, अशाताम्, अशुः, अशाः) "विभाषा घ्राधेट्शाच्छासः" इति सिचः परस्मैपदे परे वा लुक् । "आतः" इति झेर्जुस् । "उस्यपदान्तात्" इति पररूपम् । लुगभावे (अशासीत्, अशासिष्टाम्,) इत्यादि । "यमरमनमाताम्" इति सगिटौ । (शिशासति । शाशायते । शाशेति । शाशा-यति) आत्वे "शाच्छास" इति युक् । (शात्वा, शीत्वा, निशातं, निशितं,) "शाच्छोरन्यतरस्याम्" इति तादौ किति वेत्वम् । व्यवस्थितविभाषाविज्ञानाद्व्रते नित्यमित्वम् । तथा च वार्तिकम् । [श्यतेरित्वं(१) व्रते नित्यमिति वक्तव्यम्] इति । (संशितव्रतः) । (शाकः) बाहुलकादौणादिकः कन्, महच्छाकं नानाजातीयं शाकसमाहारो वा (शाकी) गौरादित्वान्ङीष् । (शाकिनः) । "शाकीपलालीदद्रुवा ह्रस्वत्वं च" इति मत्वर्थे नप्रत्ययो ह्रस्वत्वं च । अत एव वा निर्देशान् ङीप् । (शादम्) "शाशपिभ्यां(२) दन्" इति दन् । (शाद्वलम्) "नडशादाड्ड्वलच्" इति वलच्चातुरर्थिकः । डित्वाट्टिलोपः ॥ ३७ ॥

छो छेदने । (छ्यति । चच्छौ, चच्छतुः,) इत्यादि सर्वं श्यतिवत् । अत्र 'अभ्यासविकारेष्वपवादा नोत्सर्गान् विधीन् बाधन्ते' इति "दीर्घात्" इत्यन्तरङ्गेणापि तुका ऽभ्यासह्रस्वबाधात् कृते तस्मिन् "छे च" इति तुक् । पूर्वं तु तुक्यभ्यासस्यानजन्त्वाद्ध्रस्वो न स्यात् । 'अभ्यासविकारेषु' इति परिभाषायामपवादग्रहणमुत्सर्गग्रहणञ्च बाधकमात्रस्य बाध्यमात्रस्य चोपलक्षणं न तु सामान्य विशेषैकमात्रपरमित्युक्तम् । (चिच्छासति) इत्यत्र यथा 'अभ्यास विकारेषु' इत्यनेन "दीर्घात्" इति तुक् ह्रस्वत्वे न बाधते तथा "छे च" इति तुगपि "सन्यतः" इति इत्वं न बाधते इति परत्वात्कृते तस्मिन्तुक् । (चाच्छायते) इत्यत्रापि पूर्ववद्दीर्घलक्षणात्तुकः पूर्वं ह्रस्वत्वे ह्रस्वलक्षणोऽपि तुगित्वद्दीर्घत्वं न बाधते इति दीर्घे कृते "दीर्घात्" इति तुक् । (छाया) "माच्छाससिसूभ्यो यः" इति यः । इक्षूणां छाया (इक्षुच्छायम्,) "छाया बाहुल्ये" इति छायान्तस्य तत्पुरुषस्य अनञ्कर्मधारयस्य नपुंसकत्वे ह्रस्वत्वम् । नञ्कर्मधारये तु (अच्छाया, परमच्छाया) इति, इह बाहुल्यं पूर्वपदार्थधर्मः । तच्च छायाहेतुभूतानामिक्ष्वादीनामनेकत्वम् । अन्यथा "विभाषा सेनासुराच्छायाशालानिशानाम्" इति नपुंसकत्वविकल्पः, इक्षोः छाया (इक्षुच्छायम्, इक्षुच्छाया) इति ॥ ३८ ॥

षोऽन्तकर्मणि । (स्यति । ससौ,) इत्यादि सर्वं श्यतिवत् । (अभिष्यति, अभिष्यत्, अभ्यषात्, अभ्यषासीत्) "उपसर्गात्सुनोति" इत्यादिना "प्राक्सितात्" इति च षत्वम् । (अभिससौ) इत्यत्र "स्थादिष्वभ्यासेन" इति नियमाद् अभ्यासस्य न षत्वम् । (अभिसिषासति) इत्यत्र पूर्ववदभ्यासस्य न षत्वम् । उत्तरस्य तु "इण्कोः" इति षत्वम् । (प्रणिष्यति । प्रण्यष्यद्) "नेर्गद" इत्यादिना णत्वम् । तच्च अड्व्यवायेऽपीष्यते । (सेषीयते) "घुमास्था" इतीत्वं हलादौ क्ङित्यार्धधातुके । आशीर्लिङ्यात्वम् "एर्लिङि" इत्येत्वे (सेयात्) इति । (अवसाय) "न ल्यपि" इतीत्वनिषेधः । (सित्वा, सितः) "द्यतिस्यति" इतीत्वम् । "परिनिविभ्य" इत्यत्र सित इत्यस्यापि ग्रहणम्, तच्च नियमार्थम् । तेन पर्यादिभ्योऽन्यत्र सितशब्दस्य षत्वाभावात् प्रतिसितमित्यत्र न षत्वमित्येके । अन्ये तु सयसाहचर्याद् अलाक्षणिकत्वादिविधिसम्भवे नियमायोगाद् विधिवैषम्यप्रसङ्गाच्च सिनोतेरेव सितशब्दस्य ग्रहणमित्यस्य "उपसर्गात्" इति षत्वं सर्वत्र भवत्येवेत्याहुः । अवस्यतीति (अवसायः) "श्याद्व्यध" इत्यादिना णे युक्, (सायः) घञ् । साये भवः, (सायंतनः) ।

---

(१) व्रत इति नास्ति कुत्रचित् ।

(२) उणादौ तु 'शाशपिभ्यां ददनौ' इत्येवं दृश्यते ।

"सायञ्चिरम्" इत्यादिना ट्युट्युलोरन्यतरः प्रत्ययः तुडागमः मान्तत्वं च सायशब्दस्य । वस्तुतो मान्तोऽव्ययं सायशब्दस्तस्याव्ययत्वादेव प्रत्ययस्सिद्धः । (सातिः) "ऊतियूति" इत्यादौ निपातनात् क्तिनोत्वाभावः ॥ ३९ ॥

दो अवखण्डने । (द्यति । ददौ) इत्यादि श्यतिवत् । (प्रणिद्यति) घुत्वात् । "नेर्गद" इत्यादिना णत्वम् (देयात्) "एर्लिङि" इत्येत्वम् , (अदात्) "गातिस्था" इत्यादिना नित्यं सिचो लुक् । (देदीयते) "घुमास्था" इतीत्वम् । (दित्सति) "सनि मीमा" इत्यादिना इस् । अभ्यासलोपः, "सस्सी" इति तत्वम् । (दापयति) पुक् । (दित्वा, दितः) "द्यतिस्यति" इतीत्वम् । (अवदाय) "न ल्यपि" इतीत्वनिषेधः इत्वस्य तु नैव प्रसङ्गः । 'अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधते' इति पूर्वमेव ल्यप्प्रवृत्तेः, तादिकितोऽभावात् (अवत्तम्) इत्यादौ इत्वात्परत्वात् "अच उपसर्गात्त" इत्येतद्भवति। अन्यदपीह घुङ्कार्यं ददातिवज्ज्ञेयम् । श्यतिप्रभृतयोऽनुदात्ताः परस्मैभाषाः ॥ ४० ॥

अथ हलन्तानात्मनेपदिनः सेटः परामृशति ।

जनी प्रादुर्भावे । इतः प्रभृति वाश्यन्ता उदात्ता अनुदात्तेतः । प्रादुर्भाव उत्पत्तिरभिव्यञ्जनायां । अत्रायमकर्मकः । यदा त्वन्तर्भावितण्यर्थ उत्पादनायामभिव्यञ्जनायां वा वर्तते तदासकर्मकः । दृश्यते 'दाशतये अग्ना ह्यग्नेरजनिष्ट गर्भम्' । तथा "अचः कर्तृयकि" इत्यत्रभाष्यमपि 'जायते स्वयमेव' इति । अत्र ह्यन्तर्भावितण्यर्थत्वेन कर्मस्थभावकत्वात् कर्मकर्तृत्वम् । तथा ऽनुपूर्वोऽयं यदाऽऽत्मजन्मपूर्वके प्रापणे वर्तते तदापि सकर्मकः 'असौ कुमारस्तमजोऽनुजात' इति । जननेन तं प्राप्त इत्यर्थः । शृङ्गाच्छरो जायते "ज्ञाजनोर्जा" इति जादेश इत्संज्ञकशकारादौ प्रत्यये । "जनिकर्तुः प्रकृतिः" इति जायमानस्य कारणं शृङ्गम् अपादानम् । (जज्ञे, जज्ञाते, जज्ञिषे, जज्ञिवहे) "गमहन" इत्युपधालोपः । तस्य स्थानिवत्त्वाद् द्विर्वचनम् । "स्तोश्चुः" इति श्चुत्वम् । (जनिता । जनिष्यते । जायतां, जानस्व, जायै । अजायत । जायेत । जनिषीष्ट,) लिङौ । (अजनि, अजनिष्ट, अजनिषातां) "दीपजन" इति कर्तरि तशब्दे च्लेर्वा चिण् । "जनिवध्योश्च" इति वृद्धिनिषेधः । अन्तर्भावितण्यर्थादस्मात् कर्मकर्तरि कर्मवद्भावाद् नित्यश्चिण् (अजनि स्वयमेव) इति । (जिजनिषते) "जनसनखनां सञ्झलोः" इत्यात्वं सन इटि झलादित्वाभावान्न भवति । झलादिश्च सन् सनोतेरेव सम्भवतीति तदर्थमेव सन्ग्रहणम् । (जाजायते, जञ्जन्यते,) "ये विभाषा" इति जनादीनां वा यकारादौ ङ्कित्यात्वम् । (जञ्जनीति । जञ्जन्ति । जनयति,) । "बुधयुधनशजन" इति कर्त्रभिप्रायेऽपि क्रियाफले परस्मपदम् । "जनिजॄष्" इति मित्त्वाद्ध्रस्वत्वम् । ण्यन्तात्कर्मणि "चिण्णमुलोर्दीर्घोऽन्यतरस्याम्" इति वा ह्रस्वत्वे (अजनि अजानि) इति । (जन्यो घटः, जन्यं घटेन,) "तकिशसिचतियतिजनीनाम्" इति यत् । स च "भव्यगेय" इत्यादिना कर्तृभावयोः । "ये विभाषा" इति नात्वमकित्वात् । (जनः,) पचाद्यच् । घञ्यपि "जनिवध्योश्च" इतिवृद्धिनिषेधात् (जनः,) । जनानां समूहो (जनता) । "ग्रामजनबन्धुसहायेभ्यस्तल्" इति तल् । जनस्य जल्पो (जन्यः) । "मतजनहलात् करणजल्पकर्षेषु" इति जल्पे यत्प्रत्ययः । जनेषु साधुः जनंजनं प्रति वा (प्रतिजनं,) सप्तम्यर्थे वीप्सायां वा ऽव्ययीभावः । (प्रातिजनीनः) "प्रतिजनादिभ्यः खञ्" इति "तत्र साधुः" इति विषये खञ्। विश्वजनाय हितं (विश्वजनीनम्) । "आत्मन्विश्वजन" इति खः । (पञ्चजनीनम्) । [पञ्चजनादुपसङ्ख्यानम्] इति खः । (सार्वजनिकः, सर्वजनीनः,) "सर्वजनाट्ठञ्" इति ठञ्खौ, त्रय एते कर्मधारयादेवेष्यन्ते । षष्ठीतत्पुरुषे बहुव्रीहौ च "तस्मै हितम्" इति छो भवति, (विश्वजनीयः, पञ्चजनीयः, सर्वजनीयः) इति । महाजनाय हितं (माहाजनिकम् ,) [महाजनाचिव्यं ठञ्वक्तव्यः] इति ठञ् । अयं तत्पुरुषादेवेष्यते । बहुव्रीहौ तु छो भवति (महाजनीयः) इति । पञ्चजनेषु भवं (पाञ्चजन्यम्) "बहिर्देवपञ्चजनेभ्यश्च" इति ञ्यः । (प्रावृषिजः) । "सप्तम्यां जनेर्डः" इति

डः । "प्रावृट्छरत्कालदिवां जे" इति सप्तम्या अलुक् । एवं (शरदिजः) इत्यादि । (वर्षेजः, वर्षजः । क्षरेजः, क्षरजः । शरेजः, शरजः । वरेजः वरजः) । "विभाषा वर्षक्षरशरवरात्" इति जे परे सप्तम्या वा ऽलुक् । बुद्धेर्जातो (बुद्धिजः) । "पञ्चम्यामजातौ" इति डः । (अनुजः, प्रजा) । "उपसर्गे च संज्ञायाम्" इति डः । (अप्रजाः, दुष्प्रजाः, सुप्रजाः) । "नित्यमसिच्प्रजामेधयोः" इति नञ्दुस्सुभ्यः परस्य प्रजाशब्दस्यासिच् प्रत्ययो बहुव्रीहौ । स्त्रियमनुजातः (स्त्र्यनुजः) "अनौ कर्मणि" इति डः । आत्मनो जननेनाप्रजां स्त्रियामवरत्वेन प्राप्त इत्यर्थः । अपरे त्वनुना रुधिराक्षिप्यते, तदपेक्षं स्त्रियाः कर्मत्वमिति स्त्रियमनुरुध्य जात इत्यर्थं इति विवृण्वते । न जायत इति (अजः) । द्विर्जायतइति (द्विजः,) । द्वितीयजननम् उपनयनम् । (ब्राह्मजो) धर्मः । (क्षत्रियजं) युद्धम् । (अभिजाः) केशाः । "अन्येष्वपि दृश्यते" इति डः । (बीजम्,) पूर्ववत् डः । बीजाकरोति बीजेन सह कषतीत्यर्थः । बीजशब्दो बीजावापसहिते विलेखने वर्तत इति हरदत्तः । *कृञो द्वितीयतृतीयशम्बबीजात्कृषौ* इति कृञो योगे कृषावभिधेयायां द्वितीयादिभ्यो डाच् । "ऊर्यादिच्विडाचश्च" इति निपातो "गतिश्च" इत्यव्ययत्वं पूर्वप्रयोगश्च । बीजादिति निर्देशात् दीर्घो बत्वं चोपसर्गस्य । (प्रजनिष्णुः) "अलंकृञ्" इत्यादिना इष्णुच् । (अनुजातो) माणवको माणविकाम्, (अनुजाता) माणविका माणवकेन । "गत्यर्थाकर्मक" इति कर्तृकर्मणोः क्तः । (जनिः) "भाषायां धाञ्" इत्यादिना किकिनोरन्यतरः । लिड्वद्भावाद् द्वित्वं च । (जनुः) "जनेरुसिः" इत्युसिप्रत्ययः । (पुंसानुजः । जनुषान्धः) [पुंजानुजो जनुषान्ध उपसङ्ख्यानम्] इति तृतीयाया अलुक् । "तृतीया" इति योगविभागात्समासः । पुंसा जन्मना च हेतुना ऽनुजो ऽन्धश्चेत्यर्थः । (जन्म) । मनिन् । (जन्मी) व्रीह्यादित्वादिनिः । (जन्तुः) "कमिमनि" इत्यादिना तुप्रत्ययः । (जानुः) । "दृसनि" इत्यादिना ञुण् । अनुबन्धद्वयसामर्थ्यात् "जनिवध्योश्च" इति वृद्धिनिषेधो बाध्यते । प्रगता जानुः (प्रज्ञुः) । सङ्गता जानुः (संज्ञुः) । "प्रसंभ्यां जानुनोर्ज्ञुः" इति ज्ञुः समासान्तो बहुव्रीहौ । (ऊर्ध्वज्ञुः, ऊर्ध्वजानुः) । "ऊर्ध्वाद्विभाषा" इति ज्ञुविकल्पः । (उपजानुः) । समीपे ऽव्ययीभावः । तत्र भवम् (औपजानुकम्) । "उपजानूपकर्णोपनीवेष्ठक्" इति ठक् । "इसुसुक्तान्तात्कः" इति कादेशः । (जाया) । "जनेर्यक्" इति यक् । "ये विभाषा" इत्यस्य व्यवस्थितविभाषात्वाद् नित्यमात्वम् । (युवजानिः) । "जायाया निङ्" इति बहुव्रीहौ निङादेशोऽन्त्यस्य समासान्तः । "लोपो व्योर्वलि" इति यलोपः । (जनिः) । "जनिघसिभ्यामिण्" इतीण् । कृदिकारत्वान् ङीषि (जनी) । तां वहन्तीति (जन्या,) जामातुर्वयस्याः, "संज्ञायां जन्या" इति द्वितीयान्तात् जनीशब्दाद् वहतीत्यर्थे यत्प्रत्ययः संज्ञायाम् ॥ ४१ ॥

दीपी दीप्तौ । (दीप्यते । दिदीपे, दीपिता । दीपिष्यते । दीप्यताम् । अदीप्यत । दीप्येत, दीपिषीष्ट) लिङौ । (अदीपि अदीपिष्ट) । "दीपजन" इति ते कर्तरि चिण्विकल्पः । (दिदीपिषते । देदीप्यते । देदीप्ति । दीपयति । अदीदिपत् अदिदीपत्) । "भ्राजभास" इत्यादिना णौ चङि ह्रस्वविकल्पः । (दीपः) । इगुपधलक्षणः कः । (दीपिता) । "सूददीपदीक्षश्च" इति अनुदात्तेल्लक्षणे युच्प्रत्यये प्रतिषिद्धे, ताच्छीलिकस्तृन् । (दीप्रः) । "नमिकम्पि" इत्यादिना रः । (दीप्तिः) । "क्तिन्नाबादिभ्यः" इति क्तिन् । "तितुत्र" इतीण्निषेधः । (दीप्तः, दीप्तवान्) । ईदित्वादनिट्त्वम् ॥ ४२ ॥

पूरी आप्यायने ॥ (पूर्यते) इत्यादि दीपिवत् । (अपूपुरत्) । "णौ चङि" इति नित्यं ह्रस्वः । (पूरः,) इगुपधलक्षणः कः । (ऊर्ध्वपूरं) पूर्यते । "ऊर्ध्वे शुषिपूरोः" इति कर्तृवाचिन्यूर्ध्वे(१) उपपदे णमुल् । कषादित्वाद्यथाविध्यनुप्रयोगः । ऊर्ध्वंस्सन् पूर्यते इत्यर्थः । (पूर्णः,

(१) शब्दे इत्यधिकं पुस्तकान्तरे ।

पूर्णवान्, पूर्तिः) । आबादित्वात् क्तिन् । (पूर्णिः) इत्यौणादिकः । पूर्णिमिमीतइति (पूर्णिमा) । मूलविभुजादित्वात् कः । (चर्मपूरं) स्तृणोति, (उदरपूरं) भुङ्क्ते । "चर्मोदरयोः पूरः" इत्यनयोः कर्मणोरुपपदयोः णमुलप्रत्ययः । पूरयतेर्धातुसम्बन्धे विधानाद् धात्वन्तरस्य अनुप्रयोगः । (गोष्पदपुरं) वृष्टो देवः, (गोष्पदप्रं वा) । "वर्षमाणऊलोपश्चास्यान्यतरस्याम्" इति कर्मण्युपपदे वर्षस्य इयत्तायां गम्यमानायां पूरयतेर्णमुल् ऊकारलोपश्चास्य विकल्पेन । (पूर्णः) । "वा दान्तशान्तपूर्ण" इति क्ते णिलुगिडभावौ पक्षे निपात्येते । अन्यदा "निष्ठायां सेटि" इति णिलोपे (पूरितः) । पूरयतीति (पूरणः) । बाहुलकात्कर्तरि ल्युट् । (पूरुः) बहुलवचनादुरप्रत्ययः ॥४३॥

तूरी गतित्वरणहिंसनयोः ॥ (तूर्यते । तुतूरे । तूरिता । तूरिष्यते । तूर्यताम् । अतूर्यत । तूर्येत, तूरिषीष्ट । अतूरिष्ट । तुतूरिषते । तोतूर्यते । तोतूर्ति । तूरयति । अतूतुरत् । तूर्णः । तूर्णवान् । तूर्तिः । तूर्णिः) । औणादिकः । (तूर्यम्,) ण्यत् ॥ ४४ ॥

धूरी गुरी हिंसागत्योः ॥ ४५-४६ ॥

घूरी जूरी हिंसावयोहान्योः ॥ ४७-४८ ॥

शूरी हिंसास्तम्भनयोः ॥ ४९ ॥

चूरी दाहे ॥ (धूर्यते । दुधूरे) । (गूर्यते । जुगूरे) । (घूर्यते । जुघूरे) । (जूर्यते । जुजूरे) । (शूर्यते । शुशूरे) । (चूर्यते । चुचूरे) । गूरी उद्यमे इत्याकुस्मीयः । गुरी इति लघूपधस्तुदादौ । जन्यादय ईदित्त्वान्निष्ठायामनिटः ॥ ५० ॥

तप ऐश्वर्ये वा ॥ अयं धातुरैश्वर्ये वा तङ्श्यनौ उत्पादयतीत्यर्थः । अन्यदा न्याय्यविकरणः परस्मैपदी च, (तपति) इति । केचिदिह वाग्रहणं वक्ष्यमाणस्य वृतु वरण इत्यस्य आद्यांशमिच्छन्ति 'वावृतु वरणे' इति । तथा च भट्टिः । 'ततो वावृत्यमाना सा रामशालां न्यविक्षत' इति । 'तपिं तिपिम्' इत्यनिट्कारिकान्यासे तु 'तप सन्तापे, तप ऐश्वर्ये वा' इत्येवं पठतोऽस्यापि वा शब्दः तप्यतेश्शेषोऽभिमतः । (तप्यते । तेपे, तेपिषे,) इत्यादि, क्रादिनियमादिट् । (तप्ता । तप्स्यते । तप्यताम् । अतप्यत । तप्सीष्ट) लिङौ । (अतप्त । अतप्सातां,) "झलो झलि" इति सिज्लोपः । (तितप्सते । तातप्यते । तातप्ति । तापयति । अतीतपत् । तप्त्वा, तप्तः । तपनः) । युच् । नन्द्यादिर्वा । केचिदाद्यन्तव्यत्यासेन पतेति पठन्ति, तथा च स्वामी । 'पतेति द्रमिडा' इति । निरुक्तेऽपि 'इरज्यति पत्यते क्षयति राजतीति चत्वार ऐश्वर्यकर्माण' इति । तथा पारक्षुद्रेऽपि । 'द्युतद्यामा नियुतःपत्यमानः' । अस्माकं तु उभयमपि प्रमाणमाचार्येणोभयथा शिष्याणां प्रतिपादनात् । तपतीति शपि गतं सन्तापे ॥ ५१ ॥

वृतु वरणे ॥ (वृत्यते । ववृते । वर्तिता । वर्तिष्यते । वृत्यताम् । अवृत्यत । वृत्येत, वर्तिषीष्ट) लिङौ । (अवर्तिष्ट, अवर्तिषाताम् । विवर्तिषते । वरीवृत्यते । वर्वृतीति) इत्यादि । (वर्तयति । अवीवृतत्, अववर्तत्) "उरत्" इति पक्षे ऋकारः । (वृत्त्वा, वर्तित्वा) "उदितो वा" इतीड्विकल्पः । (वृत्तः) "यस्य विभाषा" इतीट्प्रतिषेधः । (वृत्यम्) "ऋदुपधात्" इति क्यप् । "अलंकृञ्" इतीष्णुचि वृधुना साहचर्याद् वर्तमानार्थस्य भौवादिकस्य ग्रहः ॥ ५२ ॥

क्लिश उपतापे ॥ क्लिश्यते । चिक्लिशे । क्लेशिता । क्लेशिष्यते । क्लिश्यताम् । अक्लिश्यत । क्लिश्येत, क्लेशिषीष्ट) लिङौ । (अक्लिष्ट । चिक्लिशिषते, चिक्लेशिषते) । "रलो व्युपधात्" इति कित्त्वविकल्पः । (चेक्लिश्यते । चेक्लेष्टि । क्लेशयति । अचिक्लिशत् । क्लिष्ट्वा, क्लिशित्वा, क्लिष्टः, क्लिशितः,) "क्लिशः क्त्वानिष्ठयोः" इतीड्विकल्पः । "रलो व्युपधात्" इति सेटः क्त्वः कित्त्वविकल्पो न भवति, "मृडमृद" इति नित्यंकित्त्वविधानात् । क्लिशू विबाधने इति क्र्यादौ ॥ ५३ ॥

काशृ दीप्तौ ॥ (काश्यते । चकाशे । काश्यताम् । अकाश्यत । काश्येत) इत्यादि । शेषं भौवादिकवत् ॥ ९४ ॥

वाशृ शब्दे ॥ (वाश्यते । ववाशे । वाशिता । वाशिष्यते । वाश्यताम् । अवाश्यत । वाश्येत, वाशिषीष्ट । अवाशिष्ट । विवाशिषते । वावश्यते । वावाष्टि । वाशयति । अववाशत् । ऋदित्वाण्णौ चङि ह्रस्वाभावः । (वाश्रः) पुरुषः । "स्फायितञ्चि" इत्यादिना रक् । (वाशिरा) । "मन्दिवाशि" इत्यादिना किरच्(१) । जन्यादय उदात्ता अनुदात्तेतः । तपिरकोऽनिट्, 'तपिं तिपिम्' इत्यनिट्कारिकापाठात् ॥ ९५ ॥

स्वरितेतौ सेटावाह ॥

मृष तितिक्षायाम् । तितिक्षा क्षमा । (मृष्यते । ममृषे, ममृषिषे । मर्षिता । मर्षिष्यते। मृष्यताम् । अमृष्यत । मृष्येत । मर्षिषीष्ट । अमर्षिष्ट । अमर्षिष्यत । मृष्यति । ममर्ष । मर्षिता। मर्षिष्यति । मृष्यतु । अमृष्यत् । मृष्येत्, मृष्यात् । अमर्षत् । अमर्षिष्यत् । परिमृष्यति) "परेर्मृषः" इति क्रियाफलस्य कर्तृगामित्वेऽपि परस्मैपदम् । (मिमर्षिषते, मिमर्षिषति । मरीमृषीति । मर्मृषीति, मर्मर्ष्टि, मरिमर्ष्टि, मरीमर्ष्टि । मर्षयति । अममर्षत् । अमीमृषत्,) "उऋद्वा" । (मर्षितः, मर्षितवान् ,) "मृषस्तितिक्षायाम्" इति सेटो निष्ठाया अकित्त्वम् । तितिक्षाया अन्यत्र (अपमृषितं) वाक्यमाह, अविस्पष्टमित्यर्थः । (दुर्मर्षणः) । "भाषायां शासियुधि" इत्यादिना युच् खलोऽपवादः । अयमाधृषीयोऽपि ॥९६॥

ईशुचिर् पूतीभावे ॥ (शुच्यते । शुशुचे । शोचिता । शोचिष्यते । शुच्यताम् । अशुच्यत । शुच्येत, शोचिषीष्ट,) लिङौ । (अशोचिष्ट । शुच्यति) इत्यादि पूर्ववत् । इरित्त्वाल्लुङ्यङ्विकल्पात् (अशुचत् । अशोचीत्) इति । (शुशुचिषते, शुशोचिषते । शुशुचिषति, शुशोचिषति । शोशुच्यते । शोशोक्ति । शोचयति । अशूशुचत् । शुचित्वा) । "रलो व्युपधात्" इति क्त्वासनोः कित्त्वविकल्पः । (शुक्तम्) । ईदित्त्वा(२)दनिट्त्वम् । रसान्तरं गतमित्यर्थः । (शुक्तिः) । "तितुत्र" इतीण्णिषेधः । (शुक्तिका) । संज्ञायां कन् । उदात्तौ स्वरितेतौ । शोके शोचतीति शपि गतम् ॥ ९७ ॥

अथानिटस्स्वरितेत आह ॥

णह बन्धने ॥ (प्रणह्यते) । "उपसर्गात्" इत्यादिना णत्वम् । (पिनह्यते, अपिनह्यते)। 'वष्टि भागुरिः' इत्यल्लोपः । (नेहे । नद्धा) । "नहो धः" इति झलि पदान्ते च हकारस्य धत्वम् । "झषस्तथोर्धोऽधः" इति धत्वे जश्त्वम् । (नत्स्यते) । धत्वे तस्य "खरि च" इति चर्त्वम् । (नह्यताम् । अनह्यत । नह्येत, नत्सीष्ट) लिङौ । (अनद्ध) । "झलो झलि" इति सिज्लोपः । (अनत्साताम्) इत्यादि । (नह्यति । ननाह, नेहतुः ननद्ध, नेहिथ) । थलि भारद्वाजनियमादिड्विकल्पः । "थलि च सेटि" इत्येत्वाभ्यासलोपौ । (नेहिथ) क्रादिनियमादिट् । (नद्धा । नत्स्यति । नह्यतु । (अनह्यत् । नह्येत । अनात्सीत्) "वदव्रज" इति नित्यवृद्धिः । (निनत्सते । निनत्सति । नानह्यते । नानद्धि । नाहयति । अनीनहत्) । नध्री) "दाम्नी" इत्यादिना करणे ष्ट्रन् । षित्वान् ङीष् । (उपानत्) पादुकाशिक्यविशेषश्च । क्विपि धत्वे "झलां जशोऽन्ते" इति जश्त्वे "वावसाने" इति चर्त्वविकल्पः । "नहिवृति" इत्यादिना क्विबन्ते नह्यतौ पूर्वपदस्य दीर्घः, (प्राणत्) । पूर्ववत् क्वौ दीर्घः । (औपानह्यः) मुञ्जः । "ऋषभोपानहोर्ञ्यः" इति विकृतिवाचिनस्तदर्थायां प्रकृतौ विवक्षितायां ञ्यप्रत्ययः । चर्मण्यपि प्रकृतित्वेन विवक्षिते "चर्मणोऽञ्" इत्यञं बाधित्वा पूर्ववि-

---

(१) उणादौ तु 'मान्दिवाशि' इत्यादि सूत्रे उरजेव पठ्यते । वृत्त्यादावपि मन्दुरा वशुरा इत्याद्येवोदाह्रियते ।

(२) निष्ठायामित्यधिकं पुस्तकान्तरे।

प्रतिषेधेन ञ्य एव भवति (औपानह्यं) चर्म इति । (नाभिः) । "नद्देर्भ च" इतीञ्प्रत्ययः, ह्रस्व च भः। नाभये हितं (नाभ्यं) तैलम् । "शरीरावयवाद्यत्" इति यत्। एवं नाभौ भवमपि। यत्तु रथावयववाची नाभिशब्दस्तस्य "उगवादिभ्यः" इत्यत्र "नाभि नभं च" इति पाठाद्यति नभभावे (नभ्यो अक्षः, नभ्यमञ्जनम्) इति भवति । (पद्मनाभः)। "अच्" इति योगविभागात्समासान्तोऽच् ॥ ५८ ॥

रञ्ज रागे ॥ (रज्यते, रज्यति) इत्यादि । "अनिदिताम्" इति नलोपः। (ररञ्ज, रङ्क्ता) इत्यादि सर्वं भौवादिकवत्। श्यनेको विशेषः ॥ ५९ ॥

शप आक्रोशे ॥ अयमपि भौवादिकवत्। श्यस्तङौ विशेषौ । (शप्यते, शप्यति) इत्यादि । नहादयस्त्रयोऽनुदात्ताः स्वरितेतः ॥ ६० ॥

अथात्मनेपदिनोऽनिटः परामृशति ॥

पद गतौ ॥ लिश्यन्ता अनुदात्ता अनुदात्तेतः । (पद्यते । पेदे, पेदिषे, पत्ता । पत्स्यते । पद्यताम् । अपद्यत । पद्येत, पत्सीष्ट) लिङौ। (अपादि, अपत्साताम्) । "चिण् ते पदः" इति कर्तरि ते चिण् । (पित्सते,) "सनिमीमा" इत्यादिना अच इसि "स्कोः" इति सलोपे दकारस्य चर्त्वम् । "अत्र लोपोऽभ्यासस्य" । (पनीपद्यते । पनीपत्ति) । "नीग्वञ्चु" इत्यादिना नीक् । (पादयति । अपीपदत् । उत्पदिष्णुः,) "अलं कृञ्" इत्यादिना उत्पूर्वादिष्णुच् । केचित्तु "उत्पत" इति पतति पठन्ति । (पदनः,) "जुचङ्क्रम्य" इत्यादिना युच् । (पादुकः) "लषपत" इत्यादिना उकञ् । पद्यत इति (पादः)। "पदरुज" इति कर्तरि घञ् । पादाभ्यां चरति (पदिकः) । "पर्पादिभ्यष्ठन्" इत्यत्र "पादः पच्च" इति पाठात् ष्ठनि पद्भावः । (पदिकी) । षित्त्वात्स्त्रियां ङीष् । पादार्थमुदकं (पाद्यम्) "पादार्घाभ्यां च" इति यत् । पादाय हितम्, तत्र भवं वा (पद्यम्) । "शरीरावयवाद्यत्" "शरीरावयवाच्च" इति योगाभ्यां यत् । "पद्यत्यतदर्थे" इति पादस्य पद्भावः । द्वाभ्यां पादाभ्यां क्रीतं (द्विपाद्यम्) "पणपादमाषशताद्यत्" इति पणाद्यन्ताद् द्विगोः प्राग्वतीयेष्वर्थेषु यत् । "पद्यत्यतदर्थे" इत्यत्र शरीरावयववाचिनो ग्रहणान्नेह पद्भावः । (पच्छः) । "संख्यैकवचनात्" इतिवीप्सायां शस् । "ऋचश्शे" इति ऋक्सम्बन्धिनः पादशब्दस्य पद्भावः । द्वौ द्वौ पादौ लभते द्विपदिकां लभते, "पादशतस्य सङ्ख्यादेर्वीप्सायां वुन् लोपश्च" इति पादशतयोरन्यतरस्यां सङ्ख्यादेस्समासाद् वीप्सायां वुन्, अन्तस्य च लोपः । "यस्य" इति लोपेनैव सिद्धेऽन्तलोपवचनमनैमित्तिकत्वार्थम् । तेनाल्लोपस्य स्थानिवत्त्वाभावात् "पादः पत्" इति भसंज्ञानिमित्तः पद्भावस्सिद्ध्यति । "यस्य" इति लोपे हि तस्य पूर्वविधौ स्थानिवत्त्वात् पाच्छब्दान्तमङ्गं भसंज्ञं न स्यात् । प्रकृत्युपाधिरपि वीप्सा तद्धितेन द्योत्यत इति "तद्धितार्थ" इति समासः । अत एव "नित्यवीप्सयोः" इति द्विर्वचनं न भवति । द्वौ पादौ दण्डयति ददाति वा (द्विपदिकां) दण्डयति ददाति । "दण्डव्यवसर्गयोश्च" इति वुन् । व्यवसर्गो दानम् । अवीप्सार्थोऽयमारम्भः । व्याघ्रस्येव पादावस्य (व्याघ्रपात्, श्येनपात्,) "पादस्य लोपो हस्त्यादिभ्यः" इति हस्त्यादिव्यतिरिक्तोपमानपूर्वपदस्य पादान्तस्यान्तस्य लोपः समासान्तः । व्याघ्रपदोऽपत्यं (वैयाघ्रपद्यः,) गर्गादित्वाद्यञ् पूर्ववत्पद्भाव' स च 'निर्दिश्यमानस्यादेशा भवन्ति' इति पाच्छब्दस्यैव भवति, न तु तदन्तस्य । "न य्वाभ्याम्" इत्यैजागमो वृद्धिनिषेधश्च । (कुम्भपदी, घृतपदी) । "कुम्भपदीषु च" इति पादान्त्यलोपस्समासान्तः । कुम्भपद्यादिषु साध्येषु पादान्त्यलोप इत्यक्षरार्थः । अत्र बहुवचननिर्देश आद्यर्थावगतये । आद्यर्थसङ्ग्रहीताश्च गणपाठ एव द्रष्टव्याः । कुम्भादिभ्यः पादस्य लोप इति वक्तव्ये समुदायपाठो विषयनियमार्थः । तत्र ये उपमानपूर्वाः कुम्भपद्यादयो, ये च शतपद्यादयः सङ्ख्यापूर्वास्तेषां यथाक्रमं "पादस्य लोपः" "सङ्ख्यासुपूर्वस्य" इति सिद्धे लोपे पुनः पाठात् स्त्रियां नित्यं ङीबेव भवति, न तु (व्याघ्रपात्, व्याघ्रपदी द्विपात्, द्विपदी) इत्या-

दिवत् "पादोऽन्यतरस्याम्" इति पाच्छब्दान्तस्य विधीयमानो ङीब्विकल्पः । ये त्वनुपसानसङ्ख्यापूर्वाः घृतपद्यादयस्तेषामपि स्त्रीत्वविशिष्टानां पाठाद् स्त्रियामेव पद्भावो नित्यश्च ङीप्। अष्टापदीशब्दस्यात्र पाठात् "अष्टनस्संज्ञायाम्" इति वा पूर्वपदस्य दीर्घः । अत्र सुधाकरः । "सङ्ख्यासुपूर्वस्य" इति पाद(१)स्यान्त्यलोपे "पादोऽन्यतरस्याम्" इति ङीपि सुपदीशब्दे सिद्धे कुम्भपदीषु पाठः स्त्रियां सङ्ख्योपमानपूर्वपदस्य नित्यं ङीबर्थः । तेन 'सुपाद् द्विरदनासोरुः' इति भट्टिप्रयोगश्चिन्त्य इत्याह । (द्विपात्, द्विपदी । सुपात्,) "सङ्ख्यासुपूर्वस्य" इति पादान्त्यलोपस्समासान्तः । "पादोऽन्यतरस्याम्" इति वा ङीपि भत्वे पद्भावः । स्त्रियां ङीवेव सुपाच्छब्दस्येतीदानीमेवोक्तम् । (द्विपदा) ऋक्, "टाबृचि" पादान्तस्य ऋच्यभिधेयायां टापि पद्भावः पूर्ववत् । (पदाजिः, पदातिः, पदगः, पदोपहतः,) "पादस्य पदाज्यातिगोपहतेषु" इति पादशब्दाद् आज्यादिषूत्तरपदेषु पदादेशः । (पद्धिमम् , पत्काषी, पद्धतिः) "हिमकाषिहतिषु च" इति हिमादिषूत्तरपदेषु पद्भावः । चकारान्निष्के च, (पन्निष्कः । पादघोषः, पद्घोषः । पादमिश्रः, पन्मिश्रः । पादशब्दः, पच्छब्दः,) "वा घोषमिश्रशब्देषु" इति वा पद्भावः (सम्पत्) सम्पदादित्वात्क्विप् । क्तिन्नपीष्यते, (सम्पत्तिः) इति । (पदम् , "खनो घ च" इति चकारात्करणादौ घः । पदान्यधीते वेद वा (पदकः,) "क्रमादिभ्यो वुन्" इति वुन् । (पद्याः) पांसवः, "पदमस्मिन्दृश्यम्" इति प्रथमान्ताद् दृश्यत्वोपाधिकादस्मिन्निति सप्तम्यर्थे यत् । "पद्यत्यतदर्थे" इति पद्भावः । (पूर्वपदिकः) "इकन् बहुलं पदोत्तरपदात्" इत्यध्येतृवेदित्रोरिकन् । अनुपदं धावति (आनुपदिकः,) "माथोत्तरपदपदव्यनुपदं धावति" इति द्वितीयासमर्थाट्ठक् । पूर्वपदं गृह्णातीति पौर्वपदिकः) "पूर्वपदं गृह्णाति" इति पदोत्तरपदाट्ठक् । आप्रपदं प्राप्नोतीति (आप्रपदीनः) पटः, "आप्रपदं प्राप्नोति" इति द्वितीयान्तात्खः। शरीरेणासम्बद्धस्यापि पटादेः प्रमाणमाख्यायते पादस्याग्रं (प्रपदम्) । अत एव निर्देशात्समासः, पूर्वनिपातश्च । (आप्रपदात्) "आङ्मर्यादाभिविध्योः" इत्यव्ययीभावः । (अनुपदीना) उपानत्, "अनुपदसर्वान्न" इति बद्धेत्यर्थे खः । *यस्य चायामः* इत्यव्ययीभावसमासः । अनुर्यस्यायामवाची तेन लक्षणभूतेनानुस्समस्यते इति सूत्रार्थः । इति च पदायाम उपानदायामस्य लक्षणम् । सप्तभिः पदैरवाप्यते (साप्तपदीनं) सख्यम्, "साप्तपदीनं सख्यम्" इति निपात्यते । (अनुपदम्) अन्वेष्टा (अनुपदी) गवाम्, "अनुपद्यन्वेष्टा" इतीन्नन्तो निपात्यते । अनोः पश्चादर्थेऽव्ययीभावः। गवामिति पदापेक्षया षष्ठी। नित्यसापेक्षत्वात्समासः । एण्या इव पादावस्य, अजस्येव पादावस्य, प्रोष्ठो गौः, तस्येव पादावस्य (एणीपदः, अजपदः, प्रोष्ठपदः,) "सुबात" इत्यादिनाच्प्रत्ययः पद्भावश्च निपात्यते । एणीपदाजपदयोः पद्भाव इति निपातनफलं वदतो हरदत्तस्य प्रोष्ठपदेति पाठो नाभिमतः प्रतीयते । (पूर्वे प्रोष्ठपदे, पूर्वाः प्रोष्ठपदाः,) "फल्गुनीप्रोष्ठपदानां च नक्षत्रे" इति नक्षत्रे वर्तमानयोर्द्वित्वे वा बहुवचनम् । प्रोष्ठपदाभियुक्तः कालः, (प्रोष्ठपदः,) प्रोष्ठपदाशब्दस्तत्सहचरिते चन्द्रमसि वर्तते । तत्र "नक्षत्रेण युक्तः कालः" इत्यणि तस्य "लुबविशेषे" इति लुप् । "लुपि युक्तवद्व्यक्तिवचने" इति कालस्य स्त्रीत्वबहुत्वे, तासु जातः (प्रोष्ठपादः) । "सन्धिवेला" इत्यादिनाऽण् । "जे प्रोष्ठपदानाम्" इति जातार्थे वृद्धिनिमित्ते तद्धिते परत उत्तरपदस्य वृद्धिः । गेहानुप्रपादमास्ते गेहंगेहमनुप्रपादमास्ते, गेहमनुप्रपादमनुप्रपादमास्ते । "विशिपतिपदि" इत्यादिना णमुल् । "तृतीयाप्रभृतीनि" इति समासविकल्पः । समासे "नित्यवीप्सयोः" इति द्विर्वचनं न भवति; तयोस्तेनैवोक्तत्वात् । आभीक्ष्ण्ये क्त्वापीष्यते, गेहमनुप्रपद्यास्त इति । सूत्रार्थौ भूवादावुपपादितः (सम्पादी) । णिनिः । (साम्पाद्यम्) । ब्राह्मणादित्वाद्भावकर्मणोः ष्यञ् । जीविकामापन्नः (जीविकापन्नः,) आपन्नो जीविकाम् (आप-

(१) पादान्तस्य लोप इति [illegible], पादोऽन्त्यलोप इत्यपि कुत्रचित् दृश्यते ।

जीविकः,) "द्वितीयाश्रित" इति "प्राप्तापन्ने च द्वितीयया" इति च तत्पुरुषः । "प्राप्तापन्ने च" इत्यत्र लिङ्गविशिष्टपरिभाषया ऽऽपन्नाशब्दस्य समासोऽपि (आपन्नजीविकः) इत्येव । तत्र हि प्राप्तापन्ने अ च इत्यकारः प्रश्लिष्यते, स चान्त्यादेशः । सौत्रत्वाच्च न प्रकृतिभावः । सम्पद्यत इति (सम्पद्यः,) "अभूततद्भावे" इति सूत्रे निपातनात् शः । ततश्श्यन् । (पादूः) । "णित्कसिपद्यतेः" इत्यूकारप्रत्यये णित्त्वाद्वृद्धिः । (पादुका)। संज्ञायां कनि "केऽणः" इति ह्रस्वः । (पद्मम्) । "अर्तिस्तु" इत्यादिना मन् । (पद्मिनी) । "पुष्करादिभ्यो देशे" इति मत्वर्थीय इनिः । (पद्मवती, पद्मा) । "अर्श आदिभ्योऽच्" इति मत्वर्थेऽच्, टाप् । अयं कथादावपि ॥ ६१ ॥

खिद् दैन्ये ॥ (खिद्यते । चिखिदे । खेत्ता । खेत्स्यते । खिद्यताम् । अखिद्यत । खिद्येत, खित्सीष्ट । अखित्त) । "लिङ्सिचौ" इति लिङ्सिचोः कित्त्वान्न गुणः । (चिखित्सते) । "हलन्ताच्च" इति सनः कित्त्वम् । (चेखिद्यते । खेदयति । अचीखिदत् । खित्त्वा । खिन्नः । खिदिरम् ,) "इषिमदि" इत्यादिना किरच्(१)। खिद्यते इति कर्मकर्तरीति वामन इति स्वामिसुधाकरौ । तस्यान्तर्भावितण्यर्थत्वेन रौधादिकस्य सकर्मकस्य खिन्दतीति परिघातार्थस्य स्वतः सकर्मकस्य वा कर्मकर्तरीदं रूपमित्यभिप्रायः । एवं वदतोऽस्य श्यनि पाठो नाभिमतः प्रतीयते । धातुपाठकोशेषु व्याख्यानेषु च अविगीतः पठ्यते । अयं रुधादावपि । परिघाते तुदादिः ॥ ६२ ॥

विद् सत्तायाम् ॥ (विद्यते) इत्यादि खिदिवत् ॥ वेत्तीति ज्ञाने गतम् ॥ ६३ ॥

बुध अवगमने ॥ (बुध्यते । बुबुधे । बोद्धा । भोत्स्यते । "एकाच" इति बशो भष् । (बुध्यताम् । अबुध्यत । बुध्येत, भुत्सीष्ट । अबोधि, अबुद्ध, अभुत्साताम्,) "दीपजन" इति कर्तरि तशब्दे वा चिण् । "लिङ्सिचौ" इति कित्त्वम् । (बुभुत्सते । बोबुध्यते । बोबोद्धि । बोधयति पद्मम्) "बुधयुध" इति क्रियाफलस्य कर्तृगामित्वेऽपि परस्मैपदम् । अत्र बुधादीनां चतुर्णाम् "अणावकर्मकात्" इत्येव सिद्धे, वचनमिदमचित्तवत्कर्तृकार्थमिति वृत्तौ । 'तत्त्वं बुध्यते' इति धर्मकीर्तिप्रयोगे सकर्मकत्वमन्तर्भावितण्यर्थत्वेन नेयम् । 'क्रमादमुं नारद इत्यबोधि सः' इति माघे सकर्मकत्वं वृत्तिकारादीनामनभिमतमेव । यद्वा ऽयमर्थभेदेन सकर्मकोऽकर्मकश्च । (बुद्ध्वा । बुद्धः । बुबुधानः,) "मुचिबुधिभ्यां सन्वच्च" इत्यानचि सन्वद्भावाद् द्वित्वम् । बोद्धुमिच्छुरित्यर्थः । सन्वद्भावाद् "हलन्ताच्च" इति कित्वादगुणत्वम् । (बुधानः) आचार्यादिः, "युजिबुधिदृशेः किच्च" इत्यानच् । बोधयतीति ज्वलादौ । बोधति बोधत इति हि भ्वादौ ॥ ६४ ॥

युध सम्प्रहारे ॥ (युध्यते) इत्यादि बुधिवत् । ते तु अयुद्ध इति सिजेव । (राजयुध्वा,) राजानं योधितवानित्यर्थः । "राजनि युधि कृञः" इति राजनि कर्मण्युपपदे भूते क्वनिप् । इहान्तर्भावितण्यर्थत्वेन सकर्मकत्वम् । (सहयुध्वा,) "सहे च" इति भूते क्वनिप् । (राजयुध्वा ब्राह्मणी, सहयुध्वा ब्राह्मणी) । [वनो न हश] इति ङीब्रेफयोर्निषेधः । (योधः, यौधः,) प्रज्ञादिपाठात्स्वार्थे वाण् । अत एव पचादिपुपलक्षणं कं बाधित्वाच् । आदाय युध्यतेऽनेनेति (आयुधम्,) [घञर्थे कविधानम्] इति कः । आयुधेन जीवति (आयुधीयः, आयुधिकः,) "आयुधाच्छ च" इति जीवतीत्यर्थे ठक्छौ । (युयुधानः,) बाहुलकादानचि द्वित्वम् । (युध्मः) आहवो योद्धा च, "इषियुधि" इत्यादिना मक् । (दुर्योधनः, सुयोधनः,) "भाषायां शासियुधि" इति खलर्थे युच् । युध्यतीति

(१) खिद्रम् , इषिमदीत्यादिना रक् इति पुस्तकान्तरे पाठ उपलभ्यते, स च वृत्त्यादिविरोधादुपेक्ष्यः । वृत्त्यादिषु च इषिरोऽग्निरित्यादिकमुदाह्रियते । खिद्रमित्यादिकन्तु 'स्फायितञ्चि' इत्यादिसूत्रेण रका सम्पादितम् ।

युद्धमिच्छतीति क्यचि ॥ ६५ ॥

अनो रुध कामे ॥ रुधेरनूपसृष्टस्य कामे वृत्तस्य दिवादित्वमात्मनेपदित्वं च । (अनुरुध्यत) इत्यादि पूर्ववत् । रुणद्धीत्यावरणे रुधादौ ॥ ६६ ॥

अण प्राणने ॥ (अण्यते । आणे । अणिता । अणिष्यते । अण्यताम् । आण्यत । अण्येत । अणिषीष्ट । आणिष्ट । अणिणिषते । आणयति । मा भवानणिणत्) ॥

यमिरूमन्तेष्वनिडेक इष्यते रमिश्च यश्च श्यनि पठ्यते मनिः ।
नमिश्चतुर्थो हनिरेव पञ्चमो गमिस्तु षष्ठः प्रतिषेधवाचिनाम् ॥

इति व्याघ्रभूतिवचनादयं सेट् । केचिदनिटां मध्ये पाठस्य प्रयोजनादर्शनाद् असुं धातुं नाधीयते । शाकटायनस्तु 'अन' इत्याह । एवं च तवर्गीयान्तं काण्डसप्यनुसृतं भवतीति । अणतीति शब्दे शपि । अनितीति प्राणने लुकि ॥ ६७ ॥

मन ज्ञाने ॥ न त्वां तृणाय मन्ये, न त्वां तृणं मन्ये, "मन्यकर्मण्यनादरे विभाषा प्राणिषु" इति कर्मणि वा चतुर्थी । इह चानुवाद्ये कर्मणि व्यवस्थितविभाषाविज्ञानात् चतुर्थी न भवति । अप्राणिष्वित्यपास्य [अनावादिषु]इति वार्तिकं पठितम् । तेन न त्वां नावं मन्ये यावत्तीर्णं न नाव्यम्, न त्वामन्नं मन्ये यावन्न भुक्तं श्राद्धम् । इत्यत्राप्राणित्वेऽपि द्वितीयैव भवति । तथा प्राणित्वेऽपि न त्वां श्वानं मन्ये, न त्वां शुने मन्ये इत्यत्र उभयं भवति । (मेने । मन्ता । मंस्यते । मन्यताम् । अमन्यत । मन्येत, मंसीष्ट । अमंस्त, अमंसाताम्) । एहि मन्ये ओदनं भोक्ष्यसे इति नहि(१) भोक्ष्यसे भुक्तस्सोऽतिथिभिः, अत्र "प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च" इति प्रहासे परिहासे गम्यमाने मन्योपपदे धातावुत्तमविषये मध्यमः, मन्यतेश्च मध्यमविषये उत्तमः । "एकवच्च" इति वचनात् द्विबह्वोरप्येकवचनमेव । दर्शनीयमानी भार्यायाः, "मन" इति कर्मण्युपपदे मन्यतेर्णिनिः । भार्याया इति कर्मणि षष्ठी । तत्सापेक्षस्यापि दर्शनीयशब्दस्य गमकत्वात्समासः । "*क्यङ्मानिनोश्च*" इति क्यङन्ते मानिनूशब्दे चोत्तरपदे पुंवद्भावः । पण्डितमात्मानं मन्यते देवदत्तः (पण्डितमानी, पण्डितम्मन्यः) "*आत्ममाने खश्च*" इति कर्मण्युपपदे आत्ममाने वर्तमानान्यतोर्णिनिः खश्च । आत्मनो मान आत्ममानः, कर्मणि षष्ठ्यास्समासः। आत्मा च स्वः, स च सन्निधानान्मन्तैव, तस्य चात्मस्वरूपेण कर्तृत्वम् । पण्डितत्वादिस्वरूपेण कर्मत्वमिति न विरोधः । खशश्शित्त्वात् श्यन्, खित्त्वान्मुम् । (मन्या,) पश्चाद्ग्रीवाशिरा "संज्ञायां समजनिषद" इत्यादिना क्यप् । अन्यत्र क्तिनि (मतिः,) "मन्त्रे वृष" इति क्तिनो वचनमुदात्तमात्रार्थं न तु भाषायां तन्निवृत्त्यर्थम् । (वैमत्यं, विमतिमा । साम्मत्यं, सम्मतिमा,) दृढादिषु "वेर्यातलाभमतिमनश्शारदानां समो मतिमनसोः"इति पाठात् ष्यञिमनिचौ । "इगन्ताच्च लघुपूर्वात्" इत्यणपि भवति, (वैमतं, साम्मतम्) इति । त्वतलौ तु सर्वत्रैवेष्येते इत्युदाहार्यौ । (राज्ञां मतः,) "मतिबुद्धि" इति वर्तमाने क्तः । "क्तस्य च वर्तमाने" इति कर्तरि षष्ठी । मतस्य करणं (मत्यम्,) तच्च भावः, साधनं वा । "मतजनहलात्" इति यत् । (मनः,) असुन् । मन एव (मानसम्,)'प्रज्ञादित्वात् स्वार्थेऽण् । असुमनास्सुमना भवति (सुमनायते) इत्यादौ भृशादित्वात् क्यङ्सलोपौ । तत्र हि सुदुदुरभिभ्यः परो मनशब्दः पठ्यते । (वैमनस्यं विमनसिमा । साम्मनस्यं सम्मनसिमा,) "वेर्यातलाभमतिमनशारदानां समो मतिमनसोः" इति ष्यञिमनिचौ । त्वतलौ चोदाहार्यौ । (विमनीकरोति,) "अरुर्मनश्चक्षुः" इत्यादिना च्विः सलोपश्च । मनसादेवो नाम कश्चित्, "मनसस्संज्ञायाम्" इत्युत्तरपदे तृतीयाया अलुक् । "दिवः कर्म च" इति करणत्वात्तृतीया । संज्ञासमावेशेन कर्मत्वमपीति दीव्यतेः कर्मण्यण्भवतीति दीव्यतावुक्तम् । (मनसाज्ञायी,) "आज्ञायिनि च" इत्यलुक् । लुकि तु मनआज्ञायीति स्यात् । (वाङ्मनसम्) "अचतुर" इत्यादिना द्वन्द्वेऽजन्तो निपातितः । (मधुः,) "फलिपाटिनमि" इत्यादिना उप्रत्ययो धकारश्चान्त्यादेशः । (मधुरः) "उप-

सुषि" इत्यादिना मत्वर्थे रः । इह मधुशब्दो रसनाग्राह्ये माधुर्याख्यरसे वर्तते । तेन मधुरं मद्यमित्यपि भवति । इह च न भवति, मध्वस्मिन् घटे ऽस्ति मधुरो घट इति । इदं च "तद-स्यास्त्यस्मिन्" इति विवक्षानियमार्थस्य इतिशब्दस्यानुवर्तनाल्लभ्यते । (मनुः,) "शृस्वृ-स्निहि" इत्यादिना उप्रत्ययः । मनोस्स्त्री (मनायी, मनावी, मनुः) । "मनोरौ वा" इति ङीप्यैकार औकारो वान्तादेशः । (मनुष्यो, मानुषः,) "मनोर्जातावञ्यतौ षुक्च" इति अञ्यतौ षुक्चागमः । जाताविति वचनाद् इह अपत्यग्रहणं व्युत्पत्तिमात्रार्थम् । तेन मानुषा इत्यत्र "यञञोश्च" इत्यपत्यस्याञो विधीयमानो बहुषु लुङ्न भवति । (मानुषी) गौरादि-त्वान्ङीष् । "हलस्तद्धितस्य" इति ईति परतस्तद्धितयकारस्य लोपः । (मानुष्यकम्,) "गोत्रोक्ष" इत्यादिना समूहे वुञ् । अपत्ये त्वणि (मानवा) इति । मनुष्या अप्यपत्यत्वारोपेण मानवा इत्युच्यन्ते । यदा मानवस्य कुत्सादि विवक्ष्यते तदा ॥

अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः ।
नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः ॥

इति नकारस्य णत्वम् । अण्तु सामान्येनैव सिद्धः । माणव एव (माणवकः,) संज्ञायां कन् । (माणव्यम् ,) "ब्राह्मणमाणव" इति समूहे यत् । (माणवीनम्,) "माणवचरक" इति हितार्थे खञ् । (माणव्यम्,) ब्राह्मणादित्वात् ष्यञ् । (मुनिः,) "मनेरुच्चोपधायाः" इतीन्प्रत्ययः, उपधायाश्चोकारः । (मौनम्,) "इगन्ताच्च" इति भावेऽण् । मनु अवबो-धन इति तनादौ ॥ ६८ ॥

युज समाधौ ॥ समाधिश्चित्तनिरोधः, तेनायमकर्मकः। युज्यत एतत् इति प्रयोगस्तु युनक्तेः कर्मणि यकि तङि। (युज्यते ब्रह्मचारी योगम्) इत्येतदपि "सृजियुज्योश्श्यंस्तु" इति सकर्म-कस्य कर्तुः कर्मवद्भावश्यनोर्विधानाद्युज्यते । युज्यतिसृज्यत्योरकर्मक एव वार्तिकं चोपप-द्यते । युज्यतइत्यादि पूर्ववत् । (प्रयुक्,) "सत्सूद्विष" इत्यादिना सोपपदात्क्विप् । (युज-मापन्ना महर्षयः) इत्यत्र निरुपपदत्वेऽपि सम्पदादित्वाद्भावे क्विप् । "युजेरसमासे" इति सर्वनामस्थाने नुमस्य न भवति, इकारवतो रौधादिकस्यैव तत्र निर्देशात् । (योगी,) सम्पृ-चादिना घिनुण् । "युग्यं च पत्रे" इति निपातनं नास्य, अर्थस्वभावात् । "दाम्नीशसयुज" इति ष्ट्रन्विधावपि नास्य ग्रहः, अनभिधानात् ॥ ६९ ॥

सृज विसर्गे ॥ अयमकर्मकः । प्रयुज्यते च 'वृन्तश्लथं हरति पुष्पमनोकहानां, संसृज्यते सरसिजैररुणांशुभिन्नैः' इति । कर्मणि प्रयोगे तु प्रक्रमभङ्गस्स्यात् । 'स्वाभाविकं परगुणेन विभातवायुस्सौरभ्यमीप्सुरिव ते मुखमारुतस्य' । इति च न सङ्गच्छते । पाणिभ्यां सृज्यते पाणिसर्ग्येत्यादयस्तु सृजतेः कर्मणि । सृज्यते मालामिति कर्तरि । (सृज्यते । ससृजे, ससृ-जिसे,) क्रादिनियमान्नित्यमिट् । "विभाषा सृजिदृशोः" इति विकल्पोऽस्य न भवति, थलोऽभावात् । (स्रष्टा । स्रक्ष्यते । सृज्यताम् । असृज्यत । सृज्येत, सृक्षीष्ट,) लिङि । (असृष्ट, असृक्षाताम् । सिसृक्षते,) झलादौ व्रश्चादिना षत्वे "षढोः कस्सि" इति कत्वम् । अकिति झलादौ "सृजिदृशोः" इत्यादिना अमागमः "हलन्ताच्च" इति "लिङ्सिचावा-त्मने पदेषु" इति सनो लिङ्सिचोश्च कित्वात् नामागमो नापि गुणः । (सरीसृज्यते । सरी-सर्ष्टि । सजयति । असीसृजत् असससर्जत्,) "उर्ऋद्वा" ॥ ७० ॥

लिश अल्पीभावे ॥ (लिश्यते । लिलिशे । लेष्टा । लेक्ष्यते) । व्रश्चादिना षत्वे कत्वम् । (लिश्यताम् । अलिश्यत । लिश्येत, लिक्षीष्ट । अलिक्षत, अलिक्षाताम्) "शल इगुपधात्" इति क्सः । "क्सस्याचि" इत्यकारलोपः । (लिलिक्षते । लेलिश्यते । लेलेष्टि । लेशयति । अ-लीलिशत् । लिक्षा,) बाहुलकात् क्सप्रत्ययः । अयं गत्यर्थस्तुदादौ । पदादयोऽनुदात्ता-अनुदात्तेतो ण्यतिवर्जम् ॥ ७१ ॥

अथानिटः परस्मैपदिन आह ॥

राधोऽकर्मकाद्वृद्धावेव ॥ एवकारो भिन्नक्रमः । अस्मादकर्मकादेव श्यन् । वृद्धिग्रहणं तु तु उदाहरणदर्शनार्थम्, यथा वृद्धावकर्मक इति । एवकारश्च एवमर्थात्सिद्धायाः सकर्मकक्रिया-व्यावृत्तेरनुवादमात्रम् । काश्यपस्तु यथाश्रुतमेवान्वयं वदन् 'अथावधारणार्थनैवकारेण अन्य-त्रार्थनिर्देशेष्वनियमो ज्ञाप्यते' इति तत् "कर्मवत्" सूत्रभाष्ये राध्यत्योदनस्स्वयमेवेत्यवृद्धौ श्यनो दर्शनादुपेक्ष्यम् । अत्र हि सिद्ध्यतीत्यर्थः । तथा "राधीक्ष्योः" इत्यत्र वृत्तौ देवदत्ताय राध्यतीति दैवपर्यालोचने श्यनोऽदर्शनाच्च, अत्र दैवस्य जीवत्यादौ प्राणादिवद्धात्वर्थेऽन्तर्भा-वादकर्मकत्वम् । एवं हि माघप्रयोगश्चोपपद्यते ॥

न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति ।
क्रियासमभिहारेण विराध्यन्तं क्षमेत कः ॥

इत्यत्र हि द्रोहोऽर्थः । (रराध, रराधतुः,) "राधो हिंसायाम्" इत्येत्वाभ्यासलोपौ दैवादिकस्य, यतो हिंसार्थस्य सकर्मत्वाद् दैवादिकत्वमेव न भवति । (राद्धा । रात्स्यति । राध्यतु । अराध्यत, राध्येत्, राध्यात्,) लिङौ । (अरात्सीत् आराद्धम्, अरात्सुः । रिरा-त्सति । रराध्यते । राधयति । अरीरधत्) । अयं स्वादिश्चुरादिश्च ॥ ७२ ॥

व्यध ताडने । (विध्यति,) "ग्रहिज्या" इत्यादिना सम्प्रसारणम् । तच्च "न सम्प्रसारणे सम्प्रसारणम्" इति पूर्वस्य न भवति । (विव्याध, विविधतुः, विव्यद्ध, विव्यधिथ, विविधथुः विविध, विव्याध, विविधिव,) क्रादिनियमादिट् । थलि भारद्वाजनियमादिड्विकल्पः । पिद्वचनेषु "लिट्यभ्यासस्य" इत्यभ्यासस्य हलादिशेषं बाधित्वा सम्प्रसारणम् । अन्यत्र ग्रहि-ज्यादिना सम्प्रसारणे पश्चाद् द्विर्वचनम् । (व्यद्धा । व्यत्स्यति । विध्यतु । अविध्यत् । विध्येत्, विध्यात्) "किदाशिषि" इति कित्त्वात्प्रसारणम् । (अव्यात्सीत्, अव्याद्धाम् । विव्यत्सति,) हलादिशेषे इत्वम् । (वेविध्यते। वाव्यद्धि। व्याधयति। अविव्यधत् । व्याधः,) "श्याद्व्यध" इति णः । (व्यधः,) "व्यधजपोः" इत्यप् । (मृगावित्,) "क्विप् च" इति क्विप्, "नहिवृति" इत्यादिना पूर्वपदस्य दीर्घः । (विधुः,) "पृभिदिव्यधि" इति कुप्रत्ययः॥७३॥

पुष पुष्टौ । (पुष्यति । पुपोष, पुपोषिथ,) क्र्यादिनियमान्नित्यमिट् । भारद्वाजनियमस्तु उपदेशेऽजन्तानामत्वतां चेदिह न भवति । (पोष्टा । पोक्ष्यति । पुष्यतु । अपुष्यत्, पुष्येत्, पुष्यात्,) लिङौ । (अपुषत्) "पुषादि" इत्यादिनाङ्परस्मैपदे । तङि तु (व्यत्यपुक्षत) इति क्सो भवति । कर्मणि तु (अपोषि, अपुक्षाताम्, अपुक्षत) इति चिण्क्सौ भवतः । (पुपु-क्षति । पोपुष्यते । पोपोष्टि । पोषयति, अपूपुषत्) । पुष्यन्त्यस्मिन्नारब्धानि कार्या-णीति (पुष्यः,)"पुष्यसिद्धौ नक्षत्रे" इति क्यप् निपात्यते । पुष्येण युक्तः (पौषः,) "नक्षत्रेण युक्तः कालः" इत्यण् । (पौषमहः,) "तिष्यपुष्ययोर्नक्षत्राणि" इति यलोपः । स्वपोषं पुष्यती-त्यादि पोषतिवन्नेयम् । "स्वे पुषः" इति णमुल् । (पुषति, पोषति,) इति द्वयं शपि । पुष्णातीति। क्र्यादौ । पोषयतीति चुरादौ ॥ ७४ ॥

शुष शोषणे । (शुष्यति) इत्यादि पुषिवत् । (शुष्कः, शुष्कवान्,) "शुषः कः" इति निष्ठातस्य ककारः । शुष्कैव (शुष्किका,) शुष्का जङ्घा ऽस्याः (शुष्कजङ्घा) । कत्वस्य पूर्वत्रासिद्धत्वाद् "उदीचामातस्स्थाने" इति ककारपूर्वत्वेन वैकल्पिकइत्वनिषेधो "न कोप-धायाः" इति पुंवद्भावनिषेधश्च न भवति । (आतपशुष्कः) "आतपशुष्कपक्वबन्धैश्च" इति सप्तमीस मासः । (ऊर्ध्वशोषं शुष्यति,) "ऊर्ध्वे शुषिपूरोः" इत्यूर्ध्वे कर्तरि णमुल् । कषादित्वाद्यथाविध्यनुप्रयोगः ॥ ७५ ॥

तुष प्रीतौ । प्रीतिस्तृप्तिः । तुष्यति) इत्यादि ॥ ७६ ॥

दुष वैकृत्ये । वैकृत्यं विकृतिः (दुष्यति) इत्यादि । (दोषणं, दूषणं,) इति णौ "दोषो णौ" इत्यूत्वमुपधायाः। (दूषयति चित्तं दोषयति वा,) "वा चित्तविरागे" इत्यूकार-विकल्प उपधायाः, विरागश्चित्तस्याप्रीतता । (दोषी ।) सम्प्रसादिना घिनुण् (दूषिका,)

"कषिदूषिभ्यामीकन्" इतीकन् ॥ ७७ ॥

श्लिष आलिङ्गने ॥ (श्लिष्यति । शिश्लेष । श्लेष्टा । श्लेक्ष्यति । श्लिष्यतु । अश्लिष्यत् । श्लिष्येत्, श्लिष्यात्,) लिङौ । (अश्लिक्षत् कन्यां देवदत्तः) "श्लिष आलिङ्गने" इति अङपवादः क्सः । आलिङ्गनं परिष्वङ्गः । अन्यत्र पुषादित्वादङ्, समश्लिषज्जतु काष्ठम् इति । अथात्मनेपदेषु कथं भवितव्यम्, समाश्लेषि कन्या देवदत्तेन समाश्लिक्षातां समाश्लिक्षन्त इति । "शल इगुपधात्" इति क्सो भविष्यति । एकवचने तु परत्वाच्चिण् । यद्येवमनालिङ्गनेऽपि क्सः प्राप्नोति, इष्यते च सिच् समश्लिक्षत जतूनि काष्ठैरिति । एवं तर्हि "श्लिषः क्सः" इति योगविभागः । अयं च पुरस्तादपवादन्यायेन अङं बाधते, न चिणम् । तत "आलिङ्गने" इति द्वितीयः । नियमार्थमिदं वचनम् । अनेन च योगविभागसामर्थ्यात् "श्लिष" इति वा "शल इगुपधात्" इति वा क्सस्य या प्राप्तिः सा सर्वा नियम्यते आलिङ्गन एवेति । तेन अनालिङ्गने परस्मैपदात्मनेपदयोः यथायोगमङ्सिचावेव भवतः । (श्लेष्मा,) मनिन् । श्लेषयतीति, शपि ॥ ७८ ॥

शक विभाषितो मर्षणे ॥ अयं मर्षणे दिवादिः । विभाषित इत्युभयपदी तन्त्रान्तरप्रसिद्ध्योच्यते । क्षीरस्वामी तु सहनेऽर्थे शकिधातुर्विभाषितः, विकल्पितः पक्षे दिवादिः पक्षे स्वादिरित्यर्थः । (शक्यते, शक्नोति) इति । शाकटायनश्चामुमेव विभाषितार्थमङ्गीकृत्य अस्य चोभयत्र पाठमात्रादेव सिद्धत्वाद्वैयर्थ्यमेव नूनं मत्वा, 'शक मर्षणे' इत्येव पपाठ । अतस्स्वाम्युक्तमनेनैव प्रत्युक्तम् । शाकटायनोक्तमपि विभाषितपदस्य मैत्रेयादिभिस्तन्त्रान्तरप्रसिद्धार्थस्याभिधानात् सार्थकत्वाद्यत्किञ्चित् । तथा स्वामिशाकटायनपक्षावुक्त्वोक्तं च पुरुषकारे, 'तच्चैतदुभयमपि बहुसम्मते यथोक्तेऽर्थे सम्भवत्ययुक्तमेव' इति । (शक्यति । शशाक, शेकतुः, शशक्थ, शेकिथ) । भारद्वाजनियमादिड्विकल्पः । (शक्ता । शक्ष्यति । शक्यतु, अशक्यत् । शक्येत्, शक्यात्) लिङौ । (अशकत् । शक्यते । शेके) । इत्यादितङ्युदाहार्यम् । (शिशक्षति । शिशक्षते) "सनिमीमा"इत्यादिना ऽच इस्, अभ्यासलोपः । "स्कोः" इति सलोपः । (शाशक्यते । शाशक्ति । शाकयति । अशीशकत् । शक्त्वा, शक्तः) शक्तो घटः कर्तुं, शकितो घटः कर्तुं, 'सौनागाः कर्मणि निष्ठायां शकेरिटमिच्छन्ति विकल्पेन' इति वृत्तिः ॥ ७९ ॥

ष्विदा गात्रप्रक्षरणे॥गात्रप्रक्षरणं घर्मस्रुतिः । ञिष्विदेति मैत्रेयादयः । तथा "निष्ठाशीङ्" इत्यत्र न्यासेऽप्ययं ञिदेवोदाहृतः।अस्य ञित्त्वं हरदत्तस्यानभिमतम्, यदाह । "निष्ठाशीङ्" इत्यत्र 'ञिष्विदास्नेहनमोचनयोः' इति ञितो ग्रहणं न तु ष्विदा गात्रप्रक्षरणइति दैवादिकस्य, ञिक्ष्विदिस्साहचर्यात्, अस्य चाञित्त्वात्" इति । इदमेवानुसृत्य 'ञित्वं तस्यापपाठ' इति पुरुषकारेऽप्युक्तम् । तथा च अनिट्कारिकावृत्तौ 'स्विद्यतीति श्यना निर्देशो ञिष्विदेत्यस्य निवृत्त्यर्थ' इति । यद्ययमपि ञित्स्यात्, अनेन किं व्यावर्तितं स्यात् । यद्येवं "निष्ठा शीङ्" इत्यत्र 'ञितां ग्रह' इति हरदत्तोक्तिरस्यानिट्त्वादेवाग्रहणसिद्धेरयुक्तेति चेन्न, भावादिकर्मणोः प्रस्वेदितमित्यादौ सेट्त्वसम्भवात् (स्विद्यति । सिष्वेद, सिष्वेदिथ, सिष्वेदिव,) क्रादिनियमादिट् (स्वेत्ता । स्वेत्स्यति । स्विद्यतु, अस्विद्यत् । स्विद्येत्, स्विद्यात्,) लिङौ । (अस्विदत् । सिष्वित्सति । सेष्विद्यते । सेष्वित्ति । स्वेदयति । असिष्विदत् । सिस्वेदयिषति) । "सस्विदि" इत्यादिना ऽभ्यासेणः परस्य सकारस्य "स्तौतिण्योरेव" इति नियमापवादस्सकारः । (स्विन्नः) । "ञिष्विदा स्नेहनमोचनयोः" इति द्यौतादिकाद् "द्युद्भ्यो लुङि" इति परस्मैपदे (अस्विदद्) इति सिद्धावपि पुषादावस्य पाठोऽर्थभेदात् ॥ ८० ॥

क्रुध कोपे ॥ (देवदत्ताय क्रुध्यति,) "क्रुधद्रुह" इति कोपविषये सम्प्रदानत्वम् । तस्यैव "क्रुधद्रुहोरुपसृष्टयोः कर्म" इति कर्मत्वे, देवदत्तमभिक्रुध्यतीति । (चुक्रोध, चुक्रोधिथ, चुक्रु-

धिव । क्रोद्धा) इत्यादि । (क्रोधनः) "क्रुधमण्डार्थेभ्यश्च" इति युच् ॥ ८१ ॥

क्षुध बुभुक्षायाम् ॥ (क्षुध्यति । चुक्षोध । क्षोद्धा) । इत्यादि । (क्षुत्)। सम्पदादित्वात्क्विप् ॥ (क्षुधितः) इति "तदस्य सञ्जातम्" इतीतचि ॥ ८२ ॥

शुध शौचे ॥ (शुध्यति । शुशोध । शोद्धा) । इत्यादि । शुन्धतीति शपि ॥ ७३ ॥

षिधु संराद्धौ ॥ केचिदूदितं पठन्ति । तदसत्, अनुदात्तोपदेशवैयर्थ्यात् । (सिध्यति । सिषेध । सेद्धा । सेत्स्यति । सिध्यतु । असिध्यत् । सिध्येत्, सिध्यात्,) लिङौ । (असिध्यत् । सिषित्सति । सेषिध्यते । सेषेद्धि) । (अन्नं साधयति,) "सिध्यतेरपारलौकिके" इति परलोकप्रयोजनव्यतिरिक्तार्थवृत्तेः सिद्धेः णावेचः स्थाने आत्वम् । पारलौकिके तु तपस्सेधयति तापसम् । अत्र सिद्धिः परलोकार्थे ज्ञानविशेषे वर्तते । तापसस्सिध्यति ज्ञानविशेषमासादयति, तं तपः प्रयुङ्क्ते, स च ज्ञानविशेष उत्पन्नः परलोके जन्मान्तरफलमभ्युदयलक्षणमुपसंहरन् परलोकप्रयोजनो भवति । अन्नं साधयति, ब्राह्मणेभ्यो दास्यामीत्यत्र तु षिधेर्निष्पत्तिरर्थः । तस्याः प्रयोजनमन्नम्, तस्य यद्दानं तत्पारलौकिकम्, न पुनर्निष्पत्तिरेवेति साक्षात्परलोकप्रयोजने सिद्ध्यर्थे चरितार्थत्वाद् निषेधस्येह न प्रवृत्तिः । (सिद्धः) । (साङ्काश्यसिद्धः,) "सिद्धशुष्क" इति सप्तमीसमासः । "तत्पुरुषे कृति बहुलम्" इत्यलुको 'नेन्सिद्धबध्नातिषु च' इतीवन्ते सिद्धशब्दे बध्नातौ च निषेधः । (सिधित्वा, सेधित्वा, सिद्धा,) उदित्त्वादिड्विकल्पः, इटि "रलो व्युपधात्" इति कित्वविकल्पः । राधाद्योऽनुदात्ता उदात्तेतः ॥ अतः परं विभाषेटः परस्मैपदिनो रधादीनष्टाह ॥ ८४ ॥

रध हिंसासंराद्ध्योः ॥ (संराद्धिः) पाकः । (रध्यति । ररन्ध, ररन्धतुः, ररन्धुः, ररन्ध, ररन्धिथ, ररन्धुः, ररन्ध, ररन्धिव, ररन्धिम, रेध्व, रेध्म,) "रधादिभ्यश्च" इतीड्विकल्पो वलाद्यार्धधातुके । तत्रानिटि थलि "झषस्तथोः" इति थकारस्य धकारे पूर्वस्य जश्त्वे दकारः । वस्मसोरेत्वाभ्यासलोपौ । इडादौ लिट्यन्यस्मिंश्चाजादौ "रधिजभोरचि" इति नुम् । (ररन्धिव, ररन्धिम) इत्यत्र रधन्व रधन्म इति स्थिते "असंयोगाल्लिट् कित्" इति कित्त्वात्पूर्वं परत्वादिट्, तत्रापि कित्त्वान्नित्यत्वान्नुमि सतीदानीं संयोगान्तत्वेन वस्मसोः कित्त्वाभावात् "अनिदिताम्" इति नलोपाभावः । हरदत्तस्तु इटः परत्वमाश्रित्य "नेट्यलिटि" इत्यत्राह । इटि सत्यजादित्वाद् नुमा भवितव्यम्, प्रागेव कित्त्वं प्राप्नोति । नचालिटीत्यस्य वैयर्थ्यं, थलर्थवत्त्वात् । एवं तर्हि धातोरित्यनुवृत्तेरुपदेश एव नुम्भवति, अचीत्येषा विषयसप्तमीत्याह । (रधिता, रद्धा,) अनिट्पक्षे थलीव धत्वजश्त्वे "नेट्यलिटि रधेः" इति लिड्वर्जितेडादौ नुमो निषेधः । (रधिष्यति, रत्स्यति । रध्यतु । अरध्यत् । रध्येत् । रध्यात्) लिङौ । (अरधत्) अङि "रधिजभोः" इति नुमि "अनिदिताम्" इति नलोपः । (रिरधिषति । रिरत्सति । रारन्धीति, रारद्धि । रन्धयति,) नित्यत्वात्पूर्वं नुमि सति अनुपधात्वान्न वृद्धिः । (अररन्धत्,) "अनिदिताम्" इति नलोपो णिलोपस्य स्थानिवत्त्वात् चङो व्यवधानान्न भवति । (रन्धनं, रन्धकः) । "रधिजभोरचि" इति नुम् । क्वसौ तु द्विर्वचनैत्वाभ्यासलोपेषु "वस्वेकाजात्" इतीटि नुमि, तस्य संयोगान्तत्वेन "असंयोगाल्लिट् कित्" इत्यातिदेशिककित्वाभावेऽप्यौपदेशिककित्वाश्रयणे नलोपे रेधिवानिति ॥८५॥

णश अदर्शने ॥ (नश्यति । ननाश, नेशतुः, नेशिथ, ननंष्ठ, नेशतुः नेशिव, नेश्व, नेशिम, नेश्म) । एत्वाभ्यासलोपौ, पूर्ववदिड्विकल्पः । अनिट्पक्षे "मस्जिनशोर्झलि" इति थलि, नुमि । एवमन्यस्मिन्नपि झलादौ । (नाशिता, नंष्टा । नश्यति । नङ्क्ष्यति । नश्यतु । अनश्यत् । नश्येत्, नश्यात्, लिङौ । अनशत्, अनशः, अनशम्) "अत एकहल्" इत्यत्र भाष्यम्—

नशिमन्योरलिट्येत्वं छन्दस्यमिपचोरपि ।
अनेशं मेनकेत्येतद् व्येमानं लिङि पेचिरन् ॥

इति । अत्र कैयटः । अनेशमिति मिपोऽम्भावः) पुषादित्वादङादेशः । "छन्दसि" इति पूर्वेणापि सम्बन्धाद् भाषायामेत्वाभावः । एवं तु मेनकेत्यपि भाषायां न प्राप्नोति । यदि त्विष्यते पृषोदरादित्वाद्भविष्यतीति । हरदत्तोऽपि । 'अलिटि' इति पादपूरणार्थोऽनुवादः । अनेशन्निति झेरन्तादेशः। 'अनेशन्नस्वेषवः'। अनेशमिति तु प्रायेण पाठः। तत्र मिपोऽम्भावः । 'छन्दसि' इति वचनाद् मेनकेति च भाषायां न प्राप्नोति। यदीष्यते [पृषोदरादिषु द्रष्टव्यम्] इति । वृत्तौ तु [नशिमन्योरलिट्येत्वं वक्तव्यम्] अनेशत् मेनकाम् । (अनेशन्) इति नशेर्लुङि पुषादित्वादङ् (मेनका) इति "मनेराशिषि च" इति वुन् । क्षिपकादिषु प्रक्षेपाद् इत्वं न क्रियते । [छन्दस्यमिपचोरलिट्येत्वं वक्तव्यम्] इति वाक्यभेदेन छन्दोग्रहणमपि पचिशेषतया व्याख्यातम् । दुर्गोऽपि सामान्येन "नश एत्" इत्यङि परत एत्वमाह । (प्रणश्यति) । "उपसर्गादसमासेऽपि" इति णत्वम् । (प्रनष्टा) इत्यादौ "नशेःषान्तस्य" इति णत्वनिषेधः । अत्रान्तग्रहणस्य भूतपूर्वषान्तत्वाश्रयणार्थत्वात् प्रनङ्क्ष्यतीत्यादावपि न णत्वम् । (निनशिषति, निनङ्क्षति । नानश्यते । नानंष्टि । नाशयति, अनीनशत्) । "बुधयुधनश" इति नित्यं परस्मैपदम् । (नश्वरः, नश्वरी,) । "इण्नश्जी" इति क्वरप् । स्त्रियाम् "टिड्ढाणञ्" इत्यादिना ङीप् । प्रणश्यतीति (प्रनट्, प्रनक्,) "नशेर्वा" इति पदान्तस्य वा कुत्वम् । "नशेःषान्तस्य" इति णत्वनिषेधः । भूतपूर्वगतया षान्तत्वम् । सा चान्तग्रहणात् तत्राश्रिता । (नष्टः) । "यस्य विभाषा" इत्यनिट्त्वे "मस्जिनशोः" इति नुम् । "अनिदिताम्" इति नलोपः । दुःखेन नाशयितव्यो(दूणाशः) "ईषत्" इत्यादिना खल् । दुरो "दाशनाशदभध्येषु" इति पृषोदरादिपाठाद् दुर उत्वम् , उत्तरपदादेष्टुत्वं च (नंशुकः) । रेणुश्चन्द्रमाश्च, "पचिनश्योर्नुकन्कनुमौ च" इति नुकन्प्रत्ययो नुमागमश्च ॥ ८६ ॥

तृप प्रीणने ॥ इह प्रीणनं तृप्तिस्तर्पणं च । दृश्यते चोभयथा । 'तृप्यन्तु भवन्तः,' 'नाग्निस्तृप्यति काष्ठानाम्' । 'पितृनताप्सीत्सममंस्तबन्धून्' इति । (तृप्यति । ततर्प, ततृपतुः, ततर्पिथ, ततर्प्थ तत्रप्थ, ततृपथुः, ततृप, ततर्प, ततृपिव,) "अनुदात्तस्य चर्दुपधस्य" इति थल्यनिट्पक्षेऽमागमविकल्पः । कृते च तस्मिन् यणादेशः । (तर्पिता, तर्प्ता, त्रप्ता । तर्पिष्यति, तर्प्स्यति, त्रप्स्यति । तृप्यतु । अतृप्यत् । तृप्येत्, तृप्यात्,) लिङौ । (अतृपत् , अतृपताम् ,) पुषादित्वादङ् । [स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वक्तव्यः] इति सिच्पक्षे अतर्पीत् अतर्पिष्टामिति । "नेटि" इति वृद्धिनिषेधः । अनिट्पक्षे त्वमागमे (अत्राप्सीत्) । अन्यदा (अताप्र्सीत्) । उभयत्र "वदव्रज" इति वृद्धिः । (तितर्पिषति, तितृप्सति,) "हलन्ताच्च" इति सनः कित्त्वात् नामागमो नापि गुणः । (तरीतृप्यते । तरीतृपीति, तरीतर्ति) इत्यादि रुग्रिकोरपि नेयम् । (तर्पयति । अततर्पत् । अतीतृपत्) उरद्वा । (तर्पित्वा, तृप्त्वा । फलानां तृप्तः) । "पूरणगुणसुहितार्थ" इति षष्ठीसमासनिषेधः । सुहितार्थास्तृप्त्यर्थाः । (तृप्रः) पुरोडाशः । "स्फायितञ्चि" इत्यादिना रक् । (त्रपिष्ठः, त्रपीयान्) । तृप्रमाचष्टे (त्रापयति) । "प्रियस्थिर" इत्यादिना "णाविष्ठवत्" इति च त्रपादेशः पृथ्वादिष्वपाठाद् इमनिजस्य नास्तीति वृत्तावुक्तम् । (तृपला) लता । "कल तृपश्च" इति कलप्रत्ययः । अमुं स्वादावपि मैत्रेयात्रेयादयः पठन्ति । तद्वृत्तिन्यासपदमञ्जर्यादिकृतामनभिमतम् । तत्रैवोपपादयिष्यते । अयं युजादौ तुदादौ च । तत्र तुदादौ द्वितीयान्त इत्येके ॥ ८७ ॥

दृप हर्षणमोहनयोः ॥ मोहनं गर्व इति स्वामी । हर्षविमोचनयोरित्येके (दृप्यति) इत्यादि पूर्ववत् । (दर्पणः) । नन्द्यादिः । अमुमुत्क्लेशे तुदादिः । तृपिदृप्योरनुदात्तेत्त्वमसमर्थम् । इट् तु रधादित्वाद्विकल्पित इति न तन्निवृत्त्यर्थम् ॥ ८८ ॥

द्रुह जिघांसायाम् । (देवदत्ताय द्रुह्यति) । "क्रुधद्रुह" इति दोषविषयस्सम्प्रदानम् ।

(देवदत्तमभिद्रुह्यति) "क्रुधद्रुहोरुपसृष्टयोः कर्म" इत्युपसृष्टत्वे कर्मत्वम् । (दुद्रोह, दुद्रुहथुः, दुद्रोहिथ,) अनिट्पक्षे "वा द्रुहमुहष्णुहष्णिहाम्" इति झलि पदान्ते च हकारस्य वा घत्वे "झषस्तथोः" इति झलि पदान्ते च हकारस्य वा घत्वे "झषस्तथोः" इति थकारस्य धत्वे "झलां जश् झशि" इति घकारस्य गत्वे, (दुद्रोग्ध) । घत्वाभावे "हो ढ" इति ढत्वे धकारस्य धत्वष्टुत्वयोः ढो ढे लोपे, ढलोपदीर्घात्परत्वाद्गुणे, (दुद्रोढ, दुद्रुहथुः, दुद्रहिव दुद्रुह, द्रोहिता, द्रोग्धा,) घत्वादि पूर्ववत् । (द्रोढा) ढत्वादि । (द्रोहिष्यति ध्रोक्ष्यति) कृते घत्वे सकारपरत्वेन "एकाच" इति भष्भावे "खरि च" इति चर्त्वे ककारः । ढत्वपक्षेऽपि कृते ढत्वे पदाभावे च "षढोः कस्सि" इति कत्वम्, इदमेव रूपम् । (द्रुह्यतु । अद्रुह्यत् । द्रुह्येत्, द्रुह्यात् । अद्रुहत् । दुद्रोहिषति, दुद्रुहिषति,) "रलो व्युपधात्" इति कित्त्वविकल्पः । अनिटि (दुध्रुक्षति,) घत्वढत्वयोर्भषभावादिः पूर्ववत् । (दोद्रुह्यते । दोद्रोग्धि, दोध्रोढि, दोध्रोक्षि । द्रोहयति । अदुद्रुहत् । द्रोही) । सम्पृचादिना घिनुण् (द्रुहित्वा, द्रोहित्वा, द्रुग्ध्वा, द्रुढ्वा । द्रुग्धः, द्रुढः, द्रुढवान्) । घत्वादि पूर्ववत् । ढत्वे धत्वष्टुत्वढलोपदीर्घाः । (मित्रध्रुक् मित्रध्रुट्) । "सत्सूद्विषद्रुह" इति क्विपि पदान्तत्वे "वा द्रुह" इति वा घत्वम् । अन्यदा ढत्वम् । भष्भावाद्युभयत्रापि भवति ॥ ८९ ॥

मुह वैचित्ये ॥ वैचित्यमविवेकः । (मुह्यति । मुमोह, मुमुहतुः, मुमुहिथ, मुमोग्ध, मुमोढ, मुमुहिथ, मुमुह्व । मोहिता, मोग्धा, मोढा । मोहिष्यति, मोक्ष्यति । मुह्यतु, अमुह्यत् । मुह्येत् । मुह्यात् । अमुहत् । मुमुहिषति, मुमोहिषति, मुमुक्षति । मोमुह्यते । मोमोग्धि । मोमोढि । मोहयति) । चित्तवत्कर्तृकत्वे "अणावकर्मकात्" इति परस्मैपदमेव । परिपूर्वत्वे तु "न पादमि" इत्यादिना निषेधात् "णिचश्च" इत्यादिना उभयं भवति, (परिमोहयति, परिमोहयते) इति । (परिमोही) । सम्पृचादिना घिनुण् । (मुहित्वा, मोहित्वा, मुग्ध्वा, मूढ्वा । मुग्धः, मूढः । उन्मुक्, उन्मुट्) द्रुहिवत्क्रिया । भष्भावस्तु बशभावान्न भवति । (मूर्खः) । "मुहेः खो मूर् च" इति खप्रत्ययो मूरादेशश्च ॥ ९० ॥

ष्णुह उद्गिरणे ॥ (स्नुह्यति । सुष्णोह, सुष्णुहतुः, सुष्णोहिथ, सुष्णोग्ध, सुष्णोढ, सुष्णुहिव । सुष्णुह्व । स्नोहिता, स्नोग्धा, स्नोढा । स्नोहिष्यति, स्नोक्ष्यति । स्नुह्यतु । अस्नुह्यत्, स्नुह्येत् । स्नुह्यात,) लिङौ । (अस्नुहत् । सुस्नुहिषति, सुस्नोहिषति)। "स्तौतिण्योरेव" इति नियमान्न षत्वम् । (सुस्नुक्षति । सोष्णुह्यते । सोष्णोग्धि, सोष्णोढि । स्नोहयति । असुष्णुहत् । स्नोहित्वा, स्नुहित्वा, स्नुग्ध्वा, स्नूढ्वा । स्नुग्धः, स्नूढः,) सर्वत्राभ्यासात्परस्य "आदेशप्रत्यययोः" इति षत्वे ष्टुत्वेन "रषाभ्याम्" इति वा णत्वम् । ९१ ।

ष्णिह प्रीतौ ॥ (स्निह्यति । सिष्णेह, सिष्णेहिथ, सिष्णेग्ध, सिष्णेढ, सिष्णिहिव, सिष्णिह्व । स्नेहिता स्नेग्धा, स्नेढा । स्नेहिष्यति, स्नेक्ष्यति । स्निह्यतु । अस्निह्यत् । स्निह्येत् । स्निह्यात् । अस्निहत् । सिस्निहिषति, सिस्नेहिषति, सिस्निक्षति । सेष्णिह्यते । सेष्णेग्धि, सेस्नेढि । स्नेहयति । असिष्णिहत् । स्निहित्वा, स्नेहित्वा, स्निग्ध्वा, स्निढ्वा । स्निग्धः, स्नीढः, उष्णिक्) । "ऋत्विक्" इत्यादिना उत्पूर्वास्निह्यतेः क्विन् । उदोऽन्तलोपः तस्य च षत्वं निपात्यते । "क्विन्प्रत्ययस्य" इति हकारस्य घत्वे जश्त्वे चर्त्वम् । (उष्णिहा) । अजादिपाठात् टाप् ॥ ९२ ॥

वृत् ॥ विभाषेटः परस्मैपदिनो रधादयो वृत्ता इत्यर्थः । अत्र वृत्करणं रधादिपरिसमाप्त्यर्थम्, पुषादयस्त्वागणान्तात् । यदुक्तं तरङ्गिण्यां, रधादीन् परिसमाप्य 'एतदन्तः पुषादिरित्येके । अतोऽयं शमादि' इति, तद्भाष्यवार्तिकविरोधादुपेक्ष्यम् । तथाहि—"अस्यतिवक्तिख्यातिभ्योऽङ्" इत्यत्र 'अस्यतिग्रहणमात्मनेपदार्थं द्रष्टव्यम् । किमुच्यते आत्मनेपदार्थमिति न पुनः परस्मैपदार्थमपि स्यात्, पुषादित्वात्, पुषादिपाठात्परस्मैपदेषु अङ् भविष्यति' इति । अत्र कैयटः—पुषादय आगणान्तात्, अन्तरा तु वृत्कर णं धादिपरिसमा-

प्रत्ययम्, न तु पुषादिपरिसमाप्त्यर्थमिति प्रतिपादनाय सुहृद्भूत आचार्य आह, अस्यतिग्रहणमिति'। पुषादिसूत्रे न्यासपदमञ्जर्योरप्येवमुक्तम्। अत्र "वा द्रुहादीनाम्" इति लाघवेन वक्तव्ये विधातव्ये प्रतिपदपाठो यङ्लुगर्थः। गणनिर्देशो हि 'निर्दिष्टं यद्ग्रहणेन च' इति वचनाद्धत्वं न स्यात्॥

अस्य पुषादीनेव नित्येटः परस्मैपदिन आह॥

शमु उपशमने॥ शाम्यति। शशाम, शेमतुः, शेमिथ, शेमिव। शमिता। शमिष्यति। शाम्यतु। अशाम्यत्, शाम्येत्)। आशिषि, (शम्यात्। अशमत्)। "शमामष्टानां दीर्घः श्यनि" इति दीर्घः। (शिशमिषति। शंशम्यते। शंशमीति, शंशन्ति, शंशान्तः)। (निशमयति वचः,) अमन्तत्वान्मित्त्वम्। (अशामि, अशमि)। "चिण्णमुलोर्दीर्घोऽन्यतरस्याम्" इति णेश्चिणि पक्षे दीर्घः। (निशामयति रूपम्, 'शमोऽदर्शने' इति दर्शने मित्त्वनिषेधः। (शमी)। "शमित्यष्टाभ्यो घिनुण्" इति घिनुण्। "नोदात्तोपदेशस्य मान्तस्य" इति वृद्धिनिषेधः। शमयतीति (शमनः)। बाहुलकात्कर्तरि ल्युः। (शमित्वा, शान्त्वा)। "उदितो वा" इतीड्विकल्पः। (शान्तः)। "यस्य विभाषा" इतीण्णिषेधः। प्रशाम्यतीति (प्रशान्) "अनुनासिकस्य क्विझलोः क्ङिति" इति क्विपि दीर्घः। "मो नो धातोः" इति नकारः पदान्ते। स्वरादित्वादस्याव्ययत्वम्। (शान्तिः)। "तितुत्र" इतीण्णिषेधः। (शान्तः)। ण्यन्तात् "वा दान्तशान्त" इति णिलुगनिट्त्वं च पक्षे निपात्यते। अन्यदा (शमितः)। "निष्ठायां सेटि" इति णिलोपः। (शमलम्)। "शकिशम्योर्नित्" इति कलप्रत्ययः। (शम्बः)। "शमेर्बन्" इति बन्प्रत्ययः। (शम्बाकरोति)। "कृञो द्वितीयतृतीयशम्ब" इति डाच्। अनुलोमकृष्टं प्रतिलोमं कृषतीत्यर्थः। शम्बशब्दस्यात्र प्रातिलोम्ये वृत्तिः 'कृञश्च, कर्षणे' इति हरदत्तः। (शम्बुः)। "शमेर्बुन्" इति बुन् प्रत्ययः। (शाम्बव्यम्)। गर्गादित्वाद्यञ्। (शमी)। शमशब्दात्पिप्पल्यादित्वान्ङीष्। शम्या विकारोऽवयवो वा (शामीलम्) "शम्याष्ट्लञ्" टित्वात् स्त्रियां (शामीली)॥ ९३॥

तमु कांक्षायाम्॥ (ताम्यति) इत्यादि शमिवत्। (ताम्बूलम्, ताम्बूरम्)। "तमेर्बुक्च" इत्यूरालचौ प्रत्ययौ। णिद्वद्भावाद्वृद्धिः, बुगागमश्च। (ताम्रम्)। "शमितम्योर्दीर्घश्च" इति रकि दीर्घः। (तमसा) नदी। "अत्यमिचमितकि" इत्यसच्। (तमः,) असुन्। (अवतमसम्, सन्तमसम्, अन्धतमसम्)। "अवसमन्धेभ्यस्तमसः" इत्यच्समासान्तः। (तमिस्रा)। "ज्योत्स्नातमिस्रा" इति संज्ञायां मत्वर्थीयो रः, उपधायाश्चेकारः। स्त्रीत्वमतन्त्रम्, अन्यत्रापि दृश्यते, तमिस्रं नभ इति वृत्तौ। (तमसाकृतम्)। "ओजस्सहोम्भस्तमसस्तृतीयायाः" इत्यलुक्। (तमी)। इन्नन्तात् ङीष्॥ ९४॥

दमु उपशमने॥ (दाम्यति) इत्यादि। दमयतीति (दमनः)। नन्द्यादिः। (अरिन्दमः)। "संज्ञायां भृतृवृजि" इत्यादिना खच्। (दमयति, दमयते)। "अणावकर्मकात्" इति परस्मैपदस्य "न पादम्" इति निषेधः। (दान्तः, दमितः,) "वा दान्त" इति ण्यन्तान्निष्ठायामनिट्त्वम्, णिलुक्च पक्षे। (दमुनाः)। "दमेरुनसिः"। (दण्डः)। "ञमन्ताड्डः" (द्विदण्डि) प्रहरति। "द्विदण्ड्यादिभ्यश्च" इति बहुव्रीहाविच्प्रत्ययान्तो निपात्यते। द्वौ दण्डावस्मिन्प्रहरणइति विग्रहः। समुदायनिपातनस्य रूढ्यर्थत्वाद् द्विदण्डा शालेत्यत्र न भवति। "तिष्ठद्गुप्रभृतिषु इच्" इति पाठाद् इजन्तस्याव्ययीभावाद् अव्ययत्वम्। दण्डिनोऽपत्यं (दाण्डिनायनः)। इन्नन्तात् "नडादिभ्यः फक्" इति फकि "दाण्डिनायन" इति निपातनाट्टिलोपाभावः। शमिना सहास्यापाठः सकर्मकत्वात्। उपशमन इति ण्यन्ते द्रष्टव्यः॥ ९५॥

श्रमु तपसि खेदे च॥ (श्राम्यति) इत्यादि। अत्र वर्धमानो "नोदात्तोपदेश" इति वृद्धिनिषेधे ज्ञाते प्रयोगदर्शनाद् वा श्रमेर्वृद्धिमाह। तत् [आचमिकमिवमीनामिति वक्तव्यम्] इति चम्यादीनामेव भाष्यवार्तिकयोः वृद्ध्यङ्गीकारात्, "कथं सूर्यविश्रामभूः" इति

एवमादिकं प्रयोगं अन्यायमेव मन्यन्ते" इति वृत्तावुक्तत्वाचायुक्तम्, कुमारी चासौ श्रमणा च (कुमारश्रमणा,) "कुमारः श्रमणादिभिः" इति कर्मधारयः । श्रमणाशब्देन कुमारशब्दस्य सामानाधिकरण्याभावात् लिङ्गविशिष्टपरिभाषया कुमारीशब्दस्य समासे "पुंवत्कर्मधारय" इति पुंवद्भावः, अत एव निर्देशाल्ल्युः, युज्वा ॥ ९६ ॥

भ्रमु अनवस्थाने ॥ (भ्राम्यति) इत्यादि । "वा भ्राश" इति श्यनो विकल्पनाद् यदा शप् तदा (भ्रमतीत्यादि । शेषं भौवादिकवत् । "शमामष्टानाम्" इति श्यनि दीर्घः, ल्युडयङ् च विशेषः । (भ्रमी) । शमादित्वाद्घिनुण् । अत्रात्रेयः । अभिधानवशाद् अकर्मकादेव अयमिष्यते । तेन (भ्रमिता) वनमिति तृजेवेति । एवं चायं सकर्मकोऽकर्मकश्चेति नासूचि ॥ ९७ ॥

क्षमू सहने ॥ क्षाम्यति । चक्षाम, चक्षमतुः, चक्षमिथ, चक्षन्थ, चक्षमिव, चक्षण्व) "म्वोश्च" इति नत्वे णत्वम् । (क्षमिता, क्षन्ता । क्षमिष्यति, क्षंस्यति । क्षाम्यतु । अक्षाम्यत् । क्षाम्येत्, क्षम्यात् । अक्षमत् । चिक्षमिषति, चिक्षंसति । चङ्क्षम्यते । चङ्क्षन्ति । क्षमयति । अचिक्षमत् । क्षमी । क्षन्त्वा, क्षमित्वा,) ऊदित्वादिड्विकल्पे वलादौ । (क्षान्तः, क्षान्तिः,) "यस्य विभाषा" "तितुत्र" इति वेण्णिषेधः । (क्षमा) इति षितो भौवादिकस्य । अमुमपि केचित् षितं पठन्ति, तदसत् । तथा च स्वामी । केचिदत्रापि क्षमूषिति षितं पठन्ति, तदसत् । क्षमू सहन इति सभ्या' इति । वर्धमानोऽपि । क्षमेद्वादिकस्यानुबन्धस्य क्षान्तिः स्यादेव' इति । 'अषितः क्षाम्यतेः क्षान्तिः क्षमूषः क्षमतेः क्षमा' । इति देवपुरुषकारयोरपि९८

क्लमु ग्लानौ ॥ (क्लाम्यति, क्लामति । चक्लाम । क्लमिता) इत्यादि । "वा भ्राश" इत्यादिना श्यन्विकल्पः । शपि "ष्ठिवुक्लमु" इत्येव श्यन्यपि दीर्घे सिद्धे शमादिपाठो घिनुणर्थः ॥ ९९ ॥

मदी हर्षे ॥ (माद्यति) इत्यादि । (धर्मात्प्रमाद्यति) । [जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानम्] इति धर्मोपादानम् । (मदयति) "मदी हर्षग्लेपनयोः" इति घटादिपाठान्मित्त्वम् । अन्यत्र (मादयति) । माद्यत्यनेन (मनः) इति । (मद्यम्) । "गदमद" इत्यनुपसर्गे यत् । "कृत्यल्युटो बहुलम्" इति करणेऽपि भवति । मदयतीति (मदनः) । नन्द्यादित्वाण्ण्यन्ताल्ल्युस्संज्ञायाम् । इरा जलम्, तेन माद्यतीति (इरम्मदः) । "उग्रम्पश्येरम्मद" इति खशि श्यनभावो निपात्यते । (उन्मदिष्णुः) "अलङ्कृञ्" इत्यादिना इष्णुच् (उन्मादी) । शमादित्वाद्घिनुण् । (मदः) । "मदोऽनुपसर्गे" इत्यप् । "व्यधजपोरनुपसर्गे" इत्यत्रैव मदिग्रहणेऽपि कर्तव्ये पृथक्सूत्रारम्भाद् (उन्मादः) इति घञपीति न्यासः । (प्रमदः, सम्मदः) "प्रमदसम्मदौ हर्षे" इत्यस्मिन्निपात्यते । (मदित्वा, मत्तः, मत्तवान्) ईदित्त्वादनिट्त्वम् । "न ध्याख्या" इत्यादिना नत्वनिषेधः । (मदिरा) "इषिमदि" इत्यादिना किरच् । शमादयोऽष्टौ वृत्ताः ॥ मन्दते मदति इति स्तुत्यादौ शपि । मद तृप्तियोग इति चुरादावध्येषीयः ॥ १०० ॥

असु क्षेपणे ॥ अस्यति । आस । आसिथ । असिता । असिष्यति । अस्यतु । आस्यत् । अस्येत् अस्यात् । आस्थत्, आस्थताम्) "अस्यतिवक्तिख्यातिभ्य" इति कर्तरि लुङ्यङि "अस्यतेस्थुक्" इति थुगागमः । पुषादित्वादङि सिद्धे ऽस्यतिग्रहणमात्मनेपदार्थम् । तच्च कर्मकर्तरि [उपसर्गादस्यत्यूह्योर्वा वचनम्] इति शुद्धेऽपि कर्तरि सोपसर्गत्वे पक्षे तङो विधानादस्ति (निरस्यते । निरासे । निरासिषे । निरासिता, निरसिष्यते । निरस्यताम् । । निरास्यत । निरस्येत निरसिषीष्ट । निरास्थत । निरास्थेताम् । "अस्यति" इत्यङ् । इदमेव कर्मकर्तर्यपि रूपम् । कर्मणि चिण्सिचावेव (निरासि, निरासिषाताम् । असिसिषति । निरसिसिषते निरसिसिषति) "पूर्ववत्सनः" इति वा तङ् । (आसयति । आसिसत् । समस्यम्, सम्यस्यम् । समस्या) । "ऋहलोर्ण्यत् ," 'संज्ञापूर्वको वि-

धिरनित्यः" इति वृद्ध्यभाव इत्यात्रेयः। प्रास्यन्त्येतमिति (प्रासः) । "अकर्तरि च कारके" इति घञ् इति वृत्तौ । आत्रेयस्तु "हलश्च" इति करणे घञमाह । (प्रासनम्) । करणे ल्युट् (द्व्यहात्यासं गाः पयः पाययति, द्व्यहमत्यसमिति वा) "अस्यतितृषोः क्रियान्तरे- कालेषु" इति काले कर्मण्युपदे क्रियान्तरे क्रियाया व्यवधायकेऽर्थे वर्तमानयोरस्यतितृषोर्णमुल् । अद्य पाययित्वा द्व्यहमत्यस्य पाययतीत्यर्थः । अत्यसनक्रियया पानक्रिया व्यवधीयते । "तृतीयाप्रभृतीनि" इति समासविकल्पः । (असित्वा, अस्त्वा) । उदित्त्वादिड्विकल्पः। (अस्तः, अस्तवान्) "यस्य विभाषा" इतीण्णिषेधः। अस्तमनेनासितमनेन । "सौनागाः कर्मणि निष्ठायां शकेरिटमिच्छन्ति विकल्पेन, अस्यतेर्भावे" इति "विभाषा भावादिकर्मणोः" इत्यत्र वृत्तौ । (अस्तंगत्य,) "अस्तं च" इति क्रियायोगे गतित्वाद् अस्तंशब्दस्य समासः। अत एव निर्देशादस्तशब्दस्य मान्तत्वमित्यात्रेयः। अव्युत्पन्नोऽव्ययमिति वृत्तिन्यासपदमञ्जर्यादौ । (तरङ्गात्यस्तः) "द्वितीयाश्रित" इति समासः । (असुरः,) "वसेरुरन्" इत्युरन् । प्रज्ञादित्वादासुरः । (स्वसा) । "सावसेर्ऋन्" इति सावुपपदे ऋन् , अनङादि । "न षट्स्वस्रादिभ्यः" इति "ऋन्नेभ्यः" इति ङीपो निषेधः । स्वसुरपत्यं (स्वस्रीयः) "स्वसुश्छः" इति छः । पितृष्वसुरपत्यं (पैतृष्वस्रीयः, पैतृष्वसेयः) "पितृष्वसुश्छण्," ढकि तु "ढकि लोप"इत्यन्तलोपः । अत एव "अनुग्रादाड्ढक्" (मातृष्वस्रीयः, मातृष्वसेयः) । "मातृष्वसुश्च"इति छण्, ढकि लोपः । "मातृपितृभ्यां स्वसा" इति षत्वम् । (मातुस्स्वसा, मातृष्वसा) । "विभाषा स्वसृपत्योः" इति पक्षेऽलुक् । "मातुः पितुर्भ्यामन्यतरस्याम्" इत्यलुकि षत्वविकल्पः, स्वसृशकारस्य विसर्जनीयस्य सत्वे ष्टुत्वेन षत्वम् । एवं (पितुस्स्वसा, पितुष्ष्वसा) इति । (असुः) । "शॄस्वृ" इत्यादिना उप्रत्ययः । अत्र केचित् "नेर्गद" इत्यादौ तन्त्रेणाकारप्रश्लेषेण अयमपि निर्दिष्ट इति । प्रण्यस्यतीत्यादौ णत्वमिच्छन्ति । अस्तीति लुकि । असते असतीति शपि ॥१०१॥

यसु प्रयत्ने ॥ यस्यति । यसति । ययास । येसतुः । यसिता । यसिष्यति, यस्यतु, यसतु । अयस्यत् , अयसत् । यस्येत् ,) लिङि । अयसत् । "यसोऽनुपसर्गात्" इति श्यनो विकल्पनात्तदभावे शपि । उपसृष्टात्तु प्रयस्यतीति श्यनेव । सम्पूर्वत्वे तु "संयसश्च" इति विकल्पः संयस्यति । संयसतीत्यादि (यियसिषति । यायस्यते । यायस्ति । आयासयते,) "अणावकर्मकाच्चित्तवत्कर्तृकात्" इति परस्मैपदस्य "न पादमि" इत्यादिना निषेधः । (आयासी,) सम्पृचादिना घिनुण् । यस्त्वा, यसित्वा) । उदित्त्वादिड्विकल्पः । (यस्तः, यस्तवान्) ॥१०२॥

जसु मोक्षणे ॥ (जस्यति इत्यादि यस्यतिवत् । (अजस्रम् ,) "नमिकम्पिस्म्यजस" इति नञ्पूर्वाज्जसेरप्रत्ययः । स्वभावादयं क्रियासातत्ये । "जासिनिप्रहण" इति कर्मणि षष्ठीविधौ हिंसार्थग्रहणात् अस्य बद्धान् जासयतीति द्वितीयैव । जसि रक्षणे, जसु हिंसायाम् , जसु ताडने, इति त्रयं चुरादौ ॥ १०३ ॥

तसु उपक्षये ॥ दसु च ॥ (तस्यति । दस्यति) । इत्यादि ॥ दासितः । दस्तः,) "वा दान्त" इत्यादि पक्षे णिलुगिडभावश्च । दस्रौ) । "स्फायितञ्चि"इत्यादिना रक्। पुष्पवन्तपदादिवदयं नित्यद्विवचनान्तः । दाने दासति दासत इति शपि गतम् ॥ १०४ ॥१०५॥

वसु स्तम्भे ॥ (वस्यति, ववास, ववसतुः,) "न शसददवादि"इत्येत्वाभ्यासलोपानषेधः । (वसिता) इत्यादि । अयं दन्तोष्ठवद्वादिरित्यात्रेयादयः । तथैव दैवपुरुषकारयोः । (वस्यति स्तम्भने, वस्ते आच्छादने, वसतेर्वसेत् ,) इति । अपरे बकारादिमाहुः । 'वसिश्च सान्तेषु वसिः प्रसारणी' इत्यनिट्कारिकाव्याख्याने वृत्तौ प्रसारणीतिवचनात् वस आच्छादन इत्यस्येद्ववतीति वस्तेरेव प्रत्युदाहरणात् वृत्तिकृतोऽपि बशादित्वमभिमतं प्रतीयते । एवं हि बस्तशब्दोऽपि सिद्ध्यति । शमादय एतदन्ता उदितः, क्षाम्यति माद्यती वर्जयित्वा ॥१०६ ॥

व्युष विभागे ॥ अयं दाहे पूर्वं पठितः, उदाहृतश्च, इह तु विभागे ऽव्युषदित्यङर्थः पाठः। केचिद्सुमोष्ट्यादिं दन्त्यान्तमिच्छन्ति व्युसेति । अपरे त्वयकारं बुसेति ॥ ११७ ॥

प्लुष दाहे ॥ (प्लुष्यति) इत्यादि । इह पाठो (अप्लुषद्) इत्यङर्थः । पूर्वत्र पाठस्तु (अप्लोषीद्) इति सिजर्थः ॥ १०८ ॥

बिस प्रेरणे ॥ ओष्ठ्यादिः । (बिस्यति) इत्यादि । (बिसम्) । इगुपधलक्षणः कः । (बिस्तः) । बाहुलकादौणादिकस्तन् , अगुणत्वं च । "तितुत्र" इतीण्णिषेधः । द्वाभ्यां बिस्ताभ्यां क्रीता (द्विबिस्ता, द्वैबिस्तीकी) । "बिस्ताच्च" [बहुपूर्वाच्च वक्तव्यम्] इति द्वित्रिबहुपूर्वाद्बिस्तान्ताद् द्विगोः पयस्याहीयस्य ठञो विभाषा लुक् । "द्विगोः" इति ङीपः "अपरिमाणबिस्त" इति निषेधः । अत एव बिस्तेतिनिर्देशाद्वा निष्ठायामनिट्त्वम् । लुगभावे तु "परिमाणान्तस्य" इत्युत्तरपदवृद्धिः । "टिड्ढाणञ्" इत्यादिना ङीप् । एवं त्रिबहुपूर्वादपि द्रष्टव्यम् ॥ १०९ ॥

कुस श्लेषणे ॥ (कुस्यति) इत्यादि । (कुसितायी) । "वृषाकप्यग्नि" इत्यादिना क्तप्रत्ययान्तत्वात् ङीबुदात्तः, ऐकारोऽन्तादेशः । दुर्गस्तालव्यान्तं पपाठ, कुशशब्दस्य दर्शनात् । स तु भौवादिकादपि सिद्धः ॥ ११० ॥

बुस उत्सर्गे ॥ (बुस्यति) इत्यादि । (बुसम्) । इगुपधलक्षणः कः । यस्मिन्काले बुसं खले वर्तते स कालः (खलेबुसम्) । "तिष्ठद्गुप्रभृतीनि च" इत्यव्ययीभावसमासः । अयं प्रथमान्त एव, विभक्त्यन्तरेण न सम्बन्धत इति वृत्ता । (बुस्तम्) पूर्ववत्तङीडभावः, अर्धर्चादिषु पाठाद्वा निष्ठायामनिट्त्वम् ॥ १११ ॥

मुस खण्डने ॥ (मुस्यति) इत्यादिना । दन्त्यान्त इति सर्वे । आत्रेयस्तु कातन्त्रे मूधन्यान्तोयम् । तथा च 'राघवस्यामुषः कान्तम्' इति भट्टिकाव्ये प्रयोगश्चेति पाठान्तरमप्याह । (मुसलम्) इति, अस्मादेव औणादिकः कलप्रत्ययः इति वदतोरात्रेयमैत्रेयोरन्येषामप्यमुं सान्तं पठतां "अमिमस्योरुच्चोपधाया" इति मसेर्मुसलव्युत्पत्तिरनार्षेति मतम् । (मुसली) गृह गोधिका । गौरादि । मुसलेन वधमर्हति (मुसल्यः) दण्डादित्वाद्यत् (मुस्ता) । बाहुलकादौणादिके तनि "तितुत्र" इतीण्णिषेधः। (मुस्तकम्) संज्ञायाम् कन् अर्धर्चादिः।११२॥

मसी परिमाणे ॥ (मस्यति । ममास, मेसतुः । मसिता । मसिष्यति । मस्यतु । अमस्यत् । मस्येत् , मस्यात् । अमसत् । मिमसिषति । मामस्यते । मामस्ति । मासयति । अमीमसत् । मस्तः, मस्तवान्) । ईदित्वादनिट्त्वम् । (मस्तकम्) । "संज्ञायां कन्" । (मस्तु) । "सितनि" इति तुन् । "तितुत्र" इतीण्णिषेधः । अस्यादयो मसिपर्यन्ता दन्त्यान्ताः । अत्र क्वचित् आद्यन्तव्यत्यासेन समीति पाठः ॥ ११३ ॥

लुट विलोडने ॥ (लुट्यति । अलुटत्) इत्यादि । भूवादिपाठात् (अलोटीत्) इति सिजप्यस्ति । प्रतिवाते तु द्युतादिपाठादङप्यस्ति, (अलुटत् अलोटिष्ट) इति । लोट्यतीति कण्डवादियगन्तः ॥ ११४ ॥

उच समवाये ॥ (उच्यति । उवोच, ऊचतुः, उवोचिथ,) पिद्वचनेषु परत्वाद्गुणे, पश्चाद् द्विर्वचने "अभ्यासस्यासवर्णे" इत्युवङ् । यद्यपि द्विर्वचने गुणस्य स्थानिवत्त्वम् , तथाप्युक्तरखण्डस्य "वार्णादाङ्गं बलीय" इति सवर्णदीर्घात्पूर्वं गुणे ऽभ्यासस्योवङ् । ओचिता । ओचिष्यति । उच्यतु । औच्यत् , उच्येत् , उच्यात् ,) लिङो । (मा भवानुचिचत् । ओचिचिषति) इत्यादावपि द्विर्वचनात्पूर्वं गुणः । अत्र च ज्ञापकं "रलो व्युपधात्" इत्यत्र हलादिग्रहणेन अजादेर्गुणार्थः कित्वपर्युदासः । यदि च पूर्वं द्विर्वचनं स्याद् अधिकत्वेऽप्यनुपधात्वाद् गुणो न भविष्यतीति किं तेन । (ओचित्वा) । "न क्त्वा सेट्" इत्यकित्त्वम् । (उचितः, औचित्यम्) । ब्राह्मणादित्वात् ष्यञ् । (औचिती) । ष्यञन्तात् षित्त्वान्ङीषि "हलस्तद्धितस्य" इति यलोपः । नियमेनोच्यतीति (न्योकः) शंकुः । इगुपधलक्षणः कः ।

नियमेनास्मि शकुन्ताः समवयन्तीति (न्योजो) वृक्षः, घञर्थे कः । (ओकः) । अच् । "ओक उचः के" इति निपातनात्कुत्वम् । (उल्बम्) गुणश्च । (ओकः, ओकसी) । गृहम् । असुनि बाहुलकात्कुत्वम् । (उल्बम् । "उल्बादयश्च" इति बप्रत्ययः । चकारस्य च लकारो गुणाभावश्च निपात्यते ॥ ११५ ॥

भृशु भ्रंशु अधःपतने ॥ भृश्यति । बभर्श, बभृशतुः, बभृशुः, बभर्शिथ, बभृश, बभृशिव । भर्शिता । भर्शिष्यति । भृश्यतु । अभृशत् । भृश्येत्, भृश्यात् । अभृशत् । बिभर्शिषति । बरीभृश्यते । बरीभर्ष्टि । इत्यादि । भर्शयति । अबीभृशत, अबभर्शत्) "उद्वृद्वा" । (भृशम्) । इगुपधलक्षणः कः । अभृशो भृशो भवति (भृशायते) । "भृशादिभ्यो भुवि" इति क्यङ् । (भ्राशर्यम्, भ्रशिमा) दृढादित्वात् ष्यञिमनिचौ । (भ्रशिष्ठः, भ्रशीयान्,) "रऋतोहलादेः" इतीष्ठेमेयस्सु ऋकारस्य रशब्दः । (भ्रशयति,) "णाविष्ठवत्" इति रत्वम् । (भर्शित्वा, भृष्ट्वा) । उदित्वादिड्विकल्पः । (भृष्टः, भृष्टवान्, भ्रश्यति,) "अनिदिताम्" इति नलोपः । (बभ्रंश, बभ्रंशतुः, बभ्रंशिव । भ्रंशिष्यति । भृश्यतु । अभ्रश्यत् । भ्रश्येत्, भ्रश्यात् । अभ्रशत् । बिभ्रंशिषति । बाभ्रश्यते) । योऽपि भ्रंशि भूवादावपि तालव्योष्मान्तं पठित्वा, नीक्सूत्रेऽपि तथा पठन्ति, तेऽपि ध्वंसत्यादिसाहचर्याद्भौवादिकस्यैव नीकं कुर्वन्ति, न त्वस्य । येषां तु भूवादौ नीक्सूत्रे च दन्त्यान्तपाठः, तेषामप्यस्य नीको नैव प्रसङ्गः । बाभ्रंष्टि । भ्रंशयति । भ्रंशित्वा, भ्रष्ट्वा, भ्रष्टः) । व्रश्चादिना षत्वेऽनिट्त्वं, सर्वत्र कित्यनुनासिकलोपः ॥ ११६ ॥ ११७ ॥

वृश वरणे । (वृश्यति) इत्यादि, भृश्यतिवत् । अनुदित्त्वं विशेषः । (व्रशिष्ठः, व्रशीयान् ॥ वृशयति) इत्यत्र "र ऋत" इति रत्वं न भवति ॥

　　　　पृथुं मृदुं भृशं चैव कृशं च दृढमेव च ।
　　　　परिपूर्वं वृढं चैव षडेतान् रविधौ स्मरेत् ॥

इति परिगणनात् ॥ ११७ ॥

कृश तनूकरणे ॥ (कृश्यति) इत्यादि भृशिवत् । अस्याप्यनुदितत्वं विशेषः ॥ (कृशः) । "अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः" इति निष्ठायां निपातितः । सोपर्गत्वे तु (प्रकृशितः परिकृशि) । प्रादिसमासः । (क्रशिमा । क्रशिष्टः। क्रशीयान्। क्रशयति)। भृशिवद् रत्वं इमनिच। (कृशित्वा, कर्शित्वा) । "तृषिमृषिकृशेः काश्यपस्य" इति वा कित्वम् । (कृशानुः । "ऋतन्यञ्जि" इत्यादिना नुक् ॥ ११९ ॥

ञितृष् पिपासायाम् ॥ (तृष्यति) इत्यादि । (तृषित्वा, तर्षित्वा) । "तृषिमृषि" इत्यादिना वा कित्वम्, (तृष्णक्) "स्वपितृषोर्नजिङ्" इति नजिङ् । द्व्यहतर्षं गाः पाययति द्व्यहतर्षमिति वा । अद्य पाययित्वा, द्व्यहमतिक्रम्य पाययतीत्यर्थः । "अस्यतितृषोः" इति णमुल् । "सिभ्यः कित्" इति नप्रत्ययः । ञित्त्वं वर्तमाने क्तार्थम् । तृषितमस्य सञ्जातं (तृषितः,) अर्शआदिः ॥ १२० ॥

हृष तुष्टौ ॥ (हृष्यति) इत्यादि । श्यनङौ वर्जयित्वा भौवादिकवत् । अयमुदिदिति नन्दीति स्वामी । तद्वृत्त्यादिविरोधादुपेक्ष्यम् । यदाह 'हृषेर्लोमसु' इत्यत्र 'हृषु अलीक' इत्ययं निष्ठायामनिट्, हृष तुष्टावित्ययं सेट्, अनयोरुभयोरिदं ग्रहणमित्युभयत्र विभाषेयम्" इति । अत्रैव न्याये 'हृषु अलीक'इत्ययमनिडिति । "उदितो वा" इति क्त्वाप्रत्यय इड्विकल्पविधानात् "यस्य विभाषा" इति निष्ठायामनिट्, हृष तुष्टावित्ययं सेट्" इति । वर्धमानोऽप्येवमाह ॥ १२१ ॥

रुष रोषे ॥ (देवदत्ताय रुष्यति) । "क्रुधद्रुह" इति कोपविषयस्संप्रदानम् ॥ (रुरोष, रुरोषिथ, रुरुषिव । रोष्टा, रोषिता । रोषिष्यति । रुष्यतु । अरुष्यत् । रुष्येत्, रुष्यात् । अरुषत् । रुरुषिषति । रुषित्वा, रोषित्वा, रुष्ट्वा,) "रलो व्युपधात्" इति सेटः क्त्वासनोः कि-

स्त्वविकल्पः। "तीषसह" इति तादाविड्विकल्पः। (रुषितः, रुष्टः) "रुष्यमत्वर" इति निष्ठायामिड्विकल्पः। भावादिकर्मणोर्निष्ठायास्सेटः "उदुपधात्" इति क्त्वविकल्पो भौवादिकानामेवेति प्रागेवोक्तत्वादस्य न भवति। इह के चित् रिष हिंसायां चेति पठन्ति। 'न रिष्यति न व्यथते' इत्यादयश्च प्रयोगा दृश्यन्ते। आत्रेयमैत्रेयादयस्तु न पेठुः॥ १२२॥

डिप क्षेपे॥ (डिप्यति। डिडेप, डिडेपिथ, डिडिपिव। डेपिता। डेपिष्यति। डिप्यतु। अडिप्यत्। डिप्येत्। डिप्यात्। अडिपत्। डिडेपिषति। डिडिपिषति। डिपित्वा, डेपित्वा। अडिपत्। डेपयति। अडीडिपत्)। अयं तुदादौ। चुरादौ तु सङ्घाते च। इह कचित् 'ष्टू समुच्छ्राये' इति पठ्यते, तदनार्षम्। "स्त्यः प्रसारणमुच्च" इति स्त्यायतेः पप्रत्यये पकारस्य उकारे सम्प्रसारणे दीर्घे स्तूपशब्दव्युत्पादनात्। अत एवात्रेयमैत्रेयादयो न पठन्ति॥ १२३॥

कुप क्रोधे॥ (कुप्यति) इत्यादि रुष्यतिवत्। इट् तु सर्वत्र नित्यः। (देवदत्ताय कुप्यति)। "क्रुधद्रुह" इति। कोपविषयस्य सम्प्रदानत्वम्। (कुप्रमरण्यम्)। "ऋजेन्द्र" इत्यादौ निपातितः॥ अयं भाषार्थश्चुरादौ॥ १२४॥

गुप व्याकुलत्वे॥ (गुप्यति) इत्यादि। (गोपायति)। जुगुप्सत इति शपि। गोपायतीति चुरादौ॥ १२५॥

युप रुप लुप विमोहने॥ युप्यति। रुप्यति। लुप्यति,) अनिट्कारिकायां तौदादिकेन लिपिना साहचर्यात्तौदादिकस्य लुप्लृ छेदन इत्यस्यैव ग्रहणादयं सेडेव॥ १२८॥

लुभ गार्ध्ये॥ गार्ध्यमाकाङ्क्षा। (लुभ्यति। लुलोभ, लुलोभिथ। लोभिता, लोब्धा, लोभिष्यति। लुभ्यतु। अलुभ्यत्। लुभ्येत्, लुभ्यात्। अलुभत्। लुलुभिषति। लुलोभिष लोलुभ्यते। लुलोब्धि। लोभयति। अलूलुभत्। लुभित्वा, लोभित्वा, लुब्ध्वा। लुब्धः)। तादौ "तीषसह" इतीड्विकल्पः। सेटोः क्त्वासनोः "रलोव्युपधात्" इति कित्वविकल्पः। "यस्य विभाषा" इति निष्ठायां नेट्। 'लुभो विमोहने' इति क्त्वानिष्ठयोर्नित्यं सेट्त्वं विमोहनार्थस्य तौदादिकस्यैव। भूवादेरवृत्करणत्वाल्लोभत इति भवतीत्यात्रेयः॥ १२९॥

क्षुभ सञ्चलने॥ (क्षुभ्यति। चुक्षोभ। क्षोभिता) इत्यादि। श्यन्भाविभक्तारान्तानुरोधादस्येह पाठः। अङ् तु द्युतादित्वादपि सिद्धः। न चाक्षोभीदिति सिज्निवृत्त्यर्थं उपपद्यते क्रैयादिकेनावश्यं तस्य रूपस्य भावित्वात्॥ १३०॥

णभ तुभ हिंसायाम्॥ (नभ्यति, प्रणभ्यति। ननाभ, नेभतुः, नेभिथ। नेभिव। नभिता। तुभ्यति। तुतोभ)। अनयोरपीह पाठः क्षुभेरिव। इमावपि द्युतादौ क्र्यादौ च पठ्यते॥ १३१॥ १३२॥

क्लिदू आर्द्रीभावे॥ (क्लिद्यति, चिक्लेद, चिक्लेदिथ, चिक्लेत्थ, चिक्लिदिव, चिक्लिद्व। क्लेदिता, क्लेत्ता। क्लेदिष्यति, क्लेत्स्यति। क्लिद्यतु। अक्लिद्यत्। क्लिद्येत्। क्लिद्यात्। अक्लिदत्। चिक्लिदिषति। चिक्लित्सति। क्लेदित्वा, क्लिदित्वा। क्लिन्नः। चेक्लिद्यते। चेक्लेत्ति। क्लेदयति। अचिक्लिदत्। चिक्लिदम्)। इगुपधलक्षणे के, 'क्नादीनां के द्वे भवतः' इति के द्वित्वम्। (क्लेदा, क्लेदानौ)। "क्लेदौषधिशशाङ्कयोः" इति निघण्टुः। "श्वन्नुक्षन्" इति कनिनि निपात्यत इति भूवादावुक्तम्। ऊदित्त्वाद्वलादाविड्विकल्पः॥ १३३॥

ञिमिदा स्नेहने॥ (मेद्यति। मिमेद, मेदिथ। मेदिता। मेदिष्यति। मेद्यतु। अमेद्यत्। मेद्येत्, मिद्यात्। अमिदत्)। "मिदेर्गुणः" इति श्यनि गुणः। (मिमिदिषति, मिमेदिषति। मिदित्वा, मेदित्वा। मिन्नः। मिन्नवान्)। "आदितश्च" इतीण्णिषेधः। "ञितः क्तः" इति वर्तमाने क्तः। मिन्नमस्य, मेदितमस्य, (प्रमिन्नः, प्रमेदितः)। "विभाषाभावादिकर्मणोः" इतीड्विकल्पः "निष्ठाशीङ्" इत्यादिना सेटो निष्ठायाः कित्वनिषेधः। द्युतादिपाठादेव अ-

मिदत् अमेदिष्टेति सिद्धे पुषादिपाठोऽमेदीदिति निवृत्त्यर्थः । एवं तर्हि द्युतादौ पाठे प्रयोजनं चिन्त्यम्। अनेनामिददिति भविष्यति। द्युतादेरन्यत्रात्मनेपदिषु पाठादमेदिष्टेति च' "निष्ठा-शीङ्" इत्यत्र च हरदत्तः । "ञिष्विदा स्नेहनमोचनयोः" इति दैवादिकस्य ग्रहणम् , न तु 'ञिष्विदा अव्यक्ते शब्दे' इति भौवादिकस्य, मिदिना साहचर्यात्" इति । एवं वदतोऽस्य मिदेर्भूवादौ पाठो नास्तीति प्रतीयते । धातुपाठव्याख्यानेषूभयत्र विगीतं पठन्ति ॥ १३४ ॥

ञिक्ष्विदा स्नेहनमोचनयोः ॥ (क्ष्विदति । चिक्ष्वेद । क्ष्वेदिता) इत्यादि मिदिवत् । क्ष्वेदतीत्यव्यक्तशब्दे शपि ॥ १३५ ॥

ऋधु वृद्धौ ॥ (ऋध्यति । आनर्ध, आनृधतुः, आनर्धिथ, आनृधिव) । "अत आदेः" इत्यभ्यासादेर्दीर्घः । "तस्मान्नुड् द्विहलः" इति नुडागमः । किद्वचनेषु गुणाभावेऽपि ऋकारस्थरश्रुत्याश्रयणेन द्विहल्त्वम् । (अर्धिता । अर्धिष्यति । ऋध्यतु । आर्ध्यत् । ऋध्येत् । ऋध्यात् । मा भवानृधत् । अर्दिधिषति, इर्त्सति,) । "सनीवन्त" इतीड्विकल्पः । तत्रेटि गुणेऽजादित्वात् "नन्द्राः" इति रेफवर्जितस्य द्वितीयस्यैकाचो द्विर्वचनम् । अनिटि तु "आप्ज्ञप्यृधाम्" इतीत्वे रपरत्वे "अत्र लोप" इत्यभ्यासलोपः । "खरि च" इति चर्त्वं धकारस्य । (अर्धयति आर्दिधत्) । णिलोपस्य स्थानिवत्त्वाद्धिशब्दस्य द्विर्वचनम् (ऋद्ध्वा, अर्धित्वा) उदित्त्वादिड्विकल्पः । "न क्त्वा सेट्" इत्यकित्त्वम् । (ऋद्धः । ऋध्यम्) । "ऋदुपधात्" इति क्यप् । अयं स्वादौ च ॥ १३६ ॥

गृधु अभिकांक्षायाम् ॥ (गृध्यति । जगर्ध, जगृधतुः, जगर्धिथ, जगृधिव । गर्धिता । गर्धिष्यति । गृध्यतु । अगृध्यत् । गृध्येत्, गृध्यात् । अगृधत् । जिगर्धिषति। जरीगृध्यते । जर्गर्धि) इत्यादि । (माणवकं गर्धयते, वञ्चयतीत्यर्थः । "गृधिवञ्च्योः प्रलम्भने" इत्यकर्त्रभिप्रायेऽपि तङ् । अन्यत्र श्वानं गर्धयति गर्धयत इति वा, गर्धमस्योत्पादयतीत्यर्थः । (गृध्नुः) "त्रसिगृधि" इति क्नुः । (गर्धनः) । "जुचङ्क्रम्य" इति युच् । (गर्धित्वा, गृद्ध्वा) । उदित्वादिड्विकल्पः । (गृद्धः । गृध्रः) । "सुसूधाञ्गृधिभ्यः क्रन्" इति क्रन् ॥ १३७ ॥

वृत् ॥ दिवादयः पुषादयश्च वृत्ता इत्यात्रेयमैत्रेयादयः । अन्ये तु पुषादेस्समाप्त्यर्थं वृत्करणम् । दिवादयस्त्वपरिसमाप्ता इत्याहुः । तेन क्षीयते मृग्यतइत्यादिसिद्धिरिति ॥ शमादय उदात्ता उदात्तेतः ॥

इति पूर्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसङ्गमराजमहामन्त्रिणा मायणसुतेन माधवसहोदरेण सायणाचार्येण विरचितायां माधवीयायां धातुवृत्तौ दिवादयस्सम्पूर्णाः।

अथ स्वादयः ॥

षुञ् अभिषवे ॥ आवृञ एतदादयो ऽनुदात्ता उभयतोभाषाः ॥ अभिषवः स्नपनपीडनस्नानसुरासंधानादिः । तत्र स्नानेऽयमकर्मकः । (सुनोति । सुनुतः । सुन्वन्ति । सुनोषि । सुनोमि । सुन्वः । सुनुवः) । "स्वादिभ्यः श्नुः" । शपोऽपवादः । "हुश्नुवोस्सार्वधातुके" इत्यजादावगुणविषये श्नोरुकारस्य यण् । "लोपश्चास्यान्यतरस्यां म्वोः" इति वकारमकारादावसंयोगपूर्वत्वात्पक्षे उकारलोपः । सुनोमीत्यत्र परत्वाद्गुणे उकाराभावन्नायं लोपः । (अभिषुणाति) "उपसर्गात्सुनोति"इति षत्वं, (सुषाव । सुषुवतुः । सुषोथ । सुषविथ । सुषुवथुः । सुषुव । सुषाव । सुषव । सुषुविव) । क्रादिनियमादिट् । थलि तु भारद्वाजनियमाद्विकल्पः । उवङ् अगुणवृद्धिविषये । (अभिसुषाव) । "स्थादिष्वभ्यासेन" इति नियमादभ्यासस्य न षत्वं, प्रकृतेस्तु "आदेशप्रत्यययोः" इति षत्वं, (सोता । सोष्यति । अभिसोष्यति) इत्यत्र "सुनोतेः स्यसनोः" इति "उपसर्गात्"इति षत्वं निषिध्यते । (सुनोतु । सुनु-

तात्) तातङो ङित्वान्न गुणः। (सुनुतां, सुन्वन्तु, सुनु) "उतश्च प्रत्ययादसंयोगपूर्वात्" इति हेर्लुक्। (सुनुताम्, सुनुत। सुनवानि)। आटि पित्त्वादङित्त्वात् यणं बाधित्वा गुणः। (असुनोत्। असुनुताम्। असुन्वन्। असुनोः। असुनवम्। असुन्व। असुनुव)। पूर्ववदुकारलोपः, पक्षे (अभ्यषुणोत्)।"प्राक्सितादड्व्यवायेऽपि" इति षत्वम्। (सुनुयात्। सुनुयाताम्। सुनुयुः)। "जुसि च" इति गुणः "सार्वधातुकमपित्" इति ङित्वाश्रयं प्रतिषेधं येन नाप्राप्तिन्यायेन बाधते, न तु यासुटो ङित्वाश्रयमपीति नात्र गुणः (सुनुयाः। सुनुयाम्)। आशिषि। (सूयात्। सूयास्ताम्)। "अकृत्सार्वधातुकयोः" इति दीर्घः। (असावीत्। असाविष्टाम्। असावीः। असाविषम्)। "स्तुसुधूञ्भ्यः" इति परस्मैपदेषु सिच इट्। (सुनुते। सुन्वाते। सुन्वते। सुनुषे। सुन्वे। सुन्वहे। सुनुवहे)। पूर्ववद्यणुकारलोपौ। (सुषुवे। सुषुविषे। सुषुविढ्वे। सुषुविध्वे)। "विभाषेटः"। (सुषुवे। सुषुविवहे। सुषुविमहे। सोता। सोष्यते। सुनुताम्। सुन्वाताम्। सुन्वतां, सुनुष्व। सुनवै। सुनवावहै। असुनुत। असुन्वाताम्। असुन्वत। असुनुथाः। असुन्वि। असुन्वहि। असुनुवहि। सुन्वीत। सुन्वीयाताम्)। आशिषि। (सोषीष्ट। सोषीयास्ताम्। सोषीढ्वम्)। "इणः षीध्वम्" इति मूर्धन्यः। (असोष्ट। असोषाताम्। असोष्ठाः। असोषि। सुसूषति, सुसूषते)। "स्तौतिण्योरेव" इति नियमान्न षत्वम्, (अभिसुसूषति) इत्यत्र "उपसर्गात्" इत्यभ्यासस्य षत्वं "स्थादि" नियमेन बाध्यते। एवं तर्हि "सुनोतेः स्यसनोः" इति सनि षत्वनिषेधस्य किमुदाहरणम्। इदं सुसूषतेरप्रत्ययः, अतो लोपः, (सुसूः) इति। अत्र हि सनः षत्वस्यासिद्धत्वात्सस्य रुत्वे विसर्जनीये कृतषत्वस्य सनोऽभावात् "स्तौतिण्योरेव" इति न प्रवर्त्तते। एकदेशविकृतन्यायेनास्ति सन्परत्वमिति "सुनोतेः स्यसनोः" इति निषेधस्तु प्रवर्त्तते। (सोषूयते। सोषुवीति)। (सोषोति। सोषुतः)। "उपसर्गात् इति षत्वम्। "सुनोतेःस्यसनोः" इति निषेधस्तु श्तिपा निर्देशान्न प्रवर्त्तते। (अभिसोषोति, सोषवीति)। यङ्लुगन्तात्सनीटि गुणावादेशयोरभाविप्रत्यये अतोलोपे पूर्ववत् षत्वस्यासि(१)द्धत्वादूगुणे "वोरुपधाया दीर्घ" इति दीर्घः। (सावयति। असूषुवत्। सुषावयिषति)। ण्यन्तात्सनि "स्तौति" इति षत्वं, (सुन्वन्, सुन्वानः)। "लटः शतृशानचौ"। (राजसूयः)। कर्मण्यधिकरणे वा "राजसूय" इति क्यपि निपात्यते। (आसाव्यम्)। "आसुयुवपि"इति ण्यति वृद्धौ "धातोस्तन्निमित्तस्यैव"इत्यावादेशः। सोमं सुतवान् (सोमसुत्)। "सोमे सुञः" इति भूते क्विप्। (सुत्वा। सुत्वानौ) "सुयजोर्ङ्वनिप्" इति भूते ङ्वनिप्। स्त्रियां (सुत्वरी) "वनो र च" इति ङीब्रेफौ। (सुन्वन्, सुन्वन्तौ)। "सुञो यज्ञसंयोगे"इति शता। अयमलडादेशः, यजमान उच्यते। (सुत्या)। "संज्ञायां समज" इत्यादिना स्त्रियां क्यप्। आसुतीवलो यज्वा। शौण्डिकश्च। क्तिन्नन्तात् "रजःकृष्यसुति"इति मत्वर्थीये वलचि "वल" इति दीर्घः। (सुरा)। "सुसूधागृधिभ्यः क्रन्"इतिक्रन् सुरको ऽहिविशेषः। स्थूलादिषु 'सुराया अहावि' इति पाठात्कनि "केऽणः" इति ह्रस्वः॥१॥

षिञ् बन्धने॥ (सिनोति। सिनोषि। सिनोमि। सिन्वः। सिनुवः। सिषाय। सिष्यतुः। सिषयिथ। सिषेथ। सिष्य। सिषाय। सिष्यतु। सिषयिथ। सिषेथ। सिष्व। सिषाय। सिषय। सिष्यिव। अत्रागुणवृद्धिविषये अजादौ "एरनेकाच" इति यण्। (सेता। सेष्यति। सिनोतु। सिनु। सिनवानि। असिनोत्। सिनुयात्)। आशिषि (सीयात्। असैषीत्। असैष्टाम्। सिनुते। सिनुषे। सिन्वे। सिन्वहे। सिनुवहे। सिष्ये। सिष्यिषे। सिष्यिवहे। सेता। सेष्यते। सिनुताम्, सिनुष्व, सिनवै। असिनुत। असिनुथाः। असिन्वि। असिन्वहि। असिनुवहि। सिन्वीत। सेषीष्ट। असेष्ट।

(१) सत्वात् इत्यधिकं पुस्तकान्तरे।

असेषाताम् । सिसीषति । सिसीषते । सेषीयते । सेषयीति । सेषेति । साययति । असीषयत् । सितः । सितवान्) । (सिनो ग्रासः स्वयमेव) । "सिनोतेर्ग्रासकर्मकर्तृकस्य" इति वक्तव्येन निष्ठानत्वम् । यदा बध्यमानः पिण्डीक्रियमाणो ग्रासो दध्यादिवशेन तत्रानुकूल्यं प्रतिपद्यते तदा कर्मणः कर्तृत्वविवक्षायामयं प्रयोग इति न्यासपदमञ्जर्यादौ । अनेकार्थत्वाद्धातोर्भक्षणमर्थ इत्यात्रेयः । केशेषु प्रसितः केशैरिति वा, "प्रसितोत्सुकाभ्यां तृतीया च" इति तृतीयासप्तम्यौ । (सयः) । अच् । (परिषितः । परिषयः) । "परिनिविभ्यः" इत्यादिना सितसयशब्दयोः षत्वम् । एवं निविभ्यामपि । (सेरुः) । "दाधेट्सि" इति रुः । (सेत्रं,) "दाम्नी"इत्यादिना ष्ट्रन् । (सितो वर्णः) "अञ्जिघृसिभ्यः क्तः" इति संज्ञायां क्तः । (सितिमा, सैत्यं,) "वर्णदृढादिभ्यः ष्यञ्च" इति ष्यञिमनिचौ भावकर्म्मणोः । (सिता) शर्करा । न सिता । (असिता) । असितेत्यत्र "वर्णादनुदात्तात्" इति ङीबनुक्तयोः [असितपलितयोः प्रतिषेधः] इति निषेधः । "छन्दसि क्नमेके" [भाषायामपीष्यते] इत्यसिक्नीति क्नादेशङीपावपि पक्षे भवतः । (सेतुः) । "सितनिगमिमसिसच्यविधाञ्कुशिभ्यस्तुन्" इति तुन् । (सीरो) लाङ्गलम् । "शुषिचिमि दीर्घश्च" इति क्रनि दीर्घः । सीरस्येदं तद्वहतीति वा (सैरिकः) । "हलसीराट्ठक्" इति तस्येदं विषये तद्वहति विषये च ठक् ॥ अयं क्र्यादावपि सिनाति सिनीत इति ॥ २ ॥

शिञ् निशाने ॥ तालव्यादिरयम् ॥ निशानं तीक्ष्णीकरणम् । (शिनोति । शिनुते । शिशाय । शिश्ये । शेता । शेष्यति) इत्यादि पूर्ववत् ॥ ३ ॥

डुमिञ् प्रक्षेपणे । (मिनोति । मिनुते । ममौ । मिम्यतुः । मिम्युः । ममाथ । ममिथ । मिम्यथुः । मिम्य । ममौ । मिम्यिव । मिम्यम) । "मीनातिमिनोतिदीङां ल्यपि च" इत्येज्विषये ल्यपि च प्रागेव प्रत्ययोत्पत्तेरात्वं, तस्य चानैमित्तकत्वान्न "द्विर्वचनेऽचि" इति स्थानिवत्त्वं, थलीट्पक्षे "आतो लोप इटि च" इत्याल्लोपः । (मिम्ये । मिम्यिषे । मिम्यिवहे । माता । मास्यति । मास्यते । मिनोतु । मिनु । मिनवानि । मिनुताम् । मिनुष्व । मिनवै । अमिनोत् । अमिनुतम् । मिनुयात् । मिन्वीत) । आशिषि (मीयात् । मासीष्ट) । यासुटि कित्त्वान्नात्वम् । "अकृत्सार्वधातुकयोः" इति दीर्घः । (अमासीत् । अमासिष्टाम्) । आत्वे "यमरमनमाताम्" इति सगिटौ परस्मैपदे । अन्यत्र (अमास्त । अमासाताम् । मित्सति । मित्सते) । "इको झल्" इति सनः कित्त्वात् "अज्झनगमां सनि" इति दीर्घे "सनिमिमा" इतीसादेशे "सस्यार्द्धधातुके" इति सस्य तत्वे "अत्र लोपोऽभ्यासस्य" इत्यभ्यासलोपः (मेमीयते । मेमेति । मेमयीति) । "मिनोति" इति श्तिपा निर्देशान्नात्वम् । (मापयति । अमीमपत् ।) आत्वे पुक् । (प्रमाप्य) । "ल्यपि च" इत्यात्वम् । (प्रमयः । इषत्प्रमयः) । [निमिमीलियां खलचोः प्रतिषेधः] इत्यात्वप्रतिषेधः । (मित्रिमम्) । "ड्वितः क्त्रिः" । "क्त्रेर्मम्नित्यम्" (मोरः) "शुषिचिमिजां दीर्घश्च" इति क्रन्दीर्घौ । मयते इति शपि प्रणिदाने । मातीति लुकि माने । मिमीते इति च श्लौ माने शब्दे च । मीयत इति श्यनि ॥ ४ ॥

चिञ् चयने ॥ (चिनोति । चिनुते । चिकाय । चिक्यतुः । चिकेथ । चिकयिथ । चिक्यिव) । "विभाषा चेः" इति सन्लिटोः परयोरभ्यासात्परस्य वा कुत्वम् । अन्यदा (चिचाय) इत्यादि । (चिक्ये । चिच्ये) इत्यादि । (चेष्यति । चेष्यते । चिनोतु । चिनुताम् । अचिनोत् । अचिनुत । चिनुयात् । चिन्वीत) । आशिषि (चीयात् । चेषीष्ट । अचैषीत् । अचेष्ट । चिचीषति । चिकीषति) । लिटि च कुत्वविकल्पः । (चेचेति । चाययति । चापयति) । "चिस्फुरोर्णौ" इत्यात्वपक्षे पुक् । (प्रणिचिनोति) । "नेर्गद" इति णत्वम् । (निकाय्यः) । "पाय्यसान्नाय्य" इत्यादिना निवासे ण्यदायादेशावादिकत्वं च निपात्यते । (संचाय्यः) क्रतुः । (परिचाय्यो) अग्निः, (उपचाय्यश्च) । "क्रतौ कुण्डपाय्यसञ्चाय्यौ" "अग्नौ

परिचाय्योपचाय्यसमूह्याः" इति ण्यदायादेशयोर्निपात्यते। निवासादिभ्योऽन्यत्र यति (चेयम्) इत्यादि। (चित्यो) अग्निः। (अग्निचित्या) वर्त्तते। "चित्याग्निचित्ये च" इति कर्मणि भावे च यथाक्रमं निपात्येते। तत्राद्यस्य यति तुक्, अन्यस्य ये तुक्, तेनान्तोदात्तत्वं भवति। अयं स्वभावात्स्त्रीलिङ्गः। (अग्निचित्)। "अग्नौ चेः" इति कर्मण्युपपदे भूते क्विप्। श्येनश्चीयते (श्येनचित्)। श्येनशब्दस्तत्सदृशेष्टकाचये उपचारेण वर्त्तते। "कर्मण्याग्न्याख्यायाम्" इति कर्मण्युपपदे तस्मिन्नेवार्थे ऽग्न्याख्यायां त्रैकालिकः क्विप्। आख्याग्रहणं रूढ्यर्थं, श्येनाग्न्यर्थं इष्टकाचयः श्येनचिच्छब्देनोच्यते। (निश्चयः)। "ग्रहवृदृनिश्चिगमश्च" इति निश्चेरप्। अचोऽपवादः। (एकस्तन्दुलनिचायः) इत्यत्र "परिमाणाख्यायां सर्वेभ्य" इति घञ्। कथमेकोऽपि तव निश्चय इति, पदसंस्कारेणेति भागवृत्तिः। (पुष्पप्रचायः)। "हस्तादाने चेरस्तेयः" इति घञ्। हस्तादानग्रहणेन प्रत्यासत्तिर्लक्ष्यते। अन्यत्र वृक्षशिखरे (फलप्रचयं) करोतीति अजेव। 'अस्तेय' इति वचनाच्चौर्ये प्रत्यासत्तावप्येरजेव चौर्येण (पुष्पप्रचयः) इति। निचीयन्तेऽस्मिन्निति (निकायः)। ग्रामगृहादिः। आचीयन्तेऽस्मिन्निष्टका इति (आकायोऽग्निः)। चीयन्तेऽस्मिन्नस्थ्यादीनीति (कायः) शरीरम्। गोमयानामेकत्र राशीकरणं (गोमयनिकायः)। "निवासचितिशरीरोपसमाधानेष्वादेश्च कः" इति घञादिकत्वं च। निवसन्त्यस्मिन्निति (निवासः)। चीयतेऽसौ (चितिः) शरीरं, पाण्यादिसमुदायः। उपसमाधानं राशीकरणम्, असौ धात्वर्थः, अन्यानि प्रत्ययार्थस्य कारकस्योपाधिभूतानि। इष्टकनिचय इत्यत्र च ग्रहण (१)मात्रं विवक्षितं नोपसमाधानमित्यजेव भवति। (भिक्षुनिकायः,) "संघे चानौत्तराधर्ये" इति घञ्, आदिकत्वं च, प्राणिनां समूहः संघः, स च द्वेधा भवति एकधर्मसमावेशेन औत्तराधर्येण च, तत्रानौत्तराधर्यइति पर्युदासादितरो गृह्यत इत्यौत्तराधर्येऽजेव, (सूकरनिचय) इति संघस्य प्राणिसमुदायलक्षणत्वात्। प्रमाणाप्रमाणसमुच्चय इत्यत्राप्यजेव।) चितिः)। क्तिन् (द्विचितीकः)। "शेषाद्विभाषा" इति कप्। "चितेः कपि" इति पूर्वपदस्य दीर्घः, आचितं सम्भवत्यवहरति पचति वा (अचितीनः। आचितिकः)। "आढकाचितपात्रात् खोऽन्यतरस्याम्" इति खठञौ। (द्व्याचितिकः, द्व्याचितः, द्व्याचितीनः,)। "द्विगोष्ठंश्च" इति सम्भवत्यादिषु ष्ठन्, चकारात् खः। षकारो ङीषर्थः। अन्यतरस्यां ग्रहणानुवृत्त्या च "अध्यर्द्धपूर्वाद्विगोः" इत्यस्य लुक्। "द्विगोः"इति ङीषो "परिमाणबिस्त" इति निषेधः। ष्ठन्खयोर्विधानसामर्थ्यान्न लुक्। शाकटो भार (आचिकः। चित्रम्)। औणादिकः क्रः। (चित्रीयते)। "नमोवरिवश्चित्रङः क्यच्" इति क्यच्। चित्रङ् आश्चर्यं इति वृत्तिः। ङित्वात्तङ्॥ ८॥

स्तृञ् आच्छादने॥ (स्तृणोति। स्तृणुतः। स्तृण्वन्ति। स्तृणोषि। स्तृणोमि। स्तृण्वः। स्तृणुवः। स्तृणुते। स्तृणुषे। स्तृण्वे। तस्तार। तस्तरतुः। तस्तरुः। तस्तर्थ। तस्तर। तस्तार। तस्तरिव। तस्तरे। तस्तराते। तस्तरिषे। तस्तरिढ्वे। तस्तरिध्वे। तस्तरे। तस्तरिवहे)। क्रादिनियमादिट्। थलि "अचस्तास्वत्" इति निषेध ऋकारान्तत्वान्नित्यम्। "ऋतश्च संयोगादेर्गुणः" इति लिटि गुणः। वृद्धिविषये तु पूर्वविप्रतिषेधेन वृद्ध्येव। कृते वा गुणे "अत उपधायाः" इति वृद्धिः। (स्तर्ता। स्तरिष्यति। स्तरिष्यते)। "ऋद्धनोः स्ये" इतीट्, (स्तृणोतु। स्तृणु। स्तृणवानि। स्तृणुताम्। स्तृणुष्व। स्तृणवै। अस्तृणोत्। अस्तृणुत। स्तृणुयात्। स्तृण्वीत)। आशिषि (स्तर्यात्)। संयोगाद्यृकारान्तधातुत्वात् "गुणोर्तिसंयोगाद्योः" इति शयकोर्यकारादावसार्वधातुके लिङि च गुणः। शस्त्वस्य न सम्भवति। (स्तृषीष्ट। स्तरिषीष्ट)। "लिङ्सिचोरात्मनेपदेषु" इत्यधिकृत्य "ऋतश्च संयोगादेः" इतीड्विकल्पः। तत्रेडभावे "उश्च" इति लिङ्सिचोः कित्वान्न गुणः। (अस्तारीत्। अस्ता-

(१) बहुलमात्रमिति पुस्तकान्तरे पाठः।

ष्टाम् । अस्तृत । अस्तृषाताम् । अस्तरिष्ट । अस्तरिषाताम्) । लिङ्सिचोरिड्विकल्पः, झलादावगुणत्वं च । (तिस्तीर्षति) । "इको झल्" इति सनः कित्वात् "अज्झन"इति दीर्घः । "ऋत इद्धातोः"इतीत्वे रपरत्वे "हलि च"इतीक उपधाया दीर्घः । (तास्तर्यते) । "यङि च"इति संयोगाद्यृकारान्तत्वेन गुणः । (तास्तर्ति । तास्तरीति) । रिग्रीकोरप्युदाहार्यें । 'स्तुपिसुतिस्तृसस्त्यासेकसस्वजम्' इत्यषोपदेशत्वादनादेशत्वान्न षत्वम् । (स्तारयति । अतिस्तरत्) । "अत्स्मृदृत्वर" इत्यत्र दीर्घान्तपाठाभावान्नास्याद्भावः । (स्तृत्वा । स्तृतः) । दीर्घान्तः क्र्यादिः ॥ ६ ॥

कृञ् हिंसायाम् ॥ (कृणोति । कृणुते । चकार । चक्रतुः । चकर्थ । चक्र । चकार । चकर । चकृव) । क्रादिसूत्रे कृग्रहणेनायमपि गृह्यतइतीण्निषेधः । (चक्रे । चक्राते । चकृषे । चकृढ्वे । चक्रे । चकृवहे) । अगुणवृद्धिविषये अजादौ यणादेशः । (कर्त्ता । करिष्यति । करिष्यते । कृणोतु । कृणुताम् । अकृणोत् । अकृणुत । कृणुयात् । कृण्वीत) । आशिषि (क्रियात्) । "रीङ् ऋतः" "रिङ् शय" इति रिङादेशः । (कृषीष्ट । अकार्षीत् । अकार्ष्टाम् । अकृत । अकृषाताम्) । आत्मनेपदे लिङ्सिचोः "उश्च" इति कित्वान्न गुणः । (चिकीर्षति) । स्तृञ्वत्सनः कित्त्वे दीर्घः । (चेक्रीयते) । "अकृत्सार्वधातुकयोः" इति वर्तमाने "च्वौ च" इति च "रीङ् ऋत" इति रीङ् । (चरीकर्ति) इत्यादि (कारयति । अचीकरत) सर्वत्र कृग्रहणेषु कृञग्रहणेषु च करोतिरेव वृत्तिकारादिभिरङ्गीकृत इत्ययं नोदाह्रीयते, क्रादिसूत्रे तु कृग्रहणेनास्यापि ग्रहोऽङ्गीकृत आत्रेयादिभिः । कारा बन्धने इति भिदादौ पठ्यते । तत्रास्मादङित्यात्रेयः । न्यासकारस्तु करोतेः ॥ ७ ॥

वृञ् वरणे ॥ उदात्तः (वृणोति । वृणुते । ववार । वव्रतुः । ववरिथ । वव्र । ववार । ववर । ववृव । वव्रे । ववृषे । ववृढ्वे । ववृवहे) । क्रादिपाठादनिट्त्वम् । थलि तु "बभूथाततन्थजगृम्भववर्थेति निगमे" इति निगमे इडभावस्य निपातनाद्भाषायामिडागमः । (वरिता । वरीता । वरिष्यति । वरीष्यति । वरिष्यते । वरीष्यते) "वृतो वा" इत्यलिटीटो वा दीर्घः । (वृणोतु । वृणुताम् । अवृणोत् । अवृणुत । वृणुयात् । वृण्वीत । आशिषि (व्रियात्) । "रिङ् शय" इति रिङादेशः । रीङि प्रकृते रिङ्विधानसामर्थ्यात् "अकृत्सार्वधातुकयोः" इति दीर्घाभावः । (वृषीष्ट । वरिषीष्ट) । "वृत" इत्यधिकारे "लिङ्सिचोरात्मनेपदेषु"इति वा इडागमः । "वृत" इति दीर्घस्य "न लिङि" इति निषेधः । इडभावे "उश्च" इति लिङ्सिचोः कित्वान्न गुणः । (अवारीत् । अवारिष्टाम् । "वृतो वा" इति दीर्घस्य "सिचि च परस्मैपदेषु" इति निषेधः । (अवृत । अवृषाताम् । अवरिष्ट । अवरीष्ट । अवरिषाताम् , अवरीषाताम्) "लिङ्सिचोः"इतीट्पक्षे "वृत" इति वा दीर्घः । ध्वम्यनिट्पक्षे नित्यो मूर्द्धन्यः, इटि तु विकल्पेन दीर्घश्च वेति पञ्च रूपाणि । (अवृढ्ढ्वम् , अवरिढ्ध्वम् , अवरीध्वम् , अवरिढ्वम् , अवरीढ्वम्) इति कर्तृवत् कर्मणि तेऽपि, चिण्विशेषः, (अवारि) इति । कर्मकर्तरि तु "अचः कर्मकर्तरि" इति चिणो विकल्पनात्सिजपि, तत्र कर्तृवद्वा इट् , तस्य चेटो दीर्घविकल्पः, पक्षे चिण्वदिट् , प्रकृतस्येटो दीर्घविधानादस्य न दीर्घ इति (अवारि, अवृत, अवरिष्ट, अवरीष्ट अवारिष्ट,) इति पञ्च रूपाणि । द्विवचनादौ चिण्वर्ज्यं चातू रूप्यम् । ध्वमि तु कर्तृवत्पञ्च रूपाणि, चिण्वदिटि च मूर्द्धन्यविकल्पेन (अवारिढ्वम् , अवारिध्वम्) इति द्वयमिति सप्त रूपाणि । (वुवूर्षति । विवरिषति । विवरीषति) "वृत" "इट् सनि वा" इति वा इट् , तस्य च वा दीर्घः, अनिट्पक्षे "इको झल्" इति सनः कित्त्वे "अज्झन" इति दीर्घे "उदोष्ठ्यपूर्वस्य" इति उत्वे रपरे सति "हलि च" इति इक उपधाया दीर्घः । (वेव्रीयते) । "रीङृतः" इति रीङ् । (वर्वर्त्ति) इत्यादि । (वारयति यवेभ्यो गाः । अवीवरत्) "वारणार्थानामीप्सितः" इत्याप्तुमिष्यमाणस्यापादानत्वम् । प्रवृत्तिविघातो वारणम्) । (कण्टकैः परिवारयति वृक्षम् । परिवारयन्ति कण्टका वृक्षं स्वयमेव) करणेन तु [तुल्यक्रियः कर्ता कर्मवद्बहुलम्] इति ण्यन्ते करणस्यात्र

कम्बद्भावः, यक्चिणौ तु "णिश्रन्थि" इतीति निषेधान्न भवतः । (वृत्यः) । "एतिस्तु" इत्यदिना क्यप् (वार्याऋत्विज) इति क्रैयादिकस्य ण्यति, क्यब्विधौ हि वृञो ग्रहणमिष्यते । (पतिंवरा) । "संज्ञायां भृतृवृजि" इति खच् । "खित्यनव्ययस्य" "अरुर्द्विषद्" इति मुमागमः । (नीवारः) । "नौ वृ धान्ये" इति घञ् । "उपसर्गस्य घञ्यमनुष्ये" इति दीर्घः । अधान्ये (निवरः) । "ग्रहवृदृनिश्चिगमश्च" इत्यप् , स्त्रियामपि बाहुलकात्क्तिनं बाधित्वाऽयमेव भवतीति हरदत्तः । तेन (निवरा) कन्येति भवति । लिङ्गकारिकायामबन्तस्य पुंस्त्वशासनं प्रायिकमिति न्यासः । खचप्रभृतयोऽमी त्रयः प्रत्ययाः क्रैयादिकस्यापीति तस्यापि समानं रूपं, (प्रावरः प्रवर उत्तरासङ्गः,) "वृणोतेराच्छादने" इति प्रोपसृष्टाद् घञपौ, घञि "उपसर्गस्य" इति दीर्घः । आच्छादनादन्यत्राबेव । अत्रापि बाहुलकात् क्तिन्विषयेऽबेव भवतीति हरदत्तः । (प्रवरा) गौरिति । "अवद्यपण्य" इत्यादौ वर्येति निपातनं क्रैयादिकस्येति स्थितमिति इह नोदाहृतम् । (वर्म) । मनिन् । (वर्मी) । व्रीह्यादिः । वर्म्मिणोऽपत्यं (वार्म्मिकायणिः) । वाकिनादिषु "चर्म्मिवर्म्मिणोर्नलोपश्च" इति पाठात्फिञ् कुगागमो नलोपश्च, वर्मणा संनह्यति (सम्वर्मयति) । "सत्यापपाश" इत्यादिना णिच् । अभिधानशक्तिस्वाभाव्यादयं संनह्यतीत्यर्थे । अपहारवर्मणोरपत्यमापहारवर्मणः। "न मपूर्वोऽपत्येऽवर्मण" इति प्रकृतिभावनिषेधस्तत्रैवावर्मण इति पर्युदासान्न भवतीति "अन्" इति प्रकृतिभाव एव भवति । (वरूथो) रथगुप्तिः । "जॄवृञ्भ्यामूथन्"इत्यूथन् । (वर्षम्) "वृतृवदिहनिकमिकषिभ्यः स" इति सः । (वर्णः) । "ऋज्रेन्द्र" इति सूत्रे वर्णशब्दस्य पाठोऽनार्षः, "कृवृजृसिद्रुपन्यनिस्वपिभ्यो नित्" इति नप्रत्ययेन सिद्धत्वादित्युज्वलदत्तः । "खुरभद्रोग्रभैरभैलशुक्लशुक्रतीव्रवर्णेरामाला" इति रन्प्रत्यये तद्रेफस्य णत्वं निपात्यते । (वर्णी ब्रह्मचारी) । "वर्णाद्ब्रह्मचारिणि" इति मत्वर्थीय इनिः । (ब्राह्मणवर्णी) । "धर्मशीलवर्णान्ताच्च" इति मत्वर्थीय इनिः, सिद्धे प्रत्यये पुनर्विधानं ठनादिनिवृत्त्यर्थम् । (वरुणः) । "कृवृदारिभ्य उनन्" । (वरुणानी) । "इन्द्रवरुण" इति ङीषानुकौ पुंयोगे । मित्रावरुणौ देवते अस्य (मैत्रावरुणः) । "देवताद्वंद्वे च" इत्यानङ् । पूर्वपदस्य "सास्य देवता" इत्यण् । "देवताद्वन्द्वे च" इत्युभयपदवृद्धिः "दीर्घाच्च वरुणस्य" इति निषिध्यते । वरुणदत्तो नाम कश्चित् । अनुकम्पितोऽसौ (वरुणिकः) । (वरुणिलः, वरुणदत्तकः) "बह्वचो मनुष्यनाम्नष्ठज्वा" "घनिलचौ च" इत्यनुकम्पायां ठच्घनिलकनो विधीयन्ते । "शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात्"इति ठजादौ प्रत्यये तृतीयादच ऊर्ध्वं लुप्यते । वरुणेदः)। "अजिवृरीभ्यो नित्" इति नुप्रत्ययो नित् । (वरत्री) । "वृञश्चित्" इति अत्रन् प्रत्ययश्चित् । वृङ् सम्भक्ताविति क्र्यादौ । तथा दीर्घान्तो जिदजिच्च वरणार्थस्तत्र । वृञ् आवरणइति चुरादौ ॥ ८ ॥

धुञ् कम्पने ॥ अनुदात्तः । (धुनोति । धुनुते । दुधाव । दुधोथ । दुधविथ । दुधुवे । दुधुविषे । धोतासि । धोतासे । धोष्यति । धोष्यते । धुनोतु । धुनुताम् । अधुनोत् । अधुनुताम् । धुनुयात् । धुन्वीत) । आशिषि (धूयात् । धोषीष्ट । अधौषीत् । अधोष्ट । दूधूषति । दुधूषते । दोधूयते । दोधोति । धावयति । अदूधवत् । धुत्वा । धुतः । धुतवान् । धुनिः) । बाहुलकान्निप्रत्ययो नित् किच्च । तथा च भोजोऽसूसूत्रत् । धु "सृकृवृषिपृच्छिज्वरित्वरिभ्यः किन्" इति । अत्र स्वामी तु ह्रस्वान्तममुं पठित्वा प्रयोगवशाद्दीर्घान्तमप्याह । शिवस्वामिकाश्यपौ तु दीर्घान्तमाहतुः । उभयमपीति चान्द्रा इति सुधाकरः । दीर्घान्तस्य तेनैव प्रयोगो दर्शितः । ऊर्ध्वं धूनोति वायुर्विवृतशिवशिरः श्रोणिकुञ्जेष्विति । तत्र दीर्घान्तपाठे स्वरत्यादिसूत्रेणेड्विकल्पः । स्कासनोस्तु पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्याद्धूत्वा धूतः । दुधूषतीत्यादौ "श्र्युकःकिति" "सनि ग्रहगुहोश्च" इतीण्निषेधो भवति । लिटि त्वमुं प्रतिषेधं बाधित्वा क्रादिनियमान्नित्यमिट् । न च क्रादिनियमस्य स्वरत्यादिविकल्पः परत्वाद्बाधक इति मन्तव्यम् , तस्य "श्र्युकः किति" इत्यनेन पुनरपि बाधप्रसङ्गात् । (धूनोति । धूनुते ।

टुधुवे) इत्यादि ह्रस्वान्तवत् । (धोता । धविता । धोष्यति । धविष्यति । धोष्यते । धविष्यते । धूनोतु । धूनुतात् । अधूनोत् । धून्वीत । धूयात् । धोषीष्ट । धविषीष्ट । अधावीत् । अधाविष्टाम् । अधविष्ट, अधोष्ट) । "स्तुसुधूञ्भ्य" इति परस्मैपदे सिचो नित्यमिट् । अन्यत्र सर्वत्र स्वरत्यादिनेड्विकल्पः । (धूनयति) । [धूञ्प्रीञोर्नुग्वक्तव्यः] इति णौ नुक् । दीर्घान्तः क्र्यादौ युजादौ च । धू विधूननइत्यजित् तुदादौ ॥ स्वादय उभयतो भाषाः वृञ्वर्जमनुदात्ताः । तस्यानुदात्तमध्ये पाठ ऋकारान्तोभयतो भाषानुरोधेन ॥ ९ ॥

उभयतोभाषानिट्प्रकरणाद्धञमुक्त्वा तदनुरोधेनोकारान्तमनिटं परस्मैपदिनमाह ॥

टुदु उपतापे ॥ (दुनोति) इत्यादि धुनोतिवत् । (दावः) । "दुन्योरनुपसर्गे" इति कर्त्तरि णः । (दव) इति भौवादिकादचि । तस्य नात्र ग्रह इति तत्रैवोक्तम् । "समि युद्रुदुव" इति घञ्विधौ दुसाहचर्यान्निरनुबन्धकत्वाच्च दवतेरेव ग्रह इत्यस्यावेव भवति सन्दव इति । (दवथुः) । "ट्वितोथुच्" । (दुत्वा । दुतः । दुतवान्) । ल्वादौ "दुग्वोर्दीर्घश्च" इत्यत्र यदुक्तं न्यासे टुदु उपतापे इति । तदसत्, यदाह हरदत्तः । दु द्रु गतावित्यस्य दोर्ग्रहणं न टुदु उपतापइत्यस्य सानुबन्धकत्वात् । तथा च माघः । मृदुतया दुतयेतीति ॥ १० ॥

हि गतौ वृद्धौ च ॥ (प्रहिणोति) । "हिनुमिना" इति उपसर्गस्थान्निमित्तादुत्तरस्य हिनुनकारस्याड्व्यवायेऽपि णत्वं, तच्च प्रहिणु इत्यादौ हिनुशब्दे सावकाशमपि एकदेशविकृतस्यानन्यत्वाद्विकृतेऽपीह भवति । (जिघाय । जिघ्यतुः । जिघ्युः । जिघयिथ । जिघेथ । जिघ्य । जिघ्यिव) । "कुहोश्चुः" इत्यभ्यासस्य चुत्वं झकारः,तस्य"अभ्यासे चर्च" इति जकारः। परस्य "हेरचङि" इति कुत्वं घकारः । (हेता । हेष्यति । प्रहिणोतु । प्राहिणोत् । प्रहिणुयात् । हीयात् । अहैषीत् । जिघीषति । जेघीयते । जेघेति । हाययति । अजीहयत्) । अचङीति वचनान्न कुत्वम् । इदमेवाचङीति वचनं चङो ऽन्यत्र ण्यधिकस्यापि कुत्वज्ञापकम् । तेन प्रजिघाययिषतीत्यत्रापि कुत्वं भवति । (सहितं, संहितम्) "समो वा हिततयोः" इति मलोपविकल्पः । ण्यन्तस्य नित्यं मलोपस्येष्यमाणत्वात्साहित्यमित्येव भवतीत्यात्रेयः । देवदत्ताय हितं भूयाद् देवदत्तस्येति वा । "चतुर्थी चाशिष्यायुष्य" इत्यादिना षष्ठीचतुर्थ्यौ । "चतुर्थी तदर्थार्थबलिहित" इति समासविधौ कैयटे "चतुर्थी चाशिषि" इति हितयोगे या चतुर्थी तदन्तस्य समासो न भवति, समासादूध्याशिषोऽनवगमादिति के चिदाहुरिति । अरोचकिने हितमरोचकिहितमिति [हितयोगे चतुर्थी वक्तव्या] इति चतुर्थी, "चतुर्थी तदर्थ" इति पक्षे समासः । सुधाकरस्तु चान्द्रानुसारेणानाशिष्यपि षष्ठीचतुर्थ्यौ द्वे भवत इत्याह । तद्वृत्तिकारस्य नेष्टम् । यदाह "हितं भक्षा" इत्यत्र, ननु हितयोगे चतुर्थ्या भवितव्यं, तत्र कथं षष्ठ्यर्थे प्रत्ययो विधीयते, एवं तर्हि सामर्थ्याद्विभक्तिविपरिणामो भविष्यतीति । भाष्यमपि "हितं भक्षा" इति चतुर्थीनिर्देशः कर्तव्यः, इतरथा ह्यनिर्देशो भवति, हितशब्दयोगे चतुर्थी विधीयते सा प्राप्नोति, तर्हि चतुर्थीनिर्देशः कर्तव्यो न कर्तव्यः, एवं वक्ष्यामि हितं भक्ष्यस्तदस्मै, ततो दीयते नियुक्तं, तदस्मै इतीति । कैयटोऽपीतरथा हीति, यदि चतुर्थी न निर्दिश्यते तदा प्रकृताया अस्येति षष्ठ्याः सम्बन्धायोगादिहानुपस्थानात्प्रत्ययार्थो ऽनिर्द्दिष्टः स्यादित्यर्थ इति । (सहितोरूः) । "संहितशफलक्षणवामादेश्च" इत्यूरूत्तरपदात्संहिताद्यादेरूङ्प्रत्ययः स्त्रियाम् । (सहितोरूः) । [सहितसहाभ्याञ्चेति वक्तव्यम् ।] इत्यूङ् । एकदेशविकृतस्यानन्यत्वात्पूर्वेणैव सिद्धे वचनमिदं हितेन सह वर्त्तते सहितमिति सहितशब्दव्युत्पत्तावूङर्थं, प्रागण्येतत्सर्वमुक्तम् । (हयः) । पचाद्यच् । (हयी) । गौरादित्वान्ङीष् । (हेतिः) । "ऊतियूति" इत्यादिना क्तिनि निपात्यते । (हेतुः)। "कमिमनि" इत्यादिना तुः । (अन्नेन हेतुना वसति, अन्नाय हेतवे, अन्नाद्धेतोः, अन्नस्य हेतोः, अन्ने हेताविति वा) । [निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्] इति सर्वा विभक्तयः । प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न स्तः । सर्वनाम्नस्तु सार्वं इति "अइउण्" इत्यत्र कैयटे स्थितम् ॥ ११ ॥

पृ प्रीतौ ॥ पृणोति । पपार । पप्रतुः । पपर्थ । पप्र । पप्रिव । पर्ता । परिष्यति । पृणोतु । अपृणोत् । पृणुयात् । प्रियात् । अपार्षीत् । पुपूर्षति । पेप्रीयते । पारयति । अपीपरत्) । प्रियत इति श्यनि गतम् । पिपर्तीति श्लौ ॥ १२ ॥

स्पृ प्रीतिपालनयोः ॥ प्रीतिचलनयोरित्यन्ये । चलनं जीवनमिति स्वामी । (स्पृणोति । पस्पार । पस्पर्थ) । खयः शेषः । "ऋतश्च संयोगादेः" इति किंति लिटि गुणः । (स्पर्त्ता) इत्यादि ॥ स्मृ इत्येके । (स्मृणोति) इत्यादि । "अत्स्मृदृत्वर" इत्यत्र वृत्तौ स्मृ चिन्तायामित्युपपादनादस्येत्वमेव न भवति, (असिस्मरत्) इति । स्पृणोतिस्मृणोती इमौ छान्दसाविति पारायणे । इमौ पृणोतिश्च त्रयश्छान्दसा इति स्वामिकाश्यपौ ॥ १३ ॥

आऌृ व्याप्तौ ॥) आप्नोति । आप्नुतः । अप्नुवन्ति । आप्नोषि । आप्नोमि । आप्नुवः) । "लोपश्चास्या" इत्युकारलोपः संयोगपूर्वत्वान्न भवति । "हुश्नुवोः सार्वधातुके" इति यणप्यसंयोगपूर्वस्येत्यादौ "अचि श्नुधातु" इत्युवङ् । (आप । आपतुः । आपिथ । आपिव) । क्रादिनियमादिट् । "उपदेशेऽत्वतः" इत्यत्रात्वत इति तपरकरणान्न थलीण्निषेधः । यत्रायं निषेधस्तत्र भारद्वाजनियम इति विकल्पोऽपि न भवति । (आप्ता । आप्स्यति । आप्नुहि) "उतश्च प्रत्ययात्" इति हेर्लुक् संयोगपूर्वत्वान्न भवति । (आप्नवानि । आप्नोत् । आप्नुयात्) । आशिषि (आप्यात् । आपत्) । ऌदित्वात् च्लेरङ् । (ईप्सति) । "आप्ज्ञप्यृधामीत्" इतीत्वम्, अभ्यासलोपः । (आपयति । मा भवानापिपत्) । कृते णौ चङि ह्रस्वत्वे पश्चाद् द्वितीयस्यैकाचः पिशब्दस्य द्विर्वचनम् । (प्राप्य । प्राप्य) । ण्यन्तात् त्क्वि त्क्वो ल्यपि "विभाषा" इति पक्षे णेरयादेशः, अन्यदा लोपः । (आप्यम्) । ण्यत् । "पोरदुपधात्" इत्यत्र तपरकरणान्न यत् । (आप्तिः) । "क्तिन्नाबादिभ्य" इति क्तिन् । जीविकां प्राप्तः (प्राप्तजीविकः, जीविकाप्राप्तः) इति वा । "द्वितीयाश्रित" इत्यादिना "प्राप्तापन्ने च द्वितीयया" इति च समासः । प्राप्तापन्नेत्यत्र लिङ्गविशिष्टपरिभाषया प्राप्तशब्दस्य समासेऽपि प्राप्तजीविक इति । तत्र अकारः प्रश्लिष्यते । प्राप्तापन्ने अ चेति, सौत्रत्वान्न प्रकृतिभावः । एतत्पद गतावप्युक्तम् । (आपः) "आप्नोतेर्ह्रस्वश्च" इति क्विप्, ह्रस्वः । "अप्तृन्" इत्यादिना सर्वनामस्थाने दीर्घः, (अद्भिः) "अपो भि" इति भकारादौ तकारे जश्त्वम्, 'अङ्गाधिकारे तस्य च तदन्तस्य च' इति दीर्घतत्वे तदन्तेऽपि भवतः, (स्वापः, स्वाद्भिः) इति । द्विधा गताः परितो गता अन्तर्गता आपो यस्मिन् । (द्वीपम्, परीपम्, अन्तरीपम्) । "द्व्यन्तरुपसर्गेभ्यो ऽप ईत्" इत्यादेरीकारादेशः । "ऋक्पूरब्धूः" इत्यकारः समासान्तः । ईत्वमनवर्णान्तादित्युक्तत्वात्प्रापमित्यादौ न भवति । समापो नाम देवयजनमित्यत्र [समाप इतीत्वप्रतिषेधः] इतीत्वाभावः । अत एव निर्देशात् "अन्येषामपि दृश्यत" इति वा दीर्घः । "अव्ययं विभक्तिसमीप" इति निर्देशात्समीपमित्यपि भवति । यद्वा समापशब्दः समा आपो यस्मिन्निति समशब्देन व्युत्पाद्यः । (अनूपम्) । "ऊदनोर्देशे" इत्यप आदेरूकारः, अदेशेऽन्वीपं, समुद्रे यद् द्वीपं तत्र भवादि (द्वैप्यम्) । "द्वीपादनुसमुद्रं यञ्" इति शैषिको यञ् । (अनुसमुद्रम्) इति सप्तम्यर्थेऽव्ययीभावः । "यञञोश्च" इत्यत्रापत्ययञो ग्रहणादस्य बहुषु लुगभावाद् (द्वैप्या) इति भवति । अनुसमुद्रमित्युक्तत्वादन्यत्रापि द्वैप इति भवति । (द्वैपायनो व्यासः) । नडादित्वात्फक् । द्वीपशब्देन द्वीपस्थो मुनिरुच्यते । अनन्तरापत्येऽप्यस्मिन् गोत्रत्वमारोपात् । त्रिषु द्वे आप्यमम्मयमित्यत्राप्यशब्दो मयडर्थे दृश्यते । तथाऽपां कारणेष्वाप्याः परमाणव इति, अत्र प्रत्ययो न दृश्यते । तथा च स्वामी । आप्यं तु लक्ष्यादिति । परिपूर्वोऽयं रक्षणेऽपि । तथा च भवभूतिः । पर्याप्नोतु सुकृतं महाभाग इति । अयं युजादौ च ॥ १४ ॥

शक्ऌ शक्तौ ॥ (शक्नोति । शक्नुवन्ति । शक्नुहि । अशक्नोत् । शक्नुयात्) । शेषं शक्यतिवत् । लुङि ऌदित्त्वादङ्, (अशकत्) इति । विद्यासु शिक्षते । "शिक्षेर्जिज्ञासा-

याम्" इति तङ्, विद्याविषये ज्ञाने शक्तो भवितुमिच्छतीत्यर्थः । (शक्तो)घटः, कर्त्तुं (शकित) इति वा । सौनागाः कर्मणि निष्ठायां शकेरिटमिच्छन्ति विकल्पेनेतीड्विकल्पः । "विभाषा-भावादिकर्मणोः" इत्यत्र हरदत्तः । यद्यपि शकिः केवलोऽकर्मकस्तथापि तुमुनन्तवाच्यक्रिया-विषयत्वे सकर्मको भवति, तथा च कर्मणि लादयोऽपि दृश्यन्ते । अयं योगः शक्योवक्तुमितीति । (शक्यम्) । "शकिसहोश्च" इति यत् । (शकलम्) । "शकिशम्योर्नित्" इति कलप्रत्ययः । (शक्रः) । "स्फायितञ्चि" इति रः । (शक्रः प्रियंवदः) ॥ "शक्यादिभ्यः क्रु" इत्यूहितः क्रुः ॥ १९ ॥

राध साध संसिद्धौ ॥ (राध्नोति । राध्नुवन्ति । राध्नुवः । राध्नोतु । राध्नुहि । अराध्नोत् । राध्नुयात्) । शेषं राध्यतिवत् । हिंसार्थत्वे तु "राधो हिंसायाम्" इति किति लिटि थलि च सेटयेत्वाभ्यासलोपौ । (अपरेधतुः । अपरेधुः । अपरेधिथ) इत्यादि । तथा सन्यपि [राधोहिंसायां सन्यच इस्वक्तव्यः] इति अच इस्भावेऽभ्यासलोपे "स्कोः"इति सलोपे च (प्रतिरित्सति) इति । (साध्नोति । ससाध । ससाधतुः । ससाधिथ । ससाधिव) । क्रादिनियमादिड्विकल्पो न भवति, तस्य त्वजन्तविषयत्वात , (साद्धा । साध्नोतु । असाध्नोत् । साध्नुयात् । साध्यात् । असात्सीत् । असाद्धाम् । सिषात्सति) । "आदेशप्रत्यययोः" इति षत्वम् । (सासाध्यते । सासाद्धि । साधयति । असीषधत्) । कालापास्त्वषोपदेशं पठन्ति । तत् षोपदेशलक्षणविरुद्धम् । (साधनः) । ण्यन्तान्नन्द्यादित्वात् ल्युः । (साधुः) । "कृपावाजि" इत्युण् । (मातरि साधुः) । [साध्वसाधुप्रयोगे सप्तमी वक्तव्या] इति सप्तमी, अनर्चार्थमिदं वार्त्तिकमर्चायां तु "साधुनिपुणाभ्यामर्चायाम्" इत्येव सिद्धं तस्मादेवात्रार्चाग्रहणं निपुणार्थं 'सम्पद्यते । 'साधुर्भृत्यो राज्ञ' इत्यत्र भृत्यापेक्षया षष्ठी न साध्वपेक्षयेति वाक्यार्थज्ञा आहुरिति कैयटादौ प्रतिपादितम् । अप्रतेरितिवचनात्साधुर्देवदत्तो मातरं प्रतीत्यत्र न भवति । [अप्रत्यादिभिरिति वक्तव्यम्] इति वार्तिकम् , तत्रादिग्रहणेन "लक्षणेत्थम्भूत" इत्यत्र प्रतिना सहोपात्तयोः पर्यन्वोर्ग्रहः । दुनोतिप्रभृतयोऽनुदात्ताः परस्मैभाषाः ॥ १६ ॥ १७ ॥

अथ सेट आह ॥

अशू व्याप्तौ संघाते च ॥ (अश्नुते । अश्नुवाते ॥ अश्नुवते । अश्नुषे । अश्नुध्वे । अश्नुवे । अश्नुवहे) । "शात्" इति तवर्गस्य श्चुत्वनिषेधः । (आनशे । आनशाते । आनशिषे । आनक्षे । आनशिध्वे । आनड्ढ्वे । आनशिवहे । आनश्वहे । आनशिमहे । आनश्महे) । ऊदित्त्वादिड्विकल्पः । झलि व्रश्चादिना षत्वं, "षढोः क सि", "ष्टुना ष्टुः" इति कत्वषत्वे यथायोगम् । "अत आदेः" इत्यभ्यासस्य दीर्घत्वे ततः परस्य "अश्नोतेश्च" इति नुडागमः । (अष्टा । अशिता । अक्ष्यते । अशिष्यते । अश्नुताम् । अश्नुष्व । आश्नुत । आश्नुथाः । आश्नुवि । आश्नुवीत । अश्नुवीथाः । अश्नुवीयात्) । आशिषि (अशिषीष्ट । अक्षीष्ट । आशिष्ट । आष्ट । आशिषाताम् । आक्षाताम्) । "झलो झलि" इति सिज्लोपे षत्वष्टुत्वे । अन्यत्र षत्वे कत्वम् । (अशिशिषते) । "स्मिपूङ्रञ्ज्वशां सनि" इति नित्यमिट् । (आशाश्यते) । "सूचिसूत्रि" इत्यादिना यङ् । तत्र ह्यश्नोतेरश्नातेश्च ग्रहणमुक्तं पदमञ्जर्यादौ । एवं पारायणादौ आत्रेया (१)दावपि । यङ्लुकि (आष्टि) इत्यादि, अटतिवत् प्रक्रिया । (अष्ट्वा । अशित्वा । अष्टः । अष्टवान्) । "यस्य विभाषा" इत्यनिट्त्वम् । (रशना) "अशेरश च" इति युचि रशादेशः । (आशुः) । व्रीहिविशेषः । "कृवापाजि" इत्यादिनोण्प्रत्ययः । शीघ्रपर्यायस्त्वयमव्ययम् । (श्वशुरः) । "शाश्वशेरासौ" इति शुशब्दे उपपदे उरन् प्रत्ययः । आशुपर्यायः शुशब्दः । (श्वशुर्यः) । "रा-

(१) आत्रेयमैत्रेयादाविति पाठान्तरम् ।

जश्वशुराद्यत्” इति अपत्ये यत्। (श्वश्रूः)। [श्वशुरस्योकाराकारयोर्लोपश्च] इत्युकाराकारयोर्लोप ऊङ्प्रत्ययश्च । श्वश्रूश्च श्वशुरश्च (श्वशुरौ)। “श्वशुरः श्वश्र्वा” इति पक्षे श्वशुरस्य शेषः । (अक्षरम्)। “अशेः सरन्” इति सरन् प्रत्ययः । (अष्टन्)। “सप्यशूभ्यां तुट् च” इति कनिन्, तस्य तुडागमः । (अष्टौ । अष्टाभिः । अष्टाभ्यः । अष्टानाम् । अष्टासु) । “अष्टन आ विभक्तौ” इति पक्षे आकारः । “अष्टाभ्य औश्” इति जश्शसोरौशादेशः । अत्र लघ्वर्थमष्टन इति वक्तव्ये अष्टाभ्य इति निर्देशादष्टन आत्वपक्षे एवौश्भावः । अयमेव निर्देश आत्वविकल्पे लिङ्गं, तेनाभावे जश्शसोः “षड्भ्यो लुक्”इति लुक्यष्टेति भवति । ‘अङ्गाधिकारे तस्य तदुत्तरपदस्य च’ इतिवचनात् परमाष्टौ इत्यादावौश्त्वं भवति । अत्रापि पूर्ववदात्वपक्षे एवौशत्वं । तेनानात्वे परमाष्टेति भवति । आत्वमप्याङ्गमिति तत्रापि पूर्ववत्तदन्तविधिर्द्रष्टव्यः । (अष्टावक्रः)। “अष्टनः संज्ञायाम्” इत्युत्तरपदे दीर्घः । अष्टाभिर्गोभिर्युक्तं शकटम् (अष्टागवम्) । “गवि च युक्ते” भाषायामष्टनो दीर्घ इति दीर्घः । (अष्टाविंशतिः)। “द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः” इत्यशीतिवर्जिते संख्यायामुत्तरपदे दीर्घः । अबहुव्रीहीतिवचनादष्टनवा इत्यत्र न भवति । “प्राक् शताद्” इति वचनादष्टशतमित्यादावपि न भवति । अष्टमो भागः (आष्टमः, अष्टमः) । “षष्ठाष्टमाभ्यां ञ च” इति भागे विवक्षिते ञप्रत्ययश्चकारादंश्च । (अश्वः)। “अशुप्रुषि” इति क्वन् । अश्वानां समूहो (अश्वीयम्)। “केशाश्वाभ्यां यञ्छावन्यतरस्याम्” इति छः । अन्यतरस्यांग्रहणात्पक्षेऽण् । (आश्वम्)। अश्वस्य निमित्तं संयोग उत्पातो वा (आश्विकः)। “आर्हाद्” इति ठक् । गोद्व्यचलक्षणो यत्तत्रैव संख्यापरिमाणाश्वादीनां पर्युदासान्न भवति । अश्वेनैकाह्नेन गम्यते (आश्वीनः)। “अश्वस्यैकाहगम” इति खञ् । अश्वस्यापत्यम्” (आश्वायनः) । “अश्वादिभ्यः फञ्” इति फञ् । (गवाश्वम्) । “गवाश्वप्रभृतीनि च” इति नित्यमेकवद्भावः, पूर्वपदस्यावङ् च । (अश्वस्यति वडवा) । मैथुनमिच्छतीत्यर्थः । क्यचि परतो “अश्वक्षीर” इत्यसुक् । अत्र हि [अश्ववृषयोर्मैथुनेच्छायाम्] इति पठ्यते । अन्यत्राश्वीयति । (अश्वतरः)। गर्दभादश्वायामुत्पन्न उच्यते । यस्य वेसर इति नाम “वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे” इति ष्टरच् । अश्वशब्दार्थस्य व्यक्तेस्तनुत्वं प्रवृत्तिनिमित्तजातिद्वारकं, प्रवृत्तिनिमित्तं चेहाश्वादन्यस्मिंस्तत्सदृशे जात्यन्तरयोगिनि आरोप्यत इति गौणत्वं तनुत्वम् । ष्टरचः षित्वात्स्त्रियाम् (अश्वतरी । अक्षः) । “अशेर्देवने” इति सप्रत्ययः । (अक्षपरि) । अक्षेण न तथा पतितं यथा जय इत्यर्थः । “अक्षशलाकासंख्याः परिणा” इति तृतीयान्तस्याव्ययीभावः । ‘कितवव्यवहारे चायं समास इष्यते’ । (अक्षि । अक्षिणी) । “अशेर्निद्” इति क्सिप्रत्ययः । अयमक्षतौ च व्युत्पादितः । वक्तव्यं चान्यत्तत्रैवोक्तम् १८

ष्टिघ आस्कन्दने ॥ कवर्गचतुर्थान्तः । (स्तिघ्नुते । तिष्टिघे । स्तेघिता । स्तेघिष्यते । स्तिघ्नुताम् । अस्तिघ्नुत । स्तिघ्नुवीत) । आशिषि (स्तेघिषीष्ट । अस्तेघिष्ट । तिष्टिघिषते । तिष्टेघिषते । स्तिघित्वा । स्तेघित्वा) । “रलो व्युपधाद्” इति कित्त्वविकल्पः । (तेष्टिघीति । तेष्टेग्धि । स्तेघयति । अतिष्टिघत्) । खयः शेषः । (स्तिघितः । स्तिघितवान्) । उदात्तावनुदात्तेतौ ॥ १९ ॥

तिक तिग च ॥ चकारादास्कन्दने इत्यनुषज्यते । (तिक्नोति । तितेक । तितेकिथ । तितिकिव । तेकिता । तेकिष्यति । तिक्नोतु । अतिक्नोत् । तिक्नुयात्) आशिषि । (तिक्यात् । अतेकीत् । तितिकिषति । तितेकिषति । तेतिक्यते । तेतिकीति । तेतेक्ति । तेकयति । अतीतिकत् । तिकः) । इगुपधलक्षणः कः । (तैकायनिः) “तिकादिभ्यः फिञ्” इत्यपत्ये फिञ् । तैकायनयश्च कैतवायनयश्च (तिककितवाः) । “तिककितवादिभ्यो द्वन्द्वे” इति बहुषु लुक् । (तिग्नोति । तितेग । तेगिता) इत्यादि तिक्नोतिवत् ॥ २० ॥ २१ ॥

षघ हिंसायाम् ॥ (सघ्नोति । ससाघ । सेघतुः । सेघिथ । सेघिव । सघिता । सघि-

ष्यति । सघ्नोतु । असघ्नोत् । सघ्नुयात्) आशिषि (सघ्यात् । असघीत् । असाघीत्) । "अतो हलादेः" इति वा वृद्धिः । (सिसधिषति) "स्तौतिण्योरेव" इति नियमान्न षत्वम् । (सासध्यते । सासधीति । सासग्धि । साधयति । असीषधत्) ॥ २२ ॥

ञिधृषा प्रागल्भ्ये ॥ (धृष्णोति । दधर्ष । दधृषतुः । दधर्षिथ । दधृषिव । धर्षिता । धर्षिष्यति । धृष्णोतु । अधृष्णोत् । धृष्णुयात् । आशिषि । (धृष्यात् । अधर्षीत् । दिधर्षिषति । दरिधृष्यते । दरीधृषीति, दरिधृष्टि,) इत्यादि । (धर्षयति । अदीधृषत् । अदधर्षत्) "उरद्वा" । (धृष्यः) "ऋदुपधात्" इति क्यप् । दधृक् । दधृषौ) । "ऋत्विक्" इत्यादौ निपातनात् क्विनि द्वित्वम् । पदान्ते च कुत्वम् । (धृष्णुः) । "त्रसिगृधि" इत्यादिना धृषेः क्नुः । (धृष्णक् । धृष्णजौ) । [धृषेश्चेति वक्तव्यम्] इति नजिङ् । (दुर्धर्षणः) "भाषायां शासियुधिदृशिधृषिमृषिभ्यो युच्" । (धर्षित्वा) "न क्त्वा सेट्" इत्यकित्वाद्गुणः । (धृष्टो वृषलः) । "धृषिशसी वैयात्ये" इत्यनिट्त्वम् । "आदितश्च" इत्यनिट्त्वे सिद्धे वचनमिदं नियमार्थं, तेन वैयात्यादन्यत्र धर्षित इतीड् भवति । भावादिकर्मणोर्न वैयात्ये धृषिरस्तीति तत्र नित्यनिषेधार्थं न भवति । वैयात्यादन्यत्र भावादिकर्मणोर्विकल्प एव भवति । (धृष्टं, धर्षितम् । प्रधृष्टः, प्रधर्षितः) इति, तत्रेट्पक्षे "निष्ठा शीङ्" इत्यादिना कित्त्वाभावाद्गुणः । ञीत्त्वं वर्तमाने क्तार्थम् । धृष प्रसहन इति युजादौ ॥ २३ ॥

दम्भु दम्भने ॥ दम्भो लोकार्जवार्थमेव कर्मानुष्ठानम् । (दभ्नोति) । "अनिदिताम्" इति नलोपः । (ददम्भ । देभतुः । ददम्भिथ । देभिव) । [श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति वक्तव्यम्] इति अपितो लिटः कित्त्वादनुनासिकलोपे [दम्भेश्चेति वक्तव्यम्] इत्येत्वाभ्यासलोपौ । "अत एकहल्मध्य" इति तु न सिध्यति, "असिद्धवदत्राभात्" इत्यनुनासिकलोपस्यासिद्धत्वात् । इदं च कित्त्वं श्रन्थ्यादीनामपिदर्थं पिदर्थं चेति सुधाकरः । आत्रेयादयस्त्वपिदर्थमिति । न्यासकारस्याप्ययमेव पक्षः । यदाह ग्रन्थिप्रभृतीनां संयोगान्तानामपितो लिटः कित्त्वमिति । अपिद्वचनान्तानामेवोदाहरणाद्वृत्तिकारस्याप्ययमेव पक्षोऽभिमतः प्रतीयते । हरदत्तस्तु किमिदं पिदर्थमपिदर्थं वेति सन्दिह्यार्थसदसत्त्वं देवा एतज्ज्ञातुमर्हन्तीत्याह । के चित् श्रन्थिग्रन्थिदम्भिस्वञ्जीनां वेति पठन्तः कित्त्वं विकल्पयन्ति । तन्मते दम्भतुरित्याद्यपि भवति । (दम्भिता, दम्भिष्यति, दभ्नोतु । अदभ्नोत् । दभ्नुयात् । दभ्यात् । अदम्भीत् । दिदम्भिषति) । "सनीवन्त" इतीड्विकल्पः । इडभावे । (धिप्सति । धीप्सति) । "दम्भ इच्च" इत्यकारस्येकार ईकारश्च । "हलन्ताच्च" इति सनः कित्त्वादनुनासिकलोपः । अत्र हल्शब्देन जातिराश्रीयते "एकाच" इति भष्भावे दकारस्य धकारः, "खरि च" इति चर्त्वं भकारस्य पकारः । अत्रेक्समीपाद्धलः परः सन्भवति, हल्जातेराश्रयणात् । जातेः समीपत्वं सनः पूर्वत्वं च व्यक्तिद्वारेण । तथा च वार्तिकं, [दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धम्] इति । (दादभ्यते । दादब्धि । दम्भयति । अददम्भत् । दम्भित्वा । दब्ध्वा) । उदित्त्वादिड्विकल्पः । (दब्धः । दब्धवान्) "यस्य विभाषा" इत्यनिट्त्वं, (दब्धिः) । "तितुत्र" इतीण्निषेधः, दभिरिति सौत्रो धातुस्तस्मात् "आसुयुवपि" इत्यादौ चकारस्यानुक्तसमुच्चयार्थत्वात् "पोरदुपधात्" इति यतोऽपवादे ण्यति (दाभ्यः) ॥ २४ ॥

ऋधु वृद्धौ ॥ (ऋध्नोति । ऋध्नोतु । आर्ध्नोत् । ऋध्नुयात्) । शेषमृध्यतिवत् । अयमकर्मकः सकर्मकश्च । अत्र तृप प्रीणनइत्यात्रेयादयः पठन्ति। स्तृप्णोतीत्याद्युदाहरन्ति । अमुं न्यासकारादयो नेच्छन्ति । यदाहुः—क्षुभ्नादिषु तृप्नोतीति व्यत्ययेन श्नुरिति । तृप्यतिदृप्यती सुपिमित्यनिट्कारिकासु श्यना निर्देशस्य व्यावर्त्यत्वे तुदादीयौ तृपिदृपी, तावुदात्ताविति वृत्तिकारेणाभिधानात्सोऽप्ययमुं नेच्छतीति प्रतीयते । पुरुषकारेऽप्येवं प्रतिपादितम् ॥२५॥

छन्दसि ॥ आ गणान्तात् छन्दसीत्यर्थः । अन्यस्तु छन्दस्यह व्याप्ताविति पठित्वा छन्दोग्रहणमह्नोतिविशेषणं मन्यते । तच्छाकटायनमैत्रेयादयो न सहन्ते ॥

अह व्याप्तौ ॥ (अह्नोति) इत्यादि ॥ २६ ॥

दघ घातने पालने च ॥ (दघ्नोति) इत्यादि । धाराधरा एव धराधराणां निदाघदाघौ-घविघातदक्षा इति । अत्र दघ घातने इति स्वादिः, ततो निदघ्यते ऽनेनेति कृत्वा निदाघ-शब्दः साधुरिति पारायणिका इति सुधाकरस्तदपाणिनीयम्, संज्ञायामर्वमेघनिदाघावदाघा इति न्यङ्क्वादौ पठित्वा दहतेर्घञि व्युत्पादनात्। तथा च तत्र वृत्तिः, अपूर्वस्य निपूर्वस्य च दहेरिति ॥ २७ ॥

चमु भक्षणे (चम्नोति) इत्यादि ॥ २८ ॥

रि क्षि चिरि जिरि दाश दृ हिंसायाम् ॥ (रिणोति।। क्षिणोति) इत्यादि । अयं भाषाया-मपीत्यात्रेयमैत्रेयादयः । प्रयुज्यते च । इमां हृदि व्यायतपातमक्षिणोत्। न तद्यशः शस्त्रभृतां क्षिणोति । पञ्चवाणः क्षिणोतीति । शाकटायनादयस्तु छान्दसत्वमेवाहुः । केचित्तु दुङमपि पठन्ति, दुनुते इति । यदाह दुर्गः । तिक तिग षघ रि क्षि चिरि जिरि दाश् दृ दुङ् हिंसायां, छान्दसाश्चासी परस्मैभाषा उदात्ता इति ॥ ३४ ॥

वृत् ॥ स्वादयो वृत्ता इत्यर्थः ॥

इति पूर्वदक्षिणपश्चिमसमुद्राधीश्वरश्रीकम्पराजसुतसङ्गमहाराजमहामन्त्रिणा मायणसुतेन माध-वसहोदरेण सायणाचार्येण विरचितायां माधवीयायां धातुवृत्तौ स्वादयः सम्पूर्णाः ॥

अथ तुदादयः ।

तुद व्यथने ॥ (तुदति । तुदतः । तुदन्ति । तुदसि । तुदथः । तुदथ । तुदामि । तुदावः तुदामः)। "तुदादिभ्यः शः" इति शब्विषये शः। (तुदती, तुदन्ती,) स्त्री । (तुदती) कुले । (तुद-न्ती, कुले) "आच्छीनद्योर्नुम्" इति शत्रन्तस्य शीनद्योर्नुम्विकल्पः (तुदते । तुदन्ते।तुदसे । तुदेथे । तुदध्वे । तुदे । तुदावहे । तुदामहे । तुतोद । तुतुदतुः । तुतोदिथ । तुतुद । तुतोद । तुतुदिव । तुतुदे । तुतुदाते । तुतुदिरे । तुतुदाथे । तुतुदिध्वे । तुतुदे । तुतुदिवहे) । क्रादिनि-यमादिट् । तोत्ता । तोत्स्यति । तोत्स्यते । तुदतु । तुदतात् । तुदताम् । तुदन्तु । तुद । तु-दतात् । तुदतम् । तुदत । तुदानि । तुदाव । तुदताम् , तुदेताम् । तुदन्ताम् । तुदस्व । तुदेथां, तुदध्वं, तुदै । तुदावहै । अतुदत् । अतुदः । अतुदम् । अतुदत । अतुदथाः । अतुदे । तुदेत् । तुदेतां, तुदेयुः । तुदेः । तुदेयं, तुदेत । तुदेयातां, तुदेरन् । तुदेथाः । तुदेय । तुदेवहि) । आ-शिषि। (तुद्यात्, तुद्यास्ताम् । तुत्सीष्ट । तुत्सीयास्तां,) "लिङ्सिचावात्मनेपदेषु" इति कित्त्वान्न गुणः। (अतौत्सीत् । अतौत्ताम् । अतौत्सीः । अतौत्सम्) । "वदव्रज" इति वृद्धिः । "झलो झलि" इति सिचो लोपः । अतुत्त । अतुत्सातां , तुतुत्सति । तुतुत्सते) । "हलन्ताच्च" इति सनः कित्त्वम् । (तोतुद्यते । तोतुदीति) । "नाभ्यस्तस्य" इति गुणनि-षेधः। (तोतोत्ति) । लघूपधगुणः । तोदयति । अतूतुदत् । तिलन्तुदः) । "वातशुनि" इत्यादिना खश् । विधुन्तुदः । अरुन्तुदः) "विध्वरुषोस्तुद" इति खश् । "अरुर्द्विषदजन्त-स्य" इति मुम् । "संयोगान्तस्य" इत्यरुषः सकारस्य लोपः (तोत्रम्) "दाम्नी" इत्या-दिना करणे ष्ट्रन् । (प्रतोदः) । "हलश्च" इति संज्ञायां करणे घञ् । (तुत्त्वा । तुन्नः, तुन्नवान्) । "रदाभ्याम्" इति निष्ठानत्वम् । (तुत्थम्) "पातृतुदिवचिसिचिभ्यस्थग्" इति थक् ॥ १ ॥

णुद प्रेरणे (प्रणुदते । प्रणुदति) इत्यादि तुदिवत् । "उपसर्गादसमासेऽपि" इति णत्वम् । (नुत्वा । नुत्तः । नुन्नः । नुत्तवान् । नुन्नवान्) । "नुदविद" इति नत्वविकल्पः । काकुजिह्वा सास्मिन्नुद्यते इति काकुदं तालु । "घञर्थे कविधानम्" इति कः । पृषोदरादित्वान्नुशब्दलोपः

पररूपं च । ।(शोकापनुदः) । "तुन्दशोकयोः परिमृजापनुदोः" इत्यनयोः कर्मणोरुपपदयोः परिमृजापनुदोः कप्रत्ययः । कर्मण्यणोपवादः । अयं च शोकमपनुद्य सुखस्याहर्त्तरि, [आलस्यसुखाहरणयोरिति वक्तव्यम्] इति वचनात्। यस्तु दुःखमेकमपनुदति सुखं नाहरति तत्राणि शोकापनोद इति भवति । अयं परस्मैपदिष्वपि पठ्यते । तेनायं भाषायां परस्मैपद्येवेति वर्द्धमानः । स्वाम्यपि तथा परस्मपदिष्वेवामुं पपाठ । उभयमात्रेयमैत्रेयाद्यनेकव्याख्यानविरुद्धम्, यदाहुरुभयपदिषु पठितस्यास्य पुनः परस्मैपदिषु पाठः कर्त्रभिप्रायेऽपि परस्मैपदार्थ इति ॥ २ ॥

दिश अतिसर्जने ॥ (दिशति । दिशते । दिदेश । दिदेशिथ । दिदिशिव । दिदिशे । दिदिशिरे । दिदिशिषे । दिदिशिवहे । देष्टा । देक्ष्यति । देक्ष्यते) । "व्रश्च" इत्यादिना षत्वे "षढोः कस्सि" इति कत्वं, (दिशतु । दिशताम् । अदिशत् । अदिशत । दिशेत् । दिशेत) आशिषि (दिश्यात् । दिक्षीष्ट । अदिक्षत् । अदिक्षताम् । अदिक्षन् । अदिक्षः । अदिक्षत । अदिक्षाताम् । अदिक्षथाः । अदिक्षि । अदिक्षावहि) । "शल इगुपधात्" इति क्सः, "क्सस्याचि" इत्यल्लोपः । (दिदिक्षति । दिदिक्षते) "हलन्ताच्च" इति कित्त्वम् । (देदिश्यते । देदिशीति । देदेष्टि । देशयति । अदीदिशत् । दिक् । दिशौ । दिशः) । "ऋत्विक्" इत्यादिना क्विनि "क्विन्प्रत्ययस्य कुः" इति कुत्वं द्वितीयः, पदान्ते तस्य जश्त्वं गकारः, "वावसाने" इति चर्त्वं ककारः । न च कुत्वं जश्त्वे पूर्वत्रासिद्धं, "दिगादिभ्यो यत्" इति निर्देशात् । नापि कुत्वं व्रश्चादिषत्वे ऽसिद्धम् । षत्वापवादत्वात्तस्य (प्रतिदिशम्) वीप्सायामव्ययीभावः । "अव्ययीभावे शरत्प्रभृतिभ्यः" इति टच् समासान्तः । (दिशा) । 'आपं चापि हलन्तानाम्' इति भागुरिवचनाद् टाप् । दिशि भवं (दिश्यम्) । "दिगादिभ्यो यत्" इति यत्, नामादेशं युध्यते । "नाम्न्यादिशिग्रहोः" इति द्वितीयान्ते नाम्न्युपपदे आदिशेर्धातुसम्बन्धे णमुल् । वाक्यं समासो वास्तु, "तृतीयाप्रभृतीनि" इति समासो विकल्प्यते । नामादिश्य युध्यत इति क्त्वापि भवति । उक्तं हि—"तृतीयाप्रभृतीनि" इत्यत्र वृत्तौ सर्वत्रैवास्मिन् णमुल्प्रकरणे क्रियाभेदे सति वासरूपविधिना क्त्वापि । (दिष्टं) क्तः । (दैष्टिकः) । "अस्तिनास्तिदिष्टंमतिः" इत्यस्त्यादिभ्यो मत्युपादिभ्यो ऽस्येत्यर्थे ठक् , प्रमाणानुपातिनी यस्य मतिरस्ति स दैष्टिक इति वृत्तिः, एतच्चाभिधानस्वभावाल्लब्धम् । (दिष्टिः) । संज्ञायां क्तिच् । दिशति तमिति (देशः) । "अकर्तरि च कारके" इति कर्मणि घञ् । (प्रादेशः) । "हलश्च" इति संज्ञायां करणे घञ् । "उपसर्गस्य घञि" इति दीर्घः । (प्रादेशिनी) णिनिः ॥ ३ ॥

भ्रस्ज पाके ॥ (भृज्जति । भृज्जसि । भृज्जामि । भृज्जते । भृज्जसे । भृज्जे) । अस्य "सार्वधातुकमपित्" इति ङित्वात् "ग्रहिज्या" दिना सम्प्रसारणम् । पररूपत्वम् । "झलां जश् झशि" इति सकारस्य दकारस्तस्य श्चुत्वं जकारः । न च श्चुत्वे दत्वमसिद्धम् । भृज्जतीनामिति निर्देशादिति व्याख्यातारः । यद्वा जश्त्वस्यासिद्धत्वात्सकारस्यैव श्चुत्वे शकारस्तस्य "झलां जश् झशि" इति जश्त्वेन जकारेऽपि रूपं सेत्स्यति । (बभर्ज्ज । बभर्ज्जतुः । बभर्ज्जुः । बभर्ज्जिथ । बभर्ष्ठ । बभर्ज्जथुः । बभर्ज्जिव । बभर्ज्ज । बभर्ज्जाते । बभर्ज्जिरे । बभर्ज्जिषे) इत्यादि । क्रादिनियमादिट् । थलि भारद्वाजनियमाद्विकल्पः । "भ्रस्जोरोपधयोरमन्यतरस्याम्" इत्यार्द्धधातुके रेफोपधयोर्निवृत्तिः । रमागमश्च विकल्पेन । आगमे ऽकार उच्चारणार्थः । अन्यदा (बभ्रज्ज । बभ्रज्जतुः । बभ्रज्जुः । बभ्रज्जिथ । बभ्रष्ठ । बभ्रज्जथुः । बभ्रज्ज । बभ्रज्जिव । बभ्रज्जे । बभ्रज्जाते । बभ्रज्जिरे । बभ्रज्जिषे,) इत्यादि । (भर्ष्टा । भ्रष्टा) । रमभावे "स्कोः" इति सकारस्य लोपः । "व्रश्च" आदिनोभयत्र जकारस्य षत्वे ष्टुत्वम् । (भर्क्ष्यति । भर्क्ष्यते । भ्रक्ष्यति । भ्रक्ष्यते) । रमभावे "स्कोः" इतिसलोपः । सर्वत्र व्रश्चादिषत्वे "षढोः कः सि" इति कत्वम् । भृज्जतु । भृज्जताम् । अ-

भृज्जत् । अभृज्जत । भृज्जत् । भृज्जेयुः । भृज्जेत । भृज्जेयाताम् । भृज्जेरन्) । आशिषि (भृज्ज्यात् । भृज्ज्यास्ताम्) । यासुटः कित्वात्सम्प्रसारणम् । रमागमश्चानेन पूर्वविप्रतिषेधेन बाध्यते ।(भक्षीष्ट। भर्क्षीयास्ताम् । भ्रक्षीष्ट । भ्रक्षीयास्ताम्) इत्यादि । रमागमतदभावयोः सलोपादि पूर्ववत् ।(अभार्क्षीत् । अभार्ष्टाम् । अभार्क्षुः। अभार्क्षीः । अभार्ष्टम् । अभार्क्षम् । अभ्राक्षीत् । अभ्राष्टाम् । अभ्राक्षुः) इत्यादि । "वदव्रज" इति वृद्धिः । झलि सिचो लोपे सकारस्याभावात् "षढोः कः सि" इति न भवति । (अभर्ष्ट । अभर्क्षाताम् । अभर्ष्ठाः । अभर्क्षाथाम् । अभर्ढ्वम् । अभर्क्षि । अभर्क्ष्वहि । अभ्रष्ट, अभ्रक्षाताम् ।) इत्यादि पूर्ववत् । यथायोगं सलोपषत्वकत्वानि, यत्र न सिचो लोपस्तत्र कात्परत्वात् "आदेशप्रत्यययोः" इति षत्वम् । (बिभर्क्षति । बिभर्ज्जिषति । बिभ्रक्षति, बिभ्रज्जिषति) "सनीवन्त" इत्यादिनेड्विकल्पः, तङि (बिभर्क्षते) इत्यादि चातूरूप्यम् । (बरीभृज्यते,) आशीर्लिङ्वदत्रापि रोपधलोपात्पूर्वविप्रतिषेधेन सम्प्रसारणमेव भवति, अभ्यासस्योरदत्वे "रीगृत्त्वतः" इति रीक् । "भ्रस्जोरोपधयोः" इति लोपोऽभ्यासस्य न भवति । तत्रोपदेशग्रहणानुवृत्तेः । (बाभ्र्ष्टि) इत्यादि । अत्र यङो लुप्तत्वात्तिपा निर्देशाद्वा न सम्प्रसारणम् । अत एव लुका लुप्तत्वादार्धधातुकपरत्वाभावाद् रोपधयोर्लोपोऽपि न भवति । (भर्ज्जयति । अबभर्जत् । भ्रज्जयति । अबभ्रज्जत् । भर्ग्यः । भ्रद्ग्यः) । ण्यति रोपधलोपे "चजोः कुघिण्ण्यतोः" इति कुत्वम् । लोपाभावे तु जश्त्वात्पूर्वं "पूर्वत्रासिद्धम्" इति "चजोः" इति कुत्वेन जकारस्य गकारे पश्चात् सकारस्य जश्त्वे दकारः । (भर्गः, भ्रद्गः) । घञ्, पूर्ववत् प्रक्रिया । भर्गस्यापत्यं (भार्गायणः,) । "भर्गात्त्रैगर्ते" इति फञ् त्रैगर्तादन्यत्र "अत इञ्" इतीञि (भार्गिः) । (भ्रष्टः, भ्रष्टवान् । भृगुः) । [प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च] इत्युप्रत्ययः सम्प्रसारणसलोपौ च "न्यङ्क्वादीनाञ्च" इति कुत्वम् । भृगोरपत्यं (भार्गवः) । "ऋष्यन्धकवृष्णी" इत्यण्, बहुत्वे (भृगवः) "अत्रिभृगु" इत्यादिना ऽणो लुक् । (भ्राष्ट्रम्) । "भ्रस्जिगमि" इत्यादिना ष्ट्रन् वृद्धिश्च । भर्जत इति शपि ॥ ४ ॥

क्षिप प्रेरणे ॥ (क्षिपति, क्षिपते । अभिक्षिपति । प्रतिक्षिपति । अतिक्षिपति) "अभिप्रत्यतिभ्यः क्षिपः" इति क्रियाफलस्य कर्तृगामित्वे ऽपि परस्मैपदम् । इदञ्च शुद्धे कर्तरीति कर्मकर्तरि तङ् भवति (अभिक्षिप्यत इति) । (चिक्षेप । चिक्षेपिथ । चिक्षिपिव । चिक्षिपे । चिक्षिपिषे । क्षेप्ता । क्षेप्स्यति । क्षेप्स्यते । क्षिपतु । क्षिपताम् । अक्षिपत् । अक्षिपत । क्षिपेत् । क्षिपेत । क्षिप्यात् । क्षिप्सीष्ट । अक्षैप्सीत् । अक्षैप्ताम् । अक्षिप्त । अक्षिप्साताम्) । "लिङ्सिचावात्मनेपदेषु" इति कित्त्वान्न गुणः । (चिक्षिप्सति । चिक्षिप्सते) । "हलन्ताच्च" इति सनः कित्वम् । (चेक्षिप्यते । चेक्षिपीति । चेक्षेप्ति । क्षेपयति । अचिक्षिपत्) । क्षिप्तः क्षिप्यतिवदेव ॥ ५ ॥

कृष विलेखने ॥ (कृषति । कृषते । चकर्ष । चकर्षतुः । चकर्षिथ । चकर्ष । चकृषिव । चकृषे। चकृषाते । चकृषिष) इत्यादि । क्रष्टा । कर्ष्टा । क्रक्ष्यति । कर्क्ष्यति । क्रक्ष्यते । कर्क्ष्यते) ।झल्यकिति "अनुदात्तस्य चर्दुपधस्य" इति पाक्षिके अमागमे यणादेशः । (कृषतु । कृषताम् । अकृषत । अकृषत । कृषेत् । कृषेताम् । कृषेत । कृषेयाताम् । आशिषि । (कृष्यात् । कृक्षीष्ट) । "लिङ्सिचावात्मनेपदेषु" इति कित्त्वान्नामागमो नापि गुणः । (अकृक्षत । अकृक्षताम् । अकृक्षन् । अकृक्षत । अकृक्षाताम् । अकृक्षन्त) । "क्सस्याचि" इत्यलोपः । अजादौ "शल इगुपधात्" इति क्सः । (अकार्क्षीत् । अकार्ष्टाम् । अकार्क्षुः । अकृष्ट । अकृक्षाताम् । अकृक्षत) । "स्पृशमृषकृष" इति पक्षे सिच् । झलि तस्य लोपः । "वदव्रज" इति परस्मैपदे वृद्धिः ।। पूर्ववदमागमविकल्पः । आत्मनेपदे तु "लिङ्सिचौ" इति कित्वान्नामागमः । अत एव न गुणः । (चिकृक्षति] । "हलन्ताच्च" इति सनः कित्वान्नामागमो नापि गुणः । (चरीकृष्यते । चरीकृष्टि) इत्यादि । (कर्षति । अचकर्षत् ।

अचीकृषत्) उरूर्द्वा । (कृषिः)। "इक्कृष्यादिभ्यः" इति इक् । (कृषीवलः) "रजः कृष्यासुति" इति मत्वर्थे वलच्। "वले" इति दीर्घः" (सङ्कर्षणः)। नन्द्यादित्वात् ल्युः । (कृषकः।) "क्वुन् शिल्पिसंज्ञयोः" इति क्वुन् "सप्तम्यां चोपपीड" इत्यत्र कर्षेरिदं ग्रहणं न कृषेरिति वृत्तिः। आत्रेयस्तु व्याख्यानकृन्मतमेतत्, विशेषाभावादिति। हरदत्तस्तु विशेषमाह। यदाह। यद्यप्युभयोरपि विलेखने पाठस्तथापि तौदादिकस्य क्षेत्रविषये विलेखने वृत्तिः, तेन क्षेत्रे उपकृष्य हलेनोपकृष्य, तौदादिकात् क्त्वाप्रत्यय एव भवति न णमुलिति। न्यासकारोऽपि कर्ष इति शपा निर्देशाद्भौवादिकस्य ग्रहणमित्याह॥ तुदादयोऽनुदात्ताः स्वरितेतः॥ ६॥

षान्तप्रसङ्गात्सेटं परस्मैपदिनमाह॥

ऋषी गतौ॥ (ऋषति। प्रार्षति।) "उपसर्गादृति" इति वृद्धिः। (आनर्ष। आनृषतुः। आनृषुः। आनर्षिथ। आनृषिव)। अभ्यासस्योरदत्वे हलादिः शेषे "अत आदेः" इति दीर्घः। "तस्मान्नुड् द्विहल" इति नुट्। (अर्षिता। अर्षिष्यति। ऋषतु। आर्षत्)। "आटश्च" इति वृद्धिः। (ऋषेत्। ऋष्यात्)। मा भवानर्षीत्। "नेटि" इति न वृद्धिः। (अर्षिषिषति)। परत्वाद्गुणे कृते द्वितीयस्यैकाचो द्विर्वचनं "नन्द्राः" इति रेफस्य न भवति। (अर्षयति। आर्षिषत्। अर्षित्वा।) "न क्त्वा सेड्" इत्यकित्त्वम्। (ऋष्टः। ऋष्टवान्।) ईदित्त्वादनिट्त्वम्। (ऋषभः)। "ऋषिवृषिभ्यां किद्" इत्यभच् प्रत्ययः। (आर्षभ्यो) वत्सः। "ऋषभोपानहोर्ञ्यः" इति विकृतिवाचिन ऋषभशब्दाद्विकृत्यर्थायां प्रकृतौ ञ्यः। अत्र ऋषभावस्था विकृतिः। वत्सावस्था प्रकृतिः। (ऋषभतरः।) भारवहने मन्दशक्तिरनड्वान् "वत्सोक्ष" इत्यादिना ष्टरच्। अत्र तनुत्वेन भारवहनाशक्तिरुच्यते। (ऋक्षः)। "स्नुव्रश्चिकृत्यृषिभ्यः कित्" इति सः। उदात्त उदात्तेत्॥ ७॥

षान्तसेडीदित्प्रसङ्गात्तादृशमात्मनेपदिनमाह॥

जुषी प्रीतिसेवनयोः॥ जुषते। जुजुषे। जुजुषिषे। जोषिता। जोषिष्यते। जुषताम्। अजुषत। जुषेत। जोषिषीष्ट। अजोषिष्ट। अजोषिषाताम्। जुजुषिषते। जुजोषिषते। जुषित्वा। जोषित्वा। "रलोव्युपधात्" इति कित्त्वविकल्पः। (जोजुष्यते। जोजोष्टि। जोषयति। अजूजुषत्। जुष्यः।) "एतिस्तु" इत्यादिना क्यप्। (जुष्टः। जुष्टवान्।) ईदित्त्वादनिट्त्वम्। (सजूः। सजुषौ। सजुषः); सम्पदादित्वात् क्विप्। क्विबन्तस्य सहशब्देन बहुव्रीहौ "वोपसर्जनस्य" इति सभावः। "ससजुषोः" इति रुत्वे "र्वोरुपधायाः" इति दीर्घः। विद्यमानप्रीतिरित्यर्थः। यस्तु सहार्थे रूढः सजूःशब्दस्तस्य 'सजूः सहार्थे' इत्यूर्यादिपाठाद्गतित्वनिपातत्वयोः "कुगतिप्रादयः" इति समासे ल्यपि (सजूःकृत्य) इति भवति। सजूरित्येकवचनान्तस्य पाठात् द्विवचनबहुवचनान्तयोर्न गतित्वं नापि निपातत्वमित्यात्रेयः। द्विवचनबहुवचनान्तयोः सहार्थे वृत्त्यभावादेव गतित्वं निपातत्वं च न भविष्यतीति यत्किंचिदेतत्। रूढत्वादेव द्यमोघान्यासे सजूःकृत्य सहकृत्येत्यर्थं इत्युक्त्वा जुषतेर्जरतेर्वा क्विपि समानस्य सभाव इति व्युत्पत्तेरनियमो दर्शितः। (जोषम्) इति। स्वरादिपाठाद् घञि मान्तत्वं, स्वभावात्क्रियाविषयः॥ ८॥

ओविजी भयचलनयोः॥ प्रायेणायमुत्पूर्वः। उद्विजते। उद्विविजे। उद्विविजिषे। उद्विजिता। उद्विजिष्यते।) "विज इट्" इति इडादेरङ्गितः प्रत्ययस्य ङित्त्वान्न गुणः। (उद्विजताम्। उदविजत। उद्विजेत। उद्विजिषीष्ट। उदविजिष्ट। उद्विविजिषते। उद्विजित्वा)। क्त्वसनो "रलोव्युपधात्" इति कित्त्वस्य पाक्षिकत्वेऽप्यस्य "विज इड्" इति ङित्त्वमिति न गुणः। (उद्वेविज्यते। उद्वेविजीति। उद्वेवेक्ति। उद्वेजयति। उदवीविजत्। उद्विग्नः। उद्विग्नवान्)। ईदित्त्वादनिट्त्वम्। चोः कुत्वम्। ओदित्त्वान्निष्ठानत्वम्। (वेगितम्) इति वजन्ताद्वेगशब्दादितचि। (उद्वेजिताम्) इति ण्यन्तस्य निष्ठायामिटि। (वेवेक्ति, वेविक्ते)

इति जुहोत्यादौ पृथग्भावे ॥ ९ ॥

ओलजी ओलस्जी व्रीडायाम् ॥ (लजते । लेजे । लेजिषे । लजिता । लजिष्यते । लजताम् । अलजत । लजेत । लजिषीष्ट) । लिङ्ङौ । (अलजिष्ट । लिलजिषते । लालज्यते । लालजीति । लालक्ति । लाजयति । अलीलजत् । लजित्वा । लग्नः । लग्नवान्) । ईदित्त्वादनिट्त्वम् । ओदित्त्वान्निष्ठानत्वम् । अयं तवर्गपञ्चमादिरिति चान्द्राः । तन्मतेन नग्ननग्निकाशब्दव्युत्पत्तौ तवर्गादिरयं स्वामिना पठितो न तु स्वमतेन, यदाह । ओलजी ओलस्जी व्रीडइति चान्द्रा इति । आत्रेयमैत्रेयस्वामिसम्मताकारशाकटायनादयः सर्वे यणादिमेवाहुः । नग्नशब्दस्तु पृषोदरादित्वाद्वयत्ययेनेति मैत्रेयः । (लज्जते । ललज्जे । लज्जिता । लज्जिष्यते । लज्जताम् । अलज्जत । लज्जेत । लज्जिषीष्ट । अलज्जिष्ट । अलज्जिषाताम् । अलज्जिषत । लिलज्जिषते) । जश्त्वश्चुत्वे । (लालज्ज्यते । लालज्जीति । लालक्ति) । "स्कोः" इति सलोपः । (लज्जयति । अललज्जत् । लज्जित्वा । लग्नः । लग्नवान्) । निष्ठानत्वस्य सिद्धत्वात् "स्कोः" इति सलोपः । (लज्जा) । "गुरोश्च हलः" इत्यकारः । (लज्जितः) इतीतचि । शप्यनयोरपाठः स्वरार्थः । शपि हि "तास्यनुदात्तेन्ङित्" इत्यादिना लसार्वधातुकानुदात्तत्वे शपश्च पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तं स्यात् । शे तु प्रत्ययस्वरेण मध्योदात्तं भवति । (लजति, लाजति, लञ्जति, लाञ्जति,) इति चत्वारः शपि भर्त्सने । जुषादय उदात्ता अनुदात्तेतः ॥ १०-११ ॥

ओदिदुदात्तसोपधप्रसङ्गात्तादृशमपि परस्मैपदिनमाह ॥

ओव्रश्चू छेदने ॥ (वृश्चति) । "ग्रहिज्या"दिना सम्प्रसारणे पूर्वरूपत्वे "स्तोः श्चुना श्चुः" इति सकारस्य शकारः । (वव्रश्च । वव्रश्चतुः । वव्रश्चिथ । वव्रष्ठ । वव्रश्चिव) । संयोगान्तत्वेन लिटः कित्वाभावात् "ग्रहिज्या"दिना सम्प्रसारणन्न भवति । अभ्यासस्य "लिट्यभ्यास" इति सम्प्रसारणे "स्तोः श्चुना श्चुः" इति सकारस्य शकारः । "न सम्प्रसारणे सम्प्रसारणम्" इति पूर्वस्य निषेधाद्रेफस्यैव सम्प्रसारणप्रसङ्गः, उरदत्त्वस्याङ्गत्वादङ्गाक्षिप्तप्रत्ययेन परनिमित्तत्वात् "अचःपरस्मिन्" इति स्थानिवत्त्वेन सम्प्रसारणपरत्वात् । ऊदित्त्वात्सर्वत्रेड्विकल्पः । क्रादिनियमः प्रतिषिद्धविषय इति थल्यपि विकल्प एव भवति । तत्रेडभावे झलपरत्वात् "स्कोः" इति सलोपे व्रश्चादिना षत्वे ष्टुत्वम् । (व्रष्टा, व्रश्चिता । व्रक्ष्यति । व्रश्चिष्यति ।) अनिटि सलोपषत्वयोः "षढोः कः सि" इति कत्वं, (वृश्चतु । अवृश्चत् । वृश्चेत् ।) आशिषि (वृश्च्यात् । अव्रश्चीत् । अव्रश्चिष्टाम् । अव्रश्चिषुः । अव्रश्चीः । अव्रश्चिष्टम् । अव्रश्चिष्ट । अव्रश्चिषम् ।) "नेटि" इति न वृद्धिः । अनिटि तु (अव्राक्षीत्) पूर्ववत्सलोपषत्वयोः कुत्वम् । (अव्राष्टाम् ।) "झलो झलि" इति सिचो लोपे प्रत्ययलक्षणेन "षढोः कः सि" इति न भवति । तस्य वर्णाश्रयत्वाद्वर्णाश्रये च प्रत्ययलक्षणाभावात् । (विव्रश्चिषति । विव्रक्षति । वरीवृश्च्यते ।) "रीगृत्वतः" इति रीक् । (वाव्रष्टि । वाव्रष्टः) । व्रश्चतीति श्तिपा निर्देशाद् ङिद्वचनेषु न सम्प्रसारणम् । (व्रश्चयति । अवव्रश्चत् । व्रश्चित्वा)। "जिव्रश्च्योः क्त्वि" इति नित्यमिट् । "नक्त्वा सेट्" इत्यकित्त्वान्न सम्प्रसारणम् । (वृक्णः । वृक्णवान्) । "यस्य विभाषा" इत्यनिट्त्वम् । ओदित्त्वान्निष्ठानत्वं, तस्य पूर्वत्रासिद्धत्वात् झलपरत्वेन "स्कोः" इति सलोपः । "चोः कुः" इति कुत्वं च । [निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वक्तव्य] इति व्रश्चादिषत्वे निष्ठादेशस्य सिद्धत्वात् झलपरत्वाभावान्न षत्वम् । (व्रस्क्यः । व्रस्कः ।) ण्यद्घञौ । "चजोः कुघिण्ण्यतोः" इति कुत्वम् । अझलपरत्वात्सलोपो न भवति । वव्रश्चेत्यादौ वकारस्योपदेशसामर्थ्याद्रेफे वलि परतो लोपो न भवति । न च वृश्चतीत्यादौ सम्प्रसारणे झलपरत्वाभावाच्छ्रूवणमुपदेशस्य प्रयोजनं, तत्रापि सम्प्रसारणस्य क्ङित्प्रत्ययापेक्षत्वेन बहिरङ्गत्वेनासिद्धत्वादस्ति वलोपप्रसङ्ग इति । (वृक्षः) । "स्नुव्रश्चिकृत्यृषिभ्यः कित्" इति सप्रत्यये षत्वे कुत्वे, "स्कोः" इति सलोपश्च ॥ १२ ॥

व्यच व्याजीकरणे ॥ (विचति) । "ग्रहिज्यादिना" किति सम्प्रसारणम्, (विव्याच । विविचतुः । विव्यचिथ । विविचथुः । विविच । विव्याच । विव्यच । विविचिव ।) अपितो लिटः कित्त्वात्सम्प्रसारणे द्विर्वचनं, पिति तु "लिट्यभ्यासस्योभयेषाम्" इत्यभ्यासस्य । "व्यचेः कुटादित्वमनसि" इत्यञ्णित्प्रत्यये विधीयमानं ङित्त्वमनसीतिपर्युदासेन तत्सदृशे कृतीति हरदत्तादयः । तेन थल्युत्तमे णलि च णित्त्वाभावपक्षे नास्ति ङित्त्वं नापि कित्त्वं, पिल्लिट्त्वादिति न सम्प्रसारणम् । अन्ये तु प्रसज्यप्रतिषेधमाश्रयन्ते, तेनात्रापि ङित्त्वमस्तीति सम्प्रसारणं मन्यन्ते । प्रसज्यप्रतिषेधाश्रयणे प्रमाणं मृग्यं, वाक्यभेदप्रसङ्गात् । (व्यचिता । व्यचिष्यति । विचतु । अविचत् । विचेत् ।) आशिषि (विच्यात् । अव्याचीत् । अव्याचिष्टाम् । अव्यचीत् । अव्यचिष्टाम्) । "अतो हलादेः" इति वा वृद्धिः । (विव्यचिषति) । तासिस्यसिचां सनश्चाकृत्वान्न ङित्त्वमिति न सम्प्रसारणम्, प्रसज्यप्रतिषेधवादिनामत्रापि ङित्त्वात्सम्प्रसारणेन भाव्यम् । (वेविच्यते । वाव्यचीति । वाव्यक्ति) । श्तिपा निर्देशान्न सम्प्रसारणम् । (व्याचयति । अविव्यचत् । विचित्वा) । "न क्त्वा सेड्" इत्यकित्त्वेऽपि क्त्वः कृत्त्वाद्व्यचेः कुटादित्वमिति ङित्त्वेन सम्प्रसारणं गुणाभावश्च । (विचितः । उरुव्यचाः)।गतिकारकपूर्वस्यापीत्यसुन् । अनसीतिपर्युदासान्न ङित्त्वम् १३॥

उछि उञ्छे॥उच्छी विवासे ॥ (उञ्छति । उच्छति)इत्यादि । भूवादौ व्याख्यातौ१४-१५॥

ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु ॥ ऋच्छति) । "छे च" इति तुक्, तुकि यद्वक्तव्यं तत्सर्वं भूवादावृच्छतौ द्रष्टव्यम् । (आनर्च्छ । आनर्च्छतुः । आनर्च्छुः । आनर्च्छिथ । आनर्च्छिव ।) "ऋच्छत्यृताम्" इति लिटि गुणः, "तस्मान्नुड् द्विहलः" इत्यत्र द्विहल्ग्रहणमनेकहलुपलक्षणमिति नुडागम इति हरदत्तादयः । (ऋच्छिता । ऋच्छिष्यति । ऋच्छतु । आर्च्छत् । ऋच्छेत्) । आशिषि (ऋच्छयात् । मा भवानृच्छीत् । आर्च्छिष्टाम् । आर्च्छिषम् । ऋचिच्छिषति) । अभ्यासे खयः शेषः । (ऋच्छयति । मा भवानृचिच्छत्) । "समो गम्यृच्छि" इति सम्पूर्वादस्मादकर्मकात्तङ्, (समृच्छते । समानर्च्छे । समृच्छिता । समृच्छिष्यते । समृच्छताम् । समार्च्छत । समृच्छेत) । आशिषि (समृच्छिषीष्ट । समार्च्छिष्ट । ऋच्छित्वा । ऋच्छितः । ऋच्छितवान्) । ऋच्छां चकारेति प्रयोगो "गुरोश्च हल" इत्यकारप्रत्ययान्तादृच्छशब्दात्कर्मणि द्वितीयायां न त्वामि । यतोऽनृच्छ इत्याम्निषिध्यते ॥ १६ ॥

मिच्छ उत्क्लेशे ॥ उत्क्लेशः पीडा । (मिच्छति । मिमिच्छ । मिमिच्छतुः । मिच्छिता । मिच्छिष्यति । मिच्छतु । अमिच्छत् । मिच्छेत्) । आशिषि (मिच्छयात्) । अन्तरङ्गत्वात्पूर्वं तुगिति न लघूपधगुणः । वृद्धिस्तु "नेटि" इति निषिध्यते । मिमिच्छिषति, मेमिच्छ्यते । मेमिच्छीति । मेमेष्टि । मिच्छयति । अमिमिच्छत्) ॥ १७ ॥

जर्ज चर्च झर्झ परिभाषणभर्त्सनयोः ॥ (जर्जति । जजर्ज । चर्चति । चर्चिका) । संज्ञायां क्वुन्, ण्वुल्वा । (झर्झति । जझर्झ । जर्जरः । झर्झरः) । बाहुलकाद् रन्नन्तौ । आद्यन्तावपि चान्तावित्येके । चर्चतिझर्झत्योः शपि पाठः स्वरार्थ इत्युक्तम् ॥ १८-१९—२० ॥

त्वच संवरणे ॥ (त्वचति । तत्वाच । त्वचिता । त्वचिष्यति । त्वचतु । अत्वचत् । त्वचेत् । त्वच्यात् । अत्वाचीत् । अत्वचीत्) ॥ "अतो हलादेः" इति वा वृद्धिः । (तित्वचिषति । तात्वच्यते । तात्वचीति । तात्वक्ति । त्वाचयति । अतित्वचत् । त्वचः) । पचाद्यच् । त्वचं गृह्णाति ।(त्वचयति) । "सत्यापपाश" इत्यादिना णिच् । अत्र णिलोपस्य स्थानिवद्भावान्न वृद्धिः । (अतत्वचत्) इत्यग्लोपित्वादभ्यासस्येत्वं न । (त्वक्) ।"अन्येभ्योऽपि दृश्यन्ते" इति क्विप् । (वाक्त्वचम्) । "द्वन्द्वाच्चुदषहान्तात्" इति टच् ॥ २१ ॥

ऋच स्तुतौ ॥ (ऋचति) इत्यादि ऋषतिवत् । (अर्च्यम्,) ण्यति । "यजयाचरुचप्रवचर्चश्च" इति कुत्वनिषेधः । अत एव कुत्वनिषेधाज्ज्ञापकाद्दुपधलक्षणः कश्चन भवति । (ऋक) । पूर्ववत्क्विप् । ऋचो व्याख्यानम् (आर्चिकम्) । "द्व्यजृद्ब्राह्मण" इत्यादिना

भवव्याख्यानयोष्टक् । ऋचोऽर्द्धम् (अर्द्धर्चम्) । "अर्द्धं नपुंसकम्" इत्येकदेशिनार्द्धशब्दस्य षष्ठीसमासः । "ऋक्पूरब्धूः" इत्यादिना ऽकारः समासान्तः । "अर्द्धर्चाः पुंसि च" इति पुंनपुंसकयोरयम् । अनृचो माणवको ज्ञेयो बह्वृचश्चरणाख्यायामिति विशेषे अकारप्रत्ययस्य स्मरणाद् (अनृक्कं साम, बह्वृकं सूक्तम्) इत्यादौ शेषलक्षणः कवेत्र भवति । ऋक् च साम च (ऋक्सामे)। "अचतुर" इत्यादिना द्वन्द्वे ऽच् समासान्तः । "नस्तद्धित" इति साम्नष्टिलोपः ॥ २२ ॥

उब्ज आर्ज्जवे ॥ अयमुपध्मानीयोपध इति केचित् । तथा च "हयवरट्" इत्यत्र वार्तिकम् । [अयोगवाहानामट्सु णत्वं शर्षु जश्भावषत्वे] इति । अत्र भाष्यं—'शर्षु चोपदेशः कर्तव्यः । किं प्रयोजनं, जश्भावषत्वे । उब्जिरयमुपध्मानीयोपधः पठ्यते, तस्य जश्त्वे कृते (उब्जिता उब्जित्वा उब्जितुमुब्जितव्यम्)इत्येतद्रूपं यथा स्यादिति । शर्षु जश्भाव इत्यस्यायमभिप्रायः । शर्षु उपदेशात् झल्त्वाज्जश्त्वमिति । पुनश्च भाष्यम् । यद्युपध्मानीयोपधः पठ्यते । उब्जिजिषतीत्युपध्मानीयादेरेव द्विर्वचनं प्राप्नोतीति । जश्त्वस्यासिद्धत्वादुपध्मानीयादेर्द्विर्वचने जश्त्वेनोपध्मानीयस्य बत्वे उबिब्जिषतीति स्यादिति भावः । तथा कैयटे द्विर्वचने पूर्वत्र जश्त्वमसिद्धमथापि [पूर्वत्रासिद्धीयमद्विर्वचने] इति सिद्धं, सर्वथोबिब्जिषतीति प्राप्नोति । किं च अभ्युद्गः समुद्ग इति च न सिध्यतः । यद्यपि गमेर्दूर्व्युपसर्गाड्डेऽपि सिद्धस्तथापि अस्माद्धजि कृते उपध्मानीयस्य च जश्त्वे (अभ्युब्जः समुब्जः) इत्यपि स्याताम्, तदर्थम् [उपध्मानीयस्य च] इति वार्तिकेन कवर्गे परत उपध्मानीयस्य सकारो विधेयः स्यात्, तस्मिन् हि जश्त्वेन दत्वं भविष्यति । तस्मादयं दोपधः पठितव्यः । उक्तं च भाष्ये । यद्ययं दोपधः का रूपसिद्धिः, उब्जित्वा उब्जितुमुब्जितव्यमिति । असिद्धे भ उब्जेः । इदमस्ति "स्तोः श्चुना श्चुः" इति, ततो वक्ष्यामि भ उब्जेः । उब्जेः श्चुना सन्निपाते भो भवतीति, ततश्च "न न्द्राः" इति निषेधे भत्वस्यासिद्धत्वाद्दकारवर्जस्य द्विर्वचने पश्चाद्बत्वे उब्जिजिषतीतीष्टसिद्धिः । न चास्ति [पूर्वत्रासिद्धीयमद्विर्वचन] इति । "नन्द्रा" इत्यस्य द्विर्वचननिषेधरूपत्वात् । न चास्त्यभ्युद्गः समुद्ग इत्यत्र भत्वस्य प्रसङ्गः । तस्य कुत्वे पूर्वत्रासिद्धत्वात्, कृते चास्मिन् चवर्गयोगाभावात् । अपरे तु बकारोपधं पठन्ति । "नन्द्राः" इत्यत्र बकारस्यापि प्रतिषेधमुपसङ्ख्यक्षते । तेषामभ्युद्ग इत्यादौ दत्वमपि वक्तव्यम् । (उब्जति । उब्जांचकार । उब्जिता । उब्जिष्यति । उब्जतु । औब्जत् । उब्जेत्) । आशिषि (उब्ज्यात् । औब्जीत् । उब्जयति । मा भवानुब्जिजत् । न्युब्जिता शेरतेऽस्मिन्निति (न्युब्जो) रोगविशेषः ।) "भुजन्युब्जौ पाण्युपतापयोः" इति घञि कुत्वाभावो निपात्यते । (ओजः) । "उब्जेर्बलोपश्च" इत्यसुनि बलोपो गुणश्च निपात्यते । (ओजायते) । "कर्त्तुः क्यङ् सलोपश्च" इति क्यङ्सलोपौ । अत्रानुवृत्तस्य वाग्रहणस्य व्यवस्थितविभाषात्वान्नित्योऽत्र सलोपः । (ओजसा कृतम्) । "ओजस्सहोम्भस्तमसः तृतीयायाः" इत्यलुक् ॥ २३ ॥

उज्झ उत्सर्गे ॥ अयमपि दोपधः, जश्त्वं तु लाक्षणिकम् । (उज्झति) इत्यादि पूर्ववत् । (उद्ध्यो नदः) । "भिद्योद्ध्यौ नदे" इति कर्तरि क्यपि झकारस्य धकारो निपात्यते ॥२४॥

लुभ विमोहने ॥ विमोहनमाकुलीकरणम् । (लुभति । लुलोभ । लोब्धा) । "तीषसह" इतीड्विकल्पः । (लोभिष्यति । लुभतु । अलुभत् । लुभेत् । लुभ्यात् । अलोभीत् । लुलुभिषति । लुलोभिषति । लुभित्वा । लोभित्वा) । "रलो व्युपधात्" इति कित्त्वविकल्पः । (लोलुभ्यते । लोलोब्धि । लोभयति । अलूलुभत् । विलुभिताः) केशाः । "लुभो विमोहन" इति क्त्वानिष्ठयोर्नित्यमिट् । गार्ध्ये तु लुभ्यतीति गतम् ॥ २५ ॥

रिफ कत्थनयुद्धनिन्दाहिंसादानेषु ॥ (रिफति । रिरेफ) इत्यादि लुभिवत् । क्त्वायां "रलो व्युपधात्" इति न कित्त्वविकल्पः । "नोपधात्थफान्त" इत्यत्र नोपधग्रहणसामर्थ्यात्

यदि हि स्यात्किं नोपधग्रहणेन । न च ऋफ तृफ हिंसायामित्यृकारोपधो व्यावर्त्यः । त्रैशब्द्यं हि नः साध्यम्, (रिफित्वा रिम्फित्वा अर्फित्वा ।) इति । एतच्च सत्यसति नोपधग्रहणे भवत्येव । सति च नोपधस्य "न क्त्वा सेट्" इति प्रतिषेधे सति अर्फित्वेति भवति । नोपधस्य त्वस्मिन्विकल्पे रिफित्वा रिम्फित्वेति । असत्यपि नोपधस्य ग्रहणे सर्वत्रास्मिन्विकल्पे प्रवृत्तेऽपीदमेव रूपत्रयं भवति । रिहीति द्रमिडा इति स्वामी । अनिट्कारिकासु वामनश्च रिहिलुही धातुषु न पठ्येते कैश्चिदभ्युपगम्येते इति । अत्र न्यासे कैश्चिदित्यापिशलिप्रभृतिभिरिति । तस्मात्तावपि स्त एव । प्रयुज्यते च "शिशुं न विप्रा मतिभी-रिहन्ति" इति ॥ २६ ॥

तृप तृम्फ तृप्तौ ॥ आद्यः प्रथमान्त इति वामनः । यदाह तृप्यतिदृप्यती सुपमित्यनिट्कारिकायां श्यना निर्देशस्य व्यवर्त्यं दर्शयन् तुदादिषु यौ तृपिदृपी तावुदात्तावेवेति । आत्रेयमैत्रेयादयस्तु द्वितीयान्तं पठित्वा प्रथमान्तं वामनः पठतीत्याहुः । (तृपति । ततर्प । तर्पिता । तर्पिष्यति । तृपतु । अतृपत् । तृपेत् । तृप्यात् । अतर्पीत्) । "स्पृशमृशकृष" इति सिचो विकल्पनमङ्पवाद इति पौषादिकस्यैव । (तितर्पिषति । तरीतृप्यते । तर्तर्पि । तर्पयति । अतीतृपत् । अततर्पत् । उद्दृद्धा । तर्पित्वा । तृपितः । तृप्त्वा । तृप्त) इति तृप्यतेः । (तृम्फति) । शस्य ङित्वात् "अनिदिताम्" इति नलोपे "शे तृफादीनाम्" इति नुमागमः । येऽत्र सानुषङ्गाः पठ्यन्ते तृम्फादय इति, प्रकारवाच्यादिशब्दः, प्रकारश्च सादृश्यं, तच्च नकारानुषक्ततयेति हरदत्तः । (ततृम्फ । तृम्फिता । तृम्फिष्यति । तृम्फतु । अतृम्फत् । तृम्फेत्) । आशिषि (तृफ्यात्) । यासुटः कित्त्वान्नस्य लोपः । (अतृम्फीत् । तितृम्फिषति । तरीतृफ्यते) । "रीगृत्वतः" इति रीक् । (तरीतृम्फति । तृम्फयति । अततृम्फत् । तृफित्त्वा । तृम्फित्वा । तृफितः) । क्त्वायां "नोपधात्थफान्ताद्वा" इति कित्त्वविकल्पनात्पक्षे नलोपः ॥ २७-२८ ॥

तुप तुम्प तुफ तुम्फ हिंसायाम् ॥ (तुपति । तुम्पति । तुफति । तुम्फति) इत्यादि पूर्ववत् ॥ एषां भूवादौ पाठः स्वरार्थ इति तत्रैवोक्तम् ॥ २९-३०-३१-३२ ॥

दृफ दृम्फ उत्क्लेशे ॥ प्रथमः प्रथमान्त इति वामनस्तत्तृपतावुपपादितम् । अन्ये द्वितीयान्त इति । (दृफति । दृम्भति) इत्यादि ॥ ३३-३४ ॥

ऋफ ऋम्फ हिंसायाम् ॥ (ऋफति । आनर्फ । आनृफतुः । ऋम्फति । ऋम्फाञ्चकार । अर्पिफिषति)। सनि गुणे "न न्द्राः" इति रेफवर्जितस्य द्विर्वचनम् । (ऋम्पिफिषति)इत्यत्राप्यनुस्वारपरसवर्णयोरसिद्धत्वान्नकारवर्जितस्य द्विर्वचनम् । (अर्फित्वा । ऋम्फित्वा) इत्यादि पूर्ववत् ॥ ३५-३६ ॥

गुफ गुम्फ ग्रन्थे ॥ (गुफति । जुगोफ । गुम्फति । जुगुम्फ) इत्यादि ॥ ३७-३८ ॥

उभ उम्भ पूरणे ॥ (उभति । उवोभ । ऊभतुः) । "अभ्यासस्यासवर्णे" इति गुणविषये उवङ् । अन्यत्र सवर्णदीर्घः । (उम्भति । उम्भाञ्चकार) इत्यादि । (उभौ) । इगुपधात्कः । नित्यं द्विवचनान्तः । सर्वादित्वात्सर्वनामत्वं, तत्कार्याणि "सर्वनाम्नस्तृतीया" इत्यादीनि यथासंभवं नेयानि । उभाववयवावस्य उभयो मणिरित्यत्र "संख्याया अवयवे तयप्" इति तयपि तस्य "उभादुदात्तो नित्यम्" इत्ययजादेश उदात्तः । (उभाञ्जलि । उभयाञ्जलि । उभाहस्ति । उभायाहस्ति । उभापाणि । उभायापाणि । उभाबाहु । उभयाबाहु) । "द्विदण्ड्यादिभ्यश्च" इति बहुव्रीहाविच्प्रत्ययान्तता निपात्यन्ते । (उभाबाहु । उभयाबाहु) इत्यत्रैव निर्देशादिचो लोपः, प्रत्ययलक्षणेनेजन्तत्वादव्ययीभावत्वादव्ययत्वमिति न्यासे । द्विदण्डयादिगणपाठादेवैषां साधुत्वे सिद्धे "द्विदण्डयादिभ्यश्च" इति सूत्रमिजन्तत्वविज्ञानार्थमिति, तस्य च प्रयोजनमव्ययीभावसंज्ञेति हरदत्तादयः । तिष्ठद्गुप्रभृतिषु इजिति पठ्यते, एवं समुदायनिपातनाच्चार्थविशेषे एवावतिष्ठन्ते, तथा च वृत्तिः । (द्विदण्डि

प्रहरति । द्विमुसलि प्रहरति) । एवमुभाञ्जलीत्यादीनामपि प्रहारो ऽन्यपदार्थः । केनोभ्यते इति (कुम्भः) । कर्मणि घञ् । (अयस्कुम्भः) "अतः कृकमिकंसकुम्भ" इति "विसर्जनीयस्य सः" । अत एव कुम्भेतिनिर्देशात्कशब्दाकारस्य लोपः पररूपता वा । (कुम्भी) । गौरादित्वात् "जातेरस्त्री" इति वा ङीष् । (अयस्कुम्भी) । लिङ्गविशिष्टपरिभाषया सत्वम् । कुम्भीव नासिका ऽस्य (कुम्भीनसः) । "अञ् नासिकायाः संज्ञायाम्" इत्यादिना नासिकाया नसादेशोऽच् प्रत्ययश्च ॥ ३९–४० ॥

शुभ शुम्भ शोभार्थे ॥ (शुभति । शुम्भति) इत्यादि ॥ ४१–४२ ॥

दृभी ग्रन्थे ॥ (दृभति) इत्यादि । ईदित्त्वान्निष्ठायामनिट्त्वम् । (दृब्धः) अयमनिटि चुरादौ ॥ ४३ ॥

चृती हिंसाग्रन्थनयोः ॥ (चृतति । चचर्त । चचृततुः । चचर्त्तिथ । चर्त्तिता । चर्त्तिष्यति । चर्त्स्यति । चृततु । अचर्तीत् । चरीचृत्यते । चरीचर्ति । चरीचृतः । चर्त्तयति । अचीचृतत् । अचचर्त्तत् ।उर्ऋद्वा । चृतः । चृतवान्) । "यस्य विभाषा" इत्यनिट्त्वे सिद्धे ऽस्येदित्त्वेन तस्यानित्यत्वज्ञापनाद्भावित इति सिद्धमिति मैत्रेयः । स्वामिकाश्यपौ तु ईदित्त्वं (चरीचृतः, चरीचृतवान्) इति यङ्लुगन्तान्निष्ठायामनिट्त्वार्थमिति ॥ ४४ ॥

विध विधाने ॥ (विधति । विवेध । वेधिता । वेधिष्यति । विधतु । अविधत् । विधेत् । विध्यात् । अवेधीत् । विविधिषति । विवेधिषति । विधित्वा । वेधित्वा । वेविध्यते । वेवेद्धि । वेधयति । अवीविधत्) । "रलो व्युपधात्" इति क्त्वासनोः कित्त्वविकल्पः । विधिशब्दमस्मान्मैत्रेय आह । समर्थसूत्रे भाष्यं विधिरिति कोऽयं शब्दः, विपूर्वाद्धाञः कर्मसाधन इकार इति । अत्र कैयटे विध विधानइत्यस्यौणादिकेनूप्रत्ययान्तस्य निवृत्त्यर्थं विपूर्वाद्धाञ इत्युक्तं, स्वरे चानयोर्भेदः, इनूप्रत्ययान्तस्याद्युदात्तत्वात्, किप्रत्ययान्तस्यान्तोदात्तत्वात्, तस्यैव प्रयोगार्थमेवमुक्तमिति ॥ ४५ ॥

जुड गतौ ॥ तवर्गपञ्चमान्तमेके पठन्ति । दृश्यते च 'दृष्टिर्यो विश्वे मरुतो जुनन्ति'इति । (जुडति । जुजोड । जोडिता । जोडिष्यति।जुडतु । अजुडत् । जुडेत् । जुड्यात् । अजोडीत् । जुजुडिषति । जुजोडिषति । जोडित्वा । जुडित्वा । जोजुड्यते । जोजुडीति । जोजोड्ढि । जोडयति । अजूजुडत् । जुडितः ।) अयं बन्धने ङित्त्वार्थं कुटादौ पठिष्यते । प्रेरणे चुरादौ ॥४६॥

मृड सुखने ॥ (मृडति । ममर्ड । मर्डिता । मर्डिष्यति । मृडतु । अमृडत् । मृडेत् । मृड्यात् । अमर्डीत् । मिमर्डिषति । मरीमृड्यते । मरीमर्ड्ढि । मर्डयति । अमीमृडत् । अममर्डत्) उर्ऋद्वा । (मृडित्वा । मृडितः) "मृडमृध" इति क्त्वायाः कित्त्वम् । (मृडः ।) इगुपधलक्षणः कः । (मृडानी ।) "इन्द्रवरुण" इति ङीषानुकौ । (मृडीकं सुखं) मृडेः कीकन् । अयं क्र्यादौ च ॥

पृड च ॥ (पृडति) इत्यादि मृडिवत् ॥ ४८ ॥

पृण प्रीणने ॥ (पृणति । पपर्ण) इत्यादि । (लोकंपृणः) मूलविभुजादित्वात्कः । "लोकस्य पृण" इति मुम् ॥ वृण इति दन्त्योष्ठ्यादिरप्यत्र पठितव्यः । तथा च भाष्यं धात्वन्तरे पृणिवृणी इति । धात्वन्तरे इति तौदादिकावित्यर्थ इति कैयटे ॥ ४९ ॥

मृण हिंसायाम् ॥ (मृणति) इत्यादि । (मृणालम् ।) बाहुलकादालच्, गुणाभावश्च ॥ ५० ॥

तुण कौटिल्ये ॥ (तुणति । तुतोण । तोणिता) इत्यादि । तूण पूरणइति दीर्घोपध आकुस्मीयः ॥ ५१ ॥

पुण कर्मणि शुभे ॥ (पुणति) इत्यादि । (मातरि निपुणः ।) इगुपधलक्षणः कः । (पितरि निपुणः ।) "साधुनिपुणाभ्याम्" इति तद्युक्तात्सप्तमी । अप्रतेरित्यपनीय [अप्रत्यादियोगइति वक्तव्यम्] इत्युक्तम् । प्रत्यादयश्च प्रतिपर्यनव इति पाणिनिनोक्ताः, तेन तैर्योगे द्विती-

येव, (पितरं प्रति निपुण) इत्यादि। (आचारनिपुणः।) "पूर्वसदृश" इत्यादिना तृतीयासमासः (नैपुण्यम्)। ब्राह्मणादित्वात् ष्यञ्। षित्त्वान् ङीष्। (नैपुणी)। "हलस्तद्धितस्य" इति यलोपः। (नैपुणम्)। युवादित्वादण्। (अनिपुणः)। तत्पुरुषो बहुव्रीहिर्वा। तस्येदमा (नैपुणम्। अनैपुणम्)। "नञः शुचि" इत्यादिना पूर्वपदस्य वा वृद्धिरुत्तरपदस्य तु नित्यम्॥ ५२॥

मुण प्रतिज्ञाने॥ ५३॥

कुण शब्दोपकरणयोः॥ (मुणति। कुणति) इत्यादि। (कोणः) वीणादिवादनम्। "हलश्च" इति घञ्, आमन्त्रणे अयं कथादिः दीर्घोपधः संकोचने आकुस्मीयः॥ ५४॥

शुन गतौ॥ (शुनति) इत्यादि। (शुनकः)। औणादिकः क्वुन्॥ ५५॥

द्रुण हिंसागतिकौटिल्येषु॥ (द्रुणति। द्रुणः) खर्जुरः। इगुपधात् कः। (द्रुणी) कच्छपी। गौरादित्वान् ङीष्। (द्रोणः)। पचाद्यच्। (द्रोणी)। पूर्ववन् ङीष्। द्रोणस्य गोत्रमपत्यं (द्रौणिः। द्रौणायनः)। "द्रोणपर्वतजीवन्तादन्यतरस्याम्" इति फगिञौ। द्रोणं पचतीति (द्रौणी, द्रौणकी)। "तत्पचतीति च द्रोणादण् च" इत्यणठञौ। द्विद्रोणेन धान्यं क्रीणाति। "प्रकृत्यादिभ्य उपसंख्यानम्" इति तृतीया। अत्रापि द्वितीया प्राप्नोतीति कैयटे। द्वयोर्द्रोणयोः समाहारो (द्विद्रोणम्)। पात्रादित्वात् स्त्रीत्वाभावः॥ ५६॥

घुण घूर्ण भ्रमणे॥ (घुणति। घूर्णति) इत्यादि॥ (घोणते, घूर्णते) इति शपि॥५७-५८॥

षुर ऐश्वर्यदीप्त्योः॥ (सुरति। सुषोर। सुषुरतुः)। "आदेशप्रत्यययोः" इति प्रकृतेः षत्वम्। (सोरिता। सोपूर्यते। सोषोर्त्ति। सोरयति। असूषुरत्)। सुरन्तीति (सुराः)। इगुपधलक्षणः कः॥ ५९॥

कुर शब्दे॥ (कुरति) इत्यादि। अत्र "हलि च" इति दीर्घस्य "न भकुर्छुराम्" इति न निषेधः। करोतेस्तत्र ग्रहणमिति व्याख्यातृभिरभिधानात्॥ ६०॥

खुर च्छेदने॥ खण्डने चेति मैत्रेयः। (खुरति। खुरः)। इगुपधलक्षणः कः। (कल्याणखुरा)। "स्वाङ्गाच्चोपसर्जनात्" इति ङीषो "न क्रोडादिबह्वचः" इति निषेधः। (खुरणः)। [खुरखराभ्यां नस् वक्तव्यः] इति नासिकाया नस्भावः। "अञ् नासिकायाः संज्ञायाम्" इत्येव सिद्धे वार्तिकमचो निवृत्यर्थं, पक्षेऽच् प्रत्ययोऽपीष्यतइति वृत्तिः। तेन (खुरणसः) इत्यपि भवति॥ ६१॥

मुर संवेष्टने॥ (मुरति। मुरः)। पूर्ववत्कः (मुरी)। गौरादित्वात् ङीष्॥ ६२॥

क्षुर विलेखने॥ (क्षुरति। क्षुरम्) पूर्ववत्कः॥ ६३॥

घुर भीमार्थशब्दयोः॥ (घुरति। घोरः)। पचाद्यच्, "अकर्तरि च कारके" इति घञ् वा। (घुर्घुरः)। पूर्ववत्कः। "कृञादीनां के द्वे भवत" इति द्वित्वम्। पृषोदरादित्वान्न हलादिः शेषः॥ ६४॥

पुर अग्रगमने॥ (पुरति। पुरम्)। पूर्ववत्कः। (पुरी)। गौरादित्वान् ङीष्॥ ६५॥

वृहू उद्यमने॥ दन्त्योष्ठ्यादिरयम्। तथा हि "मूलमस्या बर्हि" 'सक्थ्या बृहन्मा मे बलं विवृहत' इति प्रयुज्यते। अन्ये तु बकारादिं पठन्ति। (वृहति। ववर्ह। ववृहतुः। ववर्हिथ। ववर्ढ)। ऊदित्वादिड्विकल्पः। झलि "हो ढः"। "झषस्तथोर्धो धः"। "ष्टुना ष्टुः"। "ढो ढे लोपः"। (वर्हिता। वर्ढा। वर्हिष्यति। वर्क्ष्यति) "षढोः कस्सि" इति कत्वम्, (वृहतु। अवृहत्। वृह्यात्। अवर्हीत्। अवर्हिष्टाम्)। अनिट्पक्षे "शल इगुपधाद्" इति क्सः। (अवृक्षत्। अवृक्षताम्। विवर्हिषति। विवृक्षति)। "हलन्ताच्च" इति कित्वान्न गुणः। (वरीवृह्यते। वरीवर्ढि,) इत्यादि। (वर्हयति। अवीवृहत्। अववर्हत्।) उदर्वृद्वा। (वर्हित्वा। वृड्ढ्वा)। "न क्त्वा सेट्" इत्यकित्त्वमिटि। (वृढः। वृढवान्)। "यस्य विभाषा" इत्यनिट्। "ढ्रलोपे" इति दीर्घः पूर्वाण इत्यत्र न भवति। (वहति)। बृंहतीति वृद्धी

शपि । वर्हतइति तत्रव प्राधान्ये । त्रय एते ओष्ठ्यादयः ॥ ६६ ॥

तृहू स्तृहू तृंहू हिंसार्थाः ॥ (तृहति । ततर्ह । स्तृहति । तस्तर्ह)। "शर्पूर्वाः खयः"। (तर्हिता । तर्ढा । स्तर्हिता । स्तर्ढा) इत्यादि वृहतिवत्। (तरीष्टृह्यते । तरीष्टर्ढि)। "आदेशप्रत्यययोः"इति प्रकृतेः षत्वम् । (तिस्तर्हिषति । तिस्तृक्षति) इत्यत्र तु "स्तौतिण्योरेव" इति नियमान्न षत्वम् । (तृहति) शस्य ङित्त्वात् "अनिदिताम्" इति नलोपः । (ततृंह । ततृहतुः । ततृंहिथ । ततृण्ढ) । धत्वढत्वष्टुत्वढलोपेषु नकारस्य "नश्चापदान्तस्य" इत्यनुस्वारे परसवर्णो णकारः । (तृंहिता । तृण्ढा । तृंहिष्यति । तृङ्क्ष्यति । तृहतु। अतृहत्। तृहेत्। तृह्यात्)।यासुटः कित्त्वान्नलोपः । (अतृंहीत्। अतृंहिष्टाम्) । अनिट्पक्षेऽप्यनिगुपधत्वात् क्सो नास्तीति सिचि ढत्वकत्वयोः सिचः षत्वं, नकारस्यानुस्वारपरसवर्णौ, वृद्धिः, (अताङ्क्षीत्। अताण्ढाम्) इत्यादि । (तितृंहिषति । तितृक्षति) । अनिट्पक्षे "हलन्ताच्च" इत्यत्र हल्ग्रहणस्य जातिवाचकत्वात् सनः किरवान्नलोपः । (तरीतृह्यते । तरीतृंहीति । तरीतृण्ढि) इत्यादि । तृंहयति) अततृंहत्। तृंहित्वा । तृण्ढ्वा) । इटि "न क्त्वा सेट्" इत्यकित्त्वम् । (तृढः । तृढवान्) । अत्र सानुषङ्गं मूर्धन्यादिं चतुर्थमपि ष्टृह इति धातुं केचित्पठन्ति । आत्रेयमैत्रेयादिभिरयं न पठ्यते । तृह हिंसार्थो रूधादौ ॥ ६७-६८-६९ ॥

इष इच्छायाम् ॥ के चिदुदितं पठन्ति । तस्य च प्रयोजनमिड्विकल्पे छविधौ चोदितोऽनुवाद इति, तद्विधानेऽपि तथा पठतो दैवादिकक्रैयादिकयोस्तौ न भवत इत्याहुः। न च क्त्वायामिड्विकल्पः प्रयोजनं, "तीषसह"इति तादाविड्विकल्पनात्। ये त्वनुदितं पठन्ति ते "तीषसह" इत्यत्राकारमात्रविकरणेन सहिना साहचर्यात्तादृशस्तौदादिक एव ग्रहीष्यतइतीतरयोरग्रहणमाहुः। तथा "इषुगमियमां छ" इत्यत्रापि "क्सस्याचि" इत्यतोऽचीत्यनुवर्तते, तच्च "ष्ठिवुल्कम्" इत्यतोऽनुवृत्तेन शितीत्यनेन विशेष्यतइति शिति विधीयमानं छत्वमपि तौदादिकस्यैव सम्भवति नेतरयोरित्याहुः । (इच्छति, इच्छेत्) । "इच्छार्थेभ्यो विभाषा वर्तमाने" इति लिङ्लटौ (इयेष, ईषतुः,) पिति तु परत्वाद् गुणे कृते "अभ्यासस्यासवर्णे" इतीयङ्। अन्यत्र सवर्णदीर्घः । (एषिता । एष्टा । एषिष्यति । इच्छतु । इच्छेत् । ऐषीत् । इच्छा)। "इच्छा" इति शप्रत्ययो यगभावश्च निपात्यते । (इष्टिः) इति बाहुलकात् क्तिच्। "तितुत्र" इतीड्निषेधः । (एषणी) । करणे ल्युट् । (इच्छुः) । "बिन्दुरिच्छुः" इत्युप्रत्ययान्तो निपात्यते । (एषित्वा, इष्ट्वा) । "तीषसह" इतीड्विकल्पः, "न क्त्वा सेट्" इत्यकित्त्वम् । (इष्टः । इष्टवान्) । "यस्य विभाषा" इत्यनिट्त्वम् । इष्यतीति श्यनि गतम् ॥ ७० ॥

मिष स्पर्द्धायाम् ॥ (मिषति। मिमेष । मेषिता । मेषिष्यति।मिषतु। अमिषत्। मिषेत्। मिष्यात्। अमेषीत्। अमेषिष्टाम् । मिमिषिषति । मिमेषिषति । मिषित्वा । मेषित्वा) । क्त्वासनोः कित्त्वविकल्पः । (मेमिष्यते ।,मेमेष्टि । मेषयति । अमीमिषत्। मेषः) । पचाद्यच् । (मेषी) । जातिलक्षणो ङीष् । (निमेषः) । घञ् ॥ ७१ ॥

किल श्वैत्ये ॥ श्वैत्यक्रीडनयोरिति मैत्रेयः । (किलति । चिकेल) इत्यादि मिषतिवत्। (किल्बिषम्) "किलेर्बुक्च" इति टिषच् बुक्चागमः ॥ ७२ ॥

तिल स्नेहने ॥ (तिलति । तितेल) इत्यादि । तेलतीति गतौ शपि ॥ ७३ ॥

चिल वसने ॥ (चिलति) इत्यादि। चेलतीति शपि ॥ ७४ ॥

चल विलसने ॥ (चलति) इत्यादि । (चलयति) इति कम्पने घटादित्वात्। ज्वलादिपठितस्यापीह पाठे प्रयोजनमुञ्छतीत्यादिवत्स्वरः, तत्र पाठः कर्त्तरि णविकल्पार्थः । (चलश्चाल) इति । आत्रेयस्तु तिलादित्रयमिह न पठति ॥ ४९ ॥

इल स्वप्नक्षेपणयोः ॥ इलति । इयेल । ईलतुः) । गुणविषये "अभ्यासस्यासवर्णे" इतीयङ् । (एलिता । एलिष्यति । इलतु । ऐलत्। इलेत्। इल्यात्। ऐलीत्। ऐलिष्टाम् । ऐ-

लिष्यत् । एलिलिषति) । गुणे कृते द्वितीयस्यैकाचो द्विर्वचनम् । (इला) पृथिवी । इगुपध-लक्षणः कः, टाप् । इल प्रेरणे चुरादौ ॥ ७६ ॥

विल सम्वरणे दन्त्योष्ठ्यादिः । (विलति । आविलम्) । वेलतीति वेलेः शपि गतम् । कल विल क्षेपइति चुरादौ ॥ ७७ ॥

बिल भेदने ॥ (बिलति) इति (बिलम्) । वेलतीति शपि । अयं चुरादौ चेत्यात्रेयः । मैत्रेयस्त्वत्रैव पपाठ नान्यत्र । ओष्ठ्यादिरयम् ॥ ७८ ॥

णिल गहने ॥ (प्रणिलति) । "उपसर्गादसमासेऽपि" इति णत्वम् । (निनेल । नेलिता) इत्यादि ॥ ७९ ॥

हिल भावकरणे ॥ भावकरणमभिप्रायसूचनम् । (हिलति । जिहेल) इत्यादि ॥ ८० ॥

शिल षिल उञ्छे ॥ आद्यस्तालव्यादिरितरो मूर्द्धन्यादिः । (शिलति । सिलति । सिषेल) । "आदेशप्रत्यययोः" इति प्रकृतेः षत्वम् । सेलतीति शपीत्यात्रेयः ॥ ८१ ॥

मिल श्लेषणे ॥ (मिलति) इत्यादि । मिल इति स्वरितेत्वये भविष्यति । तस्येह पाठे प्रयोजनं कर्त्रभिप्रायेऽपि क्रियाफले परस्मैपदम् ॥ ८२ ॥

लिख अक्षरविन्यासे ॥ (लिखति । लिलेख । लेखिता । लेखिष्यति । लिखतु । अलिखत् । लिखेत्) । आशिषि (लिख्यात् । अलेखीत् । लिलिखिषति । लिलेखिषति । लिखित्वा । लेखित्वा । लिखितः । लिखितवान् । लेखनः । लेखनी) । टित्त्वान् ङीप् । (रेखा, लेखा) । भिदादिपाठादङि गुणो लकारस्य वा रेफादेशः । (हल्लेखः) । कर्मण्यण् । "हृदयस्य हृल्लेख"इति हृद्भावः, लेख इत्यणन्तस्य ग्रहणाद्घञन्ते लेखशब्दे उत्तरपदे (हृदयलेखः) । इति भवति । अत्राण्ग्रहणादेवाणन्ते लेखशब्दे उत्तरपदे हृदयस्य हृद्भावे सिद्धे पुनर्लेखो(१)पादानम् 'उत्तरपदाधिकारे प्रत्ययग्रहणपरिभाषा न व्याप्रियत'इति ज्ञापनार्थं न तु घञन्तस्यापि ग्रहणार्थमिति प्रागप्युक्तम् । (दन्तलेखकः) । "नित्यं क्रीडाजीविकयोः" इति समासः । अत्र के चित्, कुटादिभ्य इत्यत्र कुटस्यादिः, कुटआदिर्येषामित्येकशेषवृत्त्या बहुव्रीहितत्पुरुषयोर्द्वयोरप्याश्रयणात् लिखितुं विश्वसृजोऽपि शक्तिहानिः, स्वयमेव लिखिष्यत इति समर्थयन्ते, तेषां लेखितेत्यादौ सर्वत्राञ्णित् प्रत्यये गुणाभावात् लिखितेत्यादि स्यात् । तच्च "रलो व्युपधात्" "ईश्वरेतो सुन्"इत्यत्र वृत्तौ (लेखित्वा लिखित्वा लिलेखिषति लिलिखिषति विलेखितुम्) इति दर्शनादा(२)लेखने इति निर्देशाच्च नार्हम् । हरदत्तश्च तत्पुरुषपक्षस्य दूषणत्वेन क्त्वासनोर्गुणदर्शनं "आलेखने" इति निर्देशं चाह । वर्द्धमानोऽप्यालेखन इति निर्देशात्तत्पुरुषपक्षो दुष्ट इत्याह । अत एव वृत्त्यादिविरोधात् [संज्ञापूर्वको विधिरनित्यः] इति लिखितेत्यादौ सर्वत्र कैश्चिद्गुणाभावस्य कथनमयुक्तम् । किञ्च लिखितुं, स्वयमेव लिखिष्यतीति द्वावेव प्रयोगौ प्रस्तुत्य यद्यवश्यमुपपादनीयं [संज्ञापूर्वको विधिरनित्यः] इति हरदत्तेनाभिधानाच्च । अत्रात्रेयः । "अर्थवेदसत्यानामापुग्" इति दीर्घोच्चारणादन्यत्रापि भवतीति केचिदिति । तेन लिखमाचष्टे लिखापयतीति भवति ॥ ८३ ॥

कुट कौटिल्ये ॥ (कुटति । चुकोट । चुकुटतुः । चुकुटिथ । चुकोट । चुकुट । चुकुटिव) । "गाङ्कुटादिभ्योऽञ्णिन्ङित्" इति अञ्णित्प्रत्ययस्य ङित्त्वान्न गुणः । उत्तमे णलि णित्त्वविकल्पनात्पक्षे ङित्त्वादगुणत्वम् । (कुटिता । कुटिष्यति । कुटतु । अकुटत् । कुटेत्) । आशिषि (कुट्यात् । अकुटीत् । अकुटिष्टाम् । चुकुटिषति । कुटित्वा) । "रलो व्युपधात्" इति कित्त्वविकल्पनात्पूर्वविप्रतिषेधेन कुटादिङित्त्वमिष्यते । तस्य ज्ञापकं सर्वत्र [सन्नन्तादात्मनेपदप्रतिषेध] इति वार्तिकम् । सर्वेषु पक्षेषु सन्नन्तादात्मनेपदं प्राप्नोति, (चुकुटिषति) "ङित"

---

(१) शब्देत्यधिकं पुस्तकान्तरे ।

(२) अपाच्चतुष्पाच्छकुनिष्वालेखने इति पुस्तकान्तरेऽधिकम् ।

इत्यात्मनेपदं प्राप्नोति तस्य प्रतिषेधो वक्तव्य इति । भाष्यञ्च यदि हि क्त्वं स्यात् किमनेनात्मनेपदप्रतिषेधवचनेनेति । तथा "अनुदात्तङित" इत्यत्रोपदेशानुवर्त्तनं च ङित्त्वस्य पूर्वविप्रतिषेधे प्रमाणम् । तस्य ह्यातिदेशिकं ङित्त्वं कुटादिभ्यो व्यावर्त्यम् । किञ्च ङित्त्वं कुटादिमञ्णितं प्रत्ययं आपेक्षते, कित्त्वं तु रलन्ताद्युपधाद्धलादेः परं सेटं सनमपेक्षत इति बह्वपेक्षम्, तस्मादल्पापेक्षं ङित्त्वमन्तरङ्गं च (चोकुट्यते । चोकुटीति । चोकोट्टि) गणेन निर्देशान्ङित्त्वं न यङ्लुकि । (कोटयति । अचूकुटत्) । णिचो णित्वान्न ङित्त्वम् । (कोट्यः । कोटः) । ण्यद्घञोर्ञ्णित्त्वादङित्त्वम् । (कुटपः) परिमाणम् । "उषिकुटिदलिकचिखजिभ्यः कपन्" इति कपन् । (कुटुरुः) वर्द्धकी पक्षी च । "कुटेः किच्च" इत्युरुः । कुटादित्वान्ङित्त्वादेव कित्वफले सिद्धे किद्वचनं तस्यानित्यत्वज्ञापनार्थन्तेन धुवतेरित्रप्रत्यये (धवित्रम्) इति गुणो भवतीत्याहुः । (कुड्मलम्) । "कुटिकुषिभ्यां क्मलन्" इति क्मलन् । (कुटरो) । मन्थविष्कुम्भः । बाहुलकादरः । (कोटरः।कोटरावणम्) "वनगिर्योः सञ्ज्ञायां कोटर" इति दीर्घः । "वनं पुरगा" इत्यादिना णत्वम् । अत्रैव च कोटरेति निर्देशादरे गुणः । (कुटिलम्) । बाहुलकादिलच् । (कुटिलिका) । कर्माराणां सन्दशिनी । सञ्ज्ञायां कन् । कुटिलिकया अगारान् हरतीति कौटिलिकः कर्मारः । "अण् कुटिलिकायाः" इत्यण् । (कुटी) । इन्नन्तात् कृदिकारादक्तिन" इति ङीष् । अल्पा कुटी, (कुटीरः) । "कुटीशमीशुण्डाभ्योरः" इति रः । कुट प्रतापने इत्याकुस्मीयः । कूट परितापे इति कथादिः । दीर्घोपधोऽयमपि ह्रस्वोपध इत्यात्रेयः । उभावपि दीर्घोपधाविति मैत्रेयः ॥ ८४ ॥

पुट संश्लेषणे ॥ (पुटति) इत्यादि कुटिवत् ॥ (पुटः, पुटिका) । अल्पापुटः (पुटिका) महांस्तु (पुटः) । [पुटक्तादीनामुपसंख्यानम्] इति समानाधिकरणसमासः । "अन्येषामपि दृश्यत" इति दीर्घः । प्रतिपत्राद्यपेक्षमेकस्याल्पत्वमहत्वे । अयं भाषार्थश्चुरादौ दण्डके । संसर्गार्थस्तु कथादौ ॥ ८५ ॥

कुच संकोचने ॥ अत एव निर्देशात् ल्युटि गुण इति काश्यपः । (कुचति । निकुचिता) इत्यादि । (संकोचः) । "न क्वादेः" इत्यकुत्वम् । कोचतीति शपि ॥ ८६ ॥

गुज शब्दे ॥ अव्यक्ते शब्दे इत्यात्रेयः । (गुजति) इत्यादि । (गोजः) । घञि "न क्वादेः" इति न कुत्वम् । गुञ्जतीति शपि ॥ ८७ ॥

गुड रक्षायाम् ॥ (गुडति) इत्यादि । (गुडः) इक्षुविकारः सन्नाहश्च । इगुपधलक्षणः कप्रत्ययो [घनर्थे कविधानम्] इति कर्मणि वा । (गुडितो हस्ती,) संजातसान्नाह इत्यर्थः । तारकादित्वादितच् । (गुडा स्नु(१)ही) टाप्, तत्प्रायाः केशा अस्य (गुडाकेशः) ॥ ८८ ॥

डिप क्षेपे ॥ (डिपति । डिडेप । डिपिता) इत्यादि । डिप्यतीति श्यनि ॥ ८९ ॥

छुर छेदने ॥ (छुरति । चुच्छोर । छुरिता) इत्यादि ॥ (छुर्यात् । छुर्यास्ताम्) इत्यादि । अत्र "हलि च" इति दीर्घस्य "न भकुर्छुराम्" इति निषेधः । (छुरिका) । "क्वुन् शिल्पिसंज्ञयोः" इति क्वुन् । (आच्छुरितकम्) । सोत्प्रासो हासः । निष्ठान्तात्संज्ञायां कन् ॥ ९० ॥

स्फुट विकसने ॥ (स्फुटति । पुस्फोट) । "शर्पूर्वाः खयः" इति खयः शेषः । (स्फोटते) इति शप्यात्मनेपदी । स्फोटतीति विशरणार्थः परस्मैपदी तत्रैव । भेदनार्थश्चुरादौ ॥ ९१ ॥

मुट आक्षेपप्रमर्दनयोः ॥ (मुटति । मुमोट । मुटिता) इत्यादि । मोटतीति प्रमर्दने शपि ९२

त्रुट छेदने ॥ (त्रुटति । तुत्रोट । त्रुटिता) इत्यादि । "वा भ्राश" इति शविषये वा श्यन् । (त्रुट्यति । त्रुट्यतु । त्रुट्येत् । अत्रुट्यत् । त्रोटिः ।) ण्यन्ताद् "अच इः" इत्यौणादिक इप्रत्ययः ९३

तुट कलहकर्मणि ॥ (तुटति । तुतोट । तुटिता) इत्यादि । (तुटिः) । "इक्कृष्यादिभ्यः" इत्यात्रेयः ॥ ९४ ॥

---

(१) वृक्षविशेषः ।

चुट छुट छेदने ॥ (चुटति । छुटति) इत्यादि । चोटतीति शपि ॥ ९५-९६ ॥

जुड बन्धने ॥ प्रेरणे चुरादिः (जुडति । जुजोड । जुडिता) इत्यादि ॥ ९७ ॥

कड मदे ॥ (कडति । चकाड । कडिता) इत्यादि । अस्य ङित्कार्याभावादिह पाठो डकारान्तमात्रानुरोधेन । कुटादिभ्योऽन्यत्रापि शक्यते पठितुम् । अयं भ्वादौ च । पुनः पाठफलमुञ्छतिवत् ॥ कण्डते इति च शपि ॥ ९८ ॥

लुट संश्लेषणे ॥ (लुटति । लुलोट) । लुण्टतीत्यालस्यप्रतिघातयोः शपि । लोटति लुट्यतीति विलोडने शपि श्यनि च । लोटतीत्युपघाते शपि । प्रतिघाते लोटते इति द्युतादौ । लुण्टतीति स्तेये शपि । गतावपि लुण्टतीति शपि । लुड इत्येके । अयमपि शपि गतौ ॥९९॥

कृड घनत्वे ॥ घनत्वं सान्द्रता । वसनइत्येके । (कृडति । चकर्ड । कृडिता) इत्यादि॥१००।

कुड बाल्ये ॥ (कुडति । चुकोड । कुडिता) इत्यादि ॥ १०१ ॥

पुड उत्सर्गे ॥ (पुडति) इत्यादि । मुड इत्यात्रेयः ॥ १०२ ॥

घुट प्रतीघाते ॥ अयं प्रथमान्तः । (घुटति । जुघोट । घुटिता) इत्यादि । (घोटकः) । ण्वुल् । (घोटः) । घञ् । अयं द्युतादावात्मनेपदी गतः ॥ १०३ ॥

तुड तोडने ॥ अयं तृतीयान्तः । प्रथमान्तः कलहकर्मार्थः पूर्वत्र पठितः । तोडनं भेदः । (तुडति । तुतोड । तुडिता) इत्यादि । तोडने तोडतीति शपि ॥ १०४ ॥

थुड स्फुड संवरणे ॥ (थुडति । तुथोड । थुडिता) इत्यादि ॥ (स्फुडति । पुस्फोड) । "शर्पूर्वाः खयः" इति खयः शेषः । (स्फुडिता) इत्यादि । खुड छुड इत्येके । अत्र कुड संघातइत्यात्रेयः, बाल्ये पठितस्येह पाठोऽर्थभेदादिति तस्याभिप्रायो द्रष्टव्यः । अत्रापठतां मैत्रेयादीनां धातूनामनेकार्थत्वादत्रापि वृत्तिर्भविष्यतीत्यभिप्रायः ॥ १०५—१०६ ॥

स्फुर स्फुल संचलने ॥ स्फुरतिस्फुलत्योरित्यत्र न्यासे स्फुर स्फुल चलने इत्यनुपङ्गं पठ्यते, अत्र केवलं शब्दो भिन्नोऽर्थस्त्वेक एव । आत्रेयस्तु स्फुर स्फुरणे, स्फुल संचलने इति पपाठ । (स्फुरति । निस्फुरति । निष्फुरति । विस्फुरति । विष्फुरति) "स्फुरतिस्फुलत्योर्निर्निविभ्यः" इति वा षत्वम् । निर्निसोः साधारणमुक्तमुदाहरणम् । (पुस्फोर । स्फुरिता । स्फुरिष्यति । स्फुरतु । अस्फुरत् । स्फुरेत्, स्फूर्यात्) । "हलि च" इति दीर्घः । (अपुस्फुरीत् । पुस्फुरिषति ।) सेट्त्वात् "हलि च" इति न दीर्घः । कुटादित्वात् "रलो व्युपधात्" इत्यत्र न भवति । (पोस्फूर्यते । पोस्फोर्ति) । दीर्घस्यासिद्धत्वाद्गुणः । (पोस्फूर्तः । स्फारयति । स्फोरयति) "चिस्फुरोर्णौ" इति वा ऽऽत्वम् । (अपुस्फुरत्,) आत्वपक्षे णौ कृतमभ्यासे स्थानिवदित्यभ्यासस्यौकारान्तत्वे ह्रस्व इत्युकारः । "ओः पुयण्जि" इति इत्वं न भवति, सकारेण पवर्गपरत्वस्य व्यवधानात् । एवं ण्यन्तात्सन्यपि पुस्फोरयिषति पुस्फारयिषतीति भवतः, मैत्रेयस्तु स्फुर स्फुरणे इति पृथक् पठित्वा स्फर इत्येके, अदुपधः, (स्फरति । पस्फार) इत्याह । (स्फुलति) इत्यादि स्फुरतिवत् । णत्वं त्वस्य न भवति । तथा "हलि च" इति दीर्घत्वमपि न भवति, अरेफान्तत्वात् ॥ १०७-१०८ ॥

स्फुड चुड व्रुड संवरणे ॥ मैत्रेयेणैते न पठ्यन्ते । आत्रेयादयस्तु पठन्ति । (स्फुडति । पुस्फोड) । खयः शेषः । (चुडति । चुचोड । व्रुडति । वुव्रोड) इत्यादि । अत्र क्रुड भृड निमज्जनइत्येके इत्यात्रेयः । मैत्रेयस्तु क्रुडं पठित्वा भृड इत्यप्येके इत्याह । (क्रुडति । क्रोडः) । घञ् । (क्रोडा) अश्वानासुरः, टाबन्तोऽयं स्वभावतो विशेषविषयः । कल्याणी क्रोडा यस्याः सा (कल्याणक्रोडा) । बहुव्रीहावुपसर्जनह्रस्वत्वे "न क्रोडादिबह्वचः" इति स्वाङ्गलक्षणो ङीष् निषिध्यते । क्रोडादिषु टाबन्तस्य पाठाद् भुजा·तामात्रवचनस्य क्रोडशब्दस्य बहुव्रीहौ स्वाङ्गलक्षणो ङीष्विकल्प एव भवति । (कल्याणक्रोडी, कल्याणक्रोडा) मयूरीति। (भृडति) इत्यादि । चक्षादय उदात्ता उदात्तेतः ॥ १०९-११०-१११ ॥

अथ सेटमात्मनेपदिनमाह ॥

गुरी उद्यमने ॥ (गुरते । जुगुरे । जुगुरिषे । गुरिता । गुरिष्यते । गुरताम् । अगुरत । गुरेत । गुरिषीष्ट । अगुरिष्ट । अगुरिषाताम् । जुगुरिषते । जोगूर्यते । जोगोर्त्ति । गोरयति । अजूगुरत्) । (खड्गापगारं युध्यन्ते, खड्गापगोरम्) इति वा, त्वरया खड्गमुद्यम्य युध्यन्त इत्यर्थः । "द्वितीयायां च" इति परीप्सायां णमुल्, "अपगुरोर्णमुलि" इति वात्वम् ॥ (गूर्णः । गूर्णवान्) । ईदित्त्वादनिट्त्वं, (गूर्तिः) । "तितुत्र" इतीण्निषेधः, । दीर्घोपधोऽयं चुरादौ, हिंसागत्योर्दिवादौ, ईदिदुदात्तोऽनुदात्तेत् ॥ ११२ ॥

निष्ठायामनिट्त्वसाम्यात् पुनः परस्मैपदप्रस्तावः ।

णू स्तवने । ह्रस्वान्तमात्रेयादयः पठन्ति । यथा तु भाष्यं तथा दीर्घान्तः । यदाह कुटादिसूत्रे तस्मान्नूत्वा धूवेत्येव भवितव्यमिति । (नुनाव । नुनुवतुः । नुनुविथ । नुविता । नुविष्यति) ङित्त्वेन गुणनिषेधत्वादुवङ् । (नुवतु । अनुवत् । नुवेत् । (नूयात् । अनुवीत् । नुनूषति) "सनि ग्रहगुहोश्च" इतीण्निषेधः । (नोनूयते । नानोति । नूत्वा । नूतः । नूतवान्) । "श्र्युकः किति" इत्यनिट्त्वम् ॥ ११३ ॥

धू विधूनने । अयं पूर्वश्चोदात्तः । (धुवति) इत्यादि नुवतिवत् । (धवित्रं) व्यञ्जनम् । "अर्त्तिलूधू" इति करणे इत्रः । "कुटेः किच्च" इत्यादि ज्ञापकात्कुटादिङित्त्वान्नित्यत्वात् द्गुण इति केचिदिति कुटतावुक्तम्, "विदिभिदि" इति सूत्रे हरदत्तस्तु ङित्वमेवेच्छन् (धुवित्रम्) इत्युवङमेवाह । प्राणा वै धवित्रमिति तु छान्दसमिति च ॥ ११४ ॥

कुटाद्युवर्णान्तपरस्मैपदिनिष्ठानिट्प्रस्तावादाह ॥

गु पुरीषोत्सर्गे ॥ (गुवति । जुगाव । जुगुवतुः । जुगुविथ । जुगुथ) । तासौ नित्यानिट्त्वाद्भारद्वाजनियमाच्च थलीड्विकल्पोऽन्यत्र क्रादिनियमान्नित्यमिट् । (गुता । गुष्यति । गुवतु । अगुवत् । गुवेत् । आशिषि (गूयात् । अगुषीत् । अगुताम् । अगुषुः) । झलि "ह्रस्वादङ्गात्" इति सिज्लोपः । (जुगूषति) इत्यादि । "अज्झनगमां सनि" इति दीर्घः । (गूनः । गूनवान्) "दुग्वोर्दीर्घश्च" इति निष्ठानत्वं दीर्घश्च ॥ ११५ ॥

ध्रु गतिस्थैर्ययोः ॥ (ध्रुवति) इत्यादि गुवतिवत् । (ध्रुवः) । पचाद्यच् । अत्र स्वाम्यादयो ध्रुव इति वकारान्तं धातुं पठन्ति । उक्तञ्च "ध्रुवमपाये" इत्यत्र हरदत्तेन ध्रु गतिस्थैर्ययोरित्यस्मात्पचाद्यच्, ये ध्रुव गतिस्थैर्ययोरिति पठन्ति, तेषामिगुपधलक्षणः कप्रत्यय इति, अस्मिन् पक्षे सेट् । (ध्रुवति । दुध्राव । दुध्रुवतुः । दुध्रुविथ । ध्रुविता । ध्रुविष्यति । ध्रुवतु । अध्रुवत् । ध्रुवेत्) । आशिषि (ध्रूव्यात्) । "हलि च" इति दीर्घः । (अध्रुवीत् । अध्रुविषाम् । अध्रुविषुः । दुध्रुविषति । दोध्रूव्यते ।) अयं गुवतिश्चानुदात्तौ उदात्तेतौ ध्रुवतिर्वान्तवादिनां सेट् ॥ ११६ ॥

कुङ् शब्दे ॥ केचिद्दीर्घान्तमिमं पठन्तीत्यात्रेयमैत्रेयौ । एवं स्वामिकाश्यपसुधाकरधनपालसंमताकारा अपि । शाकटायनस्तु कुङ् कूङ् शब्दे इत्युभयं पपाठ । तत्र ह्रस्वान्तो न्यासकारस्यापीष्टः। यदाह "इको झल्" इत्यत्र चुकूषत इत्यत्र दीर्घवचनमर्थवत् । तत्र "गाङ्कुटा"-दिसूत्रेण ङित्त्वाद्गुणो न प्रवर्त्तत इति दीर्घस्यावकाश इति । तन्मते (कुवते, चुकुवे) इत्यादि गुवतिवत् । हरदत्तस्य तु दीर्घान्त एवेष्टः । यदाह । कुटादिसूत्रे आकूतमिति दर्शनाद् दीर्घान्त इति, पुनः स एव "इको झल्" इत्यत्र ननु कुङ् शब्दे कुटादिश्चु कूषते इत्यस्ति दीर्घस्यावकाशः । दीर्घान्तोऽयमित्यवोचामेति । अत्र कैयटेऽपि । न च दीर्घविधानस्य कुङ् शब्दे इति धातुरवकाशश्चुकूषत इति, तस्मात्कूङ्शब्द इति पाठस्तत्र कुटादित्वान्ङित्त्वे सति गुणाभावाद्दीर्घस्य श्रवणं सिद्धं, लोकवेदयोश्चाकूतशब्दस्य प्रयोगो दृश्यत इति । अत्र पक्षेऽयं सेट् । (कुवते) । इत्यादि नुवतिवत् ॥ ११७ ॥

वृत्॥ कुटादयो वृत्ता इत्यर्थः ॥

ङित्प्रसङ्गादाह—

पृङ् व्यायामे ॥ ओष्ठ्यादिः । प्रायेणायं व्याङ्पूर्वः । (व्याप्रियते) "रिङ् शयग्लिङ्क्षु" इति रिङादेशः, तस्येयङादेशः । (व्यापप्रे । व्यापप्राते । व्यापर्त्ता । व्यापर्त्तासे । व्यापरिष्यते) । "ऋद्धनोः स्ये"इतीट् । (व्याप्रियताम् । व्याप्रियत । व्याप्रियेत) । आशिषि (व्यापृषीष्ट । व्यापृषीयास्ताम् । व्यापृषीरन् । व्यापृत । व्यापृषाताम् । व्यापृषत) । "ह्रस्वादङ्गात्" इति झलि सिचो लोपः । "उश्च" इति लिङ्सिचोः कित्त्वान्न गुणः । (व्यापुपूर्षते) । "इको झल्" इति सनः कित्वात् "अज्झनगमां सनि" इति दीर्घे "उदोष्ठ्यपूर्वस्य" इत्युत्वे रपरत्वे "हलि च" इति दीर्घः । (व्यापेप्रीयते) । "रीङ् ऋतः" इति रीङ् । (व्यापर्पर्ति) इत्यादि । "ऋतश्च" इति रुग्रिग्रीकः । (व्यापारयति । व्यापीपरत् । व्यापृत्य । व्यापृतवान्) ॥११८॥

मृङ् प्राणत्यागे ॥ (म्रियते । ममार । मम्रतुः । मम्रुः । ममर्थ । मम्रिव) क्रादिनियमादिट् । थलि तु "अचस्तास्वत्थल्यनिटो नित्यम्" इतीण् न भवति । (मर्त्ता । मरिष्यति । "ऋद्धनोः"इतीट् । (म्रियताम् । अम्रियत । म्रियेत । मृषीष्ट । अमृत । अमृषाताम्) झलि सिचो लोपः । "उश्च" इति लिङ्सिचोः कित्त्वान्न गुणः । "म्रियतेर्लुङ्लिङोश्च" इति लुङ्लिङ्शिद्विषयएव तङिति नियमादतोऽन्यत्र परस्मैपदमेव । यद्येवमपूर्वविधिरस्तु सूत्रं किं ङित्वेन तत्क्रियते 'तास्यनुदात्तेन्ङिददुपदेशाद्' इति विशेषणार्थं, तेन माहिमृतेत्यत्र लसार्वधातुकानुदात्तत्वे "धातोरन्त" इति धातोरुदात्तत्वं भवति । अत एव ङित्वसामर्थ्यात्सिज्लोपस्य पूर्वत्रासिद्धत्वं नेति लसार्वधातुकस्य ङितः परत्वं भवति। अन्यथा प्रत्ययाद्युदात्तत्वे धातुरनुदात्तः स्यात्। न च "तिङ्ङतिङः"इति सर्वनिघातप्रसङ्गः । "हिच"इति निषेधात्। (मुमूर्षति) । सनः कित्त्वे दीर्घोत्वरपरत्वदीर्घाः । "पूर्ववत्सनः" इति तङत्र न भवति, नहि म्रियतिमात्रमात्मनेपदस्य निमित्तं, किन्तु शिल्लुङ्लिङोऽपि । न चात्र ते म्रियतेरनन्तराः सम्भवन्ति । (मरीम्रियते,) "रीङ् ऋत" इति रीङ् । (मर्मरीति । मर्मर्ति) इत्यादि । (मारयति । अमीमरत् । मृत्वा । मृतः । मृतवान्) । न म्रियते इति (अमृतम्) । "मतिबुद्धिपूजार्थेभ्यश्च" इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वाद्वर्त्तमाने क्तः । नञ्समासः । (अमरः) । पचाद्यच् पूर्ववत्समासः । (मृत्युः) । "भुजिमृङ्भ्यां युक्त्युकौ" इति त्युक् अनुदात्तावात्मनेभाषौ ॥ ११९ ॥

रेफवदनिट्प्रकरणादाह ॥

रि पि गतौ । (रियति) । लघूपधगुणादन्तरङ्गत्वादियङादेशः । (रिराय । रियतुः । रियुः) । "एरनेकाच" इति यण् । (रिरयिथ । रिरियिव । रिरेथ । रिरियिम) । क्रादिनियमादिट् । थलि "अचस्तास्वत्" इतीण्निषेधः । भारद्वाजनियमाच्च विकल्पः । रियतुरित्यादौ यणो बहिरङ्गलक्षणस्यासिद्धत्वाद्रेफस्य हल्परत्वाभावात् "उपधायां च" इति न दीर्घः । (रेता । रेष्यति । रियतु । अरियत् । रियेत्) । आशिषि । (रीयात्) । "अकृत्सार्वधातुकयोः" इति दीर्घः । (अरैषीत् । अरैष्टाम् । अरैषुः । रिरीषति ।) सनः कित्त्वे "अज्झनगमाम्" इति दीर्घः । (रेरीयते । रेरयीति । रेरेति । राययति । अरीरयत्) । (पियति) इत्यादि रियतिवत् ॥ १२० ॥ १२१ ॥

धि धारणे ॥ (धियति । दिधाय । दिध्यतुः । दिध्युः । दिधयिथ । दिधेथ । धेता) इत्यादि ॥ १२२ ॥

क्षि निवासगत्योः ॥ (क्षियति । चिक्षाय । चिक्षियतुः । चिक्षियुः । चिक्षयिथ । चिक्षेथ) । संयोगपूर्वत्वान्न यणादेश इतीयङ् । (क्षेता) इत्यादि रियतिवत्। (प्रक्षीय) "क्षियः" इति ल्यपि दीर्घः । (क्षीणो देवदत्तः)। अकर्मकत्वाद्गत्यर्थत्वाद्वा कर्तरि क्तः "निष्ठायामण्यदर्थे"इति दीर्घः। ण्यदर्थो भावकर्मणी "क्षियो दीर्घाद्"इति निष्ठानत्वम् । (इदमेषां क्षीणं) "क्तोऽधिकरणे च"इति ध्रौव्यार्थत्वाद्गत्यर्थत्वाद्वाधिकरणे क्तः । दीर्घत्वनत्वे पूर्ववत् । भावे तु क्षितं, ण्यदर्थत्वेन दीर्घाभावान्न निष्ठानत्वं, (क्षीणायुर्नृपलः । क्षितायुर्नृपलः) । (क्षीणकः । क्षितकः) । क्तान्तादनुकम्पायां कन् , "वा क्रोशदैन्ययोः" इति दीर्घविकल्पः, पूर्ववद्दीर्घनत्वे । (क्षयी) । "जिदृ-

क्षि" इत्यादिना इनः । रियत्यादयोऽनुदात्ता उदात्तेतः ॥ क्षयतीति गतं शपि ॥ १२३ ॥

षकारवत्परस्मैपदिप्रसङ्गात्तादृशं सेटमाह ॥

षू प्रेरणे ॥ (सुवति । सुवतः । सुवन्ति । सुवसि । सुवामि । सुपुवति,) "उपसर्गात्सुनोतिसुवति" इति षत्वम् । (सुषाव । सुपुवतुः । सुषविथ । सुपुविव । अभ्यासात्परस्य "आदेशप्रत्यययोः" इति षत्वम् । (सुसुषाव । विसुषाव) "उपसर्गात्"इति षत्वमभ्यासस्य "स्थादिष्वभ्यासेन चाभ्यासस्य" इति नियमान्न भवति । (सविता । सविष्यति । सुवतु । असुवत् । अभ्यषुवत्) । "प्राक्सितादड्व्यवायेऽपि"इति षत्वम् । (सुवेत् । सूयात् । असावीत् । असाविष्टाम् । अभ्यषावीत्) । लङ्वत्षत्वं, (सुसूषति) । "स्तौतिण्योः"इति न षत्वम् । (अभिसुसूषति) । पूर्ववत्स्थादिनियमादभ्यासस्य न षत्वम् , प्रकृतेश्च"स्तौतिण्योः"इति नियमात् "सनि ग्रहगुहोश्च"इत्यनिट्त्वात्"इको झल्"इति सनः कित्त्वम् । (सोपूयते । सोषोति । सावयति । असूषवत् । सूत्वा । सूतः । सूर्यः) । "राजसूय" इत्यादिना क्यपि रुडागमः । सूर्यस्य स्त्री देवता (सूर्या ।) [सूर्याद्देवतायां चाब्वक्तव्यः] इति चाप् । पुंयोगङीषोऽपवादः । अदेवतायां तु ङीषेव (सूरी मानुषी) इति । *"सूर्यतिष्य"* इति तद्धिते ईति च भसंज्ञानिमित्ते यलोपः। सूर्यस्येदं (सौर्यम्)इत्यत्र [सूर्यस्य छे च ङ्यां च]इति नियमान्न लोपः।यद्यप्यत्र "यस्येति च"इत्यल्लोपस्य यलोपविधिम्प्रति न स्थानिवदिति स्थानिवत्त्वनिषेधाद्यकारो नोपधस्तथापि "असिद्धवदत्राभात्"इत्यसिद्धत्वादुपधात्वादस्ति लोपप्रसङ्गः, (सौरी बलाका) इत्यत्र तु "तेनैकदिक्" इत्यणि ङीप्यणो "यस्येति" इतिलोपस्य पूर्ववदसिद्धत्वादुपधायकार इति तस्य लोपः, इकारपरत्वात् । न चाणि यो यस्येतिलोपस्तस्यासिद्धत्वादनुपधात्वमिति शङ्क्यम् । अण्यल्लोपो यलोपस्त्वीतीति व्याश्रयत्वेनासिद्धत्वाप्रसङ्गात् । न च स्थानिवद्भावेनोपधात्वभङ्गः । यलोपविधौ तस्य निषेधात् । नन्वेवमपि यकारः सूर्यस्योपधा न भवति किन्त्वेणन्तस्येति लोपो न स्यात् । नैष दोषः । नात्र सूर्यादिभिरुपधां विशेषयिष्यामः किन्तु भसंज्ञकेन, भस्योपधा यो यकारो वस्तुतः सूर्यादिसम्बन्धीति । एवं च सौरीयमित्यत्रापि अणन्ताच्छे पूर्ववद् यलोपः सिध्यति । 'सौर्यं हिमवतः शृङ्गं' इत्यत्र पूर्ववदणि । "नपुंसकाच्च" इति शीभावे पूर्ववदीति प्राप्तो यलोपो ङ्यामितीकारस्य विशेषणान्न भवति । 'सौरो मन्त्रः' इति प्रयोगस्तु सूरशब्दादणि द्रष्टव्यः । (प्रसवी) । "जिदृक्षिवि"इत्यादिनेनिः । (सवित्रम्) । "अर्त्तिलू" इति इत्रः । (सूरः) । "सूसूधागृधिभ्यः क्रन्" इति क्रन् । सूरिस्तु "सूङः क्रिः" इति, पूङ उक्तः, सूते सूयतइति लुक्श्यनोः ॥ १२४ ॥

कॄ विक्षेपे ॥ (किरति । किरतः) । "ऋत इद्धातोः" इतीत्वम् । (चकार । चकरतुः । चकरिथ । चकार । चकर । चकरिव ।) "ऋच्छत्यॄताम्" इति लिटि गुणः, णिति पूर्वविप्रतिषेधेन "अचो ञ्णिति"इति वृद्धिः, कृते वा गुणे "अत उपधायाः" इति वृद्धिः । (करिता, करीता, करिष्यति । करीष्यति) । "वॄतो वा" इतीटो वा दीर्घः । (किरतु । अकिरत् । किरेत् । कीर्यात्) । इत्वे "हलि च" इति दीर्घः । (अकारीत् । अकारिष्टाम्) सिचि वृद्धिः । "वॄतो वा" इतीटो दीर्घस्य "सिचि च परस्मैपदेषु" इति निषेधः । (चिकरिषति) । "सनि ग्रहगुहोश्च" इति चशब्दादुगन्तलक्षणेण्निषेधे प्राप्ते तदपवाद "इट् सनि वा" इति विकल्पे च प्राप्ते "किरश्च पञ्चभ्य" इति नित्यमिट् 'अस्य दीर्घत्वं नेच्छन्तीति वामनः, हरदत्तोऽपीष्टिरेवेयमिति । भागवृत्तौ त्वत्रापि दीर्घविकल्पो दृश्यते । (चेकीर्यते) । परत्वादित्वादौ द्विर्वचनम् । (चाकरीति । चाकर्त्ति) । अभ्यासस्य ह्रस्वोरदत्वहलादिशेषेषु । "दीर्घोऽकितः" इति दीर्घः । "ऋतश्च" इति अभ्यासस्य रुगादिविधौ तपरकरणसामर्थ्याद्दकारान्तस्याङ्गस्य योऽभ्यास इति सूत्रार्थव्यवस्थापनादत्राभ्यासस्य ह्रस्वत्वेन ऋकारान्तत्वेऽपि तदाश्रयो रुगादिर्न भवति अङ्गस्य दीर्घान्तत्वात् । एवं तरत्यादावपि प्रतिपादितम् । (कारयति । अचीकरत्) ॥ (अवकिरते हस्ती स्वयमेव, अवाकीर्ष्ट हस्ती स्वयमेव,) [भूषाकर्म-

किरादिसनां वोपसंख्यानम्] इति यक्चिणोः प्रतिषेधः । हस्तिनं कश्चित्पांश्वादिनाऽवकिरति तत्र सौकर्यातिशयाद्धस्ती कर्तृत्वेन विवक्ष्यतइति कैयटे । अत्र सिचो "लिङ्सिचोरात्मनेपदेषु" इतीड्विकल्पः । इट्पक्षे सिचः कित्वाभावाद्गुणः । (अवाकरिष्ट) इत्यादि, "वृत" इतीटो दीर्घपक्षे (अवाकरीष्ट) इत्यादि त्रैरूप्यं, लिङि "न लिङि" इति दीर्घनिषेधात् "लिङ्सिचोरात्मनेपदेषु" इतीटोऽभावाभावाभ्यां द्वैरूप्यम् , (अवकीर्षीष्ट, अवकरिषीष्ट) इति । अनिट्पक्षे "लिङ्सिचोः" "उश्च" इति कित्त्वाद्गुणाभावे "ऋत" इतीत्वम् । (अपस्किरते वृषो हृष्टः । अपस्किरते कुक्कुटो भक्षार्थी । अपस्किरते श्वा आश्रयार्थी) । "किरतेर्हर्षजीविकाकुलायकरणेषु"इति तङ् । "अपाच्चतुष्पाच्छकुनिष्वालेखने" इति अपात्किरतौ परे कात्पूर्वः सुट्, अत्रापि "किरतेर्हर्षजीविकाकुलायकरणेषु"इति पठ्यते । तत्र किरत्यर्थस्य हर्षो हेतुत्वेन विषयः, इतरे फलत्वेनेति व्याख्याकाराः । तत्र हृष्टत्वात् वृषभो विलिख्य विक्षिपतीत्यर्थः । इतरोऽपि कुक्कुटः श्वा च जीविकायै कुलायकरणाय च विलिख्य विक्षिपतीत्यर्थः । (अपचस्करे । अपास्किरत) । "अडभ्यासव्यवायेऽपि"इति सुट् । लुङि तु कर्मकर्तरि चेड्दीर्घयोर्विकल्पनात्त्रैरूप्यम् । (अपास्कीर्ष्ट, अपास्करिष्ट, अपास्करीष्ट) इति । आशिषि लिङ्यपि "लिङ्सिचोः" इतीटो विकल्पे "न लिङि"इति दीर्घनिषेधे च कर्मकर्तृवद् द्वैरूप्यम् । (अपस्कीर्षीष्ट, अपस्करिषीष्ट) इति । अनिट्पक्षे पूर्ववत् "उश्च"इति लिङ्सिचोः कित्वादि । (अपस्करिता । अपस्करीता) इत्यादि । (अपचिस्करिषते) । "किरश्च" इति "इट् सनि वा"इतिविकल्पं बाधते । अस्येटो दीर्घो नेत्युक्तम् । (अपचेस्कीर्यते । अपचाकर्ति) । किरताविक्श्तिपा निर्देशादत्र सुण्न भवति । (अपस्कारयति, अपाचिस्किरत्) । अडभ्यासाभ्यामुभाभ्यां व्यवधानेऽपि सुड् भवति । (उपस्किरति श्वापदः) । (प्रतिस्किरति,) "हिसायां प्रतेश्च" इति किरतेः कात्पूर्वः सुट्, चकारेणोपः समुच्चीयते । तथा विक्षिपति यथा हिंसामनुबध्नातीत्यर्थः । प्रतेः सुट्, "उपसर्गात्" इत्यादिना षत्वं "परिनिविभ्य" एव सुटः षत्वं न प्रतेः । (उपस्कारं काश्मीरका लुनन्ति,) विक्षिप्य लुनन्तीत्यर्थः । "किरतौ लवने" इति सुट् । णमुलप्यत्रेष्यते, तथा च वृत्तिः–'णमुलप्यत्र वक्तव्यः' इति । (अवस्करः) । "ऋदोरप्" । काष्ठादिना भाण्डादिभ्यो यदन्नमलमपकृष्य भूमौ विक्षिप्यते तदन्नमलमवस्कर उच्यते, तद्योगाद्देशोऽपि । "वर्चस्के ऽवस्कर" इति सुड् निपात्यते, अन्यत्र (अवकरः) ब्रह्मचारिणः स्त्रियां रेतःसेकः । (अपस्करः) । पूर्ववदप् । "अपस्करो रथाङ्गम्" इति सुट् । (विष्किरः, विकिरः) । "इगुपधज्ञाप्रीकिरः कः" इति कः । "विष्किरः शकुनिर्विकिरो वा" इति सुड्विकल्पः, (उत्कारो धान्यस्य निकारो धान्यस्य) । "कॄ धान्ये" इति उन्योरुपपदयोर्घञ् । अन्यत्र उत्करो निकर इत्येव भवति । (कीर्णः । कीर्णवान्) । "श्र्युकः किति" इतीण्निषेधादित्वरत्वदीर्घेषु निष्ठानत्वम् । (कीर्णिः) । "तितुत्र" इत्यनिट्त्वम् , ऋल्ल्वादिभ्यः क्तिन्निष्ठावदिति नत्वम् , अत एव निष्ठावद्भावाद्वाऽनिट्त्वम् , अवकीर्णमनेनेति (अवकीर्णी) । "इष्टादिभ्यश्च" इति तृतीयार्थे प्रथमान्तादिनिः । अवकीर्णं नाम स्त्रियां ब्रह्मचारिणा रेतसो विक्षेपः । (कुरुः) । "कृग्रोरुच्च" इति उप्रत्ययो धातोश्चोकारान्तादेशो रपरत्वं च, (कौरवः) । प्राग्दीव्यतीयोऽण् अपत्यादन्यत्र । अपत्ये तु (कौरव्यः) । तत्र "कुर्वादिभ्यो ण्यः" इति ण्यः । अत्राक्षत्रियकुरोर्ग्रहणं, तेनास्य तद्राजसंज्ञाया अभावाद्बहुषु लुङ् न भवतीति कौरव्या इति भवति, क्षत्रियस्य तु "कुरुनादिभ्यो ण्यः" इति ण्यः, तस्य "ते तद्राजाः" इति तद्राजत्वात् "तद्राजस्य बहुषु तेनैवास्त्रियाम्" इति बहुषु लुकि कुरव इति भवति । 'कौरव्याः पशव, इति भट्टनारायणप्रयोगश्चिन्त्यः । ब्राह्मणात्वारोपान्न लुगिति समर्थनार्थो न पुष्यति, स्त्रियां (कुरूः) । "स्त्रियामवन्तिकुन्तिकुरुभ्यश्च" इति तद्राजस्य लुक्, 'गोत्रं च चरणैः सह' इति जातित्वादुकारान्तत्वादूङ्, अत्र तद्राजस्य "कौरव्यमाण्डूकाभ्यां च" इति ष्फः, आयनादेशः, षित्वान्ङीप्, (कौरव्यायणी,) "ण्यक्षत्रियार्षञितो यूनि लुग-

णिञोः" इति लुकि पिता पुत्रश्च कारव्यः । अयमप्यक्षत्रियकौरव्यस्य, क्षत्रियस्य तु तिकादिपाठात्फिञा भाव्यं (कौरव्यायणिः) इति, तत्र ह्यौरसशब्देन क्षत्रियवचनेन साहचर्यात्कौरव्यशब्दोऽपि तादृशो गृह्यते । यस्तु जनपदवाची कुरुशब्दस्तस्य "कच्छादिभ्यश्च" इति भवादौ शैषिकोऽण्, जनपदवुञोऽपवादः । (कौरवो गौरिति) । भवादौ मनुष्ये तत्स्थे कच्छादिभ्यो "मनुष्यतत्स्थयोर्वुञ्" इति वुञ्विधानात् (कौरवको मनुष्यः, कौरवकं हसतम्) इति। कृणाति कृणीतइति श्ने । करोतीत्यौ । कृणोति । कृणुतइति श्नौ ॥ १२९ ॥

गॄ निगरणे ॥ (गिरति । गिलति) । "अचि विभाषा" इत्यजादौ सर्वत्र वा लत्वम् । (जगार । जगाल । जगरिथ, जगलिथ । गरिता । गरीता । गलिता । गलीता । गरिष्यति । गरीष्यति । गलिष्यति । गलीष्यति) "वृतो वा" इत्यलिटीटो वा दीर्घः, (गिरतु । गिलतु । अगिरत् । अगिलत् । गिरेत् । गिलेत् । गीर्यात्) । "किदाशिषि" इति कित्वादित्वे । "हलि च" इति दीर्घत्वम् । (अगारीत् । अगालीत् । अगारिष्टाम् । अगालिष्टाम्) । "सिचि च परस्मैपदेषु" इतीटो दीर्घनिषेधः (जिगरिषति । जिगलिषति) । "किरश्च पञ्चभ्यः" इतीट् । अस्य दीर्घविकल्पो नेति किरतावुक्तम् । (जेगिल्यते) । "लुपसद" इत्यादिना भावगर्हायां यङ्, इत्वरपरत्वयोः "हलि च" इति दीर्घात्पूर्वं "पूर्वत्रासिद्धम्" इति "ग्रो यङि" इति लत्वेनेदानीं रेफान्तविहतनिमित्तत्वान्न दीर्घः । (जागर्ति । जागीर्तः । गारयति । गालयति । अजीगरत् । अजीगलत्) "निगरणचलन" इति नित्यं परस्मैपदम् । (गार्यते । गाल्यते) अन्तरङ्गत्वात्पूर्वं णिलोपादजाद्यपेक्षो लत्वविकल्पः, कृते वा णिलोपे स्थानिवत्त्वेनाजादिपरत्वाद्भविष्यति । न च [पूर्वत्रासिद्धे न स्थानिवत्] इति, तस्य दोषः [संयोगादिलोपलत्वणत्वेषु] इत्युक्तत्वात् । (गिरते ग्रासः स्वयमेव) । (अगरिष्ट । अगरीष्ट । अगीर्ष्ट ग्रासः स्वयमेव) । "भूषाकर्मकिरादिसनाम्" इति किरादित्वाद्यकृचिणोर्निषेधः । "लिङ्सिचोरात्मनेपदेषु" इति वा इट् । तस्य पूर्ववत्पक्षे दीर्घः । (अगलिष्ट । अगलीष्ट) इतीटि लत्वं चोदाहार्यम् । अनिटि "उश्च" इति कित्वादित्वरपरत्वे । (अवगरते । अवजगरे । अवजगरिषे) । "अवाद्ग्रः" इति तङ् । अलिटीत्यनुवर्त्तनान्न "वृत" इति दीर्घः । (अवगरिता । अवगरीता। अवगलिता। अवगलीता । अवगरिष्यते । अवगरीष्यते । अवगिरताम् । अवागिरत । अवगिरेत । अवगीर्षीष्ट । अवगरिषीष्ट)। "लिङ्सिचोरात्मनेपदेषु" इतीड् वा "न लिङि" इति दीर्घनिषेधः । इडभावे "उश्च" इति कित्वेत्वरपरत्वदीर्घाः (अवागीर्ष्ट, अवागरिष्ट, अवागरीष्ट,) लिङ्वत्प्रक्रिया, (अवगिलत) इत्यादौ सर्वत्राजादौ लत्वमुदाहार्यम्, इटो दीर्घत्वं च लिङ्लिटो वर्जयित्वा । "अवाद्ग्रः" इति सर्वत्र तङ् (नित्यं शब्दं संगिरन्ते वैयाकरणाः) "समः प्रतिज्ञाने" इति तङ्। मुदं गिरतीति (मुद्गरः) । पचाद्यच् । (गलः) प्राण्यङ्गरोविषयः । अचि व्यवस्थितविभाषया लत्वं, (निगारः । उद्गारः) "उन्योर्ग्रः" इति वञ् । (तिमिंगिलः) मूलविभुजादित्वात्कः । "गलेऽगिलस्य" इति मुम्, अगिलस्येति वचनाद् गिलगिल इत्यत्र न भवति । (गुरुः) "कृग्रोरुच्च" इत्युप्रत्ययो धातोश्चोकारः । गृणातेर्वा ऽयं शब्दार्थात् । (गरिष्ठः । गरिमा । गरीयान्) "प्रियस्थिर" इत्यादिना इष्ठेमेयस्सु गुरुशब्दस्य गरादेशः । पृथ्वादिपाठादिमनिज्वा, तदभावे "इगन्तात्" इत्यणि गौरवम् । (गारयति) । णाविष्ठवदिति गरादेशः । (गर्भः) । "अर्तिगृभ्यां भन्" इति भन् । (गर्भिणी) । इदन्ताद् ङीप् (गोगर्भिणी) । "चतुष्पादो गर्भिण्या" इति तत्पुरुषः । गर्भिणीनां समुहो (गार्भिणम्) भिक्षादित्वादण् । "भस्याढे तद्धिते" इति पुंवद्भावः । "इनण्यनपत्ये" इति प्रकृतिभावः । गर्भिणी भार्या यस्य स (गर्भिभार्यः) । "स्त्रियाः पुंवत्" इति पुंवद्भावः । ननु स्त्रियामनवयवभूतः गर्भसबन्धः प्रवृत्तिनिमित्तं, पुंसि तु अवयवभूतगर्भसम्बन्धो यथा गर्भी व्रीहिरिति, तेन समानायामाकृतौ भाषितपुंस्कत्वाभावात्कथं पुंवद्भावः । नैष दोषः । अन्तर्वस्तुसबन्धमात्रस्येह प्रवृत्तिनिमित्तत्वात् । अयं शब्दार्थः क्र्यादौ । ज्ञानार्थश्चुरादौ । गर-

तीति शपि गतम् । (१)सुवतिकीरतिगिरश्च उदात्ताः ॥ १२६ ॥

दृङ् आदरे ॥ (आद्रियते) "रिङ् शयग्लिङ्क्षु" इति रिङ् । (आदद्रे । आदद्रिषे । आदर्ता । आदरिष्यते) । "ऋद्धनोः स्ये" इतीट् । (आद्रियताम् । आद्रियत । आद्रियेत । आद्रिषीष्ट । आदृत । आदृषाताम्) । "उश्च" इति लिङ्सिचोः कित्वं, किति सिचो लोपः । (आदिदरिषते) । "किरश्च पञ्चभ्यः" इतीट् । (देद्रीयते) "रीङ् ऋतः" इति रीङ् । (दर्दर्ति । दारयति । अदीदरत्) । (आद्रियते स्वयमेव) किरादित्वाद्यक्चिणोः प्रतिषेधः, (आदृत्यः) "एतिस्तु" इत्यादिना क्यप् । (आदरी) "जिदृक्षि" इत्यादिना इनिः । (आदरः) । "ग्रहवृदृनिश्चिगमश्च" इति अप् । केचित्तु भये दरति इति घटादिपाठादाहुः । दृणातीति दारणे ॥ १२७ ॥

धृङ् अवस्थाने । (ध्रियते) इत्यादि आद्रियते इतिवत् । (आधारः) । "आध्याय" इत्यादिनाधिकरणे घञ् । (धर्मः) मनिन् । अत्र वक्तव्यं भूवादावुक्तम् । धरते धरतीति शपि । द्रियतिध्रियती अनुदात्तावात्मनेभाषौ ॥ १२८ ॥

अतः परं शीयत्यन्ता अनुदात्तेतः ॥

प्रच्छ ज्ञीप्सायाम् ॥ (पृच्छति) । "छे च" इति तुकि "स्तोः श्चुना श्चुः" इति श्चुत्वम् । "ग्रहिज्या" आदिना सम्प्रसारणं ङिति । (पप्रच्छ । पप्रच्छतुः । पप्रष्ठ । पप्रच्छिव) क्रादिनियमादिट् । थलि तु "उपदेशेऽत्वतः" इति निषेधाद्भारद्वाजनियमाच्च विकल्पः । अनिटि व्रश्चादिना षत्वे "ष्टुना ष्टुः" इति थकारस्य ठकारः । अन्तरङ्गत्वात्पूर्वन्तुकि संयोगात्परत्वाल्लिटः कित्वाभावान्न सम्प्रसारणम् । (प्रष्टा । प्रक्ष्यति) । "षढोः कः सि" इति कत्वं, (पृच्छतु । अपृच्छत् । पृच्छेत्) । आशिषि (पृच्छ्यात् । अप्राक्षीत् । अप्राष्टाम्) "झलो झलि" इति सिचो लोपः । "वदव्रज" इति वृद्धिः । (पिपृच्छिषति) "किरश्च पञ्चभ्यः" इतीट्, "रुदविद" इत्यादिना सनः कित्वात्सम्प्रसारणम्, (परीपृछ्यते) "रीगृत्वतः" इति रीक् । (पाप्रच्छीति । पाप्रष्टि । पाप्रष्ट ।) इत्यादि, पृच्छतीति श्तिपा निर्देशान्न सम्प्रसारणम् । (प्रच्छयति, अपप्रच्छत्, सम्पृच्छते) "समो गम्यृच्छि" इत्यकर्मकात्सम्पूर्वात्तङ् । (सम्पप्रच्छे, सम्पप्रच्छिषे । सम्प्रष्टा । सम्प्रक्ष्यते । सम्पृच्छताम् । समपृच्छत । सम्पृच्छेत । सम्प्रक्षीष्ट । समप्रष्ट । समप्रक्षाताम् । समप्रक्षत) इति, झलि सिचो लोपे ष्टुत्वम् । अन्यत्र कत्वम् । (आपृच्छते गुरुम्) । [आङि नुप्रच्छ्योरुपसंख्यानम्] इति तङ् । (प्रश्नः) । "यजयाच" इति नङ् "च्छ्वोश्शूड्" इति सतुक्कस्य च्छस्य शकारः, "शात्" इति श्चुत्वनिषेधः "प्रश्ने चासन्नकाले" इति निर्देशान्न सम्प्रसारणम् । पृच्छतीति (प्राट्) । शब्दं पृच्छतीति (शब्दप्राट्) । "क्विब्वचिप्रच्छि" इत्यादिना निरुपपदात्सोपपदाच्च पृच्छेः क्विप्, दीर्घोऽसम्प्रसारणं च, "च्छ्वोश्शूड्" इति शकारः । "व्रश्च" आदिना तस्य पदान्ते षत्वं, जश्त्वचर्त्वे च (पृच्छा) । भिदादेराकृतिगणत्वादङित्यात्रेयः । (पृष्ठा । पृष्टः । पृष्टवान्) । अयं द्विकर्मकः । तत्र 'अप्रधाने दुहादीनाम्'इति लादयोऽप्रधाने भवन्ति । (माणवकः पृच्छ्यते पन्थानम्) । (प्रष्टव्यः । पृष्टः । पृष्टवान्) इति । अन्यदपि द्विकर्मकसाधारणं नाथत्यादौ प्रपञ्चितं तत एवावधार्यम् ॥ १२९ ॥

वृत् ॥ किरादयो वृत्ता इत्यर्थः ॥

सृज विसर्गे ॥ (सृजति । ससर्ज । ससृजतुः । ससर्जिथ । सस्रष्ठ । ससृजिव) । "विभाषा सृजिदृशोः" इति थलीड्विकल्पः । इडभावे झलाद्यकित्परत्वात् "सृजिदृशोर्झल्यमकिति" इत्यमागमे यणादेशः । "व्रश्च" आदिना षत्वं, ष्टुत्वं, (स्रष्टा । स्रक्ष्यति । सृजतु । असृजत् । सृजेत्) । आशिषि (सृज्यात् । अस्राक्षीत् । अस्राष्टाम्) । अमागमे यणि च

(१) किरतीति गिरतीति उदात्तउदात्तेत।।विति पुस्तकान्तरे पाठः ।

"वदव्रज" इति वृद्धिः । झलि सिज्लोपः । (सिसृक्षति) । "हलन्ताच्च" इति सनः कित्त्वा-न्नामागमो नापि गुणः । (सरीसृज्यते) । रीगागमः । (सरीसृजीति । सरीसर्ष्टि । सरीसृ-ष्ट) इत्यादि । (सर्जयति । असीसृजत् । अससर्जत्) । उर्ऋद्वा । (सृज्यते मालाम्, असर्जि मालां,) श्रद्धया निष्पादयति, श्रद्धया निष्पादितवानित्यर्थः । "सृजियुज्योः श्यं-स्तु" । [सृजियुज्योः सकर्मकयोः कर्ता बहुलं कर्मवद् भवतीति वक्तव्यम्] । सृजेः श्रद्धो-पपन्ने कर्तरीति भाष्यकारवचनात्सकर्मकस्यापि कर्मवद्भावः । श्यना यगेव बाध्यते, न तु चिणिति कैयटे । तदयं कर्मवद्भावश्चिणात्मनेपदार्थो भवति । (सृज्यम्) । "ऋदुपधात्" इति क्यप् । पाणिभ्यां सृज्यते इति (पाणिसर्ग्या) रज्जुः । [पाणौ सृजेर्ण्यद्वक्तव्यः] । "समवपूर्वाच्च" इति ण्यति "चजोः कुघिण्ण्यतोः" इति कुत्वम् । सृजति तामिति (स्रक्) । "ऋत्विक्" इत्यादिना कर्मणि क्विन्, अमागमः, कत्वञ्च । (संसर्गी) । "सम्पृच" इत्या-दिना घिनुण् । (रज्जुः) । "सृजेरसुम् च" इत्युप्रत्ययः सलोपोऽसुमागमश्च । तत्र सकार-स्य जश्त्वे श्चुत्वं, (स्रग्वी) । "अस्मायामेधास्रजः" इति मत्वर्थे विनिः । (स्रजिष्ठः । स्र-जीयान् । स्रजयति) "विन्मतोर्लुक्" णाविष्ठवदिति चेष्टेमेयःसु णौ च विनो लुक्, सृज्यते इति गतं श्यनि ॥ १३० ॥

टुमस्जो शुद्धौ ॥ (मज्जति) । "झलां जश्" इति सकारस्य दकारः, तस्य चुत्वं जकारः, (ममज्ज । ममज्जतुः । ममज्जिथ । ममङ्क्थ । ममज्जिव) । क्रादिनियमादिट् । थलि "उ-पदेशेऽत्वत" इति निषेधाद्भारद्वाजनियमाच्च विकल्पः । अनिट्पक्षे "मस्जिनशोर्झलि" इति नुम् । स च 'मस्जेरन्त्यात्पूर्वं नुममिच्छन्त्यनुषङ्गसंयोगादिलोपार्थम्' इत्यन्त्यात्पूर्वइति "स्कोः संयोगाद्योः" इति सलोपः । जकारस्य "चोः कुः" इति कुत्वे "खरि च" इति चर्त्वम् । नकारस्य "नश्चापदान्तस्य" इत्यनुस्वारे परसवर्णः । (मङ्क्ता । मङ्क्ष्यति । मज्जतु । अम-ज्जत् । मज्जेत् । मज्ज्यात् । लिङौ । अमाङ्क्षीत् । अमाङ्क्ताम् । अमाङ्क्षुः) । "वदव्रज" इति वृद्धिः । झलि सिचो लोपः । (मिमङ्क्षति । मामज्ज्यते । मामङ्क्ति । मज्जयति । अम-मज्जत् । मज्जथुः) । "ट्वितोऽथुच्" । (मङ्क्त्वा । मक्त्वा) । "जान्तनशां विभाषा" इति क्त्वायां वाऽनुनासिकलोपः । (मग्नः । मग्नवान्) । "अनिदिताम्" इति नस्य लोपः, सलोपकुत्वे च । "ओदितश्च" इति नत्वं, (मद्गयः, मद्गः,) ण्यति घञि च "चजोः कुघि-ण्ण्यतोः" इति कुत्वे "झलां जश् झशि" इति सकारस्य दकारः । (मद्गुः) । "भृमृशि" इत्यादिनोप्रत्ययः । न्यङ्क्वादित्वात्कुत्वं, पूर्ववत्सकारस्य दकारः । (मुद्गरः) । बाहुलका-दुरच् कुत्वञ्च । (मज्जा । मज्जानौ) । "श्वन्नुक्षन्" इति कनिनन्तो निपात्यते ॥ १३१ ॥

रुजो भङ्गे ॥ (चोरस्य रुजति रोगः) । "रुजार्थानां भाववचनानामज्वरेः" इति धात्व-र्थस्य भावकर्तृकत्वे कर्मणि शेषे षष्ठी । अत्र भावो धात्वर्थः । वचनशब्दश्च कर्तृवचनः । अत्र के चिद्रुजाशब्दस्य व्याधौ रूढत्वाद्भाववचनानामित्यस्य प्रत्युदाहरणं श्लेष्मा पुरुषं रुजतीति रुजेर्व्याध्यर्थत्वमेवाहुः । श्लेष्मा पुरुषं रुजति व्याधिना योजयतीति ह्यत्रार्थः । वृत्तिभाष्य-योस्तु रुजां भङ्गमाश्रित्य नदी कूलानि रुजतीति प्रत्युदाहृतम् । अशेषविवक्षायामपि कर्मणि नित्यं द्वितीया(१)भवति ॥ (चोरं रुजति) इति । (रुरोज । रुरुजतुः । रुरोजिथ । रुरुजिव । रो-क्ता । रोक्ष्यति । रुजतु । अरुजत् । रुजेत् । रुज्यात् । अरौक्षीत् । अरौक्ताम् । अरौक्षुः) । झ-लि सिचो लोपः । "चोः कुः" । (रुरुक्षति । रोरुज्यते । रोरोक्ति । रोजयति । अरूरुजत्) । निष्पूर्वोऽयं व्याधिप्रशमने । नीरुजति मिताशीति । (कूलमुद्रुजः) । "उदि कूले रुजिवहोः" इति खश् । (रोगः) । "पदरुज" इति कर्तरि घञ् । (हृद्रोगः । हृदयरोगः) । "वा शोक-ष्यञ्रोगेषु" इति हृद्भावविकल्पः । (रुक्त्वा । रुग्णः । रुग्णवान्) ओदित्त्वान्नत्वम् ।

(१) द्वितीयैवेति पुस्तकान्तरे पाठः ।

(लुग्नं जीर्णवस्त्रं,) "कपिलकादीनां संज्ञाछन्दसोः" इति लत्वम् । (रुजा) । भिदादेराकृतिगणत्वादङ् ॥ हिंसार्थोऽयं चुरादौ ॥ १३२ ॥

भुजो कौटिल्ये ॥ (भुजति) इत्यादि रुजिवत् । (मूलविभुजो रथः) । [मूलविभुजादीनामुपसंख्यानम्] इत्यणोऽपवादः कः । "भुजोऽनवने"इत्यत्र संयोगवद्धिप्रयोगस्यापि विशेषस्मृतिहेतुत्वादवत्सा धेनुरानीयतामितिवदनवनप्रतिषेधेन सम्भवन्नवनसम्बन्धो रौधादिक एव गृह्यते । उक्तञ्च तत्र भाष्ये-'अनवनकौटिल्ययोरिति वक्तव्यम्, इति । तस्मादस्मान्न तङ् ॥ १३३ ॥

छुप स्पर्शे ॥ द्वितीयादिरियम् । केचित्प्रथमादिम्पठन्ति ते भाष्यविरोधादुपेक्ष्याः । तथा च "दीर्घोऽकितः" इत्यत्र चेच्छिद्यते चोच्छुप्यते इत्यत्र "छे च" इति तुकि गुणो न प्राप्नोतीत्याशङ्क्य परत्वाद्गुणे पश्चात्तुगिति समर्थितम्, हरदत्तोऽपि परत्वाद्गुणे कृते पश्चात्तुगित्याह । (छुपति । चुच्छोप । चुच्छुपतुः । चुच्छुपिथ । चुच्छुपिव । छोप्ता । छोप्स्यति । छुपतु । अछुपत् । छुपेत् । छुप्यात्) । लुङि (अच्छौप्सीत् । अच्छौप्ताम् । चुच्छुप्सति । चोच्छुप्यते । चोच्छोप्ति । छोपयति । अचुच्छुपत् । छुप्त्वा । छुप्तः) ॥ १३४ ॥

रुश रिश हिंसायाम् ॥ (रुशति । रुरोश । रुरोशिथ । रुरुशिव । रोष्टा । रोक्ष्यति । रुशतु । अरुशत्, रुशेत् । रुश्यात् । अरुक्षत्) । "शल इगुपधादनिट" इति क्सः । (रुरुक्षति । रोरुश्यते । रोरोष्टि । रोशयति । अरूरुशत् । रिशति । रिरेश । रेक्ष्यति । रिशतु । अरिशत् । रिशेत् । अरिक्षत् । रिरिक्षति । रेरिश्यते । रेरेष्टि । रेशयति । अरीरिशत्) ॥ १३५-१३६ ॥

लिश गतौ ॥ (लिशति) इत्यादि रिशतिवत् । लिश्यते इति दैवादिकस्य ॥ १३७ ॥

स्पृश संस्पर्शने ॥ (स्पृशति । पस्पर्श । पस्पृशतुः । पस्पर्शिथ । पस्पृशिव) खयः शेषः । (स्पर्ष्टा । स्पृशतु । अस्पृशत् । स्पृशेत् । स्पृश्यात् । अस्पार्क्षीत् । अस्पार्ष्टाम् । अस्पार्क्षुः । अस्प्राक्षीत् । अस्प्राष्टाम् । अस्प्राक्षुः । "स्पृशमृश"इति पक्षे सिचि पूर्ववदम्विकल्पः । अन्यदा क्सः । (अस्पृक्षत्) इत्यादि । (पिस्पृक्षति) । उरदत्वे "सन्यत" इतीत्वम् । (परिस्पृश्यते । परीस्पर्ष्टि) । रुग्रिकोरप्युदाहार्यम् । (अपरिस्पर्क्) इत्यत्र "क्विन्प्रत्ययस्य कुः"इति पदान्ते कुत्वं, "रात्सस्य" इति नियमान्न संयोगान्तलोपः । इह क्विनि दृष्टो धातुः क्विन्प्रत्यय उच्यते । अस्त्येवास्य क्विनो विधानं "स्पृशोऽनुदके क्विन्" इति । मन्त्रेण स्पृशतीति (मन्त्रस्पृक्) । स्पृशोऽनुदके सुबन्तमात्रे उपपदे क्विन् । उदकं स्पृशतीत्यत्र कर्मण्यण् (उदकस्पर्शः) इति । (हृदिस्पृक् । दिविस्पृक्) इत्यत्र "हृद्युभ्यां ङेरुपसंख्यानम्) इत्यलुक् । (स्पर्शो रोगः) । "पदरुजविशस्पृशो घञ्" इति घञ् । तत्र वार्तिकं [स्पृश उपताप] इति, स्पर्शवान् आद्यविस्पर्श उच्यते ॥ १३८ ॥

विच्छ गतौ ॥ उदात्तेत् । (विच्छायति) । "छे च" इति तुक् । "गुपूधूपविच्छि" इत्यायः । सार्वधातुके नित्यम् । (विच्छायांचकार । विविच्छ । विविच्छतुः । विविच्छिथ । विविच्छिव) । "आयादय आर्द्धधातुके वा" इत्यार्द्धधातुके भाविन्यायोत्पत्तिविकल्पः । निवृत्तिविकल्पे प्रत्ययलक्षणेनायान्तत्वादाम्प्रत्ययः स्यात्, (विच्छाञ्चकार) इति । (विच्छिता । विच्छायिता । विच्छिष्यति । विच्छायिष्यति । विच्छायतु । अविच्छायत् । विच्छायेत्) आशिषि (विच्छाय्यात् । विच्छ्यात् । अविच्छायीत् । अविच्छायिष्टाम् । अविच्छीत् । अविच्छिष्टाम् । विविच्छायिषति । विविच्छिषति । वेविच्छ्यते) । यङ्लुको विवक्षायान्त्वार्धधातुकविषयत्वस्यैवापहारादायोत्पत्तिविकल्पो नेति प्रागेवोपपादितत्वाद्यङ्लुङ्नास्ति । (विच्छयति । अविविच्छत् । अविविच्छायत् । विश्नः) "यजयाच" इति नङ् "च्छ्वोः शूड्" इति शः, "नेड्वशि कृति" इतीण्निषेधः, (विच्छित्वा । विच्छायित्वा । विच्छितः । विच्छियितः) । अयं भासार्थं चुरादौ ॥ १३९ ॥

विश प्रवेशने ॥ (विशति) । इत्यादि रिषतिवत् । (निविशते) । "नेर्विशः" इति तङ् उ-

त्रसूत्रोपात्तैः पर्यादिभिः साहचर्यादिहोपसर्गो गृह्यते न तु तत्प्रतिरूपक इति 'अङ्के निविशति भयात्' इत्यत्र तङभावः प्रतिरूपकापेक्षो द्रष्टव्यः । (निविविशे । निविविशिषे । निवेष्टा । निवेक्ष्यते । निविशताम् । न्यविशत । निविशेत । निविक्षीष्ट । न्यविक्षत । निविविक्षते । निवेविश्यते । निवेविशीति । निवेवेष्टि । विष्टः । विष्टवान् । विट् । विशौ । विशः) । क्विप् । (देवविशा) । अजादिपाठाद्धलान्तदपि टाप् । (वेशः) । "पदरुजविश" इति कर्तरि घञ्, वेश्याजनसमाश्रये तु "हलश्च" इति अधिकरणे घञ् । गेहानुप्रवेशमास्ते गेहं गेहमनुप्रवेशमास्ते । "विशिपदि" इत्यादिना णमुल् । तृतीयाप्रभृतित्वात्समासविकल्पः । असमासे व्याप्यमानतायां द्रव्यवचनस्य द्विर्वचनम् । आसेव्यमानतायान्तु क्रियावचनस्य णमुलन्तस्य, समासे तु व्याप्त्यासेवयोस्तेनैवोक्तत्वान्न द्विर्वचनं, क्त्वाप्यत्र वासरूपेण भवति । (गेहमनुप्रविश्यानुप्रविश्यास्ते गेहंगेहमनुप्रविश्य ास्ते) इति । समासस्त्वस्य न भवत्यनुपपदे विधानादित्येतत्सर्वं स्कन्दत्यादावुक्तम् । (ग्राममभिनिविशते) "अभिनिविशश्च" इत्याधारः कर्म । अत्र मण्डूकप्लुत्या "परिक्रयणे सम्प्रदानमन्यतरस्याम्" इत्यतोऽन्यतरस्यांग्रहणानुवृत्तेस्तस्य च व्यवस्थितविभाषात्वात्कल्याणे ऽभिनिवेशः, पापेऽभिनिवेशः, या या संज्ञा यस्मिन्नभिविशते इत्यादौ कर्मत्वाभावः । (वेशन्तः) । "हृविशिभ्यां झच्" इति झच् । "झोऽन्तः" । (वेश्म) । मनिन् ॥ १४० ॥

स्पृश आमर्शने ॥ आमर्शनं स्पर्शः ॥ (स्पृशति) इत्यादि सर्वं स्पृशतिवत् ॥ १४१ ॥

णुद प्रेरणे ॥ कर्त्रभिप्रायेऽपि क्रियाफले परस्मैपदार्थः पुनः पाठः, (नुदति) इत्यादि रूपं पूर्ववत् ॥ १४२ ॥

षद्लृ विशरणगत्यवसादनेषु ॥ एवं धनपालः । विसरणइत्यात्रेयमैत्रेयौ दुर्गश्च, शिति "पाघ्रा" इत्यादिना सीदादेशः। (सीदति) इत्यादि, अन्यत्र (ससाद) इत्यादि सर्वं भौवादिकवत् । इह पाठे प्रयोजनं सीदति सीदन्तीति नुम्विकल्पः । एवं तर्ह्येतेनैव रूपद्वये सिद्धे तत्रास्य पाठोऽनर्थक इति केचित् । ज्वलितिकसन्तेभ्यो णार्थः साद इति । स्वरश्च भिद्यते, शपि सीदतीत्यत्र शपिपोः पित्त्वादनुदात्तत्वं धातुरुदात्तः । शे तु प्रत्ययस्वरेणोदात्ते मध्योदात्तत्वम् ॥ १४३ ॥

शद्लृ शातने ॥ "पाघ्रा" इत्यादिना शिति शीयादेशः ॥ (शीयते) इत्यादि । अन्यत्र (शशाद । शत्ता) इत्यादि सर्वं भौवादिकवत् । "शदेः शितः" इति शिद्विषये तङ्विधानान्नास्य शता ऽन्तीति नुम्विकल्पस्य प्रयोजनस्याभावात्पुनः पाठे प्रयोजनं पूर्ववत्स्वरभेदः । पृच्छत्यादयोऽनुदात्ता उदात्तेतः । विच्छिरेकः सेट् ॥ १४४ ॥

अथोभयपदिनमाह ।

मिल सङ्गमने ॥ मिल संश्लेषण इति पठितस्येह पुनः पाठः कर्त्रभिप्राये तदर्थ इत्यात्रेयः। अयं ह्युदात्तस्वरितेत्, (मिलति) इत्यादि पूर्ववत् । (मिलते । मिमिले । मेलिता । मेलिष्यते । मिलताम् । अमिलत । मिलेत । मेलिषीष्ट । अमेलिष्ट । मिमिलिषते । मिमेलिषते) ॥ १४५ ॥

मुच्लृ मोक्षणे ॥ (मुञ्चति) । "शे मुचादीनाम्" इति शे नुम् । (मुमोच । मुमुचतुः । मुमोचिथ । मुमुचिव । मोक्ता । मोक्ष्यति । मुञ्चतु । अमुञ्चत् । मुञ्चेत् । मुच्यात् । अमुचत् । अमोक्ष्यत् । मुञ्चते । मुमुचे । मोक्ता । मोक्ष्यते । मुञ्चताम् । अमुञ्चत । मुञ्चेत । मुक्षीष्ट । अमुक्त । अमुक्षाताम्) । झलि सिचो लोपः । "चोः कुः" (मुमुक्षति । मुमुक्षते वत्सं) कर्मकर्तरि मोक्षते वत्सः स्वयमेवेत्यपि भवति "मुचो ऽकर्मकस्य गुणो वा" इति सन्नन्तस्य पक्षे गुणे "अत्र लोपोऽभ्यासस्य" इत्यभ्यासलोपः, यङ्चिणोः "भूषाकर्मकिरादिसनाम्" इति निषेधः । (मोमुच्यते । मोमोक्ति । मोचयति । अमूमुचत् । मोक्षः) । सन्नन्तात् घञि पूर्ववद्गुणाभ्यासलोपौ । निर्मुच्यत इति (निर्मोकः) । घञि "चजोः कुघिण्यतोः" इति

कुत्वम् । 'अमोच्यमश्वं यदि मन्यसे' इत्यत्रावश्यके ण्यः। "ण्य आवश्यक" इति कुत्वनिषेधः। (नखमुचानि धनूंषि,) मूलविभुजादित्वात्कर्तरि कः । मुष्टेर्बहिर्भूतानीत्यर्थः । (जलमुक् । जलमुचौ) क्विप् । (मुक्ता,।) "क्तिच्क्तौ च संज्ञायाम्" इति संज्ञायां क्तः । मुक्तैव (मौक्तिकम्) । "विनयादिभ्यश्च" इति स्वार्थे ठक् । (नमुचिः) । "इगुपधात्किच्च" इति इन् । "नभ्राड्" इत्यादिना नञः प्रकृतिभावः । (चक्रमुक्तः) । "अपेतापोढमुक्त" इति पञ्चमीसमासः । प्रमोचनेयं चुरादिः । मुञ्चते, मुञ्चति इति कल्कने शपि गतम्॥१७६॥

लुप्लृ छेदने ॥ (लुम्पति । लुम्पते) इत्यादि मुञ्चतिवत् । (लोलुप्यते) । "लुपसद" इत्यादिना भावगर्हायामेव यङ् । लुप्तनिर्दिष्ट इत्यत्रापूर्वकालस्यापि लुप्तशब्दस्य भाष्यकारप्रयोगात्पूर्वनिपातः । (लोपयति । अलूलुपत् । अलुलोपत्) । काण्यादित्वात् ह्रस्वविकल्पः ॥ १४७ ॥

विद्लृ लाभे ॥ अयं सेडपि मुचादिकार्यानुरोधार्थमिह पठितः । (विन्दति । विन्दन्तः) "विदो लटो वा" इत्यत्र लादेशैः सम्भवदानन्तर्यस्यादादिकस्यैव ग्रह इति विकरणेन व्यवहितानन्तर्यादस्मात्परेषां तिबादीनां णलादयो न भवन्ति । अत एव हेतोः "विदेः शतुर्वसुः" इत्यत्रापि पूर्ववत्सम्भवदानन्तर्य आदादिक एव गृह्यते इति विदन्नित्यत्र वस्वादेशो न भवति । (विवेद । विविदतुः । विवेदिथ । विन्दतु । अविन्दत्) । "सिजभ्यस्तविदिभ्य" इत्यत्रापि पूर्ववत्सम्भवदानन्तर्यस्यादादिकस्यैव ग्रह इत्यविन्दन्नित्यत्र जुस् न भवति । (विन्देत्) आशिषि (विद्यात्) । "समो गम्यृच्छि"इत्यत्र गम्यादिभिः साहचर्यात्परस्मैपदिन एव विदेर्ग्रह इत्यस्य तङ्नियमाभावात्कर्माविवक्षायामपि सम्विन्दति सविन्दत इत्युभयं भवति । (अविदत् । अविदताम्) । लृदित्वादङ् । (विन्दते । विविदे । वेदिता । वेदिष्यते । विन्दताम् । अविन्दत । विन्देत । वेदिषीष्ट । अवेदिष्ट) । "उषविद" इत्यत्र उषजागृभ्यामपरस्मैपदिभ्यामादादिकेन जागर्तिना साहचर्यात्परस्मैपदिन आदादिकस्य ज्ञानार्थकस्यैव ग्रह इत्यात्मनेपदिनस्तौदादिकस्य सत्ताविचारणार्थयोरुभयपदिनश्चास्मान्न भवति । (विविदिषति । विवेदिषति । विदित्वा । वेदित्वा) "रलो व्युपधात्" इति वा कित्त्वं, "रुदविद" इत्यत्राकारस्य विवक्षितत्वादस्य न ग्रहः । अत एव तत्र न्यासे विद ज्ञाने इत्युपात्तः, तथा च "सत्सुद्विष" इत्यत्र वृत्तिः । विद ज्ञाने, विद सत्तायां, विद विचारणे इति त्रयाणां ग्रहणलाभार्थस्थाकारस्य विवक्षितत्वादिति । (वेविद्यते । वेवेत्ति । वेदयति, अवीविदत्) । विन्दतीति (विन्दः) । "अनुपसर्गाल्लिम्पविन्द" इति शः, विकरणस्यास्य चैकादेशः । (गोविन्दः कुविन्दः) इत्यादौ "गवादिषु विन्देः संज्ञायाम्"इति शः, (ब्राह्मणवेदं भोजयति) । "कर्मणि दृशिविदोः साकल्ये"इति साकल्यविशिष्टे कर्मण्युपपदे णमुल्, यं यं ब्राह्मणं जानाति तं तं भोजयतीत्यर्थः । अत्र सत्तार्थस्यैकस्य न ग्रहोऽकर्मकत्वात् । यावद्वेदं भोजयति, यावल्लभते तावद्भोजयतीत्यर्थः । "यावतिविन्दजीवोः" इति णमुल् । "विदिभिदिच्छिदेः कुरच्" इत्यत्र ज्ञानार्थ एव न्यासे गृहीतः, स्वभावादिति वृत्तिः, "विन्दुरिच्छुः" इत्यत्रापि स्वभावात् ज्ञानार्थस्य ग्रह इति न्यासे । "संज्ञायां समज" इत्यत्रापि ज्ञानार्थ एव न्यासे गृहीतः । (वित्तं) धनम् । (वित्तं) प्रसिद्धः) "वित्तो भोगप्रत्यययोः" इति निष्ठानत्वनिषेधः । भुज्यतइति (भोगो धनं) प्रतीयत इति प्रत्ययः प्रसिद्धः, अन्यत्र विन्नः । "विभाषा गमहनविदविशाम्" इति क्वसाविड्विकल्पनात् "यस्य विभाषा" इत्यनिट्त्वम् । कातन्त्रे त्वयमनिडुक्तः । तन्मते (वेत्ता, वेत्स्यति) इत्यादि । इदं च व्याघ्रभूतेर्नाभिहितम् । तथाहि विद्यतिविन्त इत्यपीति श्यना श्नमा च निर्देशाद्दैवादिकस्य रौधादिकस्य चानिट्त्वं तेनोक्तं नान्यस्य । तथा वृत्तिकारोऽपि विद्यति विन्तइति निर्देशात् ज्ञानार्थलाभार्थयोरिटमाह । वेदिता विद्यानां वेदिता धनस्येति । परिवेत्तृशब्दस्तु विद्यतिविन्त्योरन्यतरस्य परिपूर्वस्यार्थान्तरे वृत्तस्य द्रष्टव्यः, तृजन्तोऽप्ययं स्वभावादनूढेग्रजे पूर्वमूढेवरजे वर्तते । "अप्तृन्" इत्यादौ नप्त्रादी·

नां ग्रहणमौणादिकतृन्नन्तानां संज्ञाशब्दमात्रस्यैवेत्युद्गातारावित्यादिवत्परिवेत्तारावित्यादौ दीर्घो भवति ॥ १४८ ॥

लिप उपदेहे ॥ (लिम्पति । लिलेप । लिलेपिथ । लिलिपिव । लेप्ता । लेप्स्यति । लिम्पतु । अलिम्पत् । लिम्पेत् । लिप्यात् । अलिपत्) । "लिपि सिचि ह्वश्च" इत्यङ् परस्मैपदे, अन्यत्र "आत्मनेपदेष्वन्यतरस्याम्" इति पक्षे सिच् । (अलिपत । अलिपेताम् । अलिपन्त । अलिप्त । अलिप्साताम् । अलिप्सन्त) इत्युभयं भवति, (लिम्पते । लिलिप्सति । लिलिप्सते । लेलिप्यते । लेलेप्ति । लेपयति । अलीलिपत् । लिम्पः) । "अनुपसर्गाल्लिम्प" इति ।शः । (निलिम्पा देवाः) । "नौ लिम्पेः" इति शः । (लिप्तवासितम्) इत्यत्र राजदन्तादिपाठात्पूर्वकालस्यापि परनिपातः । (लिपिः । लिबिः) "इगुपधात्किच्च" इति इत्प्रत्ययः । "दिवाविभा" इत्यादौ लिपिलिबीति निर्देशात्पकारस्य पक्षे बकारः ॥ १४९ ॥

षिच क्षरणे ॥ (सिञ्चति । सिषेच । सिषिचतुः । सिषेचिथ) । क्रादिनियमादिट् । "आदेशप्रत्यययोः" इति प्रकृतेः षत्वम् । (सेक्ता । सेक्ष्यति । सिञ्चतु । असिञ्चत् । सिच्यात् । असिचत्) । "लिपिसिचिह्वश्च"इति परस्मैपदेऽङ् । अन्यत्र "आत्मनेपदेष्वन्यतरस्याम्" इति विकल्पः । (असिक्त । असिक्षाताम् । असिचत । असिचेताम्) इत्यादि । (सिञ्चते । सिषिचे) इत्यादि, (सिसिक्षति । सिसिक्षते) । "स्तौतिण्योरेव" इति नियमान्न षत्वम् । (सेसिच्यते) । "सिचो यङि" इति न षत्वम् । (सेसेक्ति । सेचयति । असीषिचत्) । अत्र स्वामी षत्वं नेच्छति । (अभिषिचति) "स्तौतिण्योरेव" इति नियमम्बाधित्वा "स्थादिष्वभ्यासेन चाभ्यासस्य" इति षत्वम् । (अभिसेसिच्यते) इत्यत्र "उपसर्गात्" इति प्राप्तेरपि परत्वात् "सिचो यङि" इति निषेधो भवति, "उपसर्गात्" इति प्राप्तिस्तु पुरस्तादपवादन्यायेन "सात्पदाद्योः" इति निषेधमेव बाधेत । (सेक्त्रम्) । "दाम्नीशस" इत्यादिना ष्ट्रन् । (सिक्थम्) पात्रम् । "पातृतुदिवचिरिचिसिचिभ्यस्थक्" इति थक् । सिचयशब्दस्तु बाहुलकात्कयनन्तः । मुचादयोऽनुदात्ताः स्वरितेतः । विदतिस्तु सेडेकः ॥१५०॥

कृती छेदने ॥ उदात्त उदात्तेत् । (कृन्तति । चकर्त । चकृततुः । चकर्तिथ । चकृत । चकृतिव । कर्तिता । कर्त्स्यति । कर्तिष्यति) । "सेसिचि" इत्यादिना सकारादाविड्विकल्पः । (कृन्ततु । अकृन्तत् । कृन्तेत् । कृत्यात्) । लिङौ । (अकर्तीत् । अकर्तिष्टाम् । चिकृत्सति । चिकर्तिषति । चरीकृत्यते । चरिकर्त्ति) इत्यादि । (कर्तयति । अचकर्तत् । अचीकृतत्) । उत्कर्दा । (विकर्तनः) । नन्द्यादिः । (कृतः । कृतवान् । कृतिः) । क्तिम् । (कृत्समुदकम्) । "सृत्रश्रिकृत्तृषिभ्यः कित्" इति सप्रत्ययः स कित् । "तितुत्र" इतीण्निषेधः (कृत्स्नम्) । "कृत्यशुभ्यां कूस्नन्" इति कूस्नन् । बाहुलकादिडभावश्च ॥ १९१ ॥

खिद परिघाते ॥ अनुदात्त उदात्तेत् । (खिन्दति । चिखेद । चिखिदतुः । चिखेदिथ । खेत्ता । खेत्स्यति । खिन्दतु । अखिन्दत् । खिन्देत् । खिद्यात्) । लुङि (अखैत्सीत् । अखैत्ताम्) । "वदव्रज" इति वृद्धिः । झलि सिचो लोपः, (चिखित्सति । चेखिद्यते । चेखेत्ति । चेखिदीति । खेदयति । अचीखिदत् । खित्त्वा । खिन्नः । खिदिरम्) । "इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुधिवन्धिशुषिभ्यः किरच्" इति किरच् । खित दैन्ये दिवादिपाठादयं कर्मकर्तरीति वदन् वामनो दिवादावस्य पाठं नेच्छति । खिद दन्य इति रुधादौ गतः ॥ १९२ ॥

पिश अवयवे ॥ उदात्त उदात्तेत् । (पिंशति । पिपेश । पिपेशिथ । पिपिशिव । पेशिता । पेशिष्यति । पिंशतु । अपिंशत् । पिंशेत् । पिश्यात् । अपेशीत् । अपेशिष्टाम् । पिपिशिषति । पेपिश्यते । पेपिशीति । पेपेष्टि । पेशयति । अपीपिशत् । पिशित्वा । पेशित्वा । पिशितम्) ।

पिशिताशः पिशाचः) । पृषोदरादित्वात्सिद्धिः(१) । (पिशङ्गः) । बाहुलकादङ्गच् । (पिशङ्गी । (पिशङ्गा) [पिशङ्गादुपसंख्यानम्] इति ङीप् । (पेशी) गर्भकोशः । पचाद्यजन्ताद्गौरादित्वान्ङीष् । अयं दीपनायामपि वर्तते । तथा च त्वष्टा रूपाणि पिंशत्वित्यत्र हरदत्तः, पिंशतिर्हिंसिकर्मा । नक्षत्रेभिः पितरो द्यामपिंशन्निति दर्शनादिति । पिशगतौ चुरादौ ॥१९३॥

वृत् ॥ तुदादयो मुचादयश्च वृत्ता इत्यर्थः ॥

इति श्रीपूर्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसंगममहामन्त्रिणा सायणसुतेन माधवसहोदरेण सायणाचार्येण विरचितायां माधवीयायां धातुवृत्तौ तुदादिगणः सम्पूर्णः ॥

अथ रुधादयः ॥

रुधिर् आवरणे ॥ अयं द्विकर्मकः । (व्रजं गां रुणद्धि । रुन्द्धः । रुन्धन्ति । रुणत्सि । रुन्धः । रुन्ध । रुणध्मि । रुन्ध्वः । रुन्ध्मः) । "रुधादिभ्यः श्नम्" इति शपोऽपवादः श्नम् । नित्यत्वादयं गुणात्पूर्वम्भवति । मित्वादचोन्त्यात्परः, शकारः श्नान्नलोप इति विशेषणार्थः । "झषस्तथोः" इति झषोऽनन्तरयोस्तथोर्धत्वे "झलां जश् झशि" इति धातोर्दत्वं, रुन्ध इत्यादौ क्ङिति सार्वधातुके "श्नसोरल्लोप" इत्यकारस्य लोपः । "नश्चापदान्त" इत्यनुस्वारः परसवर्णः । अल्लोपस्यानयोर्नस्थानिवत्त्वं, "नपदान्त" इत्यादिना निषेधात् । णत्वे तु कर्तव्ये परसवर्णस्य पूर्वत्रासिद्धत्वान्न तद्भवति । न चानुस्वारात्पूर्वं णत्वप्रसङ्गः । तस्यासिद्धत्वात् । (रुणत्सि) इत्यत्र "खरि च" इति चर्त्वं, (रुरोध । रुरुधतुः । रुरुधुः । रुरोधिथ । (रुरुधिव) । क्रादिनियमादिट् । (रोद्धा । रोत्स्यति । रुणद्धु । रुन्धात् । रुन्धाम् । रुन्धन्तु । रुन्द्धि) हेर्धित्वे जश्त्वम् । (रुन्धम् । रुन्ध । रुणधानि । रुणधाव । रुणधाम । अरुणत् । अरुणद् । अरुन्धाम् । अरुन्धन् । अरुणत् । अरुणद् । अरुणः । अरुन्धम् । अरुणधम् । अरुन्ध्व । अरुन्ध्म) । "हल्ङ्या" दिना तिस्योर्लोपः । जश्त्वे वा चर्त्वञ्च । सिपि "दश्च" इति वा रुत्वमपि । (रुन्ध्यात् । रुन्ध्याताम् । रुन्ध्युः । रुन्ध्याः । रुन्ध्याम् । रुन्ध्याव) । आशिषि (रुध्यात् । रुध्यास्ताम् ,) लुङि "इरितो वा" इति अङ्पक्षे । (अरुधत् । अरुधताम्) । अन्यदा (अरौत्सीत् । अरौद्धाम् । अरौत्सुः । अरौत्सीः । अरौद्धम् । अरौद्ध । अरौत्सम् । अरौत्स्व । अरौत्स्म । रुन्धे । रुन्धाते । रुन्धते) । "आत्मनेपदेषु" इत्यद्भावः । (रुन्त्से । रुन्धाथे । रुन्ध्वे । रुन्ध्वहे । रुरुधे । रुरुधाते । रुरुधिरे । रुरुधिषे । रुरुधिवहे । रोद्धा । रोत्स्यते । रुन्धाम् । रुन्धाताम् । रुन्धताम् । रुन्त्स्व । रुणधै । रुणधावहै । अरुन्ध । अरुन्धाताम् । अरुन्धत । अरुन्धाः । अरुन्धि । अरुन्ध्वहि । रुन्धीत । रुन्धीयाताम् । रुन्धीथाः । रुन्धीय । रुन्धीवहि) आशिषि । (रुत्सीष्ट । रुत्सीयास्ताम्) । "लिङ्सिचौ" इति कित्त्वम् । (अरुद्ध । अरुत्साताम् । अरुत्सत । अरुद्धाः । अरुत्सि । अरुत्स्वहि) । कर्मकर्तरि (रुद्ध्यते गौः स्वयमेव । अरुद्ध गौः स्वयमेव) इत्यत्र "न रुधः" इति चिणो निषेधः । शुद्धे तु कर्मण्यरोधीति भवति । (रुरुत्सते । रुरुत्सति । "हलन्ताच्च" इति सनः कित्त्वम् । (रोरुध्यते । रोरोद्धि । रोधयति । अरूरुधत्) । अस्याप्रधाने कर्मणि लादयः । (अङ्गरोधी) । ग्रहादित्वाण्णिनिः, (अनुरोधी) । "सम्पृचा" दिना घिनुण् , (प्रतिरोधी) । "भविष्यति गम्यादयः" इति इन्नन्ता

(१) पिशितपूर्वादशधातोराणि इतशब्दस्य लोपः, शकारस्य चकारश्शकारस्य जश्त्वाभावश्च पृषोदरादित्वात् । पिशितमश्नातीति पिशाचः ।

भविष्यदथ, (व्रजउपरोधं, व्रजेन उपरोधं,) "सप्तम्यां चोपपीडरुध" इति सप्तम्यन्ते तृतीयान्ते चोपपदे णमुल्, । "तृतीयाप्रभृतीनि" इति समासविकल्पः । केचिदुपशब्दस्य पीडयतिनैव सम्बन्धमाहुः । भट्टिकारस्य तूपोपसर्गग्रहणमतन्त्रमिति प्रागेवोक्तम् । (रोधः) । असुन् । (रुधिरम्) । "इषिमदि" इत्यादिना किरच् । अनुरुध्यत इति श्यनि गतम् ॥१॥

भिदिर् विदारणे ॥ (भिनत्ति । भिन्तः । भिन्दन्ति । भिनत्सि । भिन्थः । भिन्थ । भिनद्मि । भिन्द्वः । भिन्द्मः । बिभेद । बिभिदतुः । बिभिदुः । बिभेदिथ । बिभिदिव । भेत्ता । भेत्स्यति । भिनत्तु । भिन्तात् । भिन्ताम् । भिन्दन्तु । भिन्धि । भिनदानि । अभिनत् । अभिन्ताम् । अभिन्दन् । अभिनः । अभिन्तम् । अभिन्त । अभिनदम् । अभिन्द्व । भिन्द्यात् । भिन्द्याताम् । भिन्द्याः । भिन्द्याम्) । आशिषि । (भिद्यात् । भिद्यास्ताम्) । लुङि (अभिदत् । अभिदताम् । अभैत्सीत् । अभैत्ताम् । भिन्ते । भिन्त्से । भिन्दे । बिभिदे । बिभिदिषे । भेत्ता । भेत्स्यते । भिन्ताम् । भिन्दाताम् । भिन्त्स्व । भिनदै । अभिन्त । अभिन्दाताम् । अभिन्दत । अभिन्त्थाः । अभिन्दि । भिन्दीत) । आशिषि (भित्सीष्ट । अभित्त । अभित्साताम् । बिभित्सति । बिभित्सते । बेभिद्यते । बेभिदीति । बेभेत्ति । भेदयति । अबीभिदत्) । सर्वत्र रुधिवत्प्रक्रिया । भिदेलिमानि काष्ठानि । [केलिमर उपसंख्यानम्] इति केलिमर् । अयं कर्मकर्तरि, (भिद्यो नदः) । "भिद्योध्यौ नदे" इति कर्तरि क्यपि निपात्यते । कर्तरि (काष्ठभित् । प्रभित्) "सत्सूद्विष" इत्यादिना क्विप् । (भिदुरं काष्ठम्) । "विदिभिदिच्छिदेः कुरच्" इति कुरच् । स्वभावादयं कर्मकर्तरि । (भिदा) । भिदादित्वादङ् । तत्र भिदा विदारणे इतिपाठादन्यत्र भित्तिरिति भवति । (भित्तम्) । "भित्तं शकलम्" इति शकले निष्ठानत्वाभावादन्यत्र भिन्नमिति भवति । (भिदिरं वज्रम्) । "इषिमदि" इत्यादिना किरच् । (उद्भित्) क्विप् । (उद्भिदः) । इगुपधलक्षणः कः ॥ २ ॥

छिदिर् द्वैधीकरणे ॥ (छिनत्ति) इत्यादि भिनत्तिवत् । (छिदुरम्) । 'विदिभिदिच्छिदेः कुरच्" इति कुरच् । अयं कर्मकर्तरीति वृत्तिः । करीन्द्रदर्पच्छिदुरं मृगेन्द्रं, रसज्ञाया इत्थं विदुरशशिधामभ्रमकरानित्यादिप्रयोगदर्शनात् कर्मकर्तरीति वृत्तिकारोक्तं प्रायिकमित्यात्रेयः । र(१)ज्जुच्छित् (प्रच्छित्) । "सत्सूद्विष" इत्यादिना क्विप् । (छिदा) । छिदा द्वैधीकरण इति भिदादिपाठादङ् । अन्यत्र (छित्तिः,) घञ् (छेदः,) (छैदिकं) "छेदादिभ्यो नित्यम्" इति "तदर्हति" इत्यस्मिन्नर्थे ठक् । (शीर्षच्छेद्यः । शैर्षच्छेदिकः) । "शीर्षच्छेदाद्यच्च" इति । तदर्हतीत्यर्थे यत्ठकौ, अत्रैव निर्देशात् प्रत्ययसन्नियोगेन शिरसः शीर्षभावः । (छिदिरम्) । "इषिमदि" इत्यादिना किरच् । (छिद्रम्) । "स्फायितञ्चि" इत्यादिना रक्, छेद द्वैधीकरणे चुरादौ ॥ ३ ॥

रिचिर् विरेचने ॥ (रिणक्ति । रिङ्क्ते । रिणक्षि । रिङ्क्थः । रिङ्क्थ । रिणच्मि । रिञ्च्वः । रिरेच । रिरिचतुः, रिरेचिथ । रिरिचिव । रेक्ता । रेक्ष्यति । रिणक्तु । रिङ्क्तात् । रिङ्क्ताम् । रिञ्चन्तु । रिङ्ग्धि । रिङ्क्तात् । रिणचानि । अरिणक् । रिञ्च्यात् । रिञ्च्याताम्) । आशिषि (रिच्यात्) । लुङ् । (अरिचत् । अरैक्षीत् । रिङ्क्ते । रिरिचे । रेक्ता । रेक्ष्यते । रिङ्क्ताम् । रिङ्क्ष्व । रिणचै । अरिङ्क्त । अरिङ्क्थाः । अरिञ्चि । रिञ्चीत । रिक्षीष्ट । अरिक्त । अरिक्षाताम् । रिरिक्षति । रिरिक्षते । रेरिच्यते । रेरिचीति । रेरेक्ति । रेचयति । अरीरिचत् । रेकः) । घञि "चजोः कुघिण्ण्यतोः" इति कुत्वम् । (रिक्थम्) "पातृतुदिविचिरिचिसिचिभ्यस्थक्" (विरिञ्चः । विरञ्चिः । विरिचिनः,) एते पृषोदरादयः । रिच वियोजनसम्पर्चनयोरिति चुरादौ ॥ ४ ॥

---

(१) वप्रच्छिदिति पुस्तकान्तरे पाठः ।

विजिर् पृथग्भावे ॥ (विनक्ति । विङ्क्तः । विङ्क्ते ।) इत्यादि रिचिवत् । (विवेकी) । संपृचादिना घिनुण् । (विवेकः,) घञ्, "चजोः" इति कुत्वमुभयत्र ॥ ९ ॥

क्षुदिर् संपेषणे ॥ (क्षुणत्ति । क्षुन्तः । क्षुन्दन्ति । क्षुणत्सि । क्षुणद्मि । क्षुन्द्वः । क्षुन्ते । क्षुन्दाते । क्षुन्त्से । क्षुन्ध्वे । क्षुन्द्वहे । चुक्षोद । चुक्षुदतुः । चुक्षोदिथ । चुक्षुदिव । चुक्षुदे । चुक्षुदिषे । चुक्षुदिवहे । क्षोत्ता । क्षोत्स्यति । क्षोत्स्यते । क्षुणत्तु । क्षुन्तात् । क्षुन्ताम् । क्षुन्दन्तु । क्षुन्धि । क्षुणदानि । क्षुन्ताम् । क्षुन्दाताम् । क्षुन्दताम् । क्षुन्त्स्व । क्षुणदै । क्षुणदावहै । अक्षुणत् । अक्षुन्ताम् । अक्षुन्दन् । अक्षुणत् । अक्षुणद् । अक्षुणः । अक्षुणदम् । अक्षुन्द्व । अक्षुन्त । अक्षुन्दाताम् । अक्षुन्दत । अक्षुन्थाः । अक्षुन्दि । अक्षुन्द्वहि । क्षुन्द्यात् । क्षुन्द्याताम् । क्षुन्दीत । क्षुन्दीयाताम्) । आशिषि (क्षुद्यात् । क्षुद्यास्ताम् । क्षुत्सीष्ट । क्षुत्सीयास्ताम् । अक्षुदत् । अक्षुदताम् । अक्षुदन् । अक्षौत्सीत् । अक्षौत्ताम् । अक्षुत्त । अक्षुत्साताम् । चुक्षुत्सति । चुक्षुत्सते । चोक्षुद्यते । चोक्षोत्ति । क्षोदयति । अचुक्षुदत् । क्षुद्रः) "स्फायितञ्चि" इत्यादिना रक् । क्षुद्राभिः कृतं (क्षौद्रम् मधु) । "क्षुद्राभ्रमर" इति तेन कृतमिति विषयेऽञ् । (क्षोदिष्टः । क्षोदीयान् । क्षोदिमा) "स्थूलदूर" इत्यादिना यणादेर्लोप इष्ठेमेयस्सु पूर्वस्य च गुणः, पृथ्वादित्वादिमनिच्, । (क्षोदयति) णाविष्ठवदिति यणादेर्लोपो गुणश्च ॥ ६ ॥

युजिर् योगे । (युनक्ति । युङ्क्तः । युञ्जन्ति । युनक्षि । युनज्मि । युङ्क्ते । युञ्जाते । युङ्क्षे । युञ्जे । युञ्ज्वहे । युयोज । युयोजिथ । युयोज । युयुजिव । युयुजे । योक्ता । योक्ष्यति । योक्ष्यते । युनक्तु । युङ्क्तात् । युङ्क्ताम् । युञ्जन्तु । युङ्ग्धि । युङ्क्तात् । युङ्क्तम् । युनजानि । युनजाव । युनजाम । युङ्क्ताम् । अयुनक् । अयुनग् । अयुङ्क्तम् । अयुङ्क्त । अयुञ्जि । अयुञ्ज्वहि । युञ्ज्यात् । युञ्ज्याताम् । युञ्जीत) । आशिषि (युज्यात् । युक्षीष्ट । अयुजत् । अयौक्षीत् । अयुक्त । अयुक्षाताम् । अयुक्षत । युयुक्षते । योयुज्यते । योयोक्ति । योजयति । अयूयुजत् । प्रयुङ्क्ते । उपयुङ्क्ते) । "प्रोपाभ्यां युजेरयज्ञपात्रेषु" इत्यकर्त्रभिप्रायेऽपि तङ् । यज्ञपात्रे तु पात्राणि प्रयुनक्तीति । अत्र प्रग्रहणं स्वरान्तस्योपसर्गस्योपलक्षणम् । उपग्रहणमपि स्वरादेः । तथा च वार्त्तिकं [स्वराद्यन्तोपसृष्टादिति वक्तव्यम्] इति । (युज्यते ब्रह्मचारी योगम्) । "सृजियुज्योः श्यंस्तु" इति कर्मवद्भावः, श्यंश्च यकोऽपवादः । अत्र कैयटे युज्यते इति योगः, ब्रह्मचारिणं योगो युनक्ति संबध्नातीत्यर्थः । ततो ब्रह्मचारिणः कर्तृत्वविवक्षायां युज्यते ब्रह्मचारी योगमिति भवतीति, श्यन्यकोः स्वरे भेदः । "तास्यनुदात्तेत्" इति लसार्वधातुकानुदात्तत्वे यकि प्रत्ययस्वरेण स एवोदात्तः स्यात् । श्यनि तु नित्स्वरेण धातुरुदात्तो भवति । (युग्यं वाहनम्) । "युग्यञ्च पत्रे" इति कर्मणि करणे वा क्यपि कुत्वन्निपात्यते । अन्यत्र योग्यमिति ण्यति कुत्वम्, (प्रयोज्यः । नियोज्यः) । "प्रयोज्यनियोज्यौ शक्यार्थे" इति ण्यति कुत्वाभावो निपात्यते । (युङ् । युञ्जौ) । "ऋत्विक्" इत्यादिना क्विन्, ऋत्विगादिभिर्निपातनैः साहचर्यादञ्चुयुजिक्रुञ्चामन्यदपि कार्यम्भवतीति ज्ञापनाद् उपपदाधिकारेऽपि निरुपपदादयं प्रत्ययो भवति, "युजेरसमासे" इति सर्वनामस्थाने नुम् । पदान्ते संयोगान्तलोपः, "क्विन्प्रत्ययस्य कुः" इति कुत्वम् । अन्यत्रानुस्वारपरसवर्णौ । असर्वनामस्थाने (युजः । युग्भ्याम्) इति, (युक्षु) इत्यत्र कुत्वे "खरि च" इति चर्त्वम् । (अश्वयुक्) । "सत्सूद्विष" इत्यादिना क्विप् । अत्र सूत्रे युजेत्यकारो न विवक्षित इति युनक्तियुज्यत्योर्द्वयोरपि ग्रहणं, "युजेरसमासे" इतीकारवतः सर्वनामस्थाने समासे नुन्निषेधोऽकाराविवक्षायां ज्ञापकः । यदि हि युजेः क्विप् न स्यात् "ऋत्विक्" इत्यादिना क्विन्नपि निपातनैः साहचर्यादनुपपदादेव स्यादित्यश्वयुगिति रूपमेव नास्तीति किन्नुम्निषेधेन । (योक्त्रः) । "दाम्नी" इत्यादिना ष्ट्रन् । अत्र स्तौत्यादिसाहचर्यादुभयपदिनोऽस्यैव ग्रहो न तु युज्यतेः, अकारस्तूच्चारणमात्रार्थः । हरदत्तोऽप्यनभिधानाद्युज्यतेर्न ग्रह इति । (योगी) । संपृचा-

दिना विनुण्। अत्र युनक्तियुज्यत्योर्द्वयोरपि ग्रहणं निरनुबन्धकस्योपादानादकारप्रश्लेषेऽपि नास्ति प्रमाणम्। (प्रयोगः)। घञ्। (प्रायोगिकम्)। भवार्थे अध्यात्मादित्वात् ठञ्। अनुशतिकादित्वादुभयपदवृद्धिः। योगाय प्रभवति (योग्यः, यौगिकः)। "योगाद्यच्च" इति यत्ठञौ। (युगम्)। घञ्। उञ्छादिपाठादगुणत्वम्, विशिष्टविषयं चैतत्, रथाङ्गे कालविशेषे च, (युग्यम्)। "तद्वहति रथयुग" इति यत्। संयुगे साधु (सांयुगीनम्)। "प्रतिजनादिभ्यः खञ्" इति खञ्, प्रतिजनादिपाठादेव संयुगशब्दस्य घञि गुणाभावः। (परियोगः, पल्ियोगः) "परेश्च घाङ्कयोः" इत्यत्र योगे चेति वक्तव्याद्वा लत्वम्। रुधादयोऽनुदात्तास्स्वरितेतः ॥ ७ ॥

अथ सेटौ स्वरितेतावाह।

उच्छृदिर् दीप्तिदेवनयोः ॥ उकारः क्त्वायामिड्विकल्पार्थः। (छृणत्ति। छृन्तः। छृन्दन्ति। छृणत्सि। छृन्थः। छृन्ते। छृन्त्से। छृन्दे। छृन्द्वहे। चच्छर्द। चच्छृदतुः। चच्छृदुः। चच्छृदिषे)। "सेसिचि" इति सकारादाविड्विकल्पं बाधित्वा क्रादिनियमान्नित्य एवेड्भवति। अन्ये तु विकल्पमाहुः, क्रादिनियमस्य प्रतिषेधविषयत्वात्। (छर्दिता। छर्दिष्यति। छर्दिष्यते। छर्त्स्यते)। "सेसिचि" इतीड्विकल्पः। (छृणत्तु। छृन्तात्। छृन्ताम्। छृन्दन्तु। अच्छृणत्। अच्छृन्ताम्। अच्छृन्त। अच्छृन्दाताम्। छृन्द्यात्। छृन्दीत)। आशिषि (छृद्यात्। छर्दिषीष्ट। छृत्सीष्ट। अछृदत्। अच्छृत्त। अच्छृत्साताम्। अच्छृत्सत। अच्छर्दिष्ट। अच्छर्दिषाताम्। चिच्छर्दिषति। चिच्छृत्सति। चरीच्छृद्यते। चर्छर्ति। छर्दयति। अचच्छर्दत्।) अत्र सन्वदित्वादन्तरङ्गत्वात्तुक्। न चास्ति 'वार्णादाङ्गं बलीयः' इति, व्याश्रयत्वात्, तुकः छकार आश्रयः, इत्वस्य तु चङ्परो णिः। (अचिच्छृदत्। अचच्छृदत्) उक्तं द्वा। (छृत्वा। छर्दित्वा)। उदित्त्वादिड्विकल्पः (छृण्णः। छृण्णवान्)। "यस्य विभाषा" इत्यनिट्त्वम्। छृदी सन्दीपने युजादौ ॥ ८ ॥

उतृदिर् हिंसानादरयोः ॥ (तृणत्ति) इत्यादि छृणत्तिवत् ॥ ९ ॥

कृती वेष्टने ॥ (कृणत्ति। कृन्तः। कृन्तन्ति। कृणत्सि। कृणद्मि। कृणत्तु। अकृणत्। कृन्त्यात्। कर्तिता) इत्यादि तौदादिकवत् ॥ १० ॥

ञिइन्धी दीप्तौ ॥ उदात्तोऽनुदात्तेत्। (इन्धे। इन्धाते। इन्त्से। इन्धे)। "श्नान्नलोपः" इति श्नात्परस्य प्रकृतेर्नकारस्य लोपः क्ङितोः। "श्नसोरल्लोपः" इत्यल्लोपः, (इन्धाञ्चक्रे)। "इजादेः" इत्याम्। अत्र न्यासकारादयः। केचित् "इन्धिभवतिभ्यां च" इति इन्धेः परस्य लिटः कित्त्वविधानसामर्थ्यादामो विकल्पमिच्छन्ति तदिन्धेश्छन्दो विषयत्वाद्भुवो वुको नित्यत्वादित्यादि भाष्यवार्तिकविरोधादुपेक्ष्यम्। (इन्धिता। इन्धिष्यते। इन्धाम्। इन्धाताम्। इन्धताम्। इन्त्स्व। इनधै। ऐन्ध। ऐन्धाताम्। ऐन्धत। ऐन्धाः। ऐन्धि। इन्धीत। इन्धीयाताम्)। आशिषि (इन्धिषीष्ट। इन्धिषीयास्ताम्। ऐन्धिष्ट। ऐन्धिषाताम्। इन्दिधिषते)। "नन्द्राः" इति नकारवर्जितस्य द्विर्वचनम्। (इन्धयति। ऐन्दिधत्।) इद्धः)। ञित्वाद्वर्तमाने क्तः। ईदित्त्वादनिट्त्वम्। (एधः)। "अवोदैधौद्म" इति निपातनाद्धञि नलोपः। सान्तस्त्वेधस्शब्द औणादिकेऽसुनि बाहुलकान्नलोपे। अग्निमिन्धे इति (अग्निमिन्धः)। "भ्राष्ट्राग्न्योरिन्धे" इति मुम्। (समित्। समिद्। समिधौ)। सम्पदादित्वात् क्विप्। (सामिधेन्यो मन्त्राः)। "समिधामाधाने षेण्यण्" इति षेण्यण्। (सामिधेनी) ऋक्। षित्त्वान्ङीष्। "हलस्तद्धितस्य" इति यलोपः, अग्निमिन्धे इति (अग्नीत्) ऋत्विग्विशेषः, "क्विप् च" इति क्विप्। (आग्नीध्रः)। "अग्नीधः शरणे रण् भं च" इति रणप्रत्ययः, भं चेति भत्वात्पदत्वाभावाज्जश्त्वं न भवति। (शरणं गृहम्)। ञित्वाद् वृद्धिः। "आग्नीध्रः साधारणादञ्" इति स्वार्थेऽञ्यपीदमेव रूपम्। प्रयोजनन्तु स्त्रियाम् (आग्नीध्री) शालेति "टिड्ढा" इति ङीप्। विविधमिन्धे इति (वीध्रः)। अग्निर्विमलश्च।

"वाविन्धेः" इति वावुपसर्ग उपपदे इन्धेः क्रन्, किक्त्वादनुनासिकलोपः ॥ ११ ॥

खिद दैन्ये ॥ (खिन्ते । खिन्दान्ते । खिन्त्से । खिन्दे । खिन्ताम् । खिन्दाताम् । खिन्त्स्व । खिनदै । अखिन्त । अखिन्दाताम् । अखिन्दि । खिन्दीत । चिखिदे । खेत्ता) इत्यादिखिद्यतिवत् । खिन्दतीति शे गतम् ॥ १२ ॥

विद् विचारणे ॥ (विन्ते) इत्यादि खिनत्तिवत् ॥ (वित्तः, विन्नः) । "नुदविदोन्दत्रा" इति निष्ठानत्वविकल्पः ॥ उन्दिना साहचर्यादस्यैव तत्र ग्रहः । खिदिविदी अनुदात्तावनुदात्तेतौ ॥ १३ ॥

शिष्लृ विशेषणे ॥ इतो भुनक्त्यन्ता अनुदात्ता उदात्तेतः । (शिनष्टि । शिष्टः । शिंषन्ति । शिनक्षि । शिनष्मि । शिंष्वः) । ष्टुत्वं तवर्गस्य, सकारादौ षस्य कत्वम् । (शिशेष । शिशिषतुः । शिशेषिथ । शिशिषिव । शेष्टा । शेक्ष्यति । शिनष्टु । शिंष्टात् । शिंष्टाम् । शिण्ढि) । हेर्धित्वं षत्वजश्त्वानुस्वारपरसवर्णा यथायोग्यम् । (शिनषाणि । अशिनट् । अशिनड्) । षकारस्य "झलां जशोऽन्ते" इति जश्त्वे चर्त्वविकल्पः । (अशिंष्टाम् । अशिनट् । अशिनषम् । अशिंष्व । शिंष्यात् । शिंष्याताम्) । आशिषि । (शिष्यात्) लुङि (अशिषत्) । लृदित्त्वात्परस्मैपदेऽङ् । तङि तु क्सः, (व्यत्यशिक्षत) इत्यादि । (शिशिक्षति । शिशिक्षते । शेशिष्यते । शेशिषीति । शेशेष्टि । शेषयति । अशीशिषत् । शिष्टः । शिष्टवान् । विशेषः । वैशेषिकम्,) "विनयादिभ्यश्च" इति स्वार्थे ठक् । महत्या विशिष्टः (महाविशिष्टः) [महदात्वे घासकरविशिष्टेषूपसंख्यानम्] इति पुंवद्भाव आत्वं च । शेषतीति दण्डके हिंसायां शपि । शेषयतीति युजादिपाठादसर्वोपयोगे ॥ १४ ॥

पिष्लृ संचूर्णने ॥ (पिनष्टि) इत्यादि शिषिवत् । (शुष्कपेषं पिनष्टि) । (चूर्णपेषं पिनष्टि) । (रूक्षपेषं पिनष्टि) । "शुष्कचूर्णरूक्षेषु पिष" इति शुष्कादौ कर्मण्युपपदे णमुल् । शुष्कं पिनष्टीत्यर्थः । (उदपेषं पिनष्टि) । "स्नेहने पिष" इति स्नेहवाचिनि करणे उपपदे णमुल्, उदकेन पिनष्टीत्यर्थग्रहणम् । "पेषं वासवाहनधिषु च" इति उद्भावः । सर्वत्र कषादित्वाद्यथाविध्यनुप्रयोगः । (पिष्टमयम्) । "पिष्टाच्च" इति विकारे मयट् । (पिष्टकर्णः) । "कर्णे लक्षणस्य" इति कर्णे उत्तरपदे लक्षणवाचिनो विधीयमानो दीर्घस्तत्रैव विष्टादिपर्युदासान्न भवति । (चोरस्य पिनष्टि) । "जासिनि प्रहण" इत्यादिना कर्मणि शेषे हिंसायां षष्ठी, अशेषे चाहिंसायाञ्च चोरं पिनष्टि, धानाः पिनष्टीति द्वितीयैव भवति ॥ १५ ॥

भञ्जो आमर्दने ॥ (भनक्ति । भङ्क्तः । भञ्जन्ति । भनक्षि । भनज्मि । भञ्ज्वः) । "श्नान्नलोपः" इति प्रकृतिनकारस्य लोपः । नकारे परतोऽकारस्य "अतो दीर्घो यञि" इति दीर्घो न भवति । अकारान्तस्यानङ्गत्वात् । किङितोस्तु "श्नसोरल्लोपः" इत्याकारलोपो, झलि "चोःकुः" इति कुत्वे "खरि च" इति चर्त्वम् । (बभञ्ज । बभञ्जतुः । बभञ्जिथ । बभङ्थ । बभञ्जिव) । क्रादिनियमादिट्, थलि "उपदेशेऽत्वत" इति निषेधाद्भारद्वाजनियमाच्च विकल्पः । (भङ्क्ता । भङ्क्ष्यति । भनक्तु । भङ्क्तात् । भङ्ग्धि) । हेरपित्त्वात् "श्नसोरल्लोपः" धित्वे कुत्वं गकारः । (भनजानि । अभनक् । अभनग्) । पदान्तत्वात्कुत्वे चर्त्वविकल्पः । (अभङ्क्ताम् । अभञ्जन् । अभनक् । अभनजम् । भञ्ज्यात्) । आशिषि (भज्यात् । अभाङ्क्षीत् । अभाङ्क्ताम्) । झलि सिचो लोपः । (बिभङ्क्षति । बम्भज्यते । बम्भञ्जीति । बम्भङ्क्ति) । "जपजभदहदशभञ्ज" इति यङि यङ्लुकि चाभ्यासस्य नुक् । तस्य अनुस्वारे पदान्तवद्वचनात्परसवर्णविकल्पः । (भञ्जयति । अबभञ्जत) । कर्मणि (अभञ्जि । अभाजि) । "भञ्जेश्च चिणि" इत्यनुनासिकलोपविकल्पः । (भङ्क्त्वा । भक्त्वा) "जान्तनशां विभाषा" इति क्त्वायामनुनासिकलोपविकल्पः । (भग्नः । भग्नवान्) "ओदितश्च" इत्योदित्वान्निष्ठानत्वम्, तस्यासिद्धत्वात्पूर्वमेव कुत्वम् । (भङ्गुरा) । "भञ्जभास" इति कर्मकर्तरि घुरच् । "चजोः कुघिण्ण्यतोः" इति कुत्वम् । (भङ्गः) । घञ् । (भङ्गा) कुसुम्भम् ।

कर्मणि घञन्ताट्टाप्। भङ्गानां भवनं क्षेत्रं (भङ्ग्यम्)। "विभाषा तिलमाषोमाभङ्गाणुभ्यः" इति यत्। विभाषाग्रहणात् खञि (भाङ्गीनं) भङ्गापि धान्यमिति स्थितं, भङ्गानां रजो (भङ्गाकटम्)। "अलाबूतिलोमाभङ्गाभ्यो रजसि कटच्" इति कटच्। (भङ्गी) पिप्पल्यादित्वान्ङीष्, भाज् दीप्त्यर्थ इति चुरादौ दण्डके इदित्। भजते भजतीति सेवायां शपि गतम् ॥ १६ ॥

भुज पालनाभ्यवहारयोः ॥ (भुनक्ति। भुङ्क्तः। भुञ्जन्ति। भुनक्षि। भुनज्मि। बुभोज। बुभुजतुः। बुभोजिथ। क्रादिनियमान्नित्यमिट्। (भोक्ता। भोक्ष्यते। भुनक्तु। अभुनक्। भुञ्ज्यात्) आशिषि (भुज्यात्। अभौक्षीत्। अभौक्ताम्। बुभुक्षति) "हलन्ताच्च" इति सनः कित्त्वम्। बोभुज्यते। बोभुजीति। बोभोक्ति। भोजयति। अबूभुजत्। भुङ्क्ते। भुञ्जाते। भुञ्जते। भुङ्क्षे। बुभुजे। बुभुजिषे। भोक्ता। भोक्तासे। भोक्ष्यते। भुङ्क्ताम्। अभुङ्क्त। अभुञ्जाताम्। भुञ्जीत। भुञ्जीयाताम्)। आशिषि। (भुक्षीष्ट। अभुक्त। अभुक्षाताम्)। "लिङ्सिचावात्मनेपदेषु" इति कित्त्वादगुणत्वम्। (बुभुक्षते)। "भुजोऽनवने" इति तङ्। भुजोऽदने इति वक्तव्ये अनवनइतिवचनमभ्यवहारादन्यत्रापि तङर्थम्, तथा चेदमपि सिध्यति 'बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्' अनुभव इहार्थः। (भोजयति देवदत्तं यज्ञदत्तः)। "गतिबुद्धि" इत्यादिना प्रयोज्यं कर्म। निगरणार्थत्वान्नित्यम्परस्मैपदम्। (इदमेषां भुक्तम्,) "क्तोऽधिकरणे च" इत्यधिकरणे भावे कर्मणि वर्तमाने क्तः। एवं भावकर्मणोरुदाहार्यम्। भुक्ता ब्राह्मणा इति, भुक्तमेषामस्तीत्यर्शआद्यजन्तः, (भोज्यम्) "भोज्यं भक्ष्ये" इति ण्यति अकुत्वं निपात्यते। अभक्ष्ये तु (भोग्या) लक्ष्मीः। (भोगः) शरीरं "हलश्च" इति संज्ञायां घञ्। (मातृभोगीणः)। "आत्मन्विश्वजनभोगोत्तरपदात्" इति "तस्मै हितम्" इति विषये खः। (आचार्यभोगीनः) इत्यत्र "आचार्यादणत्वं च" इति णत्वाभावः। (राजभोगीनः)। राजाचार्याभ्यान्तु नित्यं भोगोत्तरपदाभ्यामेवेति भोगोत्तरपदाभ्यामेवाभ्यां हितप्रत्ययनियमादाचार्याय हितं राज्ञे हितमित्यत्र वाक्यमेव भवति न तु सामान्यतश्छः प्रत्ययः। मात्रे हितमित्यादौ तु (मात्रीयम्) इत्यादि भवत्येव। (भुजः) "हलश्च" इति करणे घञ्, "भुजन्युब्जौ पाण्युपतापयोः" इति अगुणत्वमकुत्वं च निपातितम्। (भुजा)। अयमेव टाबन्तः। (भोजः)। पदाद्यच्। भजतीति शपि। भुजतीति शे कौटिल्ये। शिषादयश्चत्वारोऽनुदात्ताः उदात्तेतः ॥ १७ ॥

तृह हिंसायाम् ॥ (तृणेढि। तृण्ढः। तृंहन्ति। तृणेक्षि। तृण्ढः। तृण्ढ। तृणेह्मि। तृंह्वः। तृंह्मः) "तृणह इम्" इति हलादौ पिति सार्वधातुके तृणह इमागमः। "आद्गुणः" झलि पदान्ते च "हो ढ" इति हो ढत्वे "झषस्तथोर्धोऽधः" इति धत्वे ष्टुत्वे "ढो ढे लोपः" इति पूर्वस्य लोपः। अपिति श्नसोरल्लोपे ऽनुस्वारपरसवर्णौ, सिपि ढत्वे "षढोः कः सि" इति कत्वम्। (ततर्ह। ततृहतुः। ततृहुः। ततर्हिथ। ततृहिव। तर्हिता। तर्हिष्यति। तृणेढु। तृण्ढात्। तृण्ढाम्। तृंहन्तु। तृण्ढि। तृणहानि)। तातङो ङित्वान्ङिच्च पिन्न भवतीत्यपित्त्वाद्धेरपि "सेर्ह्यपिच्च" इत्यपित्त्वान्नेमागमः। उत्तमस्य तु पित्त्वेऽप्यहलादित्वान्न भवति। (अतृणेट्। अतृणेड्। अतृण्ढाम्। अतृंहन्। अतृणेट्। अतृणेड्। अतृणहम्। अतृंह्व) तिप्सिपोर्हल्ङ्यादिलोपे प्रत्ययलक्षणेन हलादिपित्सार्वधातुकपरत्वादिमागमः। 'वर्णाश्रये नास्ति प्रत्ययलक्षणम्' इति निषेधो वर्णमात्रप्रत्ययविषयत्वादिति हलादिप्रत्ययस्याश्रयणान्न प्रवर्तते, मिपि नित्यत्वात्पूर्वमेवामि अहलादित्वान्नेमागमः। तातङश्च ङित्वात् श्नसोरल्लोपे तृणहरूपस्याभावान्नेमागमप्रसङ्गः। (तृंह्यात्। तृंह्याताम्)। यासुटो ङित्वेन 'ङिच्च पिन्न भवति' इति तिबादेरपित्वान्नेमागमः। आशिषि (तृह्यात्। तृह्यास्ताम्। अतर्हीत्। अतर्हिष्टाम्)। "नेटि" इति वृद्धिनिषेधः। (तितर्हिषति। तरीतृह्यते। तरीतर्ढि। तर्हयति। अतीतृहत्, अततर्हत्)। उत्तर्ढा। तृहितम्। तर्हित्वा) "न क्त्वा सेड्" इत्यकित्त्वम् ॥ १८ ॥

हिंसि हिंसायाम् ॥ (हिनस्ति । हिंस्तः । हिंसन्ति । हिनस्सि । हिनस्मि)। इदित्वान्नुम् । तस्य "श्नान्नलोप" इति लोपः । ङिति श्नसोरल्लोपे "नश्चापदान्तस्य" इत्यनुस्वारः । (जिहिंस, जिहिंसतुः । जिहिंसिथ । जिहिंसिव । हिंसिता । हिंसिष्यति । हिनस्तु। हिंस्तात् । हिंस्ताम् । हिंसन्तु । हिन्धि)। श्नान्नलोपश्नसोरल्लोपयोः "धि च" इति सलोपेऽनुस्वारपरसवर्णौ । (हिनसानि । अहिनत् । अहिंस्ताम् । अहिंसन् । अहिनत् । अहिनद् । अहिनः । अहिनसम् । अहिंस्व) । तिपि "तिप्यनस्तेः" इति सस्य दः । "सिपि धातोरुर्वा" इति दत्वरुत्वे, (हिंस्यात् । हिंस्याताम् । हिंस्यात् । हिंस्यास्ताम्) । लिङौ । (अहिंसीत् । अहिंसिष्ट । जिहिंसिषति । जेहिंस्यते । जेहिंस्ति । हिंसयति । अजिहिंसत् । हिंसकः) । "निन्दहिंस" इति वुञ् । (हिंस्रम्) । "नमिकम्पि" इत्यादिना रः । (हिंसा) "गुरोश्च हलः" इत्यकारः । (हिंसित्वा । हिंसितः) । हिनस्तीति (सिंहः) अच् । पृषोदरादित्वादाद्यन्तविपर्ययः ॥ १९ ॥

उन्दी क्लेदने ॥ (उनत्ति । उन्तः । उदन्ति । उनत्सि । उनद्मि । उन्द्वः । उदाञ्चकार) "इजादेश्च गुरुमतोऽनृच्छः" इत्याम् । (उन्दिता । उन्दिष्यति । उनत्तु । उन्तात् । उन्धि । उनदानि । औनत् । औन्ताम् । औन्दन् । औनः । औनत् । औनद् । औनदम्) "दश्च" इति सपि वा रुत्वम् । (उन्द्यात् । उन्द्याताम् । उद्यात् । उद्यास्ताम्) । लिङौ, (औन्दीत् । औन्दिष्टाम् । उन्दिदिषति) "न न्द्राः" इति नकारस्याद्वित्वम् । (उन्दयति । औन्दिदत् । उन्दित्वा । उन्नम् । उत्तम्) । ईदित्त्वादनिट्त्वम् । नुदविदोन्द" इति निष्ठानत्वविकल्पः । (अवोदः) घञ् । किञ्चिदार्द्रः । उन्दनम् (ओद्म) मनिन्नौणादिकः । (ओद्मः) "अवोदैधौद्म" इति नलोपो घञ्यगुणत्वञ्च निपात्यते । (इन्दुः) "उन्देरिच्चादेः" इति उप्रत्यय इकारश्चोकारस्य । (ओदनम्) । "उन्देर्नलोपश्च" इति युचि नलोपः । (उद्रम्) "स्फायीतञ्चि" इति रक् । (उदकः । उदकम्) । क्वुन्नन्तो निपातितः । (उदधिः । क्षीरोदः) *"उदकस्योदः संज्ञायाम्"* इति पूर्वपदस्योत्तरपदस्योदादेशः । (उदवासः) उदकस्य वाहनः (उदवाहनः) उदधिर्घटः । "पेषं वासवाहनाधिषु च" इति पेषमादावुत्तरपदे उदकस्योदादेशः, असंज्ञार्थं वचनम् । उदकस्य पात्रम् (उदकपात्रम् । उदपात्रम्) *"एकहलादौ पूरयितव्येऽन्यतरस्याम्"* इति वोदभावः । इह पूरयितव्यं पूरणीयं, तद्वाचिन्यसहाये हलादावुत्तरपदे उदकस्योद इति सूत्रार्थः । (उदमन्थः) । "मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च" इति मन्थादिषूत्तरपदेषूदकस्योदभावः । (उदौदनः) इत्यादि चोदाहार्यम् । (उदन्वान्) घटः, (उदन्वान्) नाम ऋषिः । "उदन्वानुदधौ च" इति मतुप्युदकस्योदभाव उदधौ संज्ञायां च निपात्यते, उदधिग्रहणमसंज्ञार्थम् । (उदन्यति) । पिपासतीत्यर्थः । "अशनायोदन्य" इति क्यच्युदकस्योदभावः पिपासायाम् । (उदक्यः) "उदकस्योदः संज्ञायाम्" इति दिगादिपाठाद्यत् ॥ २० ॥

अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु ॥ (अनक्ति । अङ्क्तः । अञ्जन्ति । अनक्षि । अनज्मि । अञ्ज्वः) । "श्नान्नलोपः" । "श्नसोरल्लोपः" । "चोः कुः" झलि पदान्ते च "खरि च" इति चर्त्वम् । (आनञ्ज । आनञ्जतुः । आनञ्जिथ । आनङ्थ । आनञ्जिव । आनञ्ज्व) । ऊदित्त्वादिड्विकल्पः । क्रादिनियमः प्रतिषेधविषय इत्युक्तम् , "अत आदेः" इत्यभ्यासादेर्दीर्घे "तस्मान्नुड्" इति नुट् । (अङ्क्ता । अञ्जिता । अङ्क्ष्यति । अञ्जिष्यति । अनक्तु । अङ्क्तात् । अङ्ग्धि । अनजानि । आनक् । आङ्क्ताम् । आनजम् । आञ्ज्व । अञ्ज्यात् । अज्यात्) । लिङौ । (आञ्जीत् । आञ्जिष्टाम्) । "अञ्जेः सिचि" इति नित्यमिट् । (अञ्जिजिषति) "स्मिपूङ्रञ्ज्वशां सनि" इति नित्यमिट् । "नन्द्राः" इति नकारस्य न द्विर्वचनम् । (अञ्जयति । आञ्जिजत् । अञ्जित्वा । अङ्क्त्वा । अक्त्वा) अनिट्पक्षे "जान्तनशां विभाषा" इति पक्षेऽनुनासिकलोपः । इट्पक्षे "नक्त्वा सेट्" इत्यकि-

स्त्वम् । (अक्तः । अक्तवान्) । "यस्य विभाषा" इत्यनिट्त्वम् । (आज्यम्) । "आङ्पूर्वादञ्जेः संज्ञायाम्" इति क्यप्यनुनासिकलोपः । (व्यङ्ग्यम्) । ण्यति कुत्वम् । (अङ्गः) भावे घञ् । (अञ्जिका) । संज्ञायां ण्वुल् । लिपि विशेषः । (अञ्जनम्) ल्युट् । (काञ्जिकम्) । अजिः—अभिव्यक्तिः । केन जलेन अजिरस्येति बहुव्रीहौ कप् । (अञ्जलिः) "ऋतन्यञ्जि" इत्यादिनाऽलिच् । द्वे अञ्जली प्रमाणमस्य (द्व्यञ्जलम् । त्र्यञ्जलम्) "द्वित्रिभ्यामञ्जलेः" इति समासान्तोऽच् द्विगौ । "अद्व्यर्धपूर्वाद्विगोः" इत्यार्हीयस्य ठको लुक् । अद्विगौ व्यञ्जलिः ॥ २१ ॥

तञ्चू सङ्कोचने ॥ (तनक्ति । तङ्क्तः । तञ्चन्ति । तनक्षि । तनच्मि । ततञ्च । ततञ्चतुः । ततञ्चिथ । ततङ्क्थ । ततञ्चिव) । ऊदित्त्वात् स्वरत्यादिना इड्विकल्पः । क्रादिनियमः प्रतिषेधविषय इत्युक्तम् । (तङ्क्ता । तञ्चिता । तङ्क्ष्यति । तञ्चिष्यति । तनक्तु । तङ्क्तात् । तङ्ग्धि । तनचानि । अतनक् । अतङ्क्ताम् । अतञ्चन् । अतनक् । अतनचम् । अतञ्च्व । तञ्च्यात्) आशिषि (तच्यात् । अतञ्चीत् । अताङ्क्षीत् । तितञ्चिषति । तितङ्क्षति । तातच्यते । तातङ्क्ति । तञ्चयति । अततञ्चत् । आतञ्चनम्,) ल्युट् । (आतङ्कः) । घञ् (तञ्चित्वा,) इट्पक्षे "न क्त्वा सेट्" इत्यकित्त्वान्नलोपाभावः । (तक्तः) "यस्य विभाषा" इत्यनिट्त्वम् । अयं प्रथमान्तोऽपि तृतीयान्तमध्ये ऊदित्प्रसङ्गादेकवर्गीयत्वाच्च पठितः । आत्रेयादयस्तु तृतीयान्तमेव पठन्ति । (तक्रम्) । "स्फायितञ्चि" इत्यादिना रक् । बाहुलकाच्चकारस्य ककारः ॥ २२ ॥

ओविजी भयचलनयोः ॥ (विनक्ति । विङ्क्तः । विञ्जन्ति । विनक्षि । विनज्मि । विञ्ज्मः । विविजतुः । विविजिथ । विविजिव) "विज इट्" इति इडादिप्रत्ययस्य पित्त्वेऽपि ङित्त्वान्न गुणः । (विजिता । विजिष्यति । विनक्तु । विङ्क्तात् । विङ्ग्धि । विनजानि । अविनक् । अविङ्क्ताम् । अविनक् । अविनजम् । विञ्ज्यात् । विञ्ज्याताम् । विज्यात् । विज्यास्ताम्) लिङौ । (अविजीत् । अविजिष्टाम् । विविजिषति । वेविज्यते । वेविजीति । वेवेक्ति । वेजयति । अवीविजत् । विजित्वा) । "नक्त्वा सेट्" इत्यकित्त्वेऽपि "विज इट्" इति ङित्त्वान्न गुणः । (विग्नः । विग्नवान्) । ईदित्त्वादनिट्त्वम् । ओदित्त्वान्निष्ठानत्वम् । (वेगितम्) इति घञन्तात्तारकादित्वादितजित्युक्तम् । (वेवेक्ति । वेविक्ते) इति श्लौ गतम् । उद्विजत इति शे ॥ २३ ॥

वृजी वर्जने ॥ (वृणक्ति । वृङ्क्तः । वृञ्जन्ति । ववर्ज । ववृजतुः । ववर्जिथ । ववृजिव । वर्जिता । वर्जिष्यति । वृणक्तु । वृङ्क्तात् । वृङ्क्ताम् । वृङ्ग्धि । वृणजानि । अवृणक् । अवृङ्क्ताम् । अवृणक् । अवृङ्क् । अवृणजम् । अवृञ्ज्व । वृञ्ज्यात् । वृज्यात्) । लिङौ, (अवर्जीत् । अवर्जिष्टाम् । विवर्जिषति । वरीवृज्यते । वरिवृजीति । वरीवर्क्ति) इत्यादि । (वर्जयति । अवीवृजत् । अववर्जत् । वर्जित्वा) । "न क्त्वा सेट्" इत्यकित्त्वाद्गुणः । (वृक्तः) ईदित्त्वादनिट्त्वम् । (प्रवर्ग्यम्) । ण्यति कुत्वम् । अत्र वृची वरणे इति दुर्गादयः पठन्ति, तस्यापि वृजिवद्रूपन्नेयम् ॥ २४ ॥

पृची सम्पर्के ॥ (पृणक्ति । पृङ्क्तः । पृञ्चन्ति । पपर्च । पपृचतुः । पपर्चिथ) इत्यादि वृजिवत् । (संपर्की) । सम्पृचेत्यादिना घिनुण् । तृहादय उदात्ता उदात्तेतः ॥ २५ ॥ वृत् ॥ रुधादयो वृत्ता इत्यर्थः । धातुपारायणे तु गणसमाप्तिर्नेष्यते, तेन लुनति पुनतीति सिध्यतीति ॥

इति श्रीपूर्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसङ्गममहाराजमहामन्त्रिणा सायणसुतेन माधवसहोदरेण सायणाचार्येण विरचितायां माधवीयायां धातुवृत्तौ रुधादयः सम्पूर्णाः ॥

अथ तनादयः ॥

तनु विस्तारे ॥ तनोति । तनुतः । तन्वन्ति । तनोषि । तनोमि । तन्वः । तन्मः । तनुमः) "तनादिकृञ्भ्य उः" इति उप्रत्ययः । शपोऽपवादः । तस्य पिति "सार्वधातुकार्धधातुकयोः" इति गुणः, अन्यत्राजादौ यणादेशः । वकारमकारादौ "लोपश्चास्यान्यतरस्यां म्वोः" इति पक्षे लोपः । (ततान । तेनतुः । तेनुः । तेनिथ । तेनथुः । तेन । ततान । ततन । तेनिव) किति लिटि "थलि च सेटि" इत्येत्वाभ्यासलोपौ । (तनिता । तनिष्यति । तनोतु । तनुतात् । तनुताम् । तन्वन्तु । तनु । तनवानि) । "उतश्च प्रत्ययात्" इति हेर्लुक् । (अतनोत् । अतनुताम् । अतन्वन् । अतनोः । अतनवम् । अतन्व । अतनुव । तनुयात् । तनुयाताम् । तनुयाः । तनुयाम्) । आशिषि (तन्यात् । तन्यास्ताम् । अतनीत् । अतानिष्टाम् । अतनिष्टाम्) । "अतो हलादेः" इति वा वृद्धिः । (तनुते । तन्वाते । तन्वते । तनुषे । तन्वे । तनुवहे । तन्वहे । तेने । तेनाते । तेनिषे । तेनिवहे । तनिता । तनिष्यते । तनुताम् । तन्वाताम् । तनुष्व । तनवै ; अतनुत । अतन्वाताम् । अतन्वत । अतनुथाः । तन्वीत । तन्वीयाताम् । तन्वीथाः । तन्वीय) । आशिषि । (तनिषीष्ट । तनिषीयास्ताम् । अतत । अतनिष्ट । अतनिष्ठाः । अतथाः । अतनिध्वम्) । "तनादिभ्यस्तथासोः" इति तथासोः पक्षे सिचो लुक् । थासा साहचर्यादात्मनेपदस्य तशब्दस्येह ग्रहणादतनिष्ट यूपमित्यत्र लुङ्न भवति । (तितनिषति । तितांसति । तितंसति) । [तनिपतिदरिद्राणामुपसंख्यानम्] इतीड्विकल्पः । "तनोतेर्विभाषा" इति झलि सनि वा दीर्घत्वम् । एवं तङ्यपि त्रैरूप्यम् । (तन्तन्यते) । "नुगत" इत्यभ्यासस्य नुक् (तन्तन्ति । तन्तान्तः) । "अनुनासिकस्य" इति दीर्घः । लुकि "अनुदात्तोपदेश" इत्यादिनानुनासिकलोपस्तनोत्यादीनामिति गणनिर्देशान्न भवति । (तानयति । अतीतनत् । तायते । तन्यते) "तनोतेर्यकि" इति वात्वम् । अवतनोतीति (अवतानः) [तनोतेर्णं उपसंख्यानम्] इति णः । (तनित्वा । तन्त्वा) "उदितो वा" इतीड्विकल्पः । "अनुदात्तोपदेश" इत्यनुनासिकलोपः । (ततम्) "यस्य विभाषा" इत्यनिट्त्वं, पूर्ववदनुनासिकलोपः । (सततम् , संततम्) "समो वा हिततततयोः" इति पक्षे मलोपः । ष्यञि (सातत्यम्) इति नित्यमलोप इष्यते । (वितत्य) । "वा ल्यपि" इत्यस्य व्यवस्थितविभाषात्वान्नित्यमनुनासिकलोपः । (तन्तिः) "न क्तिचि दीर्घश्च" इति क्तिचि दीर्घानुनासिकलोपयोर्निषेधः । (ततिः) । क्तिनि नलोपः । "तितुत्र" इतीण्निषेधः । (परीतत्) । "गमः क्वौ" इति अत्र गमादीनामितिवचनादनुनासिकलोपे तुक् "नहिवृति" इत्यादिना पूर्वपदस्य दीर्घः । (तन्तुः) । "सितनिगमि" इति तुन् । (तन्त्रम्) ष्ट्रन् । (तातः) । "द्युतनिभ्यां दीर्घश्च" इति तप्रत्यये अनुनासिकलोपे पूर्वस्य दीर्घः । (तनुः) । "तनुभ्रूमृदृशि" इत्यादिनोप्रत्ययः गुणवचनत्वेन "वोतो गुणवचनात्" इति वा ङीषि (तन्वी) तनुशब्दः स्त्रीजातिवचनोऽपि, तत "ऊङुत" इत्यूङि (तनूः) । तथा च प्रयुज्यते 'ननु सुतनूमनुपालयानुयान्तीं, 'वरतनु सम्प्रवदन्ति कुक्कुटाः' इति । केवलस्य त्वस्याप्रसिद्धत्वादप्रयोगः । (तनूः) शरीरम् । "कृषिचमितनि" इत्यूकारः । (तनुः । तनुषी) । "अर्तिपृवपियजितनिधनितपिभ्योनित्" इति उस् । (तन्त्रम्) । ष्ट्रन्, (तातः) । "द्युतनिभ्यां दीर्घश्च" इति क्तप्रत्यय अनुनासिकलोपे पूर्वस्य दीर्घः । (तितउः) परिपवनम् । "तनोतर्डउः सन्वच्च" इति डउप्रत्यये डित्वाट्टिलोपः । सन्वद्भावाद् द्विर्वचनादि, सूत्रे डउरितिव्यस्तोच्चारणान्न सन्धिकार्य्यम् । तनु श्रद्धोपकरणयोरितियुजादौ ॥ १ ॥

षणु दाने ॥ (सनोति । सनुते) । इत्यादि तनोतिवत् । "धात्वादेः षः सः" । णत्वन्तु निमित्तापायादपैति । विशेषस्तु "जनसनखनां सञ्झलोः" इति झलादौ सनि क्ङिति च नित्यमात्वम् "ये विभाषा" इति यकारादौ क्ङिति वात्वं च । (सिषासति) । "सनी-

वन्त" इत्यादिनेड्विकल्पः। इट्पक्षे-(सिसनिषति)। अत्र षणपरत्वात् "स्तौतिण्योरेव" इति नियमात् प्रकृतेस्सस्य न षत्वम्। (सात्वा) उदित्त्वादिड्विकल्पः। इटि (सनित्वा। सातः। सातवान्) "यस्य विभाषा" इत्यनिट्त्वं, तादावनुनासिकलोपं बाधित्वा "जनसनखन" इत्यात्वं भवति। (असात। असाथाः) इत्यत्र "तनादिभ्यस्तथासोः" इति सिचो लुकि तथासोर्ङित्त्वमाश्रित्य आत्वं भवति। (सायते। सन्यते। संसन्यते। सासायते) इति यकि यङि च "ये विभाषा"इत्यात्वं वा भवति। (सन्यात्)इत्यत्र तु "ये विभाषा"इत्यात्वं ये इत्यत्वतो निर्देशान्न भवतीति धातुपारायणे। (सातिः, सतिः। सन्तिः) "सनः क्तिचि लोपश्चास्यान्यतरस्याम्" इत्याकारः, पक्षे तदभावे वा नलोपश्च। (सातिः)। "ऊतियूति" इत्यादिना क्तिनि निपात्यते ॥ २ ॥

क्षणु हिंसायाम् ॥ (क्षणोति। क्षणुते। चक्षाण। चक्षणे। क्षणिता। क्षणितासि। क्षणितासे। क्षणिष्यति। क्षणिष्यते। क्षणोतु। क्षणुतात्। क्षणुतम्। क्षण्वाताम्। अक्षणोत्। अक्षणुत। क्षणुयात्। क्षण्वीत। क्षण्यात्। क्षणिषीष्ट। अक्षणीत्। अक्षणिष्टाम्) "ह्म्यन्त" इत्यादिना "अतो हलादेः" इति वृद्धिनिषेधः। (अक्षत। अक्षणिष्ट। अक्षथाः। अक्षणिष्ठाः) "तनादिभ्य" इति वा सिचो लुक्, तदा तनोत्यादित्त्वादनुनासिकलोपः। चिक्षणिषति। चङ्क्षण्यते। क्षाणयति। अचिक्षणत्)। "सन्वल्लघुनि" इति त्वनेकहल्व्यवधानेऽपि भवति, "अत्स्मृदृत्वर"इत्यादिना इत्वापवादादत्वविधानाज्ज्ञापकात्। अयमप्युपदेशे तवर्गीयान्तः। लक्षणवशात्तु णत्वं, तेन चक्षन्तीत्यत्रानुस्वारपरसवर्णौ भवतः। णत्वं त्वनुस्वारीभूतो णत्वमतिक्रामतीति तत्र तत्रोक्तत्वान्न भवति। (क्षत्वा। क्षणित्वा) "उदितो वा" इत्युदित्त्वादिड्विकल्पः। (क्षतः) "यस्य विभाषा" इत्यनिट्त्वम्। (क्षन्तिः) इत्यत्र "न क्तिचि दीर्घश्च" इति दीर्घानुनासिकलोपनिषेधः ॥ ३ ॥

क्षिणु च ॥ हिंसायामित्यर्थः। (क्षिणोति। क्षिणुते। चिक्षेण। चिक्षिणे। क्षेणितासे। क्षेणिष्यति। क्षेणिष्यते। क्षिणोतु। क्षिणुताम्। अक्षिणोत्। अक्षिणुत। क्षिणुयात्। क्षिण्वीत। क्षिण्यात्। क्षि(१)णिषीष्ट। अक्षेणीत्। अक्षित। अक्षेणिष्ट। अक्षिणिष्ठाः)। पूर्ववत्पाक्षिके सिज्लुक्यनुनासिकलोपः (चिक्षिणिषति। क्षेणयति। क्षिणित्वा। क्षेणित्वा) "रलो व्युपधात्" इति कित्त्वविकल्पः। क्त्वायामुदित्त्वादिडभावे तु (क्षित्वा)। तनोत्यादित्वादनुनासिकलोपः। (चेक्षिण्यते। चेक्षेणति)। अयमपि तवर्गीयोपदेशः। णत्वन्तु लाक्षणिकमितीह क्षणिवदनुस्वारीभूतो णत्वमतिक्रामति (क्षितः)। "यस्य विभाषा" इत्यनिट्त्वम्। (क्षितिः)। "तितुत्र" इत्यनिट्त्वम्, अत्र सर्वत्र पिद्वचनेषु विकरणापेक्षो गुणः 'संज्ञापूर्वको विधिरनित्य'इति न भवतीत्यात्रेयमैत्रेयौ। तथा चापिशलिः। शब्विकरणेषु धातुगुणमभिधाय करोतेश्च मिदेश्चेत्यसूत्रयत्, "पुगन्तलघूपधस्यच" इत्यत्र रक्षितेन चोक्तम्। एवञ्च पञ्चबाणः क्षिणोतीति सिद्ध्यति। शाब्दिकाभरणे तु गुण एवोदाहृतः। शाकटायनक्षीरस्वामिभ्यामयं धातुर्न पठ्यते। अत एवात्रेयमैत्रेयाभ्यामपि स्वादेश्छान्दसेषु पठितस्य क्षेर्धातोर्भाषायामपि प्रयोगाङ्गीकारेण क्षेणोतीति साधितम्। शाकटायनः पुनस्तत्र छान्दसमेवाह। इहापि क्षिणुं न पपाठेति। तन्मते क्षिणोतिप्रयोगो भाषायामसाधुरेव ॥ ४ ॥

ऋणु गतौ ॥ अयमपि तवर्गीयान्तोपदेशः। लाक्षणिकं णत्वम्। (अर्णोति। अर्णुतः। अर्ण्वन्ति। अर्णोषि। अर्णोमि। अर्णुते। अर्ण्वाते। अर्ण्वते। अर्ण्वे। आनर्ण। आनृणतुः। आनर्णिथ। आनृण। आनृणिव। आनृणे। आनृणिषे। आनृणिवहे)। क्षिणोतिवल्लिट्प्रक्रिया। (अर्णिता। अर्णिष्यति। अर्णिष्यते। अर्णोतु। अर्णुहि)। गुणे कृते संयोगपूर्वत्वादुकार-

(१) क्षीणिषीष्टेति पुस्तकान्तरे पाठः।

स्य "उतश्च प्रत्ययात्" इति हेर्लुग्न भवति । (आर्णोत् । आर्णुताम् । ऋण्यात् । अर्णुयात्) । सर्वत्र विकरणापेक्षो गुणः । आशिषि (ऋण्यात् । अर्णिषीष्ट । आर्णीत् । अर्णिष्टाम् । आर्णिष्ट । आर्त । आर्णिष्ट । आर्णिष्ठाः । आर्थाः ,) तनादित्वात्सिज्लुक्यनुनासिकलोपः । (अर्णिनिषति) गुणे कृते "न न्द्राः" इति रेफवर्जितस्य द्विर्वचनम् । अत्रात्रेयो नान्तोपदेशत्वेऽपि द्विर्वचने कर्तव्ये णत्वस्य नासिद्धत्वम् , [पूर्वत्रासिद्धीयमद्विर्वचने] इति न्यायात् । तेन प्रकृत्यभ्यासयोर्द्वयोरपि णकारावित्याह । पारायणे तु णत्वस्यासिद्धत्वाद्णत्वस्य द्विर्वचने परस्य व्यवधानात् णत्वाभावो दर्शितः । 'प्राणिणत्'इत्यादावनितेः साभ्याससस्य णत्वविधानात् लिङ्वत् [पूर्वत्रासिद्धीयमद्विर्वचने] इत्यस्यानित्यत्वज्ञापनाण्णत्वविषये तस्याप्रवृत्तेरूर्णोनूयते इत्यादिवण्णत्वस्यासिद्धयैव भवितव्यमिति पारायणिकपक्षो ज्यायान् । अत एव पारायणिकपक्षविरोधाण्णोपदेशस्य पक्षो दूष्य एव । (अर्णयति । आर्णयत् , मा भवानर्णिनत् , माभवानृणिनत्) । उर्ऋद्वा (माभवानृणिनेताम् । माभवानृणिनथाः) । पूर्ववत्परस्य णत्वं न भवति । (ऋत्वा । अर्णित्वा) । उदित्त्वादिड्विकल्पः । अनिट्पक्षे "अनुदात्तोपदेश" इत्यनुनासिकलोपः (ऋतः । ऋतवान् । ऋतिः) (स्वर्णः) पचाद्यचि गुणः । उपसर्गस्य यण् । [तनादीनां छन्दस्युपसंख्यानम्] इत्युपसर्गस्योवङि (सुवर्णम्) संज्ञाशब्दत्वाद्भाषायामप्यस्य प्रयोगः साधुरित्यात्रेयमैत्रेयौ । शोभनो वर्णोऽस्येत्यपि शक्यते व्युत्पादयितुम् । द्वाभ्यां सुवर्णाभ्यां क्रीतं (द्विसुवर्णम् । द्विसौवर्णिकम्) । [सुवर्णशतमानयोरुपसंख्यानम्] इत्यार्हीयस्य ठकः पक्षे लुक् । लुगभावे "परिमाणान्तस्य" इत्युत्तरपदवृद्धिः । (अर्णः) । असुन् । (अर्णवः) । "अर्णसो लोपश्च" इति मत्वर्थीये वप्रत्यये सलोपः । अत्रात्रेयमैत्रेयादिभिः शब्विकरणे गुणः, करोतेश्च मिदेश्चेत्यापिशलिस्मरणाद्विकरणापेक्षो गुणोऽन्यस्य धातोर्न भवतीति क्षिणो(१)तीत्यादि दर्शितम् , तथा च क्षीरस्वाम्यपि क्षिणिप्रभृतीन्प्रस्तुत्य इमे सार्वधातुके सन्दिग्धगुणा इत्याह । सार्वधातुके परे उप्रत्यये इत्यर्थः । चन्द्रस्तु गुणाभावं न सहते । यदाह । अर्णोतीत्याद्युदाहृत्य क्षिणोर्धातोर्लघोरुपान्त्यस्य गुणो नेष्यत इत्येतस्यान्योऽभिप्रायो मृग्य इति । अतः काश्यपादयः "करोतेश्च" "मिदेश्च" इति सूत्रमन्यथा व्याख्यन् । करोतेः सम्बन्धिनि विकरणे धातोर्गुणो भवतीति । अत्र वर्द्धमानः । करोतेः सम्बन्धिनि गुण इति व्याख्यानं न्याय्यमिति, मुनित्रयाविरोधादस्य न्याय्यत्वम् ॥ ५ ॥

तृणु अदने ॥ (तर्णोति । तर्णुते । ततर्ण) इत्यादि पूर्ववत् । (तृणम्) । घञर्थे कः । (तृण्या) । "पाशादिभ्यो यः" इति समूहे यः । (कत्तृणं) तृणजातिविशेषः, "तृणे च जातौ" इति कोः कद्भावस्तत्पुरुषे । स्वाभाविकमस्य धातोर्णत्वमिति केचित्, तेषां यङ्लुकि तरीतृणीति भाव्यम् । अन्येषां तु अनुस्वारीभूतो णत्वमतिक्रामतीति तरीतृन्तीति ॥ ६ ॥

घृणु दीप्तौ ॥ (घर्णोति । घर्णुते । जघर्ण) इत्यादि पूर्ववत् । (घृणा) । भिदादेराकृतिगणत्वादङ् । शिवस्वामी वकारोपधं पपाठ । तनादय उदात्ताः स्वरितेतः ॥ ७ ॥

वनु याचने ॥ दन्त्योष्ठ्यादिः । (वनुते । वनुषे । वन्वे । वनुवहे । ववने । ववनिषे) । वादित्वादेत्वाभ्यासलोपनिषेधः । (वनिता । वनिष्यते । वनुताम् । अवनुत । वन्वीत) आशिषि (वनिषीष्ट । अवनिष्ट । अवत । अवनिष्ठाः । अवथाः । विवनिषते । वंवन्यते । वंवन्ति) "ग्लास्नावनुवमां च" इत्यनुपसृष्टानां मित्त्वविकल्पे 'वनु च नोच्यत' इति घटादिकस्याग्रह इत्येके । अन्ये 'अनन्तरस्य विधिः' इति न्यायेन घटादिकस्य वनतेरेवेति । तेन (वानयति । प्रवानयति) इत्येव भवति । (वनित्वा । वत्वा) । उदित्त्वादिडभावे तनोत्यादित्वादनुनासिकलोपः । (वतः । वतवान्) "यस्य विभाषा"इत्यनिट्त्वम् । (वन्तिः)

---

(१) ऋणोतीत्यादीति पुस्तकान्तरे पाठः ।

"नक्किचिद्दीर्घश्च" इत्यनुनासिकलोपस्य दीर्घस्य च निषेधः । (वनी) वा(१)ञ्छा, तामिच्छतीति क्यजन्तात् ण्वुल्, (वनीयकः) । अर्थिपर्यायः । अन्ये तु वनीयेत्यकारान्त पठन्ति । तेषां वनीयतीति वनीयः, ततः संज्ञायां कन् । चान्द्रास्त्विमं परस्मैपदिनमाहुः । तन्मते वनोति । ववानेत्यादि ॥ ८ ॥

मनु अवबोधे ॥ (मनुते । मेने) इत्यादि वनुवत् । उदात्तावनुदात्तेतौ ॥ ९ ॥

डुकृञ् करणे ॥ (करोति । कुरुतः । कुर्वन्ति । करोषि । करोमि । कुर्वः । कुर्मः । कुरुते । कुर्वाते । कुरुषे । कुर्वे । कुर्वहे) । *"अत उत्सार्वधातुके"* इति सार्वधातुकपरस्योप्रत्ययान्तस्य करोतेरकारस्योकारः । तपरकरणाल्लघूपधगुणो न भवति । "नित्यं करोतेः" इति वकारमकारादौ नित्यमुकारस्य लोपः । कृतेऽस्मिन् "हलि च" इति दीर्घो "न भकुर्छुराम्" इति निषिध्यते । न चोदिति तपरत्वेनैव विकारनिवृत्त्यर्थेन गुणवद्दीर्घोऽपि न भविष्यतीति मन्तव्यम् । तस्मिन्हि विकारनिवृत्त्यर्थे प्रसक्ते दीर्घस्य पूर्वत्रासिद्धत्वात् । न चोकारलोपस्य स्थानिवद्भावेनेह हल्परत्वाभावः ? दीर्घविधिं प्रति न स्थानिवदिति वा [पूर्वत्रासिद्धे न स्थानिवत्] इति वा स्थानिवत्त्वस्य निषेधात् । (चकार । चक्रतुः । चकर्थ । चकृव) । क्रादिव्यतिरेकाभावाल्लिटीडभावः । (चक्रे । चक्राते । चकृषे । चकृवहे) । न चाजादावन्तरङ्गत्वात्पूर्वं यण्यनचकत्वाद् द्विर्वचनाप्रसङ्गः शंक्यः । "द्विर्वचनेऽचि" इति यणः स्थानिवत्त्वात् । (कर्ता । करिष्यति) । "ऋद्धनोः स्ये" इतीट् । (करोतु । कुरुतात् । कुरुताम् । कुरु । करवाणि । कुरुताम् । कुरुष्व । करवै) । "अत उत्सार्वधातुके" इत्यस्मिन्कर्तव्ये "उतश्च प्रत्ययात्" इत्यस्य हिलुको "असिद्धवदत्र" इत्यसिद्धत्वात्सार्वधातुकपरत्वेनोत्वं भवति । (अकारोत् । अकरोः । अकरवम् । अकुरुत । अकुरुथाः । कुर्यात् । कुर्याताम् । कुर्याः) । "ये च" इति यकारादौ करोतेरुप्रत्ययस्य नित्यं लोपः । (कुर्वीत । कुर्वीयाताम् । कुर्वीय) । यणादेशः । आशिषि । (क्रियात् । क्रियास्ताम्) । "रिङ् शयग्लिङक्षु" इति रिङादेशस्य रीङि प्रकृते रिङ्विधानात् "अकृत्सार्वधातुकयोः" इति दीर्घो न भवति । (कृषीष्ट , कृषीयास्ताम्) । रिङादेशे यकारादाविति सीयुटि न भवति । "उश्च" इति लिङ्सिचोरात्मनेपदे कित्वान्न गुणः । (अकार्षीत् । अकार्ष्टाम्) । सिचि वृद्धिः । (अकृत । अकृषाताम्) । "ह्रस्वादङ्गात्" इति सिचो लोपः । "तनादिभ्यस्तथासोः" इति विकल्पितो लुङ्न भवति । तनादित्वादेवास्योप्रत्यये सिद्धे पृथग्विधानादन्यत्तनादिकार्यं न भवतीति ज्ञापनात् । यद्वास्तु विकल्पः , तथापि "ह्रस्वादङ्गात्" इति लुगभावे लोपो भविष्यति । न च विकल्पेनास्य बाधोऽसिद्धत्वाल्लोपस्य । न च विकल्पविधानसामर्थ्यादसिद्धत्वेऽपि बाधः । तस्यान्यत्र (अतत, अतनिष्ट) इत्यादौ चरितार्थत्वात् । एवं च विकरणविधौ कृञ उपादानं प्रपञ्चार्थं भवति । कर्मणि (क्रियते । अकारि) । "रिङ शयग्लिङ्क्षु" इति रिङादेशो यकि । अत्रात्रेयः । कथं क्रियतीत पुरुषकारइत्युपादाय "व्यत्ययो बहुलम्" इति कर्मण्यपि परस्मैपदसिद्धेः । तथा च गुरुटीकायां कृताः पुरोडाशाः, करिष्यन्ति(२)निर्वापा इति, अत्र कर्मण्येव लृटि शतृप्रयोगो दृश्यते । प्रयोगमुखे तु तिङन्तप्रतिरूपको निपात इत्युक्तमित्याहुः । (कर्मकर्तरि क्रियते कटः स्वयमेव, अकारि अकृत कटः स्वयमेव) । "अचः कर्मकर्तरि" इति तशब्दे च्लेर्वा चिण् । (चिकीर्षति) । "इको झल्" इति कित्वान्न गुणः ।

(१) याञ्चेति पुस्तकान्तरे पाठः ।

(२) क्वचित् पुस्तके करिष्यन्तो निर्वपा इति कर्मण्येव लृटि शतृप्रत्ययो दृश्यते इति पाठ उपलभ्यते स तु प्रयोगमुखे तु तिङन्तप्रतिरूपको निपात इत्युत्तरग्रन्थासङ्गत्या ऽसंगतः प्रतिभातीति चिन्त्यं विद्वद्भिः ।

"अज्झनगमाम्" इति दीर्घे "ऋत इद्धातोः" इतीत्वे रपरत्वे "हलि च" इति दीर्घः । (चेक्रियते) रिङ् । (चर्कर्ति) इत्यादि । (कारयति कटं देवदत्तं यज्ञदत्तः, देवदत्तेनेति वा) "हृक्रोरन्यतरस्याम्" इति वा प्रयोज्यं कर्म । (संस्करोति) । अलङ्करोतीत्यर्थः । तत्र संस्कुर्वन्ति समवयन्तीत्यर्थः । (समस्करोत् । सञ्चस्कार । सञ्चस्करतुः । सञ्चस्करिथ । सञ्चस्करिव) । "सुट् कात्पूर्वः" । "अडभ्यासव्यवायेऽपि" इति अधिकारे "सम्पर्युपेभ्यः करोतौ भूषणे" "समवाये च" इति कात्पूर्वः सुट्, समवायः समुदायः । "समः सुटि" इति समो मकारस्य रुः । तस्य "खरवसानयोः" इति विसर्जनीये "विसर्जनीयस्य सः" इति सत्वम् । "वा शरि" इति विसर्जनीयो न भवति, व्यवस्थितविभाषाविज्ञानात् । वार्तिके तु [सपुंकानां सो वक्तव्यः] इति रोरपवादः स एव विहितः । भाष्ये तु "समः सुटि" इति द्विसकारकनिर्देशात्सूत्रेणैव सविधिः सिद्ध इत्युक्तम् । "अत्रानुनासिकः पूर्वस्य तु वा" इति पक्षे सात्पूर्वस्यानुनासिकः, अत्रग्रहणं रुप्रकरणोपलक्षणम्, अनुनासिकाभावे "अनुनासिकात्परोऽनुस्वारः" इत्यनुस्वार आगमः । क्रादिसूत्रे [कृञो सुडिति वक्तव्यम्] इति वचनात्ससुट्कः क्राचन्यो भवतीति लिटीडागमः । भारद्वाजनियमोऽप्यसुट एवेष्यत इति वृत्त्यादौ स्थित(१)मिति नेड्विकल्पः, सुटि कात्पूर्वग्रहणं सुटोऽभक्तत्वज्ञापनार्थमिति व्यवस्थितत्वात्संक्रियत इत्यादावृकारान्तत्वेऽपि संयोगादित्वाभावात् "गुणोर्तिसंयोगाद्योः" इति गुणो न भवति । तथा (संस्कृषीष्ट, समस्कृषाताम्) इत्यादौ "लिङ्सिचोरात्मनेपदेषु" इति "ऋतश्च संयोगादेः" इतीण्न भवति । "ऋतश्च संयोगादेर्गुण" इत्यत्र तु संयोगोपधग्रहणं कर्तव्यं कृञोऽर्थमिति उक्तत्वात्संयोगाद्यवयवत्वाभावेऽपि ऋकारस्य (सञ्चस्करतुः) इत्यादौ किति लिटि गुणो भवति । एवमुपस्करोतीत्यादि, परिपूर्वत्वे तु "परिनिविभ्य" इत्यादिना सुटः षत्वं भवति परिष्करोतीत्यादि । अड्व्यवाये तु "सिवादिनां वाड्व्यवायेऽपि" इति विकल्पो भवति (पर्यष्करोत्, पर्यस्करोत्) इत्यादि । (परिचस्कार) इत्यादौ "स्थादिष्वभ्यासेन" इति न षत्वं, तत्र यतः प्राक् सितादित्यनुवर्तते, सम्पूर्वस्य क्वचिदभूषणेऽपि सुडिष्यते । तद्यथा समस्कुरुतेति, सूत्रे च दृश्यते "संस्कृतं भक्षाः" इति । उपात्कृञ "उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु" इत्येतेष्वपि कात्पूर्वः सुड् भवति । प्रतियत्नस्सतो गुणान्तराधानहेतुरिहा, ऽसावाधिक्याय वृद्धस्य वा तादवस्थ्याय, विकृतमेव वैकृतं प्रज्ञादित्वात्स्वार्थेऽण्, गम्यमानार्थस्य वाक्यैकदेशस्य स्वरूपेणोपादानं वाक्याध्याहारः । (एधो दकस्योपस्कुरुते) । 'कृञः प्रतियत्ने" इति कर्मणि शेषे षष्ठी, "गन्धनादि" सूत्रेण प्रतियत्ने तङपि, उपस्करोत्यन्नं, विकरोतीत्यर्थः । (उपस्करोति,) वाक्यैकदेशमध्याहरतीत्यर्थः । (उपस्कृतं भुङ्क्ते) उपस्कृतं जल्पतीत्युदाहरणे हरदत्तेन क्रियाविशेषणं व्याख्यातम् । (उत्कुरुते दोषं, श्येनो वर्तिकामपकुरुते, राजानं प्रकुरुते, परदारान्प्रकुरुते । एधो दकस्योपस्कुरुते । गाथाः प्रकुरुते । शतं प्रकुरुते) । सूचयति, भर्त्सयति, सेवयते, सहसा प्रवर्तते, गुणान्तराधानाय ईहते, प्रकर्षेण कथयति, विनियुङ्क्ते इति क्रमेणार्थाः । "गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः" इत्येतेष्वर्थेषु वर्तमानात्कृञो ऽकर्त्रभिप्रायेऽपि तङ् । (तमधिकुरुते) । "अधेः प्रसहने" इति तङ्, प्रसहनमभिभवः, अपराजयो वा, पराजयः शक्तस्य क्षमयैव यस्तदभाव सः, तथा च भारविः, भवादृशाश्चेदधिकुर्वते परा(२)निति । क्षमया न पराजयन्ते क्षमन्ते इत्यर्थः । (क्रोष्टा विकुरुते स्वरान्) । "वेः शब्दकर्मण" इति तङ् । अत्र कर्मेति कारकं गृह्यते न क्रिया । अत्र सु-

---

(१) स्थितत्वात्स्थलीति पुस्तकान्तरे पाठः ।

(२) अद्यतनपुस्तकेषु रतिमिति पाठ उपलभ्यते, तत्र, यद्यपि प्रसहनस्यासंगतेरधिपूर्वात्करोतेः "अधेः प्रसहने" इत्यात्मनेपदं न प्राप्नोति तथापि कर्त्रभिप्रायविवक्षायां "स्वरितञित" इत्यात्मनेपदबोध्यम् ।

धाकरः । "वेः शब्दकर्मणः" इति चेदनुवाकं श्लोकं वा विकरोतीत्यत्रातप्रसङ्गः । नेह शब्द-विषयो व्यापारो यस्य शब्दो निर्वर्त्यः । अत्र हि करोतिर्विनाशयतीत्यर्थो न निर्वर्तयतीति, विकुरुते सैन्धवः, साधु दान्तः, सा(१)धु वल्गतीत्यर्थः । "अकर्मकाच्च" इति पूर्ववत्तङ् । यदायं वल्गनायां कृञ् तदा सौकार्यातिशयाद्वल्गनावचनस्तदा कर्तुः कर्मवद्भावेऽपि ["यक्-चिणोः प्रतिषेधः] इत्यात्मनेपदाकर्मकत्वान्न यक्चिणाविति विकुरुते सैन्धवः स्वयमेव, व्यकृत सैन्धवः स्वयमेवेति भवतः । अत्रात्मनेपदाकर्मकेत्यनेनात्मनेपदविधावर्थान्तरबलादकर्मणा-मन्तर्भावितण्यर्थानां सकर्मकाणां सौकर्यातिशयविवक्षया पुनरकर्मकाणां कर्मकर्तृविषयाणां विग्रह इति येषां दर्शनं तेषां 'विकारहेतौ सति विक्रियन्त' इत्यत्र न यक्निषेधप्रसङ्गः । य-तोऽत्र स्वत एव सकर्मकस्य कर्माविवक्षया ऽर्मकत्वम्, येषां त्वात्मनेपदाकर्मकेति धातूपल-क्षणं, तेषां विकरोतिरपि अर्थान्तरवृत्त्या क्वचिदात्मनेपदनिमित्तं दृष्टमिति 'विकारहेतौ सति विक्रियन्ते' इत्यत्रापि कर्मकर्तरि यक्निषेधेन भाव्यम् । (संस्कुरुते कन्या स्वयमेव, समस्कृत कन्या स्वयमेव) इत्यत्रापि भूषाकर्मकत्वान्न यक्चिणौ । (पदं मिथ्या कारयते) स्वरादि-दुष्टमसकृदुच्चारयतीत्यर्थः । "मिथ्योपपदात्कृञोऽभ्यासे" इति ण्यन्तात्तङ् । "गन्धनादि" सूत्रचतुष्कमेव चाकर्त्रभिप्रायार्थम् । (अनुकरोति) ।"अनुपराभ्यां कृञः" इति परस्मैपदम् । इदं च कर्त्रभिप्राये गन्धनादौ च प्राप्तस्य तङोऽपवादः । अनेन च कृञस्तङ्निमित्तत्वमेव निषिध्यत इत्यनुचिकीर्षतीत्यादौ "पूर्ववत्सनः" इति तङ् न भवति । अत्रात्रेयः । 'संज्ञापू-र्वको विधिरनित्य' इति मा नः सर्वान्पराकृथा इति परस्मैपदाभावमाह । (कृत्यम् । कार्यम्) "विभाषा कृवृषोः" इति क्यब्ण्यतौ । वासरूपेण तव्यादयोऽपि, (कर्तव्यं, करणीयम्) । विद्या (यशस्करी । श्राद्धकर आस्तिकः, प्रैषकरो भृत्यः) । "कृञो हेतुताच्छील्यानुलो-म्येषु" इति कर्मण्युपपदे टप्रत्ययः । हेतुरैकान्तिकं कारणं, ताच्छील्यं तत्स्वभावता, आनु-लोम्यमनुकूलता । टित्वात्स्त्रियां ङीप् । (शङ्करा नाम परिव्राजिका) तच्छीलाचेत्यत्र ता-च्छीलिकं परमपि टप्रत्ययं "शमिधातोः संज्ञायाम्" इत्यच्प्रत्ययस्तत्र धात्वधिकारेऽपि पुन-र्धातुग्रहणाद्बाधते । तथा च वार्तिकं [शमिसंज्ञायां धातुग्रहणं कृञो हेत्वादिटप्रतिषेधार्थम्] इति । अयं च टप्रत्ययो "न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु" इति निषेधाच्छ-ब्दादिषूपपदेषु न भवतीत्यणेव, (शब्दकार) इत्यादि । दिवा हि प्राणिनश्चेष्टायुक्तान्क-रोतीति (दिवाकरः) । "दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलि-बिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुःषु" इति, दिवादिषूपपदेषु कृञष्टः । अहे-त्वाद्यर्थ आरम्भः । तत्र दिवाशब्दस्याधिकरणप्रधानत्वात्कर्मत्वं न भवतीति तत्र सुपीति संबध्यते । अन्येषु कर्मणीति । विभां करोतीति (विभाकरः, प्रभाकरः) इत्यादीनि उदाहा-र्याणि । (भास्करः) इत्यत्रैव भास्कर इति । करोतौ परे सकारस्य निर्द्देशात्सत्वम् । "अतः कृकमि" इति सत्वं तपरनिर्देशान्न प्राप्नोति कर एव कार इति प्रज्ञा(२)दिः । अत्रानन्त-करस्य नञ्समासेनैव सिद्धे ऽनन्तग्रहणं कृदुत्तरपदप्रकृतिस्वरार्थम् । अन्यथा "तत्पुरुषे तुल्य" इत्याद्युदात्तत्वं स्यात् । बहुशब्दो वैपुल्यवचनः, अन्यस्य संख्यात्वादेव ग्रहः । अत्रेष्टिः । कियत्तद्बहुषु कृञोऽज्विधानमिति । प्रयोजनं किंकरेत्यादौ स्त्रियां टाप् । (किंकरी) इति तु पुंयोगे ङीषि । हेत्वादौ वा पूर्वसूत्रेण टप्रत्यये (तस्करः) इत्यत्र [तद्बृहतोः करपत्योश्चोरदे-वतयोः सुट् तलोपश्च] इति सुट्तलोपौ, (धनुष्करः, अरुष्करः) । "नित्यं समासेऽनुत्तरप-दस्थस्य" इति विसर्जनीयस्य नित्यं षत्वम् । (कर्मकरः) "कर्मणि भृतौ" इति कर्मशब्द उपपदे भृतौ गम्यमानायां टप्रत्ययः, (भृतिः) वेतनम् । अन्यत्र कर्मकारः । (स्तम्बकरिः)

(१) शोभनमिति पाठान्तरम् ।

(२) कर एव कारः, प्रज्ञादित्वादण् । इति पुस्तकान्तरे पाठः ।

व्रीहिः । (शकृत्करिः) वत्सः । "स्तम्बशकृतोः" इतीन् । [व्रीहिवत्सयोरिति वक्तव्यम्]इत्युक्तत्वादन्यत्र स्तम्बकारः शकृत्कार इति, (मेघङ्करः । ऋतिङ्करः । भयङ्करः) । "मेघर्तिभयेषु कृञः" इति मेघादिषु कर्मसूपपदेषु खच् । खित्वान्मुम् । उपपदविधौ भयाढ्यादिग्रहणं तदन्तविधिं प्रयोजतीत्युक्तत्वादभयादिशब्देऽप्युपपदे खच् भवति (अभयङ्करः) इति । (क्षेमङ्करः। क्षेमकारः) । "क्षेमप्रियमद्रेण् च" इति खजणौ । खचो विकल्पनेनैव कर्मण्यणि सिद्धेऽणग्रहणं हेत्वादिषु टप्रतिषेधार्थम् , एवं प्रियमद्रयोरप्युदाहार्यम् । अनाढ्य आढ्यः क्रियते येन तत् (आढ्यंकरणम्) । "आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्" इति आढ्यादिष्वभूततद्भावविषयेषु अच्व्यन्तेषु कर्मसूपपदेषु करणकारके ख्युन् । स्त्रियाम्–(आढ्यंकरणो)। "टिड्ढाणञ्" इत्यादिना ङीप् । एवं सुभगङ्करणमित्यादि, खित्वान्मुम् । उपपदविधौ भयाढ्यादिग्रहणं तदन्तविधिं प्रयोजयतीत्युक्तत्वादनाढ्यादिष्वप्युपपदेषु ख्युन् भवति । अनाढ्यंकरणमित्यादि । (सुकृत्) शोभनं कृतवानित्यर्थः । "सुकर्मपापमन्त्रपुण्येषु कृञः" इति स्वादिषु कर्मसूपपदेषु कृञः क्विप् , एवं कर्मकृदित्यादि । राजानं कृतवान् (राजकृत्वा) । "राजनि युधि कृञः" इति राजनि कर्मण्युपपदे भूते क्वनिप् तुगागमः, स्त्रियां "वनो र च" इति ङीब्रेफौ, (राजकृत्वरी) । (सहकृत्वा) । "सहे च" इति भूते क्वनिप् । (अलङ्करिष्णुः) । "अलंकृञ्निराकृञ्" इति ताच्छीलिक इष्णुच् , (चक्रिः,) "भाषायां धाञ्कृञ्" इति किकिनोरन्यतरः, लिड्वद्भावाद् द्विर्वचनम् । (चक्रम्) घञर्थे कः, "कृञादीनां के द्वे भवत" इति द्विर्वचनम् । (चक्रीवान्नाम राजा,) "आसन्दीवदष्ठीवच्चक्रीवत्"इति मतुपि चक्रीभावो निपातनात् । (क्रिया । कृतिः) । "कृञः श च" इति शक्तिनौ । कृञ इति योगविभागात्क्यप् , तुगागमः, कृत्येति, शस्य भावविषयत्वात्सार्वधातुकत्वाच्च यकि विकरणे "रिङ् शयग्लिङ्क्षु" इति रिङादेशः । (ईषदाढ्यंकरो देवदत्तः, दुराढ्यङ्करः,) "कर्तृकर्मणोश्च भूकृञोः" इति करोतेः कर्तृकर्मवाचिनि चकारादीषदादिषु चोपपदेषु खल्प्रत्ययः । 'कर्तृकर्मणोश्च्व्यर्थयोः' इति वचनादभूततद्भावविषयोऽयं प्रत्ययः । तदयमर्थः । अनाढ्योऽनायासेन दुःखेन सुखेन वा आढ्यः क्रियते इति । (चोरङ्कारमाक्रोशति,) "कर्मण्याक्रोशे कृञः खमुञ्" इति कर्मण्युपपदे आक्रोशे गम्यमाने खमुञ् । अत्र करोतिः स्वभावादुच्चारणक्रिय इति चोरशब्दोऽपि स्वरूपपरः, तदयमर्थः–चोरशब्दमुच्चार्याक्रोशतीति । अस्य धातुसम्बन्धमात्रे विधानेऽपि णमुलन्तार्थानुरोधायाक्रोशार्थस्यैवानुप्रयोगः । (स्वादुङ्कारं भुङ्क्ते)। "स्वादुमि णमुल्" इति णमुल् । स्वादुमित्यर्थग्रहणात्–(सम्पन्नकारं भुङ्क्ते लवणकारं भुङ्क्ते) इत्यत्रापि णमुल् भवति । अत एव स्वादुमीतिनिर्देशादुपपदस्य मान्तत्वम् । ननु प्रकृतः खमुञ् विधीयतां खित्वान्मान्तत्वं भविष्यति किं निपातनेन, एवं तर्हि लिङ्गविशिष्टपरिभाषया "वोतो गुणवचनात्" इति ङीषन्तस्य स्वाद्वीशब्दस्योपपदत्वं माभूदिति निपातनम् , भावप्रत्ययविषये हि मान्तत्वनिपातने उकारान्तत्वाभावान्नास्ति ङीषः प्रसङ्गः । किं च च्व्यन्तस्य स्वाद्वादेर्मान्ततार्थं, तस्य ह्यव्ययत्वात् खित्वनिबन्धनो मुम्नास्ति । अत्र णमुल्विषये वासरूपविधिना क्त्वापि भवति (स्वादुंकृत्वा भुङ्क्ते) इत्यादि । (अन्यथाकारं भुङ्क्ते) । *"अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्"* इत्यन्यथादिषु उपपदेषु णमुल् , सिद्धशब्दः प्राप्तवचनः, प्राप्तप्रयोगश्चेत्करोतिरित्यर्थः, प्राप्तप्रयोगत्वं च निरर्थकत्वात् , तेनान्यथेति यावानर्थस्तावानेवान्यथाकारमिति । एवमेवङ्कारमित्यादि । अत्रापि वासरूपेण क्त्वापि भवति । तेनान्य (१)थाकृत्वा परिहरतीत्यादि भवति । (यथाकारमहं भोक्ष्ये तथाकारमहं भोक्ष्ये किन्तवानेन) । *"यथातथयोरसूयाप्रतिवचने"* इति कृञः सिद्धाप्रयोगाद्यथातथयोरुपपदयोरसूयाप्रतिवचने गम्यमाने णमुल् , यत्र प्रश्ने प्रतिवचनमसूयायां भवति तदसूयाप्रतिवचनम् । (अकृ-

---

(१) तेनान्यथा चोदितमन्यथाकृत्वा परिहार इत्यादि भवतीति पुस्तकान्तरे पाठः ।

तकारं) करोति, अकृतं करोतीत्यर्थः। "समूलाकृतजीवेषु हन्कृञ्ग्रहः" इति णमुल्। कषादित्वाद्यथाविध्यनुप्रयोगः। ब्राह्मण पुत्रस्ते जातः। किं तर्हि (नीचैःकारमाचक्षे, नीचैःकृत्य, नीचैःकृत्वेति वा)। "अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ" इति क्त्वाणमुलौ। यथाभिप्रेतं न भवति तथा ऽऽख्याने गम्यमाने, अत्र हि पुत्रजन्मनि प्रियमुच्चैराख्येयं गोपनीयवत्केनचिन्नीचैराख्यायते, "तृतीयाप्रभृतीन्यन्यतरस्याम्" "क्त्वा च" इति समासविकल्पः, (तिर्यक्कृत्य गतः तिर्यक्कृत्वा गतः, तिर्यक्कारमिति वा)। समाप्य गत इत्यर्थः। "तिर्यच्यपवर्गे" इति क्त्वाणमुलौ,। अपवर्गः समाप्तिः, पूर्ववत्समासविकल्पः, (मुखतःकृत्य, मुखतःकृत्वा, मुखतःकारं गच्छति)। "स्वाङ्गे तस्प्रत्यये कृभ्वोः" इति क्त्वाणमुलौ, पूर्ववदत्रापि समासविकल्पः। (नानाकृत्य, नानाकृत्वा नानाकारं, विनाकृत्य, विनाकृत्वा, विनाकारम्। द्विधाकृत्य, द्विधाकृत्वा, द्विधाकारम्। द्वैधाकृत्य, द्वैधाकृत्वा, द्वैधाकारम्,) एवं द्वैधंकृत्वेत्यादि। "नाधार्थप्रत्यये च्व्यर्थे" इति क्त्वाणमुलौ। पूर्ववत्समासः। सूत्रार्थो भवतावुक्तः। (कृतः। कृतवान्)। कृतं गृह्णाति (कृतयति)। "मुण्डमिश्र" इत्यादिना णिच्, स्वभावाद्गृह्णात्यर्थे प्रत्ययः। कृतमनेन (कृती)। "इष्टादिभ्यश्च" इतीनिः। कृतञ्च तदपकृतं च—(कृतापकृतं,) [कृतापकृतानामुपसंख्यानम्] इति समासः। (कृत्रिमम्) "ड्वितः क्त्रिः," "क्त्रेर्मम्नित्यम्" इति। कडति माद्यतीति (कडः)। अच्। कडं करोतीति कडंकरो माषमुद्गादिकाष्ठं, तदर्हतीति (कडङ्कर्यः, कडङ्करीयः,) "कडङ्करदक्षिणाच्छ च" इति अर्हतीत्यर्थे यच्छौ। अत्रैव निर्देशादचि मुमागमः। (कर्म)। मनिन्। कर्म शीलोऽस्य (कार्मः) "छत्रादिभ्यो णः" इति णः। "कार्मस्ताच्छील्ये" इति निपातनाट्टिलोपः। "नस्तद्धित" इति टिलोपे सिद्धे निपातनं णेऽपि क्वचिदण्कृतं कार्यं भवतीति ज्ञापनार्थं, तेन तापसी चौरीत्यत्र णेऽप्यण्कृतो ङीब् भवतीति पूर्वत्रोक्तम्। कर्मणे प्रभवति (कार्मुकम्) "कर्मण उकञ्" इति "तस्मै प्रभवति" इत्यर्थे उकञ्। सर्वकर्म व्याप्नोति (सर्वकर्मीणः) "तत्सर्वादेः" इत्यादिना खः, कर्मणि घटते (कर्मठः)। "कर्मणि घटो ऽठच्" इति अठच्। (कर्मी,) व्रीह्यादित्वादिनिः। (कार्मणम्) "तद्युक्तात्कर्मणोऽण्" इति व्याहृतार्थवाग्युक्तात्कर्मणः स्वार्थेऽण्। "अन्" इति प्रकृतिभावः। (कारुः) "कृवापाजि" इत्युण्। (क्रतुः) "कृञः कतुः" इति कतुप्रत्ययः। (कार्पासः) "कृञः पासण्" इति पासण्, (कृकः) "कृदाधारार्चिकलिभ्यः कः" इति कः, बाहुलकात्कलोपगुणयोरभावः। (ऊरीकृत्य, पटपटाकृत्य)। "ऊर्यादिच्विडाचश्च" इति कृभ्वस्तियोगे ऊर्यादीनां गतिसंज्ञा। तथा च वृत्तिः। च्विडाचोः कृभ्वस्तियोगे विधानादूर्यादीनामपि तैरेव योगे गतिसंज्ञेति, वार्तिकमपि [कृभ्वस्तियोग इति वक्तव्यम्] इति। संज्ञाप्रयोजनं समासादि। ऊर्यादीनां प्रयोगोऽपि कृभ्वस्तियोग एवेति कैयटपदमञ्जर्योः। कथं तर्हि भवति 'आविश्चक्षुषोर्भवदसाविव राग' इति। 'अभवद्युगपद्विलोलजिह्वा युगलीढोभयसृक्कभागमाविः' इति च। स्वतन्त्राः कवय इति हरदत्तः। तत्राप्याविःप्रादुःशब्दौ मुक्त्वा अन्येषामूर्यादीनामर्थस्वभावात्करोतियोग एव प्रयोगः। अत एव वृत्तिकृता गणवृत्तिकृता अन्यैश्च शाकटायनादिभिः करोतियोग एवोदाहरणं दर्शितम्। श्रच्छब्दस्य दधातिनैवयोग इत्यन्ये, श्रौषट् वषट् स्वाहा स्वधेत्येतेषां पञ्चानां चादिषु पाठादक्रियायोगेऽपि प्रयोगः। अन्येऽप्यूर्यादय उदाहार्याः। (कारिकाकृत्य)। क्रियां कृत्वेत्यर्थः। [कारिकाशब्दस्योपसंख्यानम्] इति गतित्वम्, "धात्वर्थनिर्देशे ण्वुल्" इति ण्वुलन्तः कारिकाशब्द इति न्यासे, (खाट्कृत्य) "अनुकरणं चानितिपरम्" इति गतिसञ्ज्ञा, अनुकरणस्य इति परत्वे तु खाडिति कृत्वा। (सत्कृत्य) "आदरानादरयोः सदसती" इति गतित्वं, प्रीतिपूर्वकप्रत्युत्थानादिविषयत्वरा आदरः, अवज्ञया कर्त्तव्यं प्रत्युत्थानादिकं प्रत्युपेक्षा ऽनादरः। अन्यत्र सत्कृत्वा, असत्कृत्वा। शोभनमशोभनञ्च कृत्वेत्यर्थः (अलंकृत्य)। "भूषणे ऽलम्" इति गतित्वं, भूषणादन्यत्रालं

कृत्वा, करणेनालमित्यर्थः । अनुकरणमित्यादयस्त्रयो योगाः स्वभावात् कृञ्विषयाः, पुरस्कृत्य पूर्वदेशे कृत्वेत्यर्थः । "पुरोऽव्ययम्" इति गतिसंज्ञा, "पूर्वाधरावराणामसिपुरधवश्चैषाम्" इति सप्तम्यन्तात् स्वार्थे ऽसिप्रत्ययः पुरादेशश्च, "तद्धितश्चासर्वविभक्तिः" इत्यव्ययत्वम्, "नमस्पुरसोर्गत्योः" इति विसर्जनीयस्य सत्वम् । अव्ययादन्यत्र, पुरः कृत्वा गतः । (अस्तंकृत्य) । "अस्तञ्च" इति गतिसंज्ञा, चकारोऽव्ययमित्यनुकर्षणार्थः, तेनात्रैव निर्देशादस्तंशब्दो मकारान्तो ऽव्ययमस्तीति ज्ञायते । अस्य त्वदर्शनमर्थः । अन्यत्रास्तङ्गतः क्षिप्तं कृत्वेत्यर्थः । द्वाविमौ योगौ करोत्यविषयावपि दृश्येते, यथा 'तुरासाहं पुरोधाय' । अस्तङ्गत्य सविता पुनरुदेति' । (अदःकृत्य) । "अदोऽनुपदेशे" इति गतित्वम् । उपदेशः परार्थे वाक्यप्रयोगः । ततोऽन्योपदेशः, स्वयमेव बुद्ध्या परामर्श इति यावत्, परस्य कथने त्वदः कृत्वा गत इति, सूत्रे ऽद इति द्वितीयान्तानुकरणेनामुना कृत्वेत्यर्थेऽदः कृत्वेत्येव भवतीत्यात्रेयः । (तिरस्कृत्य) "विभाषा कृञि" इति तिरसो वा गतित्वम्, अन्तर्द्धौ "तिरसोऽन्यतरस्याम्" इति विसर्जनीयस्य वा सत्वम्, अन्यदा तु "कुप्वोः ≍क ≍पौ च" इति जिह्वामूलीयविसर्जनीयौ द्रष्टव्यौ, अगतित्वे "तिरसोऽन्यतरस्याम्" इति सत्वं गतेरितीह न भवतीत्यात्रेयः । केचित्तु तत्र गतिग्रहणं नानुवर्तयन्ति, तेन तिरस्कृत्येत्यत्रापि सत्वम् । अत एव पराभवेऽपि तिरस्कार इति, अयं पक्षो भाष्यवृत्तिन्यासपदमञ्जर्यादौ न दृश्यते । (उपाजेकृत्य । उपाजेकृत्वा । अन्वाजेकृत्य । अन्वाजे कृत्वा) इति, "उपाजेऽन्वाजे" इति वा कृञि गतित्वम् । उपाजेऽन्वाजेशब्दौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य सामर्थ्याधाने वर्तेते । (साक्षात्कृत्य । साक्षात् कृत्वा) । "साक्षात्प्रभृतीनि च" इति कृञि वा गतित्वम्, अत्र वार्तिकम् [साक्षात्प्रभृतिषु च्व्यर्थग्रहणम्] तत्र च्विप्रत्ययप्रतिषेध इति । तेन च्व्यन्तस्योर्यादित्वाद् नित्यं गतित्वम् । अस्य च प्रयोजनमकारान्तेषु लवणीकृत्येत्यादौ । अत्र लवणमुष्णमुदकं शीतमार्द्रमिति पञ्च पठ्यन्ते, एषामत्रैव निपातनाद्गतित्वसन्नियोगेन मान्तत्वम् । अत्रागनौवशेप्रभृतयः केचिदेजन्ताः पठ्यन्ते, ते विभक्तिप्रतिरूपका निपाताः, प्रादुस्आविस्शब्दाविह पठ्येते, तयोरूर्यादित्वान्नित्ये प्राप्ते विकल्पार्थः पाठः । ऊर्यादिपाठस्तु कृभ्वस्तियोगे नित्यार्थः । अत्र नमःशब्दः पठ्यते स यदा गतिसंज्ञकस्तदोपसर्गवद्वृत्त्या कृञः प्रणामवचनत्वं द्योतयतीति प्रणामापेक्षया कर्मणि देवादौ "नमःस्वस्ति" इत्येतद् बाधित्वा 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति नमस्यति देवानितिवत् नमस्करोति देवानितिद्वितीयैव भवति । अगतित्वे तु करोतिक्रियाकर्मभावापन्नं विशेष्यभूतं प्रणाममाचष्ट इति देवादावकर्मणि "नमः स्वस्ति" इति चतुर्थी । तथा च भट्टिः—'नमश्चकार देवेभ्यो, रावणाय नमस्कुर्याः' इति । स्वयं भुवे नमस्कृत्येत्यत्र तु नमसो गतित्वे कृञो विशेषकत्वात्प्राप्तां कारकविभक्तिं द्वितीयां "क्रियार्थोपपदस्य" इति चतुर्थी बाधते, तदत्रायमर्थो वाच्यः, स्वयम्भुवं प्रीणयितुं प्रणम्येति । वर्द्धमानस्तु श्राद्धाय निगृह्णते इतिवत्क्रियाग्रहणं कर्तव्यमिति चतुर्थीमाह । (उरसिकृत्य । उरसि कृत्वा । मनसिकृत्य । मनसि कृत्वा) । बुद्धौ कृत्वेत्यर्थः । "अनत्याधानउरसिमनसी" इति उरसिमनसीत्यनयोर्वा गतित्वम् । अत्याधानमुपश्लेषस्तदभावोऽनत्याधानम् । अत्याधाने तु उरसि कृत्वा पाणिं शेते इति । सप्तम्यन्तप्रतिरूपकावेतौ (मध्येकृत्वा । मध्येकृत्य । पदे कृत्वा पदेकृत्य । निवचने कृत्वा । निवचनेकृत्य,) "मध्येपदेनिवचने च" इति वा गतित्वम् । अनत्याधाने मध्येपदेशब्दौ विभक्तिप्रतिरूपकौ, निवचनं वचनाभावः । सतृणमितिवदव्ययीभावः । उच्चारणसामर्थ्यात्सप्तम्या लुङ् न भवतीति न्यासे । हरदत्तस्तु निपातनादेकारान्तत्वं न पुनरेषा सप्तमी । वाचं नियम्येति व्याख्यानात् । निपातनं चाविशेषेण न तु संज्ञासंज्ञियुक्तं, निवचनेकृत्येत्युदाहृतत्वादित्याहु रिति । अत्याधाने पदेकृत्वा शिरःशेते (हस्तेकृत्य । पाणौकृत्य) "नित्यं हस्ते पाणावुपयमने" इति नित्यं गतित्वम्, निपातनादलुगिति

न्यासे, सप्तम्यन्तप्रतिरूपकाविति हरदत्तादयः । उपयमनं दारकमति वृत्तौ, अन्ये तु स्वीकरणमात्रमिच्छन्ति । हस्तेकृत्य महास्त्राणीति । आत्रेयस्तूपयमनन्नामपरित्यागलक्षणं स्वीकरणं, तथा च भट्टिः—'हस्तेकृत्य त्वमाश्वासीः' इति । (प्राध्वंकृत्य, शकटं गतः) बन्धनेनाकूलं कृत्वा गत इत्यर्थः । "प्राध्वं बन्धने" इति गतित्वम् । प्राध्वंशब्दस्य मान्तस्याव्ययस्यानुकूल्यार्थत्वाद्बन्धनइत्यर्थद्वारेण बन्धने सति यदानुकूल्यमिति, अबन्धने तु प्राध्वं कृत्वा शकटं गतः । विनापि बन्धनेनानुकूलं कृत्वेत्यर्थः, (जीविकामिव कृत्वा जीविकाकृत्य, उपनिषदमिव कृत्वा उपनिषत्कृत्य,) "जीविकोपनिषदावौपम्ये" इति गतित्वम् । इवशब्दप्रयोगे जीविकोपनिषदौ स्वार्थे वर्तेते नौपम्यइत्यगतित्वान्न समासः । मामधिकृत्वा ईश्वरो भवेति, मां विनियुज्येत्यर्थः । यथा 'स्वरितेनाधिकारः, ग्रामे ऽधिकृतः' इत्यनयोः प्रयोगयोर्विनियोगो ह्यर्थः । "विभाषा कृञि" इत्यधेरैश्वर्ये गम्यमाने कर्मप्रवचनीयसंज्ञा । अस्याः फलम् "आकडारात्" इति गतिसंज्ञाबाधः । द्वितीया त्वधिकृञोविनियोगार्थत्वात्कर्मणीत्येव सिद्धा । अगतित्वे तु प्रादिसमासस्य [कर्मप्रवचनीयानां प्रतिषेधः] इति निषेधाद्वाक्यमेव भवति । कर्मप्रवचनीयत्वाभावे तु गतित्वात्समासे मामधिकृत्येति । अनुदात्त उभयतोभाषः ॥ ८ ॥

इति श्रीपूर्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसङ्गमहाराजमहामन्त्रिणा मायणपुत्रेण माधवसहोदरेण सायणाचार्येण विरचितायां माधवीयायां धातुवृत्तौ उविकरणास्तनादयः सम्पूर्णाः ।

अथ क्र्यादयः ।

डुक्रीञ् द्रव्यविनिमये ॥ (क्रीणाति । क्रीणीतः । क्रीणन्ति । क्रीणासि । क्रीणामि । क्रीणीत्वः । क्रीणीते । क्रीणाते । क्रीणते । क्रीणीषे । क्रीणे । क्रीणीवहे) इत्यादि । "क्र्यादिभ्यः श्ना" इति शपोऽपवादः श्ना "श्नाभ्यस्तयोरातः" इति किति सार्वधातुकआलोपः । हलादौ तु "ईहल्यघोः" इतीत्वम् । झिझयोः परत्वान्नित्यत्वादन्तरङ्गत्वादीत्वात्पूर्वमन्तादेशात् श्नाभ्यस्तयोरालोपः । (चिक्राय । चिक्रियतुः । चिक्रयिथ । चिक्रेथ । चिक्रियथुः । चिक्रिय । चिक्राय । चिक्रय । चिक्रिये । चिक्रियाते । चिक्रियिषे । चिक्रियिढ्वे । चिक्रिये । चिक्रियिवहे) क्रादिनियमादिट्, थलि तु भारद्वाजनियमादिड्विकल्पः । अगुणवृद्धिविषये इयङ् । "एरनेकाच" इति यण् तु संयोगपूर्वत्वान्न भवति । (क्रेता । क्रेष्यति । क्रेष्यते । क्रीणातु । क्रीणीतात् । क्रीणीताम् । क्रीणन्तु । क्रीणीहि । क्रीणानि । क्रीणाव । क्रीणीताम् । क्रीणाताम् । क्रीणताम् । क्रीणीष्व । क्रीणावहै) । तातङः स्वतो ङित्त्वाद्धेश्चापित्त्वेन ङित्त्वादीत्वम् । उत्तमे त्वाटः पित्त्वेन ङित्त्वाभावादीत्वाभावः । (अक्रीणात् । अक्रीणीताम् । अक्रीणाः । अक्रीणीतम् । अक्रीणीत । अक्रीणाम् । अक्रीणीव । अक्रीणीत । अक्रीणीथाः । अक्रीणाथाम् । अक्रीणीध्वम् । अक्रीणि । अक्रीणीवहि । क्रीणीयात् । क्रीणीयाताम् । क्रीणीयाः । क्रीणीयाम् । क्रीणीयाव) । यासुटो ङित्त्वात्पिद्वचनेष्वपीत्वम् । (क्रीणीत । क्रीणीयाताम् । क्रीणीथाः । क्रीणीय । क्रीणीवहि । क्रीणीमहि ।) सीयुटि (१)आलोपः । आशिषि (क्रीयात् । क्रीयास्ताम् । क्रेषीष्ट । क्रेषीयास्ताम्) इत्यादि । (अक्रैषीत् । अक्रैष्टाम् । अक्रैषम्) सिचि वृद्धिः । (अक्रेष्ट । अक्रेषाताम् । अक्रेष्ठाः । अक्रेषि । चिक्रीषति । चिक्रीषते । चेक्रीयते । चेक्रेति । क्रापयति । अचिक्रपत्) । "क्रीङ्जीनां णौ" इत्यात्वे पुक् । (शतेन शताय

(१) आतो लोप इत्यधिकं पुस्तकान्तरे ।

वा परिक्रीणीते)। "परिव्यवेभ्यः" इत्यकर्त्रभिप्रायेऽपि तङ् । एवं व्यवाभ्यामपि । इह पर्यादय उपसर्गा गृह्यन्ते इति बहु विक्रीणाति वनमित्यादौ न भवति। "परिक्रयणे सम्प्रदानमन्यतरस्याम्" इति परिपूर्वस्य क्रीणातेः साधकतमस्य पक्षे सम्प्रदानत्वम्। परिक्रयणं वेतनादिना नियतकालं स्वीकरणम्। (क्रीत्रिमम्) "ड्वितः क्त्रिः"। "क्त्रेर्मम् नित्यम्"। (क्रीतः। क्रीतवान्)। अश्वेन क्रीता (अश्वक्रीती)। धनेन क्रीता (धनक्रीति) "कर्तृकरणे कृता बहुलम्" इति तृतीयासमासः । स च "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः" इति क्रीतशब्देनेति "क्रीतात्करणपूर्वात्" इत्यदन्तात् क्रीतान्तात्प्रातिपदिकाद्विधीयमानो ङीप् भवति। 'सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी' इत्यत्र तु बहुलग्रहणादाबन्तेन समास इति अनदन्तत्वान्ङीषभावो वाच्यः। अन्तवद्भावेन टाबन्तोऽपि कृदन्त एवेति कृदन्तलक्षणसमासलाभः। (क्रयः) "एरच्"। अवक्रियते व्यवह्रियतेऽनेनेति (अवक्रयः)। आयस्थानेषु वणिजादिभिर्दीयमानः स्वामिग्राह्यो भागः, यस्य पिण्डक इति प्रसिद्धिः। "पुंसि संज्ञायाम्" इति घः। क्रयार्थं प्रसारितं (क्रय्यम्)। "अचो यत्" "क्रय्यस्तदर्थे" इत्ययादेशः। अत्र तच्छब्देन क्रयः परामृश्यते। अन्यत्र गुणे क्रेयः। (क्रायकः,) ण्वुल्, (क्रियिकः) "क्रिय इकन्" इति इकन् ॥१॥

प्रीञ् तर्पणे कान्तौ च ॥ कान्तिः कामनेति पुरुषकारे। (प्रीणाति। प्रीणीते) इत्यादि क्रीणातिवत्। (प्रीणयति। अपिप्रीणत्) [धूञ्प्रीञोर्नुग्वक्तव्यः] इति नुक्। प्रीणातीति (प्रियः)। "इगुपधज्ञाप्रीकिरः कः" इति कः। प्रेष्ठ इत्यादि दिवादावुक्तम्। २ ॥

श्रीञ् पाके। (श्रीणाति। श्रीणीते) इत्यादि क्रीणातिवत्। (श्राययति। अशिश्रयत्) वृद्ध्यायौ ॥ ३ ॥

मीञ् हिंसायाम् ॥ (मीनाति। मीनीतः। मीनासि। मीनामि। मीनीवः। मीनीते। मीनाते। मीनीषे। मीने। मीनीवहे। ममौ। मिम्यतुः। ममिथ। ममाथ। मिम्यथुः। मिम्य। ममौ। मिम्यिव)। "मीनातिमिनोति"इत्येज्विषये आत्वं ल्यपि च। अन्यत्र "एरनेकाच"इति यण्। (मिम्ये। मिम्यिषे। मिम्ये। मिम्यिवहे। माता। मास्यति। मास्यते। मीनातु। मीनीतम्। अमीनात्। अमीनीत। मीनीयात्। मीनीत) आशिषि। (मीयात्) यासुटः कित्त्वादनेज्विषयत्वान्नात्वम्। (मासीष्ट। अमासीत्। अमासिष्टाम्। अमास्त। अमासाताम्)। आत्वे "यमरमनमाताम्" इति सगिटौ। सनि (मित्सति। मित्सते) "सनिमीमा" इत्यच इस्। "सः स्यार्द्धधातुके"इति तत्वम्। "अत्र लोप" इत्यभ्यासलोपः। (मेमीयते। मेमेति)। "मीनाति" इति श्तिपा निर्देशान्नात्वम्। (मापयति)। आत्वे पुक्। (अमीमपत्। प्रमीणाति)। "हिनुमीना" इत्युपसर्गस्थान्निमित्तात्परस्य मीनाशब्दनकारस्य णत्वम्। (प्रमीणीतः। प्रमीणन्ति) इत्यादौ परनिमित्तकस्येत्वस्याल्लोपस्य च पूर्वविधौ स्थानिवत्त्वादेकदेशविकृतस्यानन्यत्वाद्वा णत्वम्। (मीत्वा। मीतः। मीतवान्। प्रमाय)। "मीनाति" इति ल्यप्यात्वम्। (ईषत्प्रमयः। मयः)। (निमिमीलियां खलचोः प्रतिषेधः] इत्यात्वनिषेधः ॥ ४ ॥

षिञ् बन्धने ॥ (सिनाति। सिनीते)। इत्यादि क्रीवत्। (सिषाय। सेष्यति) इत्यादि। "आदेशप्रत्यययोः" इति षत्वम्। (सिष्यतुः) इत्यादौ "एरनेकाच"इति यण्। (सिसीषति) इत्यत्र "स्तौतिण्योः" इत्यषत्वम्। "अज्झनगमा" इति दीर्घः। (सितः। सितवान्) ॥५॥

स्कुञ् आप्रवणे ॥ सौत्रोऽयमित्याचार्या इति । "स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च" इत्यत्र वृत्तिकारः, एते सौत्रा धातवः, स्कुञ् आप्रवणे क्र्यादिरिति। (स्कुनाति। स्कुनीतः। स्कुनन्ति। स्कुनासि। स्कुनामि। स्कुनीते। स्कुनीषे। चुस्काव। चुस्कुवतुः चुस्कविथ। चुस्कोथ। चुस्कुव। चुस्कुविव। चुस्कुवे। चुस्कुविषे। चुस्कुविवहे) "शर्पूर्वाः" इति खयः शेषः, (स्कोता। स्कोष्यति। स्कोष्यते। स्कुनातु। स्कुनीताम्। स्कुनीहि।

स्कुनानि । स्कुनाव । स्कुनीताम् । स्कुनाताम् । स्कुनीष्व । स्कुन । स्कुनावहै । स्कुनोतु । स्कुनुताम् । स्कुन्वन्तु । स्कुनु । स्कुनवानि । स्कुनुताम् । स्कुन्वाताम् । स्कुन्वताम् । स्कुनीष्व । स्कुनवै । अस्कुनात् । अस्कुनीताम् । अस्कुनाः । अस्कुनाम् । अस्कुनीत । अस्कुनाताम् । अस्कुनीथाः । अस्कुनि । अस्कुनीवहि । अस्कुनोत् । अस्कुनुताम् । अस्कुनोः । अस्कुनवम् । अस्कुनुत । अस्कुन्वाताम् । अस्कुनुथाः । अस्कुन्वि । स्कुनीयात् । स्कुनीथाः । स्कुनीयाम् । स्कुनीत । स्कुनीयाताम् । स्कुनीथाः । स्कुनीय । स्कुनुयात् । स्कुन्वीत । स्कुनीथाः । स्कुन्वीय) । आशिषि । (स्कूयात् । स्कूयास्ताम् । स्कोषीष्ट । स्कोषीय । अस्कौषीत् । अस्कौष्टाम् । अस्कोष्ट । अस्कोषाताम् । चुस्कूषति । चुस्कूषते । चोस्कूयते । चोस्कोति । स्कावयति । अचुस्कवत् । स्कुत्वा । स्कुतः । स्कुतवान्) ॥६॥

युञ् बन्धने ॥ (युनाति । युनीते । योता) इत्यादि स्कुनातिवत् । (युयूषति) इत्यत्र "सनीवन्तर्द्ध"इत्यादौ युग्रहणेन ऊर्णुञ्साहचर्यान्निरनुबन्धकत्वाच्च मिश्रणार्थस्यादादिकस्य ग्रहणादिड्विकल्पो न भवति । क्र्यादयोऽनुदात्ता उभयतो भाषाः ॥ ७ ॥

अथ सेट आह ॥

क्नूञ् शब्दे ॥ एतदादयो धूञन्ता उदात्ता उभयतो भाषाः । (क्नूनाति । क्नूनीते) इत्यादि स्कुनातिवत् । (चुक्नाव । चुक्नुवतुः । चुक्नुवे । चुक्नुवाते) । आर्द्धधातुके त्विड्भवति । (क्नविता । क्नविष्यति । क्नविषीष्ट । अक्नावीत् । अक्नविष्टाः) सनि वृगन्तत्वात् "सनि ग्रहगुहोश्च" इतीण्निषेधः । (चुक्नूषति । चुक्नूषते) इत्यादि ॥ ८ ॥

द्रूञ् हिंसायाम् ॥ (द्रूणाति । द्रूणीते) इत्यादि क्नूञ्व(१)त् ॥ ९ ॥

पूञ् पवने ॥ पवनं पूतीकरणं, सकर्मकोऽयम् । तथा च पुनात्यग्निं, पुनीते आत्मानं कर्षकेण, व(२)लजं पुपूषतइत्यादौ सकर्मकत्वं दृश्यते । (पुनाति । पुनासि । पुनामि । पुनीते । पुनीषे । पुने) । "प्वादीनां ह्रस्वः" इति शिति परे ह्रस्वः । (पुपाव । पुपुवतुः । पुपविथ । पुपुविव । पुपुवे । पुपुविरे । पुपुविषे । पुपुवे । पविता । पविष्यति । पविष्यते । पुनातु । पुनीताम् । पुनीष्व । पुनै । अपुनात् । अपुनीताम् । अपुनाः । अपुनाम् । अपुनीव । अपुनीत । अपुनाताम् । अपुनीथाः । अपुनि । अपुनीवहि । पुनीयात् । पुनीयाः । पुनीयाम् । पुनीत । पुनीयाताम् । पुनीथाः । पुनीय) । आशिषि (पूयात् । पूयास्ताम् । पविषीष्ट । अपावीत् । अपाविष्टाम् । अपाविषुः । अपविष्ट । पुपूषति । पुपूषते) । उगन्तत्वादनिट्त्वम् । (पोपूयते । पोपोति । पावयति । अपीपवत्) "ओः पुयण्जि" इत्यभ्यासस्येत्वम् । "दीर्घो लघोः" इति दीर्घः । (पूत्वा । पूतः । पूनाः) यवाः । विनष्टा इत्यर्थः । "पूञो विनाशे" इति निष्ठानत्वम् । शेषाः कृतः पवतिवत् ॥ १० ॥

लूञ् छेदने ॥ (लुनाति । लुनीते) इत्यादि पुनातिवत् । (लवित्रम्) । "अर्तिलु"— इति इत्रः । (लूत्वा । लूनः) । "ल्वादिभ्य" इति निष्ठानत्वम् । (लूनिः) । "ऋल्वादिभ्यः क्तिन्निष्ठावत्" इति नत्वम् । (लवकः) । "प्रुसृल्वः समभिहारे वुन्" इति वुन् । (अभिलावः) । "निरभ्योः पूल्वोः" इति घञ् । अपोऽपवादः । (लोत्रम्,) करणे ष्ट्रन् । (लोतः) "हसिमृग्रिण्वाऽमिदमिलूपूधुर्विभ्यस्तन्" इति तन् । उभयत्र "तितुत्र" इतीण्निषेधः ॥११॥

स्तृञ् आच्छादने ॥ (स्तृणाति । स्तृणासि । स्तृणामि । स्तृणीते । स्तृणीषे । स्तृणे । तस्तार । तस्तरतुः । तस्तरिथ । तस्तरिव । तस्तरे । तस्तरिषे । तस्तरिवहे) । "ऋच्छत्यॄताम्" इति गुणः । वृद्धिविषये तु पूर्वविप्रतिषेधेन वृद्धिः । कृते वा गुणे वृद्धिरित्युक्तम् । (स्तरिता । स्तरीता । स्तरिष्यति । स्तरिष्यते । स्तरीष्यति । स्तरीष्यते) । "वृतो वा" इत्यलिटीटो दीर्घविकल्पः । (स्तृणातु । स्तृणीहि । स्तृणानि । स्तृणाव । स्तृणीताम् । स्तृणीष्व ।

(१) क्नूनातिवदिति पुस्तकान्तरे पाठः । (२) शालजान् इति पुस्तकान्तरे पाठः ।

स्तृणे । अस्तृणात् । अस्तृणीताम् । अस्तृणाः। अस्तृणाम् । अस्तृणीत । अस्तृणीथाताम् । स्तृणीत । स्तीर्यात् । स्तीर्षीष्ट । स्तरिषीष्ट) । "लिङ्सिचोरात्मनेपदेषु" इतीड्विकल्पः । "उश्च" इति कित्वम् । इट्पक्षे "वृतः" इति दीर्घस्य "न लिङि" इति निषेधः । (अस्तारीत् । अस्तारिष्टाम्) । "सिचि च परस्मैपदेषु" इतीटो न दीर्घः । (अस्तीर्ष्ट । अस्तरीष्ट । अस्तरिष्ट) । "लिङ्सिचोः" इतीड्विकल्पः इटि "वृत" इति वा दीर्घः । अनिटि "उश्च" इति कित्वम् । (तिस्तीर्षति । तिस्तरिषति । तिस्तरीषति) । "इट् सनि वा" इति वेट् । इटि पूर्ववद्दीर्घः । (स्तारयति । अतस्तरत्) । "अत्स्मृदृत्वर" इत्यभ्यासस्यात्वम् । (मणिप्रस्तारः) । "प्रे स्त्रोऽयज्ञे" इति घञ् । यज्ञविषये त्वपि (प्रस्तरः । विस्तारः) । "प्रथने वावशब्दे" इति घञ् । शब्दविषये तु विस्तरः । (विष्टारः-पङ्क्तिच्छन्दः) "छन्दोनाम्नि च" इति योगाभ्यां घञ्षत्वे । (अवस्तारः) । "अवे तॄस्त्रोर्घञ्" इति करणाधिकरणयोर्घञ् । (स्तीर्णः । स्तीर्णिः) "ॠल्वादिभ्यः क्तिन्निष्ठावत्" इति नत्वम् ॥ १२ ॥

कॄञ् हिंसायाम् ॥ (कृणाति । कृणीते । चकार । चकरतुः । चकरुः) । इत्यादि स्तृणातिवत् ॥ १३ ॥

वृञ् वरणे ॥ (वृणाति । वृणीते । ववार । ववरे । वरिता । वरीता, वरिष्यति । वरीष्यति । वरिष्यते । वरीष्यते । वृणातु । वृणीताम् । अवृणात् । अवृणीत । वृणीयात् । वृणीत) आशिषि (वूर्यात्) । "उदोष्ठ्यपूर्वस्य" इत्यगुणवृद्धिविषये उत्वे रपरत्वे च "हलि च" इति दीर्घः । वरिषीष्ट । वूर्षीष्ट) । "लिङ्सिचोरात्मनेपदेषु" इतीडभावपक्षे "उश्च" इति कित्वादुत्वादि । इट्पक्षे पूर्ववत् "न लिङि" इति अदीर्घत्वम् । (अवारीत् । अवारिष्टाम्) । पूर्ववत् "वृतः" इति दीर्घस्य "सिचि च परस्मैपदेषु" इति निषेधः । (अवरिष्ट । अवरीष्ट । अवूर्ष्ट) "लिङ्सिचोः" इतीड्विकल्पे "वृत" इति दीर्घः । अनिटि "उश्च" इति कित्वादुत्वादि । (वुवूर्षति । विवरिषति । विवरीषति) । "इट् सनि वा" इतीड्विकल्पे "वृत" इति दीर्घविकल्पः । अनिटि "इको झल्" इति सनः कित्त्वे उत्वादि । (वोवूर्यते । वावर्ति) "ॠतश्च" इति तपरनिर्देशान्न रुगादीत्युक्तम् । (वारयति । अवीवरत् । वूर्णः । वूर्णवान् । वूर्णिः) ॥१४॥

धूञ् कम्पने ॥ (धुनाति । धुनीते । दुधाव । दुधुवतुः । दुधविथ । दुधुविव । दुधुविम । दुधुवे । दुधुविषे । दुधुविढ्वे । दुधुविध्वे । दुधुविवहे) । स्वरत्यादिसूत्रेण प्राप्तमार्द्धधातुकनिबन्धनमिड्विकल्पं पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यात् "श्र्युकः किति" इति निषेधो बाधते, तमपि क्रादिनियमो बाधतइति नित्यमिडित्यादि तत्र तत्रोक्तम् । (धोता । धविता । धोष्यति । धविष्यति । धोष्यते । धविष्यते) । "स्वरत्यादिना" इड्विकल्पः । (धुनातु । धुनीताम् । अधुनात् । अधुनीत । धुनीयात् । धुनीत) । आशिषि (धूयात् । धोषीष्ट । धविषीष्ट । अधावीत् । अधाविष्टाम् । अधोष्ट । अधविष्ट) । "स्तुसुधूञ्भ्यः परस्मैपदेषु" इति नित्यं सिच इट् । (दुधूषति । दुधूषते) । "सनि ग्रहगुहोश्च" इतीण्निषेधः पूर्ववत्पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यात् स्वरत्यादि विकल्पम्बाधते । (दोधूयते । दोधोति । धूनयति । अदूधुनत्) । [धूञ्प्रीञोर्नुग्] इति नुक् । (धूत्वा) । पूर्ववत् "श्र्युकः किति" इतीण्निषेधः । (धूतम्) । "यस्य विभाषा" इत्यनिट्त्वम् । धुनोति, धूनोतीति स्वादौ । धुवतीति कुटादौ । क्नूञादय उदात्ता उभयतो भाषाः ॥ १५ ॥

शॄ हिंसायाम् । इतो गृणात्यन्ता उदात्ता उदात्तेतः । (शृणाति । शृणीतः । शृणासि । शृणामि । शशार । शश्रतुः । शशरतुः । शश्रुः । शशरुः । शशरिथ । शश्र । शशार । शशर । शश्रिव । शशरिव) । "असंयोगाल्लिट्" इत्यपितो लिटः कित्त्वे "शॄदॄप्रां ह्रस्वो वा" इति ह्रस्वपक्षे यणादेशः । अन्यदा "ॠच्छत्यॄताम्" इति गुणः । अपितो लिटः कित्त्वेन "श्र्युकः किति" इति प्राप्तस्येण्निषेधस्य क्रादिनियमेन बाधः । (शरिता । शरीता । शरिष्यति । शरीष्यति । शृणातु । शृणीताम् । शृणीहि । अशृणात् । अशृणीताम् । अशृणाः । अशृणाम् ।

अश्रृणीव । श्रृणीयात् । श्रृणीयाताम्) । आशिषि (शीर्यात् । शीर्यास्ताम्) । "ऋत इद्धातोः" इत्त्वे रपरत्वादि । (अशारीत् । अशारिष्टाम्) । इटो दीर्घस्य "सिचि च परस्मैपदेषु" इति निषेधः । (शिशरिषति । शिशरीषति । शशीर्षति) । "इट् सनि वा" इति पाक्षिकस्येटो "वृत" इति दीर्घः । अनिटि "इको झल्" इति सनः कित्त्वादित्वम् । (शेशीर्यते । शाशर्ति । शारयति । अशीशरत्) (शारो वायुर्वर्णश्च) । (नीशारः) । अकृतप्रावरणः, नेः "उपसर्गस्य घञि" इति दीर्घः । "शॄवायुवर्णनिवृत्तेषु" इति घञ् । निव्रियतइति (निवृत्तं) प्रावारः । (शारुकः) । "लषपतपद" इत्यादिनोकञ् । (शरारुः) । "शॄवन्द्योरारुः" इत्यारुः । (किंशारुः) सस्यशूकं, "किञ्जरयोः श्रिणः" इति किंशब्दउपपदे उण् । (शरुः,) आयुधं, "शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च" इत्युप्रत्ययः । (शरीरम्) "कॄशॄपॄकटिपटिशौटिभ्य ईरन्" इति ईरन् प्रत्ययः । (शरत्) "शॄदृभसोऽदिः" इत्यादप्रत्ययः । (शरदिजः) "प्रावृट्शरत्कालदिवां जे" इत्यलुक् । शरदि भवं श्राद्धं (शारदिकं,) "श्राद्धे शरदः" इति ठञ् । ऋत्वणोऽपवादः । (शारदो रोगः । शारदिको रोगः) । "विभाषा रोगातपयोः" इति वा ठञ् । अन्यदा ऋत्वण् । एवमातपेऽपि । (शारदका मुद्गाः । शारदका दर्भाः) । "संज्ञायां शरदो वुञ्"इति "तत्र जात"इत्यस्मिन्विषये वुञ् । दर्भविशेषस्य मुद्गविशेषस्य चेयं संज्ञा । परा श्रृणातीति (परशुः) । "आङ्परयोः खनिशॄभ्यां डिच्च" इत्युप्रत्ययः । डित्त्वाट्टिलोपः । बाहुलकात्परोपसर्गस्य ह्रस्वः, परशवे हितं (परशव्यम्) । "उगवादिभ्यो यत्" इति यत् । परशव्यस्य विकारः (पारशवम्) । "कंसीयपरशव्ययोर्यञञौ लुक् च" इत्यञ्प्रत्ययः, यत्प्रत्ययस्य लुक् । (१)पराश्रृणाति पापानीति (पराशरः,) अच् । (पाराशर्यः) गर्गादित्वाद्-पत्ये यञ् । पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयानाः (पाराशरिणः) । "पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः" इति प्रोक्ते णिनौ तदन्तात् "छन्दोब्राह्मणानि" इत्यध्येतृवेदित्रोरणः "प्रोक्ताल्लुक्" इति लुक् । सूत्रस्यापि छन्दस्त्वं तत्रेष्यते, णिनावल्लोपयलोपौ ॥ १६ ॥

पॄ पालनपूरणयोः ॥ (पृणाति । पपार । पपरतुः । पप्रतुः । परिता । परीता । परिष्यति । परीष्यति । पृणातु । अपृणात् । पृणीयात्) । आशिषि (पूर्यात्) । "उदोष्ठ्यपूर्वस्य" इत्युत्वम् । (अपारीत् । अपारिष्टाम् । पिपरिषति । पिपरीषति । पुपूर्षति) । "इट् सनि वा" इतीडभावे "इको झल्" इति कित्त्वादुत्वादि । (पोपूर्यते । पापर्ति । पारयति । अपीपरत् । पूर्तः । पूर्तवान्) । "न ध्याख्यापॄमूर्छिमदाम्"इति नत्वनिषेधः,"उदोष्ठ्यपूर्वस्य" इत्युत्वम् । निष्ठानत्ववर्जं प्रक्रिया श्रृणातिवत् ॥ १७ ॥

वॄ वरणे ॥ (वृणाति) इत्यादि वॄञ्वत् । तेनैव वृणातीत्यादिसिद्धावपि पुनरस्योपादाने न प्रयोजनम् । नैतद्युक्तम् । वॄञो ञित्त्वात्सिद्धेऽपि पदद्वये यदञितो वचस्तत्कर्त्रभिप्राये क्रियाफले परस्मैपदसिद्ध्यइति । आद्यं पवर्गतृतीयादिं बहवः पठन्तीति पुरुषकारेणोक्तम् । तत्राद्यशब्देन ञित् वृणातिरुच्यते, स्वामिशाकटायनावप्येवं पठित्वा भरणमर्थमाहतुः ॥ १८ ॥

भॄ भर्त्सने ॥ भरणेऽप्येके । (भृणाति । बभार) इत्यादि वॄञ्वत् । (भरः) । "ऋदोरप्" । भरणेन निर्वृत्तं (भरिमम्) [भावप्रत्ययान्तादिमब्वक्तव्यः] इतीमप् ॥ १९ ॥

मॄ हिंसायाम् ॥ (मृणाति । ममार) इत्यादि वॄवत् । म्रियतइति तुदादौ ॥ २० ॥

दॄ विदारणे ॥ (दृणाति । ददार । ददरतुः । दद्रतुः । ददरुः । दद्रुः) इत्यादि श्रृणातिवत् । विशेषस्तु "अत्स्मृदॄत्वर" इत्यभ्यासस्य णौ चङ्यत्वम् (अददरत्) इति । अयं घटादिपाठान्मित् । भये (दरयति) । अन्यत्र दारयति । (दरः) । अप् । (दरी) । गौरादित्वाङ्कीष् । (पुरन्दरः) । "पूःसर्वयोर्दारिसहोः" इति खच् । (भगंदरः) । "भगे च दरिः"-इति वक्तव्यात् खच् । "खचि ह्रस्व" इति उत्तरपदस्य ह्रस्वः । (दारः) । "दारजारौ क-

(१) आशरः पचाद्यजित्यधिकम्पुस्तकान्तरे ।

तरि णिलुक् च" इति घञि णिलुक् । (दरत्) जनपदः । "शृदृभसोऽदिः" इत्यदिप्रत्ययः । (दृषत्) । "दृणातेः पुक् ह्रस्वश्च" इति पुगागमो धातोर्ह्रस्वोऽदिश्च प्रत्ययः । द्रियते इति तुदादौ ॥ २१ ॥

जॄ वयोहानौ ॥ श्नाविषये (जॄणाति) इत्यादि । अन्यत्र जार्यतिवत् । यथा तु भाष्य-वार्तिकवृत्तिन्यासपदमञ्जर्यादि तथायं धातुर्नास्तीति प्रतीयतइति जीर्यतावुपपादितम् । आत्रेयमैत्रेयदैवपुरुषकारादिषु दर्शनादिहास्माभिर्लिखितः ॥ २२ ॥

धॄ इति त्वेके इति मैत्रेयः । (धृणाति) इत्यादि ॥ २३ ॥

नॄ नये ॥ (नृणाति । नीर्णम् । नीर्णवान् । नरः) । पचाद्यच् । (ना) । "नयतेर्डिच्च" इति नयतेर्ऋन्प्रत्ययः स च डित् । (नारी) । "नृनरयोर्वृद्धिश्च" इति शार्ङ्गरवादिपाठान्ङीन् वृद्धिश्च ॥ २४ ॥

कॄ हिंसायाम् ॥ (कृणाति) इत्यादि कॄञ्वत् । तेनैव सिद्धे पुनः पाठः कर्त्रभिप्राये क्रियाफलेऽपि वृणातिवत्परस्मैपदार्थः ॥ मॄ हिंसायामित्येक इति मैत्रेयः, एवं वदतोऽस्य पूर्वं मृणातेः पाठोऽनभिमत इति प्रतीयते ॥ २५ ॥

ॠ गतौ ॥ (ऋणाति । ऋणीतः । ऋणासि । ऋणामि । अराञ्चकार) इत्यादि, "इजादेश्च गुरुमत" इत्याम् । (अरिता । अरीता । अरिष्यति । अरीष्यति । ऋणातु । ऋणीताम् । ऋणीहि । ऋणानि । आर्णात् । आर्णीताम् । आर्णाः । आर्णाम् । आर्णीव । ऋणीयात् । ऋणीयाताम्) । आशिषि (ईर्यात् । ईर्यास्ताम् । इत्त्वरपरत्वादि । (आरीत् । आरिष्टाम्) "सिचि च परस्मैपदेषु" इतीटो न दीर्घः । (अरिरिषति । आरिरीषति । ईर्षिषति) । "इट् सनि वा" इतीड्विकल्पः, इटि गुणः, पूर्ववद्वादीर्घश्च, अनिटि सनः किंत्वादित्वादि, "नन्द्राः" इति रेफवर्जितस्य द्विर्वचनम् । (आरयति । माभवानरिरत् । ईर्त्वा । समीर्णः । समीर्णवान्) । "उदोष्ठ्यपूर्वस्य" इत्यत्र प्रत्यासत्त्याऽङ्गावयव एवोष्ठ्यो गृह्यतइत्युत्त्वमत्र न भवति । ऋच्छतीति शपि । इयर्त्तीति श्लौ ॥ २६ ॥

गॄ शब्दे ॥ (गृणाति । जगार) इत्यादि पूर्ववत् । "अवाद्ग्रः" इति तङस्य न भवति । तथा च भाष्यम् । न चावपूर्वस्य गृणातेः प्रयोगोऽस्तीति । "समः प्रतिज्ञाने" इत्यत्र पूर्वसूत्रगृहीतस्यानुवृत्तिरिति सङ्गृणातीत्यत्र तङ् न भवति । (होत्रेऽनुगृणाति, प्रतिगृणाति) "अनुप्रतिगृणश्च" इत्यनुपूर्वस्य प्रतिपूर्वस्य च गृणातेः कारकं पूर्वस्याः क्रियायाः कर्तृभूतं सम्प्रदानमिति होतुः सम्प्रदानत्वम् । होता चात्र पूर्वक्रियायां शंसने कर्ता भवति । अनुगरः प्रतिगर इति हि संज्ञितुः प्रोत्साहनमुच्यते । तदर्थं वाक्यार्थः । प्रथमं शंसति होता तमन्यः प्रोत्साहयतीति । (जेगिल्यते । जागर्त्ति । जागीर्त्तः) । "लुपसद" इत्यादावकारविकरणैः साहचर्यात्तौदादिकस्यैव ग्रहणमिति क्रियासमभिहार एवायं यङ् । इत्त्वरपरत्वयोः "पूर्वत्रासिद्धम्" इति पूर्वं "ग्रो यङि" इति लत्वे रेफाभावान्न "हलि च" इति दीर्घः । लत्वे हि गिरतिगृणात्योर्द्वयोर्ग्रहणमुक्तम् । गृणातिप्रभृतय उदात्ता उदात्तेतः ॥ २७ ॥

ज्या वयोहानौ ॥ एतदादयो बध्नात्यन्ता अनुदात्ता उदात्तेतः । (जिनाति । जिनीतः । जिनासि । जिनामि । जिनीवः) । ग्रहिज्यादिना सम्प्रसारणे पूर्वरूपत्वे "हलः" इति दीर्घेप्वादित्वाद्ध्रस्वः । (जिज्यौ । जिज्यतुः । जिज्यिथ । जिज्याथ । जिज्यिव) । क्रादिनियमादिट् । थलि भारद्वाजनियमाद्विकल्पः । किति परत्वात् पूर्वं सम्प्रसारणे द्विर्वचनम् । अकिति "लिट्यभ्यासस्योभयेषाम्" इत्यभ्यासस्य सम्प्रसारणम् । (ज्याता । ज्यास्यति । जिनातु । जिनीताम् । जिनीहि । जिनानि । जिनाव । अजिनात् । अजिनीताम् । अजिनाः । अजिनाम् । अजिनिव । जिनीयात् । जिनीयाताम् । जिनीयाः । जिनीयाम्) । आशिषि । (जीयात् । जीयास्ताम् । अज्यासीत् । अज्यासिष्टाम्) । "यमरमनमाताम्" इति सगिटौ । (जिज्यासति । जेजीयते । जाज्याति । ज्यापयति । अजिज्यपत् । जीत्वा । जीनः) । "ल्वा-

दिभ्यः" इति निष्ठानत्वं,"हलः" इति दीर्घः। (प्रज्याय)। "ज्यश्च" इति ल्यपि सम्प्रसारणनिषेधः। (ज्यानिः)। (१)"ग्लाम्लाज्याहाभ्यो निः" इति निः ॥ २८॥

री गतिरेषणयोः ॥ रेषणं वृकशब्दः। (रिणाति । रिणीतः। रिणासि । रिणामि । रिराय। रियतुः। रिरयिथ । रिरेथ । रिरियिव,) क्रादिनियमादिट्। थलि तु भारद्वाजनियमाद्विकल्पः। अजादौ "एरनेकाचः" इति यणोऽसिद्धत्वात् "हलि च" "उपधायाश्च" इति दीर्घत्वन्न भवति। (रिणातु । रिणीहि । रिणानि । अरिणात्। अरिणीताम्। अरिणाः। अरिणाम्। रिणीयाताम्)। आशिषि (रीयात्। रीयास्ताम्। अरैषीत्। अरैष्टाम्। रिरीषति । रेरीयते। रेपयति। अरीरपत्)। "अर्त्तिह्री" इत्यादिना पुक्। शेषं रीयतिवत् ॥ २९ ॥

ली श्लेषणे ॥ (लिनाति । लिनातु । अलिनात्। लिनीयात्। ललौ। लिलाय। लिल्यतुः। ललाथ । लिलेथ। लिलयिथ । लिल्यिव)। "विभाषा लीयतेः" इत्येज्विषये ल्यपि वाऽऽत्त्वविकल्पः। किति लिटि एज्विषयत्वाभावान्नात्वम्। (लाता । लेता) इत्यादि सर्वं लीयतिवन्नेयम् ॥ ३० ॥

ब्ली वरणे ॥ (ब्लिनाति । ब्लिनीतः। ब्लिनासि । ब्लिनामि । बिब्लाय । बिब्लियतुः। बिब्लेथ । बिब्लयिथ । बिब्लियिव । ब्लेता । ब्लेष्यति । ब्लिनातु । ब्लनीहि। ब्लिनानि। अब्लिनात्। ब्लिनीयात्। अब्लैषीत्। अब्लैष्टाम्। बिब्लीषति । बेब्लीयते। ब्लेपयति । अबिब्लिपत्)। "अर्त्तिह्री" इत्यादिना पुक्। (ब्लीत्वा , ब्लीनः)। ल्वादित्वान्निष्ठानत्वम्। (प्रहीणं ब्लीनाति, नैनं दक्षिणा ब्लीनाति,)। इत्यादौ दीर्घश्छान्दसः ॥ ३१ ॥

प्ली गतौ ॥ ओष्ठ्यादिः। (प्लिनाति) इत्यादि ब्लिनातिवत्। के चिदमुं दन्त्योष्ठ्यादिं पठन्तो ब्ली वरणइत्यमुं न पेठुः, मैत्रेयस्तु वरणार्थं पठित्वाऽमुं न पपाठ ॥ ३२ ॥

वृत् ॥ ल्वादिपरिसमाप्त्यर्थोऽयम्। अन्ये तु प्वादीनामपि परिसमाप्त्यर्थमिति, तत्रानन्तर्यात्। "ज्ञाजनोर्जा" इति दीर्घनिर्देशाच्च ल्वादिपरिसमाप्त्यर्थत्वमेव युक्तं, जेति ह्रस्वान्तादेशेऽपि जायते जानातीत्यादौ "अतो दीर्घो यञि" इति दीर्घेण सिद्धे प्वादित्वाज्जानातीत्यत्र ह्रस्वो माभूदिति हि दीर्घत्वम्। उक्तं चैवं हरदत्तादिभिरपि ॥

व्री वरणे ॥ (व्रीणाति । व्रीणीतः। व्रीणासि । व्रीणामि । विव्राय। विव्रियतुः। विव्रेथ। विव्रियिव । व्रेता । व्रेष्यति । व्रीणातु । व्रीणीतात्। व्रीणीहि । व्रीणानि । अव्रीणात्। अव्रीणीताम्। अव्रीणाः। अव्रीणाम्। व्रीणीयात्)। आशिषि (व्रीयात्। अव्रैषीत्। अव्रैष्टाम्। विव्रीषति । वेव्रीयते । वेव्रेति । व्राययति । अविव्रयत्)। स्वामिकाश्यपादयो "अर्तिह्रीव्रि" इतिपठन्तो व्रेपयतीति पुकं प्रतिपन्नाः ॥ ३३ ॥

भ्री भये ॥ भरणइत्येके। (भ्रीणाति) इत्यादि व्रीवत् ॥ ३४ ॥

क्षीष् हिंसायाम् ॥ (क्षीणाति । चिक्षाय,) इत्यादि व्रीवत्। षित्वादङ्, (क्षीयः। क्षीत्वा । क्षीतवान्)। "क्षियो दीर्घात्" इति निष्ठानत्वं ह्रस्वान्तस्य क्षियो "निष्ठायामण्यदर्थे" इति कृतदीर्घस्य। क्षये क्षयतीति शपि। क्षियतीति निवासगत्योः। क्षिणोतीति तनोत्यादौ हिंसायाम् ॥ ३५ ॥

ज्ञा अवबोधने ॥ (जानाति । जानीतः। जानन्ति । जानासि । जानामि । जानीवः) "ज्ञा जनोर्जा" इति शित्प्रत्यये जादेशः। दीर्घनिर्देशसामर्थ्यात् "प्वादीनाम्" इति ह्रस्वो नेति ल्पो गतावित्यत्रोक्तम्। (जज्ञौ । जज्ञतुः। जज्ञिथ । जज्ञाथ । जज्ञिव)। क्रादिनियमादिट्। थलि भारद्वाजनियमाद्विकल्पः। (ज्ञाता । ज्ञास्यति । जानातु । जानीहि ।

---

(१) "विज्याज्वरिभ्यो निः" "वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्" इत्येताभ्यां ज्यानिः, ग्लानिरिति संसाध्य बाहुलकात् म्लानिरित्युक्तमुणादिव्याख्याने कौमुद्याम् भट्टोजीदीक्षितैः।

जानाति । अजानात्, अजानीताम् । अजानाम् । जानीयात्) । आशिषि (ज्ञायात् । ज्ञायास्ताम् । ज्ञेयात्, ज्ञेयास्ताम्) । "वाऽन्यस्यसंयोगादेः" इत्येत्वविकल्पः । (अज्ञासीत् । अज्ञासिष्टाम्) । (शतमपजानीते) । अपलपतीत्यर्थः । "अपह्नवे ज्ञः" इति तङ् । सोपसर्गोऽयमपह्नवे वर्त्तते । (सर्पिषो जानीते) । सर्पिषोपायेन प्रवर्त्ततइत्यर्थः । "अकर्मकाच्च" इति तङ् । "ज्ञोऽविदर्थस्य करणे" इति शेषत्वेन विवक्षिते षष्ठी । (मात्रा सञ्जानीते । मातरं सञ्जानीते । शतं प्रतिजानीते) "सम्प्रतिभ्यामनाध्याने" इति तङ् । सम्पूर्वत्वे "संज्ञोऽन्यतरस्यां कर्म्मणि" इति पक्षे तृतीया । आध्यानमुत्कण्ठापूर्वकं स्मरणं, ततोऽन्यदनाध्यानम् । आध्याने तु (मातुः सञ्जानाति) । "अधीगर्थ" इति कर्म्मणि शेषे षष्ठी । अशेषे तु "संज्ञा" इति द्वितीयातृतीये भवतः । (मातरं सञ्जानाति । मात्रा सञ्जानाति) । कृद्योगे तु मातुः संज्ञानम् । कृद्योगलक्षणा षष्ठी परत्वाद्भवति, (धर्म्मंजानीते) । "अनुपसर्गाज्ज्ञः" इति कर्त्रभिप्राये तङ् । (स्वयं जानाति जानीतइति वा,) "विभाषोपपदेन प्रतीयमाने" इति कर्त्रभिप्रायत्वे उपपदेन द्योत्यमाने तद्विकल्पः । (धर्म्मंजिज्ञासते) । "ज्ञाश्रुस्मृदृशां सनः" इति तङ् । सकर्मकार्थमिदमकर्मकाच्च "पूर्ववत्सन" तङ् सिद्धः । (अनुजिज्ञासति पुत्रम्) "नानोर्ज्ञः" इति तङ्निषेधः । अयं च मध्येपवादन्यायेन "ज्ञाश्रुस्मृदृशाम्" इत्यस्यापवादः तेनौषधस्यानुजिज्ञासते इत्यत्र "पूर्ववत्सन" इत्यकर्मकत्वनिबन्धनस्तङ् भवति । औषधेन प्रवर्तितुमिच्छतीत्यर्थः । (जाज्ञायते, जाज्ञाति । ज्ञापयति । अजिज्ञपत्) मारणादौ ज्ञपयति घटादित्वान्मित्वं प्रपञ्चो घटादावेवाव गन्तव्यः । जानातीति (ज्ञा) "इगुपध" इति "श्याद्व्यध" इति णापवादे के आल्लोपः । पन्थानं प्रजानातीति (पथिप्रज्ञः) । "प्रेदाज्ञ" इति अणोऽपवादः कः, (प्राज्ञा) । "आतश्चोपसर्गे" इत्यङ् । पाणिन्युपज्ञमकालकं व्याकरणम्, उपज्ञायत इत्युपज्ञा । प्रथमज्ञानं, पूर्ववदङ् । कालपरिभाषाशून्यं व्याकरणं पाणिनिना प्रथमं ज्ञातमित्यर्थः । "उपज्ञोपक्रमन्तदाद्याचिख्यासायाम्" इत्युपज्ञोपक्रमान्तस्य तत्पुरुषस्य नपुंसकत्वं, तच्छब्देनोपज्ञोपक्रमयोरर्थः परामृश्यते । तेन यदुपज्ञेयस्योपक्रमस्य च आदिराख्यातुमिष्यतइत्यर्थः । अत्र च कालपरिभाषाशून्यस्य व्याकरणस्य पाणिनिरादिराख्यातुमिष्यते । (ज्ञप्तः । ज्ञापितः) "वा दान्त" इति पक्षे णेर्लुक्यनिट्त्वम् ॥ ३६ ॥

बन्ध बन्धने ॥ (बध्नाति । बध्नीतः । बध्नासि । बध्नामि) क्ङिति "अनिदिताम्" इति नलोपः । (बबन्ध । बबन्धतुः । बबन्धिथ । बबन्ध । बबन्धिव) । क्रादिनियमादिट् । थलि तु विकल्पः । संयोगान्तत्वाल्लिटः कित्त्वाभावान्नलोपो न भवति । (बन्द्धा) "झषस्तथोः" इति धत्वम्, "झलां जश् झशि" इति पूर्वस्य दत्वम्, तस्य "झरो झरि" इति पक्षे लोपः । (भन्त्स्यति) । "एकाच" इति भष्भावः । "खरि च" इति चर्त्वं तकारः । (बध्नातु । बध्नीताम् । बधान) । "हलः श्नः शानज्झौ" इति श्नः शानजादेशे हेर्लुक् । (बध्नाव । अबध्नात् । अबध्नीताम् । अबध्नाः । अबध्नीतम् । अबन्धीत । अबध्नीव । बध्नीयात्) आशिषि । बध्यात् । अभान्त्सीत् । अबान्द्धाम् । अभान्त्सुः) "वदव्रज" इति वृद्धिः । "पूर्वत्रासिद्धम्" इति भष्भावात्पूर्वं "झलो झलि" इति सिचो लोपः । कृते तस्मिन् प्रत्ययलक्षणेन सादिप्रत्ययमाश्रित्य भष्भावो न भवति, प्रत्ययलक्षणे सिज्लोपस्यासिद्धत्वात् । (बिभन्त्सति । बाबध्यते । बाबन्धि । बन्धयति अबबन्धत् । चक्रबन्धं बद्धः) । चक्रे बद्ध इत्यर्थः । अट्टालिकाबन्धं बद्धः । बन्धविशेषस्यैषा संज्ञा । "अधिकरणे बन्धः" "संज्ञायाम्" इति च सूत्राभ्यां णमुल् । कषादित्वात् यथाविध्यनुप्रयोगः । चक्रे बद्धः । (चक्रबद्धः) । दृषदि बद्धः । (दृषद्बद्धः) "सप्तमी" इति योगविभागात्समासः । "तत्पुरुषे कृति बहुलम्" इत्यलुको "नेन्सिद्धबध्नातिषु च" इति निषेधः । (चक्रे बन्धः । चक्रबन्धः । दृषदि बन्धः । दृषद्बन्धः) "सिद्धशुष्कपक्वबन्धैश्च" इति सप्तमीतत्पुरुषः । "बन्धे

च विभाषा" इति हलदन्ता(१)त्सप्तम्या घञन्ते बन्धशब्दे उत्तरपदे विभाषा ऽलुक्। पचाद्यजन्ते तु बन्धशब्दे उत्तरपदे "नेन्सिद्ध" इति निषेधो भवति चक्रबन्ध इति। इयं च विभाषा येन नाप्राप्तिन्यायेन "नेन्सिद्ध" इति प्रतिषेधं बाधते परत्वात् "अमूर्द्धमस्तकात्" इत्येतं, तेन स्वाङ्गपूर्वबन्धशब्दान्ते बहुव्रीहावपि लुग्विकल्पो भवति। हस्ते बन्धोऽस्य (हस्तबन्धः, हस्तेबन्धः) इति। (बधिरः)। "इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिरुधिशुषिबन्धिभ्यः किरच्" इति किरच् प्रत्ययः। (ब्रध्नः) आदित्यः (बुध्नः) मुलम्, "बन्धेर्ब्रधबुधौ च" इति बध्नातेर्नक्प्रत्ययो ब्रधबुधावादेशौ च भवतः। (बन्धुः)। "श्रस्तृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च" इत्युप्रत्ययः। (कौमुदगन्धीबन्धुः)। "बन्धुनिबहुव्रीहौ" इति ष्यङः सम्प्रसारणे "हल" इति दीर्घः। (बन्धुरः)। "मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरच्" इति बाहुलकादस्याप्युरच्। अस्याजन्तमध्ये पाठो नित्यपरस्मैपदानुरोधात्, ज्यादयोऽनुदात्ताः परस्मैभाषाः ॥ ३७ ॥

वृङ् सम्भक्तौ ॥ उदात्त आत्मनेपदी। (वृणीते। वृणाते। वृणीषे। वृणे। वृणीवहे। वव्रे। वव्रृषे। वव्रृढ्वे। वव्रे। वव्रृवहे। वरिता। वरीता। वरिष्यते। वरीष्यते। वृणीताम्। वृणाताम्। वृणीष्व। वृणै। अवृणीत। अवृणाताम्। अवृणीथाः। अवृणि। वृणात। वृणयीताम्) इत्यादि वृणोतिवत्प्रक्रिया, प्रपञ्चस्तत एवावगन्तव्यः। (वर्या)। "अवद्यपण्यवर्या" इति स्त्रियां यति निपात्यते। पुंसि ण्यति (वार्या) ऋत्विज इति भवति। वर्येति निपातनमस्येति स्थितम्। (वरेण्यः) "वृङ एण्य" इत्येण्यः ॥ ३८ ॥

श्रन्थ विमोचनप्रतिहर्षयोः ॥ एतदादयः खच्यन्ता उदात्ता उदात्तेतः, विष्णातिस्त्वनिट्। क्लिश्नातिस्तु विकल्पितेट्। इष्णातिरपि वार्त्तिककारमतेन तादौ। (श्रथ्नाति। श्रथ्नासि। श्रथ्नीमः। श्रथ्नीवः)। "अनिदिताम्"इति नलोपः क्ङिति। (शश्रन्थ। श्रेथतुः। श्रेथुः। शश्रन्थिथ। श्रेथथुः। श्रेथ। शश्रन्थ। श्रेथिव। श्रेथिम)। "श्रन्थिग्रन्थिदम्भि" इत्यादिनालिटः कित्त्वात् "अनिदिताम्" इति नलोपः क्ङिति। अत्र हरदत्तः 'एत्वाभ्यासलोपावत्र वक्तव्यौ' इति। अन्यथा "असिद्धवदत्र" इति नलोपस्यासिद्धत्वादत एकहल्मध्यस्थत्वाभावाच्च तौ स्याताम्। ये तु श्रन्थ्यादीनां कित्त्वविकल्पमिच्छन्ति तेषां शश्रन्थतुरित्याद्यपि। इदं च कित्त्वं पिद्वचनेष्वपीति सुधाकरः। तन्मते (शश्राथ। श्रेथिथ। शश्रथ। शश्राथ) इति (श्रन्थिता। श्रन्थिष्यति। श्रथ्नातु। श्रथ्नीताम्। श्रथान) "हलः श्नःशानच्" इति शानचि हेर्लुक्। (श्रथ्नानि। अश्रथ्नात्। अश्रथ्नीताम्। अश्रथ्नाः। अश्रथ्नीव। श्रथ्नीयात्। श्रथ्नीयाताम्)। आशिषि (श्रथ्यात्। श्रथ्यास्ताम्)। कित्त्वादनुनासिकलोपः, (अश्रन्थीत्। अश्रन्थिष्टाम्। अश्रन्थिषुः)। शिश्रन्थिषति। शाश्रथ्यते। शाश्रन्थीति। शाश्रन्ति) "झरो झरि" इति थलोपो विकल्पेन, लोपाभावे "खरि च" इति चर्त्वेन थकारस्य तकारः। (श्रन्थयति। अशश्रन्थत्)। कर्मकर्तरि "णिश्रन्थि" इत्यादिना यक्चिणोर्निषेधात्। श्रथ्नीते मेखला स्वयमेव, अश्रन्थिष्ट मेखला स्वयमेवेति भवति। (श्रन्थना)। "ण्यासश्रन्थो युच्" इति युच्प्रत्ययः। (प्रश्रथः। हिमश्रथः)। "अवोदधौद्मप्रश्रथहिमश्रथाः" इति निपातनादूघञि नलोपो वृद्ध्यभावश्च (श्रन्थित्वा। श्रथित्वा) "नोपधात्थफान्ताद्वा" इति कित्त्वविकल्पः। श्रन्थत इति शैथिल्ये शपि ॥ ३९ ॥

मन्थ विलोडने ॥ अयं द्विकर्मकः। (मथ्नाति। ममन्थ। ममन्थतुः) इत्यादि श्रथ्नातिवत्। अस्य लिटः कित्त्वं नास्ति। कर्मकर्तरि यक्चिणौ स्तः। (मथ्यते। अमन्थि) इति। (ममन्थीति) विलोडने मन्थति, हिंसासंक्लेशनयोः शपि ॥ ४० ॥

ग्रन्थ सन्दर्भे ॥ (ग्रथ्नाति)। इत्यादि सर्वं श्रन्थिवत्। अत्रापि केचित् श्रन्थि पठन्ति।

(१) परस्या इत्यधिकम्।

पुनः पाठोऽर्थभेदात् । तथा च "णिश्रन्थि" इत्यत्र न्यासे ग्रन्थ सन्दर्भ इति चुरादावित्युक्त्वा क्र्यादावपीत्युक्तम् । "अवोदैधौद्मप्रश्रथ" इत्यत्र तु श्रन्थ विमोचनप्रतिहर्षयोरिति । एवमुभयत्र पदमञ्जर्यामपि । पुरुषकारेऽपि श्रन्थ विमोचनप्रतिहर्षयोः, अन्ये तु श्रन्थ ग्रन्थ सन्दर्भे इति क्र्यादौ पठन्ति । तथा च सन्दर्भे ग्रन्थनक्रियायां श्रन्थिग्रन्थिधातू वर्तेते इति क्षीरस्वामीत्युक्तम् । ग्रन्थिः, इन्प्रत्ययः ॥ ४१ ॥

कुन्थ संश्लेषणे ॥ संक्लेशे इत्येके । तथा च देवः ; कुन्थ संक्लेशे इति । (कुथ्नाति । चुकुन्थ) इत्यादि मन्थिवत् । कुथेति दुर्गः । तन्मते-(कुथ्नाति । चुकोथ । कोथिता) इत्यादि । कुन्थतीति शपि । कुथ्यतीति पूतीभावे श्यनि ॥ ४२ ॥

मृद क्षोदे ॥ (मृद्नाति, मृद्नीतः । मृद्नासि । मृद्नामि । ममर्द । ममृदतुः । ममृदुः । ममर्दिथ । ममृदथुः । ममृद । ममृदिव । ममृदिम । मर्दिता । मर्दिष्यति । मृद्नातु । मृदान) । "हलःश्न" इति श्नः शानच् । (मृद्नानि । अमृद्नात् । अमृद्नाः । अमृद्नाम् । अमृद्नीव । मृद्नीयात्) । आशिषि । (मृद्यात् । अमर्दीत् । मिमर्दिषति । मरीमृद्यते । मर्मत्ति) इत्यादि । (मर्दयति । अममर्दत् । अमीमृदत्) उर्कर्द्वा । (मृत्) क्विप् । (मृत्तिका) । "मृदस्तिकन्" इति स्वार्थे तिकन् । (मृत्स्ना । मृत्स्ना) "सस्नौ प्रशंसायाम्" इति सस्नौ प्रत्ययौ (मर्दनम् । मृद्यः) । "ऋदुपधात्" इति क्यप् । (मृदित्वा) "मृडमृद" इति सेटः क्त्वः कित्त्वम् ॥ ४३ ॥

मृड च ॥ मृड सुखे चेति केचित् । मृड सुखनइत्यपरे । (मृडित्वा) इत्यादिमृदिवत् । "ष्टुना ष्टुः" इति ष्टुत्वं णकारः । मृडतीति शे ॥ ४४ ॥

गुध रोषे ॥ (गुध्नाति । जुगोध । गुधित्वा) इत्यादि मृदिवत् । (गुधितः । गुधितवान्) । "उदुपधात्" इति निष्ठायाः कित्त्वविकल्पो व्यवस्थितविभाषया शब्विकरणानामेवेत्युक्तम् । गुध्यतीति परिवेष्टने दिवादौ ॥ ४५ ॥

कुष निष्कर्षे ॥ निष्कर्षो बहिर्निःसारणम् । (कुष्णाति । कुष्णासि । कुष्णामि । कुष्णीवः) । "ष्टुना ष्टुः" इति ष्टुत्वं, "रषाभ्याम्" इति णत्वम् , (चुकोष । चुकुषतुः । चुकोषिथ । चुकुषिव । निष्कोषिता । निष्कोष्टा । निष्कोषिष्यति । निष्कोक्ष्यति । कुष्णातु । कुषाण । अकुष्णात् । कुष्णीयात्) । आशिषि (कुष्यात् । निरकोषीत् । निरकुक्षत् । "निरः कुषः" इति वलाद्यार्धधातुके इड्विकल्पः । अनिट्पूर्वत्वे तु नित्यमिडेव, लुङ्यनिट्पक्षे "शलइगुपधात्" इति क्सः । (निष्चुकोषिषति । निष्चुकुक्षति) । पूर्ववदिड्विकल्पः । इटि "रलो व्युपधात्" इति कित्त्वविकल्पः । (कुष्यति पादः स्वयमेव । कुष्यते वा । अकुष्यत् पादः स्वयमेव । कुष्यतु कुष्यतां वा पादः स्वयमेव) "कुषिरञ्जोः प्राचां श्यन् परस्मैपदं च" इति श्यन् परस्मैपदे सार्वधातुके । अन्यत्र कोषिष्यते पादः स्वयमेव । अकोषि पादः स्वयमेवेत्यादि । (निष्कुषितम्) "इण् निष्ठायाम्" इति नित्यमिट् । (कुष्टः) । "हनिकुषि" इत्यादिना कथन् । (कुक्षिः) "प्लुषिकुषिशुषिभ्यः क्सिः" इति क्सिप्रत्ययः । सर्वत्र "तितुत्र" इतीण्निषेधः । (कौक्षेयकः) "कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु" इति असावभिधेये शैषिकढकञ् । अन्यत्र (कौक्षः । कौक्षेयः) । "दृतिकुक्षि" इत्यादिना भवार्थे ढञ् ॥ ४६ ॥

क्षुभ संचलने ॥ (क्षुभ्नाति । क्षुभ्नीतः । चुक्षोभ । चुक्षुभतुः । चुक्षोभिथ । चुक्षुभिव । क्षोभिता । क्षोभिष्यति । क्षुभ्नातु । क्षुभाण । क्षुभ्नानि । अक्षुभ्नात् । क्षुभ्नीयात्) । आशिषि (क्षुभ्यात् । अक्षोभीत् । अक्षोभिष्टाम् । चुक्षुभिषति) इत्यादि क्षुभ्यतिवत् । क्षोभतइति भूवादौ । अक्षुभदिति क्षुभ्यतेः पुषादिपाठात् । "क्षुभ्नादिषु च" इति णत्वनिषेधो यत्रैतद्रूपं तत्रैवेति क्षोभणमित्यत्र रूपान्तरे न भवति । क्षुभ्नीतः, क्षुभ्नन्तीत्यादौ त्वेकदेशविकृतस्यानन्यत्वात्तस्थानिवद्भावाद्भवत्येव ॥ ४७ ॥

णभ तुभ हिंसायाम् ॥ (नभ्नाति । तुभ्नाति) इत्यादि पूर्ववत् । लुङि (अनभत् ।

अनाभीत्)। "अतो हलादेः" इति वृद्धिविकल्पः। (प्रणिनभ्नाति। प्रनिनभ्नाति) "शेषे विभाषा" इति णत्वविकल्पः। नभ्यति तुभ्यतीति दिवादौ। नभते तोभत इति शपि ॥ ४८-४९ ॥

क्लिशू विबाधने ॥ (क्लिश्नाति। क्लिश्नीतः। क्लिश्नासि। क्लिश्नामि)। "शात्" इति श्चुत्वनिषेधः। (चिक्लेश। चिक्लिशतुः। चिक्लिशिथ। चिक्लेष्ठ। चिक्लिशिव। चिक्लिश्व) ऊदित्त्वात् "स्वरति" इत्यादिना वलाद्यार्धधातुकइड्विकल्पः, (क्लेष्टा। क्लेशिता। क्लेशिष्यति। क्लेक्ष्यति)। अनिटि व्रश्चादिना षत्वे यथायोगं ष्टुत्वकत्वे। (क्लिश्नातु। क्लिशान। क्लिश्नानि। अक्लिश्नात्। क्लिश्नीयात्)। आशिषि (क्लिश्यात्। अक्लेशीत्। अक्लेशिष्टाम्) अनिट्पक्षे "शल इगुपधात्" इति क्सः, (अक्लिक्षत्। चिक्लेशिषति। चिक्लिशिषति। चिक्लिक्षति। चेक्लिश्यते। क्लेशयति। अचिक्लिशत्। क्लिशित्वा। क्लिष्ट्वा। क्लिष्टः। क्लिशितः)। "क्लिशः क्त्वानिष्ठयोः" इतीड्विकल्पः। क्त्वायामूदित्त्वाद्वा सेट्, क्त्वो "रलो व्युपधात्" इति विकल्पं बाधित्वा "मृडमृद" इत्यादिना नित्यं कित्त्वम्। क्लिष्टं च तदक्लिशितं च (क्लिष्टाक्लिशितं,) "क्तेन नञ्विशिष्टेन" इति कर्मधारयः, क्लिश्यते इति दिवादौ ॥ ५० ॥

अश भोजने ॥ (अश्नाति। अश्नीतः। अश्नासि। अश्नामि। आश। आशिथ। आशिव। अशिता। अशिष्यति। अश्नातु। अशान। अश्नानि। आश्नात्। आश्नाम्। अश्नाः। अश्नीयात्)। आशिषि (अश्यात्। आशीत्। आशिष्टाम्। अशिशिषति। अशाश्यते। आष्टि) "सूचिसूत्रि" इत्यादिना यङ्, (आशयति)। "निगरण" इति नित्यं परस्मैपदम्, (माभवानशिषत्। अनाश्वान्)। "उपेयिवाननाश्वान्" इति नञ्पूर्वादश्नातेर्भाषायां भूतसामान्ये लिट्, क्वसुरनिट् निपात्यते। इदमेवादेशवचनं भूतसामान्ये लिटः कल्पकं स चादेशविषयः। इदं च निपातनमुत्तरत्रानुवृत्तेर्लङ्लिड्विषयं भवति, अस्य चोपादनं सदादौ कृतमिति तत एवावगन्तव्यम्(१)। (अशनायति,) बुभुक्षतीत्यर्थः, "अशनायोदन्यधनाया" इत्यादिना बुभुक्षायामीत्वापवाद आत्वम्, अश्नीत पिबतेति यस्यां क्रियायां सातत्येनोच्यते सा (अश्नीतपिबता) मयूरव्यंसकादौ "आख्यातमाख्यातेन क्रियासातत्ये" इति पाठात्समासे टाप्। अश्नुतइति स्वादौ ॥ ५१ ॥

उध्रस उञ्छे ॥ (ध्रस्नाति। दध्रास। दध्रसिथ। ध्रसिता। ध्रसिष्यति। ध्रस्नातु। ध्रसान। अध्रस्नात्। ध्रस्नीयात्)। आशिषि (ध्रस्यात्। अध्रासीत्। अध्रसीत्। दिध्रसिषति। दाध्रस्यते। दाध्रस्ति। ध्रासयति। अदिध्रसत्। ध्रसित्वा। ध्रस्त्वा)। उदित्त्वादिड्कल्पः, (ध्रस्तम्) "यस्य विभाषा" इत्यनिट्त्वम्। अयं चुरादौ। अत्र क्षीरस्वाम्युकारं धात्ववयवमाह। तन्मते-(उध्रस्नाति) इत्यादि, (उध्रसांचकार। औध्रस्नात्) इत्याद्युदाहार्यम्। अनवयवत्वे स्वादिवद् ध्रसु इति ब्रूयादिति तस्याभिप्रायः। स एव भूवादौ यदाह—

दरिद्राजागृदेधीङोऽनिकाचश्च चिरिर्जिरिः।
चकास्त्यूर्णोतिवेवीङः स्मर्यन्ते णौ तथौलडिः ॥

इति, तदुदाहरणप्रदर्शनं न तु परिगणनम् ॥ ५२ ॥

इष आभीक्ष्ण्ये ॥ पौनःपुन्यं भृशार्थो वाऽऽभीक्ष्ण्यं, तद्विषयायां क्रियायामित्यर्थः। सा च यथायोग्यं, तथा च श्रूयते 'पुर इष्णाति पुरुहूत' इति, अत्र भाष्यम्। आसुरीणां पुरो हननादिरर्थो गम्यते इति। (इष्णाति। इष्णीतः। इयेष। ईषतुः। ईषुः। इयेषिथ। ईयेष।

(१) तत्र हि सदादौ भूतसामान्ये सावकाशस्यास्य लिटः पराभ्यां विशेषविहिताभ्यां लङलिड्भ्यां बाधमाशङ्क्य तद्विधाने ऽप्यस्यानुवर्तनादित्युत्तरितमिति ॥

ईषिव) । गुणविषये "अभ्यासस्यासवर्णे" इतीयङ् । अन्यत्र सवर्णदीर्घः, (एषिता । एषिष्य-ति । इष्णातु । इषाण । इष्णानि । ऐष्णात् । ऐष्णीताम् । ऐष्णाः ।इष्णीयात् । आशिषि (इष्यात् । ऐषीत् । ऐषिष्यत् । एषिषिषति) । परत्वाद्गुणे द्वितीयस्यैकाचो द्विर्वचनम् । (एषयति । माभवानिषिषत् ।) ऋदित्करणात्क्वतङ्ह्रस्वे द्विर्वचनमिति तत्रैवोक्तम् । (एषि-त्वा, इषितः) । "तीषसह" इतीड्विकल्पस्तौदादिकस्यैव न दैवादिकक्रैयादिकयोरेतदर्थमेव तौदादिकमुदितं पठित्वा सूत्रे तमुदितं पठन्तीतिवृत्तौ स्थितम् , अनुदित्पाठिनां तौदादिक-स्यैव ग्रहणे हेतुर्हरदत्तेनाकारमात्रविकरणेन सहिना साहचर्यमुक्तम् । एवं धनपालसम्मताक्षी-रतरङ्गिणीकारादयश्च तौदादिकस्यैव "तीषसह" इत्यत्र ग्रहणमाहुः । काश्यपस्तु [इषेस्तकारे श्यन्प्रत्ययात् प्रतिषेधः] इतिवार्त्तिकप्रामाण्यादश्यन्विकरणयोस्तौदादिकक्रैयादिकयोर्द्वयोरपी-ड्विकल्पमाह, हरदत्तोऽपि, 'यथा तु वार्त्तिकं तथा क्रैयादिकस्याप्यत्र ग्रहणमिष्यतइति, एतञ्च तौदादित्वं वार्त्तिकविरुद्धम्, उक्तं च तत्र कैयटे पाठद्वयं प्रस्तुत्य 'तत्र वार्त्तिककारस्य मते त्रयोऽपीषयो निरनुबन्धकाः, इह च तीषसहेतिपाठस्तदाह, इषेरितीति' ॥ ९३ ॥

विष विप्रयोगे ॥ अनिट्कारिकायां विशिग्रहणेन जौहोत्यादिकोऽयं च गृह्यते इति न्यासे, (विष्णाति । विवेश । विवेशिथ । विविशिव) । क्रादिनियमादिट् । (विष्णातु । विषाण । विष्णानि । अविष्णात् । वेष्टा) इत्यादि चेष्टिवत् ॥ ९४ ॥

प्रुष प्लुष स्नेहनसेवनपूरणेषु ॥ (प्रुष्णाति । पुप्रोष । पुप्रोषिथ । पुप्रुषिव । प्रोषिष्यति । प्रुष्णातु । प्रुषाण । प्रुष्णानि । अप्रुष्णात् । प्रुष्णीयात्) । आशिषि (प्रुष्यात् । अप्रोषीत् । पुप्रुषिषति । पुप्रोषिषति । पोप्रुष्यते । पोप्रोष्टि । प्रोषयति । अपुप्रुषत् । प्रोषित्वा । प्रुषि-त्वा । प्रुषितः) । एवं (प्लुष्णाति) इत्यादि, (प्रुष्ट्वा । प्रुष्टः । प्लुष्ट्वा । प्लुष्टः) इति भौवा-दिक्रयोर्दाहार्थयोरुदितोः, प्रुषिस्तु दिवादौ पुषादौ ॥ ९५-९६ ॥

पुष पुष्टौ ॥ (पुष्णाति । पुष्णीतः । पुषाण । अपुष्णात् । पुष्णीयात् । पुपोष । पुपोषिथ । पोषिता) । इत्यादि पोषतिवत् । पुष्यतीत्यनिट् । (पूषा) पु(१)षतीति पुष वृद्धावित्यस्य शपि ॥ ९७ ॥

मुष स्तेये ॥ (मुष्णाति) इत्यादि पूर्ववत् , अयं द्विकर्मक इत्युक्तं, तन्निबन्धनानि च कार्याणि तत्रतत्रोक्तानीति नेह प्रतायन्ते । (मुषित्वा । मुमुषिषति) । "रुदविदमुष" इति क्त्वासनोर्नित्यं कित्त्वं "रलो व्युपधात्" इति विकल्पापवादः ॥ ९८ ॥

खच भूतप्रादुर्भावे ॥ भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः । (खच्नाति) श्चुत्वेन ञकारः, (चखाच । चखचिथ । चखचिव । खचिता । खचिष्यति । खच्नातु । खचान । खच्नानि । अखच्नात् । खच्नीयात् । खच्यात् । अखचीत् । अखाचीत्) "अतो हलादेः" इति वा वृद्धिः । (चिखचिषति । चाखच्यते । चाखक्ति । खाचयति । अचीखचत् । खचित्वा । ख-चितः । खव इत्येकइति मैत्रेयः । स्वाम्यपि खच्नातीत्युक्त्वा खौनातिरिति सभ्या इति । (खौनाति । खौनातु । खौनाहि) । अनुनासिकादावूठ्, हौ च श्नः शानचः पूर्वं परत्वा-दूठि पश्चाद्धलन्तत्वाभावान्न शानच् , (अखौनात् । खौनीयात्) । आशिषि (खव्यात्) । शेषं खचिवत् , अत्र क्वचिद्धेट् चेति पठ्यते, तत्र हेठतीत्यादि, हेठ विबाधायामिति शपि, श्र-न्थादय उदात्ता पिषिवर्जम् । क्लिशिस्तु विभाषितेड् । इषिरपि तकारादौ वार्त्तिकमतेन, सर्वे परस्मैपदिनः ॥ ९९ ॥

ग्रह उपादाने ॥ उदात्तः । स्वरितेत् । (गृह्णाति । गृह्णीतः । गृह्णासि । गृह्णामि) । "ग्र-हिज्या" दिना सम्प्रसारणं क्ङितोः । (गृह्णीते । गृह्णीषे । गृह्णे । गृह्णीवहे । जग्राह । जगृ-हतुः । जगृहुः । जग्रहिथ । जगृहथुः । जग्राह । जग्रह । जगृहिव । जगृहे । जगृहाते । जगृ-

---

(१) पोषतीति पाठो युक्तः । पुषतीति पाठे संज्ञापूर्वको विधिरनित्य इति गुणाभावः ।

हिषे । जगृहिढ्वे । जगृहिध्वे । जगृहवहे । ग्रहीता । ग्रहीष्यति । ग्रहीष्यते)। "ग्रहोऽलिटि दीर्घः" इत्यलिटीटो दीर्घः। (गृह्णातु । गृहाण । गृह्णानि । गृह्णीताम्। गृह्णाताम्। गृह्णाष्व। गृह्णै। अगृह्णात्। अगृह्णीताम्। अगृह्णीत। अगृह्णाताम्। गृह्णीयात्। गृह्णीयाताम्। गृह्णीयाः। गृह्णीत। गृह्णीयाताम्। गृह्णीरन्)। आशिषि (गृह्यात्। गृह्यास्ताम्। ग्रहीषीष्ट। ग्रहीषीयास्ताम्। अग्रहीत्। अग्रहीष्टाम्) "ह्मयन्त" इति न वृद्धिः। (अग्रहीष्ट। अग्रहीषाताम्। जिघृक्षति। जिघृक्षते)। "सनि ग्रहगुहोश्च" इतीण्निषेधः। "रुदविदमुषग्रहि" इति सनः कित्त्वात्संप्रसारणम्। "हो ढः" भष्भावः। "षढोः" इति कत्वे षत्वम्। (जरीगृह्यते,) यङि संप्रसारणे द्विर्वचनम्। "रीगृद्वत" इत्यभ्यासस्य रीक्। (जाग्राढि,) यङो लुका लुप्तत्वान्न संप्रसारणं, ढत्वघत्वष्टुत्वढलोपदीर्घाः। (जागृढः) ढत्वादि दीर्घवर्जं, तत्र हि पूर्वाणो ग्रहणम्। प्रसारणं त्वपित्सार्वधातुका(१)पेक्षम्। (जाग्रहीति)। झल्परत्वाभावान्न ढत्वम्। (जाघ्रक्षि)। ढत्वभष्भावकत्वषत्वादि। (जागृहि। जागृढः। जाग्रहांचकार। जाग्रहीता। जाग्रहीष्यति)। "ग्रहोऽलिटि" इत्यत्र गृहेर्यद्विहितमार्धधातुकं तस्य य इडिति विहितविशेषणत्वेऽपि द्विःप्रयोगरूपत्वाद् द्विर्वचनस्य द्विरुक्तोऽपि स एव ग्रहिरिति दीर्घो भवति। विहितविशेषणाङ्गीकारस्य च प्रयोजनं जरिगृह्यशब्दाद्धलाद्यार्धधातुके इट्यल्लोपयलोपयोर्जरिगृहितेत्यादौ दीर्घनिवृत्तिः। अत्र च न ग्रहेर्विहितमार्द्धधातुकं किं तर्हि यङन्तात्। (जाग्राढु। जागृढाम्। जागृढि)। अत्र हेरपित्त्वात्प्रसारणादौ ढत्वादि, (आजाग्रट्। आजागृढाम्। अजागृहुः। अजाग्रहम्। अजाग्रट्)। तिप्सिपोर्हल्ङ्यादिलोपे पदान्तत्वाड्ढत्वभष्भावयोर्जश्त्वचर्त्वे। (जागृह्यात्। जागृह्याताम्। जागृह्यास्ताम्। अजाग्रहीत्)। "स्यसिच्सीयुट्" इत्यादिना चिण्वदिटि ग्राहिष्यत इत्यादि। "ग्रहोऽलिटि दीर्घः" प्रकृतस्येट इतीह न भवति। (प्रगृह्यं पदं,) यस्य प्रगृह्यसंज्ञा विधीयते। (गृह्यकाः) शकुनयः, अस्वतन्त्रा इत्यर्थः; (ग्रामगृह्या) चाण्डालवाटिका। ग्रामाद्बहिर्भूतेत्यर्थः। (अर्ज्जुनगृह्यः) अर्ज्जुनपक्षः। "पदास्वैरिबाह्यापक्षेषु च" इति गृहेः क्यप्, बाह्येति स्त्रीलिङ्गनिर्देशो लिङ्गान्तरे माभूदिति। तेन ग्रामग्राह्यश्चाण्डाल इत्यत्र ण्यदेव भवति। गृह्यका इत्यत्रानुकम्पायां कन्। (पाणिगृहीती,) "पाणिगृहीती" इति ङीष्। (ग्राहः, ग्रहः)। विभाषा ग्रह" इति कर्तरि वा णः। अन्यदा च व्यवस्थितविभाषाविज्ञानात् जलचरे (ग्राहः)। ज्योतिषि (ग्रहः) गृह्णात्युपादत्ते धान्यदिकमिति (गृहं गेहम्)। "गेहे कः" इति ग्रहेर्गेहे कर्तरि कः, संप्रसारणम्। यदायं तात्स्थ्यात्तद्ववचनस्तदा स्वभावात्पुल्लिङ्गो बहुवचनान्तश्च। शक्तिं गृह्णातीति (शक्तिग्रहः)। अच्प्रकरणे [शक्तिलाङ्गलतोमरयष्टिघटघटीधनुःषु ग्रहेरुपसंख्यानम्] इत्यच्। अणोऽपवादः। एवं लाङ्गलग्रह इत्यादि। सूत्रं धारयतीति (सूत्रग्रहः)। "सूत्रे च धार्यर्थे" इति धारयत्यर्थाद् ग्रहेरच्। (फलेग्रहिः)। अवन्ध्यवृक्षादिरिति नैघण्टुकाः। "फलेग्रहिरात्मंभरिश्च" इति इन्प्रत्यय उपपदस्य चैकारान्तत्वं निपात्यते। भट्टिकाव्ये तु फलग्राहिमात्रे प्रयुज्यते। (फलेग्रहीन्) हंसि वनस्पतीनामिति। (उद्ग्राहः)। "उदि ग्रह" इति घञ्। "गृहवृदृनिश्चि" इत्यपोऽपवादः। (संग्राहो मल्लस्य) अङ्गुलिसंनिवेशस्य दार्ढ्यमित्यर्थः। "समि मुष्टौ" इति घञ्, अपोऽवादः पूर्ववत्। मुष्टाविति मुष्टिविषयश्चेद्धात्वर्थ इत्यर्थः। अवग्राहो हन्त ते वृषलरूपात्। एवं निग्राहः। "आक्रोशे वन्योर्ग्रह" इति घञ्। पूर्ववद् अपोऽपवादः। आक्रोशः शपनम्। अन्यत्रावग्रहः पदस्य (निग्रहश्चोरस्य) "ग्रहवृदृनिश्चिगमश्च" इत्यप्। (पात्रप्रग्राहेण चरति भिक्षुः) लिप्सुः पात्रं गृहित्वा चरतीत्यर्थः। "प्रे लिप्सायाम्" इति घञ् लिप्सायां गम्यमानायाम्। (परिग्राहो वेद्याः)। "परौ यज्ञ" इति ग्रहेर्घञ्, अन्यत्र परिग्रहो धनस्य, पूर्ववदप्। (अवग्रहो देवस्य अवग्राह इति वा)। "अवे ग्रहो वर्षप्रतिबन्धे" इति घञपौ। वर्षस्य प्रतिबन्ध इत्यर्थः। (तुलाप्रग्राहस्तुलाप्रग्रहः)।

(१) तस्य बहिरङ्गत्वेनासिद्धत्वान्न रागादय इति भावः

तुलासूत्रमित्यर्थः । "प्रे वणिजाम्" इति वा घञ् । वणिजामित्यनेन तुलासूत्रं लक्ष्यते, तेषां तेन सम्बन्धात्, न तु वणिजस्तन्त्रमिति वृत्त्यादौ स्थितम् । (प्रग्राहोऽश्वादेः प्रग्रह इति वा) "रश्मौ च" इति वा घञ् । अश्वानां नियमनार्था रज्जुरिह रश्मिशब्देनोच्यते । (जीवग्राहं गृह्णाति) । "समूलाकृतजीवेषु हन्कृञ्ग्रह" इति जीवशब्दे कर्मण्युपपदे ग्रहेर्णमुल् । कषादित्वाद्यथाविध्यनुप्रयोगः, जीवन्तं गृह्णातीत्यर्थः । (हस्तग्राहं गृह्णाति । पाणिग्राहं गृह्णाति) । हस्तेन गृह्णातीत्यर्थः । "हस्ते वर्तिग्रहोः" इतिकरणवाचिनि हस्तार्थे उपपदे णमुल् । पूर्ववदनुप्रयोगः । (नामग्राहमाह्वयति) नाम गृहीत्वा ऽऽह्वयतीत्यर्थः । "नाम्न्यादिशिग्रहोः" इति नाम्न्युपपदे णमुल् । तृतीयाप्रभृतित्वात्समासविकल्पः । धातुसम्बन्धाधिकारादनुप्रयोगः । वासरूपेण क्त्वाप्यनुज्ञायतइति नाम गृहीत्वेति भवति । गर्हत इति गृहेर्ग्रहणे शपि । कुत्सायां गल्हत इति शपि, एवं गर्हते इति ॥ ६० ॥

इति श्रीपूर्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसङ्गमहाराजमहामन्त्रिणा मायणसुतेन माधवसहोदरेण सायणाचार्येण विरचितायां माधवीयायां धातुवृत्तौ क्र्यादयः ।

अथ चुरादयः ।

चुर स्तेये ॥ अकार उच्चारणार्थः प्रयोजनान्तराभावात् । न च तङर्थाऽनुदात्तेत्वं स्यात् । "सत्यापपाश" इत्यादिना चुरादिभ्यः स्वार्थे णिचो विधानादणिचः प्रयोगाभावात् । तथा च काश्यपः—कार्याभावादेकश्रुत्या पठ्यत इति । अत्राभरणे घुषिरविशब्दन इति ज्ञापकादक्रियमाणेऽपि वाग्रहणे चुरादिभ्यो णिज्वेत्युक्त्वा "अत एकहल्" इत्यत्र वृत्तौ (जगणतुः जगणुः) इति प्रत्युदाहरणसमर्थनार्थमनित्यण्यन्ताश्चुरादय इति न्यासकारेणाभिधानाद् इदं ज्ञापकं सामान्यापेक्षयेत्युक्त्वा "आधृषाद्वा" इति गणकारवचनं चानुवाद इत्युक्तम् । ज्ञापकस्य स्वरूपमस्माभिर्घोषतौ लिखितमिति नेह प्रदर्शितं, तस्य ज्ञापकस्य सामान्यापेक्षत्वं कैयटविरुद्धम् । यदाह "णेरणौ" इत्यत्र गणयति गणमिति भाष्यव्याख्याने नित्यत्वाण्णिचः केवलानां चुरादीनां प्रयोगाभावादिति । भाष्यविरुद्धं च । तथाहि । किमर्थमविशब्दन इत्युच्यते, न विशब्दने घुषेर्णिचा भवितव्यम् । एवं तर्हि सिद्धे सति यदविशब्दनग्रहणं करोति तज्ज्ञापयत्याचार्यो विशब्दने घुषेर्विभाषा णिज् भवतीति । किमेतस्य ज्ञापने प्रयोजनं, 'महीपालवचः श्रुत्वा जुघुषुः क्षत्रमालवा' इत्येष प्रयोग उपपन्नो भवतीति विशिष्टविषयत्वेनाभिधानात्, "ऋदुपधाच्चाकृपिचृतेः" इत्यत्रानित्यण्यन्ताश्चुरादय इति सामान्येन यदुक्तं पदमञ्जर्यां तदपि मतान्तरापेक्षं न तु स्वमतेन, यद्वक्ष्यति । घुषिरविशब्दन इत्यत्र घुषिविषयमेव ज्ञापकमुक्त्वा, अन्ये त्वाहुः । अनित्यण्यन्ताश्चुरादय इति सामान्येन ज्ञाप्यत इति । यापि "ऋदुपधाच्च" इत्यादावनित्यण्यन्ताश्चुरादय इति न्यासकृतः सामान्योक्तिः सापि येषां लिङ्गेन वचनेन वा णिज्विकल्पस्तन्मात्रविषयैव । तथा च "णेरणौ" इत्यत्र तेनैवोक्तं, चौरादिकानामप्यनित्यण्यन्तत्वाद्विभाषितणिचां केषां चिद्विद्यमानत्वादिति, यस्मात् णेः प्राक्कर्म कर्ता वा विद्यते न चैतस्माण्णेः प्राक्कर्म कर्ता वा विद्यते इति गणे नित्यण्यन्तत्वाभिधानं विरुध्येत । तथा जगणतुरिति प्रत्युदाहरणे पदमञ्जर्यामपि चुरादित्वादत्र णिच् प्राप्नोति, यदि नेष्यते ऽनित्यण्यन्ताश्चुरादय इति । यदिना ह्यपरितोषः सूच्यते । अपरितोषश्च पूर्वोक्तो भाष्यविरोधः । तदेवं नित्ये णिचि स्वरितेत्त्वात् ग्रहिः क्र्यादौ लक्षिश्चैकश्चुरादिष्विति वचनाल्लक्षेः स्वरितेत्त्वाल्लिङ्गादन्येभ्यश्चुरादिभ्यो "णिचश्च" इति कर्त्रभिप्राये तङ्नेत्युक्त्वा चन्द्र-

स्त्वत्राप्युभयपदित्वमास्थत । णिज्विकल्पमाह स्वामी । एवं देवो नन्दी चाहतुः । मैत्रेयस्तु स्वरितेत्त्वमस्य नेच्छति, यदाह स्वरितेत्त्वमस्य कश्चित्प्रतिज्ञायत इति । "णिचश्च" इत्यत्र हरदत्तोऽपि लक्षेः स्वरितेत्त्वं प्रस्तुत्याह । नात्राप्तभाषितमस्ति, पारायणेऽपि चुरादिणिच आत्मनेपदमुदाहृतमिति । एवं च लक्षत्रिति पठित्वा ञित्करणादन्येभ्यश्चुरादिभ्यो "णिचश्च" इति तङ् न भवतीति च श्रीभद्रवचनमपि प्रत्युक्तम् । प्रक्रियारत्ने च चितेरिदित्त्वात् ज्ञापकाच्चुरादिणिचो ऽनित्यत्वाच्चट स्फुट भेदन इत्यादौ चटतीत्याद्यपि यथादृष्टं द्रष्टव्यमित्येकीयमतमुक्त्वा तद्भाष्योक्तज्ञापकविरुद्धम् । एवं हि घुषिरविशब्दन इत्यस्याप्यण्यन्तस्य सम्भवात्तद्व्यावृत्त्यर्था ऽविशब्दनोक्तिः कथं ज्ञापिका स्यादिति तन्मतं दूषितम् । तस्माद्यत्र लिङ्गं वचनं चास्ति तत्र विकल्प इति सिद्धमिति । वचनं स्पष्टं, लिङ्गमपि तत्र तत्र धातावुपदर्शयिष्यते । यत्तु जगणतुः,जगणुरिति लिङ्गवचनयोरभावेऽप्यण्यन्तस्य प्रत्युदाहरणम् "अत एकहल्" इत्यत्र वृत्तौ तदनित्यण्यन्ता इति सामान्यत्रादिमतापेक्षया न तु सिद्धान्तबुद्ध्या । (चोरयति । चोरयतः । चोरयन्ति । चोरयसि । चोरयथः । चोरयथ । चोरयामि । चोरयावः । चोरयामः । चोरयते । चोरयेते । चोरयन्ते । चोरयसे । चोरयेथे । चोरयध्वे । चोरये । चोरयावहे । चोरयामहे । चोरयांचकार । चोरयांचक्रे । चोरयामास । चोरयांबभूव) । प्रत्ययान्तत्वादाम्प्रत्ययः । "अयामन्त" इति णेरयादेशः । (चोरयिता । चोरयिष्यति । चोरयिष्यते । चोरयतु । चोरयताम् । अचोरयत् । अचोरयत । चोरयेत् । चोरयेत । चोर्यात्) "णेरनिटि" इति णिलोपः । (चोरयिषीष्ट । अचूचुरत् । अचूचुरत) "णिश्रि" इत्यादिना चङ्, शत्रादिकार्यं भूवज्ज्ञेयम् । (चुचोरयिषति । चुचोरयिषते) । चिण्वदिटि तस्यासिद्धत्वाण्णिलोपे (चोरिष्यते । अचोरिषाताम्) । एकवचने चिणिति सिचोऽभावः, (चोरिषीष्ट । चोरिता इति भवति । (चोरः) । पचाद्यच् । (चौरः) । प्रज्ञादित्वात्स्वार्थेऽण् । (चोरणा) । "ण्यासश्रन्थ" इति युच्, चुरेति छत्रादिपाठादकारप्रत्ययो गुणाभावश्च । चुरा शीलमस्या (चौरी) । "छत्रादिभ्योण" इति णेऽपि क्वचिदणकृतमिति ङीप् । एतच्च करोतावुपपादितम् ॥ १ ॥

चिति स्मृत्याम् ॥ इदित्त्वान्नुम्, (चिन्तयति) इत्यादि । (चिन्ता,) "चिन्तिपूजि" इत्यादिना ऽङ्प्रत्ययः । अत्र मैत्रेयः । अकारे विधातव्येऽङो विधानं गुणाभावार्थं, तत्सामर्थ्यात्कदाचिण्णिलोपो नास्तीति तत्र चिन्तियेतीयङुदाहर्त्तव्यः । चिन्त स्मृत्यामिति सानुषङ्ग एव पठितव्ये इदित्पाठान्नलोपाभावार्थादस्य णिच् पाक्षिकः । नित्ये हि णिचि तस्य स्थानिवद्भावाद्व्यवधानान्न क्वापि क्त्परत्वमिति चिन्त इत्यादौ नलोपाप्रसङ्गः । तेन (चिन्तति । चिचिन्त । चिन्तिता) इत्याद्यपि भवति । एवमन्यत्रापीदित्त्वं णिज्विकल्पार्थं द्रष्टव्यम् । चेततीति शपि संज्ञाने । चेतयत इत्याकुस्मीयः ॥ २ ॥

यत्रि संकोचने ॥ (यन्त्रयति । यन्त्रणा । यन्त्रितः) । अत्रापि पूर्ववदिदित्करणाद्यन्त्रतीत्याद्यपि भवति । अत्राभरणे यतृ इति पठित्वा ऋकारो "नाग्लोपि" इति विशेषणार्थ इत्युक्तम् । अयं पाठश्चिरन्तनव्याख्यानेषु न दृश्यते, प्रत्युत यन्त्रणादिशब्दमस्मादेव मैत्रेयादयो व्युदपादयन्, अनेकविकरणविचारणे दैवे तद्व्याख्याने पुरुषकारे वा प्रयत्नार्थनिकारार्थवस्सङ्कोचार्थो नोपादीयत इति तस्य मूलं मृग्यम् ॥ ३ ॥

स्फुडि परिहासे ॥ (स्फुण्डयति) स्फुण्डतीत्यादि ॥ ४ ॥

लक्ष दर्शनाङ्कनयोः ॥ (लक्षयति) इत्यादि । (लक्ष्मीः) "लक्षेर्मुट् च" इतीकारप्रत्ययो मुडागमश्च । ।(लक्ष्मीवान् । लक्ष्मणः) "लक्ष्म्या अच्च" इति मत्वर्थीयो नकारप्रत्यय इकारस्य चाकारः । (लक्ष्यम्, लक्षणम्) । अचो यति ल्युटि च णेर्लोपः । लक्ष्यमधीते वेद वा (लाक्ष्यिकः) । लाक्षणिकोऽप्येवम् । उञ्छादौ लक्ष्य लक्षणे इति पाठात्कक् । शम लक्ष आलोचन इत्याकुस्मीयो भविष्यति ॥ ५ ॥

कुद्रि अनृतभाषणे ॥ (कुन्द्रयति । अचुकुन्द्रत् । कुन्द्रति) इत्यादि । अत्र स्वामी ऋदिदित्येक इति । तत्र कोद्रयतीत्यादि । ऋदित्फलं तु अचुकोद्रदित्यत्र ह्रस्वनिवृत्तिः ॥६॥

लड उपसेवायाम् ॥ (लाडयति) इत्यादि । लडतीति विलासे शपि ॥ ७ ॥

मिदि स्नेहने ॥ (मिन्दयति । मिन्दति) इत्यादि । अत्र क्षीरस्वाम्यनिदितं पठित्वा कैश्चिदिदित् पठ्यत इत्याह । तथा कौशिकोऽप्यनिदितं पपाठ । स्नेहने मेदते मेद्यतीति शप्श्यनोः । ऋदितोऽपि शपि मेधाहिंसनयोः, मेदते ॥ ८ ॥

ओलडि उत्क्षेपणे ॥ (ओलण्डयति । ओलण्डति । ओलिलण्डयिषति) । अजादित्वाद् द्वितीयस्यैकाचो द्विर्वचनम् । अत्र स्वामिकाश्यपसंमताकाराः केचिद्दोदितं पठन्ति तेषां मते लण्डयति । लण्डतीति । अपरे तूकारादिं पठन्ति, तदोकारं धात्ववयवमुदाहरतां मैत्रेयादीनामित्संज्ञकत्वमभिदधतामन्येषां च सर्वेषामनभिमतम् ॥ ९ ॥

जल अपवारणे ॥ (जालयति) इत्यादि । नन्दिसम्मताकारावार्थतौ विपर्यस्य पठतो लज इति, तन्माभूदिति मैत्रेयो जालमित्युदाजहार ॥ १० ॥

पीड अवगाहने ॥ (पीडयति । अपीपिडत् । अपिपीडत्) । "भ्राजभास" इत्यादिना णौ चङ्युपधाह्रस्वविकल्पः । (पीडा) भिदादिपाठादङ् । (पाणावुपपीडं धारयति, पाण्युपपीडं धारयति) । पाणिनोपपीडमिति वा । "सप्तम्यां चोपपीड" इति सप्तमीतृतीयान्तयोर्णमुल् । तृतीयाप्रभृतित्वात् समासविकल्पः । 'धनुरभिरसह्यं मुष्टिपीडं दधानः' इति वदन् भट्टिकार उपोपसर्गग्रहणमतन्त्रं मन्यते ॥ ॥ ११ ॥

नट अवस्यन्दने ॥ अवस्यन्दनं नाट्यम् । नाट्यइत्येव चन्द्रः । (चौरस्योज्जासनम्) "जासिनिग्रहण" इति कर्मणि शेषे षष्ठी । अनेकार्थत्वाद्धिंसार्थत्वमुत्पूर्वस्य, जास्यादीनां विकृतनिर्देशाण्णौ चङि ह्रस्वेनायं विधिरित्युक्तं न्यासे । तत्फलं चोरमनीनटदित्यत्र षष्ठ्यभावः । अयं पक्षो भत्रादौ दूषितः ।। १२ ।।

श्रथ प्रयत्ने ॥ प्रस्थान इति मैत्रेयः । अतिहर्ष इति बहवः । (श्राथयति) । क्रथिमपि केचिदत्र पठन्ति । स मैत्रेयादौ न दृश्यते । तथा क्रथश्रथो हिंसायाम्, (क्राथयेत्, क्रथते, क्रथेत) इति घटादि(१) च पठता देवेनापि न पठितः ।। १३ ।।

बध संयमने ।। (बाधयति) । बन्धेति चान्द्रः । बध्नातीति बन्ध बन्धन इति क्रैयादिकस्य बीभत्सते इति भौवादिकस्य नित्यसन्नन्तस्य बधेर्वैरूप्ये ।। १४ ।।

पॄ पूरणे ।। (पारयति) । अत्र श्रीभद्रादयो दीर्घोच्चारणसामर्थ्यात्पक्षे णिज् नेति । तथाहि—दीर्घोच्चारणं परितेत्यादावदन्तमृदन्तामिति इट्सिद्ध्ये, तण्णिचो विकल्पस्य कल्पकं भवति । ननु परितेत्यादि पृणातिपिपर्त्योरन्यतरेणापि सिद्ध्यति किं विकल्पकल्पनया । सत्यम् । परितेत्यादि सिध्यति, परतीत्यादिसिद्धिस्तु प्रयोजनं भविष्यति ।।१५ ।।

ऊर्ज बलप्राणनयोः ।। प्राणनं जीवनम् । (ऊर्जयति । और्जिजत् । ऊर्जिजयिषति) "न न्द्राः" इति रेफवर्जस्य द्वितीयस्यैकाचो द्विर्वचनम् । (ऊर्क्) । "भ्राजभास" इत्यादिना क्विप् । "चोः कुः" इति कुत्वं, णिलोपस्य [पूर्वत्रासिद्धये न स्थानिवत्] इति स्थानिवत्त्वनिषेधात्पदान्तता, संयोगान्तलोपस्तु "रात्सस्य" इति नियमान्न भवति ।। १६ ।।

पक्ष परिग्रहे ।। (पक्षयति । अपपक्षत्) ।। १७ ॥

वर्ण चूर्ण प्रेरणे ॥ एवं मैत्रेयः । अन्ये तु वर्ण वर्णने । चूर्ण प्रेरण इति वर्णयन्ति । (चूर्णयति) । वर्णं गृह्णाति (वर्णयति) चूर्णैरवध्वंसयति (अवचूर्णयति) । "सत्यापपाश" इत्यादिना वर्णचूर्णाभ्यां प्रातिपदिकाभ्यां ग्रहणावध्वंसनयोर्णिच् ॥ १८-१९ ॥

प्रथ प्रख्याने ॥ (प्राथयति । अपप्रथत्) "अत्स्मृदॄत्वरप्रथ" इत्यभ्यासस्याकारः,

---

(१) युजादीमिति पुस्तकान्तरे अधिकम् ।

"नान्ये मितोऽहेतौ" इति सम्भवद्धेतुमण्णिचां चुरादिणिचि मित्त्वाभावात्प्रथ प्रख्याने इति घटादिकं मित्त्वमस्य न भवति ॥ २० ॥

पृथ प्रक्षेपे ॥ (पार्थयति । अपपर्थत् । अपीपृथत्) । उर्ऋद्वा । पथ इत्येक इति स्वामी, पाथयति । अपीपथत् ॥ २१ ॥

षम्ब सम्बन्धने ॥ (सम्बयति । अससम्बत्) । शम्ब चेति मैत्रेयः । शम्बेत्येक इति स्वामी । (शम्बयति । अशशम्बत् । शम्बरम्) । बाहुलकादरः । साम्ब इति केचिद्दन्त्यादिं दीर्घवन्तं च पठन्ति ॥ २२ ॥

भक्ष अदने ॥ (भक्षयति पिण्डीं देवदत्तः) । अतो हेतुमण्णिचि भक्षयति पिण्डीं देवदत्तेनेति "गतिबुद्धिप्रत्यवसानार्थ" इति प्रयोज्यस्य कर्मत्वम् [भक्षेरहिंसार्थस्य] इति वार्तिकेन निषिध्यते । अत्र च [आदिखाद्योः प्रतिषेधः] इत्यतः प्रतिषेधग्रहोऽनुवर्तते । "गतिबुद्धिः" इत्यादौ चाणिग्रहणेन हेतुमण्णिचो निषेधः । हिंसायां तु भक्षयति यवान् बलीवर्दानिति भवति । अत्र भक्षयतिर्हिंसाङ्गे भक्षणे वर्तते, हिंसा च सर्वे भावाः सचेतना इति दर्शनेन यवानां सचेतनत्त्वादस्ति । दर्शनान्तरे यवानां भक्षणे स्वामिनो हिंसा भवतीति तदपेक्षं भक्षणस्य हिंसाङ्गत्त्वम् ॥ २३ ॥

कुट्ट छेदनभर्त्सनयोः ॥ एवं बहवः । छेदनपूरणयोरिति स्वामी, छेदनइत्येवं जिनेन्द्रदुर्गौ । (कुट्टयति । अचुकुट्टत् । कुट्टाकः) । "जल्पभिक्षकुट्ट" इति षाकन् । षित्त्वात् स्त्रियाम् (कुट्टाकी, कुट्टनं, कुट्टः) । "एरच्" । कुट्टेन निर्वृत्तं (कुट्टिमम् ,) [भावप्रत्ययान्तादिमब्वक्तव्यः] इति "तेन निर्वृतम्" इति विषये इमप् ॥ २४ ॥

पुट्ट चुट्ट अल्पीभावे ॥ (पुट्टयति । अपुपुट्टत् । चुट्टयति । अचुचुट्टत्) ॥ २५–२६ ॥

अट्ट षुट्ट अनादरे ॥(अट्टयति, आट्टिटत्) । अयन्दोपधो लक्षणवशेन टकार इति "नन्द्राः" इति दकारवर्जस्य द्वितीयस्यैकाचो द्विर्वचने पश्चात् ष्टुत्त्वम् । (सुट्टयति । असुषुट्टत्) २७-२८॥

लुण्ठ स्तेये ॥ (लुण्ठयति । अलुलुण्ठत्) । लुण्ठतीति लुठि स्तेये इत्यस्य शपि । ननु लुण्ठतेरिदित्पाठेनापि लुण्ठयति लुण्ठतीति रूपद्वयं भविष्यति, किं भ्वादीदित्पाठेन । सत्यम् । सिध्यतीदं रूपद्वयं, लुण्ठितेति ताच्छीलिकस्तृ(१)न्न स्यात् । "जल्पभिक्षकुट्टलुण्ठ" इति षाकना बाधात् । लुठि पाठे तु प्रतिपदोक्तत्त्वादस्यैव तत्र ग्रहणमिति भौवादिकात्तृनि लुण्ठितेति भवतीत्युभयत्र पाठः कर्तव्यः । अत एव न्यासे कुट्ट छेदे, लुण्ठ स्तेये चौरादिकावेताविति उक्तम् । (लुण्ठाकः) "जल्पभिक्ष" इत्यादिना षाकन् , षित्वान्ङीष् (लुण्ठाकी) २९

शठ श्वठ असंस्कारगत्योः ॥ (शाठयति । श्वाठयति । अशीशठत् । अशीश्वठत्) । इदिद्द्वितीय इति दुर्गः । मैत्रेयोऽपि श्वठीत्येक इति । (श्वण्ठयति । अशश्वठत्) श्लाघायां शाठयतइत्याकुस्मीयः । शठयति श्वठयतीति कथादी, कैतवे शठतीति शपि गतम् ॥ ३०–३१ ॥

तुजि पिजि हिंसाबलादाननिकेतनेषु ॥ (तुञ्जयति । अतुतुञ्जत् । पिञ्जयति । अपिपिञ्जत्) । इदित्करणात्तुञ्जति पिञ्जतीत्यपि भवतः । तुजि हिंसायां तुजि पालने चेति भूवादिपाठादेव हिंसायां तुञ्जतीति सिद्धाविदित्त्वेन णिजनित्यत्वं बलादाननिकेतनयोरपि तुञ्जतीति रूपसिद्धये, एवं तर्ह्येनैव सिद्धे भूवादिपाठः किमर्थं इति चेत्, पालने तुञ्जतीत्यर्थः । तुञ्जयति पिञ्जयतीति भाषार्थावग्रे भविष्यतः । शाकटायनस्तुज पिजेति पपाठ । पिज वर्णइत्यदादौ । इह लजि लुजि इत्यपि क्वचिद् दृश्येते । तौ मैत्रेयादिभिर्न पठ्येते ॥ ३२–३३ ॥

पिस गतौ ॥ (पेसयति । अपीपिसत्) । पेसतीति शपि ॥ ३४ ॥

षान्त्व सामप्रयोगे ॥ (सान्त्वयति । अससान्त्वत् । सिषान्त्वयिषति) ॥ ३५ ॥

श्वल्क वल्क परिभाषणे ॥ (श्वल्कयति । वल्कयति । अशश्वल्कत् । अववल्कत्) ३६–३७

(१) लुण्ठीति ताच्छीलिको णिनिर्न स्यादिति पुस्तकान्तरे पाठः ।

ष्णिह स्नेहने ॥ षापदेशः । (स्नेहयति । असिष्णिहत्) स्निह्यतीति प्रोता दिवादिः । अत्र स्फिट स्नेहनइति क्वचित्कोशे दृश्यते । तद्धनपालशाकटायनमैत्रेयदेवादिभिश्चिरन्तनैर्व्याख्यातृभिर्न लिख्यते ॥ ३८ ॥

स्मिट अनादरे ॥ (स्मेटयति । असिस्मिटत्) स्मिङ् इत्येकइति मैत्रेयः । (स्माययते) । अवयवे कृतं लिङ्गमिति न्यायेन ण्यन्तस्य ङित्त्वादात्मनेपदम् । आत्वं स्मायतेरिति निर्देशाद्धेतुमण्णौ विधानाच्च नास्य भवति । शाकटायनस्त्वट स्मिट गताविति टान्तप्रकरणे पपाठ । स्मयतइतीषद्धासे शपि ॥ ३९ ॥

श्लिष श्लेषणे ॥ (श्लेषयति । अशिश्लिषत्) । श्लेषतीति दाहे शपि । श्लिष्यतीत्यालिङ्गने श्यनि ४० ॥

पथि गतौ ॥ (पन्थयति । अपपन्थत्, । पन्थति । अपन्थीत्,) इदित्त्वाण्णिज्विकल्पः । पथतीति पथे गतावित्यस्य शपि ॥ ४१ ॥

पिच्छ कुट्टने ॥ (पिच्छयति । अपिपिच्छत्) ४२ ॥

छदि संवरणे ॥ (छन्दयति । अचछन्दत् । छन्दति) । शाकटायनस्त्वात्मनेपदिष्वप्ययमुं पपाठ स्वाम्यादयश्छदेत्यनिदितं पठित्वा छादयतीत्युदाजह्रुः । तथा छादयतीति रूपस्य छद अपवारणइत्याधृषीयेणैव सिद्धत्वादिह पाठो व्यर्थः स्यात् । इदित्त्वाभावे छन्दःशब्दोऽपि न स्यादिति मैत्रेयाद्युक्त इदित्पाठ एव न्याय्यः । अत एव न्यासपदमञ्जर्यादौ छादेयमित्यत्रोरश्छदादि छद अपवारण इत्यस्मादेव व्युत्पादितम् ॥ ४३ ॥

श्रणु दाने ॥ प्रायेणायं विपूर्वः । (विश्राणयति । व्यशिश्रणत्) । घटादिपाठात् श्रणयति ॥ ४४ ॥

तड आघाते ॥ (ताडयति । अतीतडत्) ॥ ४५ ॥

खड खडि कडि भेदने ॥ (खाडयति । अचीखडत् । खण्डयति । अचखण्डत् । खण्डति । अखण्डीत् । कण्डयति । अचकण्डत् । कण्डति । अकण्डीत्) । खण्डतीति मन्थने शपि । तथा कण्डतइति भेदे । क्षीरस्वामी तु भूवादौ परस्मैभाषं कडतिमनिदितमपि कडीतीदितं पठित्वा कडेति दुर्ग इत्याह । अस्य निर्णयस्तत्र कृतः ॥ ४६-४७-४८ ॥

कुडि रक्षणे ॥ (कुण्डयति । कुण्डति) । कुण्डतइति वैकल्यदाहयोः शपि गतम् । वैकल्यार्थष्ठान्त इति शाकटायनः । टान्तमेकइति स्वामी । इमावपि पाठभेदौ तत्रापि दर्शितौ ॥४९॥

गुडि वेष्टने ॥ (गुण्डयति । गुण्डति) । रक्षणइत्येके । प्रथमादिं द्वितीयान्तमेके पठन्ति । (अवकुण्ठयति । अवकुण्ठति) ॥५० ॥

खुडि खण्डने ॥ (खुण्डयति । खुण्डति) ॥ ५१ ॥

वटि विभाजने ॥ वडीति शाकटायनः । (वण्डयति) । अत्र मैत्रेयो भौवादिकस्य विभाजनार्थस्य वटेर्हेतुमण्णौ वण्टयतीति सिद्धे चुरादौ पाठः कर्त्रभिप्रायेऽपि परस्मैपदार्थं इति । असौ "णिचश्च" इति तङ् चुरादिण्यन्तस्य नेति मन्यते । अन्ये तु "णिचश्च" इति तत्रापीष्यत इति नेदं प्रयोजनं किन्तु चिन्तीत्यादिवदिदित्त्वबलाण्णिचो विकल्पो नेति, विभाजने तु तेनैव वण्टतीति सिद्धमिति । ये तु भूवादावपि विभाजनइति पठन्ति तेषां तु नैवास्य चौरस्यावतारः ॥ ५२ ॥

मडि भूषायां हृष च ॥ (मण्डयति) । मण्डतइति वेष्टने शपि । मडि भूषायामिति भूवादौ पाठादेव मण्डतीति सिद्धेरस्येदित्वं नुम्मात्रार्थं न तु णिज्विकल्पार्थमपि, तेन हर्षे मण्डतीति न भवति ॥ ५३ ॥

भडि कल्याणे ॥ (भण्डयति । भण्डति) । परिभाषणे भण्डतइति शपि । परिहासइत्येके तत्र ॥ ५४ ॥

छर्द वमने ॥ (छर्दयति । अचच्छर्दत्) ॥ ५५ ॥

पुस्त बुस्त आदरानादरयोः ॥ (पुस्तयति पुस्तकम् । बुस्तयति बुस्तम्) ॥ ९६–९७ ॥

चुद सञ्चोदने ॥ सञ्चोदनं प्रश्नः, प्रेरणा च । तत्र प्रश्ने द्विकर्मकत्वं, देवदत्तमर्थम् (चोदयति) । (चूडा) । भिदादिपाठादङ् । उत्वं दीर्घत्वं च । (चूडालः) । "प्राणिस्थादातो लजन्यतरस्याम्" इति मत्वर्थे लच् । चूडा नाम काचित्, तस्या अपत्यं (चौडिः) "बाह्वादिभ्यश्च" इतीञ् "द्व्यचः" इति ठकोऽपवादः ॥ ९८ ॥

नक्क धक्क नाशने ॥ अयं तवर्गीयादिः । णोपदेशपर्युदासे नृतिनन्दीत्यादावुपादानात् । (नक्कयति) ॥ ९९–६० ॥

चक्क चुक्क व्यथने ॥ (चक्कयति । चुक्कयति) चिक्क इत्यपि क्वचित्पठ्यते ६१–६२

क्षल शौचकर्मणि ॥ (क्षालयति । अचक्षलत्) ॥ ६३ ॥

तल प्रतिष्ठायाम् ॥ (तालयति । अतीतलत् । तालं । तलम्) । अच् । "संज्ञापूर्वको विधिरनित्य' इति वृद्ध्यभावः । मैत्रेयस्तु 'घुषिरविशब्दने, इति ज्ञापकं सामान्यमित्युक्त्वा णिजभावे तलशब्दमाह ॥ ६४ ॥

तुल उन्माने ॥ (तोलयति । अतूतुलत् । तुला) इति णिचोऽनित्यत्वादिति मैत्रेयः । अन्ये तु णिजभावे प्रमाणाभावात् "तुल्यार्थै" इत्यादौ तुलेति निपातनादङि णिलुकि तुलेति । (तुलयति । अतूतुलत्) इति तुलाशब्दात् "प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च" इति णिचि, "दीर्घो लघोः" इति णौ चङ्यभ्यासस्य दीर्घत्वमग्लोपित्वान्न भवति । तुला कृष्णस्य नास्ति । "तुल्यार्थैः" इति विधीयमाना तृतीया तत्रैवातुलोपमाभ्यामितिवचनान्न भवति । तुलया सम्मितं (तुल्यम्) । "नौवयोधर्म" इति यत् । तुलया सम्मितमिति व्युत्पत्तिमात्रं रूढशब्दस्त्वयं सदृशपर्यायः । (तुल्यश्वेतः) । "कृत्यतुल्याख्या अजात्या" इति समानाधिकरणसमासः । अयं च पूर्वनिपातनियमबाधनार्थः । तथा तुल्यमहानित्यत्र "सन्महत्" इति महच्छब्दस्य प्राप्तपूर्वनिपातबाधार्थः । (कृष्णस्य तुल्यः, कृष्णेन वा) । "तुल्यार्थैः" इति षष्ठीतृतीये ॥ ६५ ॥

दुल उत्क्षेपे ॥ (दोलयति । अदूदुलत् । दोला) । भिदादेराकृतिगणत्वादङ् । (दुलिः) कर्मठः । "अच इः" इतीप्रत्ययः । "बहुलमन्यत्रापि संज्ञाच्छन्दसोः" इति णिलुक् ॥ ६६ ॥

पुल महत्वे ॥ (पोलयति । पोलति) इति शपीति भूवादौ स्वामी ॥ ६७ ॥

चुल समुच्छ्राये ॥ (चोलयति । चोलः) । चोलस्यापत्यमपि (चोलः) । "द्व्यञ्मगध" इत्यण् । तस्य "कम्बोजादिभ्यो लुग्वचनञ्चोलाद्यर्थम्" इति लुक् ॥ ६८ ॥

मूल रोहणे ॥ (मूलयति) । मूलतीति प्रतिष्ठायां शपि ॥ ६९ ॥

कल विल क्षेपे ॥ (कालयति । वेलयति । वेला) । कलयतीति गतिसंख्यानयोः कथादौ भविष्यति । कलतइति शब्दसंख्यानयोः शपि । वेलते इति वेलेरपि चलने, विलतीति संवरणे शे । क्वचित् किलेत्यप्यत्र पठ्यते, मैत्रेयादिभिस्तु न पठ्यते, श्वैत्यक्रीडनयोः किलतीति शे ॥ ७०–७१ ॥

बिल भेदने ॥ (बेलयति । बेलति) इति शपीत्यात्रेय इत्युक्तम् ॥ ७२ ॥

तिल स्नेहने ॥ (तेलयति) । तिलतीति शे । तेलतीति गतौ शपि ॥ ७३ ॥

चल भृतौ ॥ (चालयति) । चलतीति विलसनकम्पनयोः शशपोः ॥ ७४ ॥

पाल रक्षणे ॥ (पालयति । अपीपलत्) । पातेरपि हेतुमण्णौ [पातेर्लुग्वक्तव्यः] इति लुगागमे पालयति ॥ ७५ ॥

लूष हिंसायाम् ॥ (लूषयति । अलूलुषत्) ॥ ७६ ॥

शुल्ब माने ॥ (शुल्बयति । अशुशुल्बत्) । शूर्प मानइति श्रीभद्रमैत्रेयादयः । (शूर्पयति । शूर्पः) एरचि पचाद्यचि वा णिलोपः । शूर्पेण क्रीतं (शौर्पं, शौर्पिकम् ।) "शूर्पादञन्यतरस्याम्" इत्यार्हीयेष्वर्थेष्वञ्ठञौ । द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पमित्यत्र "अध्यर्धपूर्व

इति ठञजोर्वा लुक् ॥ ७७ ॥

चुट छेदने ॥ (चोटयति) । चुटतीति शे गतम् ॥ ७८ ॥

मुट संचूर्णने ॥ (मोटयति) । मोटतीति मर्दने शपि । मुटतीति प्रमर्दनाक्षेपयोः शे ॥७९॥

पडि पसि नाशने ॥ (पण्डयति । पण्डति । पंसयति । पंसति । पांसुः) । "अर्जिदृशि" इत्यादिनोप्रत्ययो दीर्घश्च । पण्डतइति गतौ शपि ॥ ८०-८१ ॥

व्रज मार्गसंस्कारगत्योः । (व्राजयति) । व्रजि मार्गसंस्कारयोर्गतौ चेति मैत्रेयादयः । अत्र धनपालो मार्गे चेति पठति । स्वामी तु व्रजस्थाने वजि पठित्वा मार्गेति द्वितीयं धातुमाह । तन्त्रान्तरे तु वजिव्रजी द्वौ पठित्वा मार्गसंस्कारगती अर्थौ उक्तौ । (व्राजयति । मार्गयति) । व्रजति व्रजतीति शपि । वाजयतीति वातेर्णौ "वो विधूनने जुक्" इति जुगागमे । मृग अन्वेषणे कथादौ । मार्ग अन्वेषणे इति युजादौ ॥ ८२-८३ ॥

शुक्ल अतिस्पर्शने ॥ (शुक्लयति) ॥ ८४ ॥

चपि गत्याम् ॥ (चम्पयति । चम्पति) ॥ ८५ ॥

क्षपि क्षान्त्याम् ॥ (क्षम्पयति । क्षम्पति) क्षपयतीति प्रेरणार्थस्य कथादित्वेन ॥८६॥

क्षजि कृच्छ्रजीवने ॥ (क्षञ्जयति । क्षञ्जति) क्षञ्जतइति गतिदानयोर्घटादौ ॥ ८७ ॥

श्वर्त गत्याम् ॥ (श्वर्तयति) ॥ ८८ ॥

श्वभ्र च ॥ (श्वभ्रयति) ॥ ८९ ॥

ज्ञप मिच्च ॥ ज्ञापने मारणादिषु चाभिधानमस्यैवेति मैत्रेयादयः । अन्ये तु शाकटायनानुसारिणो ज्ञप मारणतोषणनिशामनेषु मिच्चेति पठन्ति, तथा "इको झल्" इत्यत्र न्यासे "ज्ञप मिच्च" इति (१)पठित्वा अन्येतु ज्ञपमारणतोषणनिशामनेष्विति पठन्तीति । घटादिवदत्रापि केचिन्निशामनस्थाने निशानशब्दं पठन्ति । घटादिषु मारणादिसूत्रस्य पाठादेव मित्त्वे सिद्धे पुनर्मारणादिषु मित्त्ववचनं ज्ञपयमादिवर्जमन्ये स्वार्थण्यन्ता न मित इति ज्ञापनार्थमिति पुनः पाठफलं चाहुः काश्यपादयः । ज्ञपादीननुक्रम्य "नान्ये मितोऽहेतौ" इति ज्ञपादिव्यतिरिक्तानामेवाहेतुमण्णौ मित्त्वाभावस्य वक्ष्यमाणत्वान्नेदं फलम् । किं चार्थविशेषपरिगणनमप्ययुक्तं, प्रच्छ ज्ञीप्सायां, (ज्ञप्सिः) "श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमान" इत्यत्र ज्ञीप्स्यमानो ज्ञपयतुमिष्यमाणो बोधयितुमभिप्रेत इत्यादौ ज्ञानमात्रे ज्ञापने च प्रयोगदर्शनात् । न चैवं शक्यते वक्तुं निशामनं ज्ञानमात्रं तदर्थादस्मादहेतुमण्णौ चुरादित्वेन प्रच्छ ज्ञीप्सायां ज्ञप्सिरति भविष्यति, "स्थाशपां ज्ञीप्स्यमान" इत्यादिस्तु हेतुमण्णौ घटादित्वेनेति । एवं तर्हि घटादिर्ज्ञापनविषयो ऽयं तु ज्ञानविषय इत्यर्थभेदस्य विद्यमानत्वात् घटादित्वादेव मित्त्वे सिद्धे पुनर्मारणादिषु मित्त्ववचनं ज्ञापनार्थमिति स्वोक्तेन विरोधः स्यात् । अथ मतं घटादित्वादेव मित्वे सिद्धे पुनर्मारणादिषु मित्त्ववचनंज्ञापनार्थमिति स्वोक्तेन विरोधः स्यात् । अथमतं घटादित्वादेव मित्वे सिद्धे पुनर्मारणादिषु मित्ववचनं ज्ञापनार्थं, निशामनस्य ग्रहणं विध्यर्थमितरयोस्तु नियमार्थमिति । एवमपि मारणादिष्विवचनमयुक्तं, मारणतोषणयोरिति तु वक्तव्यम् । किं चास्य ज्ञानमात्रार्थत्वे "श्लाघह्नुङ्" इत्यत्र न्यासकारहरदत्तादिभिश्चौरादिकाद् व्युत्पादनं विरुद्ध्येत । सर्वथा तज्ज्ञापयत्याचार्यः, 'विज्ञापना भर्तृषु सिद्धिमेति' ज्ञापकं स्यात्तदन्तत्व, इत्यादिस्तु न सिध्यति । अथ मारणतोषणनिशामनेष्विति घटादाविह च पाठाज्ज्ञापयत्यादि सिध्यति, ज्ञीप्स्यमानो ज्ञप्सिरिति न सिध्यति । यदि तु मतं घटादौ निशामनमिति पाठ, इह तु निशानमिति घटादेर्ज्ञापयति, अस्माज्ज्ञपयतीति भविष्यतीति, एवमपि "स्थाशपां ज्ञीप्स्यमान" इत्यादि न सङ्गच्छते । अत्र हि बोधनार्थो धातुस्तत्र तु बोधनं निशामनशब्दार्थो न तु बोधनेति । अथ तत्रापि बोधनार्थः, प्रच्छ ज्ञीप्सायां, ज्ञीप्स्यमानः

---

(१) उक्तश्चेति पाठान्तरम् पुस्तकान्तरे ।

ज्ञप्सिर्न सिध्यति । तस्माज्ज्ञप मिच्चेत्येव युक्तः पाठः । अत एव "इको झल्" इत्यादौ "ज्ञप मिच्च" इति न्यासकारहरदत्तादयः पठन्ति । तेनास्य यथाप्रयोगमर्थ इति ज्ञापने ज्ञानमात्रे च वृत्तिरिति प्रच्छ ज्ञीप्सायां, ज्ञीप्स्यमानः, ज्ञपयितुमिष्यमाण, इत्यादि सर्वमुपपद्यते । ज्ञापयत्यादिप्रयोगस्तु ज्ञानमात्रवचनाज्जानातेः । घटादिमित्वं तु चाक्षुषज्ञानार्थकनिशामनार्थस्य चेतीह न भवति, निशामनं चाक्षुषज्ञानमित्यवोचाम । पुरुषकारेऽप्यस्मदुक्तरीत्या "ज्ञप मिच्च" इत्येव पाठो युक्त इति सिद्धान्तितम् । एवं च चुरादिणिचो "णिचश्च" इति कर्त्रभिप्राये तङ् नास्तीति दर्शनाश्रयणेनोक्तस्योक्तिः, "णिचश्च" इत्युदितं विहितं यदिति कर्त्रभिप्रायेऽपि मारणादौ परस्मैपदसिद्धिः पुनः पाठफलमिति यद्दैवेनोक्तं तदपि मतं, जानातीति ज्ञःसिध्येत्, ज्ञपयति तु पुनर्मारणादौ घटादेश्च मित्वेऽपीदमेव ज्ञपमिदिति पदं ज्ञापने मारणादौ, तेनार्थात् ज्ञापनार्थे ज्ञपयतिपदवत् ज्ञापयेदित्यपि स्यादिति स्वेनैव ज्ञपमिदित्यर्थविशेषोपादानरहितं पाठमङ्गीकृत्य तस्य च प्रयोजनं मारणादिव्यतिरिक्ते ज्ञपयत्यर्थे ज्ञपयतीति सिद्धिरित्युक्तत्वादुक्तस्योक्त्यसंभावान्निराकृतम् । (ज्ञपयति । संज्ञपयति । निज्ञपयति, प्रज्ञपयति) । स्वभावान्मारणादावप्यस्य वृत्तिरित्युक्तं, तत्र कौमारमतेन सोपसर्गः प्रदर्शितः । (जिज्ञपयिषति । ज्ञीप्सति) । "सनीवन्त" इत्यादिना पक्षे इडभावः । "आप्ज्ञप्यृधाम्" इति झलादौ सन्यच ईकारः । "अत्र लोप" इत्यभ्यासलोपः । "णेरनिटि" इति णिलोपः । "वा दान्त" इत्यत्र ज्ञप्त इति निपातनं ज्ञोरिति "निष्ठायां सेटि" इत्यत्र कैयटपदमञ्जर्योरुक्तत्वादिह ज्ञप्तः ज्ञपित इति मैत्रेयेणोदाहरणस्य प्रदर्शनमयुक्तम् ॥ ९० ॥

यम च परिवेषणे ॥ चकारेण मिदित्यपेक्ष्यत इति मैत्रेयादयः । इह परिवेषणं परिवेष्टनं, न तु भोजना, नापि वेष्टना । तत्र हि घटादित्वात्सिद्धम् । न च वेष्टनेऽपि घटादित्वेन मित्त्वसिद्धिः । हेतुमण्ण्यन्तस्य तद्विधानात् तस्य च वेष्टना ऽर्थो न तु वेष्टनमिति । (यमयति चन्द्रम् परिवेष्टतइत्यर्थः । अन्यत्र नियामयति । क्वचिद्यमो ऽपरिवेषण इति पठ्यते । तदनार्षम् । चकारेण मिदित्यपेक्ष्यतइति मैत्रेयादिविरोधात् । किं च घटादौ यमो ऽपरिवेषण इति परिवेषणादन्यत्र मित्त्वं निषिध्यते, अनेन तु तत्र च विधीयतइति विधिनिषेधयोर्विषयविभागो न प्रकल्पेत । येषां तु दर्शनं घटादावपरिवेषणे मित्त्वं विधीयतइति तेषान्तु तत्रैवानेनापि मित्वं विधीयत इति वैयर्थ्यमेव प्रसज्येत । इदं च घटादावपरिवेषणे मित्त्वविधानदर्शनं च तत्रैव दूषितम् ॥ ९१ ॥

चह परिकल्कने ॥ (चहयति) । मैत्रेयस्तु चपेति पठित्वा चपयतीत्युदाजहार । चहेत्यूष्मान्तमेव चन्द्रोऽपि । अयं कथादावपि पठिष्यते, तस्य फलमग्लोपित्वात् "सन्वल्लघुनि" इति इत्वस्य "दीर्घो लघोः" इति दीर्घस्य चाभावः । तेनाचचहदिति भवति । इह पाठादचीचहदितीत्वदीर्घौ भवतः । तथास्य मित्वात् (अचहि । अचाहि । चहंचहं, चाहंचाहम् इति "चिण्णमुलोः" इति दीर्घविकल्पो भवति । चहतीति भूवादिः । ९२ ॥

रह त्यागे ॥ इतीह केचित्पठन्ति । (रहयति) । कथादावयं पठिष्यते, तत एव सिद्धेरिह पाठो व्यर्थ इति स्वामी । तन्न, चहिवत्कथादेरग्लोपित्वादित्वदीर्घयोरभावादररहदिति भवति, इह पाठादरीरहदिति, तथा (अरहि । अराहि । रहंरहं । राहंराहम्) इति मित्त्वात् "चिण्णमुलोः" इति दीर्घविकल्पोऽस्य भवतीति प्रयोजनसद्भावात् । रहतीति शपि । रंहतीति तत्रैव रहि गतावित्यस्य ॥ ९३ ॥

बल प्राणने ॥ ओष्ठ्यादिः । (बलयति) ॥ ९४ ॥

चिञ् चयने । ञित्करणात्कर्त्रभिप्राये तङ्विध्यर्थाण्णिजस्य विकल्पेन भवति, णिचि "चिस्फुरोर्णौ" इत्यात्वं पक्षे भवति । तत्र पुकि मित्त्वात्तस्य ह्रस्व इति । (चपयति । चययति) । अणिचि चयति, चयते इति भवति । अत्र काश्यप इकारोच्चारणसामर्थ्यादात्वं नेति तच्चिन्त्यम्, आत्वस्य वैकल्पिकत्वात्तदभावे वृद्ध्यायह्रस्वेषु चययतीति रूपसिध्यर्थत्वा-

त्तस्य, तथा णिजभावे गुणायोश्चयतीति रूपार्थत्वाच्च । रहत्यादयो यद्यप्यत्र मैत्रेयादिभिर्न पठितास्तथापि काश्यपादिप्रामाण्यादस्माभिः पठिताः । चिनोतीति स्वादेः । "नान्ये मितोऽहेतौ" ज्ञपादिव्यतिरिक्ता अहेतुमण्णौ मितो न भवन्ति। तेन ज्ञपादिव्यतिरिक्तानां चौरादिकानां शमादीनां "जनीजॄष्क्नसुरञ्जोऽमन्ताश्च" इत्यादिना सामान्यलक्षणेन प्राप्तं मित्त्वं न भवति ॥ ९५ ॥

घट्ट चलने ॥ (घट्टयति) । घट्टते इति शपि ॥ ९६ ॥

अस्त संघाते ॥ (अस्तयति) । क्वचिदयं वक्ष्यमाणस्य पुंसेरनन्तरं पठ्यते ॥९७॥

खट्ट संवरणे ।) (खट्टयति) ॥ ९८ ॥

षट्ट स्फिट्ट चुबि हिंसायाम् ॥ (सट्टयति । स्फिट्टयति । चुम्बयति) । चुम्बतीति वक्रसंयोगे शपि । केचिद् द्वितीयं षुट्टेत्युकारवन्तमनोष्ठ्यं च पठन्ति । अस्माभिस्तु मैत्रेयादीनामनुसारेण पूर्वमेव षुट्टिःपठित इतीह न लिखितः, तदनुरोधादेवेह स्फिट्टिश्च पठितः । इह व्यय क्षय इति नन्दी पठति । व्ययेत्यपरे, मैत्रेयदेवादयस्तूभयमपि न पठन्ति॥९९-१००-१०१

पूल संघाते ॥ (पूलयति) । पूलतीति शपि । पुरुषकारे तु पुणेति क्षीरस्वामी, पुणेति शाकटायन इत्युक्त्वा कोशशुद्धिस्त्वीदृशेऽर्थे कीदृशीति न विद्म इत्युपहसितम् ॥ १०२ ॥

पुंस अभिवर्द्धने ॥ (पुंसयति) ॥ १०३ ॥

टकि बन्धने ॥ (टङ्कयति । टङ्कति । टङ्का । विटङ्कः) ॥ १०४ ॥

धूस कान्तिकरणे ॥ दन्त्योष्ठ्यान्त इति श्रीभद्रमैत्रेयादयः । मूर्धन्योष्ठ्यान्त इति स्वामी । तथा च मैत्रेयोऽपि धूष इत्येकइति । काश्यपस्तु तालव्योष्मान्तमाह । (धूसयति । धूसरः) । बाहुलकादरप्रत्ययः ॥ १०५ ॥

कीट वर्णे ॥ (कीटयति) ॥ १०६ ॥

चूर्ण सङ्कोचने ॥ (चूर्णयति) । पुनः पाठोऽर्थभेदकृतः ॥ १०७ ॥

पूज पूजायाम् ॥ (पूजयति । पूजा) । "चिन्तिपूजि" इत्यङ्, "ण्यास" इति युचोऽपवादः । (पूजितो राज्ञाम्) "मतिबुद्धिपूजार्थेभ्यश्च" इति वर्तमाने क्तः । सनि"क्तस्य च वर्तमाने" इति कर्तरि षष्ठी । "क्तेन च पूजायाम्" इति समासनिषेधः। 'पूजितो यः सुरासुरैः' इत्यार्षः प्रयोग इत्याहुः ॥ १०८ ॥

अर्क स्तवने ॥ (अर्कयति,) तपनइत्येके । अर्चयत्यर्कमर्किण इति दर्शनात् स्तवनपाठो युक्तः ॥ १०९ ॥

शुठ आलस्ये ॥ (शोठयति) । शोठतीति गतिप्रतिघाते शपि ॥ ११० ॥

शुठि शोषणे ॥ (शुण्ठयति । शुण्ठति) । अत्र क्षीरस्वामी । केचिदेनमकारान्तं पठन्ति, लक्ष्यतस्तदपि प्रमाणमिति, एवं तु आलस्ये इति पूर्वत्रैव शोषणमपि निर्दिशेत् । शोषणे शोठयतीति प्रयोगो दृष्टश्चेत् शोठयतेरनेकार्थत्वेन निर्वाह्यः, तस्माच्छुठि शोषणइति युक्तः पाठः । अस्येदित्त्वादेव शुण्ठतीति सिद्धे भ्वादौ शुण्ठेः पाठः प्रपञ्चार्थः ॥ १११ ॥

जुड प्रेरणे ॥ (जोडयति) । बन्धने जुडतीति शे ॥ ११२ ॥

गज मार्ज शब्दार्थौ ॥ (गाजयति । गाजयते) । गञ्जतीति शपि, गर्जति गृञ्जतीति च । (मार्जयति) । शौचालङ्कारयोः, मार्जतीति युजादौ भविष्यति । मृजूष् शुद्धावित्यस्य मार्ष्टीत्यदादौ । अत्र मर्चिमपि केचित्पठन्ति । मर्चयति । शपि मर्चति ॥ ११३ ॥ ११४ ॥

घृ सम्प्रस्रवणे ॥ घारयति । अत्र क्षीरस्वामी स्रावणइति पठित्वाऽभिघारयतीत्युदाजहार, घरतीति शपि । जघर्तीति श्लौ । छान्दसौ चैतावित्युक्तम् ॥ ११५ ॥

पचि विस्तारवचने ॥ (पञ्चयति) । पञ्चति, पञ्चतइति व्यक्तार्थस्य शपि ॥ ११६ ॥

तिजू निशामने ॥ (तेजयति) । तितिक्षते इति भौवादिकस्य तिजेर्नित्यसन्नन्तस्य क्षमायाम् । तेजतीति शपि पालनार्थस्य ॥ ११७ ॥

कृत संशब्दने ॥ (कीर्तयति) । "उपधायाश्च" इतीत्त्वरपरत्वयोः "हलि च" इति दीर्घः । (अचिकीर्तत् । अचीकृतत्) । उर्ऋद्वा । अन्यदा णौ कृतं स्थानिवदितीत्त्वस्य स्थानिवत्त्वं न भवति । यत्र द्विरुक्तौ परभागस्याद्योजवर्णस्तत्रैवेयं परिभाषेत्येवं "द्विर्वचनेऽचि" इत्यादौ भाष्यकैटयोः स्थितम् । एवमेव "उर्ऋत्" इत्यादौ पदमञ्जर्यादिष्वपि । यत्तु "स्तौतिण्योरेव" इत्यत्रास्य सिषेचयिषत्यादौ सिचेर्हेतुमण्णौ गुणे सनीटि गुणायादेशयोरुत्तरखण्डस्यावर्णाभावेऽप्यनया परिभाषया गुणस्य स्थानिवत्त्वेन सिचशब्दस्य द्विरुक्तेर्वचनं तदस्याः परिभाषायाः सामान्यताश्रयणेन स्थानिवत्त्वेऽपि रूपसिद्धौ विशेषो नास्तीत्येतावता न तु सिद्धान्तस्थित्या । कथन्तर्हि "लोपः पिबतेः" इत्यत्र वृत्तावपीप्यदित्यत्र पिबतेर्णौ युकि चङि "लोपः पिबतेरीच्चाभ्यासस्य" इत्युपधालोपे तस्यानया परिभाषया स्थानिवत्त्वमाश्रित्य पाय्शब्दस्य द्विरुक्तिरुक्ता, नह्यत्रोत्तरखण्डस्याद्यमचमवर्णं पश्यामः । यद्यपि प्रयोगे न पश्यामः स्थानिवत्त्वेन पाय्शब्दे द्विरुक्ते प्रक्रियायामुत्तरखण्डेवर्णं पश्याम इति न दोषः । तस्य च "लोपः पिबतेः" इत्यस्य पुनः प्रवृत्त्या प्रयोगे दर्शनम् । एवमौजढदित्यत्राप्यूढशब्दाण्णिचि टिलोपे तस्य स्थानिवत्त्वे ढत्वादीनामसिद्धत्त्वे हृतशब्दस्य द्विरुक्तिः, प्रक्रियावाक्ये उत्तरखण्डस्याजवर्ण इति न क्वचिद्दोषः । एवं चौजिढदपीप्यदित्यादिसिद्ध्यर्थमस्याः परिभाषायाः सामान्यत्वमाश्रित्यात्र "लोपः पिबतेः" इत्यत्र वृत्तिकारवचनं "स्तौतिण्योरेव" इत्यत्र न्यासकारवचनं च संवादयन्नचिकीर्तदिति सिद्ध्यर्थमनित्यत्त्वं चास्या वदन् सीरदेवोऽपि प्रत्युक्तः । प्रकृतमनुसरामः । (कीर्तिः) । "ऊतियूति" इत्यादिना युजपवादः क्तिन् । कालापास्तु युचमपीच्छन्ति कीर्तनेति । "ऋदुपधाच्चाक्लृपिचृतेः" इत्यत्र तपरकरणादृ ऋकारोपधकीर्तयतिण्यावृत्त्यर्थादस्माण्णिचोऽनित्यत्त्वं ज्ञाप्यते । नित्ये णिच्यनुपधात्त्वादेव ऋकारस्यात्र क्यब् न भविष्यतीति किं तपरकरणेनैतद्ध्यावृत्त्यर्थेन, तेन कीर्ततीत्यादि च भवति।११८।

वर्ध छेदनपूरणयोः ॥ (वर्धयति, अववर्धत्) ॥ ११९ ॥

कुबि छादने ॥ (कुम्बयति । कुम्बति । कुम्बा) । "चिन्तिपूजि" इत्यादिना युचोऽपवादोऽकारः । एवं स्वामिकाश्यपमैत्रेयादयो बशन्तं पठन्ति । अपरे तु भकारान्तं पठन्ति, कुम्भयतीत्यादि ॥ १२० ॥

लुबि तुबि अदर्शने ॥ अर्दनइति मैत्रेयः । (लुम्बयति । तुम्बयति) । अनयोरिदित्त्वादेव लुम्बति तुम्बतीति सिद्धेरर्दनेऽर्थे भ्वादौ पाठो व्यर्थः स्यात् । इहादर्शनेऽर्थे त्वर्थभेदात्सोऽपि सार्थकः ॥ १२१-१२२ ॥

ह्लप व्यक्तायां वाचि ॥ (ह्लापयति) । क्लपेत्येके । (क्लापयति) ॥ १२३ ॥

चुटि छेदने ॥ (चुण्टयति । चुण्टति) । अत्र क्वचिन्मुडि तुडीति तृतीयान्तौ पठ्येते तावद्येषु व्याख्यानेषु न दृश्येते, अतोऽप्रामाणिकः पाठोऽनयोः ॥ १२४ ॥

इल प्रेरणे ॥ (एलयति । ऐलिलत्) । इलतीति तुदादौ ॥ १२५ ॥

म्रक्ष म्लेच्छने ॥ म्लेच्छनमपशब्दनम् । "म्लेच्छो हवा एष यदपशब्द" इति श्रुतेः । (म्रक्षयति) । म्रक्षतीति संघाते शपि । म्लक्ष म्रक्ष अदनइत्यपि क्वचित्पठ्येते ॥ १२६ ॥

म्लेच्छ अव्यक्तायां वाचि ॥ इहाव्यक्तवागपशब्दनम् । (म्लेच्छयति) । म्लेच्छतीति भ्वादौ ॥ १२७ ॥

ब्रूस बर्ह हिंसायाम् ॥ ब्रूसयति । बर्हयति) । बर्हतीति वृह वृद्धावित्यस्य शपि । बर्हत इति च प्राधान्ये, वृद्धये बर्हयेदिति, भाषार्थोऽग्रे भविष्यति । अत्र गर्ज गर्द शब्दे, गर्ध अभिकाङ्क्षायामिति क्वचित्पठ्यन्ते । (गर्जयति । गर्दयति । गर्द्धयति) । शप्यपि गतावाचौ । गृध्यतीति श्यनि गृधेः ॥ १२८-१२९ ॥

गुर्द पूर्व निकेतने ॥ अत्र क्षीरस्वामी । पूर्वनिकेतनमासाद्याभ्यवहारः । पारायणे द्वौ धातू इति । पुरुषकारे तु पूर्वनिकेतनइति पठित्वा तच्च निवासपूर्वकमित्युक्त्वा पूर्वयती-

त्यत्र "उपधायां च" इति दीर्घ उक्तः । (गूर्दयति । पूर्वयति) । पूर्वतिस्तु शपि । गुर्दस्तु कुर्दखुर्द-त्यत्र प्रपञ्चितः । पूर्वयतीति कथादिरित्युक्तं दैवे, तच्च भूवादौ पूर्वतौ दूषितम् ॥१३०-१३१॥

जसि रक्षणे ॥ मोक्षण इति देवः । (जंसयति । जंसति) जस्यतीति श्यनि मोक्षणे । इहैव हिंसायां जासयतीति भविष्यति । तथा ताडनेऽपि ॥ १३२ ॥

ईड स्तुतौ ।। ईडयति । ऐडिडत्) ईट्ट इत्यदादौ ।। १३३ ।।

जसु हिंसायाम् ॥ (जासयति चोरस्य चोरमिति वा) । "जासिनिप्रहण" इति कर्मणि शेषे षष्ठी । जासीति निर्देशाच्चोरमजीजसदित्यत्र न षष्ठीति न्यासे । इदमपि दूषितं प्रागेव । क्त्वार्थामिड्विकल्पार्थादूदित्करणादस्य णिजनित्य इति जसतीति भवति । (जसित्वा । जस्त्वा । जस्तम्) ॥ १३४ ॥

पिडि संघाते ॥ (पिण्डयति । पिण्डति) ॥ १३५ ॥

रुष रोषे ॥ (रोषयति) । शपि रोषति । हिंसायां श्यनि रुष्यति । रोषे रुट् इत्येकइति मैत्रेये रक्षितः ॥ १३६ ॥

डिप क्षेपे ॥ (डेपयति) । डप डिप संघातइत्याकुस्मीयः । क्षेपे डेपयति, डिपयतीति गतौ ॥ १३७ ॥

ष्टूप समुच्छ्राये । (ष्टूपयति) ॥ १३८ ॥

आ कुस्मादात्मनेपदिनः ॥ कुस्मनाम्नो वेति वक्ष्यति । आ एतस्मादात्मनेपदिनोऽकर्त्र-भिप्रायेऽपि । आङभिविधौ, मर्यादायामसन्देहार्थं प्रागित्येव ब्रूयात् ॥

चित सञ्चेतने ॥ सञ्चेतनं संज्ञानम् । (चेतयते । अचीचितत् । चिन्तयति । चिन्तति) इति स्मृत्यामिह गतम् । शपि चेतति संज्ञाने ॥ १३९ ॥

दशि दंशने ॥ (दंशयते) । आकुस्मीयमात्मनेपदं णिचूसन्नियोगेनेति व्याख्यातारः । तेनेदित्करणसामर्थ्याण्णिजभावे दंशतीति शपि ॥ १४० ॥

दसि दर्शनदंशनयोः ॥ दंशनदर्शनयोरिति प्रायेण दृश्यतइति पुरुषकारे । (दंसयते, दंसति) । पूर्ववदणिचि परस्मैपदं, देसतीति रक्षणे गतमेकीयमतेन । दस्यतीत्युपक्षये श्यनि, दासतइति दाने शपि । (दासः, दासी) । "दंसेष्टटनौ न आ च" इति टटनौ नकारस्य चाकारः । टित्वात् स्त्रियां ङीप्, टटनोः स्वरे विशेषः । अत्र दसेत्यनिदितमपि केचित्पठन्ति । यदाह, पितेव पुत्रं दसये वचोभिरित्यत्र भट्टभास्करः । दसये संगृह्णामि । दंशनदर्शनयोः चौरादिक उदात्तेत्, व्यत्ययेन वृद्ध्यभाव इति । (दासीदासम्) । गवाश्वप्रभृतित्वादेकवद्भाव एकशेषाभावश्च ॥ १४१ ॥

डप डिप संघाते ॥ (डापयते । डेपयते) । डेपयतीति क्षेपे गतः ॥ १४२-१४३ ॥

तन्त्रि कुटुम्बधारणे ॥ (तन्त्रयते । तन्त्रति । तन्त्रम्) ॥ चान्द्राः कुटुम्बेति पृथग्धातुं पठित्वा कुटुम्बयतइत्याहुः ॥ १४४ ॥

मन्त्रि गुप्तभाषणे ॥ (मन्त्रयते ॥ मन्त्रयति) ॥ १४५ ॥

स्पश ग्रहसंश्लेषणयोः ॥ (स्पाशयते । अपस्पशत) । "अत्स्मृदृत्वर" इत्यादिनाऽभ्यासस्याकार इत्वापवादः । स्पशति । स्पशतइति स्पश बाधनस्पर्शयोरित्यस्य हि भ्वादेः ॥१४६

तर्ज भर्त्स सन्तर्जने ॥ (तर्जयते । भर्त्सयते) । तर्जयन्निव केतुभिरिति भौवादिकस्य तर्जयतेर्णिचि ॥ १४७-१४८ ॥

बस्त गन्ध अर्दने ॥ (बस्तयते, गन्धयते) ॥ १४९-१५० ॥

विष्क हिंसायाम् ॥ क्वचित्कोशे हिष्केति पठ्यते । (हिष्कयते) ॥ १५१ ॥

निष्क परिमाणे ॥ (निष्कयते । निष्कः) अच् । निष्केण क्रीतं (नैष्किकम्) "असमासे निष्कादिभ्य" इति क्रीताद्यर्थे ठक्, द्वाभ्यां निष्काभ्यां क्रीतम्, (द्विनैष्किकः द्विनिष्कम्) "द्वित्रिपूर्वान्निष्कात्" इति पक्षे प्राग्वतीयस्य ठको लुक् । एवं त्रिपूर्वस्यापि । "परिमाणा-

न्तस्य" इत्युत्तरपदवृद्धिर्लिंगभावे ॥ १९२ ॥

लल ईप्सायाम् ॥ (लालयते । अलीललत्) । कुं लालयतइति (कुलालः) । कर्मण्यण् । कुलालेन कृता (कौलालिका) । "कुलालादिभ्यो वुञ्" इति वुञ् ॥ १९३ ॥

कूण सङ्कोचने ॥ (कूणयते । कूणिः) । अन्ये तु कुणितिह्रस्वोपधं पठन्ति । वयन्तु कूणितादिदर्शनान्मैत्रेयाद्युक्तं दीर्घोपधत्वमेव बहुमन्यामहे । ह्रस्वोपधस्तु कथादौ भविष्यति । शब्दोपकरणयोः कुणतीति शे ॥ १९४ ॥

तूण पूरणे ॥ (तूणयते । तूणः । तूणीरः) । बाहुलकादीरन् ॥ १९५ ॥

भ्रूण आशायाम् ॥ (भ्रूणयते । भ्रूणः) ॥ १९६ ॥

शठ श्लाघायाम् ॥ (शाठयते) ॥ १९७ ॥

यक्ष पूजायाम् ॥ (यक्षयते) ॥ १९८ ॥

स्यम वितर्के ॥ (स्यामयते) । स्यमतीति शब्दार्थः शपि ॥ १९९ ॥

गूर उद्यमने ॥ (गूरयते) । क्वचिदयं लघूपध ईदिच्चेह पठ्यते । तदात्रेयमैत्रेयविरोधादुपेक्ष्यम् । चुरादौ दीर्घोपध इति भिदादावात्रेयः, दिवादौ च तेनायमर्थः स्फोरितः । मैत्रेयस्तु चुरादौ दीर्घोपधमनीदितं पठित्वा गूरयतइत्येवोदाजहार । तथा च दैवपुरुषकारयोरयमनीदिदीर्घोपधः ॥ १६० ॥

शम लक्ष आलोचने ॥ (शामयते । लक्षयते,) दर्शनाङ्कनयोर्लक्षयति, लक्षयते इति गतम् ॥ १६१-१६२ ॥

कुत्स अवक्षेपणे ॥ (कुत्सयते) । कुत्सेति णिदि कुत्सायामिति निर्देशादङि ॥ १६३ ॥

त्रुट छेदने ॥ (त्रोटयते) । अयं तुदादौ च । कुटेत्येकइति स्वामी ॥ १६४ ॥

गल श्रवणे ॥ (गालयते) । गलतीति शपि ॥ १६५ ॥

भल आभण्डने ॥ (भालयते) ॥ १६६ ॥

कूट आप्रदाने ॥ अवसादनइत्येके । (कूटयते) । अत्र पुरुषकारे कुट प्रतापनइत्यप्येकइति । मैत्रेयरक्षितयोः स एव तु पाठः प्रायेण दृश्यते । तदा कोटयते ॥ १६७ ॥

कुट्ट प्रतापने ॥ (कुट्टयते) इति क्षीरस्वामी । अयं कथादावपि । कुटतीति शे ॥ १६८ ॥

वञ्चु प्रलम्भने ॥ (वञ्चयते) । क्त्वायामिड्विकल्पार्थं णिजस्यानित्य इति वञ्चतीत्यपि भवति । (वञ्चित्वा । वचित्वा । वक्त्वा,) "वञ्चिलुञ्च्यृतश्च" इति सेटः क्त्वः कित्त्वविकल्पनात्पक्षे नलोपः । इडभावे तु नित्यम् । अत्र सूत्रे वञ्चु गताविति भौवादिकस्य चास्य ग्रहणमाह हरदत्तः । तत्र च तेन चौरादिक ऊदित्पठितः, तन्मते वलाद्यार्धधातुकमात्रे इड्विकल्पेन भाव्यं, पाठद्वयेऽपि निष्ठायां वक्तव्यं, "गृधिवञ्च्योः प्रलम्भन" इत्यत्र भौवादिकस्यैव ग्रहो नास्यः । आकुस्मीयत्वादेवाकर्त्रभिप्रायेऽपि तङः सिद्धत्वात् । पूर्वोत्तरयोगसाहचर्याद्गृधिसाहचर्याच्च कारितण्यन्तस्यैव वञ्चेस्तत्र ग्रहणस्य युक्तत्वाच्च, अतएव तत्र वृत्तौ वञ्चु गताविति भौवादिक एवोपात्तः । यदाप्ययं कारितण्यन्तस्तदापि प्रलम्भनार्थो न तु प्रलम्भनमिति नास्य तत्र ग्रहणप्रसङ्गः । आकुस्मीयनिबन्धनत्वं तत्र स्वार्थण्यन्तस्येति प्रागेवोक्तमिति स्वार्थण्यन्तादस्मात्कारितणौ वञ्चयति वञ्चयतइत्युभयं भवति । अत्र सुधाकरः ।

इन्द्रनीलदृषदः प्रथीयसीराश्रिताः कथममी जिघांसतः ।
उन्नतश्रवणबालनिस्वनाद्वञ्चयन्ति शरभान् करेणवः ॥

इति प्रयोगस्य चौरादिकोऽप्यात्मनेपदीत्युक्त्वा वञ्चयन्ति अन्यपथं गमयन्तीति प्रतीतेः प्रलम्भनाभावाच्च तङिति निर्वाहात्कारितण्यन्तादस्मादपि "गृधिवञ्च्योः" इति तङ भाव्यमिति न मन्तव्यम् । यतः कारितण्यन्तस्यात्र प्रयोज्यान्तराभावादर्थो न सङ्गच्छते । स्वार्थण्यन्तस्याकुस्मीयत्वात्तङ भाव्यमित्येव तस्याभिप्रायः । (वनीवञ्च्यते) । "नीग्वञ्चु" इत्यादिना नीगभ्यासस्य ॥ १६९ ॥

वृष शक्तिबन्धने ॥ शक्तिबन्धनं प्रजननसामर्थ्यमिति केशवस्वामी । शक्तिसम्बन्ध इति मैत्रेयः । (वर्षयते) । वर्षतीति वृष सेचन इत्यस्य शपि, वर्षतइति वर्ष स्नेहनइत्यस्य॥१७०॥

मद तृप्तियोगे ॥ एवं मैत्रेयादयः । अन्ने तृप्तिशोधनइति पठन्ति । यदाह क्षीरस्वामी तृप्तिशोधने तर्पणशुद्धाविति । (मादयते) । हर्षे माद्यतीति श्यनि । इदितस्तुत्यादौ शपि मन्दते ॥ १७१ ॥

दिवु परिकूजने ॥ (देवयते । परिदेवकः) "देविक्रुशोश्चोपसर्गे" इति ताच्छीलिको वुञ् । अत्र दिव्यतेर्ण्यन्तस्यास्य ग्रह इति हरदत्तः । सम्प्रदायादौ नानयोः । यदाह वृत्तिकारः । परिदेविर्भ्वादिर्गृह्यतइति । अत्र हरदत्तः । क्रीडाद्यर्थस्य हेतुमण्ण्यन्तस्य दिवु परिकूजनइत्यस्य चुरादिण्यन्तस्य ग्रहणं न भवति लाक्षणिकत्वाद्ण्यन्तैः साहचर्याच्चेति । अत्र मैत्रेयः वञ्चुप्रभृतिमुदितं पठति, स एवायं धातुरर्थान्तरे चुरादिरित्येवं बोधनार्थमिति, तन्मत ऊदित्त्वं प्रत्यभिज्ञानार्थत्वात् णिचो विकल्पाय न प्रकल्पते, प्रत्यभिज्ञामात्रएव फलेऽनुदित एव पठ्येरन् ॥ १७२ ॥

गृ विज्ञाने ॥ (गारयते) ॥ गिरतीति निगरणार्थस्य शे । गृणातीति शब्दार्थस्य श्नि । गरतीति ह्रस्वान्तस्य सेवनार्थस्य शपि ॥ १७३ ॥

विद चेतनाख्याननिवासेषु ॥ विदु चेतनइत्येके । विद चेतनाख्यानपरिवादेष्वित्यपरे । (वेदयते) ॥

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे ॥
विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेषु च क्रमात् ॥ १७४ ॥

मन स्तम्भे ॥ (मानयते) मन्यते ज्ञाने । अवबोधने मनुते ॥ १७५ ॥

यु जुगुप्सायाम् ॥ (यावयते) । युनाति च युनीते च बन्धने, यौतीति मिश्रणे ॥१७६॥

कुस्मनाम्नो वा ॥ कुस्ममिति दृष्टं 'कुस्मयतिरकारितमिति' कोर्नित्यसमासत्वादुपसर्गस्य च बाह्यत्वात् कारितमेव । कुत्सितस्मयनेऽस्य वृत्तिरिति मैत्रेयदुर्गादयः । (कुस्मयते) । नाम्नो वेत्यस्यायमर्थः । यद्वा कुस्मप्रातिपदिकात् तत्करोतीति णिचि कुस्मयतइति भविष्यति, कुस्मधातोरेवाभावात् कुतो नामायमनूद्यतेत्याह । कुस्ममिति दृष्टमिति । कुशब्दपूर्वात्स्मयतेः "अन्येष्वपि दृश्यत" इति डप्रत्यये "कुगतिप्रादयः" इति समासे समासत्वान्नाम प्रातिपदिकमिति लक्षणेन निर्णीतमित्यर्थः । ननु किमनेन प्रातिपदिकात्कारितात्, यतः कुपूर्वात्स्मयतेः कुस्मयतइति सिद्धमित्याह । कुस्मयतिरकारितमिति चेत्। कोर्नित्यसमासत्वादुपसर्गस्य च बाह्यत्वात् कारितमेवेति । कुपूर्वःस्मयतिरेव कुस्मयतइत्यत्र भविष्यति प्रकृतिः, तेनाकारितं कारिताभावोऽस्त्विति चेत्तन्न । कोऽत्र नित्यसमासत्वात्, यदि तिङन्तेन कोरन्वयः स्यात्, "कुगतिप्रादयः" इत्यत्राप्यतिङिति सम्बन्धात् समासो न स्यात्, ततश्च वाक्यत्वादैकपद्यं न स्यात्, पूर्वप्रयोगवत्परप्रयोगश्च स्यात्, तथा तदुपसर्गस्य बाह्यत्वात् प्रकुस्मयतइति स्मयतेः प्राक् प्रयोगः स्यात्, क्रियमाणे च कुस्मनाम्नइति कुशब्दादप्युपसर्गस्य बाह्यत्वस्येष्यमाणत्वात् न तिङन्तेन कोरन्वयः । यदि हि स्यात् "ते प्राग्धातोः" इति कुप्रस्मयतइति स्मयतेः प्राक् प्रयोगः स्यात् । क्रियमाणे च 'कुस्मनाम्नो वा' इत्यस्मिन्नेतत्करणसामार्थ्यान्न कुपदस्य स्मयतेर्नापि व्यवहितस्य प्रयोगः । उपसर्गस्य चेति चकारेणान्येऽपि दोषाः सूच्यन्ते, तत्र तावत्कुस्मयांचक्रुरिति आम् न स्यात्। चुकुस्मयिषतीत्यत्र कोर्द्धित्वं न स्यात्। अचुकुस्मयत इत्यत्र चङ् न स्यात्, अट् च कोःपरः स्यात्। कुस्मनेति युज् न स्यात्। कुस्मितिरिति च स्यात्, कुस्मयितेत्यादाविड् न स्यात्। कुस्मयित्वेत्यत्र ल्यप् स्यात्, क्विपि च णिसंयोगान्तलोपयोः सकारस्य च रुत्वे "र्वोः" इति दीर्घे कूरिति सिध्यति। तथा ण्वुलि णिलोपे कुस्मक इति सिद्ध्यति, अन्यदा कुस्मायक इति स्यात्। किं च कुस्मतीति न स्यात्, कुस्मायतइत्यादौ क्यङादयोऽपि न स्युः । एषां प्रातिपदिका-

दाचारे विधानादतो धात्वन्तरं प्रातिपदिकं वाऽऽश्रयणीयमिति । निगमयति । कारितमेवेति । ननु धातुपक्षे कथमाचारे क्विबादयः स्युः, सत्यम् । कारितान्ताद् णिचि णिलोपः, कुस्मप्रातिपदिकात् क्विबादयो भविष्यन्तीति न दोषः ॥ १७७ ॥

चर्च अध्ययने ॥ (चर्चयति) । चर्चतीति हिंसादौ गतम् । (चर्चा) । "चिन्तिपूजि" इत्यादिना युचोऽपवादोऽङ् । चिन्त्यादयः सर्वे चौरादिका गृह्यन्ते ॥ १७८ ॥

बुक्क भाषणे ॥ (बुक्कयति) । बुक्कतीति शपि । अत्र स्वामी । शब्द उपसर्गादाविष्कारे चेति पठित्वोपसर्गपूर्वाच्छब्द इत्यस्मादाविष्कारे चकाराद्भाषणे च णिचमुक्त्वा प्रतिशब्दयतीत्युदाहृत्य प्रतिश्रुतमाविष्करोतीत्यर्थ इत्याह । पुनश्चानुपसर्गाच्चेति पठित्वा आविष्कारे शब्दयतीत्याह । मैत्रेयस्तु द्वावेवात्राऽपठत् । शब्द शब्दक्रियायामिति पठित्वा शब्दयतीत्याह । अत्र पाठे प्रातिपदिकाद्धात्वर्थेइति णौ प्रतिशब्दयति शब्दयतीति वाविष्कारे सिद्धं, स्वामिपाठे तु शब्दकरणे शब्दयतीति न सिद्ध्यति, "शब्दवैर" इति क्यङा "तत्करोति" इति णिचो बाधात् । तस्मान्मैत्रेयपाठो ज्यायान् । येषां तु क्यङा न णिचो बाधस्तेषां न विशेषः । शब्दतीति शपि ॥ १७९ ॥

कण निमीलने ॥ (काणयति । अचीकणत् । अचकाणत्) । "काण्यादीनां वा" इति ह्रस्वविकल्पो णौ चङ्युपधायाः । (काणः) । स्वभावादयमेकनेत्रनिमीलनवचनः । कणतीति शब्दे ॥ १८० ॥

जभि नाशने ॥ (जम्भयति) । इदित्त्वाज्जम्भति । चन्द्रस्तु जम्भेति पठित्वा जम्भयतीत्युदाजहार । "रधिजभोरचि" इति नुमं मन्यते । अत्र मते नाशने न जम्भतीत्यस्ति । अयं चानिदित्पाठो न्यासकारहरदत्तादीनामनभिमतः । अन्यथा "रधिजभोरचि" इत्यत्र जभज्भीतिवदुमप्युपाददीरन् । जम्भतइति शपि जृम्भणे ॥ १८१ ॥

षूद क्षरणे ॥ के चिदाश्रवण इति पठन्ति । (सूदयति । असूषुदत्) । सूदत इति शपि ॥ १८२ ॥

जसु ताडने ॥ (जासयति चोरस्य) । "जासिनिप्रहण" इति कर्मणि शेषे षष्ठी । हिंसायां पठितस्यास्य पुनः पाठोऽर्थभेदात् । नहि ताडनं हिंसा, तज्जन्यत्वात्तस्याः । उदित्वादस्यापि णिज्विकल्पितः । तेन जसतीति भवति ॥ १८३ ॥

पश बन्धने ॥ (पाशयति) ॥ १८४ ॥

अम रोगे ॥ (चोरस्य आमयति । आमयतः) "रुजार्थानाम्" इति कर्मणि शेषे षष्ठी । "नान्ये मितोऽहेतौ" इति मित्त्वनिषेधः । (आमः) । घञि अचि वा णिलोपः । (आमयः । (आमक) इति ॥ १८५ ॥

चट स्फुट भेदने ॥ (चाटयति) । (स्फोटयति) । विकाशे स्फोटते इति शपि । स्फुटतीति शे ॥ १८६–१८७ ॥

घट संघाते ॥ (घाटयति) घट चेष्टायामित्यस्य घटते घटयते घण्टयतीत्यग्रे भाषार्थे भविष्यति ॥ १८८ ॥

हन्त्यर्थाश्च ॥ नवगणग्रामुक्ता अपि हन्त्यर्थाः स्वार्थे णिचं लभन्तइत्यर्थः । (घातयति) "हनस्त" इति तः ॥

दिवु मर्दने ॥ (देवयति) । उदित्त्वाद्देवतीत्यपि ॥ १८९ ॥

अर्ज प्रतियत्ने ॥ (अर्जयति) । द्रव्यमर्जयतीत्यादिप्रयोगदर्शनादयमर्थान्तरेऽपि ॥१९०॥

घुषिर् विशब्दने ॥ विशब्दनं प्रतिज्ञा । "घुषिरविशब्दने" इति सूत्रेऽविशब्दनइति निषेधाल्लिङ्गादनित्योऽस्य णिच् । "घुषिरविशब्दने" इत्यनेनाविशब्दने निष्ठाया इण्णिषिध्यते । शब्दार्थादेतस्मादनन्तरा निष्ठा नेति किं प्रतिषेधेन । इदञ्च घोषतावित्युक्तम् । मन्दबुद्ध्यनुपायेह स्मारितम् । एवं चेरित्त्वमघुषदघोषीदित्यत्र पक्षेऽर्थत्तेनावयवे चरितार्थमिति (अज-

घुषद्) इत्यत्र "णिश्री" इति चङ् न बाध्यते । (घोषयति । घोषति) । अवघुषितमिति, इट्-प्रतिषेधो भौवादिकस्येत्युक्तम् ॥ १९१ ॥

आङः क्रन्द सातत्ये ॥ अत्र काश्यपमैत्रेयौ, आङः परः क्रन्दः सातत्ये णिचमुत्पादयतीति । इदञ्च सातत्यं कुस्मयतेरनन्तरं मैत्रेयेणागणान्तात् धातूननूद्य पुनर्द्वितीयं परस्मैपदप्रकरणमधुनोच्यतइत्युक्तत्वादयमपि भौवादिकस्यानुवाद इति । तच्च क्रन्देर्योऽर्थ आह्वानादिस्तदपेक्षमिति बोद्धव्यम् । (आक्रन्दयति) । आक्रन्दतीत्याह्वानादौ शपि गतम् । वैक्लव्ये घटादौ । स्वामी तु आङ्पूर्वो घुषिः क्रन्द सातत्ये चुरादिः, आघोषयतीत्युक्त्वा मैत्रेयाद्युक्तमपरमाहुरित्याह ॥ १९२ ॥

लस शिल्पयोगे ॥ अत्र स्वामी शिल्पोपयोगइति पठित्वा केचिन्मूर्धन्यान्तं पठन्तीत्याह । (लासयति) श्लेषणक्रीडनयोर्लसतीति शपि ॥ १९३ ॥

तसि भूष अलङ्कारे ॥ (अवतंसयति । भूषयति) । भूषतीति शपि । तसेरिदित्त्वाण्णिचो विकल्पे (वतंसति) । 'वष्टि भागुरिरल्लोपम्' इत्यल्लोपः । दौर्गास्तु शप्यपि पेठुः, तसि भूष अलङ्कारइति । पुरुषकारे तूक्तमुभयत्रापि भूषैवेत्येव बहव इति ॥ १९४ ॥

मोक्ष असने ॥ (मोक्षयति शरान्) ॥ १९५ ॥

अर्ह पूजायाम् ॥ (अर्हयति अर्हान्) ॥ १९६ ॥

ज्ञा नियोगे ॥ अत्र नियोगः प्रेरणम् । स्वभावादयमाङ्पूर्वः । (आज्ञापयति) । मारणादौ ज्ञपयतीति गतम् । बोधने तु ज्ञपयति विज्ञापयतीत्युभयम् । इदं च घटादौ "ज्ञपमिच" इत्यत्र चोपपादितम् । श्नि जानातीति ॥ १९७ ॥

भज विश्राणने । (भाजयति) । भाज पृथक्कर्मणीति वक्ष्यमाणस्य भाजयति । भञ्जयतीति भाषार्थोऽग्रे । भजति, भजतइति शपि सेवायाम्, भनक्तीत्यामर्दने श्नमि ॥ १९८ ॥

श्रधु प्रसहने ॥ (शर्धयति । अशशर्धत् । अशश्रधत्) । उदित्त्वाच्छर्धतीत्यत्रापि भवति । (श्रधित्वा । श्रद्धा) । शर्धत इति शपि, शब्दकुत्सायां तुदादिः, उन्दने हि शपि शर्धतीति च ॥ १९९ ॥

यत निकारोपस्कारयोरिति मैत्रेयः ॥ क्रियानिघण्टौ तु 'यतने प्रैषे निराकारे पातयेदप्युपस्कृतौ' इति । क्षीरस्वामी तु निराकारोपसंस्कारयोरिति तु पाठो दृश्यते, निराकारः परिभव इति चाह । (यातयति) । निसश्च धान्यधनयोः प्रतिस्तदर्थत्वे सतीत्यर्थद्वयमाह । एवं च भुवो विकल्कनइति पाठस्य संवादत्वेनोक्तमवकल्पयतीति धनपालोदाहरणं भुवोऽवकल्कनइति पाठेऽप्युपपद्यते ॥ २०० ॥

रक लग आस्वादने ॥ (राकयति । लागयति) । रघ लग इत्येकइति मैत्रेयः । (राघयति । लागयति) अपरे त्वाद्यमपि रगेति तृतीयान्तं पठन्ति । (रागयति) । लगयतीति शङ्कायां संगे च घटादिः ॥ २०१-२०२ ॥

अञ्चु विशेषणे ॥ विशेषणं व्यावर्तनम् । उदित्त्वाद्विभाषितो णिच् । (अञ्चयति । अञ्चति) । गतिपूजनयोरञ्चतीति भ्वादौ, गतियाचनयोरञ्चतइत्यपि ॥ २०३ ॥

लिगि चित्रीकरणे ॥ (लिङ्गयति । लिङ्गति) । गतौ च शपि लिङ्गति ॥ २०४ ॥

मुद संसर्गे ॥ (मोदयति सक्तून् घृतेन) । मोदते शपि हर्षणे ॥ २०५ ॥

त्रस धारणे ॥ ग्रहण इति नन्दी । अत्र धारणं वारणमिति मैत्रेयः । ।वारण इत्येव शाकटायनः । (त्रासयति मृगान्) । त्रंसयतीति भाषणे भविष्यति । त्रस्यति त्रसतीति दिवादावुद्वेगे ॥ २०६ ॥

उध्रस उञ्छे ॥ क्रैयादिकस्योकार इत् । अस्य तु धातोरवयव इति काश्यपादिः । मैत्रेयस्तु पूर्व एवायं धातुरिह पठ्यते, तेनायमुदिदिति । अन्ये तूभयत्रापि धात्ववयव उकार इति । ध्रासयतीति मैत्रेयमते । अन्येषामुध्रासयतीति ॥ २०७ ॥

मुच प्रमोचने मोदने च ॥ (ऋणं निर्मोचयति)। प्रतिददातीत्यर्थः । मुञ्चतीति कल्कने शपि, शे तु मुञ्चतीति मोक्षणे ॥ २०८ ॥

वस स्नेहनच्छेदापहरणेषु ॥ छेदोपहरणयोरित्येके । (वासयति)। अयं निवासे कथादिर्भूवादिश्च, वस्त इत्याच्छादने । वस्यतीति स्तम्भने । वास उपसेवायामिति दीर्घोपधश्च कथादौ ॥ २०९ ॥

चर संशये ।। (चारयति) चरतीति गतौ शपि ।। २१० ।।

च्यु हसने ॥ सहने चेत्येके, (च्यावयति)। च्यवते इति गतौ शपि, च्युसेत्येक इति स्वामी । च्योसयति ॥ २११ ॥

भुवो ऽवकल्कने ॥ अवकल्कनं मिश्रीकरणमिति (१)स्वामी । पुरुषकारे अवकल्कनं चिन्तनमिति काश्यपः । क्वचित्स्वामिग्रन्थे ऽनुकल्कनमिति पठित्वा ऽनुकल्कनं मिश्रीकरणमिति दृश्यते, नन्दी तु भुवो विकल्कन इति, विकल्कनं विपाचनम् । तथा च प्रयुज्यते । तपोभावितमात्मानमिति, अवकल्कन इत्यपरे । तथा च धनपालः, क्रृपेस्तादर्थ्यइति पठित्वा ऽवकल्पयतीत्युदाजहार । तादर्थ्ये इति भुव इति पूर्वधातोर्योऽर्थस्तदर्थत्वे सतीत्यर्थः । (भावयति) । भावयत इति प्राप्तौ युजादिः भवतीति शपि ॥ २१२ ॥

क्लृपेश्च ॥ (कल्पयति)। सामर्थ्ये शपि कल्पते । क्षीरस्वामी तु क्रृपेस्तादर्थ्ये इति पठित्वा तादर्थ्ये प्रस्तुतस्य भुवोऽर्थे मिश्रीकरणे । अथ वा तच्छब्देन क्रृपिः परामृश्यते, तस्य योऽर्थः सामर्थ्यलक्षणः ॥ २१३ ॥

आ स्वदः सकर्मकात् ॥ अत्रान्ये स्वाद इति दीर्घोपधं पठन्तो वक्ष्यमाणं स्वद आस्वादने इति धातुमपि दीर्घोपधं पठन्ति । आ कुस्मादितिवदभिविधावयमाकारः । तेन ग्रसिप्रभृतीभ्यः ष्वद आस्वादनइति वक्ष्यमाणपर्यन्तेभ्यः सकर्मकेभ्य एव णिज् भवति । इदं च सकर्मकत्ववचनं कर्मसापेक्षक्रियामात्रवाचित्वेनाप्रयुज्यमानेऽपि कर्मण्ययं विधिर्भवति । अत एव हि मैत्रेयः । सम्भविकर्मकाण्णिजित्याह । उक्तं च पुरुषकारे सम्भविकर्मकत्वकथनेन सत्यसति वा कर्मणः प्रयोगे तत्सम्भवमात्रेण णिज् भवतीत्युक्तं भवति । कर्मसम्भवः पुनरनेकार्थत्वेनार्थान्तरवाचितायां यथा प्रयोगं द्रष्टव्य इति च । कर्मकर्तृविषयेऽप्यर्थान्तरवृत्तित्वं समानमिति न तस्येह पृथग्विषयत्वेनेहोपादानम् । अत्र केचित्पञ्चमीप्रकरणाभ्यां सन्निहितेन णिचा ऽर्थप्राप्तमेवकारं सम्बन्धयन्तः सकर्मकाण्णिजेव भवति अकर्मकात्तु यथायोगमित्याहुः । तदसत् । एवकारस्य सकर्मकादितिश्रुतेनान्वयलाभे ऽश्रुतेनान्वयायोगात् । अनेन खल्वभिप्रायेण मैत्रेयादयः सकर्मकादेवेत्येवं व्याख्यन् । अत्र मतान्तरमप्याह मैत्रेयः । आ स्वाद एव सकर्मकादित्येक इति । तथा च क्षीरस्वामी । आङ्पूर्वात्स्वदेः सकर्मकाण्णिज् भवतीति । अयं पक्षः पुरुषकारे दूषितः । तत्र चाभिविधिपक्ष एव युक्तः प्रत्यवभासते । इहाप्याङः पूर्वापरेष्विवाभिविध्यर्थताया एवौचित्यादाकुस्मादिति हि पूर्वत्राभिविधावाङ् दृष्टः, "आ धृषाद्वा" इत्यागर्वादिति च समनन्तरमेवैवं द्रक्ष्यते, तत्रायमपि तन्मध्यपातीतच्छायश्चाङ् तदर्थ एव व्यक्तमवभासते ॥ तदत्र पक्षान्तरं व्याचक्षाणानामाशयश्चिन्त्य इति ॥

ग्रस ग्रहणे ॥ (ग्रासयति फलम्)। ग्रसत इत्यदने शपि ॥ २१४ ॥

पुष धारणे ॥ (पोषयति) आभरणम् । पोषति, पुष्यति, पुष्णाति, इति शप्श्यन्श्नासु पुष्टौ ॥ २१५ ॥

दल विदारणे ॥ (दालयति)। दलतीति विशरणे घटादौ ॥ २१६ ॥

पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि बृहि बर्ह बल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः॥ मैत्रेया-

(१) क्षीरेत्यधिकं पुस्तकान्तरे ।

नुरोधेनायं पाठो दण्डकस्य। भासार्थो इत्येक इति मैत्रेयः। तथा च क्षीरस्वामी। भासा दिशिरर्थो येषान्ते भासार्था इति । (पाटयति) । पटयतीति कथादौ ग्रन्थे । पटतीति गतौ शपि । (पोटयति)। पुटयतीति संसर्गे कथादौ । संसर्गे पुटतीति शे । (लोटयति)। शप्श्यनोर्लोटति लुट्यतीति लोटने । लोटतइति युजादौ प्रतिघाते, लुण्टतीति लुटि स्तेये शपि। लुण्टयतीतीहैव गतः । (तुञ्जयति) । इदित्त्वात्तुञ्जतीति । हिंसायामिदितोऽनिदितश्च तुञ्जति तोजतीति शपि । (मिञ्जयति । मिञ्जति) । (पिञ्जयति । पिञ्जति) । अदादौ वर्णे पिङ्क्ते । (लुञ्जयति । भञ्जयति) । भजतीति भज सेवायां शपि । भनक्तीत्यामर्दने श्नमि, भाजयतीति विश्राणने गतः । पृथक्कर्मणि च भविष्यति । (लङ्घयति) । लङ्घति, शोषणे शपि लङ्घति, गत्यान्तु लङ्घते । (त्रंसयति । त्रंसति) । त्रासयतीति धारणे गतम् । त्रस्यति त्रसतीति उद्वेगे वा श्यनि । (पिंसयति । पिंसति) । पेसयतीति गतौ गतम् । पेसतीति तु शपि । (कुंसयति । कुंसति । भ्रुकुंसः) । स्त्रीवेशधारित्त्वाद् भ्रुवा कुंसयति पुरुषत्त्वमिति भ्रुकुंसः । (दंशयति । दंशति) । दशतीति दंशने शपि । (कुंशयति । कुंशति) । (घाटयति,) अयं सङ्घातेऽपि, अतः पुनः पाठो ऽर्थभेदादिति मैत्रेयः । घटत इति घटादौ चेष्टायाम् । (घण्टयति घण्टति । घण्टा) । (बृंहयति । बृंहति) । वर्हतीत्यनिदितो बृंहेः शपि वृद्धौ, इदितस्तु बृंहतीति शब्दे च । (वर्हयति, वल्हयति) । वर्हते वल्हत इति प्राधान्ये शपि । (गोपयति । धूपयति) । सन्तापे शपि, रक्षणसन्तापयोः (गोपायति । धूपायति) इति, गुप्यतीति व्याकुलत्त्वे श्यनि, सन्तापे धुपतीति शे, (विच्छयति) । विच्छायय-तीति शे गतौ । (चीवयति । पोथयति) । हिंसायां पुथ्यतीति श्यनि । पुन्थतीति शपि संक्लेशे । (लोकयति । अलुलोकत् । लोचयति । अलुलोचत्,) ऋदित्त्वान्नाग्लोपीतिह्रस्वनिषेधः । लोचते । लोकते इति दर्शने शपि । (नादयति) । नदतीति शपि शब्दे । (कोपयति) । कुप्यतीति कोपे श्यनि । (तर्कयति) । ऊहेऽप्ययमभिधीयत इति मैत्रेयः । (वर्तयति । वर्धयति) । उदित्वाद्वर्तति वर्धतीति च, वर्तते वर्धते इति वर्तनवृद्ध्योः शपि । वृत्यत इति विचारणे श्यनि ॥ २४७ ॥

रुठ लजि अजि दसि भृशि कशि रुसि शीक नट पुटि जुचि रघि अहि रहि महि इत्येते पञ्चदश स्वामिकाश्यपानुसारेण लिख्यन्ते ॥ (रोठयति,) स्तेये शपि रुण्ठति । प्रतिघाते द्युतादौ रोठते। (लञ्जयति । लञ्जति) । लजति । लञ्जति भर्जने शपि, लाजति लाञ्जति भर्त्सने शपि, लजते इति व्रीडे तुदादौ, प्राकाशे लञ्जयतीति कथादौ। (अञ्जयति । अञ्जति) । अनक्तीति श्नमि व्यक्त्यादौ । (दंसयति । दंसति । भृंशयति । भृंशति,) भर्शति भृश्यतीति शप्श्यनोरधः पतने । (रुंशयति । रुंशति । रुंसयति । रुंसति, शीकयति । शीकति) । शीकत इति सेचने शपि, (नाटयति) । अयमवस्यन्दने गतः । नटतीति नृत्तौ घटादिः (पुण्टयति) । परिवर्तने शपि पोटते । (जुञ्चयति । जुञ्चति। रंघयति)। रङ्घति, गतौ शपि च रङ्घति। (अंहयति । अंहति) । अंहतइति गतौ शपि । (रंहयति । रंहति) । रहयतीति त्यागे कथादौ भविष्यति । मित्प्रकरणे च गतः, रंहति रहतीति गतित्यागयोः शपि, (मंहयति मंहति) । महयतीति कथादौ पूजायाम्, महतीति शपि । मंहत इति वृद्धौ । महीयत इति कण्ड्वादौ ॥ भसिपिसिलडितृहितुडिनडीत्यन्ये पठन्तीति स्वामी । तत्राद्यौ बृहिश्च मैत्रेयानुरोधेनास्माभिर्दण्डके पठिताः । (लण्डयति । लण्डति) । लाडयतीत्युपसेवायां गतम् । विलासे लडतीति शपि । (तोडयति) । तोडति तुण्डत इति शपि तोडने तुडतीति शे । (नाडयति) । नडतीति गतौ शपि ॥ २६२ ॥

पूरी आप्यायने ॥ (पूरयति) । ईदित्वान्निष्ठायामनिडर्थादस्यापि णिज्विकल्पितः । तेन पूरयति । पूर्यते इति श्यनि ॥ २६३ ॥

रुज हिंसायाम् ॥ (रोजयति) । रुजतीति शे भङ्क्ते ॥ २६४ ॥

स्वद आस्वादने ॥ स्वाद इत्येके । संवरण इति क्षीरस्वामिधनपालशाकटायनाः । (स्वादयति । असिष्वदत्) । "सः स्विदि" इति सत्वं ण्यन्तात्सनि । स्वादते स्वदते इति शपि । आस्वदीयाः ॥ २६६ ॥

आ धृषाद्वा ॥ धृष प्रसहन इति वक्ष्यमाणसहिता विभाषितणिचो वेदितव्याः । आकुस्मादितिवदभिविधावाङ् ॥

युज पृच संयमने ॥ (योजयति । पर्चयति) । अन्यत्र योजति । (पर्चति, योक्ता, अयौक्षीत्) त्यजियुजिरुजीत्यनिट्कारिकापाठादनिट्कः । (पर्चिता । अपर्चीत्) । युनक्ति युङ्क्ते योगार्थे श्नमि, श्यनि युज्यत इति समाधौ, पृणक्ति सम्पर्के श्नमि, पृक्ते इति लुकि ॥२६७॥

अर्च पूजायाम् ॥ (अर्चयति) । अर्चतीति भौवादिकेन स्वरितेता ऽर्चिनैव सिद्धे णिज्विकल्पनं कर्तृगामिफले अर्चतीति यथा स्यादिति । शाकटायनस्त्वयमात्मनेपदीति तन्मते णिज्विकल्पस्य फलमकर्त्रभिप्रायेऽपि तङ्सिद्धिरिति बोद्धव्यम् ॥ २६८ ॥

षह मर्षणे ॥ (साहयति) । सहति सहत इति शप्यनुदात्तेत् । अस्येह पाठो वृत्तिकारादीनामनभिमत इति दिवादावेवावोचाम ॥ २६९ ॥

ईर क्षेपे ॥ (ईरयति, ईरति,) लुकीर्ते गतिकम्पनयोः ॥ २७० ॥

ली द्रवीकरणे ॥ (लाययति । लयति । लेता) । श्विडीङ्विर्णोंष्वथशीञ्श्रिजावपीत्येते एवेवर्णान्तेषु सेट इति नियमान्नेट् । "विभाषा लीयतेः" इत्यात्त्वविकल्पमस्यापीच्छन्मैत्रेयो "लीलोर्नुग्लुकौ" इत्यात्त्वपक्षे लुको विकल्पनाल्लुकं चोदाजहार, अनात्त्वे तु नुक्, तदभावे वृद्ध्यायौ च । तद्युक्तम् । आत्त्वे लीनातिलीयत्योर्यका निर्देष इति भाष्ये उक्तत्वादस्यात्त्वाभावात् । पुरुषकारेऽप्युक्तं देवेनास्यात्त्वे लुगादि प्रदर्शनं मैत्रेयविस्रम्भादयुक्तंचेदं भाष्यविरोधित्वादिति । श्लेषणे श्यनि लीयते । लिनातीति श्नि ॥ २७१ ॥

वृजी वर्जने ॥ (वर्जयति । वर्जिता) । ईदित्त्वं निष्ठायामनिडर्थं, वृक्तइति वृङ्क्ते वृक्तीति लुक्श्नमोः ॥ २७२ ॥

वृञ् आवरणे ॥ (वारयति । वरति । वरते । वरिता । वरीता,) इटो दीर्घविकल्पः । आत्मनेपदेषु लिङ्सिचोः सनि च "लिङ्सिचोरात्मनेपदेषु" "इट् सनि वा" इतीड्विकल्पः । लिङि परस्मैपदपरे सिचि च "न लिङि" "सिचि च परस्मैपदेषु" इतीटो दीर्घाभावश्च वृञ्वन्नेयः । ञित्त्वादुभयपदित्त्वम् । वृणोति वृणुत इति श्नौ । वृणीते इति सम्भक्तौ श्नि ॥ २७३ ॥

जॄ वयोहानौ ॥ (जारयति । जरति । जरिता । जरीता) । "वृतो वा" इत्यादि । जीर्यते जृणातिवत् । ज्रि इति नन्दी । ज्राययति ज्रयति । क्रैयादिकोऽप्येवमिति सः, ज्रिणाति २७४

रिच वियोजनसम्पर्चनयोः ॥ (रेचयति । रेचति । रेक्ता) । अनिट्कारिकापाठादनिट्त्वम् । विरेचने रिङ्क्ते रिणक्तीति श्नमि ॥ २७५ ॥

शिष असर्वोपयोगे ॥ (शेषयति । शेषति । शेष्टा) । शिषिम्पिषिमित्यनिट्कारिकासु पाठादनिट्त्वम् । अत एव लुङ्यशिक्षदिति क्सो भवति । लुङ्यङोऽभावादशैषीदिति देवेन यदुक्तं तदस्यानिट्त्वादयुक्तमिति पुरुषकार एव दूषितम् । शिनष्टीति विशेषणे श्नमि । विपूर्वोऽतिशये । (विशेषयति । विशेषति) ॥ २७६ ॥

तप दाहे ॥ (तापयति । तप्ता) । तपिं तिपिमिमितिवचनादनिट्त्वम् । तपतीति शपि सन्तापे । तपते तपतीत्यैश्वर्ये ॥ २७७ ॥

तृप तृप्तौ ॥ संदीपन इति क्षीरस्वामी । (तर्पयति । तर्पति । तर्पिता) । अनिट्कारिकायां तृप्यतीति श्यना निर्देशान्नास्यानिट्त्वम् । तृपति तृम्पतीति शे । तृप्यतीति श्यनि । अस्य स्वादौ पाठो वृत्तिकारादीनामनभिमत इत्यवोचाम ॥ २७८ ॥

छृदी संदीपने ॥ (छर्दयति ॥ छर्दति । छर्दिता । छर्दिष्यति) । "सेसिच" इतीड्विकल्पः कृतादिसाहचर्याद्रौधादिकस्य, अत एवायं निष्ठायामनिडर्थमीदित्पठ्यते । (छृण्णः। छृण्णवान्)

इति । छृन्ते छृणत्तीति दीप्तिदेवनयोः श्नमि । धनपालशाकटायनौ तु छृदेत्यनिदितं पेठतुः । तत्र निष्ठायां छर्दितमिति फले भेदः । क्षीरस्वामिनस्तु पान्तोऽयं, यदाहुः, चृप छृप तृप दृप संदीपने । संदीपनक्रियायां चृपादयश्चत्वारो वर्तन्त इति । (चर्पयति । छर्पयति । तर्पयति दर्पयति) ॥ १७९ ॥

दभी भये ॥ (दर्भयति । दर्भिता । दब्धः) । ईदित्त्वादनिट्त्वम् ॥ २८० ॥

दभ सन्दर्भे ॥ अस्यानीदित्वान्निष्ठायामपि सेट्त्वं विशेषः । अमुं बहवो न पठन्तीति पुरुषकारे । अस्माभिस्तु देवमैत्रेयानुसारेण पठितः । तुदादेरीदितो ग्रन्थने दभतीति ॥२८१॥

श्रथ मोक्षणे ॥ हिंसायामित्यपर इति पुरुषकारे । (श्राथयति । श्रथति) । श्राथयतीति प्रयत्नेऽपि गतः श्रथयतीति कथादौ दौर्बल्ये ॥ २८२ ॥

मी गतौ ॥ माययति । मयति । मेता) । शिवडीङ्विर्णेष्वथ शीङ्श्रित्रावपीति नियमान्नेडागमः । "सनि मीमा" इत्यत्र चौरादिकैः साहचर्यात्तादृश एव गृह्यत इति मिमीषतीत्यत्रायमिस्भावो न भवति । मीञो मिनाति मीनोते हिंसायाम् । मीयते ङितः, मिनोति मिनुते स्वादौ ह्रस्वान्तस्य ॥ २८३ ॥

ग्रन्थ बन्धने ॥ (ग्रन्थयति । ग्रन्थति) । अत्र देवमैत्रेयौ क्रथ हिंसायामिति स्वरितेतं पठित्वा (क्राथयति । क्रथति । क्रथत) इत्याहतुः । शाकटायनस्तु परस्मैपदीति, जासिनीत्यत्र क्राथेति निपातनाद्वृद्धिरित्युक्तत्वाद्वृत्तिकारादीनामनभिमतश्चुरादौ पाठ इति घटादौ क्रथतीत्यत्रावोचाम ॥ २८४ ॥

शीक मर्षणे ॥ (शीकयति । शीकति ।शीकिता) । सेचने शपि शीकते ॥ २८५ ॥

चीक च ॥ (चीकयति । चीकति । चीकिता) ॥ २८६ ॥

अर्द हिंसायाम् ॥ (अर्दयति । अर्दति । अर्दते) । अयं स्वरितेदिति देवमैत्रेयौ । आत्मनेपदीति शाकटायनः । गतियाचनयोरर्दतीति शपि ॥ २८७ ॥

हिसि हिंसायाम् ॥ (हिंसयति । हिंसति) । इदित्त्वादेव णिज्विकल्पः सिद्ध इति युजादिपाठे प्रयोजनं चिन्त्यम् । हिनस्तीति श्नमि ॥ २८८ ॥

आङः षदः पद्यर्थे ॥ पद्यर्थो गतिः । (आसादयति । आसीदत्) इति शपि सीदादेशः । (आसत्ता । आसात्सीत्) । 'शदिं सदिं स्विद्यतिपद्यतिखिद्यतीन्' इत्यनीट्कारिकायां पाठादनिट्त्वं, विसरणार्थकस्य ज्वलादिकस्य तौदादिकस्य च ऌदित्त्वादङ् । (आसदत्) इति ॥२८९॥

शुन्ध शौचकर्मणि ॥ (शुन्धयति । शुन्धति । शुन्धिता) । शुन्धतीति शपि शुद्धावकर्मकः ॥ २९० ॥

छद अपवारणे ॥ स्वरितेदिति मैत्रेयदेवौ ॥ परस्मैपदीति शाकटायनः । (छादयति । छदति । छदते) छदयतीत्यूर्जने घटादौ । छन्दयतीतीहैव संवरणे गतः ॥ २९१ ॥

जुष परितर्कणे ॥ परितर्कणमूहो हिंसा वा, परीतर्पणे परितृप्तिक्रियायामिति क्षीरस्वामी । (जोषयति । जोषति) । प्रीतिसेवनयोर्जुषतइति तुदादौ ॥ २९२ ॥

धूञ् कम्पने ॥ (धूनयति । धवयति । धवते) । [धूञ्प्रीञोर्नुग्वक्तव्यः] इति नुक् । धूञ्प्रीणोरिति हरदत्तकौमारादीनां पाठः । तन्मते प्रीणातिसाहचर्यात् धूञोऽपि क्रैयादिकस्यैवा नुका भाव्यम् । अत एवात्र मैत्रेयो धावतीत्युदाजहार । एवञ्च स्वादौ दीर्घवादीनामपि धावतीति भवति । (धुनाति धुनीते) इति क्र्यादौ । धुनोति धुनुत इति स्वादौ । धूनोति धूनुते इति च तत्रैव विधूनने, धुवतीति कुटादिः ॥ २९३ ॥

प्रीञ् तर्पणे ॥ अत्र केचन धातुवृत्तिकाराः [धूञ्प्रीञोर्नुग्वक्तव्यः] इति पठन्तः प्रीणयतीत्युदाहरन्ति । हरदत्तस्तु धूञ्प्रीणोरिति श्नानुकरणाद्दैवादिकस्य नेत्याह । दैवादिकग्रहणेनात्र चौरादिकोऽप्युपलक्षयितव्य इति पुरुषकारे । तन्मते प्राययतीति भाव्यम् । मैत्रेयोऽप्यनेनैवाभिप्रायेण प्राययतीत्युदाजहार ॥ २९४ ॥

श्रन्थ ग्रन्थ सन्दर्भे ॥ (श्रन्थयति । ग्रन्थयति । श्रन्थति । ग्रन्थति)। "णिश्रन्थिग्रन्थि" इति' वचनात् ग्रन्थयते स्वयमेवेति भवति । श्रथ्नाति ग्रथ्नातीति श्नि, श्रथ्नते ग्रन्थतइति शैथिल्यकौटिल्ययोः शपि ॥ २९६ ॥

आप्लृ लम्भने ॥ (आपयति)। लृदित्त्वादङि (आपत्। आप्ता)। 'तर्पितिपिम्' इतिकारिकापाठादनिट्त्त्वम्। मैत्रेयेणापयतइत्यात्मनेपदमपि दर्शितम्। अन्ये तु नैतन्मृष्यन्ति।२९७

तनु श्रद्धोपकरणयोः ॥ उपसर्गाच्च दैर्घ्यें। (तानयति। वितानयति। तनति। वितनति) तनुतइति विस्तारे। अत्र क्वचित् चन श्रद्धोपहिंसनयोरिति पठ्यते। (चानयति। चनति। चनयति) इति घटादौ ॥ २९८ ॥

वद सन्देशवचने ॥ स्वरितेत्, शाकटायनस्य त्वात्मनेपदी। (वादयति। वदति। वदते)। व्यक्तवाचि शपि वदति ॥ २९९ ॥

वच परिभाषणे ॥ (वाचयति। वचति। वक्ता। अवाक्षीत्)। अङ्विधौ वक्तीति लुग्विकरणस्य निर्देशान्नास्य ग्रहः। 'पचि वचिम्' इति पाठादनिट्त्वम्। पारायणेऽयं नाधीयते ॥ ३०० ॥

मान पूजायाम् ॥ (मानयति। मानति। मानिता)। "मानूबध" इत्यत्र नह्येतेभ्यः प्राक् सन आत्मनेपदं नापि परस्मैपदं पश्याम इति भाष्यं भौवादिकस्य विचारणार्थस्यैव नित्यसन्नन्तत्त्वं प्रतिपादयतीत्यस्माल्लुडाद्युत्पत्तिः। स्तम्भे मानयतइत्याकुस्मीयः। मन्यते मनुते इति दिवादौ तनादौ च ॥ ३०१ ॥

भू प्राप्तौ आत्मनेपदी वा ॥ अयं प्राप्तौ वा णिचमुत्पादयति आत्मनेपदि चेत्यर्थः। अत्र केचिदात्मनेपदं णिच्सन्नियोगेनैव तेनान्यदा नेति। मैत्रेयस्त्वाकुस्मीयप्रकरणे भूप्राप्तौ वेति लघुनैव न्यासेन णिच्यात्मनेपदे वाग्रहणाण्णिचो विकल्पे च सिद्धे पुनरिह पठित्वात्मनेपदीति वचनाण्णिजभावे आत्मनेपदमित्याह। इदम्पुरुषकारे दूषितम्। आकुस्मीयकाण्डे भू प्राप्तौ वेति पठ्यमाने अनन्तरप्रकृतस्यात्मनेपदीतिवचनस्य विकल्पः स्यान्न पुनरप्रकृतस्य णिच इति ण्यभावे परस्मैपदमुदाहरन्तौ धनपालशाकटायनावप्यत्रैवानुकूलाविति चोक्तम्। तथा भूसूत्रे सुधाकरोऽपि भवत इति प्रस्तुत्य वात्मनेपदं मैत्रेयोक्तेन कारणेन समर्थनाण्णिच्सन्नियोगेनात्मनेपदित्वादसाधनम्। अत एव 'सुराष्ट्रमभवत्' इत्यादि प्रयुज्यत इत्याह। अन्ये तु पुराणव्याकरणेषु "भुवो णिङ्"इति सूत्रस्य णिङो ङकारः प्रत्ययान्तादात्मनेपदार्थः, प्रकृते तु केवलादिति श्रीभद्रादिभिर्व्याख्यानात्तन्त्रान्तरवचनानुरोधेन सन्नियोगन्यायो बाध्यत इति, तथा च "वर्षाभ्वश्च" इत्यत्र कैयटेन वर्षासु भवति वर्षासु भवतइत्यात्मनेपदं दर्शितम्। (भावयते, । भवते। भविता) ॥ ३०२ ॥

गर्ह निन्दायाम् ॥ (गर्हयति। गर्हति)। गर्हतइति शपि ॥ ३०३ ॥

मार्ग अन्वेषणे ॥ (मार्गयति। मार्गिता। मार्गणः) इति चानशि। मृगयत इति कथादौ ॥ ३०४ ॥

कठि शोके ॥ (कण्ठयति। कण्ठति। कण्ठिता)। कण्ठतइति शपि। कठतीति तु कृच्छ्रजीवने। कठिः प्रायेणोत्पूर्वं उत्कण्ठायाम् ॥ ३०५ ॥

मृजू शौचालङ्करणयोः ॥ (मार्जयति। मार्जति। मार्जिता। मार्ष्टा)। ऊदित्त्वादिड्विकल्पः। निष्ठायाम्, (मृष्टः)। वृद्ध्यादि मार्ष्टिवत्। मार्जयति शब्दे गतः ॥ ३०६ ॥

मृष तितिक्षायाम् ॥ पुरुषकारेणायं स्वरितेदित्युक्त्वा शाकटायनो यमात्मनेपदीत्युक्तम्। (मर्षयति मर्षति)। (मर्षते। मृष्यति। मृष्यतः) इतिदिवादौ सेचने।शपि मर्षति ॥३०७॥

धृष प्रसहने ॥ आदित् शाकटायनस्य, (धर्षयति, धर्षिता, धृषिता)। शाकटायनस्य तु धृष्टः। धृष्णोतीति श्नौ आधृषीयः। एषु पशबन्धनइति केचित्पठन्ति, तदुक्तं मैत्रेयेण, पशबन्धनइति युजादावित्ति ॥ ३०८ ॥

कथ वाक्यप्रबन्धे ॥ (कथयति) । एतदादयोऽदन्ताः । तत्फलञ्च, कथयतीत्यादौ अल्लोपस्य स्थानिवद्भावाद्यथायोगं वृद्धिगुणयोरभावः । तथाऽचकथदित्यत्र "सन्वल्लघुनि" इत्यस्य "दीर्घो लघोः" इति दीर्घस्य चानग्लोपइति निषेधः। अन्यदपि प्रयोजनं तत्र तत्र वक्ष्यते॥३०९॥

वर ईप्सायाम् ॥ (वरयति) । वारयतीति वृतः ॥ ३१० ॥

गण संख्याने । (गणयति । अजीगणत्) । "ई च गण" इति णौ चङि ईत्वात्वे । इह संख्यानं नाम संख्यानिमित्तं ज्ञानविशेषो भागशोऽवस्थापनं च, तत्राद्योरर्थः कर्तृस्थो भाव इति न कर्मकर्ताऽस्ति, तत्र इतरत्र कर्मस्थभावकत्वाद्गणयते गणः स्वयमेवेति भवति, भागशोऽवस्थाप्यमानो गणस्तत्रानुकूलत्वात्स्वयमेव भागशोऽवतिष्ठत इत्यर्थः । अवस्थानं हि कर्मस्थो भावः । यक्चिणौ तु "णिश्रन्थिग्रन्थि" इति न भवतः । एवं च "णेरणौ" इत्यत्र गण्यति गणः स्वयमेवेति वृत्तिस्थस्य गणयते गणः स्वयमेवेति भाष्यस्थस्य चोदाहरणस्य विरोधोऽपि न भवति । (गणिका) । ण्वुलि "प्रत्ययस्थात्"इतीत्वम् । गणिकानां समूहो (गाणिक्यम्) । [गणिकायाश्चेति वक्तव्यम्] इति यञ् ॥ ३११ ॥

शठ श्वठ सम्यगवभाषणे ॥ अभाषणइति केचित् । (शठयति । श्वठयति) । शाठयति, श्वाठयतीति गत्यादौ गतं, शाटयतइति श्लाघायामाकुस्मीयः । शटतीति कैतवादौ शपि ।३१३।

पट वट ग्रन्थे ॥ वट वेष्टनइति क्षीरस्वामी । (पटयति) । पाटयतीति भाषार्थे गतः । पटतीति गतौ शपि । वेष्टने शपि वटति, तस्य कारिते वाटयति । वटयतीति परिभाषणे घटादिः, ओष्ठ्यादिं बहवः पठन्तीति तत्रैवोक्तम् ॥ ३१९ ॥

रह त्यागे ॥ (रहयति । अररहत्) । रहतीति शपि । गतौ तु रंहति ॥ ३१६ ॥

स्तन गदी देवशब्दे ॥ द्विवचननिर्देशो वैचित्र्यार्थ इति मैत्रेयः । अजन्त्यपरा इति षोपदेशलक्षणं स्मिङ्स्विधाद्येकाच्साहचर्यादनेकाक्षु न प्रवर्तते । (स्तनयति । अतस्तनत्) । (तिस्तनयिषति) इत्यत्राषोपदेशत्वात् षत्वं न भवति । अभिनिस्तनो मेघस्येत्यत्र अभिनष्टानवन्नायं शब्दविशेषस्य संज्ञेति "अभिनिसःस्तन" इति षत्वं न भवति ।(गदयति। स्तनयति) । गदतीति शपि । (स्तनयित्नुः) । "स्तनिहृषिपुषिगदिमदिभ्योर्णेरित्नुच्" इति इत्नुच्, "अयामन्त" इत्ययादेशः ॥ ३१८ ॥

पत गतौ वा ॥ वाशब्दं केचिन्न पठन्तीति पुरुषकारे । अयं विकल्पेन णिचमुत्पादयति । (पतयति । पतति) इति । तत्र भूवादिपाठादेव पततीतिसिद्धे णिज्विकल्पस्य प्रयोजनमस्यानेकाच्त्वात्पताञ्चकारेत्याम्सिद्धिः । तथा अपतीदित्यस्य लृदित्वाभावेनाङभावात्सिद्धिरिति पुरुषकारादौ । अन्ये तु वाशब्दमेवं व्याचक्षन्ते । न्यायतस्त्वनन्तरत्वाददन्तत्वस्यैव विकल्पनं युक्तं, न तु परमप्रकृतस्य णिचः । तेन पतयति पातयतीत्युदाहर्तव्यम् । उक्तं च स्वेनैव पुरुषकारकृता भू प्राप्तौ वात्मनेपदीत्यत्र, आकुस्मादात्मनेपदीतिप्रकरणे भू प्राप्तौ वेति वक्तव्ये आत्मनेपदीतिवचनं केवलाण्णिजन्तादस्यात्मनेपदं यथा स्यादिति मैत्रेयग्रन्थदूषणावसरे आकुस्मीयकाण्डे भू प्राप्तौ वेत्युच्यमाने ऽनन्तरस्यात्मनेपदित्वस्यैव विकल्पः प्रतीयेत न पुनर्महाप्रकृतस्य चुरादिणिच इति । अत्र स्वामी, संहितायां धातुपाठाद्वाशब्दमुत्तरधातुशेषं वष्टि, तन्निपातस्य वाशब्दस्य चशब्दादिवत् पूर्वप्रयोगो नेति हेलाराजीयादौ समर्थनाद्युक्तम् । (पतयालुः,) "स्पृहिगृहिपति" इत्यादिना ऽऽलुच् ॥ ३१९ ॥

पष अनुपसर्गात् ॥ गतावित्यत्रापि सम्बध्यते, (पषयति)। सोपसर्गत्वात् (प्रपषति)इति। अत्र केचित् ताल्व्यान्तं पठन्तो वाग्रहणं चानुवर्त्यादन्तादेत्त्वं विकल्पयन्ति स्वाम्यनुसारिणः । अत्रादन्तत्वविकल्पनमनन्तरत्वादयुक्तं ताल्व्यान्तत्वं तु पुरुषकारोऽपि न सहते, यदाह पषादिस्तु पष अनुपसर्गादित्यस्य भविष्यति ॥ ३२० ॥

स्वर आक्षेपे ॥ (स्वरयति) । स्वरतीति शब्दोपतापयोश्शपि ॥ ३२१ ॥

रच प्रतियत्ने ॥ (रचयति) ॥ ३२२ ॥

कल गतौ संख्याने च ॥ (कलयति) । कालयतीति क्षेपे गतम् । कलतीति शपि॥३२३॥

चह परिकल्कने ॥ परिकल्कनं दम्भः । (चहयति) । मित्प्रकरणे इह च पाठस्य तत्रैव प्रयोजनमुक्तम् । चहतीति शपि ॥ ३२४ ॥

मह पूजायाम् ॥ (महयति) । महतीति शपि महि वृद्धावित्यस्य । संहत इति क्षीरस्वामी, तन्मतेन महि भाषितार्थो ऽत्रैव दण्डके गतः ॥ ४२९ ॥

सार कृप श्रथ दौर्बल्ये ॥ (सारयति । कृपयति) । कल्पयतीति कृपेस्तादर्थ्यइत्यस्य गतम्, कल्पतइति कृपेः शपि । (श्रथयति) । श्राथयतीति प्रयत्ने गतः, मोक्षणे श्राथयति, श्रथतीत्याघृषीयः ॥ ३२८ ॥

स्पृह ईप्सायाम् ॥ (पुष्पेभ्यः स्पृहयति) ॥ "स्पृहेरीप्सितः" इति ईप्सितस्य संप्रदानत्वम् । (स्पृहयालुः) । "स्पृहिगृहि" इत्यादिनालुच् ॥ ३२९ ॥

भाम क्रोधे ॥ (भामयति) । भामत इति शपि ॥ ३३० ॥

सूच पैशुन्ये ॥ (सूचयति) । अजन्तलक्षणस्यैकाज्विषयत्वादषोपदेशत्वात् सोसूच्यत इत्यादौ न षत्वं, "सूचिसूत्रि इत्यादिना यङ् ॥ ३३१ ॥

खेट भक्षणे ॥ तृतीयान्त इति दुर्गः । (खेटयति । आखेटना) । खोट इत्येके । खोटयतीति मैत्रेयः । खेटतीत्यपि शपि ॥ ३३२ ॥

क्षोट क्षेपे ॥ (क्षोटयति) ॥ ३३३ ॥

गोम उपलेपने ॥ (गोमयति) ॥ ३३५ ॥

कुमार क्रीडायाम् ॥ (कुमारयति) ॥ ३३५ ॥

शील उपधारणे ॥ उपधारणमभ्यासः । (शीलयति । शीलितः) । "मतिबुद्धि" इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात् वर्तमाने क्तः । समाधौ शीलतीति शपि ॥ ३३६ ॥

साम सान्त्वप्रयोगे ॥ (सामयति) । साम सान्त्वन इति पठितस्येह पाठो ऽग्लोपित्वादससामदिति सिद्धये ॥ ३३७ ॥

वेल कालोपयोगे ॥ (वेलयति । वेला) । काल इत्यपि धातुरित्यात्रेयः । (कालयति) । वेलयतीति शपि चलने ॥ ३३८ ॥

पल्यूल लवनपवनयोः ॥ (पल्यूलयति) । पल्यूलनं शोधनद्रव्यमिति नास्य पल्यूलवासः, पल्यूलयेयुरित्यत्र भाष्ये ॥ ३३९ ॥

वात सुखसेवनयोः ॥ गतिसुखसेवनेष्वित्येके । (वातयति) ॥ ३४० ॥

गवेष मार्गणे ॥ (गवेषयति) ॥ ३४१ ॥

वास उपसेवायाम् ॥ (वासयति । वासना) । युच्, स्नेहनादौ वासयतीति गतम् । वसतीति वस निवासइत्यस्य शपि । अयं कथादावपीति दैवपुरुषकारयोः । वस्तइत्याच्छादने शब्लुकि, वस्यतीति स्तम्भने श्यनि ॥ ३४२ ॥

निवास आच्छादने ॥ निवासयति) । अत्र केचित्पितेव पुत्रं दसये वचोभिरित्यत्र क्षुरे पितेव पुत्रं दसये निरवासयामि स्तुतिभिरिति व्याख्यानादस निरवसानइति पठन्ति । भट्टभास्करेण त्वाकुस्मीयेषु दस दसि दसनदर्शनयोरिति पठित्वा धातूनामनेकार्थत्वेन वचोभिः स्तुतिभिःसंगृह्णामि, यथा पिता दुश्शिलंपुत्रं स्तुतिपदैरिति व्याख्यातम् । तस्मात्क्षुरेऽप्याकुस्मीय एव निरवसानार्थः कथित इति वक्तुं शक्यत्वान्नैतावता कथादौ धात्वन्तरत्वं शक्यते कल्पयितुम् ॥ ३४३ ॥

भाज पृथक्कर्मणि ॥ (विभाजयति) ॥ ३४४ ॥

सभाज प्रीतिदर्शनयोः ॥ प्रीतिसेवनयोरित्यन्ये । (सभाजयति) ॥ ३४५ ॥

ऊन परिहाणे ॥ (ऊनयति । माभवानुनिनत्) । माषेणोनः (माषोनः) । "पूर्वसदृशसमोनार्थ" इति तृतीयासमासः ॥ ३४६ ॥

ध्वन शब्दे ॥ (ध्वनयति) । ध्वनतीति शपि ॥ ३४७ ॥

कूट परीतापे ॥ परिदाहइत्यन्ये । (कूटयति,) । कुटयतीत्यप्रसादे आकुस्मीयः । अर्थभेदाः पाठभेदाश्च तत्रैव दर्शिताः ॥ ३४८ ॥

सङ्केत ग्राम कुण गुण चामन्त्रणे ॥ चकारेण कूट इत्यपेक्षत इति मैत्रेयः । (कूटयति । संकेतयति । ग्रामयति) । कुणतीति शब्दोपकरणयोश्शे । (गुणयति) । अपरे तु पठन्ति । केत श्रावणे निमन्त्रणे च । (केतयति । निकेतयति) । कुण गुण चामन्त्रणे । चकारात्केत चेति, कूण संकोचन इति वा तत्र पठन्ति ॥ ३५२ ॥

स्तेन चौर्ये ॥ अनेकाच्त्वादषोपदेशत्वम् । (स्तेनयति । अतिस्तेनत् । स्तेनः । स्तेयम्) । "स्तेनाद्यन्नलोपश्च" इति भावकर्मणोर्यन्नलोपौ । (स्तैन्यम्,) "स्तैनात्" इति योगविभागात् ष्यञ् ॥ ३५३ ॥

आ गर्वादात्मनेपदिनः ॥ इतः परे गर्व माने इति वक्ष्यमाणपर्यन्ता आत्मनेपदिनः ॥

पद गतौ ॥ (पदयते । अपपदत) । पद्यत इति श्यनि ॥ ३५४ ॥

गृह ग्रहणे ॥ (गृहयते । गृहयालुः) "स्पृहिगृहि" इत्यादिना आलुच् । गर्हत इति गृहेर्गर्हेश्च शपि, तत्रान्त्यः कुत्सार्थः । गृह्णाति गृह्णीत इत्युपादानार्थस्य प्रसारिणः क्र्यादेः । गर्हतीति गर्हराधृषीयस्य निन्दार्थस्य ॥ ३५५ ॥

मृग अन्वेषणे ॥ (मृगयते) । मृग्यतीति कण्ड्वादिपाठादिति मैत्रेयः । मार्गयति, मार्गतीति मार्गराधृषीयस्य ॥ ३५६ ॥

कुह विस्मापने ॥ (कुहयते । कुहना । कुहः) । बाहुलकादूकारप्रत्यये कुहूशब्दमाह मैत्रेयः ॥ ३५७ ॥

शूर वीर विक्रान्तौ ॥ (शूरयते । वीरयते) । शूर्यत इति हिंसास्तम्भनयोः श्यनि ३५१

स्थूल परिबृंहणे ॥ (स्थूलयते । अतुस्थूलत । स्थूलः । स्थविष्ठः । स्थवीयान्) । "स्थूलदूर" इत्यादिना यणादि लुप्यते पूर्वस्य च गुणः । पृथ्वादिष्वपाठादिमनिजस्य नास्तीति नोदाहृतम् । (स्थावयति) । "णाविष्ठवत्" इति यणादिलोपो गुणश्च ॥ ३५८ ॥

अर्थ उपयाञ्चायाम् ॥ (अर्थयते । अर्थयिता । अर्थयिष्यते) । 'प्रार्थयन्ति शयनोत्थितं प्रिया' इत्यादि कृदन्तात्तत्करोतीति णिचि नेयम् ॥ ३५९ ॥

सत्र सन्तानक्रियायाम् ॥ (सत्रयते) ॥ ३६० ॥

गर्व माने ॥ (गर्वयते) । आगर्वीयाः । गर्वतीति शपि ॥ ३६१ ॥

सूत्र वेष्टने ॥ अन्ये तु विमोचन इति पठन्तो विमोचनं मोचनाभाव इति, ग्रन्थनमित्यपरे । (सूत्रयति । सोसूत्र्यते) । "सूचिसूत्रि" इति यङ् ॥ ३६२ ॥

मूत्र प्रस्रवणे ॥ (मूत्रयति । मोमूत्र्यते,) पूर्ववद्यङ् ॥ ३६३ ॥

रूक्ष पारुष्ये ॥ (रूक्षयति) । रूक्षतीति शपि ॥ ३६४ ॥

पार तीर कर्मसमाप्तौ ॥ (पारयति । तीरयति) ॥ ३६६ ॥

पुट संसर्गे ॥ (पुटयति) । पोटयतीति भाषार्थो दण्डके गतः । पुटतीति संश्लेषे तुदादिः ३६७

कत्र शैथिल्ये ॥ (कत्रयति । कत्रिः) । इन्प्रत्ययः (कात्रेयकम्) । "कत्र्यादिभ्यो ढकञ्" इति शैषिको ढकञ् । कुत्सितास्त्रयः कत्रय इति वा कत्रिशब्दव्युत्पत्तिः । [कद्भावे त्रावुपसंख्यानम्] इति कुशब्दस्य कद्भावः । अत्र दुर्गः कर्त्तेत्यपि पठति । कर्त्तयति ॥ ३६८ ॥

"प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च" ॥ प्रातिपदिकाद्धात्वर्थे णिच्, तस्मिंश्चेष्ठनीव कार्य्यं भवति । इदं च "तत्करोति तदाचष्टे" तेनातिक्रामतीनां वक्ष्यमाणत्वात् तद्विषयम् । (पटुमाचष्टे पटयति । लघुमाचष्टे लघयति । अपीपटत्, अलीलघत्) । अत्र परत्वाद्वृद्धौ "णाविष्ठवत्" इति टिलोप इत्यग्लोऽप्ययं नेति "सन्वत्" इतीत्वम् "दीर्घो लघोः" इति दीर्घश्च भवति । अत्र केचित् "नाग्लोपि" इत्यत्रागितिप्रत्याहारग्रहणसामर्थ्याद्वृद्धेः प्रागेव टिला

इत्यग्लोप्यङ्गमितीत्वदीर्घत्वे नेच्छन्ति । (अपपटत् । अललवत्) इति । तदसत् । "हलिकल्योरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थम्" इति वार्त्तिकविरोधात् । यदि हि वृद्धेः प्राक् टिलोपः स्याद् अग्लोप्येवाङ्गमिति किमदन्तत्वनिपातनक्लेशेन । प्रत्याहारग्रहणस्य तु प्रयोजनं (स्वामिनमाख्यत् असस्वामत्, गोमिनमाख्यत् अजुगोमत्, । वीरुधमाख्यत्, अविवीरुत्, प्रावृषमाख्यत् अपप्रावृत् । यादृशमाख्यत्, अययादृद्) इति स्यात् । एषामेषूदाहरणेष्वनभिधानान् णिज् नेति मतं तेषामपि स्रग्विणमाख्यद् इत्यादौ "विन्मतोर्लुक्" इतीष्ठवद्भावेन विनो लुकि ह्रस्वाद्यभावः प्रयोजनमेवासस्रजदिति । अत्र बहुलग्रहणात् स्रजयतीत्यत्र वृद्धिर्न भवति, तथा कुमारीमाचष्टे कुमारयतीत्यत्राप्रातिपदिकत्वेऽपि णिजिति केचित् । अन्ये तु "प्रकृत्यकाच्" इति प्रकृतिभावादेव स्रजयतीत्यत्र वृद्धिर्न भविष्यति । तथा यथाकथञ्चित्प्रातिपदिकग्रहणे लिङ्गविशिष्टपरिभाषाया "ङ्याप्प्रातिपदिकात्" इति सूत्रे भाष्ये स्थापनात् कुमारयतीत्यादौ णिजपि सिद्ध इति बहुलग्रहणं विकल्पमात्रफलमाहुः ॥

"तत्करोति तदाचष्टे" ॥ तदिति द्वितीयान्तोपलक्षणम् । तत्करोत्याचष्ट इत्यत्र धात्वर्थमात्रं णिजर्थो न कर्तापि, तथा चैवोदाहृतम् ॥

"तेनातिक्रामति" ॥ अत्रापि तेनेति तृतीयान्तोपलक्षणम् । अश्वेनातिक्रामति (अश्वयति) । हस्तिनातिक्रामति (हस्तयति) ॥

"धातुरूपञ्च" ॥ णिच्प्रकृतिर्धातुरूपं प्रतिपद्यते । अनेन ["आख्यानात्कृतस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम्" इत्येतत्सूच्यते । कंसवधमाचष्टे कंसं घातयतीत्युदाहरणम् ॥

"कर्तृकरणाद्धात्वर्थे" ॥ अत्र कर्तृग्रहणं करणस्य विशेषणम् । कर्तुः करणाद्धात्वर्थे णिजिति सूत्रार्थः । करिभिरवबध्नाति (अवकरयति) । असिना हन्ति (असयति) । परशुना छिनत्ति (परशयति) । दात्रेण लुनाति (दात्रयति) । अत्र कर्त्ता करणस्य विशेषणं करणशब्दवाच्यत्वेन लोकप्रसिद्धानां चक्षुरादीन्द्रियाणां परिग्रहो माभूद् इति ॥

बष्क दर्शने ॥ (बष्कयति) ॥ ३६९ ॥

चित्र चित्रकरणे ॥ (चित्रयति) । चित्रकरणमालेख्यकरणमित्यात्रेयः । चित्र आलेख्यकरणइत्येव दुर्गः ॥ ३७० ॥

"कदाचिद्दर्शने" ॥ चित्र इत्ययं कदाचिद्दर्शनेऽद्भुतदर्शने णिचमुत्पादयति । (चित्रयति) । चित्रीयत इति चित्रप्रातिपदिकादाश्चर्यवृत्तेः "नमोवरिवश्चित्रङः क्यच्" इति क्यचि, तत्र हि चित्रङ् आश्चर्ये इत्युच्यते, प्रातिपदिकस्य ङित्त्वमवयवे ऽकृतं लिङ्गं समुदायस्य विशेषकमिति न्यायात् प्रत्ययान्तात्तङर्थम् ॥ ३७१ ॥

अंस समाघाते ॥ (अंसयति । अंसः) ॥ ३७२ ॥

वट विभाजने ॥ (वटयति) ॥ ३७३ ॥

लज प्रकाशे ॥ (लजयति) । अत्र मैत्रेयः । वटेः पुनः पाठोऽर्थभेदात् । वटि लजि इत्येके । (वण्टयति । लञ्जयति) । अदन्तेषु पाठबलाददन्तत्वे वृद्धिरित्यपरे । (वण्टापयति । लञ्जापयति) । तथा च शाकटायनसूत्रम् । "कथादिपाथिस्फायो णौ पुगलुग्वत्वम्" इति । अस्यार्थः—कथादीनां पाथेश्च णौ पुग् लुग् इत्येतावागमौ स्फायोऽन्त्यस्य वत्वं क्रमेणेति । एवञ्च शाकटायनमतेन कथादीनामागमे पुकि वृद्धौ कथापयतीत्युदाहार्य्यम् ॥ ३७४ ॥

मिश्र सम्पर्के ॥ (मिश्रयति । गुडमिश्रः) । "पूर्वसदृश" इत्यादिना तृतीयान्तस्य मिश्रशब्देन तत्पुरुषः ॥ ३७५ ॥

संग्राम युद्धे ॥ अयमनुदात्तेत् । तथा च तृतीयादिभ्य इत्यत्र कैयटे । संग्रामयतिरनुदात्तेद् बोद्धव्य इति । पदमञ्जर्यां च 'अनुदात्तेदयं संग्रामयतिरिष्यत' इति । तथा च तत्र भाष्यमपि । असंग्रामयत शूर इति, संग्रामशब्दात्तत्करोतीति णिचापि सिद्धाविह संग्रामस्य पाठः

सोपसर्गात्सङ्घातात्प्रत्ययार्थस्तेनासंग्रामयत इत्युपसर्गात्पूर्वमड् भवति । तथा संग्रामयित्वे- त्यत्राधीत्येत्यादिवल्ल्यब् न भवति । सिसंग्रामयिषतइत्यत्र समो द्वित्वं भवति । अत एव सङ्घातादुत्पत्तिवचनादन्यत्र धातूपसर्गसमुदायात्प्रत्यये विहिताउपसर्गाः पृथक् क्रियन्तइति ज्ञाप्यते । तेन परिवृढय्येत्यत्र ल्यबादि भवति । अस्यानुदात्तेत्त्वमपाणिनीयमिति पाठस्य तदर्थतया न ज्ञापकत्वभङ्गः ॥ ३७६ ॥

स्तोम श्लाघायाम् ॥ (स्तोमयति । स्तोमः । अग्निष्टोमः) । "अग्नेः स्तुत स्तोम" इति षत्वम् ॥ ३७७ ॥

छिद्र कर्ण भेदने ॥ करणभेदनइति गुप्तः, मैत्रेयस्तु छिद्रयति कर्मयतीति कर्णमपि पृथग्धा- तुमुक्त्वा कर्णेन भाषयति कर्णयतीति व्याचक्षतेत्याह ॥ ३७९ ॥

अन्ध दृष्ट्युपघाते ॥ उपसंहारइत्येके । (अन्धयति) ॥ ३८० ॥

दण्ड दण्डनिपातने ॥ अयं द्विकर्मक इत्युक्तं नाथतौ । तत्र कर्मणि लादयो नाथत्यादौ प्रपञ्चितास्तद्वदिहापि नेयाः ॥ ३८१ ॥

अङ्क पदे लक्षणे च ॥ (अङ्कयति) । अङ्कतइति शपि । तत्रैव कुटिलायां गतावङ्किति३८२

अङ्ग च ॥ (अङ्गयति) । अङ्गतीति गतौ शपि ॥ ३८३ ॥

सुखदुःख तत्क्रियायाम् ॥ तच्छब्देन सुखदुःखे प्रातिपदिकार्थौ निर्दिश्येते । "प्रातिपदि- काद्धात्वर्थे" इति सिद्धे इहानयोः पाठस्सोपसर्गात्प्रत्ययार्थ इति मैत्रेयः । (सुखयति । दुःख- यति) । "सुखादिभ्यः कर्तृवेदनायाम्" इति क्यङि "अकृत्सार्वधातुकयोः" इति दीर्घे (सु- खायते, दुःखायते) सुखादिभ्यो वेदनायां क्यङ् भवति तानि च सुखादीनि संनिधानाद्वेदना- यां कर्त्तुस्सम्बन्धीनि चेदिति सूत्रार्थः । कर्तृ इत्यविभक्तिको निर्देशः, तेन सुखं वेदयते प्र- साधको देवदत्तस्येत्यत्र क्यङ् न भवति । सुख्यति दुःख्यतीति कण्ड्वादियगन्तस्य ॥ ३८५ ॥

रस आस्वादनस्नेहनयोः ॥ (रसयति) । रसतीति । शपि ॥ ३८६ ॥

व्यय वित्तसमुत्सर्गे ॥ (व्ययति) । व्ययतइति गतौ शपि ॥ ३८७ ॥

रूप रूपक्रियायाम् ॥ रूपस्य दर्शनं करणं वा रूपक्रियेति स्वामी । (रूपयति । रूपति) निरूपयतीत्यनेकार्थत्वाद्विचारणे ॥ ३८८ ॥

छेद द्वैधिकरणे ॥ (छेदयति) । छिनत्तीति छिदेः श्नमि । क्वचिदिहापि छद अपवारणइति पठ्यते ॥ ३८९ ॥

लाभ प्रेरणे ॥ (लाभयति) । प्राप्त्यर्थे लभतइति शपि ॥ ३९० ॥

व्रण गात्रविचूर्णने ॥ (व्रणयति) । व्रणतीति शब्दार्थ शपि ॥ ३९१ ॥

वर्ण वर्णक्रियाविस्तारगुणवचनेषु ॥ वर्णक्रिया वर्णकरणं, (सुवर्णं वर्णयति) । (कथां वर्णयति) । विस्तृणातीत्यर्थः । (राजानं वर्णयति,) स्तौतीत्यर्थः । वर्णं गृह्णाति (वर्ण- यति) । "सत्यापपाश" इत्यादिना णिच् ॥ ९२३ ॥

"बहुलमेतन्निदर्शनम्" ॥ क्वचित्तु दर्शितमिति पठ्यते । तत्रापि भावे निष्ठेति निदर्शन- मित्येवार्थः । चुरादावदन्तधातुनिदर्शनं बहुलं वेदितव्यम् । अतोऽनुक्ता अपीह धातवो वेदितव्याः ॥

पर्ण हरितभावे ॥ (पर्णयति) ॥ ३९३ ॥

विष्क दर्शने ॥ (विष्कयति) ॥ ३९४ ॥

क्षप प्रेरणे ॥ (क्षपयति) ॥ ३९५ ॥

वस निवासे ॥ वसयति) ॥ ३९६ ॥

तुत्थ आवरणे ॥ (तुत्थयति) । एवं (गडयति, आन्दोलयति, डलयति, वर्णयति, स्फुटयति, स्फुटा, स्फुटितः, अवधीरयति) इत्यादयो यथाभिधानमिति मैत्रेयादयः । अन्ये तु भूवादिष्वेतदन्तेषु दशगणीषु धातूनां पाठो निदर्शनाय, तेन स्तम्भुप्रभृतयः सौत्राः, चुलु-

म्पादयो वाक्यकारीयाः, प्रयोगसिद्धा विक्लवत्यादयश्च गृह्यन्त इति ।

विगलन्त्याशु जीमूता, विक्लवन्ते दिवि ग्रहाः ।
क्षयन्ति विद्युतः प्रावृट् क्षीयन्ते कामविग्रहाः ॥

इत्यादयः प्रयोगा उपपद्यन्तइत्याहुः ॥ ३९७ ॥

"णिङङ्गान्निरसने" ॥ अङ्गवाचिनः प्रातिपदिकान्निरसने णिङ्भवति । ङकार आत्मने-पदार्थः । हस्तौ निरस्यति (हस्तयते । पादयते) ॥

"श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च" ॥ श्वेताश्वादीनां चतुर्णां यथासंख्यमश्वतरेतक इत्येते लुप्यन्ते णिङ् च धात्वर्थे, अत्रापि णिचो बाहुलकादिति मैत्रेयादयः । श्वेताश्वमाचष्टे तेनातिक्रामति वा श्वेतयते, एवमश्वयते, गालोडयते, ह्वरयतइति, अत्र स्वामी । पारायणिकास्त्वर्थवद् णिचमनुवर्णयन्ति, एवं काश्यपो ऽपि व्याचक्षाणः श्वेतयतीत्युदाजहार ॥

'पुच्छादिषु धात्वर्थ' इत्येव सिद्धम् ॥ अत्र मैत्रेयः—पुच्छादिषु प्रातिपदिकेभ्यो धात्वर्थइत्येव सिद्धम्, आत्मनेपदं णिजन्तात् बहुलवचनाद्विज्ञेयमिति "पुच्छभाण्डचीवराण्णिङ्" इति न कर्तव्यमिति । अन्ये तु पुच्छादीनां "पुच्छभाण्ड" इत्यनेन णिङ उक्तत्वादिह णिङ् नास्तीति व्याचक्षते । पुच्छमुदस्यति (उत्पुच्छयते)। भाण्डानि समाचिनोति(सम्भाण्डयते)। चीवराण्यर्जयति परिधत्ते वा (संचीवरयते) । सिद्धशब्दो मङ्गलार्थः ॥

इति पूर्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसंगममहाराजमहामन्त्रिणा मायणसुतेन माधवसहोदरेण सायणाचार्य्येण विरचितायां माधवीयायां धातुवृत्तौ चुरादयः सम्पूर्णाः ॥

संपूर्णा चेयं माधवीया धातुवृत्तिः ॥

शुभं भवतु ॥

श्रीविश्वनाथो विजयतेतराम्

॥ श्रीगणेशाय नमः ॥

॥ अथ माधवीया नामधातुवृत्तिः ॥

यस्या रूपप्रभावेन न ख्यातुमपि किंचन ।
शक्यते वस्तु लोकेषु जयत्येषा सरस्वती ॥ १ ॥
धातुपाठे निविष्टानां धातूनां यः पुरा व्यधात् ।
विवृत्तिं माधवीयाख्यां भाष्यज्ञहृदयङ्गमाम् ॥ २ ॥
तेन सायणपुत्रेण व्याख्या कापि विरच्यते ।
धातूनां प्रत्ययान्तानां गणसूत्रजुषामपि ॥ ३ ॥
तत्र प्रतिपदं शिष्टा गणसूत्रगता इमे ।
गणास्तत्रापि बहवः किं च सूत्राण्यधीयते ॥
आचार्येण पुरा प्रोक्तास्तानादौ विवृणोम्यहम् ॥ ४ ॥
एतावदेव सर्वस्मादर्थये सुमनोजनात् ।
(१)नामंस्त भवता सार्थमन्यथा तु न मे क्षतिः ॥ ९ ॥

'कण्ड्वादिभ्यो यक्" एभ्यो यक् स्वार्थे । एते च धातवः प्रातिपदिकानि च । तत्र धातु-
त्वं यको धातुविहितत्वेन तन्निमित्तगुणनिषेधार्थेन कित्त्वेनावसीयते । प्रातिपदिकत्वं तु क-
ण्ड्वादीनां केषां चिद्दीर्घान्तपाठात् । कण्डूयते इत्यादिरूपं तु ह्रस्वान्तादपि यकि मन्तूय-
तीत्यादिवत् "अकृत्सार्वधातुकयोः" इति दीर्घेण भविष्यति । तत्र धात्वधिकारात् धातु-
भ्यो यक् प्रत्ययः । नन्वेषां प्रातिपदिकत्वमेवास्तु मास्तु दीर्घपाठः प्रत्ययस्य कित्त्वं च । न
च "अकृत्सार्वधातुकयोर्दीर्घः" इति दीर्घविधौ अङ्गं धातुराश्रीयते किं त्वङ्गमात्रमेव । कण्डू-
रिति च कण्डूयशब्दात्सम्पदादित्वाद्भावे क्विवल्लोपे वलि लोपेन यलोपेन सिद्धं, यलोपेऽल्लो-
पस्य स्थानिवत्त्वं "न पदान्त" इति निषिद्धं, वलि लोपश्च "लोपो व्योः" इति विधेयस्य
पश्चान्निर्देशस्य पूर्वनिर्देशादपृक्तलोपात्पूर्वं भवति । यद्येवं कण्डूशब्दस्य प्रत्ययलक्षणेन यग-
न्तत्वेन धातुत्वादल्लोपस्य पूर्वविधौ स्थानिवत्त्वादुवङ् स्यात् । नैतदस्ति । सति स्थानिव-
त्त्वेऽकारस्य तदन्त एव धातुर्नाकारान्तः । एवं तर्हि यण् प्राप्नोति । अस्तु,क्विबाश्रयः "च्छ्वोः
शूड्" इत्यूड् भविष्यति । न चाल्लोपस्य स्थानिवत्त्वे वकारस्य क्विप्परत्वाभावः, वकार-
स्यादिष्टादचः पूर्वत्वात् । न च स्थानिवत्त्वेनानादिष्टादचः पूर्वत्वं, तस्याशास्त्रीयकार्यत्वात् ।
अत एवादिष्टादचः पूर्वत्वादूठि पुनर्यणभावः । यद्वा ['क्वौ लुप्तन्न स्थानिवत्] इति अल्ला-
पस्य स्थानिवत्त्वनिषेधाद्यण्भावाप्रसङ्गः, यद्येवं कण्ड्वावित्यादावुवङ् स्यात्, न च "ओः सु-
पि" इति यणः प्रसङ्गः, संयोगपूर्वत्वात् । अस्त्वत्रोवङ्, क्विपः प्रत्ययलक्षणेनोङ् भविष्यति ।
एवमपि पुनरुवङ् स्यात्, पुनरुवङुवङौ पर्यायेणेति व्यवस्था न स्यात् । किं च कण्डूरित्यादि-
वन्मन्तूरिति च स्यात्, न च भवतीष्टं मन्तूरित्यादि । अथ "धातोः कर्मण" इत्यतो वाग्रहण-
मनुवर्त्तते, तेन यगभावपक्षे उत्पादाद्यद्यपि सिद्धं मन्तुरिति तथापि कण्डूरितिवद्दीर्घोऽपि
अल्लोपयल्लोपयोश्च दुर्वारं मन्तूरित्यादि, तथा यगभावपक्षे मन्तुरित्यादिवत्कण्डुरिति च
स्यात्, सुखादिभ्यश्च यकि तस्याधातुविहितत्वेनानार्द्धधातुकत्वादतो लोपाभावात् "अकृ-
त्सार्वधातुकयोः" इति दीर्घे सुखायतीत्यादि स्यात्, न चेष्टं, सुख्यतीत्यादेरिष्टत्वात्, इह

---

(१) मावमस्त भवान् स्वार्थमिति पाठेऽपूर्वं स्वारस्यं प्रतिभासते ।

(१)पाठे तु न कदाचन सुखादरकारान्तता सिध्यति, तस्माद्यथान्यासमेवास्तु। नन्वेवमपि प्रातिपदिकेभ्यः कण्डूौ मन्तुरित्यादि यद्यपि सिध्यति तथापि धातुभ्यो यकि कण्डूयशब्दात् क्विबल्लोपयलोपयोरजादौ सुप्यवङि कण्डुवावित्यादि प्राप्नोत्येव, तथा मन्त्वादेर्मन्तूरित्यादि, सुखादेश्च सुगित्यादि हलन्तं, नैष दोषः। यगन्तेभ्यः क्विबेव नोत्पद्यते। उक्तं च भाष्ये नैतेभ्यः क्विब् दृश्यतइति, न तर्हि इदानीमुवङ् भवति कण्डुवाविति, भवति, यदा प्रातिपदिकात्क्विबन्तात् क्यजन्ताद्वा क्विप्यल्लोपयलोपयोः स्वाद्युत्पत्तिः, यद्येवं कण्ड्वादयः प्रातिपदिकान्येव सन्तु, यथान्यासं दीर्घान्ताश्च तथैव भवन्तु, ककारश्च प्रत्यये मासञ्जि, वाग्रहणं चानुवर्तिष्यते, तत्र (कण्डूयति। मन्तूयति) इत्यादयो यकि भवन्ति, कण्डूः कण्डूौ मन्तुरित्यादयश्च यगभावपक्षे प्रातिपदिकात् स्वाद्युत्पत्तौ, यगन्तात्क्विबभावस्येदानीमेवोक्तत्वात्स एव धातुः प्रातिपदिकं च कण्डूशब्दो भवति, तस्मात्स्वाद्युत्पत्तावुवङ् प्रसज्येत, तथाऽत एव यगन्तात्क्विबभावान्मन्त्वादेर्दीर्घत्वं सुखादेर्हलन्तत्वं न भवति, किं कण्ड्वादीनां धातुत्वमाश्रित्य तेभ्यः प्रत्ययविधानेन, सत्यमेतदेवं स्यात्। सुख्यतीति न सिध्येत्, प्रातिपदिका (प्रत्यये तस्यानार्धधातुकत्वेनातो लोपाप्रसङ्गात्।

अथोदाहरणानि कण्डूय गात्रविघर्षणे। (कण्डूयति) कण्डूञो ञित्करणस्य 'अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति' इति समुदायस्य ञित्वादात्मनेपदं भवति। एवमनुबन्धान्तरस्यापि समुदायार्थत्वं द्रष्टव्यम्॥ १॥

मन्तु अपराधे॥ रोष इत्यपरे। (मन्तूयति)। चन्द्रस्तु ञितं पठित्वा मन्तूयते इतिचाह॥२॥

वल्गु पूजामाधुर्ययोः॥ (वल्गूयति)॥ ३॥

असु मनस् एतावुपतापे॥ (असूयति। मनस्यति। असूयुः)। "मृगय्वादयश्च" इत्युप्रत्ययः। अत्र वर्धमानहरदत्तगणरत्नमहोदधिकारा आद्यनुसारेणासुशब्दमसिति सान्तं पठित्वा असूमिति दीर्घान्तमेके पठन्तीत्याहुः। तन्मते (अस्यति असूयते) इति भवति॥६॥

लेट् लोट् धौर्त्ये पूर्वभावे स्वप्ने च॥ (लेट्यति। लोट्यति। लेटिता। लोटिता)। अकारस्यातो लोपे यलोपः। अत्र देवोऽर्थनिर्देशार्थं पूर्वशब्दं प्रतिनिर्देशार्थं मत्वा पूर्वतीति तु यत्स्वप्ने तत्कण्ड्वादिषु दर्शनादित्याह। तदेतन्मोघाया शाकटायनधातुवृत्तौ अर्थनिर्देशरहिते गणपाठे पूर्वस्य पाठाभावादयुक्तमिति पुरुषकार एव दूषितम्। अन्ये तु लेट्लौटौ दीप्त्यर्थावाहुः। अत्र लेला दीप्तावित्येके पठन्ति, पठ्यते च वातीभूतो लेलायत्सः, यदा वीतार्तिहस्तायेति॥ ७॥

इरस् ईर्ष्यायाम्॥ अत्र वर्धमानहरदत्तौ इरस् इरज् इरञ् ईर्ष्यायामिति त्रीन्पेठतुः। (इरस्यति। इरज्यति। ईर्यति)। अत्र "हलि च" इति दीर्घः। 'इरज्यन्नग्ने प्रथयस्व जन्तुभिः' इत्यत्र भट्टभास्करादिभिः दीप्त्यर्थोऽयमभिहितः। तथा 'इरज्यन्ता वसव्यस्य भूमेः' इत्यत्रैश्वर्यार्थः ईर्यतिर्मार्गावसानार्थोऽपि, उक्तं चेर्यतिरीर्ष्योपाधिरिति स्थितिरिति॥ ८॥

इयस् ऐश्वर्ये॥ (इयस्यति)

असुं दुर्गो न पठतीति गणरत्नमहोदधौ॥ ९॥

उषस् प्रभातीभावे॥ (उषस्यति) रात्रिः॥ १०॥

वेद धौर्त्ये स्वप्ने प्रभाते च॥ (वेद्यति)॥ ११॥

मेधा आशुग्रहणे॥ (मेध्यति)॥ १२॥

कुषुभ क्षेपे॥ (कुषुभ्नाति)। गणरत्नमहोदधौ तु आत्मनोऽन्यकर्तृकनिरसनमर्थमित्युक्तम्।

मगध परिवेष्टने। नीचदास्ये इत्येके। (मगध्यति)॥

तन्तस् पम्पस् दुःखे॥ (तन्तस्यति। पम्पस्यति)॥ १४॥

---

(१) हलन्त पाठे इति पाठान्तरम्।

सुख दुःख तत्क्रियायाम् ॥ तच्छब्देन सुखदुःखार्थौ परामृश्येते । तेन सुखदुःखरूपायां क्रियायामित्यर्थौ भवति, (सुखयति । दुःखयति) सुखमनुभवति दुःखमनुभवतीत्यर्थः ॥ १६ ॥

सपर पूजायाम् ॥ अकारान्तोऽयं महोदधौ, (सपर्यति) ॥ १७ ॥

अरर अराकर्मणि ॥ अरा प्रतोदा । (अरर्यति) ॥ १८ ॥

भिषज् चिकित्सायाम् ॥ (भिषज्यति । भिषज्यते) ॥ १९ ॥

भिष्णज् उपसेवायाम् ॥ (भिष्णज्यति) ॥ २० ॥

इषुध शरधारणे ॥ (इषुध्यति) ॥ २१ ॥

चरण गतौ ॥ (चरण्यति) । वरण इति भोजः । उक्तं च तपे । तयोरुदाहरणं काव्ये-"वरणाश्चारण्यैर्वेलाम्" इति ॥ २२ ॥

चुरण चौर्ये ॥ (चुरण्यति) ॥ २३ ॥

तुरण त्वरायाम् ॥ (तुरण्यति) ॥ २४ ॥

भुरण धारणपोषणयोः ॥ पणधारणयोरित्यन्ये । (भुरण्यति) ॥ २५ ॥

गद्गद वाक्स्खलने ॥ (गद्गद्यति) ॥ २६ ॥

एला केला खेला विलासे ॥ (एलायति । केलायति खेलायति) । अचैलास्थाने इलेत्यपरे पठन्ति । (इलायति) ॥ २९ ॥

(१) लेखा स्खलने च ॥ अकारान्तइत्यन्ये । तत्रातो लोपः (लेख्यति) ॥ ३० ॥

लिट् अल्पार्थे कुत्सायां च ॥ (लिट्यति) ॥ ३१ ॥

लाट् जीवने ॥ (लाट्यति) ॥ ३२ ॥

ह्रणीङ् रोषणे लज्जायां च ॥ (ह्रणीयते) ॥ ३३ ॥

महीङ् पूजायाम् ॥ अत्र पूजा पूज्यमानकर्तृका, तेनायमकर्मकः, महीयते पूजामधिगच्छतीत्यर्थः ॥ ३४ ॥

रेखा श्लाघासादनयोः ॥ आसादनं प्राप्तिः प्रापणा वा, (रेखायति । श्लाघामनुभवति, अनुभावयति वेत्यर्थः ॥ ३५ ॥

द्रवस् परितापपरिचरणयोः । (द्रवस्यति) ॥ ३६ ॥

तिरस् अन्तर्द्धौ ॥ (तिरस्यति) ॥ ३७ ॥

अगद नीरोगत्वे ॥ अमुं भोजः नेच्छतीति गणरत्नमहोदधौ, लेखायतिरेखायतिवदर्थः ॥ ३८ ॥

उरस् बलार्थः ॥ उरस्यति) । बलवान्भवतीत्यर्थः ॥ ३९ ॥

तरण गतौ ॥ (तरण्यति) ॥ ४० ॥

पयस् प्रसृतौ ॥ (पयस्यति) ॥ ४१ ॥

सम्भूयस् प्रभूतभावे ॥ (सम्भूयस्यति) । अत्र गणरत्नमहोदधौ अम्बर सम्बर सम्भर इति वामन इति, अम्बर्यति, सम्बर्यति, अत्र गणरत्नमहोदधावेव लेट्लोटाविति पठित्वा मतान्तरेण दान्तत्वमुक्त्वा लेद्यति लोद्यतीत्युक्तम् । अस्याकृतिगणत्वाद्धनादिभ्यो रायति धनायतीति चोक्तं यदा कण्ड्वादिभ्यः सन्नुत्पद्यते तदा कण्ड्वादीनां तृतीयस्यैकाचो द्वे भवत इति कण्डूयियिषतीत्यादि भवति ॥ ४२ ॥

अथ सौत्रधातवः प्रक्रियन्ते ॥

"ऋतेरीयङ्" । अयं स्वार्थे, ऋतिर्घृणायां, सा चेह घृणा जुगुप्साकृपयोरित्युक्त्वापि ऋतीयाशब्दस्य निघण्टुषु निरूढा जुगुप्सैवेति व्याख्यातारः । अत्र प्रत्ययस्य ङित्त्वेनापि

---

(१) खेला सत्वचलने च इति पाठान्तरम् ॥

गुणाभावस्य सिद्धौ ङित्करणमात्मनेपदार्थमपि, (ऋतीयते । ऋतीयेत । ऋतीयांचक्रे) इत्यादि, ङिल्लकारेषु अजादित्वात् "आटश्च" इति वृद्धौ (आर्तीयत । आर्तियिष्ट । आर्तीयिषत) इति भवति, यदायमवर्णान्तादुपसर्गात्परो भवति तदा "उपसर्गादृति धातौ" इति वृद्धौ (प्रार्तीयते उपार्त्तीयत) इत्यादि भवति। अत्रोपसर्गग्रहणाद्धाताविति सिद्धे 'उपसर्गादृति' इत्येव वक्तव्ये पुनर्धातुग्रहणं योगभेदेनाधिकविधानार्थमिति "ऋत्यक" इति पाक्षिकः प्रकृतिवद्भावोऽत्र बोध्यते, उपसर्गग्रहणं प्राद्युपलक्षणमित्येतत्तु यत्र "उपसर्गादध्वनः" इत्यादौ उपसर्गत्वं न सम्भवति तत्रैवेतीह तु सम्भवतीति हरदत्तादयः। तेनागता ऋतीयका अमुं देशम् आर्तीयको देश इत्यादौ 'यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञा' इत्याङादीनां गम्यादिक्रियापेक्षयोपसर्गत्वं न तु ऋतीयक्रियापेक्षयेति तां प्रत्युपसर्गत्वाभावात् "आद्गुणः" इति गुणः "ऋत्यक" इति शाकलप्रकृतिभावश्च भवतः। यदायमीयङ् "आयादय आर्धधातुके वा" इति वचनादार्धधातुके न भवति तदा (आनर्त, अर्तिता, अर्तिष्यति, आर्तीत्, आर्तिष्यत्, अर्तित्वा, ऋतित्वा) इत्यादि भवति, अत्र "वञ्चिलुञ्चृतश्च" इति सेटः कित्त्वविकल्पनात् पक्षे गुणो न, "आयादय आर्धधातुके वा" इत्यत्रार्धधातुकेत्यस्य विषयसप्तमीत्वादार्धधातुकेषु विषयभूतेषु आयादय उत्पद्यन्तइत्यर्थो न तु भूता निवर्तन्त इति, अन्यथा ऋतीयशब्दाल्लिटि प्रत्ययान्तत्वेनामि ईयप्रत्ययस्य निवृत्तावर्तांचकारेति स्यात् आनर्तेति च न स्यात्। न चार्तितासि अर्तिष्यति ऋत्यात् आर्तीदित्यादौ परस्मैपदं न स्यात्, तथा तास्यादेरार्धधातुकस्येयङो निवृत्तेर्निमित्तत्वात्तदपेक्षो गुणो "न धातुलोप आर्धधातुके" इति निषेधान्न स्यात्, अनेनाभिप्रायेण गुणाभावः, आर्तिष्ट ऋतिषीष्टेत्यादि स्यात्, ईयङन्तादुत्पन्नेषु तिङ्क्षु तदाश्रयेण पश्चादुत्पन्नेषु विकरणेषु आर्धधातुकेष्वीयङो निवृत्तिः क्रियते, ईयङो ङित्वात्तदन्ताच्चोत्पद्यमानास्तिङ आत्मनेपदान्येव, तथा क्तिनि ऋतिरिति न स्यात्, अप्रत्ययादित्यकारईयङो निवृत्तावृत्तेति च स्यात्, एवमादीनि दूषणानि। अत्र क्वचिद्वृत्तिकारश्छङित्येव सिद्धे ऋतेरीयङ्वचनं ज्ञापकं धातुविहितानां प्रत्ययानामायनादयो न भवन्तीति। तेन शमेः खः, (शङ्खः) कमेष्ठः (कण्ठः) इति, अत्रेनिकादेशौ न भवतः। ननु ऋतेश्छङित्युच्यमाने छङ आर्धधातुकत्वेन परत्वादिडागमे कृते छकारस्य प्रत्ययादित्वं विप्रतिपन्नमिति "आयनेयि" इत्यादिना विधीयमानः कथमीयादेशः सिध्यति, नैष दोषः। यदायनादिषुपदेशिवद्वचनस्य चोदितत्वादन्तरङ्गत्वादिटः पूर्वमीयादेशो भविष्यति। अत्र हरदत्तः—"द्विवचनविभज्योपपदे" इत्यत्र तरप्छसुनाविति वक्तव्ये ङ्यसुन्वचनादधातुविहितानामपि प्रत्ययानामायनादयो न स्युः, वचनसामर्थ्याच्चेदुभयेषामपीति ज्ञापकं भङ्क्त्वा ठादौ बाहुलकादिकार्यभावमाह ॥ १ ॥

"स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च"। एभ्यः कर्तृवाचिनि सार्वधातुके श्नुर्भवति, चकाराच्छ्ना च, तत्र पञ्चमो धातुषु पठितो व्याख्यातश्च, प्रथमतृतीयौ स्तम्भार्थौ, द्वितीयो निष्कोपणार्थः। चतुर्थो धारणार्थः, उदित्वं क्त्वायामिड्विकल्पार्थम्, अत एव श्नाद्यतिरिक्तविषयाश्चैते भवन्ति (स्तभ्नोति, स्तनुतः, स्तुभ्नुवन्ति, स्तभ्नोषि, स्तभ्नोमि, स्तभ्नुवः, स्तभ्नुमः) "अनिदिताम्" इति नलोपः, वस्नसोः "लोपश्चास्यान्यतरस्याम्" इत्युकारलोपः संयोगपूर्वत्वान्न भवन्ति, (स्तभ्नाति, स्तभ्नीतः, स्तभ्नन्ति, स्तभ्नासि, स्तभ्नामि) हलादौ क्ङिति "ईहल्यघोः" इतीत्वम्, अजादौ तु "श्नाभ्यस्तयोः" इत्यालोपः (तस्तम्भ, तस्तम्भतुः, तस्तम्भुः, तस्तम्भिथ, तस्तम्भ, तस्तम्भिव, तस्तम्भिम, स्तम्भिता, स्तम्भिष्यति, स्तभ्नोतु, स्तभ्नुतात्, स्तभ्नुताम्, स्तभ्नुवन्तु, स्तभ्नुहि, स्तभ्नवानि) हेः "उतश्च" इति लोपः संयोगपूर्वत्वान्न भवति, (स्तभ्नातु, स्तभ्नीतात्, स्तभ्नीताम्, स्तभ्नन्तु, स्तभान) हौ "हलः श्नः शानज्झौ" इति शानजादेशे "अतो हेः" इति हेर्लुक्, (अस्तभ्नोत्, अस्तभ्नुताम्, अस्तभ्नुवन्, अस्तभ्नोः, अस्तभ्नवम्, अस्तभ्नात्, अस्तभ्नीताम्, अस्तभ्नन्, स्तभ्नुयात्,

स्तभ्नुयाताम्, स्तभ्नुयुः, स्तभ्नुयाः, स्तभ्नुयां, स्तभ्नीयात्, स्तभ्नीयातां, स्तभ्यात्, स्तभ्यास्ताम्, स्तभ्यासुः) । यासुटः कित्त्वादनुनासिकलोपः । (अस्तभत्, अस्तभताम्, अस्तभन्) "जॄस्तम्भु" इति परस्मैपदे च्लेर्वाङि "अनिदिताम्" इति नलोपः । अन्यदा सिचि (अस्तम्भीत्" इत्यादि । (अस्तभिष्यत् । तिस्तम्भिषति, तास्तभ्यते, तास्तम्भीति, तास्तब्धि, तास्तम्भति) इत्यादि । (स्तम्भयति । अतस्तम्भत्, अत्यष्टभ्नोत्, प्रत्यष्टभ्नोत्, प्रतिष्टभ्नाति, प्रत्यतष्टम्भत्) इत्यादौ स्तम्भेः "प्राक् सितादड्व्यवायेऽपि" इति इणन्तादुपसर्गात्परत्वेन षत्वं, तत्राप्रतेरिति नानुवर्तते (प्रतितिष्टम्भिषति) "स्थादिष्वभ्यासेन" इति षत्वम् । (अवष्टभ्नाति) अवलम्बतइत्यर्थः । (अवष्टब्धा सेना) । आसन्नेत्यर्थः । अवाच्चालम्बनाविदूर्ययोः" इति षत्वं, प्रत्यतस्तम्भेदित्यत्र "स्तम्भुसिवुसहाम्" इति निषेधात् "स्तम्भेः" इति षत्वं न भवति, सन्वदित्वं लघुपरत्वाभावान्न भवति, दीर्घत्वं त्वलघुत्वादपि न भवति । (स्तम्भित्वा, स्तब्ध्वा) उदित्त्वादिड्विकल्पः, इटि "न क्त्वा सेट्" इति कित्त्वप्रतिषेधान्नानुषङ्गलोपः । (स्तब्धः) । "यस्य विभाषा" इत्यनिट्त्वं, (प्रतिष्टब्धः, निष्टब्धः) "प्रतिष्टब्धनिष्टब्धौ च" इति षत्वं, "स्तम्भेः" इति सानुषङ्गनिर्दृशादयमेव स्तम्भिः सौत्रोऽत्र गृह्यते न त्वत्र भौवादिकः स्तभिनभीति प्रतिस्तम्भादयः प्रयोगास्तस्य द्रष्टव्याः । (उत्तम्भः) । "तितुत्र" इतीण्निषेधः, "उदः स्थास्तम्भोः पूर्वस्य" इति पूर्वसवर्णस्तकारः, एवमुत्तभ्नोतीत्यादावपि, एवं (स्तुभ्नोति, स्तुभ्नाति, स्कभ्नोति, स्कुभ्नाति) इत्यादि स्तभ्नोतिवत् । (विष्कभ्नोति, विस्कभ्नाति, विष्कम्भ) इत्यादौ "वेः स्कभ्नातेर्नित्यम्" इति षत्वं, श्नानिर्दृशः स्कम्भतेर्निवृत्त्यर्थं इति विष्कम्भ इत्यादावपि भवति ॥ ५ ॥

सातिः सुखे ॥ अयं हेतुमण्यन्त इति जिनेन्द्रहरदत्तौ, तन्मते सतिरिति प्रकृत्या भवितव्यं, सातिः सौत्रो धातुरिति वृत्तिबोधिन्यासयोः, (सातयति) इत्यादि । (सातयः) । "अनुपसर्गाल्लिम्प" इत्यादिना शे शपि गुणायादेशौ ॥ ६ ॥

जु वेगितायां गतौ ॥ (जवति, जोता) इत्यादि, स्वरान्तत्वादनिट्त्वं, (जुजूषति । अजीजवत्) इत्यत्र णेश्चङि णौ कृतस्य स्थानिवत्त्वेनाभ्यासस्योवर्णान्तत्वात्" "ओःपुयणजि" इतीत्त्वे "दीर्घो लघोः" इति दीर्घः । (जवनः) । "जुचङ्क्रम्य" इति युच् (प्रजवो) । "प्रजोः" इति इनिः । (जूः । जुवौ) "भ्राजभास" इति क्विप् ताच्छीलिकः । तत्रैव सूत्रे जू इति दीर्घपाठाश्रयणात् क्विप्सन्नियोगेन दीर्घ इत्येके । अन्येतूत्तरसूत्रे दृशिग्रहणस्येहाप्यभिसम्बन्धाद् दीर्घ इत्याहुः । (जूतिः) । "ऊतियूतिजूति" इति क्तिनि दीर्घान्तोदात्तत्वे निपात्येते । (जवः) । "ऋदोरप्" इत्यप् । जवसवौ छन्दसीत्यज्विधानं तत्रान्तोदात्तार्थं न तु भाषायामेतद्रूपनिवृत्त्यर्थः (विजावको) नाम देशः, संज्ञायां ण्वुल् । (वैजावकः) "कच्छादिभ्यश्च" इत्यण् शैषिकः । "कोपधादण्" इत्येवाणि सिद्धे कच्छादिष्वस्य पाठो यदा भवादिर्मनुष्यस्तत्स्थो वा भवति तदा वैजायक इति, कच्छाद्यधिकारेण विधीयमाना मनुष्यतत्स्थयोर्वुञमुष्मादपि यथा स्यादिति ॥ ७ ॥

अथ नामप्रत्ययाः धातवः प्रदर्श्यन्ते ॥

"सुप आत्मनः क्यच्" । कर्मण इच्छायां वेति वर्तते, इहात्मशब्दः परव्यावृत्तिवचनः स्वशब्दपर्यायः, न चेतनद्रव्यवचनः, तस्मिन्हि किमयं कर्तृषष्ठ्यन्तः सन् इच्छया सम्बध्यते उत शेषषष्ठ्यन्तः सुबन्तेन, तत्राद्यपक्षे इच्छायाश्चेतनकर्तृत्वाव्यभिचारादानर्थक्यमात्मशब्दस्य किं च राज्ञः पुत्रमिच्छत्यमात्य इत्यादौ परेच्छायामपि चेतनस्यैव कर्तृत्वात्क्यच् स्यात् । यत्तु भाष्ये इहासामर्थ्यात्प्रत्ययाभाववचनं तत्प्रौढिवादमात्रम्, इष्यमाणवस्तुष्वत एव नित्यमन्यदपेक्षते इति नैतावतास्य सामर्थ्यम्, अत एव वृत्तावात्मग्रहणास्येदमेव प्रत्युदाहृतं, सुबन्तसम्बन्धपक्षेऽपीह राजादिना चेतनेनैव पुत्रादेः सम्बन्धात् क्यच् प्रसज्येतैव, आनर्थक्यं चाविशिष्टमेवात्मग्रहणस्य, अचेतनस्य व्यावर्त्यस्याभावात् । अत्र हरदत्तः । (वृक्षस्य फल-

मिच्छति, खट्वायाः पादमिच्छति) इत्यादौ यत्राचेतनार्थं किञ्चिदिष्यते तद्व्यावर्त्यमिति चेन्न, तत्रापि चेतनस्यैव परं शेषितत्वात्, सर्वमेव हि भोग्यं चेतनानामेव शेषभूतं, खट्वायाः पादमिच्छतीत्यत्रापि यस्य तत् खट्वादिकमुपभोग्यं तदर्थमेव तदिष्यते, खट्वादिकं तु द्वार-मात्रम्, अतः परव्यावृत्तिवचनमात्र एवात्मशब्द इति, तत्राप्यसौ यदि कर्तृषष्ठ्यन्तः सन्नि-च्छया सम्बध्येत तद्धेषितारमन्तरेणेच्छाया अभावात् अनर्थकः स्यात्, तस्मात्स्वशब्दप-र्यायः शेषषष्ठ्यन्तः सुबन्तेन सम्बध्यते, तेनायमर्थः सूत्रस्य। इषेः सन्निधानात्तत्कर्मण एषि-तुरेवात्मनः सम्बन्धिनः सुबन्तादिच्छायामर्थे वा क्यजिति। एवं चात्मनः पुत्रं परस्य दास-मिच्छतीत्यादौ वस्तुतः सुबन्तस्यात्मना सम्बन्धेऽपि परार्थमिष्यमाणत्वादिषिकर्त्रैवच्छेदेना-त्मना सम्बन्धाभावान्न क्यचः प्रसङ्गः। ककारो "नः क्ये" इति सामान्यग्रहणार्थः। चकार-स्तद्विघातार्थः। स्वरस्तु प्रत्ययस्वरेण धातुस्वरेण वा सिध्यति॥

अथोदाहरणानि॥

पुत्रमात्मन इच्छति (पुत्रीयति)। अत्र 'अकृतव्यूहाः पाणिनीयाः,' 'कृतमपि शास्त्रं निवर्तयन्ति' इति वा "अन्तरङ्गानपि विधीन्बहिरङ्गो लुग् बाधत" इति वा सन्धिकार्यरहि-तायाः द्वितीयस्याः "सुपो धातुप्रातिपदिकयोः" इति लुकि "क्यचि च" इत्यवर्णस्येत्वे स-नाद्यन्तत्वेन धातुत्वाल्लडादि। (अश्वस्यति, वृषस्यति, क्षीरस्यति लवणस्यति) "अश्वक्षीर-वृषलवणानामात्मप्रीतौ क्यचि" इत्यसुगागमः। अत्रात्मप्रीतावित्यपनीय "अश्ववृषयोर्मैथु-नेच्छायां" "क्षीरलवणयोर्लालसायाम्" इत्यर्थान्तरमुक्तं, तेनाद्ययोरुदाहरणयोरश्ववृषौ मैथुना-येच्छत इत्यर्थः। अन्ये तु परित्यक्तप्रकृत्यर्थान्मैथुनेच्छैवार्थ इत्याहुः। तथा च भट्टिः। इति रामो वृषस्यन्तीमिति। निघण्टुश्च वृषस्यन्ती तु कामुकीति। इतरयोरपि तृष्णातिरेकोऽभ्य-वजिहीर्षातिरेको लालसा, तेन क्षीरलवणेच्छायां लालसारूपायामित्यर्थलाभात् क्षीरलवणे अतिशयेनाभ्यवहर्तुमिच्छतीत्यर्थो भवति। अत्र क्यच्प्रकृतीनां प्रत्ययलक्षणेन यत्पदत्वं प्राप्तं "नः क्ये" इति नियमेन नान्तविषयमिति प्रकृत्यसुगकारयोः सवर्णदीर्घत्वं बाधित्वा "अतो गुणे" इति पररूपं भवति। अकारोच्चारणफलं तु पूर्वसूत्रोदाहरणे ब्राह्मणास इत्या-दौ। तथा [सर्वप्रातिपदिकेभ्यो लालसायामसुग्वक्तव्यः]। इत्यनकारान्तादसुकि दध्यस्य-तीत्यादौ च। अपरे त्वाहुः। सुग्वक्तव्य इति (दधिस्यति मधुस्यति,) "अश्वक्षीर" इ-त्यत्र भाष्ये द्वाविमावागमौ प्रस्तुत्य (दध्यस्यति। मध्वस्यति। दधिस्यति। मधुस्यति) इत्येवमर्थमभिधानात् दधिमधुशब्दावेवागमिनावित्येके। अन्ये तु सर्वप्रातिपदिकेभ्य इत्ये-कइति सर्वग्रहणात् बहुवचननिर्देशाच्च सर्वत्र भवतः। भाष्यं तूदाहरणमात्रमित्याहुः। अत्र मते दध्यस्यति मध्वस्यतीत्येवंशब्दः स्वार्थं न पुष्यति। अशनोदकधनेभ्यः क्यचि "अशनायो-दन्यधनायाबुभुक्षापिपासागर्धेषु" इति क्रमेणैतेष्वर्थेषु द्योत्येष्वाद्यन्तयोरीत्वापवाद आ-त्वम्, उदकस्योदादेशो निपात्यते, तेन (अशनायति, उदन्यति, धनायति,) बुभुक्षाप्रभृतीनां तद्वात्वे भोक्तुकामोऽशनमिच्छति, पातुकाम उदकमिच्छति। सत्यपि धने भूयो धनमिच्छती-ति क्रमेणार्थः। यस्त्वौत्तरकालिकमशनं, स्नानार्थमुदकं, दरिद्रः सन् धनमिच्छति तत्राशनी-यति, उदकीयति, धनीयतीति भवति। अत्रान्येऽशनायतीत्यादीनां प्रकृत्यर्थमनपेक्ष्य केवलं बुभुक्षादीनेवार्थं मन्यन्ते। अत्र भारविरमुमेव पक्षं प्रतिपेदे, तदाह 'किमुधन धनायितुम्'इति, निघण्टुश्च 'उदन्या तु पिपासा तृड्'इति। गार्ग्यमिच्छति (गार्गीयति)। अत्र "क्यच्व्योश्च" इत्यपत्यप्रत्ययकारस्य हलुत्तरस्य लोपे "क्यचि च" इतीत्वम्। (उपार्षभीयति। उपर्षभीय-ति। उपाल्कारीयति, उपल्कारीयति,) अत्र "वा सुप्यापिशलेः" इति सुबन्तावयवऋकारा-दिधातुपरत्वात् पूर्वपरयोरेका वृद्धिर्वा भवति। ऋकारऌकारयोः सावर्ण्यादियम् ऌकारादावपि भवति, तत्र "उरण् रपरः" इतिप्रत्याहारग्रहणात् लपरत्वम्, वाग्रहणं गुणस्य प्राप्त्यर्थमिति वृद्ध्यभावे स भवति, नन्वेतद्वा ग्रहणं यथा प्राप्ताभ्यनुज्ञानार्थं स्यात्, "ऋत्यक" इति प्रकृति-

भावः पक्षे कस्मान्न भवति । उच्यते । अत्राप्यनुवृत्तस्य धातुग्रहणस्य "उपसर्गादृति" इत्यत्रेवा(१)धिकविधानार्थत्वादिदं च धातुग्रहणस्य प्रकृतिभावबाधनार्थत्वमृतीयतावुपपादितम् । अत्रैव "वा सुपि" इत्यत्र वृत्तौ वाग्रहणस्य प्रयोजनं दर्शितम् । उपगता ऋषभीयका अमुं देशमित्यत्रौपर्षभीयको देश इति गुणप्रकृतिभावौ न भवतः, वृद्धिस्तु पूर्वसूत्रवत् "वा सुपि" इत्यत्रानुवृत्तस्योपसर्गग्रहणस्य प्राद्युपलक्षणार्थत्वाभावान्न भवति । उपलक्षकत्वाभावश्च ऋतीयतावुक्तः । ऋषभस्य समीपमुपर्षभं, तदिच्छति उपर्षभीयतीत्यत्र संग्रामयतीतिरूपस्य संग्रामं करोतीति संग्रामशब्दात्तत्करोति णिचा सिद्धावपि चुरादौ संग्रामयुद्धइतिपाठात्सम उपसर्गात् पूर्वमडाद्यर्थादन्यत्र सोपसर्गात् संघाताद्धातुसंज्ञानिमित्ते प्रत्यये चिकीर्षिते उपसर्गाः पृथक् क्रियन्त इति ज्ञापनात् सोपसर्गात् संघातात् धातुसंज्ञानिमित्तः प्रत्ययो यदि भवति संग्रामयतेरेवेति नियमाद्वा पृथक्कृतोपसर्गादेव भवतीतीहाप्यृषभशब्दादेव क्यचा भवितव्यम्, सुपस्तूपर्षभशब्दाद्विधानात् प्रत्ययग्रहणपरिभाषया तस्यैव सुबन्तत्वं न तु तदन्तावयवस्य ऋषभशब्दस्यापीत्यृषभीयशब्दः सुबन्तावयवो धातुर्न भवतीति तत्परत्वाभावादनुपसर्गत्वाच्च "वा सुपि" इति वृद्धेरप्रसङ्गः । अत एवोपसर्गस्य पृथक्कारादुपार्षभीयतीत्यत्र ऋषभीयस्यैवाङ्गत्वात्तस्यैवाड् भवति, तस्मादेव क्त्वायामुपेन प्रादिसमासेऽप्युपर्षभीय्येति भवति । तथा तस्यैव धातुत्वात् षशब्दस्य द्विर्वचने (उपर्षिषभीयिषति) इति । नन्वयं सङ्ग्रामशब्दः उपसर्गसदृशावयवोऽस्ति, कथमुक्तस्यार्थस्य प्रमाणं स्यादिति । उच्यते । पदान्तस्येतिकृतपरसवर्णं पठ्यते । अत्र हरदत्तः । संग्रामशब्दोऽनुदात्तेत्त्वार्थः, न च तन्मात्रार्थत्वे ग्रामयुद्धइति शक्यते पठितुम्, अध्यैष्टेत्यादौ आट इव मध्येऽटः प्रसङ्गादिति ज्ञापकमभाङ्क्षीत् । तदास्यानुदात्तेत्त्वमपाणिनीयमिति नोदेति । अत एव भृशादौ कैयटे संग्रामयतिरनुदात्तेद्बोद्धव्य इत्युक्तम् । अयं चानुदात्तेत्संग्रामयतिरिष्यत इतिभाष्ये ज्ञापकत्वमेवोक्तम् । ऋकारमिच्छति (ऋकारीयति, उपर्कारीयति) इत्यत्र "वा सुपि" इति वृद्धिः ऋतीति तपरकरणान्न भवति । अत एव शाकलः प्रकृतिभावोऽपि । (मालीयति)। अत्र "अकृतव्यूहाः पाणिनीयाः" इति माल आ अम् य स्थिते सुब्लुक्यन्तरङ्गत्वेन पूर्वमेकादेशे परमपीत्वं पश्चाद्भवति । उक्तं च भाष्ये । (२)असुपकादेश इत्वोत्वाभ्यां भवति अन्तरङ्गतर इति । ननु पूर्वमपीत्वे "यस्य" इति लोपेनेष्टसिद्धिरिति चेत् न, तस्मिन्नीत्वस्यासिद्धत्वात् । उस्रामैच्छत् (औस्रीयत् । औङ्कारीयत्) । आ ऊढः औढः । (औढीयत्) । अत्र "उस्यपदान्तात्" "ओमाङोश्च" "इतिपररूपम्" "आटश्च" इति पुनर्वृद्धिविधानार्थेन चशब्देन बाध्यते, तथा च वार्तिकम्, [उस्योमाङ्क्ष्वाटः प्रतिषेधः] इति, उसि ओमाङोश्च परयोराटः पररूपं नेत्यर्थः । औढीयदित्यत्राङ ओकारेण सहैकादेशे उपसर्गरूपत्वं पृथङ्न प्रतीयतइति सोपसर्गात्संग्रामयतेरित्यस्याप्रवृत्तेरोकारात्पूर्वमाटि तस्यान्तवद्भावेन लब्धाङ्गव्यपदेशस्यौकारस्य "आटश्च" "ओमाङोश्च" इतिप्राप्तेन पररूपेण वृद्धेर्बाधः स्यादिति वार्तिके च आङ्ग्रहणम्, एवम् आ इतः एतः ऐतीयदित्यपि द्रष्टव्यम् । आ इत एतः (एतीयति) प्र एतीयति (प्रेतीयति) इत्यत्र प्राप्तमवर्णान्तोपसर्गविषयमेङि पररूपं बाधित्वा प्राप्ताम् "एत्येधति" इति वृद्धिम् "ओमाङोश्च" इति पररूपं परत्वाद्बाधते, आ ऋश्या अर्श्या, आगता ऋस्येति प्रादिसमासः । "आद्गुणः" इत्यनेनाङृकारयोर्गुणः, तमिच्छति (अर्श्यीयति) । (आर्श्यीयत्) । अत्र गुणस्यान्तवद्भावेनाङ "ओमाङोश्च" इति प्राप्तं पररूपं परत्वाद्बाधित्वा प्राप्तः सवर्णदीर्घश्चकारेण पुनः पररूपविधानात् बाध्यते । (कुमारीयति, वधूयति) । (दधीयति । मधूयति) । "अकृत्सार्वधातुकयोः" इति दीर्घः । ऋकारस्य "रीङ ऋतः" इति रीङादेशः । ऋकारलृकारयोः साम्यमिच्छति । (रीयति) ।

---

(१) अनुवृत्तिबाधनार्थत्वादिति प्रचुरः पाठः ।

(२) यापोरेकादेश इति पाठान्तरम् ।

चर्व्येनालमिच्छतीत्यत्रापीदमेव रूपम्। अत्र तपरकरणाद्दृकारस्य राङभावात् ऋतीयतीति भवति। ऋत इत्वम् ऋकारान्तस्य धातोरितीह न प्रसजति, हेशब्दमिच्छति (हेयति,) गामिच्छति (गव्यति। गव्यिता) इत्यादौ अतो लोपे "क्यस्य विभाषा" इति हल उत्तरस्य क्यप्रत्ययथकारस्यार्धधातुके विधीयमानो लोपः सन्निपातपरिभाषया न भवति। (अगव्यीत्) इत्यत्र "वदव्रज" इत्यत्र हल्ग्रहणस्य हल्समुदायस्य प्रत्ययार्थत्वेऽपि अल्लोपस्य स्थानिवत्त्वेनाङ्गस्य हलन्तत्वाभावात् न वृद्धिः। (रैयति। नाव्यति, नाव्यिता,) गव्यतिवद्धान्तादेशो यलोपाभावश्च। (श्वलिह्यति, श्वलिह्यिता, श्वलिहिता,) अल्लोपस्य पूर्वविधौ स्थानिवत्त्वात् "न धातुलोपे" इति वा लघूपधगुणाभावः। (अश्वलिहीत्। अश्वलिहिष्यत्) अत्राल्लोपस्य स्थानिवत्त्वाद्धलन्तलक्षणायाः वृद्धेरभावः। अत्र हो ढो न भवति "नः क्ये" इति नान्तस्यैव पदत्वाद्धकारस्य पदान्तत्वाभावात्। अत एव गोदुह्यतीत्यत्र "दादेः" इति घत्वं, (मित्रद्रुह्यति) इत्यादौ "वा द्रुह" इति तद्विकल्पः, (उपानह्यति) इत्यत्र "नहो ध" इति धत्वम्। (अनुडुह्यति) इत्यत्र "वसुस्रंसु" इति दत्वं न भवति। पुरमिच्छति (पुर्यति। दिव्यति।) "हलि च" इति दीर्घो रेफवकारान्तस्य धातोर्हल्परत्वे इतीह न भवति। (चतुर्यति) अत्रापि धातुर्न रेफान्त इति दीर्घो न भवति, गिरमिच्छति (गीर्यति,) अत्र गिर ऋत इत्वे रेफान्तो धातुर्न हल्पर इति (गीर्यिता, गिरिता,) "क्यस्य विभाषा" इति यलोपपक्षे हल्परत्वाभावान्न दीर्घः, "र्वोरुपधाया" इति रेफवकारान्तस्य धातोः पदस्य विधीयमानेऽपि न भवति, "नः क्ये" इति नियमेन पदत्वाभावात्, स्वरिच्छतीत्यादावव्ययेभ्यः क्यचः [मान्ताव्ययेभ्यः प्रतिषेधः] इति क्यचः प्रतिषेधाद्वाक्यमेव। यत्तत्र गोसमानाक्षरनान्तादित्येके इति क्यचः प्रकृतिपरिगणनं तद्वाच्यतीत्याद्यसिद्धिप्रसङ्गात् न स्थितः पक्ष इति कैयटादौ स्थितम्। तमिच्छति (तद्यति। यद्यति)। इदमिच्छतीत्यत्र क्यचि मान्ताव्ययप्रतिषेधाद्वाक्यमेव, इह मान्तग्रहणेन प्रातिपदिकस्य विशेषणादिमाविच्छति काविच्छतीत्यादावपि वाक्यमेव भण्यते। प्राणितीति (प्राण्, प्राण्यति। राजीयति)। "नः क्ये" इति पदत्वात् "न लोपः प्रातिपदिक" इति नलोपे "क्यचि च" इतीत्वं, न च नलोपस्यासिद्धत्वं, "नलोपः सुप्स्वरसञ्ज्ञातुग्विधिषु कृति" इति नियमात्। (अहर्यति) "रोः सुपि" इति अह्नः रुः, पदस्य सुप्परत्वाभावात् "अहन्" इति रुत्वापवादो रेफः, नन्वसौ न लोपे पूर्वत्रासिद्धः स्यात् अस्ति वचनस्यावकाशः, हे अहरित्यत्र "स्वमोर्नपुंसकात्" इति सोर्लुका लुप्तत्वे तस्य नलोपश्च "न ङिसंबुध्योः" इति निषिध्यते। नैष दोषः। अहन्नित्यत्राह्न इति स्थानेन शब्दे निर्दिश्येऽहन्निति प्रथमान्तेन निर्देशादहन्नित्यावृत्त्याऽहन्नेव न तु लुप्तनकार इति स्थितं, स एवाहन्शब्द इहापि रेफविधावनुवर्तत इति। उज्झेः क्विबन्तादनुकरणाद्वा (उज्झयति। ककुद्यति। अर्घ्यति। परिवृढ्यति। विलम्ब्यति। अङ्ग्यति। गृह्यति)। अर्घादिभ्यस्तत्करोतीति णौ लोपे णेश्च क्वावुदाहरणानि, परिवृढेर्णाविष्ठवदित्यतिदेशाद्दकारस्य "रऋतो हलादेः" इति रभावश्च, अतोऽन्यत्राङ्गोर्देर्धातोरनुकरणात्क्विबन्ताद्वा क्यच् द्रष्टव्यः, युध्यति भिषज्यतिप्रभृतयो गताः, प्रक्रियासाम्याद्दृष्टान्तेन प्रदर्शिताः, त्वामिच्छति, मामिच्छति, (त्वद्यति, मद्यति,) "प्रत्ययोत्तरपदयोश्च" इत्येकार्थवृत्तयोर्युष्मदस्मदोर्मपर्यन्तस्य त्वमावादेशौ भवतः। "त्वमावेकवचने" इत्यत्र एकस्य वचनमेकवचनं न तु पारिभाषिकमिति स्थिते तत्रापि तस्यैवानुवर्तनादेकार्थानुवृत्त्योरित्युक्तं, तेन युष्मदस्मच्छब्दौ यदा एकार्थे समासस्तु द्विबह्वर्थस्तदापि त्वमौ भवतः, यथा अतित्वामिच्छति अतिमामिच्छति (अतित्वद्यति, अतिमद्यति,) विग्रहवाक्ये अतित्वामतिमामितिरूपं, युष्मदस्मदोर्द्वितीयाद्विवचने तस्य "ङेप्रथमयोः" इत्यमि युष्मदस्मदोरेकार्थत्वात् "त्वमावेकवचने" इति मपर्यन्तस्य त्वमयोर्दकारस्य शेषेलोपापवादे "द्वितीयायां च" इत्यात्वे एकादेशे च "युवावौ द्विवचने" इत्यत्रापि द्वयोर्वचनं द्विवचनमिति स्थिते तत्र च युष्मदस्मदोर्युवावादेशौ न शङ्क्यौ। अतित्वा-

नतिमानिति तु "ङेप्रथमयोः" इत्यमादेशापवादे "तस्मादित्युत्तरस्य" इति परिभाषया "शसो न" इति तदादेर्नकारे पूर्ववत्वमात्वैकादेशेषु सकारस्य संयोगान्तलोपे च भवति। नन्वत्र युष्मदस्मदोरेकार्था विभक्तिः परेति "त्वमावेकवचने" इत्येव त्वमयोः सिद्धेः किं पुनः प्रत्ययोत्तरपदवचनेन। भवेदेतदेव विभक्तिपरत्वे सिद्धे, तदेव तु न सिद्ध्यति। विभक्तेर्लुका लुप्तत्वेन तत्प्रत्ययलक्षणाभावात्। नन्वतरङ्गत्वाल्लुकः पूर्वं त्वमादेशौ भविष्यतः। न च लुका लुप्तत्वेनानयोर्बाधनमाशङ्क्यम्, अन्तरङ्गत्वादादेशयोर्नित्यान्तरङ्गयोरन्तरङ्गं बलीयः, तथोक्तं, परनित्यान्तरङ्गप्रतिपदविधयो विरोधिसन्निपाते तेषां मिथः प्रसङ्गे परबलीयस्त्वमिति। एवं तर्हीदमेव "प्रत्ययोत्तरपदयोश्च" इत्यादेशविधानं ज्ञापकम् 'अन्तरङ्गानपि विधीन्बहिरङ्गो लुग् बाधते' इति। नन्वेतत् परमस्त्वं, (त्वतरः,) त्वं प्रधानमस्य (त्वत्प्रधानम्) तुभ्यं हितं (तद्धितं) तवेदं (त्वदीयं,) तव पुत्रः (त्वत्पुत्रः) परमोऽहं (मत्तरः) अहं प्रधानमस्य (मत्प्रधानं,) मह्यं हितं (मद्धितं) ममेदं (मदीयम्) मम पुत्रो (मत्पुत्र) इति "त्वाहौसौ" "तुभ्यमह्यौ ङयि" "तवममौ ङसि" इति विधीयमानानन्तरङ्गानपि त्वाहादीन् बाधित्वा त्वमादेशविधानेन अर्थवद्वचनमिति कथं ज्ञापकं स्यात्, इदं तर्हि ज्ञापकम् "उत्सर्गसमानदेशा अपवादा" इति त्वाहाद्यपवादत्वेनैव त्वमयोर्मपर्यन्तावयवत्वे सिद्धे यत्पुनर्मपर्यन्तस्येत्यनुवृत्त्या विधानम्, अबाधे तु लुकान्तरङ्गाणामपि त्वाहादीनां तदपवादत्वेनैव त्वमयोर्मपर्यन्तविषयत्वस्य सिद्धेः किं तदर्थेनानेन मपर्यन्तस्येत्यनेन। ननु शबकल्पबाद्यपवादानां बहुजादीनां भिन्नविषयाणामपि दर्शनात् सर्वादेशनिवृत्त्यर्थमेतत् स्यादिति कथं ज्ञापकं भवति। उच्यते। इह त्वाहादयो विषयनिर्देशार्थमनुवर्तन्ते, तेन त्वाहादीनां प्रसङ्गे प्रत्ययोत्तरपदयोस्त्वमयोर्विधानादेव मपर्यन्तविषयत्वे सिद्धे यत्पुनर्मपर्यन्तस्येत्यनुवर्तनेनानयोर्विधानं त्वया कृतं त्वत्कृतं त्वामिच्छति त्वद्यतीत्याद्येवमर्थमिति ज्ञापकमेवोक्तार्थस्य। एवं च युवामिच्छति (युष्मद्यति) अतियुवामिच्छति (अतियुष्मद्यति,) आवामिच्छति (अस्मद्यति) अत्यावामिच्छति (अत्यस्मद्यति) इत्यत्र युष्मदस्मदोर्द्विवचनत्वेऽपि विभक्तेर्लुप्तत्वेन तत्परत्वाभावात् "युवावौ द्विवचने" इति युवावौ न भवतः, लुकः पूर्वत्वेनानयोरन्तरङ्गत्वेऽपि न प्रसङ्गो बहिरङ्गेणापि लुका बाधस्येदानीमेव ज्ञापितत्वात्, "प्रत्ययोत्तरपदयोः" इति त्वमौ त्वमेकार्थत्वान्न प्रसजतः। वाक्येऽतित्वामतियुवामिति रूपं युष्मदस्मद्भ्यां द्वितीयैकवचनद्विवचनयोः "ङेप्रथमयोः" इत्यमिति प्रकृत्योर्मपर्यन्तस्य युवावयोर्देकारस्य द्वितीयायां चेत्यात्वे सवर्णदीर्घेऽमि पूर्वत्वे च, अतियुवान् अत्यावानिति रूपं तु शसि तदादेरमादेशापवादे "शसो न" इति नकारे प्रकृत्योः पूर्ववत् युवावयोरात्वे सकारस्य संयोगान्तलोपे भवति। अतियुष्मानिच्छति (अतियुष्मद्यति) अत्यस्मानिच्छति (अत्यस्मद्यति) इत्यत्रापि "प्रत्ययोत्तरपदयोः" इति त्वमौ प्रकृत्योरनेकार्थत्वादेव न भवतः। अत्रापि वाक्ये अतियुष्मानित्यादिरूपमतियुवामित्यादिवन्नेयम्। (उक्ष्यति। तृप्यति। उच्छ्यति। मज्यति। मथ्यति। अद्यति)इत्यादिवत्प्रक्रियोन्नेया। तत्रोच्छिनं क्विबन्तः,तत्र हि"च्छ्वोः शूडनुनासिके" इति शकारेण भवितव्यम्। (वाच्यति। आब्यति। मरुत्यति। तुक्यति। लुप्यति। दिश्यति। षष्ठ्यति, पयस्योति) अत्र एत्रादेः कर्मणः जीवत्यादौ प्राणादिवत् क्यजन्तेऽन्तर्भावादकर्मत्वाह्लादयो भावकर्त्रोर्भवन्ति। उदाहृतं कर्त्तरि। भावे पुत्रीयते इत्यादि द्रष्टव्यम्। पुत्रीयादेः सनि यथेष्टं नामधातूनामिति पर्यायेण सर्वस्यैकाचो द्विर्वचनात् (पुपुत्रीयिषति, पुतित्रीयिषति, पुत्रीयियिषति) इत्यादि भवति। इह कस्मान्न भवति महान्तं पुत्रमिच्छति (महापुत्रीयति) इति। किमत्रात्वाभावश्चोद्यते, अथ केवलात् प्रत्ययाभावः, समुदायाद्वा, आत्वं न भवति प्रत्ययार्थेन सापेक्षत्वात् समासाभावादनुत्तरपदत्वात्, प्रत्ययाभावो महता सापेक्षत्वेन असामर्थ्यात्, समुदायात्त्वकर्मकत्वात् महत्वविशिष्टस्य पुत्रस्येष्यमाणत्वेनाकर्मकत्वेन परस्परं प्रत्ययार्थत्वेन च सम्बन्धे नास्ति सामर्थ्यम्। सुब्ग्रहणं च पदविधित्वेन समर्थपरिभाषोपस्थानार्थमेव क्रियते।

ननु धातुव्यावृत्त्यर्थ स्यात्, संस्तत्र बाधको भविष्यति। प्रातिपदिकादुत्पत्तावपि नान्ते न लोपस्तु सुबन्तादुत्पत्तौ यद् "नःक्ये" इति पदत्वस्य नियामकं तदेवात्र विधायकमिति भविष्यति। नन्वसति सुब्ग्रहणे विशेषाभावात् प्रातिपदिकादिव सुबन्तादपि प्रत्ययोत्पत्तेर्वाच्यतीत्यादौ कुत्वं स्यात्, एवं तर्हि "नः क्ये" इतिवचनं सुबन्तादुत्पत्तौ नियमार्थं प्रातिपदिकादुत्पत्तौ विध्यर्थं च भविष्यति। नन्वत्र कर्मग्रहणेनैव सुबन्तत्वं लप्स्यते, पञ्चरूपपक्षेऽप्यस्य द्योतिकया विभक्त्या भाव्यम्, अतोऽन्तरेणापि सुब्ग्रहणं वस्तुतः पदविधित्वेन समर्थपरिभाषोपस्थास्यते इति किं तद्ग्रहणेन। मैवं, यत्र हि पदस्यैवासाधारणं किञ्चिद्रूपमाश्रीयते स एव पदविधिः, न त्वीदृशमपीति, कर्मग्रहणं तु न पदस्यैवासाधारणं 'धातोः कर्मण' इत्यपि दर्शनात्। नहीदानीमिदं भवति महापुत्रीयतीति, भवति, यदैतद्वाक्यं महान्पुत्रः महापुत्रस्तमिच्छतीति ॥

"काम्यच"॥ क्यचो विषयेऽयं भवति, "मान्ताव्ययेभ्य" इति निषेधाभावात् न तान्येवास्याप्राप्तक्यज्विषयः स्यादिति वाच्यम्, पाश्चात्यस्य कातीयवचनस्य सूत्रप्रणयनकालेऽभावत्। पुत्रमात्मन इच्छति (पुत्रकाम्यति) इत्यादि, त्वत्काम्यति, मत्काम्यति, युष्मत्काम्यत्यस्मत्काम्यति) इत्यत्र "प्रत्ययोत्तरपदयोः" इति त्वमौ, तदभावश्च। क्यचि चित्करणं पुत्रकाम्यतीत्यादौ सति शिष्टस्वरं बाधित्वा धातुस्वरो यथा स्यादिति, ककारस्तु नेत्, प्रयोजनाभावात्। अग्निकाम्यतीत्यादावधातुविहितत्वादार्धधातुकत्वाभावान्नास्ति गुणप्रसङ्गः। कंसं परिमार्ष्टि कंसपरिमृट्, कंसपरिमृट्काम्यतीत्यत्र मृजेर्वृद्धिः प्रत्ययमात्रे विधीयमानाऽपि 'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्' न प्रसजति। तत्प्रत्ययो धातुसंशब्दनेन विहितः प्रत्ययः, यजेः "विजुपेश्छन्दसि" इति विच्युपयट्, वचेः क्विपि (वाक्,) उपयट्काम्यतीति वाक्काम्यतीति। अत्र यजादिभिः कितो विशेषणात् "धातोः स्वरूपग्रहणे" इति वा सम्प्रसारणाप्रसङ्गः अन्तर्वर्तिन्या विभक्त्या यथायोगं पदकार्याणि द्रष्टव्यानि। (पयस्काम्यति। यशस्काम्यति)। अन्तर्वर्तिन्या विभक्त्या पदत्वेन सोरुत्वे विसर्जनीये तस्य कुप्वोरपदाद्योः परयोर्विधीयमानं "सोपदादौ" इति सत्वं भवति, स्वःकाम्यतीत्यादौ सोपदादावनव्ययस्येति वचनात् सत्वाभावः। अधिकरणशक्तिप्रधानस्याप्यस्य वृत्तिविषये शक्तिमत्प्रधानत्त्वादिषिणा कर्मत्त्वेन योगः षष्ठ्या, यथा दिवाभूता रात्रिः दोषाभूतमहरित्यादावधिकरणशक्तिप्रधानत्त्वेऽपि शक्तिमत्प्राधान्यादभूततद्भावयोगः। वाः काम्यतीत्यादौ रोः काम्यइति रोरेव विसर्जनीय इति काम्ये सत्वनियमात्सत्वाभावः। सर्पिष्काम्यति धनुष्काम्यतीत्यादौ सत्वं बाधित्वा "इणःष" इति षत्वं भवति सत्वस्यापवाद इति यत्र तत्प्रसङ्गस्तत्रैव भवतीत्युच्चैःकाम्यति गीःकाम्यतीत्यादौ न भवति। पुंस्काम्यतीत्यत्र पुंसः संयोगान्तलोपे "पुमः खय्यमपरे" इति रुत्वं निर्वर्त्य [संपुंकानां सो वक्तव्यः] इति सत्ववचनान्नास्ति विसर्जनीय इति न षत्वप्रसङ्गः।

"उपमानादाचारे"॥ कर्मणः सुप इति च वर्त्तते। तत्र प्रत्ययार्थस्याचारक्रियायाः सन्निधानात्तदपेक्षया कर्मण उपमानात् सुबन्तादाचारे क्यजित्यर्थो भवति। यद्यपि काम्यजनन्तरस्तथापि पूर्वसूत्रे चकारेणेहाद्य एव क्यजनुकृष्टः स एवात्र विधीयते, पुत्रमिवाचरति छात्रम्। उदाहरणान्यवशिष्टानि प्रक्रिया चेच्छाक्यजन्तवद्द्रष्टव्यानि। अत्रोपमानेनोपमेयमाक्षिप्यते, तत्र प्रत्यासत्त्या साधारणधर्मभूताधारक्रियापेक्षया कर्मतैव, उपमानकर्मवत् प्रत्ययान्ते धातावनन्तर्भावादनभिहितमिति तत्र द्वितीया भवति। तथा पुत्रीयतइत्यादौ कर्मणि यगादयोऽपि भवन्ति। नन्वन्या पुत्रविषयाचारक्रियाऽन्या छात्रविषयेति आचारक्रियायाः वस्तुतो भेदादेककर्मधर्मसमावेशस्यात्राभावात्कथमौपम्यम्। उच्यते। आचरितुरेकत्वादाचारसमावेशादाचार एकोऽवसास्यते, अन्यथा सर्वत्रैवोपमानोपमेयगतस्य धर्मस्य वस्तुतो भेदादौपम्यव्यवहारच्छेदः स्यात्। [अधिकरणाच्चेति वक्तव्यम्] इत्युक्तत्वात् (प्रासादीय-

ति कुड्यामत्यादौ सप्तम्यन्तादपि भवति । त्वयीवाचरति (त्वद्यति,) मयीवाचरति (मद्यात,) युष्मदस्मदोरेकार्थत्वात् "प्रत्ययोत्तरपदयोः" इति त्वमौ, युवयोरिवाचरति आवयोरिवाचरति (युष्मद्यति, अस्मद्यति,) अत्र नास्त्येकार्थत्वमिति त्वमौ न भवतः, द्विवचनत्वेऽपि विभक्तेर्लुका लुप्तत्वान्न युवावौ, लुकः पूर्वं तु न भवतो 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुक् बाधत' इत्युक्तत्वात् । युष्मास्विव आचरति अस्मास्विवाचरतीत्यत्रापि एकार्थत्वाभावान्न भवतस्त्वमौ, त्वामतिक्रान्ते (अतित्वयि,) अतिक्रान्तयोः (अतित्वयोः,) अतिक्रान्तेषु (अतित्वासु,) एवम् (अतिमयि, अतिमयोः, अतिमासु,) सर्वत्रात्र प्रकृत्योरेकार्थत्वात्त्वमयोरजादावनादेशे विभक्तौ "योऽचि" इति दकारस्य यकारः, हलादौ तु युष्मदस्मदोरनादेशविभक्तिपरत्वादात्वम्, एभ्योऽपि क्यचि त्वमयोस्त्वद्यति मद्यतीति भवतः । युवामतिक्रान्ते, (अतियुवयि,) अतिक्रान्तयोः, (अतियुवयोः,) अतिक्रान्तेषु, (अतियुवासु,) एवम् (अत्यावयि, अत्यावयोः, अत्यावासु,) अत्र प्रकृत्योर्द्विवचनत्वे युवावयोर्दकारस्य पूर्ववद्यत्वात्वे, एभ्यस्तु क्यचि प्रकृत्योरेकार्थत्वाभावात् न त्वमौ भवतः, युष्मद्यति अस्मद्यतीति भवतः, द्विवचनत्वेऽपि विभक्तेर्लुका लुप्तत्वेन तत्परत्वाभावात् युवावौ न भवतः, तथा लुकः पूर्वमपि न भवतीति इदानीमेवोक्तं, युष्मानतिक्रान्तेषु (अतियुष्मयि,) अतिक्रान्तयोः, (अतियुष्मयोः,) अतिक्रान्तेषु (अतियुष्मासु,) एवम् (अत्यस्मयि, अत्यस्मयोः, अत्यस्मासु,) पूर्ववद्दकारस्य यत्वात्वे, अत्रापि प्रकृत्योरेकार्थत्वाभावेन त्वमयोरभावादतियुष्मद्यति, अत्यस्मद्यति इति भवतः ।

"कर्तुः क्यङ् सलोपश्च" ॥ उपमानात् सुपः आचारे वेति वर्तते । अत्रापि पूर्ववत् सन्निहिताचारक्रियापेक्षया कर्तृत्वोपमानत्वे, तेनायमर्थः । उपमानादाचारक्रियायाः कर्तुः सुबन्तादाचारेऽर्थे वा क्यङिति । ककारो "नः क्ये" इति सामान्यग्रहणार्थः, ङकारस्तदविघातार्थस्तङर्थश्च, लोपश्चेति चशब्दोऽन्वाचये, सेति लुप्तषष्ठीकं पृथक् पदं, तेन च लोपापेक्षया स्थानषष्ठ्यन्तत्वेन सम्बन्धिनो जायमानस्य कर्तुर्नित्यं तस्य विशेषणात्तदन्तविधौ सकारान्तेभ्यो क्यङ् तस्य सकारस्य लोप इत्यर्थो भवति । अत्रापि वेत्यस्य सम्बन्धात्तस्य च व्यवस्थितविभाषात्वादोजोप्सरसोर्नित्यं सलोपो भवति अन्यत्र विकल्पेन, उक्तं च । [ओजसोऽप्सरसोर्नित्यं पयसस्तु विभाषया] इति । पयस इति ओजोऽप्सरोव्यतिरिक्तानां सकारान्तानामुपलक्षणमिति व्याख्यातारः । श्येन इवाचरति (श्येनायते । काकायते । ओजायते । अप्सरायते, पयस्यते, पयायते, यशस्यते, यशायते) ओजःशब्दो वृत्तिविषये तद्वति वर्तते, (अर्चिष्यते, सर्पिष्यते) इत्यादौ प्रत्ययसकारत्वात्षत्वम्, अत्र "नः क्ये" इति नियमेन सकारस्य पदान्तत्वाभावः, पदान्तत्वे हि "अपदान्तस्य मूर्धन्य" इति वचनात् षत्वं न स्यात् । अन्तस्य सकारस्य लोपवचनात् (हंसायते स्वरसायते) इत्यादौ अनन्त्यस्य लोपो न भवति । उपमानकर्तुरिव उपमेयकर्तुः प्रत्ययान्ते धातावन्तर्भावात् तत्र लादयो भवन्ति । अकर्मकत्वात् भावे च श्येनायत इति, त्वामिवाचरति (त्वद्यते मद्यते,) "प्रत्ययोत्तरपदयोश्च" इति युष्मदस्मदोरेकार्थयोस्त्वमौ, युवामिवाचरति (युष्मद्यते । अस्मद्यते ।) अत्रानेकार्थत्वान्न त्वमौ, अन्तर्वर्तिन्या विभक्तेर्लुप्तत्वात्, "युवावौ द्विवचने" "यूयवयौ जसि" इति युवावादयो न भवन्ति । लुकः पूर्वं तु बहिरङ्गेणापि तेन बाधस्योक्तत्वान्न भवन्ति, त्वामतिक्रान्तो (अतित्वम्,) अतिक्रान्तौ (अतित्वाम्) अतिक्रान्ताः (अतियुयम्,) मामतिक्रान्तः (अत्यहम्,) अतिक्रातौ (अतिमाम्,) अतिक्रान्ताः (अतिवयं,) सर्वत्र विभक्तेः 'ङेः प्रथमयोरम्" इत्यम्भावो द्विवचनादन्यत्र शेषे लोप इति दकारलोपस्तत्र "प्रथमायाश्च द्विवचने" इत्यात्वं, तत्र सौ "त्वाहौ सौ" इति त्वाहौ, अन्यत्र "त्वमावेकवचने" इति त्वमौ, आभ्यामपराभ्यामपि त्वाहयोर्न बाधस्त्वाहादीनां तु पूर्वविप्रतिषेधेन तएवेष्यन्तइति उक्तत्वात । जसि तु न्याय्यविप्रतिषेधेन यूयवयाभ्यां त्वमोर्बाध एव, एभ्यः क्यङि (अति-

त्वद्यतेऽतिमद्यते) इति भवतः, युवामतिक्रान्ते (अतित्वाम् ,) अतिक्रान्तौ, (अतियुवाम् ,) अतिक्रान्ताः (अतियूयम् ,) एवं मामतिक्रान्तो (अत्यहम् ,) अतिक्रान्तौ (अत्यावाम्) अतिक्रान्ताः (अतिवयं,) सौ जसि च "त्वाहौ सौ" "यूयवयौ जसि" इत्याभ्यां पराभ्यां "युवावौ द्विवचन" इत्यस्य बाधः। द्विवचने तु युवावयोः "प्रथमायाश्च द्विवचन" इति दकारस्यात्वम्। इतरयोस्तु शेषे लोपः, एभ्यस्तु क्यङि युष्मदस्मदोरनेकार्थत्वात्त्वमयोरभावात् (अतियुष्मद्यते अत्यस्मद्यते) इति भवतः । अन्तर्वर्तिनीं विभक्तिमाश्रित्य तत्तदादेशाभावस्तत्रतत्रोक्तो, युष्मानतिक्रान्तः (अतित्वम्) अतिक्रान्तौ (अतियुवाम् ,) अतिक्रान्ताः (अतियूयम् ,) एवमस्मानतिक्रान्तो (अत्यहम् ,) अतिक्रान्तौ (अत्यस्मान् ,) अतिक्रान्ताः (अतिवयम् ,) पूर्ववत् प्रथमाया द्विवचने आत्वम्, अन्यत्र शेषे लोपो यथायोगं "त्वाहौ सौ" "यूयवयौ जसि" इति त्वाहादयश्च, एभ्योऽपि क्यङि (अतियुष्मद्यते, अत्यस्मद्यते) इति भवतः । उदाहरणान्यवशिष्टानि प्रक्रिया चेच्छाक्यजन्तवदुन्नेयानि । अवर्णस्येत्वादिकं "क्यचि च" इतिविधीयमानमिह न भवति, कुमारीवाचरति (कुमारीयते,) हरिणीवाचरति (हरितायते) गौरीवाचरति (गौरायत,) गुर्वीवाचरति (गुरूयते,) "क्यङ्मानिनोश्च" इति स्त्रीशब्दस्य पुम्शब्दः, अत्र "स्त्रियाः पुंवद्भाषितपुंस्कादू" इति वर्तते, तत्र स्त्रीशब्देन स्त्र्यर्थशब्द उच्यते, पुंवच्छब्देन पुमर्थो, भाषितः पुमान् यस्मिन् अर्थे प्रवृत्तिनिमित्ते स भाषितपुंस्कस्तद्योगाच्छब्दोऽपि, स चेह स्त्र्यर्थः,ऊङोऽभावः अनूङ् , षष्ठ्यर्थे प्रथमा, भाषितपुंस्कात् पर ऊङोऽभावो यस्मिन् स्त्रीशब्दे स भाषितपुंस्कादनूङ् , निपातनात्पञ्चम्या अलुक् , एतदुक्तं भवति, पुंसि यत् प्रवृत्तिनिमित्तं तदुक्तस्त्वार्थवाचिनः शब्दस्य पुम्शब्द आदेशो भवति ऊङन्तस्य नेति, तेन [श्वशुरस्योकाराकारयोर्लोपश्च] इति ऊङि श्वश्रूयते इत्यत्र पुवत्त्वं न भवति । तथा भाषितपुंस्कत्वाभावाद् द्रोणीयत इत्यादौ न भवति । अत्र हरदत्तः । पुंसि द्रोणशब्दस्य परिमाणप्रवृत्तिनिमित्तमाह । स्त्रियां तु द्रोणीनाम जातिः । कैयटकारस्तु द्रोणशब्दस्तु परिमाणवृत्तिर्भाषितपुंस्कः स एव भेदोपचारात्साद्दश्यनिबन्धनप्रत्यभिज्ञानवशात् वा स्त्रियां वर्तते इति पुंसि प्रवृत्तिनिवृत्तेनार्थ्यमानत्वेन युक्तः स्त्र्यर्थयोगोऽस्तीति स्यादेव द्रोण्यादीनां भाषिपुंस्कत्वं, नैतत्। एवं हि व्यावर्त्याभावात् भाषितपुंस्कग्रहणमनर्थकं स्यात्। अतो यः शब्दो भाषितपुंस्को यत्प्रवृत्तिनिमित्तेन युक्तस्तद्युक्तं स्त्र्यर्थं तद्रूपेणाह स चेह भाषितपुंस्क आश्रीयते न तु रूपान्तरेणापि, न च द्रोण्यादिशब्दः स्वार्थमर्थ्यमाणतयाहेति । एवमपि द्यौरिवाचरति (दीव्यति) इति, दिवशब्दस्य स्वर्गशब्दस्य चैकमेव प्रवृत्तिनिमित्तमस्ति च तद्युक्ततया स्वार्थाभिधानमित्यर्थसाम्यात् पुंल्लिङ्गः स्वर्गशब्दः प्राप्नोति । नैष दोषः, यस्य शब्दस्य पुंवद्भावः स एव शब्दः स्त्रीकृतविकृतिरहितः पुमांसमाहेति प्रत्यासत्त्या लब्धत्वात्, न च दिवशब्दः पुमांसमाह । इदमत्र सूत्रार्थतत्त्वं, यः शब्दो येन प्रवृत्तिनिमित्तेन पुंसि प्रवृत्तस्तेनैव स्त्रियां वर्तते तस्य पुंवद्भाव, ऊङन्तस्य नेति । एवं हंसस्य स्त्री वरटा, सारसस्य लक्ष्मणा, अङ्गारकस्य मालिका, कच्छपस्य डुलीका,ऋषभस्य रोहित्,पुरुषस्य योषिदित्यादौ नियमस्त्रीवचनानां वरटादीनां पुंवत्वेन वरटादयो न भवन्तीति वरटायतइत्यादि भवति, शक्यन्ते च साहचर्यात्पुंशब्दैरपि स्त्रीशब्दार्थाः प्रतिपादयितुं, यद्येवं गर्भिणीवाचारति गर्भीयतइत्यत्र कथं पुंस्त्वं, यतो गर्भी व्रीहिरित्यादौ पुंस्यवयवभूतगर्भसम्बन्धः प्रवृत्तिनिमित्तं स्त्रियान्त्वनवयभूतगर्भसम्बन्ध इति प्रवृत्तिनिमित्तं भिद्यते, नैष दोषो यदुभयत्रापि गर्भसम्बन्धमात्रमेव प्रवृत्तिनिमित्तम् , एवं प्रसूताप्रजातादिशब्दानामप्यपत्यापत्यवत्सम्बन्धमात्रं प्रवृत्तिनिमित्तं न पुंसि गर्भाधानं स्त्रियां तु गर्भविमोचनमिति समानप्रवृत्तिनिमित्तत्वात् प्रसूतायतइत्यादौ पुंस्त्वं भवति, इदं च प्रसूतभार्या इत्यर्थमवश्यमेवेष्टव्यम् , समानः पतिरस्याः (सपत्नी,) "नित्यं सपत्न्यादिषु"इति नकारे ङीप्। अत एव निर्देशात्समानस्य सभावः। सप-

त्नीवाचरतीत्यत्र सपत्नीयत इति भवितव्यमिति न्यासे, यद्वाह नित्यं सपत्न्यादिष्वित्यत्र समुदायस्योच्चारणान्नियोगत एषां समुदाय ईकारान्त एव यथा स्यादिति । तेन सपत्नीभार्य इति स्त्रियाः पुंवद्भावो न भवतीति । तसिलादिष्वित्यत्र भाष्यकैयटयोस्तु "भस्याढे तद्धिते" इति पुंवत्त्वं प्रस्तुत्य कुण्डिनीशब्दाद्गर्गादियञि पुंवत्त्वेन कुण्डिन्शब्दे "नस्तद्धिते" इति टिलोपे कौण्डेय इति प्राप्नोति । तथा सपत्नीशब्दाच्छिवाद्यणि सपतिशब्दादेशे सापत इति चोदयित्वा ढग्रहणमपनीय तत्रानपत्य इति न्यस्यापत्यप्रत्यये पुंवद्भावाद्यञि ईकारस्य "यस्येति च" इति लोपे तस्य "नस्तद्धित" इति टिलोपस्य स्थानिवत्त्वान्नान्तस्य तद्धितपरत्वाभावात्कौण्डिन्य इति सिध्यति । तथा शिवाद्यणोऽपत्यप्रत्ययत्वात्सपतिशब्दादेरेवाभाव इति परिहृत्य एवं सति गार्ग्यायण्या अपत्ये कुत्सने, "गोत्रस्त्रियाः कुत्सने ण च" इति एतस्यापत्यप्रत्ययत्वेन पुंवद्भावाभावाद्गार्ग्यायण इति स्यात्, नन्विष्टङ्गार्ग्यमिति दोषमुद्भाव्य तत्सम्परिहाराय "भस्याढे" इत्येव संस्थाप्य कौण्डिन्ये "आगस्त्यकौण्डिन्ययोः" इति निपातनात् परिहृत्य सापत्ने तु "नित्यं सपत्नी" इति समुदायनिपातनं परिहारमनभिधाय शत्रुपर्यायात्सपत्नशब्दाच्छार्ङ्गरवादिषु द्रष्टव्य इति शिवाद्यणि परिहृतम् । अत एव शिवादौ *समानपतिलक्षणस्य* सपत्नीशब्दस्य ग्रहणं नेत्यवसीयते ग्रहणे हि तस्मादणि पुंवत्त्वेन सापत इति रूपं दुर्वारमेव स्यात् । अत एव सापत इति प्राप्नोतीति भाष्ये "नित्यं सपत्न्यादिषु" इति निर्देशेन भवन्समानस्य सभावो ङीप्नकारायोगेऽपि भवतीत्यवसीयते । एवं च न्यासोक्तपुंवत्त्वाभावो भाष्यकृतोऽनभिमत इत्यवसीयते । समुदायनिपातनं तु रूढ्यर्थेऽपि स्यादिति न सूत्रभाष्यविरोधः । एवं सति समानपतिलक्षणात्सपत्नीशब्दाल्लिङ्गविशिष्टपरिभाषया पत्युत्तरपदलक्षणे ण्ये सापत्य इति भाव्यं, तथा भावकर्मणोरपि पत्यन्तलक्षणे यकि सापत्यमिति, युवतिरिवाचरति (युवायते)। यस्तु "घादाम्" सूत्रभाष्ये युवतितरेत्युदाहरणे "वरूप" इति पुंवत्त्वाभावः स तत एव षष्ठ्यनिर्देशान्नत्वभाषितपुंस्कत्वान्नापि यौवनस्य जातित्वेन जातिवाचकत्वात् "जातेश्च" इति प्रतिषेधाद्यतः स्थानिवत्सूत्रे युवजानिरिति प्रत्युदाजहार । पट्वी च मृद्वी च पट्वीमृद्व्यौ, ते इवाचरति (पट्वीमृद्व्यते,) पूर्वपदस्य क्यङ्परत्वाभावान्न पुंवत्त्वं, पचेण्वुलि (पाचिका,) "मद्रवृज्योः कन्" इति शैषिके कनि (मद्रिका, पाचिकायते, मद्रिकायते,) "न कोपधायाः" इति पुंवत्त्वनिषेधः । अत्र तद्धितग्रहणात्तद्धितेन वा "युवोरनाकौ" इत्यकादेशेन वा यः कोपधस्तस्यैव ग्रहणमिति पाकायतइत्यत्र पुंवत्त्वं भवति । नन्वभाजादिपाठाट्टापा वयोलक्षणस्य ङीपो बाधात्पुंवत्त्वापुंवत्त्वयोर्न विशेषः । सत्यम् । अत्राविशेषेऽपि अस्ति पाकभार्य इत्यत्र विशेषः । (चतुर्थीयते,) "सञ्ज्ञापूरण्योश्च" इतिपुंवत्त्वनिषेधः । (स्रौघ्नीयते) "वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे" इति पुंवत्त्वनिषेधः । वृद्धेर्निमित्तं ञकारो णकारो वा यस्मिन्निति बहुव्रीह्याश्रयणात्, यावतीवाचरति (यावत्यते) इत्यत्र पुंवत्त्वं भवति, अत्र "आसर्वनाम्न" इत्याकारस्य वृद्धेर्वतुरेव निमित्तमिति नासौ वृद्धिनिमित्तवान्, "तद्धितस्य" इतिवचनात्काण्डलावीवाचरति काण्डलावायते इत्यत्र पुंवत्त्वं भवति, तथारक्तविकारइतिवचनात्कषायेण रक्ता शाटी काषायी, "तेन रक्तं रागात्" इति अणि ङीप्, खदिरस्य विकारः, (खादिरी ईषा,) "पलाशादिभ्यो वा" इति विकारेऽणञोरन्यतरस्मिन् ङीप्, काशायायते खादिरायतइति, अत्र पुंवत्त्वं भवति । व्याकरणमधीते (वैयाकरणी)। "तदधीते तद्वेद" इत्यणि ङीप् । सैवाचरति (वैयाकरणीयते)। "न य्वाभ्याम्" इति, निषेधादणो नास्ति वृद्धिनिमित्तकत्वमिति भावः, निमित्तशब्दः कुर्वद्रूपवचनः, दीर्घाः केशा अस्याः (दीर्घकेशी) एवं, (मृदङ्गी) "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" [अङ्गगात्रकण्ठेभ्यश्चेति वक्तव्यम्] इति पाक्षिको ङीप् । (दीर्घकेशीयते । मृद्वङ्गीयते) "स्वाङ्गाच्चेतोमानिन" इति स्वाङ्गवचनात्परो य ईकारस्तदन्तस्य मानिनोऽन्यस्मिन्परे पुंवत्त्वं निषिध्यते । (करणीयते, इडबिड्यते,

दृश्यते, कठीयते) "जातेश्च" इति पुंवत्त्वनिषेधः। 'गोत्रञ्चचरणैः सह' इति गोत्रचरणयो- र्जातिवाचित्वम्। इहापत्यं गोत्रम्, अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यत इति, चरणशब्दः शाखाध्यायिषु रूढः। अत्र इडबिट् नाम जनपदो राजा वेति जनपदसमानशब्द- त्वात् "जनपदसमानशब्दात् क्षत्रियादञ्" इत्यत्र "ते तद्राजा" इत्यापादपरिसमाप्तेः प्रत्य- यानां तद्राजसञ्ज्ञकत्वात् "अतश्च" इति अकारप्रत्ययत्वेन स्त्रियां लुकि इडबिट् स्त्री, ऐडविडः पुमान् भवति, दरदोऽपि जनपदसमानशब्दत्वात् "द्व्यञ्मगध" इत्यणः पूर्वे लुकि दरद् स्त्री दारदः पुमान्, एते गोत्रवचनाः कठशब्दात् "कलापिवैशम्पायनान्तेवासिभ्यश्च" इति प्रोक्ते छन्दसि णिनेः "कठचरकाल्लुक्" इति लुकि "छन्दोब्राह्मणानि च तद्विषयाणि", इति छन्दो- ब्राह्मणप्रत्ययान्तानामध्येतृवेदितृप्रत्ययविषयत्वात् "तदधीते तद्वेद" इत्यणि तस्य "प्रोक्ता- ल्लुक्" इति प्रोक्तप्रत्ययान्तात्परत्वेन लुकि शाखाध्ययननिर्वृतिः॥

"*भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः*"॥ अत्राच्वेरित्येकवचनं भृशाद्यवयवापेक्षम्, अयं च पर्युदास इति तत्सदृशप्रतिपत्त्या ऽभूततद्भावविषयेभ्यो भुवि भवत्यर्थे क्यङिति अर्थो भवति, प्रसज्यप्रतिषेधे तु भवतियोगे च्विविधानाद्भवतिनैव स्वार्थस्य भवनस्योक्तत्वान्न क्यङः प्रसङ्गः इत्यर्थे अच्वेरिति वचनमनर्थकं स्यात्, न च सत्यस्मिन् च्व्यन्तादुत्पद्यमानेन क्यङा भवतेर- नुप्रयोगस्य बाधनमाशंक्यम्, यदिदमच्व्यन्ते सावकाशं भवतेरभावात् च्वेरप्यभावस्तद्योगे तस्य विधानात्, न च क्यषा योगे डाज्वचनप्रामाण्याद्भवतेरभावेऽपि क्यङो योगे च्वेः कल्पनं युक्तं, यत इदं वचनमच्व्यन्ते सावकाशं, 'भृशादिभ्य' इति पञ्चमी लोपविधौ स्थान- षष्ठी सम्पद्यते, तत्र विशेषणेन हला तदन्तविधौ भृशादिषु हलन्तानामन्त्यस्य लोप इति अर्थो भवति, एवं चशब्दोऽन्वाचये भवति, अभृशो भृशो भवति, (भृशायते, शीघ्रायते, चपलायते, मन्दायते, पण्डितायते, रेहायते) रेहः शब्दो रहसि निघृणत्वे भिक्षाभिलाषस्य च निवृत्तौ वर्तत इति गणवृत्तौ, (तृपायते) तृपश्चन्द्रः समुद्रश्च (वेहायते) वेहद्गर्भोप- घातिनी (अन्धरायते) अन्धरो मूर्खोऽपुष्करश्चेति गणवृत्तौ, अण्डार इत्यन्ये इति च, (ओजायते) (वर्चायते) ओजोवर्चसौ वृत्तिविषये तद्वति वर्तेते (रेहायते) रेहस् रोष इति गणवृत्तौ (दुर्मनायते, सुमनायते, उत्सुकायते, उन्मनायते, शस्रायते, बृहायते) तान्तावेतौ (अतिमनायते) अत्र सुदुर्दूरभिभ्यो मनःशब्दः पठ्यते, तत्र सोपसर्गात्संग्रामयतेरेव धातु- संज्ञानिमित्तः प्रत्यय इति ज्ञापनान्मनस एव प्रत्यय इति स्वमनायत इत्यादि भवति, "सुबा- मन्त्रित" इत्यत्र मनस्युपसर्गे इति मनसि परे उपसर्गस्य पराङ्गवद्भाववचनात्सुमनायतइत्यादौ "तिङ्ङतिङ" इति निघातो न भवति, देवदत्तः सुमनायत इत्यादौ सोपसर्गस्य निघातो भवति, अत्रामी भृशादयो ऽस्माभिः श्लोकगणपाठानुरोधेन पठिताः। गणवृत्तौ तु बृह- च्छब्दो न दृश्यते, भद्रशब्दस्तु पठ्यते, तथा च कन्धरशब्दश्च त्वचोऽभ्यन्तरे स्थूलतन्त्राभा असंयुक्ता स्नायुः कन्धरा तद्वान्कन्धरः, मत्वर्थे "अर्शआदिभ्योऽच्" इति व्याख्यातं च॥

"लोहितादिडाज्भ्यः क्यष्"॥ अत्र भुवीति वर्तते, अच्वेरिति च। तत्रैतड्डाचो न विशेषणमसम्भवात्, अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच् विधीयते, यत्र ध्वनौ वर्णविशेषा न व्यज्यन्ते सोऽव्यक्तस्तस्यानुकरणमव्यक्तानुकरणं, तस्मात् "डाचि बहुलं द्वे भवत" इति डाचि विषयभूते द्विरुक्ताद् द्व्यजवरार्धात् अनितिपरात् कृभ्वस्तियोगे डाज् भवतीति सूत्रार्थः। यस्य द्विरुक्तस्य समुदायस्य प्रविभज्यमान(१)मर्द्धं द्व्यजन्यूनाचकं द्व्यज् वा भवति तद् द्व्यजवरार्धम्, अवरशब्दोपकर्षे अत एव वचनात् कृभ्वस्तिभिरिव क्यषापि योगे डाज् भवतीत्यवसीयते, न च भवतियोगे डाचि कृते क्यषः प्रसङ्गो भुवौ भवतिनैवोक्त- त्वात्। अलोहिते (लोहितायति। लोहितायते) "वा क्यषः" इति पक्षे तङ्, लिङ्गविशिष्ट-

(१) अवरमिति पाठः पुस्तकान्तरे।

परिभाषया लोहिनीशब्दात्क्यषि (लोहिनीयति । लोहिनीयते) इति भवति, (पटपटायति । पटपटायते) अत्र "डाचि बहुलम्" इति द्विरुक्ते "नित्यमाम्रेडिते डाच्" इति अव्यक्तानुकरणस्यान्त्यस्य टेश्च पररूपे "टेः" इति टिलोपः । इदमेव पररूपवचनं ज्ञापकम् , [डाचि बहुलं द्वे] इत्यस्य विषयसप्तमीत्वे, अत्र लोहितानां तेषां नीलहरितमन्द्रफेनमुण्डानां भृशादौ पाठः कर्तव्यः । अत्र वार्त्तिकं "लोहितादिडाचभ्यः क्यष्वचनं भृशादिष्वितराणि" इति । अत्र वृत्तौ न हि पठितेषु लोहितादिषु नान्तोऽस्तीति "नः क्ये" इति पदत्वसामान्यग्रहणार्थेन क्यषः ककारेणास्याकृतिगणत्वज्ञापनादन्यानि संगृह्यन्ते, तेषां भृशादौ अनुप्रवेश इति स्थितम्, यदाह यानि पठ्यन्ते तेभ्यः क्यचेव भवति, अपठितेभ्यस्तु क्यषेवेति, तेन (निद्रायति, निद्रायते, करुणायति, करुणायते, वर्मायति, वर्मायते) इत्यादि भवति, निद्राकरुणाशब्दौ वृत्तिविषये तद्वति वर्त्तेते, यद्वा (निद्रायते) "आतश्चोपसर्गे" इति कर्तरि कप्रत्ययान्तो निद्राशब्दो भवति । अत्र गणवृत्तौ ॥

लोहितश्यामदुःखानिः हर्षगर्वसुखानि च ।
मूर्छा निद्रा कृपा धूमा करुणा नित्यवर्मणि ॥

इत्याकृतिगणसिद्धानि पठ्यन्ते ।

"कष्टाय क्रमणे" । क्रमणमनार्जवः । अत एव निर्देशाच्चतुर्थ्यन्तात्कष्टशब्दादनार्जवे क्यङ् भवति, कष्टं कृच्छ्रं दुःखमिह तु तत्कारणं कर्म, कष्टाय कर्मणे क्रामति (कष्टायते) कष्टं कर्तुं कुटिलमाचरतीत्यर्थः । अत्र वार्तिकम्-[सत्रकष्टकक्षकृच्छ्रगहनेभ्यः कण्वचिकीर्षायाम्] इति, कण्वस्य पापस्य चिकीर्षा कण्वचिकीर्षा सा चेह वृत्तिविषये, सत्रादयः कण्ववचनाश्चिकीर्षाया प्रत्यय इति समुदायार्थो भवति, एवं च पापवचनेभ्यो विषयान्तेभ्यः सत्रादिभ्यः चिकीर्षायां प्रत्यय इति वार्तिकार्थः सम्पद्यते (सत्रायत) इत्यादि ॥

"कर्मणो रोमन्थतपोभ्यां वर्तिचरोः" ॥ कर्मण इत्यवयवापेक्षमेकवचनं, तेन रोमन्थतपोभ्यां कर्मभ्यां यथासंख्यं वर्तिचरोर्धात्वर्थयोः क्यङ् प्रत्ययो भवतीत्यर्थो भवति । कर्मत्वं च रोमन्थतपोभ्यां श्रुतवर्तिचरिक्रियापेक्षं, वर्तिरित्यत एव निर्देशाण्ण्यन्तादपि क्तिन्, चरिति क्षरतेः सम्पदादित्वाद्भावे क्विप् । रोमन्थं वर्तयति (रोमन्थायते,) तपश्चरति (तपस्यति,) "तपसः परस्मैपदं च" इति परस्मैपदम् , अत्र [हनुचलनइति वक्तव्यम्] इत्युक्तत्वात् कीटो रोमन्थं वर्तयतीत्यत्र क्यङ् न भवति । अत्र न्यासपदमञ्जर्योरपानप्रदेशान्निसृतं द्रव्यं कांशे वर्तुलं करोतीत्यर्थोऽभिमतः, कीटस्त्वपानप्रदेशान्निसृतमश्नातीति, [बाष्पोष्मफेनाच्चेति वक्तव्यम् ,] कर्मग्रहणमनुवर्तते, तच्च श्रुतोद्वमनक्रियापेक्षं बाष्पादिभिःसम्बध्यते बाष्पमुद्वमति (बाष्पायते) ॥

"शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे" ॥ कण्वशब्दः पापवचनः, करणं क्रिया करोत्यर्थः, न पारिभाषिकं तस्मिन्हि कर्मण इत्यनेन सम्बधैः शब्दादिभिः सम्बन्धे न स्यात्, शब्दादिभ्यः कर्मभ्यः करणे क्यङ् भवति, शब्दं करोति (शब्दायते,) एवं (वैरायते, कलहायते, अभ्रायते, कण्वायते, मेघायते,) अत्र न्यासे यद्यप्ययं तत्करोतीति णिचि प्राप्ते आरभ्यते तथापि न बाधतइति शब्दयतीत्याद्यपि भवतीत्युक्तम् । अत्र वार्तिकम्-[सुदिनदुर्दिनाभ्यां च] [नीहाराच्च] ।

[अटाट्टाशीकाकोटापोटासोटाप्रुष्टाप्लुष्टाग्रहणम्] इति, (पोटा, स्त्रीपुंसलक्षणा) । अतोऽन्ये अट्टादयः क्रियावचनाः, सुदिनं करोति इति (सुदिनायते) इत्याद्युदाहार्यम् ॥

"सुखादिभ्यः कर्तृवेदनायाम्" ॥ कर्तृ इति पृथक् पदं लुप्तषष्ठीकं, वेदनाज्ञानकर्तृत्वं च श्रुतवेदनक्रियापेक्षं, तेन वेदनक्रियायाः कर्तुराधेयभावेन सम्बन्धिभ्यः सुखादिभ्यो वेदनायामर्थे क्यङ् भवतीत्यर्थो भवति, सुखं वेदयते (सुखायते,) सुखमनुभवतीत्यर्थः । वेदयित्रा सुखादीनां विशेषणात्सुखं वेदयते प्रसाधको देवदत्तस्येत्यत्र क्यङ् न भवति, अत्र प्रसाध्यगतं

सुखं प्रसाधकोऽक्षांनमालनादिना जानातीत्यर्थ इति सुखं वेदयितृगतं न भवति, अत्र श्लोकगणकारः ॥

सुखदुःखगहनकृच्छ्राघ्रु(१)पकप्रतीयकरुणाश्च ।
कृपणः सोढ इतीमे तृपादयो दश गणे पठिताः ॥

इति। अत्र गणरत्नमहोदधौ आस्यशब्दोऽपि पठ्यते, यदाह, आस्यमेवास्यमिति, तृप्रं, दुःखं, सोढं सहनम्, अभिभवो वा ॥

"नमोवरिवश्चित्रङः क्यच्" ॥ अत्रानुवृत्तं करणग्रहणम् अभिधानशक्तिस्वाभाव्यात् क्रियाविशेषणं, यदाह वृत्तिकारः, नमसः पूजायां, वरिवसः परिचर्यायाम्, चित्रङ आश्चर्ये, (नमस्यति देवान्। वरिवस्यति गुरून्, चित्रीयते) आश्चर्यवान् भवतीत्यर्थः। अन्ये तु परस्याश्चर्यङ्करोतीत्यर्थ इति। यदाह भट्टिः—'ततश्चित्रीयमाणोऽसौ' इति। अत्रावयवे कृतं समुदायस्येति न्यायेन चित्रङो ङकारस्य समुदायार्थत्वादात्मनेपदं, (नमस्यति देवान्) इत्यत्र 'उपपदविभक्तेः कारकविभक्तिः' इति "नमः स्वस्ति" इति चतुर्थीम्बाधित्वा कर्मणि द्वितीया भवति।

"पुच्छाभाण्डचीवराण्णिङ्" ॥ ङकारस्तङर्थो णिग्रहणेषु सामान्याविघातार्थश्च, णकारो णिग्रहणेषु सामान्यग्रहणायैव, वृद्धिभाजः प्रकृतेरभावात्, इहाप्यनुवृत्तं करणग्रहणं पूर्ववदभिधानस्वाभाव्यात् क्रियाविशेषपरं, तदुक्तं वृत्तौ,पुच्छादुदसने पर्यसने वा, भाण्डात्समाचयने, चीवरादर्जने परिधाने।वेति, उदसनमुत्क्षेपणं, पर्यसनं परितः क्षेपणं, समाचयनं राशीकरणम्, अर्जनमार्जवनं, परिदानमाच्छादनम्, (उत्पुच्छयते, सम्भाण्डयते, सञ्चीवरयते,) अत्रोदादीनां प्रयोग उदसनाभिव्यक्तये, पुच्छादेः कर्मणो धातावन्तर्भावादकर्मका एते, यक्चिणोः प्रतिषेधे"णिश्रन्थि"इत्यत्र णिग्रहणेनाप्यस्य ग्रहणादकर्मकर्तरि पक्षे यक्चिणोरभावात् (उत्पुच्छयते गौः स्वयमेव,उदपुपुच्छत गौः स्वयमेव) इति शप्चङौ भवतः।यदोत्पुच्छयति गामिति गौः कर्म भवतीति कर्मकर्तृत्वलाभः, उत्पुच्छयतेः क्वौ णेर्लोपे सोर्हल्ङ्यादिलोपे संयोगान्तलोपे उत्पुदिति भवति। व्रश्चादिषत्वं संयोगान्तलोपे न भवति।ननु"छ्वोःशूड्"इति शत्वे तस्य व्रश्चादिषत्वे तस्य च जश्त्वे उत्पुडितिभाव्यम्, यतः शत्वविधौ सतुक्कच्छो गृह्यते, इह तु गुदं छादयतीति पुच्छशब्दव्युत्पत्तेस्तकारस्तुकः सम्बधी न भवति। ननु यत्र सतुक् छकारो न सम्भवति तत्र केवलो गृह्यते इत्यपि स्थितं, वाञ्छेः क्वौ वान्, वांशौ इतिवदत्रापि भवितव्यं, भवतु कामं तस्यापि संयोगान्तलोपउत्पुदिति भविष्यति, द्विवचनादौ "स्तोश्चुः" इति दकारस्य श्चुत्वे "शः छोटि" इति शकारस्य छत्वे उत्पुच्छावित्यादि सिध्यति ॥

"मण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्" ॥ एभ्यः करणे णिच् भवति। मुण्डं करोति (मुण्डयति माणवकं, मिश्रयत्यन्नं,श्लक्ष्णयति वस्त्रं,लक्षणयति व्यञ्जनम्,) व्रताद्भोजने तन्निवृत्तौ।वा, (पयो व्रतयति,) पयो भुङ्क्ते इत्यर्थः। (वृषलान्नं व्रतयति,) परिहरतीत्यर्थः। अत्र भोजनतन्निवृत्ती व्रतशब्दार्थाविति पूर्ववत्करणे प्रत्ययः। श्रूयते भोजने व्रतशब्दः। यदस्य।पयोव्रतं भवत्यात्मानमेव तद्वर्धयति, निवृत्तो मुनिरासीत्, द्विव्रतासुरा, एकव्रता देवा इति, पस्पशायां च शस्तं वानेन श्मांसादीन्यपि व्रतयितुमिति, अयमेव व्रतशब्दो दर्शादिवद्विपरीतलक्षणया तन्निवृत्तौ वर्तते। वस्त्रात्समाच्छादने। (संवस्त्रयति प्रावरणम्,) अत्रापि पूर्ववत्समाच्छादनं प्रकृत्यर्थ इति करणं, प्रत्ययार्थे हि प्रकृत्यर्थेन वस्त्रेणैकार्थीभूतस्य प्रावरणान्वये सामर्थ्याभावान्न स्यात्। अथ मुण्डयति नापित इत्यादौ व्यपेक्षाभावे साकांक्षं मुण्डादिभ्यो णिज्वचनं,तत्करोतीत्येव सिद्धे णिच्यारब्धमाणत्वाद्यथा माणवकं मुण्डयतीत्यादौ सापेक्षत्वेऽपि भवति तथेहापि स्यात्, नैतदस्ति, तत्र हि मुण्डादयो धर्मिव-

(१) घुपकेति पुस्तकान्तरे पाठः।

चना धर्ममपेक्षन्ते न तद्वादह वस्त्रमपेक्षते, अथवं स्यात् मुण्डादौ प्रकृतेरन्यापेक्षावदत्र प्रत्ययार्थस्यान्यापेक्षास्तीति, एवं ह्यर्थो न सङ्गच्छते, यतः संवस्त्रयति प्रावारमित्यत्र प्रावारवस्त्रं छादयतीत्यर्थः स्यात् न चैवमिष्यते, यतः प्रावारमाच्छादयतीत्येवेष्यते । अथोच्यते उभयमपीष्यतामिति, एवं हि वस्त्रसामान्ये प्रावारस्यान्तर्भावात्तत्र प्रयोगो ऽव्यर्थः स्यात्, न च ब्राह्मणा आयाता वसिष्ठोऽप्यायात इति विशेषस्य प्रावारस्य प्राधान्यख्यापनाय प्रयोगः स्यात्, अत एकस्मिन्वाक्ये एकस्य प्राधान्यं प्रतिपादयितुं न शक्यते । अत्र सुधाकरः । समाच्छादनं प्रत्ययार्थमेवाह, सामान्यकर्मणोऽन्तर्भावेऽपि विशेषकर्मणोऽनभिहितत्वात् तद्विशेषप्रयोगो यथा भवति माणवकमितीति । एवं सति वस्त्रसामान्यस्य प्रावारो विशेषको भवति, हलादीनां त्रयाणां ग्रहणे प्रत्ययाः, हलं गृह्णाति (हलयति) एवं कलयतीत्यादि । अत्र वार्तिकं, [हलिकल्योरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थम्] इति, ततो (अजहलत्, अचकलत्,) इत्यत्राग्लोपित्वात् "सन्वल्लघुनि" इतीत्वं न भवति, अक्रियमाणे पुनरत्वनिपातने इकारस्य णाविष्ठवदिति टिलोपात्परत्वाद्वृद्धावैकारे तस्यादेशात्पूर्वं परत्वाल्लोपे अग्लोपित्वं न स्यात्, नन्वैकारस्य लोपस्य पूर्वंविधावित्वे "अचः परस्मिन्पूर्वविधौ" इति स्थानिवत्त्वेनाङ्गस्य चङ्परणिपरत्वं विघानिष्यतइति किमनेनाग्लोपित्वार्थेनात्वनिपातनेन नैतदस्ति । अभ्यासस्यादिष्टादचः पूर्वत्वेन तस्येत्वे स्थानिवत्त्वाप्रसङ्गात् । एवमपि कृताकृतप्रसङ्गित्वेन नित्यत्वाद्वृद्धेः पूर्वमेवेकारो लोप्स्यतइति अग्लोपित्वसिद्धेर्नार्थोत्वनिपातनेनेति चेत् । न, यस्माद्वृद्धौ शब्दान्तरप्राप्त्या भवत्यनित्यो लोपः । तूस्ताद्विहनने, तूस्तं केश इति श्रीभद्रः । जटीभूताः केशा इति बोधिन्यासे, पापमिति वैजयन्त्याम् । तूस्तानि विहन्ति (वितूस्तयति,) विहननद्योतनाय वेः प्रयोगः ॥

"सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्" ॥ अत्राप्यनुवृत्तं करणग्रहणं क्रियाविशेषोपलक्षणम्, अत्र "सत्याप्" इति निर्देशेन णिचः सन्नियोगेन सत्यस्यापुक्, टिलोपाभावश्च भवति । अत्र वार्तिकम्—[अर्थवेदसत्यानामापुग्वक्तव्यः] इति । अत्र भाष्यं, सत्यस्य कृञो योगइति । वृत्तौ तु सत्यमाचष्टे (सत्यापयति) इत्युक्तम्, अत्र हरदत्तः । भाष्ये कृत्यर्थनिर्देशः प्रयोगदर्शनवशादिहाख्यानार्थ इति, एवम् (अर्थापयति, वेदापयति,) पाशं विमुञ्चति, (विपाशयति) इत्यपि चोपपद्यते, रूपं पश्यति (रूपयति,) वीणया उपगायति (उपवीणयति) तूलैरनुकृष्णाति (अनुतूलयति,) श्लोकैरुपस्तौति (उपश्लोकयति,) सेनयाऽभियाति (अभिषेणयति,) "उपर्गात्सुनोति" इत्यादिना षत्वम्, (अभ्यषेणयत्,) "प्राक्सितादडव्यवायेऽपि" इति षत्वम्, (अभिषिषेणयिषति) । "स्थादिष्वभ्यासेन" इति साभ्यासस्य षत्वं, लोमान्यनुमार्ष्टि (अनुलोमयति,) णाविष्ठवदिति टिलोपः । त्वचं गृह्णाति (त्वचयति) अच्प्रत्ययान्तोऽयमकारान्तः, तेनाल्लोपस्य स्थानिवत्त्वात् "अत उपधायाः" इति वृद्धिर्न भवति, हलन्तस्य तु तत्करोतीति णौ (त्वाचयति) इति भवति, टिलोपस्तु "प्रकृत्यैकाच्" इतिप्रकृतिवद्भावान्न भवति, वर्मणा सन्नह्यति (संवर्मयति) वर्णं गृह्णाति (वर्णयति,) चूर्णैरवध्वंसयति (अवचूर्णयति,) अत्रावध्वंसनमेव करणमितीन्दुश्रीभद्रौ चुरादयो माधवीयायां धातुवृत्तौ व्याख्याताः । अत्रार्थविशेषास्तदनुरूपाः समर्थविभक्तयश्च लोकप्रसिद्धानुसारेण वृत्तिकारेण दर्शिता इत्यस्माभिरपि तथैव प्रदर्शिताः ॥

अथान्येभ्योऽपि णिच् प्रदर्श्यते ॥

"प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च" ॥ प्रातिपदिकाद्धात्वर्थे णिच् भवति, इष्ठनीव चास्मिन्बहुलं कार्यं भवति, अस्यैव धातुसूत्रस्य प्रपञ्चः । "तत्करोतितदाचष्टे" । "तेनातिक्रामति" । "कर्तृकरणाद्धात्वर्थे" । इति सूत्राणि । अत्र कर्तृग्रहणं करणस्य विशेषणं

करणत्वेन लोके प्रसिद्धानां चक्षुरादीनामेव ग्रहणं माभूदिति । अन्यथा चक्षुषा पश्यति (चक्षयति) श्रोत्रेण शृणोति (श्रोत्रयति) इत्यादावेव स्यात् न तु करिभिरवबध्नाति (अवकरयति) परशुना छिनत्ति (परशयति) इत्यादावपि । एवं च "तेनातिक्रामति" इत्येतत्कर्तृकरणादित्यस्यैव प्रपञ्चो भवति । अतस्तत्करोतीत्यादौ तदादि प्रकृतौ कर्मत्वादिमात्रप्रतिपादनार्थं न तु द्वितीयाद्यर्थमपीति कर्मत्वादिविशिष्टात्प्रातिपदिकादेव णेर्विधानात् पटुमाचष्टे इति णेर्विवक्षायां पटोः प्रातिपदिकान्णाविष्ठवदिति टिलोपे तस्य "अत उपधायाः" इति वृद्धौ "अचः परस्मिन्" इति स्थानिवत्वात्तदभावे (पटयति) इति भवति । सुबन्ताद्युत्पत्तौ "सुपो धातुप्रातिपदिकयोः" इति सुपो लुकि टेश्च लोपे ऽवशिष्टस्य प्रत्ययलक्षणेन सुबन्तत्वात् पदत्वे पटयतीति जश्त्वं स्यात्, न च टिलोपस्य स्थानिवत्त्वेन टकारस्य पदान्तत्वाभावाज्जश्त्वाप्रसङ्गो यतो "न पदान्त" इत्यादिना जश्त्वे स्थानिवत्त्वं निषिध्यते, न च णौ कृतया भसञ्ज्ञया पटोः पदसंज्ञाबाधो, यदस्यां टिलोपः स्थानिवद्भवति । अयं च प्रातिपदिकाद्विधीयमानो णिः यथाकथञ्चित् 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति' इति सिद्धान्तितत्वात् ङ्याबन्तादपि भवति, अत एव "णाविष्ठवत्" इत्यत्र भाष्ये इष्ठवदित्यतिदेशस्य पुंवद्भावटिलोपयणादिपरविन्मतोर्लुगर्थमिति पुंवद्भावादिप्रयोजनकथनं न परिगणनं किन्तूदाहरणमात्रमेव, तदुक्तं वृत्तौ । प्रादयोऽपीष्यन्त इति, तत्र पुंवद्भावो यथा, एनीमाचष्टे (एतयति) हरिणीमाचष्टे (हरितयति) लोहिनीमाचष्टे (लोहितयति) कुमारीमाचष्टे (कुमारयति) इत्यादौ [भस्याढे तद्धिते] इतीष्ठनि विहितः पुंवद्भावो णाविष्ठवदित्यतिदेशादत्रापि भवतीन्येन्यादीनामेतादयः पुंशब्दाः भवन्ति । वसिष्ठवदत्र वर्तितव्यमित्यादौ विशेषातिदेशे ब्राह्मणत्वसामान्यनिबन्धस्याप्यतिदेशादिष्ठवदित्यनिदेशान्नात्र केवलमिष्ठनो ऽसाधारणरूपं तुरिष्ठेमेयःस्वित्यादिकमेव कार्यमतिदिश्यते किं तु भसंज्ञानिमित्ततद्धितत्वादिनिबन्धनमपीति पुंवद्भावातिदेशस्य प्रयोजनमुक्तम्, अनेन चेष्ठवद्भावेन नेष्ठनि दृष्टमेवातिदिश्यते किं तर्हि सम्भावितमात्रमपीति कुमारयतीत्याद्युदाहृतम्, अवश्यं चैतदेवं विज्ञेयम्, अन्यथा राजयतीत्यादाविष्ठनोऽनुत्पादाट्टिलोपो न स्यात्, "टेः" इत्यत्र कैयटे एतयतीत्यादौ टिलोपेन ङीपि निवृत्ते तत्सन्नियोगशिष्टत्वान्नकारनिवृत्तौ सिद्धायामपि इष्ठवद्भावात् पुंवत्त्वेन रूपसिद्धेर्भाष्ये उक्तत्वात्सन्नियोगशिष्टपरिभाषाया अनित्यत्वज्ञापनात् (एनेयः श्यैनेय) इत्यत्र "यस्य" इति लोपेनेकारनिवृत्तावपि नकारो न निवर्तत इति उक्तम् । पदमञ्जर्यां त्वेवमुक्त्वोक्तम् अपर आह इडबिडमाचष्टे (ऐडबिडयति) दरदमाचष्टे (दारदयति) इत्यादौ पुंशब्दातिदेशार्थं पुंवद्वचनमिति । ननु इडबिडादीनामिष्ठनि पुंवद्भावो न दृष्ट एव, इष्ठनि तस्यासम्भवात् । नेष्ठनि दृष्टस्यातिदेशः किं तर्हि इष्ठनि सम्भावितस्य, अन्यथा अतिराजयतीत्यादौ टिलोपो न स्यात्, आदिशब्देन पृथुमाचष्टे (प्रथयति) उशिजमाचष्टे (उशिजयति) इत्यादि गृह्यते, अत्रेडबिडपृथू जनपदशब्दौ क्षत्रियजाती चेति "जनपदशब्दात् क्षत्रियादञ्" इत्येतस्य "ते तद्राजाः" इत्यत्रादीनामापादपरिसमाप्तेः प्रत्ययानां तद्राजत्वादतश्चेत्यकारप्रत्ययस्य स्त्रियां लुकीडबिड् स्त्री, ऐडबिडः पुमान्, दरदुशिजोरपि "द्व्यञ्मगध" इत्यणः पूर्ववल्लुकि दरत् स्त्री दारदः पुमान्, एवमुशिक् स्त्री औशिजः पुमान् भवति, नन्वत्रैडबिडादीनां गोत्रस्य ग्रहणात् गोत्रं च चरणैः सह' इति जातिवाचित्वात् "जातेश्च" इति पुंवद्भावनिषेधः कस्मान्न भवति, उच्यते । औपसंख्यानिकस्यायं न भवत्यनित्यत्वात् । अत एव हस्तिनीनां समूहो हास्तिकमित्यत्र लिङ्गविशिष्टपरिभाषया "अचित्तहस्ति" इति ठकि जातित्वेऽपि पुंवत्त्वं भवति, अनित्यत्वे च ज्ञापकं "प्रवाहणस्य ढे" इति प्रवाहणशब्दे पूर्वपदवृद्धि विकल्पोत्तरस्य स्वतःसवृद्धिकस्यापि नित्यं तद्वचनं, तद्धि प्रवाहणेयीभार्य इत्यत्र पूर्वपदस्य वृद्ध्यभावेऽपि तस्योत्तरपदे वृद्धिनिमित्तत्वेन "वृद्धिनिमि

स्य" इति पुंवत्त्वनिषेधार्थम् , नित्ये च जातिलक्षणे निषेधे प्रवाहणेयीशब्दस्य गोत्रवाचित्वेन जातित्वादनेनैव पुंवत्त्वनिषेधसिद्धेः किं तदर्थेनोत्तरपदवृद्धिविधानेन, एवं तर्हि पुंवद्भावस्येडबिडाद्यर्थत्वात्सन्नियोगशिष्टपरिभाषाया अनित्यत्वे प्रमाणाभावात् कथमैनेयः श्यैनेय इति सिद्ध्यतः, तत्रैवं वक्तव्यम् , भाष्यकारेणान्यथासिद्धमैडबिडयतीत्युदाहृत्यैतयतिश्यैतयतीत्यादेरुदाहरणादनित्यत्वमेव साध्यतइति पुंवद्भावाभावः । "विन्मतोर्लुक्" "टेः" इति हलादेरङ्गस्य लोपः, ऋकारस्येष्ठेमेयस्सु विधीयमानो रभावो णावपि भवति, अत्र परिगण्यते ।

पृथुं मृदुं भृशं चैव कृशं च दृढमेव च ।
परिपूर्वं वृढं चैव षडेतान् रविधौ स्मरेत् ॥

इति । पृथुमाचष्टे (प्रथयति) । अत्र केचिदाहुः । चङि पृथु इ अत् इति स्थिते टिलोपश्च प्राप्नोति वृद्धिश्च, तत्र पूर्वं टिलोपे वृद्धिर्न प्राप्नोतीत्यनित्या, वृद्धौ तु टिलोपः शब्दान्तरप्राप्त्याऽनित्यः, उभयोरनित्ययोः परत्वात् वृद्धावादेशात्पूर्वं टिलोपेऽङ्गस्यानग्लोपित्वात् "सन्वल्लघुनि" इत्वे (अपिप्रथत्) इति भवति, अत एव हलिकल्योरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थमित्युक्तं, यदि वृद्धेः पूर्वं टिलोपः स्यात्तर्हि हलिकल्योरिकारलोपेनैवाग्लोपित्वसिद्धेः किमत्वनिपातनेनेति "णौ चङि" इत्यत्र, कथादौ ननु "नाग्लोपि" इत्यत्राल्लोपइति वक्तव्ये अग्लोपिनामित्युदाहरणसामर्थ्यात्पृथादेर्णौ वृद्धौ पूर्वं टिलोपेन भवितव्यमित्यग्लोपित्वेन सन्वदित्वाभावात् (अपपटत्) इत्यादि भवतीत्युक्तं, तन्मतेऽत्राप्यपप्रथदिति भवितव्यम्, तथा ह्यवर्णान्तेष्ववर्णोपधेषु च वृद्धावप्यवर्णो लुप्यते, अग्लोपिग्रहणवदल्लोपिग्रहणमपि यत्र केवलस्यावर्णस्य लोपस्तत्र तस्य स्थानिवत्त्वेनोपधात्वविधानादेव ह्रस्वाप्रसङ्गादवर्णानवर्णसमुदाये लोपार्थं विज्ञास्यते, इवर्णोवर्णान्तयोस्तु पूर्वं वृद्धावग्लोपित्वासम्भवः । ननु स्वामिनमाख्यत् (असस्वामत्,) गोमन्तमाख्यत् (अजुगोमत् ,) प्रादुराख्यत् (अपप्रादत्,) यादृशमाख्यत् (अययादत्,) तादृशमाख्यत् (अततादत्,) इत्यादौ यत्र वृद्धेरप्रसङ्गादवर्णस्यैको लोपस्तत्रेत्वनिवृत्त्यर्थमनग्लोपइति वक्तव्यम् । नैतदस्ति । यदीदृशाण्णिजेव नोत्पद्यते, अत्र च प्रमाणं "णौ चङि" इत्यत्र भाष्ये "नाग्लोपि" इत्यत्र प्रत्याहारग्रहणेन वृद्धेः पूर्वं वा टिलोपज्ञापनस्यावस्थापनं, स्वामिन्नादेर्णौ तत्कथं सङ्गच्छेत । ननु स्रग्विणमाख्यत् (असस्रजत्) इत्यत्र विनो लुक्युपधाया वृद्धौ तस्य ह्रस्वनिवृत्त्यर्थमग्लोपिग्रहणं स्यात्, इष्यते च विन्नन्तादिष्ठवद्भावश्च, विनो लुकः प्रयोजनत्वेनोक्तत्वात्, नैतदस्ति, यतष्टेरित्यत्र भाष्यकारेण स्रजयतीत्यादीनामुदाहृतत्वात् 'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य' इति वा वृद्धेरप्रसङ्गात् ह्रस्वभाविन्युपधैव नास्ति, कस्मिंश्चिदङ्गकार्ये वृत्ते पुनरप्याङ्गकार्यवृत्तौ प्राप्तावविधिस्तस्य कार्यस्य तच्चेदङ्गं प्रयोगार्हं परिनिष्ठितप्रयोगार्हं भवतीति परिभाषार्थः, अस्ति चात्र विन्मतोर्लुकाऽङ्गकार्यस्य वृद्धेः पूर्वं प्रवृत्तिः, तस्मात् ज्ञापकमेव प्रत्याहारग्रहणं वृद्धेः पूर्वं टिलोपप्रवृत्तेः, अत एव वादितवन्तं प्रयोजितवानवीवदत् वीणां परिवादकेनेत्यत्र योऽसौ णौ णेर्लोपस्तस्य स्थानिवत्त्वेनाङ्गस्याग्लोपित्वादुपधाह्रस्वत्वनिषेधे प्राप्ते [णेर्णिच्युपसंख्यानं कर्त्तव्यम्] इति वार्त्तिकं चारब्धम् , न च णेः पूर्वं वृद्धौ पश्चाल्लोपेऽङ्गस्यानग्लोपित्वात्तस्य स्थानिवत्त्वेनोकारस्योपधात्वविधानात् ह्रस्वो न प्राप्नोतीति वार्त्तिकारम्भः स्यादिति वाच्यम् , यतः [चङ्परनिर्ह्रासकुत्वेषु] इति स्थानिवत्त्वं न्यषेधत् । किं च [ण्यल्लोपे] इत्यादिना वृद्धेः पूर्वं णिलोपस्योक्तत्वादनग्लोपित्वशङ्कैव न भवति । अत एव भाष्यकारेणोपधाह्रस्वत्वे [णेर्णिचि] इति वार्त्तिकमग्लोपित्वादुभ्रस्वत्वं न प्राप्नोतीत्यारब्धमिति व्याख्यातम् , वृत्तिकारोऽपि वृद्धेः पूर्वं टिलोपमनुमेने, यदाह वादितवन्तं प्रयोजितवानवीवदद्वीणां परिवादकेन योऽसौ णौ णिलोपस्तस्य स्थानिवद्भावादग्लोपित्वाद्धाऽङ्गस्य ह्रस्वो न प्राप्नोतीति, गतमदः । अपरे हलिकल्योरत्वनिपातनस्य भाष्यवार्त्तिकयोरित्वाभावप्रयोजनत्वेन कथनादगिति प्रत्याहारग्रहणाद्वृद्धेः पूर्वं टिलोप इति भाष्ये व्यव-

स्थितत्वाच्च वृद्धेरुत्तरकालं पूर्वं वा कामचारेण टिलोप इत्यपपटत् अपीपटदित्युभयमपीति प्रतिपन्नाः। अत्र मतेऽपप्रथदपिप्रथदित्युभयं भवति, एवं म्रदयतीत्यत्रापि, (भ्रशयति, क्रशयति, द्रढयति,) एषां चङि सर्वथाऽग्लोपित्वात् (अबभ्रशत्,अचक्रशत् ,अदद्रढत्)इति भवति, परिव्रढयतीत्यत्र सोपसर्गात्संग्रामयतेरेव धातुसञ्ज्ञानिमित्तप्रत्ययो नान्यस्मादिति पृथक्कृतोपसर्गाद्वृढादेरेव प्रत्यय इति "तिङ्ङतिङः" इति निघातो भवति, पर्यव्रढयदित्यत्र परेः परोऽड् भवति, परिव्रढय्येत्यत्र परेर्ण्यन्तेन "कुगतिप्रादयः" इति समासे "समासे नञ्पूर्वे क्त्वो ल्यप्" इति ल्यब् भवति, णेः "ल्यपि लघुपूर्वात्" इत्ययादेशः, (परिविव्रढयिषति, पर्यविव्रढत्) इत्यत्र संभ्रडोर्व्रढेरेव द्विर्वचनं भवति, "सन्यत" इति सनीत्वं सन्वदित्वं चाग्लोपित्वान्न भवति। पटमाचष्टे (पटयति,) टेरिति विहितष्टिलोपो णावपि भवति, तस्य स्थानिवत्त्वादुपधावृद्धिर्न भवति, पटमाख्यत् (अपपटत्,) अग्लोपित्वात् सन्वदित्वं न भवति, न चात्रेष्ठवद्भावेनाङ्गस्य भत्वात् "यस्य" इति लोपेनापि पटयतीत्यादिसिद्धेः किं लोपवचनेन, सत्यमत्रैवं सिध्यति, पटुद्दषद्राजादिभ्यो णौ पटयति दृषयति राजयतीत्याद्यर्थमवश्यं टिलोपो वाच्यः, "सन्वल्लघुनि" इत्यत्र हरदत्तः। यत्र केवलस्यातो लोपस्तत्र स्थानिवत्त्वेनाङ्गस्य चङ्परणिपरत्वाभावादेवेत्वाभावसिद्धेरनग्लोपवचनमज्झल्लोपार्थमपि इत्यत्र दृषद्राजादावपीत्वाद्यभाव इत्याह, तन्न। अनादिष्टादचः पूर्वस्य कस्मिंश्चित्कार्ये विधातव्ये स्थानिवद्भावो न त्वादिष्टादचः पूर्वस्यापीत्यभ्यासेत्वे स्थानिवत्त्वाप्रसङ्गात्, अङ्गस्य चङ्परणिपरत्वं त्वनूद्यते न विधीयतइति तस्य स्थानिवत्त्वाप्रसक्तेरङ्गं चङ्परं न स्यादित्याशङ्का नोदेति, सत्यपि वा स्थानिवत्त्वे तत्सहितमेवाङ्गं भविष्यति, चङ्परणिपरं चेति न स्थानिवद्भावेनाङ्गस्य चङ्परणिपरत्वभङ्गः। ननु कथन्तदुक्तमभ्यासोऽनादिष्टादचः पूर्वो न भवतीति, यतः पटादेर्णौ चङि यष्टिलोपात् पूर्वमनादिष्टादचः पूर्वत्वेन दृष्टः यद्वाऽऽदिः स एव द्विः प्रयुज्यतइति स्यादेवाभ्यासस्यानादिष्टादचः पूर्वत्वं, सत्यमेवं किं तु यत्कार्यत्वेनाश्रीयतेऽभ्यासावस्थं न तदनादिष्टादचः पूर्वं भवति, एवं हलिकल्योरादन्तत्वनिपातनं सङ्गच्छते, अन्यथा यस्य कस्यापि अचष्टिलोपे तस्य स्थानिवद्भावेनाङ्गं चङ्परं न स्यादिति किमत्वनिपातनेन, सत्यपि वा स्थानिवत्त्वे तत्सहितमेव चङ्परणिपरमङ्गं भविष्यति, अभ्यासश्च तस्यैवेति सर्वथा "नाग्लोप"इत्येवेत्वाद्यभावो वाच्यः, (अददृषत्, अरराजत्) इत्यादावनग्लोपेऽभ्यासस्येत्वाभावस्त्वनग्लोपइत्यश्रीयमाणस्याको लोपाभावस्याविद्यमानत्वात्, पटुमाख्यदित्यत्र वृद्धेः पूर्वं टिलोपेऽङ्गस्याग्लोपित्वादपपटदित्येके, कृतायां वृद्धौ टिलोपादपीपटदित्येके। कृतायामकृतायां वा वृद्धौ कामचारेण टिलोपादुभयमपीत्यपरे। पक्षद्वयमिदं पुंवद्भावे प्रदर्शितं, पटोरयं मतभेदोऽन्येषामुवर्णान्तानां कव्यादिनामिवर्णान्तानां च द्रष्टव्यः। कुमार्यादीनां तु पुंवद्भावेन कुमाराद्यादेशविधानात् वृद्धावप्यगेव लुप्यतइति (अचकुमारत्) इत्याद्येव भवति, इदं चाग्लोपित्वेनेत्वाभाववचनं सन्वत्सूत्रस्य चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपर इत्यर्थवादीनां हरदत्तादीनामनुसारेण न तु चङ्परे णौ यल्लघु तस्मिन्परतोऽभ्यासस्येति वादिनां कैयटकारादीनां, तेषां यदत्राभ्यासात्परं लघु न तच्चङ्परणिपरं, यच्चङ्परं न तल्लघु, अभ्यासस्य वर्णान्तरेण व्यवधानान्न तत्पर इति नास्त्यत्रेत्वप्रसङ्गः। तथाहि तत्र भाष्ये अजजागरदित्यत्राभ्यासलघुपरत्वाभावादित्वं न भवतीति उक्तम्, यदा व्यवहितं चात्र लघु चङ्परामति। यद्येवमचीकृतदजीहरदित्यादावपि व्यवधानं प्राप्नोति। नतदस्ति। 'येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' इत्येकेन वर्णेन व्यवधानमाश्रीयते न पुनरनेकेनापि। एवमप्यचिक्षणदित्यत्र न प्राप्नोति। एवं तर्हि आचार्यप्रवृत्तिर्ज्ञापयति भवति संयोगेन व्यवधानेऽपीति, यदयम् "अत्स्मृद्दृत्वर" इति असस्मरदित्यादीनामित्वाभावार्थमत्वं शास्ति। अवश्यं चैतदेवं चङ्परे णौ यल्लघु तल्लोपस्य स्थानिवत्त्वेन चङ्परणिपरत्वस्याभावादित्वं न भवतीति वाच्यं, तदेतत्स्थानिवत्त्वं न भवत्यभ्यासस्यादिष्टादचः पूर्वत्वात्स-

त्यपि वा स्थानिवत्त्वे तत्सहितमेव चङ्परणिपरमङ्गं भवति, अभ्यायस्य च तस्यवेतीत्वं दु-
र्वारमिदानीमेवोक्तम् । अथ कथमत्रेत्वादि भवति वादितवन्तं प्रयोजितवान् अववीदद्वीणां
परिवादकेनेति, यावता योऽसौ णौ णिलोपस्तस्य स्थानिवत्त्वेनाभ्यासात्परस्य लघोश्चङ्प-
रत्वं विहन्यते, अत्र वृत्तिकारः परिहरति । ण्याकृतिनिर्देशात्सिद्धमिति । अत एव णिजाते-
र्निमित्तत्वेनाश्रयणात् गोबलीवर्दन्यायेन णिचोऽन्यस्याको लोप इहाग्लोप इत्यग्लोपित्वादित्वं
न प्राप्नोतीत्येदपि परिहृतं, यत्तु "सन्वल्लघुनि" इत्यत्र भाष्ये णेः परत्वाद्वृद्धौ कृतायां लोप
इति अग्लोपित्वाभावादित्वं न भवतीतिवचनं तत् प्रौढिवादमात्रं, यस्त्वयमेव णौ चङीत्यत्र
नाग्लोपीत्यगितिप्रत्याहारग्रहणसामर्थ्यात् ण्यल्लोपेत्यादिवचनात् वृद्धेः पूर्वं णिलोपमाह ।
एवमन्यत्रापि णेर्णौ द्रष्टव्यं, वहेः क्ते यजादित्वात् सम्प्रसारणे परपूर्वत्वे हो ढे "झषस्तथोः"
इति तकारस्य धकारे तस्य ष्टुत्वेन ढकारे ढो ढे लोपे दीर्घः, ऊढः, तमाचष्टे (ऊढयति,) चङि
अजादित्वात् द्वितीयस्यैकाश्चङेति द्विर्वचने कर्तव्ये पूर्वत्रासिद्धत्त्वेन ढत्वादीनामसिद्धत्वे णौ
कृतं स्थानिवदिति णिलोपस्य च स्थानिवत्त्वे हशब्दस्य द्विरुक्तौ उत्तरखण्डस्य पूर्ववद्ढ-
त्वादावभ्यासस्य हलादिशेषे "कुहोश्चुः" इति कुत्वेन हकारस्य झकारे तस्य च । "अभ्यासे
चर्च" इति जश्त्वे जकारः, आटि वृद्धावौजढदिति भवति । अग्लोपित्वात्सन्वदित्वाभाव
औजढदिति, क्तिनि पूर्ववत् सम्प्रसारणाढूढिशब्दाण्णिचि चङि हति शब्दस्य द्विरुक्तौ । ननु
कथमिह ढत्वादीनामसिद्धत्वं, यतः [पूर्वत्रासिद्धायमद्विर्वचनम्,] इत्युच्यते, सत्यम् "उभौ
सभ्यासस्य" इति उपसर्गादुत्तरस्यानितेर्नकारस्य णत्वविधानादनित्यत्वज्ञापनादिह तत्र प्रव-
र्तते, नित्ये चास्मिन् प्राणितीतिवत् प्राणिणिषतीत्यत्रापि अनितेर्नकारस्योपसर्गस्थान्निमित्तात्
परत्वेन "अनितेः" इति णत्वे कृते तत्सहितस्यैव द्विर्वचनसिद्धेः किमनेन साभ्यासस्य णत्ववि-
धानेन, कर्तृशब्दाद्वा णाविष्ठवदतिदेशात् छन्दसीति विधीयमाने तृशब्दलोपे करयतीत्येके, एवं
भर्त्रादीनामपि भरयतीत्यादि द्रष्टव्यं, दोग्ध्रादेस्तु णौ घत्वादीनां पूर्वत्रासिद्धत्वेन तृ-
शब्दलोपे दौहीयसीत्यादिवद् दोहयतीत्यादि भवति । अन्ये त्वयं तृशब्दलोपश्छन्द-
स्युपदिष्टः कथं भाषायां स्यादिति कर्तयतीत्यादि प्रतिपन्नाः । पितृयतीत्यादावयं तृशब्दलोपो
नाशंक्यः, 'उणादयोऽव्युत्पन्नम्" इति पित्रादिषु व्युत्पत्तिकार्यानाश्रयणादवयवप्रविभागो न
भवति । अत्र च ज्ञापकम् । "अप्तृन्" इत्यत्र नप्त्रादीनां ग्रहणमव्युत्पत्तौ तृजन्तत्वादेव
दीर्घसिद्धेः किं तेषां ग्रहणेन । त्वमाचष्टे (त्वादायति) "प्रत्ययोत्तरपदयोश्च" इति एकार्थ-
योर्युष्मदस्मदोर्मपर्यन्तस्य त्वमयोर्वृद्धिः, अत्रान्ये 'अङ्गवृत्त' इति वृद्धिमकृत्वा त्वदयति
मद्यतीति इति मन्यन्ते । अपरे पुनस्त्वमयोः परपूर्वत्वात् पूर्वं नित्यत्वाट्टिलोपे वृद्धौ पुकि
(त्वापयति !मापयति) इदि भवति, त्वादयतीतिवादिनामन्तरङ्गपरपूर्वत्वमित्वमित्य
भिप्रायः । युवामाचष्टे (युष्मयति) आवामाचष्टे (अस्मयति) "युवावौ" इत्यत्र
द्विवचने ह्यर्थवृत्तिताया अभिधानेऽपि णिजुत्पत्तिः प्रातिपदिकादिति विभक्तेरनुत्पादे विभक्ति-
परत्वाभावान्न युवावयोः प्रसङ्गः, इह सुबन्तादुत्पत्तावपि विभक्तेरलुप्तत्वेन विभक्तिपरत्वा-
भावाद्युवावययोरप्रसङ्ग एव, न च मन्तव्यमन्तरङ्गत्वाल्लुकः पूर्वं युवावयोर्द्वितीयायां चेति
शेषे लोपापवादे आत्वे पुकि युवापयति आवापयतीति स्यातामिति, यतो 'अन्तरङ्गानपि
विधीन्बहिरङ्गो लुग् बाधते' उपपादितं चैतत् क्यज्विधौ, "प्रत्ययोत्तरपदयोश्च" इति त्वमौ
युष्मदस्मदोरनेकार्थत्वान्न प्रसजतोऽत ।एव युष्मानाचष्टे अस्मानाचष्टे युष्मयत्यस्मयती-
त्यत्रापि न भवस्तत्वामतिक्रान्तः अतिक्रान्तौ अतिक्रान्तान् (अतीत्वामेवमतिमाम् अति-
त्वान् अतिमान्) अत्र च युष्मदस्मदोरेकार्थत्वाद्विभक्तिपरत्वाच्च "त्वमावेकवचने" इति
त्वमयोः शेषे लोपापवादे "द्वितीयायां च" इति पूर्ववदात्वे शसोऽन्यत्र विभक्तेः "ङेः प्रथम-
योः" इत्यमादेशः । शसि तु "शसो न" इति युष्मदस्मद्भ्यां परस्य शस आदेर्नकारे सकारस्य
संयोगान्तलोपः, "युवावौ द्विवचन" इत्यत्र द्वयोर्वचनं द्विवचनं, तच्च युस्मदस्मदोर्विशेषण-

मिति स्थितत्वादौङि युवावयोरप्रसङ्गः, अत्रार्थे णौ युष्मदस्मदोरेकार्थत्वेन "प्रत्ययोत्तरपदयोश्च" इति त्वमयोरन्तङ्गत्वात्परपूर्वत्वे ततष्टिलोपे वा (अतित्वयति। अतिमयति) इति भवतः, अत्रापि परपूर्वत्वात्पूर्वं नित्यत्वाट्टिलोप इति वादिनाम् (अतित्वापयति, अतिमापयति) इति स्यात्, युवामतिक्रान्तमतिक्रान्तावतियुवामतिक्रान्तान् अतियुवान्, एवमत्यावामत्यावान्, युष्मदस्मदोर्न्यर्थत्वात् विभक्तिपरत्वाच्च "युवावौ द्विवचने" इति युवावयोः पूर्वत्वाद् "द्वितीयायां च" इत्यात्त्वं "ङेः प्रथमयोरम्" इत्यमूभावः, शसो नादि च भवति, युष्मानतिक्रान्तो ऽतिक्रान्तौ अतियुष्मानतिक्रान्तानतियुष्मानेवमत्यस्मान्, पूर्ववदात्वविभक्तिकार्यं, सर्वत्रार्थे णौ युष्मदस्मदोरनेकार्थत्वात्त्वमयोरभावात् (अतियुष्मयति। अत्यस्मयति) इति भाव्यं, श्वानमाचष्टे (शावयति) अत्र श्वन्निति स्थिते णाविष्ठवदतिदेशाद् द्वौ टिलोपौ प्राप्नुतः, टेरित्येको "नस्तद्धित" इति अपरस्तत्र "प्रकृत्यैकाच्" इति प्रकृतिभावष्टेरित्यस्यैवेति तस्मिन्निवृत्तेऽपि "नस्तद्धित" इति भवति तत्र कृते इष्ठनोऽजादित्वेन तत्र परे पूर्वस्य भत्वं दृष्टमिति णावप्यतिदेशेन तस्य सम्भवाद्वकारसम्प्रसारणे वृद्ध्यावादेशः। नन्विष्ठवदतिदेशवाक्ये णावित्युपमेये सप्तमीश्रवणादिष्ठवदित्युपमाने वतिः सप्तम्यन्तात् इति तत्र परे पूर्वस्य यत्कार्यं दृष्टं तदेवातिदेष्टव्यं, णावपि परे पुनर्णिष्ठनः तद्धितत्वमपि इति, तत्र "प्रातिपदिकस्य" इति वचनस्य प्रत्ययकार्याणामतिदेशनिवृत्त्यर्थत्वाद्वा णेस्तद्धितत्वस्याभावात्कथं "नस्तद्धित" इति टिलोपोऽत्र स्यात्, अतद्धितत्वादेव स्वयाप्योर्गुणो न कृतः। उच्यते। असत्यपि तद्धितत्वे ब्रह्मवत्तरो (ब्रह्मिष्ठः) इत्यादौ विन्मतोर्लुकि इष्ठनि परे प्रकृतो नान्तलक्षणष्टिलोपो दृष्ट इत्यत्रेष्ठनोऽभावेऽपि सम्भावनया स्यादेव, यथा पट्वितमा पटिष्ठेत्यादौ "भस्याढे तद्धिते"इति पुंवद्भावात्कुमारीमाचष्टे कुमारयतीत्यादौ इष्ठनः सम्भावनया भवति, एवं तर्हि दविष्ठ इत्यादाविष्ठन्योर्गुणः पूर्वस्य दृष्ट इत्यत्राप्यतिदेशः प्राप्नोति। नैष दोषः। तदस्मिन्सम्प्रसारणटिलोपौ "असिद्धवदत्र" इत्यसिद्धौ भविष्यतः। अन्ये तु ब्रह्मिष्ठ इत्यादौ नान्तलक्षणाट्टिलोपात् परत्वाट्टेरित्यनेनैव भवितव्यमिति तस्याप्रवृत्तेरिष्ठनि परे पूर्वत्वादर्शनादिहातिदेशो न युक्त इति तदभावात् केवलं सम्प्रसारणपूर्वत्वयोः शुनयतीति भवतीति मन्यन्ते। नन्वनयोराभीययोष्टिलोपयोः "असिद्धवदत्र" इत्यन्योन्यस्यासिद्धत्वात्कथं विप्रतिषेधः, "घुमास्था" इत्यत्र हल्ग्रहणेन विप्रतिषेधइदमसिद्धत्वं नेति ज्ञापनात्, तद्धल्ग्रहणं (गोद) इत्यादावजादौ क्ङित्यार्धधातुके ईत्वं माभूदिति। यदि च विप्रतिषेधे इदमसिद्धत्वं स्यात् कृतेऽपीत्वे तस्यासिद्धत्वादातो लोपे सिद्धं गोद इत्यादोति किं हल्ग्रहणेन, नन्वेतदीत्वेऽपि "अचि श्नुधातु" इतीयङ् स्यादिति तन्निवृत्त्यर्थमीत्वमेव माभूदिति अर्थवदेव। नैतदस्ति प्रयोजनं, यदि यङोऽप्याभीयत्वेन तस्मिन्नपि तस्यासिद्धत्वात्, मैवं, युटो यणीवेयङीत्यस्यासिद्धत्वस्याभावो वाच्यः, अन्यथा धियौ पियाविति न सिध्यति। यद्दधातिपिबत्योः क्वौ कृतं "घुमास्था" इतीत्वमियङ्यसिद्धं स्यात्, नैतदस्ति, "ध्यायतेः सम्प्रसारणं च" इति ध्यायतेः प्यायतेश्च क्वौ सम्प्रसारणदीर्घत्वयोर्धीपीशब्दयोर्व्युत्पादनादवश्यं चैतदेवं वाक्यकारस्य मते विज्ञेयमन्यथा तेन वकारे प्रतिषेध इति क्वापीत्वाभावस्योक्तत्वाद्धापाशब्दावेव स्यातां,तथा च तत्रभाष्ये यदि तर्हि वकारे प्रतिषेध उच्यते कथं धीरिति नोदयित्वा धीरिति चोक्तं, किमुक्तं नैतदीत्वं किं तर्हि ध्याप्योः सम्प्रसारणमित्युक्तं, यदपि मतमीत्वे वकारस्य निषेध इत्यस्य भाष्ये ऽनवस्थानात् क्वाप्येतौ शब्दौ भवत इति तदपि क्वावीत्वं, विभक्तावियङिति व्याश्रयत्वान्नास्त्यसिद्धत्वप्रसङ्गः। एवमपि व्यवस्थार्थं हल्ग्रहणं कर्तव्यमेव, अन्यथाभीयानामन्योऽन्यस्मिन्नन्योन्यस्यासिद्धत्वादीत्वमाल्लोपे सिद्धमाल्लोपश्चेत्व इति व्यवस्था न प्रकल्पेत, एवं तर्हि "आतो लोप इटि च" इत्यजादौ क्ङित्यार्धधातुके ऽकारस्य लोपो भवति, ततो घुमास्थागापाजहातिसां धादेरपि आकारस्य लोपो भवति, पूर्वोक्ते इडादौ परे, इदं चेत्वबाधनार्थम्, इदं

वाजा द्वावाल्लोपस्योक्तत्वाद्वलादौ क्ङित्यार्धधातुके भवति, तत "एर्लिङि" "वान्यस्य संयो-
गादेः" "न ल्यपि" "मयतेरिदन्यतरस्याम्" यति ततो, आत इत्येव, यति चात ईद्भवत्येवं
लघीयसा न्यासेन सिद्धावपि यद्गरीयसा यत्नमास्थाय हल्ग्रहणं करोति तस्यैतत्प्रयोजनं
विप्रतिषेधे नेदमसिद्धत्वमिति, एवमप्युक्तो विप्रतिषेधः, इष्ठवदतिदेशेनैव द्वावपि टिलोपौ
प्राप्येते इत्येकयोगलक्षणत्वेन पौर्वापर्याभावात्, तथा "प्रत्ययलोप" इत्यत्र वार्तिकं
तुग्दीर्घयोश्च विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात् परिवीरिति, न युक्तो विप्रतिषेधः ।
किमनेनातिदिश्यते,यत्प्रकृतावव्यवस्थितं तत्र च परत्वात् "नस्तद्धित"इत्येतं बाधित्वा टेरित्येव
व्यवस्थितमिति, "प्रकृत्यैकाच्" इत्यत्र भाष्यादौ (ब्रह्मिष्ठ) इत्यत्र "नस्तद्धित" इति
टिलोपो विहितः । विद्वांसमाष्टे इति णौ टिलोपे विद्वयतीति दौर्गाः । अत्रात्रेयः—प्रसारणा-
भावश्चिन्त्य इति, तन्नेष्ठवद्भावेन भत्वात् "वसोः सम्प्रसारणम्" इति सम्प्रसारणे वृद्धावा-
वादेशे विदावयतीति भवति, भवितव्यमित्येके । अपरे तु ब्रुवते । कृतेऽपि टिलोपे प्रसारणं
प्राप्नोतीति नित्यत्वात् कृते तस्मिन्नन्तरङ्गत्वात्परपूर्वत्त्वे पश्चाट्टिलोप इति विदयतीति । ननु
टिलोपोऽपि कृते सम्प्रसारणे प्राप्नोतीति नित्यः, नैतदस्ति, कृते सम्प्रसारणे ऽन्तरङ्गत्वात्
परपूर्वत्त्वे शब्दान्तरप्राप्त्या नित्योऽयमनित्यो भवति । स्यादेतदेवं यदि प्रसारणमात्रेण श-
ब्दान्तरप्राप्तिः स्यान्नेह तथा किं तु परपूर्वत्वेन, यस्य च लक्षणान्तरेण निमित्तं विहन्यते
नैतदनित्यं भवति । नैष दोषः । यस्य निमित्तमिति परिभाषा न सार्वत्रिकी, उक्तं चैवम्
"आङजादीनाम्"इत्यत्र हरदत्तादिभिः। अमुमेव पक्षमाश्रित्य अस्माभिर्माधवीयायां धातुवृत्तौ
विदयतीति प्रदर्शितम् । उदञ्चमाचष्टे (उदीचयति) । अत्र सोपसर्गात्संग्रामयतेरिति
ज्ञापकाद्धातुसंज्ञानिमित्ते प्रत्यये उपसर्गाणां पृथक्करणात् क्विन्नन्ताल्लुप्तनकारान्तादञ्चतेरेव
णौ "प्रकृत्यैकच्" इति प्रकृतिभावाट्टिलोपाभावो, णाविष्ठवदतिदेशेन भत्वे "अच" इति तु
लुप्तनकारस्याञ्चतेः प्राप्ताकारलोपापवाद "उद ईत्" इतीत्वं भवति । चङिणिलोपस्य "द्वि-
र्वचनेऽचि" इति स्थानिवत्त्वात् अजादेर्द्वितीयस्य"इति चिशब्दस्य द्विर्वचने अङ्गस्याटि वृद्धौ
उदैचिचदिति भवति, ल्यपि लघुपूर्वत्वाभावेनायादेशाभावाण्णिलोप, उदिच्येति भवति,
प्रत्यञ्चमाचष्टे प्रतीचयति,अत्रापि पूर्ववदञ्चतेर्भत्वात् "अच" इत्यकारलोपे "चौ"इति लुप्तन-
करेऽञ्चतौ पूर्वपदस्य दीर्घः । चङि चिशब्दात् पूर्वमाटि यणादेशे (प्रत्यचिचत्) "इकोऽसवर्णे
शाकल्यस्य ह्रस्वश्च" इति यदेकोसवर्णेऽचि प्रकृतिभावो दीर्घस्य च ह्रस्वस्तदा प्रति अचिच-
दिति भवति । ल्यपितु पूर्ववत् प्रतीच्येति भवति । सम्यञ्चमाचष्टे (समीचयति) । "समः
समि" इत्यञ्चतौ सम्यादेशे "अचः" इत्यकारलोपे "चौ" इति दीर्घः । अत्रापि चङ्ल्यपोः
पूर्ववत् सम्यचिचत् समीच्येति भवति, तिरोऽञ्चतीति (तिर्यङ्) "तिरसस्तिर्यलोपे" इति
तिर्यादेशः, तमाचष्टे (तिरायति) इष्ठवद्भावेनाञ्चतेष्टिलोपे वृद्ध्यायौ, तिरस इत्यत्रालोप
इति अलोपे तिर्यादेशाभावो "अच" इत्यञ्चतेर्विधीयमानाकारलोपविषयः, स ह्यनन्तरः,
'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' अत्र पुनरिष्ठवद्भावप्रवृत्त्या "टेः" इति तिरेरि-
कारस्य वृध्यायोः कृतयोर्वा लोपो न भवति, 'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य' इति । यद्वा
"असिद्धवदत्र" इति प्राथमिकस्याञ्चतिटिलोपस्य चारमिकेऽस्मिन्नसिद्धत्वात,यथाकारितरा-
मित्यत्र तशब्दे पूर्वप्रवृत्तश्चिणो लुक् पुनस्तरपि स्वप्रवृत्तावसिद्धो भवति, अत एव तिरेः
स्थानिवत्त्वेनाव्ययत्वात् 'अव्ययानां भमात्र' इति प्राप्तोऽपि टिलोपो न भवति, एवमपीका-
रस्य "यस्य" इति लोपेन भवितव्यमिति चेन्न । टिलोपस्यासिद्धत्वात्परया वृद्ध्या बाधाद्वा ।
यच्चु "कस्येत" इत्यत्र भाष्ये कायमित्यत्रेकारवचनसामर्थ्याद् "यस्येति च" इति लोपाभा-
ववचनं तदुपायान्तरपरतया कथं चिन्नेयम् । अस्यारलोपित्वेनोपधाह्रस्वत्वाभावात् (अति-
तिरायत्) इति, सहाञ्चतीति (सध्र्यङ्,) "सहस्य सध्रिः" इति सध्र्यादेशः, सध्रिमाचष्टे
(सध्रायति,) पूर्ववत् ध्रेरिकारलोपाभावः, चङि (असस्रध्र्यत्,) अग्लोपित्वादुपधाह्रस्व-

त्वाभावः, अभ्यासस्येत्वं तु लघुपरत्वाभावादपि न भवति, यदीष्ठवद्भावेन प्राप्तस्याञ्चतेष्टि-लोपस्य तिर्यादेरिकारे पुनः प्रवृत्तावसिद्धत्वं तर्हि कुमारयतीत्यादाविष्ठवद्भावेन प्रवृत्तं पुंवत्त्वं तेनैव कुमारादेरकारलोपे ऽसिद्धं, नैष दोषः, इष्ठवत्भावेनातिदिश्यमानानां कार्याणामुत्पत्तिदेश एव देश इत्याश्रयणात्पुंवत्त्वोत्पत्तिश्च "भस्याढे तद्धिते" इति विधीयमाना आभीया न भवति,अत एव भाष्यकारेण लोहिनीमाचष्टे लोहितयतीत्यादिषु इष्ठवद्भावेन लोहितादेशेनपुनष्टिलोपः कृतः,एवमपि सध्र्यतीत्यादावङ्गवृत्तिपरिभाषया'वृद्धिर्न प्राप्नोतीति नाशंक्यम्, यस्मादेषा भाष्यकारादिभिर्यत्राश्रिता तत्रैव प्रवर्तते, अत एवात्र परिभाषावाक्ये निष्ठित-स्येत्युक्तं, निष्ठितत्वं च प्रयोगार्हत्वं, तच्चाप्तभाषितमन्तरेणावगन्तुं न शक्यते। विषु अञ्चति गच्छतीति (विषक्) तमञ्चतीति (विष्वग्र्यङ्)। देवान् अञ्चतीति (देवद्र्यङ्) "विष्वक्देवयोश्च टेरद्र्यञ्चतावप्रत्यये" इत्यद्र्यादेशः विष्वद्र्यञ्चमाचष्टे (विषद्र्याय-यति,) एवं (देवद्र्यायति) पूर्ववदञ्चतेर्लोपे "यस्य" इति लोपात्परत्वादद्रोकारस्य वृद्धवा-यादेशः। विषक्शब्दोऽयं धर्मवचनोऽपि दृश्यते। यथाद्योरस्य सतो विषुणचारुरित्यत्र, विष्वगित्युत्तरपदलोपश्चाकृतसन्धेररिति लोमादिलक्षणे मत्वर्थीये नकारे उत्तरपदस्याकृतसन्धेर्लोपः। अत्र भट्टभास्करः। विषुणस्य, नानाविधा या गतिस्तद्वतः, "विष्वग्देवयोश्च" इति च शब्दात्सर्वनाम्नो ऽद्र्यादेशे सर्वद्र्यायतीत्यादि। अदसो ऽद्रयादेशे पक्षत्रयम्। "अदसोसेर्दादु-दोमः" इति उत्वमुभाभ्यामपि दकाराभ्यां परयोः, मत्वं च द्वयोरपि दकारयोरित्येकः पक्षः। उत्वमत्वे परयोरेवेति द्वितीयः, नेति तृतीयः, तथा चोक्तम्।

'अदसोद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववत्।
केचिदन्त्यसदेशस्य नेत्येके ऽसेर्हि दृश्यते॥

इति। तत्रोत्त्वमत्वयोः (अमुमुआयति, अदमुआयति) इति भवतः, उकारस्य तु यणादेशः पूर्वत्रासिद्धमित्यसिद्धत्वान्न भवति। उत्वमत्वयोरभावे त्वदद्रायतीति। चङि अजादित्वेन द्वितीयस्यैकाचो द्विर्वचनेऽग्लोपित्वादुपधाह्रस्वत्वाभावात् (अमुमुआयति) इति, उत्वमत्त्वयोरभावे "सन्वत्" इतीत्वमग्लोपित्वादभ्यासस्य चङ्परलघुपरत्वाभावाद्वा न भवति। उत्वमत्वयोः [पूर्वत्रासिद्धीयमद्विर्वचने] इति असिद्धत्वाभावः, त्वामञ्चति (त्वद्र्यङ्) मामञ्चति (मद्र्यङ्,) उत्तरपदत्वात् "प्रत्ययोत्तरपदयोश्च" इति एकार्थ-वृत्तयोर्युष्मदस्मदोर्मपर्यन्तस्य त्वमादेशौ, पूर्ववदद्र्यादेशः, णौ तु (अदद्रायति, मद्रायति) युवामञ्चति आवामञ्चति (युष्मद्र्यङ्, अस्मद्र्यङ्,) अत्र युष्मदस्मदोरुत्तरपदपरत्वेऽप्यनेकार्थत्वान्न त्वमौ, "युवावौ द्विर्वचने" इत्यत्र द्विर्वचननेन द्व्यार्थवृत्तिताया अभिधानेऽपि विभक्तेर्लुका लुप्तत्वेन तत्परत्वाभावान्न युवावादेशौ, न लुकः पूर्वमन्तरङ्गत्वेन भवतो "अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत" इत्युक्तत्वात्। युष्मानञ्चति (युष्मद्र्यङ्,) अस्मानञ्चति (अस्मद्र्यङ्,) सर्वत्रात्र णौ (युष्मद्रायति अस्मद्रायति) इति भवतः। एवं त्वामतिक्रान्तमतिक्रान्तौ अतित्वामतिक्रान्तान् (अतित्वान्) एवमतिमाम् (अतिमान्)। एषु कर्मसूपपदेषु अञ्चेः क्विपि (अतित्वदङ् अतिमदङ्)। अत्र टिलोपे जाते (अतित्वादयति, अतिमादयति) इति भवतः, युवामतिक्रान्तमतिक्रान्तौ वा अतियुवामतिक्रान्तानतयुवान्, एवमत्यावामत्यावान्, एषु कर्मसूपपदेषु क्वावतियुष्मदङ् अत्यस्मदङ्, युस्मदस्मदोर्द्वयार्थत्वेऽपि 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधत'इति पूर्वमेव विभक्तेर्लुका लुप्तत्वात् विभक्तिपरत्वाभावान्न युवावौ नाप्युत्तरपदनिबन्धनौ त्वमौ, एकार्थत्वाभावादत एव युष्मानतिक्रान्तमतियुष्माम् ,अतिक्रान्तनतियुष्मान् ,एवमत्यस्मामत्यस्मानित्यनयोरपि कर्मणोः अञ्चतावप्रत्यये उत्तरपदे त्वमयोरभावादतियुष्मदङ् अत्यस्मदङ् इति भवतः, सर्वत्रात्र णावञ्चतेष्टिलोपे एकार्थत्वाभावादेव प्रत्ययनिबन्धनावपि त्वमौ न भवत इति (अतियुष्मादयति अत्यस्मादयति) इति भवतः, सर्वत्रातित्वादयतीत्यादौ युष्मदस्मदोरुप-

सर्जनत्वात्संज्ञोपसर्जनप्रतिषेध इति सर्वनामत्वाभावादद्रयादेशो न प्रदर्शितः । कमाचष्टे (कापयति, अचीकपत्,) "प्रकृत्यैकाच्" इति प्रकृतिभावाट्टिलोपाभावे वृद्धौ पुगागमः, अमाचष्टे (आपयति,) चङि तु माभवानोणिणदित्यत्र नित्यत्वाद् द्वितीयस्यैकाचाद्विर्वचने ओकारस्यानुपधात्वादेव णौ चङि ह्रस्वाभावसिद्धे ऋदित्करणेन "नाग्लोपि" इत्यादिना ह्रस्वत्वनिषेधाद् द्वियीयद्विर्वचनात् पूर्वमुपधाह्रस्वत्वस्य ज्ञापनात्, कृते च तस्मिन् "द्विर्वचनेऽचि" इति णिलोपस्य स्थानिवत्त्वेनाजादित्वात् पिशब्दस्य द्विर्वचने (माभवानपिपत्) इति भवति, इमाचष्टे (आययति,) उमाचष्टे (आवयति,) अरमाचष्टे (आरयति,) अलमाचष्टे (आलयति,) ऋकारलृकारयोः सावर्ण्यात् तयोः "उरण् रपर" इति रप्रत्याहारपरा वृद्धिः । एषां णौ चङ्युपधाह्रस्वे ततो द्वितीयस्यैकाचो द्विर्वचने (माभवानयियत्, माभवानविवत् माभवानरिरत्, माभवानलिलत्) इति तत्र भवति । अत्र णौ कृतं स्थानिवदिति वृध्यादेर्द्विर्वचने न स्थानिवत्त्वं, यदयं स्थानिवद्भावः स्थानिरूपस्य द्विर्वचने कर्तव्ये भवति, इह तु स्थानिवद्भावाण्णेरेव द्विर्वचनं, पुनातीति पूः, भवतीति भूः, लुनातीति लूः, जवतीति जूः, एभ्यो णौ (पावयति, भावयति, लावयति, जावयति,) लुङि णौ चङि ह्रस्वत्वे णौ कृतं स्थानिवदिति पुप्रभृतीनां द्विर्वचने पुनरुत्तरखण्डस्य वृद्ध्यावयोर्ह्रस्वत्वे वा ऽभ्यासस्य च ह्रस्वत्वे तस्यावर्णपराः पुयण्जः परा इति सन्वद्भावे "ओः पुयण्जि" इति सनि विधीयमानइत्वे दीर्घ च (अपापवत्, अलीलवत्, अजीजवत्) इति भवति । नन्वत्र पूप्रभृतीनां द्विर्वचने पुनरुत्तरखण्डस्य वृद्ध्यादेशह्रस्वत्वानिति धादेरभ्यासस्यानादिष्टादचः पूर्वत्वात्सन्वद्भावेन पुयण्जिलक्षणे सन्वदित्वे प्राप्ते "णौ चङि" इति ह्रस्वस्य "अचः परस्मिन्" इति "स्थानिवत्त्वेनालघुपरत्वात् कथमित्वं, नैष दोषः । "ओः पुयण्जि" इति इत्वस्य सन्वद्भावे सन्वदतिदेशस्यानर्थक्यप्रसङ्गात् स्थानिवद्भावस्यात्राप्रवृत्तेः, इदमेव ओः पुयणजीति वचनं ज्ञापकं णौ कृतस्य स्थानिवत्त्वे, अन्यथा न क्वचिदपि पुयण्जिपरोऽवर्णात्पराऽभ्यासः सम्भवति, नन्वत्रास्ति सम्भवः पिपचितेः पिपचिषतीति, यवतेर्यौतेश्च "स्मिपूङ्रञ्ज्वशां सनि" "सनीवन्तर्ध" इतीटि गुणावादेशयोः "द्विर्वचनेऽचि" इति स्थानिवद्भावेन पूयूशब्दौ द्विरुच्यते, एवमपि पुइत्युदिद्ग्रहणं जग्रहणं च णौ कृतस्य स्थानिवत्त्वाभावेऽनर्थकमेव स्यादिति ज्ञापकमेव । यद्येवमचिकीर्तदिति "उपधायां च" इत्यृकारस्येत्वं णौ कृतमिति स्थानिवद्भावादृकारवदेकाचो द्विर्वचनेऽभ्यासस्योरदत्वादचिकर्तदिति प्राप्नोति, नैतदस्ति । यत इदं ज्ञापकं यथा जातीयकाः पुयणजस्तथा जातीयकानामेवेति इह न प्रवर्तते, कथं जातीयकाः, पुयणजः, अवर्णवदुत्तरखण्डाः, स्पष्टं चैतदेवम् "उरत्" इत्यत्र रक्षितपदमञ्जर्यादिषु, "द्विर्वचनेऽचि" इति सूत्रे भाष्येऽप्येवमेव स्थितम् । यत्तु "स्तौतिण्योरेव" इत्यत्र न्यासे सिषेचयिषतीत्यत्र सेवेर्हेतुमण्णौ गुणे सनीड्गुणायादेशयोरुत्तरखण्डस्यावर्णपरत्वाभावेऽप्यस्याः परिभाषायाः सामान्याश्रयेण सिच्शब्दस्य द्विर्वचनकथनं तदेवमप्यत्र रूपाभेद इत्येतावन्मात्रतया न तु सिद्धान्तस्थित्या । अन्यथा पूर्वोक्तन्यासेन भाष्यादिना विरोधः स्यात्, एवं च सीरदेवेनास्याः परिभाषायाः विशेषविषयतामुक्त्वा पूर्वोक्तन्यासप्रामाण्यात् "पूर्वत्रासिद्धम्" इत्यत्र वृत्तौ उत्तरखण्डस्याचोऽभावेऽपि स्थानिवत्त्वाप्रायेणौजढदिति, द्विर्वचनोक्तेऽलोपः "पिबतेरीच्चाभ्यासस्य" इत्यत्र चापीप्यद् इत्युदाहरणे णौ कृतस्योपधालोपस्य स्थानिवत्त्वेन पापूशब्दस्य द्विर्वचनाच्च यत्सामान्यविषयत्वकथनं तदपि प्रत्युक्तं, कथं तर्हि (औजढत् अपीप्यत्) इति, यत् द्विर्वचनोत्तरकालमपि टिलोपेन "लोपः पिबतेः" इत्यनेन वोत्तरखण्डेऽवर्णापहारस्यावश्यंभावित्वात् प्रयोगगतमवर्णं न पश्याम इति णौ कृतपरिभाषानुपस्थानात्, अनच्कत्वाद् द्विर्वचनमेव न स्यात् । उच्यते । यद्यपि प्रयोगेऽवर्णवन्तमुत्तरखण्डं न पश्यामः प्रक्रियायां तु पश्याम एवेति द्विर्वचनेनोत्तरकालं प्रवर्तमानेनावर्णापहारेण न कश्चिद्दोषः । एवं चैतदर्थमवर्णोत्तरखण्डे परिभाषेयं नित्या अन्यत्र क्वचित्प्रवर्तत इति व्यवस्थाशून्यं सीरदेववचनं नाश्र-

यणीयं भवति, कथं तर्हि (सिषेवयिषति) इति, यदिह द्विर्वचने उत्तरखण्डमवर्णान्न भवतीति- णौ कृतस्य गुणस्य स्थानिवत्त्वं न स्यात्, मास्तु गुणस्य द्विर्वचनेऽभ्यासह्रस्वत्वे नैवं रूपं सिध्यति। भ्रूवमाख्यत् अबुभ्रवदित्यत्र योऽवर्णपरो यण् नासौ। ओः पर इतीत्वाभावः। अशिश्रयदित्यत्राभ्यासस्येत्वं णौ कृतस्य स्थानिवत्त्वेन श्रीशब्दस्य द्विर्वचनात्। हेशब्द- माख्यत् (अजीहयत्,) गावमाख्यत् (अजूगवत्,) रायमाख्यत् (अरीरयत्,) नावमाख्यत् (अनूनवत्) अत्रापि णौ कृतपरिभाषया सन्ध्यक्षरस्य द्विर्वचनेऽभ्यासस्य ह्रस्वत्वे लघु भवति। अत्रोपसर्गग्रहणं प्राद्युपलक्षणम्, अन्यथा स्वश्वमाख्यत्स्वासश्वयदित्यादि न सिध्यति। स्वराचष्टे (स्वरयति,) 'अव्ययानां भमात्रे' इति टिलोपः "प्रकृत्यैकाच्" इति प्रकृतिभावस्तु येन नाप्राप्तिन्यायेनानन्तर्याच्च टेरित्यस्यैव, टिलोपस्य स्थानिवत्त्वाभावा- त्स्वश्शब्दस्य द्विर्वचने असिस्वयदित्येके। अन्ये तु णौ कृतत्वेन टिलोपस्य स्थानिवत्त्वा- त्स्वरशब्दस्यैव हि द्विर्वचनं युक्तमित्यसस्वरदित्याहुः। अत्राभ्यासस्येत्वमुत्तरखण्डस्य पुनष्टिलोपेन लघुपरत्वाभावान्न भवति। न च टिलोपात्पूर्वमेवास्ति लघुपरत्वमिति स्यात्, नित्यत्वात्तस्य, न च णिचा लघुपरत्वं, तस्य निमित्तत्वेन ततोऽन्यस्य लघोस्तत्राश्रयणस्य स्थितत्वात्, बहु च बहुत्वं वाचष्टे (भावयति,) अत्र "इष्ठस्य यिट् च" इतीष्ठनि विहितत्वात् बहोर्भूभावः, यिडागमस्तु णावित्युपमेये सप्तमीश्रवणादिष्ठवदित्युपमानादपि सप्तम्यन्ताद्वतिरितीष्ठनि परे पूर्वस्य यत्कार्यं तदेवातिदिश्यते, न तु इष्ठनोऽपीति प्रातिपदि- कस्येतिवचनस्याप्रत्ययकार्यातिदेशार्थत्वाद्वा न भवति, "टेः" इत्यत्र कैयटे भावयतीत्यु- दाहृत्य यिट्सन्नियोगशिष्टत्वाद्भूभावस्य यिडभावे भूभावस्याप्यभावात् बहयतीत्येकीय- मतेनोपन्यस्तं, पदमञ्जर्यां तु बहतीति स्वपक्षमुक्त्वा भावयतीत्येकीयमतेनोक्तम्। अत्र शास्त्राणां कार्यस्य च प्राधान्यात्तदेवातिदेष्टुं युक्तमितीष्ठवद्वचनमेवेष्ठनि परतः प्रकृतौ दृष्टं कार्यं णावपि विधत्तइति भूभावस्य सन्नियोगशिष्टत्वाभावाद् भावयतीत्येव युक्तमिति वयमुत्पश्यामः। एवं च यदुक्तं पुरुषकारे बहयतीत्युदाहृत्येष्ठनि यत् दृष्टं कार्यं तदप्यति- दिश्यते, न चेष्ठनि युट् नापि इष्ठवद्भूभावश्च, यिड्सन्नियोगशिष्टत्वात्तदभावे तु भाव- यतीति चिन्त्यमाप्तैरिति। तदेव चिन्त्यं भवति। चान्द्रकौमारशाकटायनेषु पुनरिष्ठनि युक् चेति बहोरेव युक् विधीयते तत्र मते ऽत्रापि भूयतीति भाव्यम्।

सूत्रवार्तिकभाष्येषु नायं पक्षः प्रदर्शितः।
विरुद्धश्चेति तैरेव न वयं बहु मन्महे॥
अस्त्येव हि विरोधोऽत्र पक्षे युक् प्रकृतेर्भवेत्॥
तेन णावपि तस्य स्यादतिदेशो युटः पुनः।
प्रत्ययस्यैव शेषत्वान्नातिदेशो भवेद्यतः॥

टिलोपः। यणादिपरलोपः। 'स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः', स्थूलादिभ्यः इष्ठेमेयःसु परं यणादि लुप्यते, तत्र पूर्वस्य च गुणो भवतीत्येतस्मादपि भवति, यणादीत्येतावत्युच्यमाने पुनः सर्वस्य लोपादियतीतिवत् प्रत्ययस्यैव श्रवणं स्यादिति परव- चनमत्र, पूर्वस्य गुणवचनं स्थविष्ठ इत्यादावोर्गुणो यणादिपरलोपस्य "असिद्धवदत्र" इत्य- सिद्धत्वादवर्णान्तस्य भस्याभावान्न स्यात् प्रसङ्गः, क्षेपिष्ठ इत्यादावुवर्णान्तस्य भस्यैवाभा- वाच्च, अत्रेक्परिभाषोपस्थानादन्त्यस्य गुणो न भवति, ह्रसिष्ठं इत्यादौ त्विकोऽभावान्नैव भवति, अत एवोक्तं वृत्तौ पूर्वग्रहणं विस्पष्टार्थमिति। नन्वेतदिक्परिभाषाबाधेनानिकोऽप्य- न्त्यस्य गुणार्थं स्यात्, नैतत्, "इको गुणवृद्धी" इत्यत्र भाष्यवार्तिकयोर्हशिक्षिप्रक्षुद्रेष्विग्र- हणमिति पक्ष एव गुणस्योक्तत्वात्, (स्थवयति, दवयति, क्षेपयति, क्षोदयति) इति, अत्र यवयतीत्यादौ गुणस्य "अचोऽञ्णिति" इति वृद्धिः 'अङ्गवृत्त' इति वा "प्रातिपदिकाद्धात्वर्थे बहुलम्" इति बहुलग्रहणाद्वा न भवति, अत्र युवतिशब्दादपि इष्ठेयसुनोर्लिङ्गविशिष्टपरि-

भाषया यणादिपरलोपादेर्भावाण्णावपि यणादिपरलोपादौ यवयतीत्येव रूपं, यद्वात्रेष्ठवद्भावात् पुंवत्त्वेन युवशब्दआदेशे तस्य यणादिपरलोपे भविष्यति तदेव रूपम् , अत्र प्रक्रियारत्ने बहुना दूरयतीत्यपि कौमारश्चिन्त्यः । (दवयति) इत्येव भाष्ये उदाहृतत्वेन तेषां यत्किञ्चित् प्रयोगमात्रमूलत्वादस्यापि सम्भवाच्चेति सुधाकरकारोऽपि 'शीकरव्यतिकरमरिचिभिर्दूरयत्यवनते विवस्वति'इति प्रयोगमुपादायेष्ठवद्भावाद्दवयतीति भवितव्यमिति,यणादिपरलोपे । विन्मतोर्लुक् । स्रगस्यास्तीति (स्रग्वी,) "अस्मायामेधास्रजो विनिः" । तथा गावोऽस्येति मतुपि गोमान् , तत्र (स्रजिष्ठो, गविष्ठ) इत्यादौ भवन्विन्मतोर्लुक् स्रजयति गवतीत्यादावपि भवति । तत्र कृते "टेः" इति प्रकृतेर्यष्टिलोपः प्राप्तः स "प्रकृत्यैकाच्" इति प्रकृतिभावान्न भवति तत्राजन्तेषु "अचो ञ्णिति" इति वृद्धिः, स्रगादिषु "अत उपधाया" इति 'अङ्गवृत्ते पुनर्वृत्तावविधिः' इति न भवतीति भाष्ये स्थितम् । सन्वल्लोपित्वात्सन्वदित्वदीर्घत्वयोरभावात् (असस्रजत् । अजुगवत्) इत्यादि भवति, मायाविनमाचष्टे मेधाविनमाचष्टे वसुमन्तमाचष्टे दृषद्वन्तमाचष्टे इत्यादौ विन्मतोर्लुकि प्रकृतेरनेकाच्त्वाट्टिलोपे (मावयति, मेधयति, वसयति, दृषयति) इत्यादि भवति, सकारान्तानामपि पयस्विनमाचष्टे तेजस्विनमाचष्टे आयुष्मन्तमाचष्टइत्यादौ णौ विन्मतोर्लुगिति लोपे (पयसयति, तेजसयति, आयुषयति) इत्यादि भवतीति "प्रकृत्यैकाच्" इत्यत्र पदमञ्जर्यां स्थितं, कैयटे तु तत्र भाष्यकारेणेष्ठेयसुनोर्विधीयमानोऽयं "प्रकृत्यैकाच्" इति प्रकृतिभावः क्व भवतीति विचार्य विन्मतोलुगर्थमिति विन्मत्वन्तादिष्ठेयसुनोर्विन्मतोश्च लुकि स्रगिष्ठादौ स्रगादेष्टिलोपाभावार्थमित्यभिधाय विन्मतोर्लुगयं ना प्राप्ते टिलोपे आरभ्यमाणस्तं बाधिष्यते, स एव हि लोपः कृतेऽपि विन्मतोर्लुकि स्रगादौ प्रवर्त्ततइत्युभयोः प्रकृतिप्रत्ययविषययोष्टिलोपयोरेकत्वमङ्गीकृत्य विन्मतोर्लुकि च स्रगादिप्रकृतेष्टिलोपोऽपि बाधतइति कृत्वा प्रकृतिभावस्यानर्थक्यं प्रतिपाद्य तत्प्रतिपक्षत्वे पयस्विञ्छब्दादिषु विनश्च लुक्यनेन स्रगादाविव पयसष्टिलोपस्य बाधे पयिष्ठ इति न प्राप्नोतीति आक्षिप्य 'यथालक्षणमप्रयुक्ते' इत्यभिधानान्न भवति टिलोपः, रजस्विनमाचष्टे (रजसयति) आयुष्मन्तमाचष्टे (आयुषयति) इति भवितव्यमित्युक्तम् , नन्वत्र मतेऽन्येषामप्यनेन न्यायेन लोपो न स्यादिति कथं वृत्तावेकाज्ग्रहणस्य वसयतीति प्रत्युदाहरणम् , उच्यते । भाष्ये "प्रकृत्यैकाच्" इदं प्रत्याख्यानमन्तरेणापि सूत्रं भिन्नविषयस्यापि टिलोपस्य शास्त्रद्वारेणैक्यमभ्युपेत्याभावः शक्यते वक्तुमित्येवं परं न त्वर्थसत्त्वमित्यवश्यं विन्मतोर्भिन्नविषयस्य प्रकृते टिलोपस्य बाधासम्भवादेकाक्षु तद्बाधनार्थमारम्भणीयमेतत्सूत्रमित्यनेकाक्षु टिलोपो भवत्येव, यत्तु पयिष्ठ इति न प्राप्नोति 'यथालक्षणमप्रयुक्त' इतिभाष्यमुपादाय न भवति टिलोप इति कैयटकारवचनं तद् भाष्ये पयस्विञ्छब्दं प्रस्तुत्यानभिधानात्कृतविन्मतुलुगन्तसान्तमात्रविषयं न त्वन्यविषयमपि, अत एव तत्रैव कैयटे ततश्च रजस्विनमाचष्टे (रजसयति) आयुष्मन्तमाचष्टे (आयुषयति) इति भवितव्यमिति कृतविन्मतुलुगन्तसान्तमेवोदाहृतं, यत्तु माययतीत्यादाविष्ठवद्भावेन विनो लुकि पुनस्तेनैव टिलोपे चिणो लुङ्न्यायेन विनो लुको "असिद्धवदत्र" इत्यसिद्धत्वाट्टिलोपाप्रसङ्ग इति चोद्यं तट्टिलोपप्रकरणे तिरयतीत्यत्र परिहृतम् । कुमुदान्यत्र सन्ति (कुमुद्वान् देशः,) एवं (नड्वान् , वेतस्वान् ,)"कुमुदनडवेतसेभ्योड्मतुप्" इत्यत्र चातुरर्थिको ड्मतुप् । अस्यानजादित्वेन भत्वाभावेऽपि डित्करणसामर्थ्याट्टिलोपे "झय" इति मकारस्य वकारः । अत्र टिलोपस्य पूर्वस्मादपि विधाविति स्थानिवत्त्वम् [पूर्वत्रासिद्धे न स्थानिवत्] इति न भवति । अत्र सुधाकरः । कुमुदादिभ्यो णौ विन्मतोर्लुगित्यत्र न केवलं मतुबेव गृह्यते किन्तु ड्मतुबिति तस्य लुकि (कुमुदयति, नडयति, वेतसयति) इत्याह । अन्ये 'त्वेकानुबन्धग्रहणे न द्व्यनुबन्धकस्य' इति न्यायेन विन्मतोरित्यत्र द्व्यनुबन्धकस्य मतुप एव ग्रहणं युक्तं न त्र्यनुबन्धकस्य ड्मतुपोऽपीति लुगभावाट्टिलोपे (कुमुद्वयति, नड्वयति, वेतस्वयति) इत्येवं भविव्यमित्याहुः । ननु ड्मतुपो लाक कथं कुमु-

दयतीत्युदाहृतं, यावता विन्मतोर्लुकि वसुमत्तरो वसिष्ठ इत्यादिवत् प्रकृतेष्टिलोपेन भाव्यं, नेष्ठवद्भावेन प्राप्तत्वाद्विन्मतोर्लुक आभीयत्वेनैव पुनष्टिलोपे कर्त्तव्ये चिणो लुङ्न्यायेनासिद्धत्वं, यस्मादिष्ठवद्भावप्राप्तानां कार्याणामुत्पत्तिदेश एव देशः, तदपेक्षयैव सिद्धयसिद्धी इति टिलोपप्रकरणे तिराययतीत्यत्रोपपादितं, न च ड्मतुपि कृतस्य टिलोपस्य अस्मिंष्टिलोपेऽसिद्धत्वम्, व्याश्रत्वादेवं तर्हि ड्मतुपि कृतस्य टिलोपस्य "अचः परस्मिन्" इति स्थानिवत्त्वात् पुनर्व्याश्रयोऽपि टिलोपो न भविष्यति। विन्मतोर्लुक्। "युवाल्पयोः कनन्यतरस्याम्" इतीष्ठेयसुनोर्विधीयमानः कनादेशो णावपि भवतीति युवानमल्पं वाचष्टे कनयतीति भवति। अन्यतरस्यां ग्रहणात् कनभावे युवयत्यल्पयतीति भवतः। यूनोऽत्र यणादिगुणौ, युवतीमल्पां वाचष्टे लिङ्गविशिष्टपरिभाषया कनादेशे कनयतीति भवति, अङ्गवृत्तपरिभाषया बहुलग्रहणाद्वोपधावृद्ध्यभावः, कन इष्ठवद्भावस्य पुंवद्भावाभावेत्यादिना यत् प्रयोजनकथनं तदुपलक्षणमिति यथासम्भवमन्यान्यपि प्रयोजनानि प्रदर्श्यन्ते। अन्तिकमाचष्टे (नेदयति,) बाढमाचष्टे (साधयति)। "अन्तिकबाढयोर्नेदसाधौ" इतीष्ठनि विहितौ नेदसाधावपि भवतः, प्रशस्यमाचष्ट (प्रशस्ययति,) "प्रशस्यस्य श्रः" "ज्य च" इतीष्ठेयसुनोर्विधीयमानौ श्रज्यादेशावत्र न भवतः, सोपसर्गात्स्ग्रामयतेरेवेति ज्ञापकात् शस्यशब्दादेव णिच् न तु प्रशस्य शब्दादिति णिच्परत्वाभावाद्यस्मादिष्ठनि परे सम्भाविते वा यत्कार्यं सम्भाव्यते तस्माण्णावपि तद्भवतीत्यवश्यमतिदेशार्थोऽभ्युपगन्तव्यः, अन्यथाऽनवस्थानप्रसङ्गात्। सुधाकरस्तु श्रापयति ज्यापयतीति श्रज्यावुदाजहार, एवं प्रक्रियारत्नकारोऽपि। तन्न मृश्यम्। शाकटायनस्तु श्रयति ज्ययतीत्युदाजहार। स हि ञ्णित्परस्याच इति धातोरुपान्त्यस्यैवाकारस्याकारमाह न पुनरन्त्यस्यापीत्यत्राकारस्यैवाभावाद्दूरे पुकः प्रसङ्गः अत्र मते स्रजयतीत्यादौ वृद्धेरभावोऽङ्गवृत्तपरिभाषया बहुलग्रहणाद्वेत्येवं नाभिधानीयो भवति, प्रस्थस्फानां च भावं व्यधादिति प्राप्यतीत्यादिसिद्धिः। सर्वमिदमनार्षत्वादप्रमाणमिति प्रक्रियारत्ने दूषितम्। अस्माभिस्तु श्रज्यादेशावेवात्र नाभ्युपगतौ, वृद्धमाचष्टे (ज्यापयति,) "वृद्धस्य च" इतीष्ठेयसुनोर्विधीयमानो ज्यादेशो णावपि भवति, अकारोच्चारणसामर्थ्यात्, "प्रकृत्यैकाच्" इति लोपाभावे वृद्धौ पुक्, अयं च ज्यादेशः "प्रियस्थिर" इत्यादिना वर्षादेशस्यापि विधानाद्विकल्पेन भवति, प्रिय स्थिर स्फिरोरु बहुल गुरु वृद्ध तृप्र दीर्घ वृन्दारक इत्येतेभ्यस्तदाचष्ट इति णौ प्रस्थस्फवर्बंहिगर्वर्षित्रप्द्राघिवृन्दा इतीष्ठनीयसुनोः प्रियादीनां यथासंख्यं विधीयमानाः प्रादयो णावपि भवन्तीति प्रियस्य (प्रापयति,) स्थिरस्य (स्थापयति, उरोः (वरयति,) बहुलस्य (बंहयति,) गुरोः (गरयति,) वृद्धस्य (वर्षयति) तृप्रस्य (तृपयति,) तृप्रं दुःखमित्युक्तं, दीर्घस्य (द्राघयति,) वृन्दारकस्य (वृन्दयति,) प्रादीनामदन्तानां वृद्धौ पुक्। लोपस्तु "प्रकृत्यैकाच्" इति प्रकृतिभावान्न भवति। ननु प्रादीनां प्रकृतिभावे "असिद्धवदत्र" इत्यसिद्धत्वादेकाजेव नास्तीति प्रकृतिभावाप्रसङ्गात् स्यादेव टिलोपः, एवन्तर्हि प्रादीनामसिद्धत्वादेवायमपि न भविष्यति। ननु मा भूदेवमयं प्राद्याश्रयष्टिलोपः स्थानिवद्भावेन, प्रियाद्याश्रयस्तु प्राप्नोत्येव, नैतत्। प्रियादीनामिष्ठवद्भावेन प्राप्ताट्टिलोपात् परत्वादकृतएव तस्मिन् प्राद्यादेश इति स्थानिनि स एव नास्ति टिलोप आदेशे योऽतिदिश्येत, परयतीत्यादौ बहुलग्रहणात् 'अङ्गवृत्त' इति वा "अत उपधाया" वृद्धिर्न भवति। अत्र क्षीरस्वामी। बहुलग्रहणाद् प्रादशाभावात् (प्रिययति) इत्यपीति, मैत्रेयस्तु स्थिरस्यस्थादेशे बहुलग्रहणात् वृद्धिपुकोरभावात् गुणायादेशयोः स्थयतीति, बहुलादेव स्थिरयतीत्यपीति कौमाराः। भाष्ये तु प्रापयति स्थापयतीत्येवोदाहृतत्वात् उद्भाष्यमेतत् सर्वमित्यनादरणीयम्। व्याकरणस्य सूत्रं करोति व्याकरणं सूत्रयति, [तत्करोतीत्युपसंख्यानम्] सूत्रयत्याद्यर्थमिति णिच्, [प्रातिपदिकाद्धात्वर्थे] इत्येव सिद्धे वचनमिदं माणवकं मुण्डयतीत्यादौ माणवकादिसापेक्षान्मुण्डादेर्णिजर्थं मुण्डमिश्रेव व्याकरणादिसापेक्षात् सूत्रादेर्णिजर्थमारभ्यते, तत्र

लक्ष्यलक्षणसमुदायस्य व्याकरणशब्दार्थत्वात्सूत्रस्यैतदंशत्वेन व्यतिरेकोद्भावे षष्ठी, यद्यपि सूत्रमेव व्याकरणशब्दार्थस्तथापि व्याकृतिक्रियाकारणत्वविशिष्टव्याकरणं शब्दार्थः सूत्रशब्दार्थस्तु केवलमिति राहोः शिर इत्यादिवत् काल्पनिकान्वयव्यतिरेकस्य सम्भवः । यदात्वयं व्यतिरेको न विवक्ष्यते तदा व्याकरणं सूत्रं करोतीति विग्रहीतव्यम्, अत्र वृत्तौ वर्त्तिपदार्थानामेकार्थ्येन विविक्तानामभावादन्यान्वययोगात् सूत्रस्य व्याकरणेन सम्बन्धानुपपादाद्व्यतिरेकाभावाद्व्याकरणात् षष्ठ्यभावः, अस्य च विशेषकर्मणः सामान्यकर्मणः सूत्रस्य प्रत्ययार्थान्तरभावादनन्तरभावात् करोतिना सम्बन्धाच्च भवति द्वितीया । उक्तं चैवं भाष्ये। वाक्ये षष्ठी, उत्पन्ने प्रत्यये द्वितीया, केनैतदेवं भवति, योऽसौ सूत्रव्याकरणयोरभिसम्बन्ध उत्पन्ने प्रत्यये निवर्त्तते, अस्ति च व्याकरोतेर्व्याकरणेन सामर्थ्यमिति द्वितीयेति । अत्र कैयटे वाक्ये द्रव्यरूपं सूत्रं सूत्रशब्देनोच्यते, णिचि तूत्पन्ने सत्त्वभावनिवर्त्तनात्करोत्यर्थाभिधायी सूत्रशब्दः सम्पद्यते । तदुक्तं 'परार्थाभिधानं वृत्तिः" इति । एतच्च प्रक्रियागतविभागाश्रयेणोक्तं, परमार्थतस्तु धात्वन्तरं सूत्रविशिष्टक्रियावचनमिति ।

अथान्योऽपि णिच् प्रदर्श्यते ॥ कंसस्य वधः कंसवधः, "हनश्च वध" इति वधादेशः, "कर्तृकर्मणोः कृति" इति कंसात् कर्मणः षष्ठी, "कृद्योगा च षष्ठी समस्यते" इति समासः । यद्वा सर्पिषो जानीते, मातुः स्मरतीत्यादौ न माषाणामश्नीयादित्यादावपि कारकस्य शेषत्वविवक्षायां षष्ठीसिद्धावपि "ज्ञो विदर्थस्य करणे" "अधीगर्थदयेशां कर्मणि" इत्यादिना कारकस्य शेषत्वविवक्षायामेव पुनः षष्ठीविधानं षष्ठी श्रूयतएव न लुप्यतइत्यर्थात् समासनिषेधार्थममुमेवार्थं प्रतिपदविधाना च षष्ठी न समस्यतइत्याहेति तस्य "कर्तृकर्मणोः कृति"इत्यत्र शेषाधिकाराभावादशेषत्वविवक्षायामेव कर्मणः षष्ठीविधावनुपस्थानात् कृद्योगा चेति वचनं तदपवादो न भवति किं तु "षष्ठी"इति समासवचनस्यानुवाद इति राजपुरुषादिवत् षष्ठीत्येवसमासः । उक्तञ्च ।

> साधने व्यपदिष्टे च श्रूयमाणक्रिये पुनः ।
> प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये ॥

इति । न चैवं मन्तव्यम् [प्रतिपदविधाना च] इति वचनं "कर्तृकर्मणोः कृति" इति षष्ठ्याः समासनिषेधार्थं स्यादिति यतः [कृद्योगा च षष्ठी समस्यते] इति त्वयैव समासोऽभिहितः, कंसवधमाचष्टे कंसं घातयति, [आख्यानात् कृतस्तदाचष्टे] इति णिच्, आख्यायतइत्याख्यानं "कृत्यल्युटो बहुलम्"इति कर्मणि ल्युट्,तद्योगाच्छब्दोप्याख्यानम् इहाख्यानमात्रमाख्यानशब्देनोच्यते न तु संज्ञाभूतं कंसवधबलिबन्धसुभद्राहरणादि कर्मैवेति राजागमनादेरपि णिच् भवति, अत्र 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति कंसवधादेराख्यानस्य कृदन्तत्वम्, अत्र कंसवध इति स्थिते कृत्प्रत्ययस्य लुक् भवति, प्रकृतिप्रत्यापत्तिरिति, कृत्प्रकृतेर्धातोः प्रत्यापत्तिर्भवति, प्रत्यापत्तिश्चाविकारस्वरूपेणावस्थानमिति वधादेशनिवृत्तौ हनिरेवावतिष्ठते, ननु प्रत्ययस्य सन्नियोगेन शिष्टोऽयं वधादेशः तस्य लुका निवृत्तौ स्वयमपि संन्नियोगशिष्टपरिभाषया निवर्तिष्यत एव किं प्रत्यापत्तिवचनेनेति चेत्। सत्यमत्रैवं सिद्ध्यति तत्फलं त्वग्रे दर्शयिष्यते । तत्र कंसहानेति स्थिते प्रकृतिवच्च कारकं चकारो भिन्नक्रमः कारकमित्यस्यानन्तरं द्रष्टव्यः, कार्यशब्दोऽध्याहार्यः, षष्ठ्यर्थे वतिः, प्रकृतिशब्देन हेतुमण्णिच्प्रकृतिरुच्यते । तदयमर्थो भवति । वधादेः कृदन्तस्य यत्कारकं कंसादिकं तस्य कृत्प्रकृतेर्हन्त्यादेर्हेतुमण्णौ धातावनन्तर्भूतमकृतनलोपादिकं द्वितीयान्तं यद्रूपं तादृशं भवति । "हनस्तोचिण्णलोः" "होहन्तेर्ञ्णिन्नेषु" इत्यादिकं कार्यं हेतुमण्णिचः प्रकृतेरिवात्रापि णौ भवतीति, तत्रश्च कंसात् द्वितीयायां हनश्च तत्वघत्वयोः कंसं घातयतीति सिद्धं भवति, अनेन चातिदेशेन कारकस्य धातावन्तर्भावस्यापि । प्रतिपादनादर्थाद्व्यतिरिक्ताद्वधादेवायं णिजिति तदादेव धातुत्वात्तत एव तिङि तदाद्येव तिङन्तं

पदं भवति, तथा कंसं घातयतीत्यादौ वधादेरेवाङ्गत्वादडागमस्तस्मादेव पूर्वो भवति, एवं कंसमजीघतदित्यत्र हन एव चङ्परणिपरं द्विर्वचनं भवति, एवं कंसमजीघतदित्यत्र हन एव चङ्परणिपरे द्विर्वचनं भवति। नन्वत्रान्तरेणापि कार्यातिदेशं वृद्धिरिवास्यैव णेर्णित्वमाश्रित्य "हो हन्तेः" इति घत्वं "हनस्त" इति तत्वं च भविष्यति किमनेनातिदेशेनेति चेन्न। 'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्' इति यत्र धातोः स्वरूपोपादानेन किंचित्कार्यं विधीयते तत्र धातुनिबन्धनप्रत्यये तत्कार्यमिति विज्ञानात्, अस्य च णेर्धातुनिमित्तत्वाभावात्कंसपरिमृड्काम्यतीत्यत्र मृजेर्वृद्धिरिवात्रापि तत्वघत्वयोरप्रसङ्गात्। न चैवं मन्तव्यं कंसपरिमृडकाम्यतीत्यत्र यदङ्गं कंसपरिमृडिति न तन्मृजिर्यश्च मृजिर्नासावङ्गं,मृजेर्वृद्धिश्चमृजेरङ्गस्य विधीयते इत्यन्तरेणापि धातुस्वरूपपरिभाषायां नास्त्येव वृद्धेःप्रसङ्ग इति,यतोऽङ्गाधिकारे तस्य च तदन्तस्यापि इति मृज्यन्तस्यापि प्राप्नोत्येव। एवं बलिबन्धमाचष्टे बलिबन्धयतीत्यादि, नन्वत्र कृल्लुगिति कृतो लुका लुप्तत्वात् प्रत्ययलक्षणाभावात् कृद्योगाभावान्न षष्ठी प्राप्नोति, प्रत्ययस्य लक्षणं च लुका लुप्तत्वान्न भवितव्यं, स्थितं च हन्त्याद्यपेक्षया कर्मत्वमिति द्वितीया सिद्धेः किं प्रकृतिवत्कारकातिदेशेनेति चेत्, असत्यस्मिन्नतिदेशे कंसादेः पृथक्करणमेव न स्यादिति विभक्तेरेवाप्रसङ्गात्कुतः स्याद् द्वितीया, किं च कंसवधशब्दादेव णिच् न तु विनिष्कृष्टकारकांशाद्वधादिति सकारकस्यैव तिङन्तत्वं स्यात्। तथाऽडागमोऽपि कारकात् पूर्वमेव स्यात्। न तु कंसं घातयतीति हन्तेः,एवं"चङि"इति द्विर्वचनमपि कंसादेरेव स्यात्, न तु कंसमजीघतदित्यादौ हन्त्यादेः, नैतानि सन्ति प्रयोजनानि। यथा प्रकृतिवत् कारकमित्यनेन कंसप्रकृतेर्हन्त्यादर्णौ दृष्टः कारकाणामन्तर्भावोऽत्रापि णौ प्रतिपद्यते, तथा प्रकृतिवत् कार्यमित्यनेनापि कृत्प्रकृतेर्णौ हन्त्यादेः शुद्धे णौ दृष्टस्यानिष्कृष्टकारकप्रकृतित्वस्यात्राप्यतिदेष्टुं शक्यत्वान्निष्कृष्टकारको हन्त्यादिरेव स्यात्। प्रत्ययस्य प्रकृतिरिति यतस्तदाद्येव तिङन्तं भविष्यत्यड्द्विर्वचने च तस्यैव भविष्यतः, सत्यमत्रैव न दोषो भविष्यति, राज्ञा आगमनं राजागमनं, "कर्त्तृकर्मणोः कृति" इति कर्त्तरि षष्ठी, पूर्ववत् "कृद्योगा च षष्ठी समस्यत"इति समासः। राजागमनमाचष्टे राजानमागमयतीत्यादौ राजादेर्द्वितीया न स्यात् किं तु कर्त्तृलक्षणा तृतीस्यैव स्यात्, यतः प्रकृतिवत् कारकमित्येतत् प्रकृतेः शुद्धे णौ दृष्टकार्यमेवातिदेशेन पुनरन्यदपि किंचित्, प्रकृतिवत् कार्यमित्युच्यमाने तु गमने कर्त्तृभूतस्य राज्ञः कृत्प्रकृतेर्गमः शुद्धे णौ "मतिबुद्धि" इत्यादिनाऽस्ति कर्मत्वमित्यत्रापि णौ कर्मरूपातिदेशाद्राजानमागमयतीति सिद्धं भवति। अत एव शुद्धे णौ दृष्टस्य कर्मरूपस्यात्रापि णावतिदेशाद्राज्ञो नलोपो भवति, न चैवं मन्तव्यं "सुप्तिङन्तं पदम्" इति द्वितीयान्तस्यैव राज्ञः पदत्वादत्र नकारान्तस्य प्रातिपदिकान्तत्वेऽपि पदान्तत्वाभावान्नलोपो न भवति यल्लुप्तयान्तर्वर्त्तिन्या षष्ठ्या प्रत्ययलक्षणेन तदन्तत्वेन नान्तं भवत्येव पदं, न चास्ति "न लुमता" इति प्रत्ययलक्षणाभावः, यदयं लुमता लुप्ते प्रत्यये यदङ्गं तस्य यत् कार्यं लुप्तप्रत्ययमाश्रित्य प्राप्नोति तत्रैवेतीह नावतरति। एवं च प्रकृतिवत्कारकवचनं कंसादेर्द्वितीयार्थं च भवति। यतः "कर्तृकर्मणोः कृति" इति षष्ठी प्राप्नोति, तदेवं कंसादीनां कारकाणां णिजुत्पत्तौ पृथक्कारस्य सिद्धत्वादाख्यानात् कृदित्याख्यानशब्दोऽर्थात्स्वावयवकृदन्तपरो भवति। मृगाणां रमणं मृगरमणं, कर्त्तरि षष्ठ्याः पूर्ववत् समासः। मृगरमणमाचष्टे मृगान् रमयति, दृश्यर्थायां च प्रवृत्ताविति णिजत्राख्यानात्कृत इत्यादि सर्वं सम्बध्यते, तदस्यायमर्थः। मृगरमणस्य या समाख्यानरूपा प्रवृत्तिः सा यदि दृश्यर्था भवति, तदा णिज्भवतीति। एवं च मृगान् रमयतीत्यस्यायमर्थो भवति, स्वयं मृगरमणमनुभवन् अन्यस्मै तद्दर्शयितुमाचष्ट इति। इदं दृश्यर्थायां चेति वचनमाख्यानात्कृतस्तदाचष्टइत्येवाख्यानप्रवृत्तेर्दृश्यर्थत्वेऽपि सिद्धे णिच्यारभ्यमाणमदृश्यर्थत्वं माभूदित्येवमर्थं, तेन यदारण्ये दृष्टं मृगरमाणं ग्रामस्थोऽन्यस्माचष्टे एवं मृगास्तत्ररमन्ते तदा मृगारमणमाचष्टइति वाक्यमेव भवति।

अत्र कैयटे इष्यर्थायामित्येतच्च मृगरमणादिविषयमेव द्रष्टव्यं, राजागमनादौ तु इच्छार्थप्रवृत्त्यभावेऽपि णिज्भवति, अत्र रमणक्रियायां कर्त्तृभूतानां मृगाणां रमेरकर्मकत्वेऽपि शुद्धे णौ "गतिबुद्धि" इत्यादिना कर्मत्वादत्रापि णौ कर्मत्वं, रात्रेर्विवासो (रात्रिविवासः,) विवासोऽतिक्रमणं, कर्त्तरि षष्ठ्याः पूर्ववत्समासः, ततः "आङ् मर्यादाभिविध्योः" इत्याङोऽव्ययीभावः, आरात्रिविवासमाचष्टे रात्रिं विवासयति, आलोपश्च, "कालाध्वनोरत्यन्तसंयोगे" मर्यादायां णिचि मर्यादावचनस्याङो लोपः, इहाख्यानादिति न सम्बध्यतइति पदमञ्जर्याम्, कुल्लुगादि पूर्ववत्। इह कालस्यात्यन्तसंयोगः सन्निहिताख्यानक्रिययानन्वयेन सम्बन्धः, ततश्च रात्रिं विवासयतीत्यस्यायमर्थः। यावद्रात्रेरतिक्रमणं तावत् कथाः कथयतीति, इहाख्यानमाख्येयमपेक्षतइति कथा इति, प्रदर्शितवसिक्रियायां कर्त्तृभूतायां रात्रेर्वसेरकर्मत्वेन शुद्धे णौ "गतिबुद्धि" इत्यादिना कर्मत्वादत्रापि णौ कर्मत्वं, सूर्यस्योद्गमनं सूर्योद्गमनम्, अत्रापि पूर्ववत् कर्त्तरि षष्ठी, समासश्च, विक्रमसिंहपुर्याः प्रस्थितः काञ्चीपुर्यां सूर्योद्गमनं प्राप्नोतीत्यर्थः। भू प्राप्तावात्मनेपदीति चुरादौ, सूर्यमुद्गमयतीति। 'चित्रीकरणे प्रापि' कृदन्ताचित्रीकरणे गम्यमाने प्राप्नोत्यर्थाण्णिच्, कुल्लुगादि पूर्ववत्। अत्राप्यागमने कर्त्तुः सूर्यस्य पूर्ववद्गमेः शुद्धे णौ "गतिबुद्धि" इत्यादिना कर्मत्वाद् इणेरपि णौ कर्मत्वं, विक्रमसिंहपुर्याः काञ्चीपुरीं विदेशस्थेत्युदयात् पूर्वं तावतो देशस्य गमनमिहाश्रयैकरणम्, इहाप्यसम्भवादाख्यानादिति न सम्बद्ध्यते। तत्र प्रकृतिवत्कारकातिदेशात्सूर्यस्य णौ पृथग्भावः, सोपसर्गात् संग्रामयतेरेवेति ज्ञापकादुदोऽपीति सूर्यमुद्गमयतीत्यादि भवति, पुष्येण योगः पुष्ययोगः, अत्र यथा "अन्तर्द्धौ येनादर्शनमिच्छति" इत्यात्मनः कर्मणो नियमेन गम्यत्वाद्येनेति कर्त्तुः षष्ठी "उभयप्राप्तौ" इति नियमान्न भवति, एवमत्रापि युजिक्रियाकर्मणश्चन्द्रमसो नियमेन गम्यत्वात्तद्योगे कर्त्तुः पुष्यात् षष्ठी भवति, पुष्यश्चात्र कर्त्ता, चन्द्रमाः कर्म, स हि तं युनक्ति, पुष्ययोगं जानाति पुष्येण योजयति। "नक्षत्रयोगे ज्ञि" इति नक्षत्रयोगवाचिनः कृदन्तादस्माज्जानात्यर्थे णिचि कुल्लुगादि पूर्ववत्। अत्र प्रकृतिप्रत्ययापत्तिवचनेन घञि "चजोः कुघिण्ण्यतोः" इति कुत्वं निवर्ततइति कैयटपदमञ्जर्यादिषूक्तम्। [प्रकृतिवत्कारकम्] इत्यनेन कृत्प्रकृतेः शुद्धे णौ यदयं कारकमेतद्रूपमत्रापि णावित्युक्तत्वाद्योगे कर्त्तुः पुष्यस्य गत्यादिष्वनन्तर्भावेन कर्मत्वाभावादत्रापि णौ न भवति कर्मत्वमित्यात्मनः कर्तृत्वाश्रयेण तृतीया भवति। अत्र न्यासे पुष्येण करणभूतेन चन्द्रमसो योग इति करणे तृतीयामुक्त्वा कृत्प्रकृतेर्युजेः शुद्धे णौ पुष्यस्य करणताविपर्यासाभावात्तत्र दृष्टामेवात्रापि णावतिदिश्यत इति तृतीयामुक्त्वा यदा पुष्येण सह योग इत्यर्थो विवक्ष्यते तदा कारकातिदेशस्यायं विषयो न भवति। पुष्यस्य करणत्वात्सहार्थएव तृतीया वेदितव्येत्युक्तम्, 'अनयोः पक्षयोः पुष्येण करणभूतेन सह वा तेन चन्द्रमस्यन्ययोगे इत्यर्थः स्यात्। अत्र कैयटे 'प्रकृतिवत्कारकम्' इत्यनेन "तेन तुल्यं क्रिया चेद्वतिः" इति तृतीयार्थे वतिमङ्गीकृत्य णिचो या प्रकृतिः कंसवधादिराख्यानक्रियापेक्षया प्रतिपन्नकर्मैव तया तुल्यं भवत्यप्रतिपन्नभावं कंसादिकं घातयति राजानमागमयतीत्यादौ सर्वत्र कंसादेर्द्वितीयासामर्थ्यं, तदनेनैव न्यायेन पुष्येण योजयतीत्यत्रापि पुष्यस्य कर्मत्वाद् द्वितीया स्यादित्याशङ्क्य वत्करणात् स्वाश्रयस्य कर्तृत्वस्यानिवर्त्तनात्तृतीयासिद्धिमुक्त्वैवमुक्तम्, अथ वा प्रकृत्या तुल्यं वर्तते इति प्रकृतिवत्प्रकृतेरिव प्रकृतिवण्ण्यन्तस्य कारकमित्युभयथातिदेशाश्रयणात्कचित्कश्चित्परिगृह्यतइति॥

अथान्योऽपि प्रातिपदिकाश्रयः प्रदर्श्यते॥ [आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा] "कर्त्तुः क्यङ् सलोपश्च" इत्यत्र यङ् पठ्यतइति उपमानात्सन्निहिताचारक्रियायाः कर्तुः प्रातिपदिकादाचारेऽर्थेऽयं क्विब् भवति, अत्र वा, ग्रहणं तक्रकौण्डिन्यन्यायेन कौटिल्ययङः क्रियासमभिहारे यङ इवावगल्भादिप्रातिपदिकविषयेणानेन क्रियासुबन्तविषयस्यापि क्यङो बाधो माविज्ञायीति। नन्विदं गल्भाद्यनुक्रमणं "कर्त्तुःक्यङ्" इत्यत्र सुबन्ताधिकारे क्रियते। क्यङ्प-

वादश्चायं क्विप्। उत्सर्गसमानदेशत्वं चापवादानां प्राचुर्येण दृष्टमिति सुबन्तादेवानेन क्विपा भवितव्यम्, न चैतदस्ति, यद्गल्भादीननुक्रम्य सर्वप्रातिपदिकेभ्य इत्यक इत्याह। न चेदं प्रातिपदिकग्रहणं सुबन्तोपलक्षणार्थं स्यात्। तर्हि सर्वेभ्य इत्येकइत्येवोक्तत्वात् प्रातिपादिकग्रहणमनर्थकं स्यात्, यत्तु तदुक्तं गल्भादौ वाग्रहणं तदिदानीं न वक्तव्यं भवति, यतः सर्वेभ्यः क्विब् विधीयते क्यङन्तरेणापि वाग्रहणं वचनद्वयप्रामाण्याद्विकल्पो भविष्यति। अथैवङ्गल्भादयोऽपि नानुक्रमितव्या भवन्तीति न वक्तव्यं भवतीति न मन्तव्यं, यदेषामनुदात्तत्वप्रतिज्ञानार्थमेवानुकरणम्, इदं चानुदात्तत्वप्रतिज्ञानं क्विप्संनियोगएवेत्यत्रावगल्भ इवाचरति अवगल्भायतइत्यादौ वाक्ये क्यङि चाकारस्य श्रवणं भवति। अवगल्भइवाचरति (अवगल्भते। अवगल्भाञ्चक्रे। अवगल्भिता। अवगल्भिष्यते। अवगल्भताम्। अवागल्भत। अवगल्भेत। अवगल्भिषीष्ट। अवागल्भिष्ट। अवागल्भिष्यत)। अनुदात्तेत्त्वात्तङ्, सोपसर्गात्संप्रामयतेरेवेतिज्ञापकाच्चिष्कृष्टोपसर्गाद्गल्भादेव प्रत्यय इति गल्भस्यैवाडागमो भवति। तथावागल्भ्येत्यत्रावशब्दस्य "कुगतिप्रादयः" इति समासे तल्लक्षणो ल्यब् भवति। (क्लीबते। क्लीबाञ्चक्रे। होडते। होडाञ्चक्रे) इत्यादौ "कास्प्रत्ययादाम्" इत्याम्। "आम" इति लेर्लुक्, ननु तत्र प्रत्ययग्रहणमपनीय कास्यनेकाच इति कर्त्तव्यं चुलुम्पाद्यर्थमिति न्यस्यते, एतेऽवगल्भादय एकाच इति कथमाम्, नैष दोषः। यद्यपि क्विप्सन्नियोगेनैकाचो भवन्ति तथाप्युपदेशेऽनैकाचो भवन्ति। कास्यनेकाच इत्यत्र च भूतपूर्वगतिराश्रयिष्यते। इदमेव क्विब्विधानं भूतपूर्वगत्याश्रयणे प्रमाणम्। अन्यथा 'गल्भ धार्ष्ट्ये, 'क्लीबृ अधार्ष्ट्ये, 'होडृ अनादरे, इत्येतेभ्योऽनुदात्तेभ्य अवगल्भतइत्यादिसिद्धौ किमनेन, तत्र च धातूनामनेकार्थत्वात् आचारार्थश्च भविष्यति। अश्व इवाचरति (अश्वति)। प्रातिपदिकात् प्रत्ययविधानात् शप्रकृत्यकारयोरपदान्ताश्रयम् "अतो गुणे" इतिपररूपत्वं भवति। अन्यथान्तर्वर्त्तिन्या विभक्त्या पदत्वात्पररूपत्वं न स्यात्। (अश्वाञ्चकार। अश्विता। अश्विष्यति। अश्वतु। आश्वत्। अश्वेत्। अश्व्यात्। आश्वीत्। आश्विष्यत्) अतो लोप आर्धधातुके। क इवाचरति। (कति। चक। चकतुः) इत्यादि, अतो लोपः सर्वत्र, अयं [ण्यल्लोप]इत्यादिना वृद्धिं बाधते, अ इवाचरति (अति) इत्यादि। (औ। अतुः। उः)। इत्यादि। सर्वत्रात्र द्विर्वचनेऽतो लोपादन्तरङ्गत्वात् "अतो गुणे" पररूपत्वे तस्याङ्गग्रहणेन प्रासादतो लोपात् परत्वादभ्यासग्रहणेन ग्रहणात् "अत आदेः" इति दीर्घः। "आतो लोप इटि च" इत्याल्लोपः किति, णलि तु "आत औ णल" इत्यौ वृद्धिः। यथाकथञ्चित् 'प्रातिपदिकग्रहणे लिङ्गविशिष्टं गृह्यत' इति स्थितत्वान्मालेवाचरति (मालाति। मालाञ्चकार। मालिता। मालिष्यति। मालातु। अमालात्। मालायात्। मालायास्ताम्। अमालासीत्)। यमरमनमातां सगिटौ। इड्व्यजादावार्धधातुके "आतो लोप इटि च" इत्याकारलोपः, ज्ञेवाचरति (ज्ञति। जज्ञौ) इत्यादि पूर्ववत्, प्रत्ययान्तत्वेऽप्येकाच्त्वादामभावः। आ इवाचरति (आति) इत्यादि। कविरिवाचरति (कवयति। कवयाञ्चकार। कवयिता) इत्यादि, आशीर्लिङि "अकृत्सार्वधातुकयोर्दीर्घः" इति दीर्घे (कवीयात्)। लुङ्यतरङ्गमपि गुणं सिचि वृद्धिरपवादत्वात् बाधत इति वृद्धावायादेशे च (अकवायीत्) विरिवाचरति (वयति) इत्यादि पूर्ववल्लिटि प्रत्ययान्तत्वेऽप्येकाच्त्वादामभावे, (विवाय। विव्यतुः। विव्युः। विवयिथ। विव्यथुः। विव्य। विवाय। विवय। विव्यिव। विव्यिम)। णिति वृद्धिः, पिति गुणः, किति "एरनेकाच" इति यणादेशः॥ इरिवाचरति (अयति) इत्यादि, लिट्येकाच्त्वादामभावः। (इयाय। ईयतुः। ईयुः। इययिथ। ईयथुः। ईय। इयाय। इयय। ईयिव। ईयिम,) अत्र किति सवर्णदीर्घे "अचि श्नुधातु" इतीयङ्। यद्वा सवर्णदीर्घत्वात् परत्वेनोत्तरखण्डस्य "एरनेकाच" इति यण्यपि नास्त्यत्र रूपभेदः, गुणवृद्धिविषये अयायोः "द्विर्वचनेऽचि" इति स्थानिवत्त्वादेकारस्यैकारस्य च द्विर्वचनेऽभ्यासह्रस्वत्वे "अभ्यासस्यासवर्णे" इतीयङ्, यदापि गुणवृद्ध्योरपि स्थानिवद्भावा-

दिकारस्य द्विर्वचनं तदापि सवर्णदीर्घात् परत्वात्पुनरुत्तरखण्डस्य गुणादावस्त्येवाभ्यासस्या-वर्णपरत्वमिति इयङ् सिद्धिः । नच पुनः प्रवर्तमानाभ्यां गुणवृद्धिभ्यामन्तरङ्गत्वात्सवर्णदीर्घेन बाध्यमिति मन्तव्यम् । एवं हि "अभ्यासस्यासवर्णे" इतीयङ्वचनमनर्थकं स्यात्, नन्वय-मस्त्यवकाशः, अर्तेर्लिटि द्विर्वचनेऽभ्यासस्य "अर्त्तिपिपर्त्योश्च" इतीत्वे, (इयर्ति, इयृतः) इ-त्यादि, नैतदस्ति, 'नह्येकमुदाहरणं योगारम्भं प्रयोजयति' इयति हि प्रयोजनेऽभ्यासस्या-र्ताविति एव ब्रूयात् । एषेरियेष, ओणेरुवोणेत्यादि तु न प्रयोजनं, यतोऽयं छान्दसः, भाषाया-न्त्वामा भवितव्यं, छन्दसि च तन्वादीनां [छन्दस्युपसंख्यानम्] इति 'त्रियम्बकं सुवर्गं' इ-त्यादिवदियङुवङौ सेत्स्यतः । लक्ष्मीरिवाचरति (लक्ष्मीयति । लक्ष्मयाञ्चकार। लक्ष्मयिता) इत्यादि । श्रीरिवाचरति (श्रयति । शिश्राय । शिश्रियतुः । शिश्रियुः) "एरनेकाच" इति यणादेशः संयोगपूर्वत्वान्न भवति, "अचि श्नुधातु" इतीयङेव भवति । ईरिवाचरति, (अय-ति) इत्यादि, लिटि पुनः "इजादेश्च गुरुमतोऽनृच्छ" इत्याम्ययांचकारेति भवति । तत्र व्य-पदेशिवद्भावेनेजादित्वगुरुमत्त्वे समाश्रिते । विधुरिवाचरति (विधवति, विधवांचकार, विध-विता, विधविष्यति, विधवतु, अविधवत्, विधवेत्) । आशिषि "अकृत्सार्वधातु-कयोः" इति दीर्घे, (विधूयात्, अविधावीत्) । गुणं सिचि वृद्धिरपवादत्वाद् बाधते । कुरिवाचरति (कवति । चुकाव) इत्यादि । एकाच्त्वादामभावः । उरिवाचरति (आवति) इत्यादि । पूर्ववल्लिटि गुणवृद्धिविषये अवावौ स्थानिवत्त्वादोकारस्य च द्विर्वचनेऽभ्या-सहस्वत्वे । "अभ्यासस्यासवर्णे" इत्युवङि (उवाव । उवविथ । उवाव) इति भवति, यदापि गुणवृध्योरपि स्थानिवद्भावादुकारस्य द्विर्वचनं तदपि "अभ्यासस्यासवर्णे" इत्युवङ्-विधानसामर्थ्यात् सवर्णदीर्घात् पूर्वमुत्तरखण्डस्य गुणादावभ्यासस्यासवर्णपरत्वादुवङ्, कितु (उवतुः । उवथुः । उव । उविव । उविम) इति भवति, अत्रान्तरङ्गत्त्वात्सवर्णदीर्घे सत्यु-वङ् । अत्र 'वार्णादाङ्गं बलीय' इति पूर्वमुत्तरखण्डस्योवङि पश्चात्कृते तस्मिन्नूवतुरित्यादि स्यादिति न मन्तव्यम्, यत इयं परिभाषाऽऽङ्गवार्णयोः समानाश्रयत्वे प्रवर्त्तते । यथा कारक इति, अत्र हि प्रत्ययमेवाश्रत्य गुणवृद्धी प्राप्नुतः, उवतुरित्यत्र उकारमाश्रित्य सवर्णदीर्घः प्राप्नोति । उवङ् तु प्रत्ययमाश्रित्येति नास्ति समानाश्रयत्वं, वधूरिवाचरति (वधवति । वधवांचकार, वधविता) इत्यादि । भ्रूरिवाचरति (भ्रवति । बुभ्राव । बुभ्रुवतुः) इत्यादि "अचि श्नुधातुभ्रुवाम्" इत्युवङादेशः । अयं च वृद्धिगुणयोर्विषये ताभ्यां परत्वात् बाध्य-ते । उरिवाचरति (अवति) इत्यादि, लिटि "ईजादेश्च" इत्याम्यवाञ्चकारेति भवति, पितेवा-चरति (पितरति । पितरांचकार । पितरिता । पितरिष्यति । पितरतु । अपितरत् । पितरेत् । पित्रियात्) । "रिङ् शयग्लिङ्क्षु" इति रिङादेशः । (अपितारीत्) अन्तरङ्गमपि गुणं सिचि वृद्धिर्वचनाद्बाधतइत्युक्तं, यद्वात्र गुणेऽपि न दोषः। यत्कृतेऽस्मिन् "अतो ल्रान्तस्य" इति पुन-र्वृद्धिर्भविष्यति । नेवाचरति (नरति, ननार) इतीत्यादि पूर्ववत् । आ इवाचरति (अरति) ""पाघ्रा" इत्यादावर्त्तिग्रहणेन ।

अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः ।
शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु ॥

इति ह्वयादिसाहचर्याच्च धातुपाठस्थ एवार्तिर्गृह्यते, न पुनरयमपीति ऋच्छादेशा-भावः । अत एव तत्र पदमञ्जर्याम् ऋगतिप्रापणयोरिति भौवादिकः, ऋ गताविति क्रैया-दिकः, ऋ सृ गताविति जौहोत्यादिक इति श्रीनेवोपादायान्त्योरग्रहणे कारणं शिदस-म्भवः साहचर्यं चोक्तम्, तथा "समो गम्यृच्छि" इत्यत्र वृत्तौ अर्तीत्यत्र पठ्यते, सृ गतिप्रापणयोरिति भूवादौ । ऋ सृ गताविति जुहोत्यादौ । विशेषाभावादुभयोरपि ग्रह-णमिति । यदि च नामधातोरिह ग्रहणमिष्येत् कथमेवमुच्येत । एवमन्यत्रापि तत्र तत्र प्रतिपदधातुग्रहणेष्वभिव्यक्तपदार्थानां धातुपाठपठितानामेवोपादानं क्रियते । "बाह्वादिभ्यश्च"

इत्यत्र भाष्यकैयटयोरव्यनभिव्यक्तपदार्थानां तत्तत्कार्यं न भवतीति, अद्यत्वे बाहोः "बाहादिभ्यश्च" इति ञोऽभावात्सामान्येऽणि बाहव इति भवति। तथा संज्ञाश्वशुरस्य "राजश्वशुराद्यत्" इति यतोऽभावादलक्षणे इञि श्वाशुरिरित्येव, "मातृपितृभ्यां स्वसा" इत्याभ्यां परस्य स्वसुर्विधीयमानं षत्वं क्रियाशब्दात् परस्य नेति तत्र मातृस्वसेति भवतीति प्रतिपादितम्। एवं चास्मादृशब्दाल्लिटि "ऋच्छत्यॄताम्" इति किति लिटि विधीयमानो गुणो न भवति। तत्र धात्वभ्यासयोः सवर्णदीर्घे धातुग्रहणेन ग्रहणादृकारान्तलक्षणे गुणे अरतुरित्यादि भवतीत्येके। अन्ये त्वभ्यासग्रहणेन ग्रहणादुरदत्वहलादिशेषातआदेरितिदीर्घेषु "आतो लोप" इत्याकारलोपे सत्यतुरित्यादि प्रत्ययमात्रमेवावशिष्टं भवतीति। एवं "णिश्रिद्रुस्रुभ्य" इत्यनभिव्यक्तपदार्थत्वेनाचारक्विबन्तस्य दोर्ग्रहणाभावाच्चङभावात् सिच्यद्रावीदिति भवति। भूरिवाचरति भवतीत्यत्र "गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु" "भुवो वुग्लुङ्लिटोः" भवतेः" इति विधीयमानसिज्लुग्वुगभ्यासात्वानामभावात् (अभावीत्। आभाविषाम्। अभाविषुः। बुभाव) इत्यादि एव भवति, पिबतेर्विचि पाः, तस्याचारक्विबन्तस्य "पाघ्रा"इत्यादौ "गातिस्था" इत्यादौ चाग्रहणात् पिबादेशसिज् लुकोरभावात् (पाति। अपासीत्) इति भवति, एवमन्यदप्युन्नेयं प्रतिपदोक्तेषु। पॄरिवाचरति। (परति। पपार। पपरतुः। पपरुः) इत्यादि, अयं पॄशब्दानुकरणं धात्वन्तरं न पुनः क्र्यादौ जुहोत्यादौ वा पठ्यमान इति पाठाश्रयः श्ना श्लुश्च न भवति। किति लिटि "ऋच्छत्यॄताम्" इति ऋकारान्तलक्षणो गुणः। "श्रृदृप्राम्" इति ह्रस्वविकल्पस्त्वनभिव्यक्तपदार्थत्वान्न भवति। ऋ इवाचरति (अरति, अरांचकार,) "इजादेश्च गुरुमत" इत्याम्प्रत्ययः। गम्लृ इवाचरति (गमलति। गमलांचकार।) प्रत्ययान्तत्वादामि ऋकारलृकारयोः सावर्ण्यात् "उरण्रपर" इति लपरो गुणः। लृ इवाचरति (अलति,) पूर्ववद्गुणः। लिटि द्विर्वचनम्, लृवर्णदीर्घाभावात् सवर्णदीर्घाभावात् उत्तरखण्डस्य यण्यभ्यासस्योरदत्वादेव (आल। अलतुः) इत्यादि। परमदेरिवाचरति (परमदयति। परमदयाञ्चकार।) केवलाच्चामभावाज्जिहाय। लुङि सिचीव्यवादेशे हलन्तलक्षणा वृद्धिः "नेटि" इति निषिध्यते। "अतो हलादेः" इति वृद्धिविकल्पोऽपि ह्म्यन्तक्षणेति यान्तत्वान्निषिद्ध इत्यपरमदयीदिति भवति। एकार इवाचरति (अयति,) लिटीजादिलक्षणे आमि (अयांचकार)इति भवति। लुङि (आयीत्) अन्यदा पूर्ववद्धलन्तलक्षणाया वृद्धेः"नेटि"इति निषेधान्माभवानायीत्। गौरिवाचरति (गवति। जुगाव। अगवीत्। अगावीत्)। "अतो हलादेः" इति वा वृद्धिः। ओकारवदाचरति। (अवति। अवाञ्चकार) लुङि हलन्तलक्षणाया वृद्धेः "नेटि" इति निषेधात् (माभवानवीत्)इति। परमरा इवाचरति (परमरायति। परमरायाञ्चकार। रायति। रिराय)। ऐकार इवाचरति (आयति, अयांचकार,) परमनौरिवाचरति, (परमानावयति। परमनावाञ्चकार। नावति। नुनाव)। केवलादौकारात् (आवति, आवांचकार,) गोदुगिवाचरति (गोदुहति,) य इवाचरति (ययति,) अनेकाच्त्वादामभावे (ययाय)। लुङि यान्तत्वाद् वृद्ध्यभावात् (अयीत्), द्यौरिवाचरति (देवति)। स्वरिवाचरति (स्वरति,) फलिवाचरति (फलति,) अनयोर्लुङि "अतो हलादेः" इति विकल्पापवादे "अतो ल्रान्तस्य" इति नित्यं वृद्धौ (अस्वारीत्, अफालीत्) इति भवति,"चरफलोश्च" इत्यत्र न्यासविस्तारयोः फलेर्णौ क्विपि (फाल्) अयमप्येकदेशविकृतन्यायेन गृह्यत इति यङ्यङ्लुकोरभ्यासस्य नुकि (पंफाल्यते, अपंफालीत्) इत्युक्तं, तदेतत् "उत्परस्यातः" इति तपरकरणम् "अतो हलादेः" इत्यादिवन्न केवलनिर्देशार्थमपि तु सवर्णग्रहणनिवृत्त्यर्थमपीत्याश्रयणेनान्यथा प्रतिपदोपादानेष्वभिव्यक्तपदार्थानामेव भाष्यादौ ग्रहणस्य स्थितत्वान्नैवं युज्यते, इदमिवाचरति, (इदामति)। "अनुनासिकस्य क्विझलोः" इत्यत्र झलादिक्विप् धातोरेव सम्भवतीति तत्साहचर्यात्क्विबपि धातुविहित एव गृह्यत इति नात्र कावयं दीर्घ इति केचित्तन्न। अस्य क्विपः ककारस्यात्र सामान्यग्रहणमन्तरेण प्रयोजनाभावात्। चक्रि-

वाचरति (चाङति), अणिवाचरति (आणति, राजानति, कुम्भति, अस्वति, पदति, योधति, भिषजति, शम्बति, अङ्गति, पण्यति, त्वदति, मदति,) "प्रत्ययोत्तरपदयोश्च" इति त्वमौ । युवामिवाचरति आवामिवाचरति, यूयमिवाचरति वयमिवाचरति, (युष्मदति, अस्मदति,) युष्मदस्मदोरनेकार्थत्वान्न त्वमौ विभक्तिपरत्वाभावान्न युवावौ नापि यूयवयौ । त्वामतिक्रान्तः अतित्वम् । एवमत्यहं, क्वावतित्वदति अतिमदति "प्रत्ययोत्तरपदयोः" इति त्वमौ, युवां युष्मानतिक्रान्तः अतित्वयत्यहम्, अत्र द्विवचनत्वे तदाश्रित्य युवावौ न भवतः पराभ्यां त्वाहाभ्यां बाधादत्र क्वावपि (अतित्वदति, अतिमदति, सखति, कफति, मन्थति, वटति, पटति, अकति, कक्कुति, अयति, वेशति, षषति, यशति,) प्रसिद्धा ये हलन्तास्तेषां कारितणौ टिलोपे "णेरनिटि" इति णेश्च लोपे तद्वलन्तत्वं द्रष्टव्यम् ॥

अथैतत् क्विबन्ताद्धातोः "क्विप् च" इति कर्तरि क्वौ किञ्चिदुच्यते। "यूस्त्र्याख्यौ नदी" इतीकारान्तशब्दरूपं स्त्र्याख्यं नदीसंज्ञकमित्युक्तम्, तत्र कुमार्यादेरेतत्क्विबन्तात्कर्त्तरि क्वौ कुमारी ब्राह्मण इत्यादौ स्त्र्याख्यत्वाभावान्नदीसंज्ञा न प्राप्नोति । तत्रोच्यते, [प्रथमलिङ्गग्रहणं च] इति क्विब्लुक्समासैरन्यलिङ्गत्वेऽपि प्रथमलिङ्गाश्रया नदीसंज्ञा भवतीत्यर्थः । इह प्रस्तुतत्वाल्लुप्समासौ न प्रदर्श्येते । एवं च कुमारी ब्राह्मण इत्यादौ आचरतिवर्तमानस्य कुमार्यादेर्नदीसंज्ञायां हे कुमारि ब्राह्मण इत्यादौ "अम्बार्थनद्योर्ह्रस्वः" इति ह्रस्वो भवति, (कुमार्यै ब्राह्मणाय) इत्यादौ ङिद्वचने च "आण्नद्याः" इत्याडागमो "ङेराम्नद्याम्नीभ्यः" इत्यामादेशः, (कुमारीणां ब्राह्मणानाम्) इत्यादौ 'ह्रस्वनद्यापः इति नुड्भवति, एवं हे ब्रह्मबन्धु ब्राह्मण, ब्रह्मबन्धवे ब्राह्मणाय इत्यादौ ह्रस्वादि द्रष्टव्यं, नदीत्वादेव बहवः कुमार्यो ब्राह्मणा यस्मिन् (बहुकुमारीको देश) इत्यादौ "नद्यृतश्च" इति कब् भवति, यत्पुनरिष्वशनिप्रभृतीनां ह्रस्वान्तानां स्त्र्याख्यानां श्रीभ्रुप्रभृतीनामियङुवङ्स्थानानां च "ङिति ह्रस्वश्च" इति नदीसंज्ञा विकल्पेन तदेवाचारक्विबन्तानां पुंलिङ्गानां [प्रथमलिङ्गग्रहणं च] इति न भवति । तथा च वार्त्तिकम् [ह्रस्वेयङुवङ्स्थानप्रवृत्तौ च] अत्र भाष्यम्—ह्रस्वौ च इयङुवङ्स्थानौ प्रवृत्तौ च प्राक् प्रवृत्तेश्च स्त्रीवचने एव नदीसंज्ञौ भवत इति वक्तव्यमिति, प्रवृत्तिः क्विबादीनां, तेनार्थान्तरसंक्रान्तिः । (इषवे ब्राह्मणाय, अशनये ब्राह्मणाय, धेनवे ब्राह्मणाय, श्रिये ब्राह्मणाय, भ्रुवे ब्राह्मणाय,) इत्यादौ नदीसंज्ञानिमित्तकार्यं न भवतीति, यत्र तु स्त्रीवचनं तत्र (इष्वै ब्राह्मण्यै, इषवे ब्राह्मण्यै, अशनये ब्राह्मण्यै, धेन्वै ब्राह्मण्यै, धेनवे ब्राह्मण्ये, श्रियै ब्राह्मण्यै, श्रिये ब्राह्मण्यै, भ्रुवै ब्राह्मण्यै भ्रुवे ब्राह्मण्यै) इत्यादौ पक्षे घिसंज्ञानिबन्धनमपि भवति । यस्त्वपर आह–ह्रस्वौ चेयङुवङ्स्थानौ च प्रवृत्तौ च प्राक् प्रवृत्तेश्च स्त्रीवचन एव नदीसंज्ञौ भवत इति वक्तव्यमित्यत्र क्वचिद्भाष्यकोशेष्वस्त्रीवचन एव नदीसंज्ञौ भवत इत्यकारप्रश्लेषेण पाठः सोपपाठ इति कैयटे उक्तम्, एवं कुमारीमिच्छति कुमारीयतीत्यादेः क्वावल्लोपयोः कुमारी ब्राह्मण इत्यादौ द्विवचनेषु कुमार्यै ब्राह्मणायेत्यादि द्रष्टव्यम् ।

इदमपरं क्वौ कार्यं विचार्यते । युष्मदस्मदोर्युष्मानाचष्टे अस्मानाचष्टे इति णौ टिलोपेऽनेकार्थत्वेन "प्रत्ययोत्तरपदयोश्च" इति त्वमयोरभावाद्युष्म् अस्म् इति मान्ते युष्मदस्मदी भवतस्तत्र तु कृदन्तत्वाद्विभक्तिष्वेकदेशविकृतस्यानन्यत्वाद्युष्मदस्मदाश्रया विभक्त्यादेशाः प्रकृत्यादेशाश्च त्वादयो भवन्तीत्येके, तन्मते "यूयवयौ जसि" "त्वाहौ सौ" "तुभ्यमह्यौ ङयि" "तवममौ ङसि" इति योगचतुष्टयविषये प्रकृतेर्यूयादयो भवन्ति, तथा "युष्मदस्मद्भ्यां ङसोऽश्" "ङे प्रथमयोरम्" "शसो न" "भ्यसोभ्यम्" "पञ्चम्या अत्" "एकवचनस्य च" "सामआकम्" इतियोगसप्तकविहिता विभक्त्यादेशाश्च भवन्ति, एवं 'युष्मदस्मदोरनादेशे" "द्वितीयायां च" "प्रथमायाश्च द्विवचनेभाषायाम्" इत्यात्वं "योऽचि" इति यत्वं, "शेषे लोपः" इत्यन्तलोपश्च यथायोगं भवति, अत्र "युष्मदस्मदोरनादेशे" इत्यात्वं "योऽचि" इत्यजादौ यत्वविधानात् हलादाववशिष्यते ॥

अथ रूपाणि—(त्वम्, अहं, युषाम्, आसाम्,) विभक्तिपरत्वेऽपि युवावौ प्रकृत्या-र्थत्वाभावान्न भवतः, (युयं, वयं, युषामासां, युषान्, आसान्, युष्या, अस्या, युषाभ्याम्, असाभ्यां, युषाभिः, असाभिः, तुभ्यं, मह्यं, युषाभ्याम्, असाभ्यां, युषभ्यम्, असभ्यम्,) "भ्यसोभ्यम्" इति अभ्यमादेशपक्षे इदं रूपम्, अन्यदा शेषे लोपे पदकार्ये जश्त्वादा युड्भ्यमड्भ्यमिति भाव्यम्, (युषत्, असत्, तव,मम, युष्योः, अस्योः, युषाकम्, असाकं, युष्यि, अस्यि, युष्योः, अस्योः, युषासु, असासु,) युवामाचष्टे आवामाचष्ट इति णौ क्वौ णेश्च लोपे विभक्तौ पूर्ववत् "प्रत्ययोत्तरपदयोश्च" इति त्वमयोः युष्मदस्मदोरेकार्थत्वाभावादभावः, अस्ति द्व्यर्थत्वं विभक्तिपरत्वं चेति युवावौ भवतः। तत्र "युयवयौ जसि" इत्यादि योगचतुष्टयविषये परत्वाद्युयादयो भवन्ति, अत्र रूपाणि। (त्वम्, अहं, युवाम्, आवां, यूयं, वयं, युवान्, आवान्, युवया, आवया, युवाभ्याम्, आवाभ्यां, युवाभिः, आवाभिः, तुभ्यं, मह्यं, युवाभ्याम्, आवाभ्यां, युवत्, आवत्, युवाभ्याम्, आवाभ्यां, युवत्, आवत्, तव, मम, युवयोः, आवयोः, युवाकम्, आवाकं, युवयि, आवयि, युवयोः, आवयोः, युवासु, आवासु,) विभक्त्यादेशादि पूर्ववत्, त्वामाचष्टे मामाचष्ट इति णौ "प्रत्ययोत्तरपदयोश्च" इति त्वमयोः, "प्रकृत्यैकाच्" इति प्रकृतिभावाट्टिलोपाभावे णेश्च क्वौ लोपे त्वाद् माद् इति भवतः, अङ्गवृत्तपरिभाषया वृद्धिर्नेति भवादिनां त्वद् मद् इति भवतस्तत्र विभक्तिषु मपर्यन्तस्याभावाद्यूयादयो न भवन्ति, तत्र रूपाणि। आदितः पञ्चसु वचनेषु त्वां मामिति, वृद्धिर्नेति वादिनां सुजसोः शेषे लोपेन दकारलोपे त्वं मम् इति भवतः (त्वान्, मान्, त्वाया, माया) अवृद्धिपक्षे (त्वया, मया, त्वाभ्यां, माभ्यां, त्वाभिः, माभिः) एवं "ङे प्रथमयोरम्" इत्यमि शेषेलोप "आतो धातोः" इत्याकारलोपः (त्वां, मां, त्वाभ्यां, माभ्यां,) भ्यमादेशे पूर्ववच्छेषे लोपे (त्वाभ्यम्, आभ्यम्) इति भवति, पूर्ववल्लोपे, अभ्यमादेशपक्षे आल्लोपे च (त्वभ्यं, मभ्यम्) इति भवति, अवृद्धिपक्षे शेषलोपे (त्वभ्यम्, मभ्यम्,) अङ्गवृत्तपरिभाषया "बहुवचने झल्येत्" इत्येत्वं न भवति, (त्वत्, मत्,) पूर्ववच्छेषेलोपाल्लोपौ, (त्वाभ्यां, माभ्यां, त्वत्, मत्, त्व, म,) पूर्ववच्छेषेलोपाल्लोपौ (त्वायोः, मायोः, अवृद्धिपक्षे (त्वयोः, मयोः, त्वाकं, माकं, त्वायि, मायि, त्वायोः, मायोः,) अवृद्धिपक्षे (त्वयि, मयि) इत्यादि, (त्वासु मासु,) अत्र येषां दर्शनं णौ त्वमयोः परपूर्वत्वात् पूर्वमनेकाच्त्वेन टिलोपे वृद्धौ पुकि क्वौ णेर्लोपे (त्वापि मापि) इति भवत इति, तेषामपि पूर्ववत् शेषे लोपादिषु वृद्धिपक्षे यानि रूपाणि तानि द्रष्टव्यानि। ननु युष्मदस्मदोर्मान्तत्वे कथं यूयादयः प्रदर्शिताः। यतस्ते "मपर्यन्तस्य" इत्यधिकारे विधीयन्ते, "मपर्यन्तस्य" इति च युस्मदस्मद्भ्यां वैयधिकरण्येन सम्बध्यते, 'व्यपदेशिवद्भावश्चाप्रातिपदिकेन' इति प्रतिषिध्यते, अवश्यं चैतदेवं विज्ञेयं सामानाधिकरण्येन सम्बन्धे मान्तयोरादेशप्रसङ्गात् उच्यते। अत्र मान्तस्येति वचनेनाप्युक्तेऽथ सिद्धे परिग्रहणसामर्थ्यात् अप्रातिपदिकेनेत्यस्याप्रवृत्तेः, व्यपदेशिवद्भावसिद्धेः। अपरे पुनराहुः, सति शेषे पर्यन्तशब्दो वर्तते, तेन मान्तयोः युष्मदस्मदोर्यूयादेशेन न भवितव्यमिति तन्मते पूर्वं "यूयवयौ जसि" इत्यादियोगचतुष्टयस्याप्रवृत्तेर्युवावाद्यादेशाभावः, तत्र रूपाणि (युषम् असम्,) "ङे प्रथमयोरम्" इत्यमि "शेषेलोप" इत्यन्तलोपः सुजसोर्द्विवचने तु "प्रथमायाश्च द्विवचने" इत्यात्वम् (युषाम्, असाम्,) चतुर्थ्येकवचने तुभ्यमह्यादेशाभावात् "ङेप्रथमयोरम्" इत्यमि शेषे लोपे (युषम्, असम्,) षष्ठ्येकवचने "युष्मदस्मद्भ्यां ङसोऽश्" इति अशादेशे "तवममौ ङसि" इति तवममयोरभावे शेषे लोपे युष असेति भवति, इदं च शेषे लोपप्रदर्शनं शेषे लोप इत्यस्य शेषे विभक्तौ पर इत्यर्थपक्षे, यदा तु मात् परत्वशेषत्वमिति पक्षस्तदा शेषेलोपाभावान्मकारस्य श्रवणं भवतीति युष्मम् अस्ममित्यादि भवति॥

इति श्रीसायणेन विरचितेयं प्रत्ययान्तनामधातुवृत्तिः समाप्ता॥

शुभं भवतु

अथ माधवीयधातुवृत्तौ प्रसङ्गोपात्तग्रन्थकृतां

नामपरिचायकं पत्रम् ।

पुरुषकारः ।
स्वामी ।
हेलाराजः ।
मैत्रेयः ।
दैवपुरुषकारौ ।
भट्टभास्करः ।
क्षीरस्वामी ।
शाकटायनः ।
गुप्तः ।
चन्द्रः ।
वर्धमानः ।
हरदत्तः ।
गणरत्नः ।
महोदधिकारः ।
दुर्गः ।
भोजः ।
वामनः ।
शाकलः ।
जिनेन्द्रः ।
इन्दुः ।
श्रीभद्रः ।
कैयटकारः ।
वार्ष्यायणिः ।
भाष्यकारः ।
पतञ्जलिः ।
आचार्याः ।
वृत्तिकारः ।
सुभूतिः ।
सुबोधिनीकारः ।
भागुरिः ।
यादवप्रकाशः ।
प्रदीपकृत् ।
आभरणकारः ।
काश्यपः ।
गणकारः ।
श्रीकरः ।
न्यासकृतः ।
सूत्रकारः ।
सुधाकरः ।
श्रीकराचार्यः ।
भोजः ।
राजानकः ।
धनपालः ।
जयादित्यः ।
बोधिन्यासकृतः ।
वासुदेवः ।
तरङ्गिणीकारः ।
देवः ।
केशवस्वामी ।
शिवस्वामी ।
दौर्गाः ।
आत्रेयः ।
सोरदेवः ।
चान्द्रः ।
कौमारः ।
सुधाकरकारः ।
प्रक्रियारत्नकारः ।
सम्मताकारः ।
रामदेवमिश्रः ।
कौशिकः ।
विज्ञानेश्वरः ।
रक्षितः ।
व्याघ्रभूतिः ।
दण्डनाथः ।
प्राचीनाः ।
न्यासकारः ।
भोजराजः ।
पूर्णचन्द्रः ।
नन्दी ।
भोजः ।
यज्ञनारायणः ।

इति माधवीयधातुवृत्तौ प्रसङ्गोपात्तग्रन्थकृतां नामपरिचयः ।

अथ माधवीयधातुवृत्तौ प्रसङ्गोपात्तग्रन्थानाम् परिचायकं पत्रम् ।

मैत्रेयेन्द्रन्यासः ।
रक्षितः ।
पदमञ्जरी ।
वृत्तिः ।
वेदः ।
भट्टिः ।
वृत्तिप्रदीपः ।
यादवप्रकाशः ।
निघण्टुः ।
न्यासः ।
प्रातिशाख्यम् ।
प्रकाशः ।
बोधिन्यासः ।
कैयटः ।
शाकटायनवृत्तिः ।
गणरत्नः ।
महोदधिः ।
वृत्तिन्यासः ।
गणवृत्तिः ।
वैजयन्तिः ।
प्रक्रियारत्नः ।
उद्योतः ।
तरङ्गिणी ।
शाकटायनसूत्रव्याख्या ।
अमोघा ।
सम्मता ।
उणादिवृत्तिः ।
अमरः ।
हेलाराजीयम् ।
वृत्तिव्याख्या ।
कोशः ।

इति माधवीयधातुवृत्तौ प्रसङ्गोपात्तग्रन्थानाम्परिचयः ।

अथ पाणिनिव्याकरणग्रन्थकाराणां

नामकृतिपरिचायकं पत्रम् ।

पाणिनिः ।	सूत्रपाठः, धातुपाठः, गणपाठः ।
वररुचिः ।	सूत्रवार्तिकपाठसूत्रवृत्तिः । (वाररुचसंग्रहः)
कात्यायनः ।	सूत्रवार्तिकपाठः ।
व्याडिः ।	संग्रहः । परिभाषावृत्तिः
पतञ्जलिः ।	महाभाष्यम्
हरिः ।	महाभाष्यव्याख्या (वाक्यपदीयम्)
हेलाराजः ।	व्यापदीयव्याख्या । (किरणप्रकाशः)
पुञ्जराजः ।	वाक्यपदीयव्याख्या
कैयटः ।	महाभाष्यव्याख्या । (प्रदीपः)
नीलकण्ठः ।	प्रदीपटीका (कैयटप्रकाशः)
रामचन्द्रस्वरस्वती ।	,, ,, (विवरणम्)
नारायणः ।	,, ,, (विवरणम्)
,, ,,	वाररुचसंग्रहटीका । (दीपप्रभा)
,, ,,	सूत्रवृत्तिः । (शब्दभूषणम्)
रामकृष्णानन्दः ।	महाभाष्यटीका ।
शिवरामेन्द्रः ।	,, ,,
,, ,,	सूत्रवृत्तिः ।
लक्ष्मणसूरिः ।	,, ,, (आदर्शः)
व्याघ्रभूतिः ।	सूत्रवार्तिकम् ।
कुणिः ।	सूत्रवृत्तिः ।
विठ्ठलः ।	सूत्रवृत्तिः ।
जयन्तः ।	सूत्रवृत्तिटीका
जयादित्यवामनौ ।	पाणिनिसूत्रवृत्तिः (काशिका)
हरदत्तः ।	काशिकाव्याख्या । (पदमञ्जरी)
रङ्गनाथः ।	पदमञ्जरीव्याख्या । (मकरन्दः)
न्यासकारः ।	,, ,, (न्यासः)
शिवभट्टः ।	न्यासव्याख्या (कुङ्कुमविकाशः)
महामिश्रः ।	,, ,, (व्याकरणप्रकाशः)
जिनेन्द्रबुद्धिः ।	,, ,, (विवरणपञ्चाशिका)
वासुदेवः ।	,, ,, (काशिकावृत्तिसारः)
विप्रराजेन्द्रः ।	सूत्रविवरणम् । (शब्दामृतम्)

उदयनः ।	सूत्रवृत्तिः । (मितवृत्त्यर्थसंग्रहः)
सीरदेवः ।	,, ,,
,, ,,	परिभाषावृत्तिः ।
रामचन्द्रः ।	प्रक्रियाकौमुदी ।
विट्ठलः ।	प्रक्रियाव्याख्या । (प्रसादः)
शेषकृष्णः ।	,, ,,
,, ,,	पदचन्द्रिका ।
,, ,,	स्फोटतत्वनिरूपणम् ।
रामचन्द्रशेषः ।	प्रक्रियाकौमुदीटीका (गूढभाववृत्तिः)
जयन्तः (मधुसूदनपुत्रः) ।	,, ,, (तत्वचन्द्रः)
वारणावतेशः ।	,, ,, (अमृतस्रुतिः)
रामभट्टः ।	,, ,, ,,
विश्वकर्मा ।	,, ,, (सत्प्रक्रियाव्याकृतिः)
हरिवल्लभः ।	कौस्तुभव्याख्या । (दर्पणा)
कृष्णमिश्रः ।	,, ,, (भावदीपः)
नागेशः ।	,, ,, (विषमी)
,, ,,	कैयटव्याख्या (उद्योतः)
,, ,,	सिद्धान्तकौमुदीव्याख्या (बृहच्छब्देन्दुशेखरः)
,, ,,	,, ,, ,, (लघुशब्देन्दुशेखरः
,, ,,	परिभाषेन्दुशेखरः
,, ,,	बृहन्मञ्जूषा । लघुमञ्जूषा । परमलघुमञ्जूषा ।
भट्टोजीदीक्षितः ।	सूत्रव्याख्या (सिद्धान्तकौमुदी)
,, ,,	सिद्धान्तकौमुदीव्याख्या (प्रौढमनोरमा)
,, ,,	सूत्रव्याख्या (शब्दकौस्तुभः)
हरिदीक्षितः ।	मनोरमाव्याख्या-बृहच्छब्दरत्नम् । लघुशब्दरत्नम् ।
कल्याणमल्लः ।	,, ,, ,, (शब्दरत्नदीपः)
कृष्णमिश्रः ।	मनोरमाव्याख्या । (कल्पलता)
,, ,,	सिद्धान्तकौमुदीव्याख्या । (रत्नार्णवः)
,, ,,	लघुमञ्जूषाटीका (कुञ्जिका)
चक्रपाणिशेषः ।	मनोरमाखण्डनम् ।
जगन्नाथः ।	मनोरमाकुचमर्दिनी ।
ज्ञानेन्द्रसरस्वती ।	सिद्धान्तकौमुदीव्याख्या (तत्वबोधिनी)
कृष्णमौनिः ।	,, ,, ,, (सुबोधिनी)
,, ,,	,, ,, ,, (स्फोटचन्द्रिका)
अनन्तः ।	सिद्धान्तकौमुदीटीका (बालमनोरमा)
नीलकण्ठः ।	,, (वैयाकरणसिद्धान्तरहस्यम्)
वासुदेवः ।	,, ,, ,, ,,
रामकृष्णः ।	,, ,, (वैयाकरणसिद्धान्तरत्नाकरः)
उदयङ्करः ।	परिभाषाप्रदीपार्चिः ।
,, ,,	लघुशब्देन्दुशेखरव्याख्या (ज्योत्स्ना)

बालम्भट्टः ।	उद्योतटीका (छाया)
,, ,,	शब्देन्दुशेखरटीका (चिदस्थिमाला)
,, ,,	शब्दरत्नव्याख्या (भावप्रकाशः)
,, ,,	कौस्तुभव्याख्या । (उद्योतः)
,, ,,	परिभाषेन्दुशेखरटीका (गदा)
,, ,,	लघुमंजूषाटीका (कला)
राजारामः ।	लघुशब्देन्दुशेखरव्याख्या ।
भैरवमिश्रः ।	,, ,, ,, (चन्द्रकला)
,, ,,	वैयाकरणभूषणसारटीका (परीक्षा)
,, ,,	परिभाषेन्दुशेखरव्याख्या (भैरवी)
,, ,,	शब्दरत्नव्याख्या । (भैरवी)
घुसेलसदाशिवभट्टः ।	लघुशब्देन्दुव्याख्या (सदाशिवभट्टी)
पाठकः ।	,, ,, (पाठकी)
,, ,,	परिभाषेन्दुशेखरटीका (पाठकी)
अभ्यंकरभास्करशास्त्री ।	लघुशब्देन्दुशेखरव्याख्या (विवरणम्)
गजेन्द्रगडकरराघवाचार्यः ।	,, ,, ,, (विषमी)
,, ,,	परिभाषेन्दुशेखरटीका (त्रिपथगा)
,, ,,	कौस्तुभव्याख्या (प्रभा)
अभ्यंकरवासुदेवशास्त्री ।	लघुशब्देन्दुशेखरव्याख्या । (गूढार्थप्रकाशः)
,, ,,	परिभाषेन्दुशेखरटीका । (तत्वादर्शः)
लक्ष्मीनृसिंहः ।	सिद्धान्तकौमुदीव्याख्या ।
इन्द्रदत्तः ।	,, ,, ,,
विश्वेश्वरतीर्थः ।	,, ,, ,,
तारानाथः ।	,, ,, ,,(सरला)
वरदराजः ।	सूत्रव्याख्या (लघुकौमुदी । मध्यकौमुदी)
मौनिजयकृष्णः ।	,, ,,(लघुकौमुदीव्याख्या । मध्यकौमुदीव्याख्या)
विश्वेश्वरः ।	सूत्रवृत्तिः (व्याकरणसुधामहानिधिः)
सदाशिवमिश्रः ।	,, ,, (गुढार्थदीपिनी)
अन्नंभट्टः ।	,, ,, ,,
धरणीधरः ।	,, ,, (वैयाकरणसर्वस्वम्)
तारेरामचन्द्रभट्टः ।	,, ,, ,,
बलरामः ।	,, ,, धातुप्रकाशः ।
माधवः ।	धातुपाठटीका (धातुवृत्तिः)
रक्षितः ।	,, ,, (धातुप्रदीपः)
वर्धमानः ।	गणपाठटीका । (गणरत्नमहोदधिः)
शरणदेवः ।	परिभाषाटीका । (दुर्घटवृत्तिः)
वोपदेवः	,, ,, (कामधेनुः)
श्रीपतिः ।	,, ,, (ज्ञानदीपिका)
,, ,,	शब्दरत्नव्याख्या (भैरवी)
पुरुषोत्तमः ।	प्रयोगरत्नमाला ।

विश्वरूपः ।	विश्वरूपनिबन्धः ।
रत्नेशः ।	लक्षणसङ्ग्रहः ।
" "	स्फोटसिद्धिन्यायविचारः ।
कौण्डभट्टः ।	बृहद्वैयाकरणभूषणम् । वैयाकरणभूषणसारः ।
वनमाली ।	वैयाकरणभूषणटीका । (मतोन्मज्जिनी)
हरिवल्लभः ।	वैयाकरणभूषणसारटीका । (लघुभूषणकान्तिः)
मन्नुदेवः ।	वैयाकरणभूषणसारटीका। (बृहद्दर्पणा । लघुदर्पणा)
" "	परिभाषेन्दुटीका । (दोषोद्धरणम्)
महानन्दः ।	वैयाकरणभूषणसारटीका
नीलकण्ठः ।	पाणिनीयदीपिका ।
इन्दिरापतिः ।	परिभाषेन्दुशेखरटीका (परीक्षा)
भीमभट्टः ।	(भैमी)
शङ्करभट्टः ।	(शाङ्करी)
लक्ष्मीनृसिंहः ।	(त्रिशिखा)
द्विवेदीहरिनाथः ।	(अकाण्डताण्डवम्)
विष्णुभट्टः ।	(चिच्चन्द्रिका)
राजारामदीक्षितः ।	लघुमञ्जूषाटीका
विष्णुरामः ।	परिभाषाप्रकाशः
कुप्पुशास्त्री ।	परिभाषाभास्करः
रामभद्राश्रमः ।	सिद्धान्तचन्द्रिका ।
अनन्तभट्टः ।	शब्दसुधा ।
गोडबोलेनारायणशास्त्री ।	प्रातिपदिकसंज्ञावादः ।
" - " "	वाक्यवादः
हरियशोमिश्रः ।	वाक्यवादटीका । (वाक्यदीपिका)
म. म. पटवर्धनतात्याशास्त्री ।	परिभाषेन्दुटीका (भूतिः)
म० म० जयदेवमिश्रः ।	" " (विजया)
म० म० पर्वतीयनित्यानन्दपन्तः ।	शब्देन्दुशेखरटीका (शास्त्रार्थरत्नावली)
म० म० भारद्वाजगोविन्दशास्त्री ।	शब्देन्दुशेखरटीका । (दीपकम्)
	परिभाषेन्दुशेखरटीका (जटाजूटः)

इति पाणिनिव्याकरणग्रन्थकाराणां नामकृतिपरिचयः ।

अथ माधवीयधातुवृत्तिस्थधातूनाम—

अकारादिक्रमेण सूची ।

३८ धा०

धातुनाम	सू. अं.	पृ. अं.
खोर्ऋ	५४५	१०६
खोलृ	५४४	१०६
ख्या	५०	२५७
	ग	
गज	२४३	७२
गज	११३	३८५
गजि	२४४	७२
गडि	३५७	८२
गडि	६५	५३
गण	३११	३९७
गद	५२	५१
गदी	३१८	३९७
गद्गद	२६	४०५
गन्ध	१५०	३८७
गम्लृ	९६३	१११
गर्ज	२२४	७०
गर्द	५७	५२
गर्ब	४१९	८८
गर्व	५७५	१११
गर्व	३६१	३९९
गर्ह	६२७	११७
गर्ह	३०३	३९६
गल	५३१	१०६
गल	१६५	३८८
गल्भ	३८९	८६
गल्ह	६२८	११७
गवेष	३४१	३९८
गा	२४	२८०
गाङ्	९३१	१८५
गाधृ	४	३६
गाहू	६४०	११८
गु	११५	३३६
गुङ्	९३०	१८४
गुज	८७	३३४
गुजि	२०१	४७
गुद	२४	४४
गुध	१३	२८४
गुध	५६	३०३
गुड	९६५	१३६
गुड	८८	३३४
गुडि	५०	३८१
गुण	३५२	३९९
गुप	१२९	३१०
गुप	९६१	१८८
गुप	२३६	३१२
गुपू	३९२	८६
गुफ	३७	३२९
गुम्फ	३८	३२९
गुरी	४६	२१३
गुरी	१२२	३३६
गुर्द	२३	४४
गुर्द	१३०	३८६
गुर्वी	५६६	११०
गूर	१६०	३८८
गृ	९१९	१८०
गृ	१७३	३८९
गृज	२४५	७२
गृजि	२४६	७२
गृधु	१३७	३११
गृह	३५५	३९९
गृहू	६४१	११८
गृहु	८८०	१५९
गॄ	१२६	३४०
गॄ	२७	३६९
गेपृ	३६६	८३
गेवृ	४९८	१०१
गेषृ	६०६	११५
गै	९०१	१६९
गोम	३३४	३९८
गोष्ट	२५४	७३
ग्लसु	६२२	११६
ग्लुचु	१९६	६६
ग्लुञ्चु	१९९	६६
ग्लेपृ	३६३	८३
ग्लेपृ	३६७	८३
ग्लेवृ	४९९	१०१
ग्लै	८८७	१६७
ग्रथि	३६	४६

धातुनाम	सू. अं.	पृ. अं.	धातुनाम	सू. अं.	पृ. अं.
चिञ्	९९	३८४	श्चुतिर्	४०	४७
चित	१३९	३८७		छ	
चिंति	२	३७८	छद	२९१	३९९
चिती	३९	४७	छदि	४३	३८१
चिट	३१२	७८	छर्दि	८०१	१३९
चित्र	३७०	४००	छप	३९९	४०१
चित्र	३७१	४००	छमु	४६६	९९
चिरि	३०	३२२	छर्द	५९	३८१
चिल	७४	३३२	छष	८७९	१९९
चिल्ल	५२७	१०९	छिदिर्	३	३४८
चीक	२८६	३९९	छिद्र	३७८	४०१
चीव	२३९	३९२	छुट	९६	३३९
चीभृ	३८१	८४	छुप	१३४	३४३
चीवृ	८६४	१६७	छुर	९०	३३४
चुक्क	६२	३८२	उछृदिर्	८	३६०
चुट	७८	३८३	छृदी	२७९	३९४
चुट्	९९	३३९	छेद	३८९	४०१
चुट	१८६	३९०	छो	३८	२९०
चुटि	१२४	३८६		ज	
चुड्ड	२५	३८०	जक्ष	६१	२६४
चुड	११०	३३९	जज	२३९	७२
चुडि	३२१	८०	जजि	२४०	७२
चुड्ड	३४३	८१	जट	३०२	७७
चुद	९८	३८२	जन	२३	२८०
चुप	४००	८७	जनी	४१	२९१
चुबि	१०१	३८९	जप	३९९	८७
चुर	१	३७७	जभि	१८१	३९०
चुरण	२३	४०९	जभी	३८९	८९
चुल	६८	३८२	जसु	४६७	९९
चुल्ल	५२९	१०९	जर्ज	१८	३२७
चूरी	६०	२९३	जर्ज	७०३	१२९
चूर्ण	१०७	३८९	जल	१०	३७९
चूर्ण	१९	३७१	जल	११८	१४४
चूष	६६२	१२१	जल्प	३९४	८७
चृती	४४	३३०	जष	६७९	१२२
चेल	२२१	१०९	जसि	१३२	३८७
चेष्ट	२६३	७३	जसु	१०३	३०७
च्यु	२११	३९२	जसु	१८३	३९०
च्युङ्	१३६	१८९	जसु	२३४	३८७

धातूनां सूची।

धातुनाम	सू. अं.	पृ.अं.	धातुनाम	सू. अं.	पृ.अं.
लड	१५३	३८८	लुबि	४२४	८८
लष	८७३	१५८	लुभ	१२९	३१८
लस	७०१	१२५	लुभ	२५	३२८
लस	१९३	३९१	लुबि	१२१	३८६
लस्जी	११	३२६	लूञ्	११	३६६
ला	४८	२५७	लूष	७६	३८२
लाखृ	१२०	५८	लेखा	३०	४०५
लाघृ	१११	५७	लेट्	६	४०४
लाछि	२०५	६८	लेपृ	३०७	८३
लाज	२३७	७२	लोकृ	७६	५५
लाजि	२३८	७२	लोकृ	२४१	३९२
लाट	३१	४०५	लोचृ	१६२	६१
लाभ	३९०	४०१	लोचृ	२४१	३९२
लिख	८३	३३३	लोट्	७	४०४
लिगि	१५२	५८	लोडृ	३५३	८२
लिगि	२०४	३९१	लोष्ट	२५५	७२
लिप	१३९	३४६	ल्पिह	६३३	११७
लिश	७१	२९९			
लिश	१३७	३४३		व	
लिह	६	२२६	वकि	८८	५६
ली	३०	३७०	वक्कि	९५	५७
ली	२७१	३९४	वक्ष	६५२	१२१
लीङ्	३१	२८८	वख	१२७	५८
लुजि	२२३	३९२	वखि	१२८	५८
लुञ्च	१८५	६४	वगि	१४४	५८
लुट	३११	७८	वच	५३	२५८
लुट	३२४	८०	वच	३००	३९६
लुट	७३५	१३०	वज	२४९	५२
लुट	११४	३०८	वञ्चु	१८७	६६
लुट	९९	३३५	वञ्चु	१६९	३८८
लुट	२१९	३९२	वट	२९७	७७
लुठ	३३३	८१	वट	७६७	१३६
लुठ	३३९	८१	वट	३१५	३९७
लुठ	७३६	१३०	वट	३७३	४००
लुठि	३४२	८१	वटि	५२	३८१
लुण्ठ	२९	३८०	वठ	३२७	८१
लुथि	४५	४८	वठि	३६९	७३
लुप	११८	३१०	वडि	२६८	७४
लुभ्ल	१४७	३४५	वण	४८२	९२

धातुनाम	सू. अं.	पृ.अं.
वद्	९८९	२१२
वद	२९९	३९६
वहि	११	४१
वघि	१०८	६७
वन	४९८	९३
वन	४९९	९४
वनु	८	३९७
वनु	७११	१३७
वप्	९८३	२०६
वभ्र	५५०	१०७
वम	८३४	१४८
वय	४७१	९७
वर	३१०	३[illegible]७
वर्च	१६०	६०
वर्ण	४९	३७९
वर्ण	३९२	४०१
वर्ध	११९	३८६
वर्ष	९०५	११५
वर्ह	२३४	३१२
वल	४८७	९९
वल्क	३७	३८०
वल्ग्	१४०	५८
वल्गु	३	४०४
वल्भ	३८८	८५
वल्ल	४८८	९९
वल्ह	२३५	३१२
वश	७०	२६८
वष	६७८	१२२
वस	९८५	२०८
वस	१३	२३३
वस	३०९	३९२
वस	३९६	४०१
वसु	१०६	३०७
वस्क	१०१	५७
वह	९८४	२०७
वा	४०	२५३
वाक्षि	७५७	१२१
वाञ्छि	२६६	६८
वाडृ	२८३	७[illegible]

धातुनाम	सू.अं.	पृ.अं.
वात	३४०	३७८
वाश्ट	५५	२९४
वास	३४२	३९८
विच्छ	२३७	३९२
विच्छ	१३९	३४[illegible]
विजि र्	१२	[illegible]७८
विजिर्	५	३४९
विजी	९	३२[illegible]
विजी	२३	३५४
विट	३२३	७८
विथृ	३३	४५
विद्	१३	३[illegible]१
विद	५४	२५९
विद	६३	२९७
विदूल	१४८	३४[illegible]
विद	१७४	३८९
विध	४५	३३[illegible]
विल	७७	३३३
[illegible]ल	७१	३८२
विल	७२	३८२
विश	१४०	३४३
विष	५४	३७५
विषु	६८५	१२३
विष्क	३९४	४०१
विष्ल	१३	२७८
वी	३८	२५२
वीर	३९५	३९९
वृक	९२	५६
वृक्ष	५९६	११३
वृङ्	३८	३७२
वृजी	१९	२३५
वृजी	२४	३५४
वृजी	२७२	३९४
वृञ्	८	३१५
वृञ्	२७३	३९५
वृतु	७४६	१३१
वृतु	५२	२९३
वृतु	७२	३९२
वृतु	२४६	३९२

धातुनाम	सू. अं.	पृ. अं.
वृधु	७४७	१३२
वृधु	२४७	३९२
वृश	११८	३०९
वृष	१७०	३८९
वृषु	६९३	१२४
वृह	७२१	१२८
वृहि	७२२	१२८
वृाह	७२३	१२८
वृहि	२३३	३९२
वृहू	६६	३३१
वॄ	१८	३६८
वॄञ्	१४	३६७
वेञ्	९८६	२०९
वेणृ	८६२	१५६
वेथृ	३४	४५
वेद	११	४०४
वेपृ	३६४	८३
वेल	३३८	३९८
वेलृ	५२८	१०५
वेल्ल	५३३	१०५
वेवीङ्	६७	२६७
वेष्ट	२५२	७३
वेदूह	६३४	११७
वै	९०५	१६९
व्यच	१३	३२७
व्यथ	२५२	१३३
व्यध	७३	३००
व्यय	८६६	१५८
व्यय	३८७	४०१
व्युष	७	२८३
व्युष	१०८	३०८
व्येञ	९८७	२१०
व्रज	२५०	७२
व्रज	८२	३८३
व्रण	४४७	९२
व्रण	३९१	४०१
व्रश्चू	१२	३२६
व्री	३३	३७०
व्रीङ्	३२	२८९

धातुनाम	सू. अं.	पृ. अं.
व्रीड	१९	२८५
व्रुड	१११	३३५
	श	
शक	७९	३०१
शकि	८६	५५
शक्लृ	१६	३१८
शच	१६३	६१
शट	२९६	७७
शठ	३७	३८०
शठ	३१२	३९७
शठ	३३६	८१
शठ	१५६	३८८
शाडि	२७६	७५
शण	७८९	१३७
शदूल	८४	१५२
शदूल	१४४	३५४
शप	९८०	२०४
शप	६०	२९५
शम	१६१	३८८
शमु	९३	३०५
शर्ब	४२०	८८
शर्व	५७७	१११
शल	४८६	९९
शल	८२८	१४६
शल्भ	३८७	८५
शव	७११	१२६
शश	७१२	१२६
शष	६७७	१२२
शसि	३२०	११६
शसु	७१३	१२५
शसु	७१४	१२६
शाखृ	१२३	५८
शाडृ	२८६	७५
शान	९७७	२०१
शासु	१२	२३२
शासु	६५	२६६
शिक्ष	५९७	११३
शिघि	१५९	६०
शिजि	१७	२३५
शिञ्	३	३१३

इति माधवीयधातुवृत्तिस्थधातूनाम